# तैत्तिरीय-संहिता

Taittiriya Samhita

sanskritdocuments.org

March 24, 2018

# Taittiriya Samhita

# तैत्तिरीय-संहिता

## Sanskrit Document Information

Text title : Taittiriya SamhitA, Brahmana and Aranyaka

File name : tattirIyasamhitA.itx

Category : upanishhat, svara, upanishad

Location : doc_upanishhat

Transliterated by : Muralidhara B A muraliba at gmail.com

Acknowledge-Permission: Professor Anathakrishna

Latest update : March 21, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 24, 2018

*sanskritdocuments.org*

# Taittiriya Samhita

# तैत्तिरीय-संहिता

Taittiriya Samhita

# तैत्तिरीय-संहिता

## ॥ प्रथमं काण्डम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### प्रथमकाण्डे प्रथमः प्रश्नः १

१ इषे त्वोर्जे त्वा वायवः स्थोपायवस्स्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मण
आ प्यायध्वमघ्निया देवभाग मूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा
वस्स्तेन ईशत माऽघशꣳसो रुद्रस्य हेतिः परि वो वृणक्तु ध्रुवा अस्मिन्गोपतौ स्यात
बह्वीर्यजमानस्य पशून्पाहि ॥ इषे त्रिचत्वारिꣳशत् ॥ १। १। १॥

२ यज्ञस्य घोषदसि प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः प्रेयमगाद्धिषणा बर्हिरच्छ मनुना
कृता स्वधया वितष्टा त आवहन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमिह बर्हिरासदे देवानां
परिषूतमसि वर्षवृद्धमसि देवबर्हिर्मा त्वाऽन्वङ्मा तिर्यक्पर्व ते राध्या समाच्छेत्ता ते मा
रिषन्देवबर्हिः शतवल्शं वि रोह सहस्रवल्शा

३ वि वयꣳ रुहेम पृथिव्याः संपृचः पाहि सुसंभृता त्वा सम्भराम्यदित्यै रास्नाऽसीन्द्राण्यै
सन्नहनं पूषा ते ग्रन्थिङ्ग्रथ्नातु स ते माऽऽस्थादिन्द्रस्य त्वा बाहुभ्यामुद्यच्छे बृहस्पतेर्मूर्ध्ना
हराम्युर्वन्तरिक्षमन्विहि देवङ्गममसि ॥
सहस्रवल्शा अष्टात्रिꣳशच्च ॥ १। १। २॥

४ शुंधध्वं दैव्याय कर्मणे देवयज्यायै मातरिश्वनो घर्मोऽसि द्यौरसि पृथिव्यसि विश्वधाया
असि परमेण धाम्ना दृꣳहस्व मा ह्वार्वसूनाम्पवित्रमसि शतधारं वसूनां पवित्रमसि
सहस्रधारꣳ हुतः स्तोको हुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याꣳ
सा विश्वायुः सा विश्वव्यचाः सा विश्वकर्मा सम्पृच्यध्वमृतावरीरूर्मिणीर्मधुमत्तमा मन्द्रा
धनस्य सातये सोमेन त्वाऽऽतनच्मीन्द्राय दधि विष्णो हव्यꣳ रक्षस्व ॥ सोमेनाष्टौ च
॥ १। १। ३॥

५ कर्मणे वान्देवेभ्यः शकेयं वेषाय त्वा प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो धूरसि

धूर्व धूर्वन्तन्धूर्व तं योऽस्मान्धूर्वति तन्धूर्वयं वयं धूर्वामस्त्वं देवानामसि सस्नितमं
पप्रितमञ्जुष्टतमं वह्नितमं देवहूतममह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मित्रस्य त्वा
चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा
६ हिꣳसिषमुरु वाताय देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये
जुष्टन्निर्वपाम्यग्नीषोमाभ्यामिदं देवानामिदमु नः सह स्फात्यै त्वा नारात्यै सुवरभि
विख्येषं वैश्वानरं ज्योतिर्दृꣳहन्तान्दुर्या द्यावापृथिव्योरुर्वन्तरिक्षमन्विह्यदित्यास्त्वोपस्थे
सादयाम्यग्ने हव्यꣳ रक्षस्व ॥ मात्वा षट्चत्वारिꣳशच्च । ॥ १। १। ४॥
७ देवो वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरापो देवीरग्रेपुवो अग्रे
गुवोऽग्र इमं यज्ञं नयताग्रे यज्ञपतिन्धत्त युष्मानिन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं
वृत्रतूर्ये प्रोक्षिताः स्थाग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्याꣳ शुन्धध्वन्दैव्याय कर्मणे
देवयज्याया अवधूतꣳ रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वा
८ पृथिवी वेत्त्वधिषवणमसि वानस्पत्यं प्रति त्वाऽदित्यास्त्वग्वेत्त्वग्नेस्तनूरसि वाचो
विसर्जनन्देववीतये त्वा गृह्णाम्यद्रिरसि वानस्पत्यः स इदं देवेभ्यो हव्यꣳ सुशमि
शमिष्वेषमा वदोर्जमा वद द्युमद्वदत वयꣳ संघातञ्जेष्म वर्षवृद्धमसि प्रति त्वा
वर्षवृद्धंवेत्तु परापूतꣳ रक्षः परापूता अरातयो रक्षसां भागोऽसि वायुर्वो विविनक्तु
देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु ॥ त्वा भाग एकादश च । ॥ १। १। ५॥
९ अवधूतꣳ रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रतित्वा पृथिवी वेत्तु
दिवस्स्कम्भनिरसि प्रति त्वाऽदित्यास्त्वग्वेत्तु धिषणाऽसि पर्वत्या प्रति त्वा
दिवस्स्कम्भनिर्वेत्तु धिषणाऽसि पार्वतेयी प्रति त्वा पर्वतिर्वेत्तु देवस्य त्वा सवितुः
प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामधिवपामि धान्यमसि धिनुहि देवान्प्राणाय
त्वाऽपानाय त्वा व्यानाय त्वा दीर्घामनु प्रसितिमायुषे धान्देवो वस्सविता हिरण्यपाणिः
प्रतिगृह्णातु ॥ प्राणायत्वा पञ्चदश च । ॥ १। १। ६॥
१० धृष्टिरसि ब्रह्म यच्छापाऽग्नेऽग्निमामादञ्जहि निष्क्रव्यादꣳसेधा देवयजं वह निर्दग्धꣳ
रक्षो निर्दग्धा अरातयो ध्रुवमसि पृथिवीन्दृꣳहायुर्दृꣳह प्रजान्दृꣳह सजातानस्मै
यजमानाय पर्यूह धर्त्रमस्यन्तरिक्षं दृꣳह प्राणं दृꣳहापानं दृꣳह सजातानस्मै यजमानाय
पर्यूह धरुणमसि दिवं दृꣳह चक्षुर्
११ दृꣳह श्रोत्रं दृꣳह सजातानस्मै यजमानाय पर्यूह धर्माऽसि दिशो दृꣳह

योनिं दृꣳह प्रजां दृꣳह सजातानस्मै यजमानाय पर्यूह चितस्स्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानाय पर्यूह भृगूणामंगिरसां तपसा तप्यध्वं यानि घर्मे कपालान्युप चिन्वन्ति वेधसः ॥ पूष्णस्तान्यपि व्रत इन्द्रवायू वि मुञ्चताम् ॥
चक्षुरष्टाचत्वारिꣳशच्च ॥ १। १। ७॥
१२ संवपामि समापो अद्भिरग्मत समोषधयो रसेन सꣳ रेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिः सृज्यध्वमद्भ्यः परि प्रजाता स्स्थ समद्भिः पृच्यध्वं जनयत्यै त्वा संयौम्यग्नये त्वाऽग्नीषोमाभ्यां मखस्य शिरोऽसि घर्मोऽसि विश्वायुरुरु प्रथस्वोरु ते यज्ञपतिः प्रथतान्त्वचङ्गृह्णीष्वाऽन्तरितꣳ रक्षोऽन्तरिता अरातयो देवस्त्वा सविता श्रपयतु वर्षिष्ठे अधि नाकेऽग्निस्ते तनुवं माऽति धागग्ने हव्यꣳ रक्षस्व सम्ब्रह्मणा पृच्यस्वैकताय स्वाहा द्विताय स्वाहा त्रिताय स्वाहा ॥ सविता द्वाविꣳशतिश्च ॥ १। १। ८॥
१३ आदद इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजाः पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषमपहतोऽररुः पृथिव्यै व्रजं गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यश्च वयं द्विष्मस्तमतो मा मौगपहतोऽररुः पृथिव्यै देवयजन्यै व्रजं
१४ गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यश्च वयं द्विष्मस्तमतो मा मौगपहतोऽररुः पृथिव्या अदेवयजनो व्रजं गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान्द्वेष्टि यश्च वयं द्विष्मस्तमतो मा
१५ मौगररुस्ते दिवं मा स्कान् वसवस्त्वा परिगृह्णन्तु गायत्रेण छन्दसा रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वा परिगृह्णन्तु जागतेन छन्दसा देवस्य सवितुः सवे कर्म कृण्वन्ति वेधस ऋतमस्यृत सदनमस्यृत श्रीरसि धा असि स्वधा अस्युर्वी चासि वस्वी चासि पुरा क्रूरस्य विसृपो विरफ्शिन्नुदादाय पृथिवीं जीरदानुर्यामैरयञ्चन्द्रमसि स्वधाभिस्तान्धीरासो अनुदृश्य यजन्ते ॥ देवयजन्यैव्रजं तमतोमा विरफ्शिन्नेकादश च ॥ १। १। ९॥
१६ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयोऽग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामि गोष्ठम्मा निर्मृक्षं वाजिनन्त्वा सपत्नसाहꣳ सम्मार्ज्मि वाचं प्राणं चक्षुः श्रोत्रं प्रजां योनिं मा निर्मृक्षं वाजिनीन्त्वा सपत्नसाहीꣳ सम्मार्ज्म्याशासाना सौमनसं प्रजाꣳ सौभाग्यन्तनूम् ॥ अग्नेरनुव्रता भूत्वा सन्नह्ये सुकृताय कम् ॥ सुप्रजसस्त्वा वयꣳ सुपत्नीरुप

१७ सेदिम ॥ अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् ॥ इमं विष्यामि वरुणस्य पाशं
यमबध्नीत सविता सुशेवः ॥ धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या कृणोमि
॥ समायुषा सम्प्रजया समग्ने वर्चसा पुनः ॥ सम्पत्नी पत्याऽहङ्गच्छे समात्मा तनुवा
मम ॥ महीनां पयोऽस्योषधीनाꣳ रसस्तस्य तेऽक्षीयमाणस्य नि
१८ र्वपामि महीनां पयोऽस्योषधीनाꣳ रसोऽदब्धेन त्वा चक्षुषाऽवेक्षे सुप्रजास्त्वाय
तेजोऽसि तेजोऽनु प्रेह्यग्निस्ते तेजो मा वि नैदग्नेर्जिह्वाऽसि सुभूर्देवानां धाम्ने धाम्ने
देवेभ्यो यजुषेयजुषे भव शुक्रमसि ज्योतिरसि तेजोऽसि देवो वस्सवितोत्पुनात्वच्छिद्रेण
पवित्रेण वसोः सूर्यस्य रश्मिभिः शुक्रन्त्वा शुक्रायान्धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे
गृह्णामि ज्योतिस्त्वा ज्योतिष्यर्चिस्त्वाऽर्चिषि धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि ॥
उपनीरश्मिभिः शुक्रꣳ षोडश च ॥ १। १। १०॥
१९ कृष्णोऽस्याखरेष्ठोऽग्नये त्वा स्वाहा वेदिरसि बर्हिषे त्वा स्वाहा बर्हिरसि
स्रुग्भ्यस्त्वा स्वाहा दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा स्वधा पितृभ्य ऊर्ग्भव
बर्हिषद्भ्य ऊर्जा पृथिवीं गच्छत विष्णोः स्तूपोऽस्यूर्णाम्रदसन्त्वा स्तृणामि स्वासस्थन्देवेभ्यो
गन्धर्वोऽसि विश्वावसुर्विश्वस्मादीषतो यजमानस्य परिधिरिड ईडित इन्द्रस्य बाहुरसि
२० दक्षिणो यजमानस्य परिधिरिड ईडितो मित्रा वरुणौ त्वोत्तरतः परिधत्तान्ध्रुवेण धर्मणा
यजमानस्य परिधिरिड ईडितः सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्या वीतिहोत्रन्त्वा
कवे द्युमन्तꣳ समिधीमह्यग्ने बृहन्तमध्वरे विशो यन्त्रे स्थो वसूनाꣳ रुद्राणामादित्यानाꣳ
सदसि सीद जुहूरुपभृद्ध्रुवाऽसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि सीदैता
असदन्थ्सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियम्
॥
बाहुरसि प्रिये सदसि पञ्चदश च ॥ १। १। ११॥
२१ भुवनमसि वि प्रथस्वाग्ने यष्टरिदन्नमः ॥ जुह्वेह्यग्निस्त्वा ह्वयति देवयज्याया उपभृदेहि
देवस्त्वा सविता ह्वयति देवयज्याया अग्नाविष्णू मा वामव क्रमिषं वि जिहाथां मा
मा सन्ताप्तं लोकम्मे लोककृतौ कृणुतं विष्णोः स्थानमसीत इन्द्रो अकृणोद्वीर्याणि
समारभ्योर्ध्वो अध्वरो दिविस्पृशमह्रुतो यज्ञो यज्ञपतेरिन्द्रावान्थ्स्वाहा बृहद्भाः पाहि माग्ने
दुश्चरितादा मा सुचरिते भज मखस्य शिरोऽसि सञ्ज्योतिषा ज्योतिरङ्क्ताम् ॥ अह्रुत
एकविꣳशतिश्च ॥ १। १। १२॥
२२ वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत् ॥ अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ

अकः ॥ उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ॥ अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ॥ वसुभ्यस्त्वा रुद्रेभ्यस्त्वाऽऽदित्येभ्यस्त्वाक्तꣳ रिहाणा वियन्तु वयः ॥ प्रजां योनिं मा निर्मृक्षमा प्यायन्तामाप ओषधयो मरुतां पृषतयस्स्थ दिवं २३ गच्छ ततो नो वृष्टिमेरय ॥ आयुष्पा अग्नेऽस्यायुर्मे पाहि चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि ध्रुवाऽसि यं परिधिं पर्यधत्था अग्ने देव पणिभिर्वीयमाणः ॥ तन्त एतमनु जोषं भरामि नेदेष त्वदपचेतयातै यज्ञस्य पाथ उप समितꣳ सꣳस्रावभागाः स्थेषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च

२४ देवा इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन् बर्हिषि मादयध्वमग्नेर्वामपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनी सुम्ने मा धत्तन्धुरि धुर्यौ पातमग्नेऽदब्धायोऽशीततनो पाहि माऽद्य दिवः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादविषन्नः पितुङ्कृणु सुषदा योनिग्ग् स्वाहा देवा गातुविदो गातुं वित्वा गातुमित मनस स्पत इमन्नो देव देवेषु यज्ञꣳ स्वाहा वाचि स्वाहा वाते धाः ॥ दिवञ्च वित्वा गातुं त्रयोदश च ॥ १। १। १३॥

२५ उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ॥ उभा दाताराविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम् ॥ अश्रवꣳ हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ॥ अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥ इन्द्राग्नी नवतिं पुरो दासपत्नी रधूनुतम् ॥ साकमेकेन कर्मणा ॥ शुचिन्नु स्तोमन्नवजात मद्येन्द्राग्नी वृत्रहणा जुषेथाम् ॥

२६ उभा हि वाꣳसुहवा जोहवीमि ता वाजꣳसद्य उशते धेष्ठा ॥ वयमु त्वा पथस्पते रथन्न वाजसातये ॥ धिये पूषन्नयुज्महि ॥

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानडर्कम् ॥ स नो रासच्छुरुधश्चन्द्राग्रा धियन्धियꣳ सीषधाति प्र पूषा ॥ क्षेत्रस्य पतिना वयꣳ हितेनेव जयामसि ॥ गामश्वं पोषयित्वा स नो

२७ मृडातीदृशे ॥ क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ॥ मधुश्चुतङ्घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु ॥ अग्ने नय सुपथा राये अस्मान्, विश्वानि देव वयुनानि विद्वान् ॥

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम ॥ आ देवानामपि पन्थामगन्म

यच्छुक्रवाम तदनु प्रवोढुम् ॥ अग्निर्विद्वान्थ्स यजा
२८ थ्सेदु होता सो अध्वरान्थ्स ऋतून्कल्पयाति ॥ यद्वाहिष्ठन्तदग्नये बृहदर्च विभावसो ॥ महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा ॥ पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा ॥ त्वं यज्ञेष्वीड्यः ॥ यद्वो वयं प्रमिनाम व्रतानि विदुषान्देवा अविदुष्टरासः ॥ अग्निष्टद्विश्वमा पृणाति विद्वान्, येभिर्देवाꣳ ऋतुभिः कल्पयाति ॥ जुषेथामा स नो यजादा त्रयोविꣳशतिश्च ॥ १। १। १४॥
इषे त्वा यज्ञस्य शुन्धध्वं कर्मणे देवोऽवधूतं धृष्टिस्सं वपाम्याददे प्रत्युष्टं कृष्णोऽसि भुवनमसि वाजस्योभावां चतुर्दश ॥
इषेदृꣳहं भुवनमष्टा विꣳशतिः ॥
इषे त्वा कल्पयाति ॥

## प्रथमकाण्डे द्वितीयः प्रश्नः २

१ आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस ओषधे त्रायस्वैनग्ग् स्वधिते मैनꣳ हिꣳसीर्देवश्रूरेतानि प्र वपे स्वस्त्युत्तराण्यशीयाऽऽपो अस्मान्मातरः शुन्धन्तु घृतेन नो घृतपुवः पुनन्तु विश्वमस्मत्प्र वहन्तु रिप्रमुदाभ्यः शुचिरा पूत एमि सोमस्य तनूरसि तनुवं मे पाहि महीनां पयोऽसि वर्चोधा असि वर्चो
२ मयि धेहि वृत्रस्य कनीनिकाऽसि चक्षुष्पा असि चक्षुर्मे पाहि चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिस्तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमा वो देवास ईमहे सत्यधर्माणो अध्वरे यद्वो देवास आगुरे यज्ञियासो हवामह इन्द्राग्नी द्यावापृथिवी आप ओषधीस्त्वं दीक्षाणामधिपतिरसीह मा सन्तं पाहि ॥ वर्च ओषधीरष्टौ च ॥ १। २। १॥
३ आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा दीक्षायै तपसेऽग्नये स्वाहा सरस्वत्यै पूष्णेऽग्नये स्वाहाऽऽपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहा विश्वे देवस्य नेतुर्मर्तोऽवृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहर्क्सामयोः शिल्पे स्थस्ते वामा रभे ते मा
४ पातमाऽस्य यज्ञस्योदृच इमां धियꣳ शिक्षमाणस्य देव क्रतुं दक्षं वरुण सꣳशिशाधि ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावꣳ रुहेमोर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे

यच्छ पाहि मा मा मा हिꣳसीर्विष्णोः शर्मासि शर्म यजमानस्य शर्म मे यच्छ नक्षत्राणां माऽतीकाशात् पाहीन्द्रस्य योनिरसि

५ मा मा हिꣳसीः कृष्यै त्वा सुसस्यायै सुपिप्पलाभ्यस्त्वौषधीभ्यः सूपस्था देवो वनस्पतिरूर्ध्वो मा पाह्योदृचः स्वाहा यज्ञं मनसा स्वाहा द्यावापृथिवीभ्याग् स्वाहोरोरन्तरिक्षाथ्स्वाहा यज्ञं वातादा रभे ॥ मा योनिरसि त्रिꣳशच्च ॥ १। २। २॥

६ दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳ सुपारा नो असद्वशे । ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहाऽग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि गोपाय नः स्वस्तये प्रबुधे नः पुनर्ददः । त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं

७ यज्ञेष्वीड्यः ॥ विश्वे देवा अभि मा माऽववृत्रन् पूषा सन्या सोमो राधसा देवः सविता वसोर्वसुदावा रास्वेयथ्सोमाऽऽभूयो भर मा पृणन्पूर्त्या वि राधि माऽहमायुषा चन्द्रमसि मम भोगाय भव वस्त्रमसि मम भोगाय भवोस्राऽसि मम भोगाय भव हयोऽसि मम भोगाय भव

८ छागोऽसि मम भोगाय भव मेषोऽसि मम भोगाय भव वायवे त्वा वरुणाय त्वा निर्ऋत्यै त्वा रुद्राय त्वा देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं वो माऽवक्रमिषमच्छिन्नं तन्तुं पृथिव्या अनु गेषं भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुर एता ते अस्त्वथेमव स्य वर आ पृथिव्या आरे शत्रून् कृणुहि सर्ववीर एदमगन्म देवयजनं पृथिव्या विश्वे देवा यदजुषन्त पूर्व ऋक्सामाभ्यां यजुषा सन्तरन्तो रायस्पोषेण समिषा मदेम ॥

आ त्वꣳ हयोऽसि मम भोगाय भव स्य पञ्चविꣳशतिश्च ॥ १। २। ३॥

९ इयं ते शुक्र तनूरिदं वर्चस्तया सं भव भ्राजं गच्छ जूरसि धृता मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे वाचो यन्त्रमशीय स्वाहा शुक्रमस्यमृतमसि वैश्वदेवꣳ हविः सूर्यस्य चक्षुराऽरुहमग्नेरक्ष्णः कनीनिकां यदेतशेभिरीयसे भ्राजमानो विपश्चिता चिदसि मनाऽसि धीरसि दक्षिणा

१० सि यज्ञियाऽसि क्षत्रियाऽस्यदितिरस्युभयतः शीर्ष्णी सा नः सुप्राची सुप्रतीची सं भव मित्रस्त्वा पदि बध्नातु पूषाऽध्वनः पात्विन्द्रायाध्यक्षायानु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्रस्त्वाऽऽवर्तयतु

मित्रस्य पथा स्वस्ति सोमसखा पुनरेहि सह रय्या ॥ दक्षिणा सोमसखा पञ्च च ॥ १। २। ४॥
११ वस्व्यसि रुद्राऽस्यदितिरस्यादित्याऽसि शुक्राऽसि चन्द्राऽसि बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिरा चिकेतु पृथिव्यास्त्वा मूर्धन्ना जिघर्मि देवयजन इडायाः पदे घृतवति स्वाहा परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान् द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा
१२ अपि कृन्ताम्यस्मे रायस्त्वे रायस्तोते रायः सं देवि देव्योर्वश्या पश्यस्व त्वष्टीमती ते सपेय सुरेता रेतो दधाना वीरं विदेय तव संदृशि माऽहꣳ रायस्पोषेण वि योषम् ॥ अस्य ग्रीवा एकान्नत्रिꣳशच्च ॥ १। २। ५॥
१३ अꣳशुना ते अꣳशुः पृच्यतां परुषा परुर्गन्धस्ते काममवतु मदाय रसो अच्युतोऽमात्योऽसि शुक्रस्ते ग्रहोऽभि त्यं देवꣳ सवितारमूण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभि प्रियं मतिमूर्ध्वा यस्यामतिर्भा अदिद्युतथ्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा सुवः । प्रजाभ्यस्त्वा प्राणाय त्वा व्यानाय त्वा प्रजास्त्वमनु प्राणिहि प्रजास्त्वामनु प्राणन्तु ॥ अनु सप्त च ॥ १। २। ६॥
१४ सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यावन्तमभिमातिषाहꣳशुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन सम्यत्ते गोरस्मे चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णस्तस्यास्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणाम्यस्मे ते बन्धुर्मयि ते रायः श्रयन्तामस्मे ज्योतिः सोमविक्रयिणि तमो मित्रो न एहि सुमित्रधा इन्द्रस्योरु मा विश दक्षिणमुशन्नुशन्तग्ग् स्योनः स्योनग्ग् स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् ॥ ऊरुं द्वाविꣳशतिश्च ॥ १। २। ७॥ ।
१५ उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳ अनु । उर्वन्तरिक्षमन्विह्यदित्याः सदोऽस्यदित्याः सद आसीदास्तभ्नाद्द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि वनेषु व्यन्तरिक्षं ततान वाजमर्वथ्सु पयो अघ्नियासु हृथ्सु
१६ क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधाथ्सोममद्रावुदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्रह्मचोदनौ वरुणस्य स्कम्भनमसि वरुणस्य स्कम्भसर्जनमसि प्रत्यस्तो वरुणस्य पाशः ॥ हृथ्सु पञ्चत्रिꣳशच्च ॥ १। २। ८॥

१७ प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि मा त्वा परिपरी विदन्मा त्वा परिपन्थिनो
विदन्मा त्वा वृका अघायवो मा गन्धर्वो विश्वावसुरा दघच्छ्येनो भूत्वा परा पत
यजमानस्य नो गृहे देवैः सग्ग्स्कृतं यजमानस्य स्वस्त्ययन्यस्यपि पन्थामगस्महि
स्वस्तिगामनेहसं येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु नमो मित्रस्य वरुणस्य
चक्षसे महो देवाय तदृतꣳ सपर्यत दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय
शꣳसत वरुणस्य स्कम्भनमसि वरुणस्य स्कम्भसर्जनमस्युन्मुक्तो वरुणस्य पाशः ॥
मित्रस्य त्रयोविꣳशतिश्च ॥ १। २। ९॥
१८ अग्नेरातिथ्यमसि विष्णवे त्वा सोमस्याऽऽतिथ्यमसि विष्णवे त्वाऽतिथेरातिथ्यमसि
विष्णवे त्वाऽग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वा
या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञं गयस्फानः प्रतरणः
सुवीरोऽवीरहा प्र चरा सोम दुर्यानदित्याः सदोऽस्यदित्याः सद आ
१९ सीद वरुणोऽसि धृतव्रतो वारुणमसि शंयोर्देवानाꣳसख्यान्मा देवानामपसश्छिथ्स्मह्यापतये
त्वा गृह्णामि परिपतये त्वा गृह्णामि तनूनप्त्रे त्वा गृह्णामि शाक्वराय त्वा
गृह्णामि शक्मन्नोजिष्ठाय त्वा गृह्णाम्यनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा
अनभिशस्तेऽन्यमनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरञ्जसा सत्यमुप
गेषꣳ सुविते माधाः ॥ आ मैकं च ॥
१। २। १०॥
२० अꣳशुरꣳशुस्ते देव सोमाऽऽप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा
त्वमिन्द्राय प्यायस्वाऽऽप्यायय सखीन्थ्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीयेष्टा
रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या अग्ने व्रतपते त्वं व्रतानां
व्रतपतिरसि या मम तनूरेषा सा त्वयि
२१ या तव तनूरियꣳ सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानि या ते अग्ने रुद्रिया
तनूस्तया नः पाहि तस्यास्ते स्वाहा या ते अग्नेऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा
गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीग् स्वाहा ॥ त्वयि चत्वारिꣳशच्च ॥ १।
२। ११॥
२२ वित्तायनी मेऽसि तिक्तायनी मेऽस्यवतान्मा नाथितमवतान्मा व्यथितं विदेरग्निर्नभो
नामाग्ने अङ्गिरो योऽस्यां पृथिव्यामस्यायुषा नाम्नेहि यत्तेऽनाधृष्टं नाम यज्ञियं तेन
त्वाऽऽदधेऽग्ने अङ्गिरो यो द्वितीयस्यां तृतीयस्यां पृथिव्यामस्यायुषा नाम्नेहि यत्तेऽनाधृष्टं

नाम
२३ यज्ञियं तेन त्वाऽऽदधे सिꣳहीरसि महिषीरस्युरु प्रथस्वोरु ते यज्ञपतिः
प्रथतां ध्रुवाऽसि देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्वेन्द्र घोषस्त्वा वसुभिः पुरस्तात्पातु
मनोजवास्त्वा पितृभिर्दक्षिणतः पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु विश्वकर्मा
त्वाऽऽदित्यैरुत्तरतः पातु सिꣳहीरसि सपत्नसाही स्वाहा सिꣳहीरसि सुप्रजावनिः
स्वाहा सिꣳही
२४ रसि रायस्पोषवनिः स्वाहा सिꣳहीरस्यादित्यवनिः स्वाहा सिꣳहीरस्या वह
देवान्देवयते यजमानाय स्वाहा भूतेभ्यस्त्वा विश्वायुरसि पृथिवीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं
दृꣳहाच्युतक्षिदसि दिवं दृꣳहाग्नेर्भस्मास्यग्नेः पुरीषमसि ॥
नाम सुप्रजावनिः स्वाहा सिꣳहीः पञ्चत्रिꣳशच्च ॥ १। २। १२॥
२५ युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुना
विदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥
सुवाग्देव दुर्याꣳ आ वद देवश्रुतौ देवेष्वा घोषेथामा नो वीरो जायतां कर्मण्यो यꣳ
सर्वेऽनुजीवाम यो बहूनामसद्वशी । इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य
२६ पाꣳसुर इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे यशस्ये । व्यस्कभ्नाद्रोदसी
विष्णुरेते दाधार पृथिवीमभितो मयूखैः ॥
प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जीह्वरतमत्र रमेथां वर्ष्मन्पृथिव्या दिवो
वा विष्णवुत वा पृथिव्या महो वा विष्णवुत वाऽन्तरिक्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैरा
प्र यच्छ
२७ दक्षिणादोत सव्यात् । विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजाꣳसि
यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णो रराटमसि विष्णोः पृष्ठमसि
विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ अस्य
यच्छैकान्नचत्वारिꣳशच्च ॥ १। २। १३॥
२८ कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजे वामवाꣳ इभेन । तृष्वीमनु प्रसितिं
द्रूणानोऽस्तासि विध्यरक्षसस्तपिष्ठैः ॥ तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता
शोशुचानः । तपूꣳष्यग्ने जुह्वा पतङ्गानसंदितो वि सृज विष्वगुल्काः ॥ प्रति स्पशो वि
सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः । यो नो दूरे अघशꣳसो

२९ यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् । उदग्ने तिष्ठ प्रत्याऽऽ तनुष्व न्यमित्राꣳ
ओषतात्तिग्महेते । यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यत सं न शुष्कम् ॥
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने । अव स्थिरा तनुहि यातुजूनां
जामिमजामिं प्र मृणीहि शत्रून् ॥ स ते
३० जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् । विश्वान्यस्मै सुदिनानि रायो
द्युम्नान्यर्यो विदुरो अभि द्यौत् ॥ सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य
उक्थैः । पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना साऽसदिष्टिः ॥ अर्चामि ते
सुमतिं घोष्यर्वाख्सं ते वावाता जरतामि
३१ यङ्गीः । स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥
इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवाꣳसमनु द्यून् । क्रीडन्तस्त्वा सुमनसः सपेमाभि
द्युम्ना तस्थिवाꣳसो जनानाम् ॥ यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन
। तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥ महो रुजामि
३२ बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ॥ त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ
सुक्रतो दमूनाः ॥ अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः । ते पायवः
सध्रियञ्चो निषद्याऽग्ने तव नः पान्त्वमूर ॥ ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं
दुरितादरक्षन् । ररक्ष तान्थ्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो ना ह
३३ देभुः ॥ त्वया वयꣳ सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान् । उभा शꣳसा
सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥ अया ते अग्ने समिधा विधेम प्रति स्तोमꣳ
शस्यमानं गृभाय । दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥ रक्षोहणं
वाजिनमाऽऽजिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म । शिशानो अग्निः क्रतुभिः समिद्धः स
नो दिवा
३४ स रिषः पातु नक्तम् ॥ वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते
महित्वा । प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥ उत स्वानासो
दिविषन्त्वग्नेस्तिग्मायुधा रक्षसे हन्तवा उ । मदे चिदस्य प्ररुजन्ति भामा न वरन्ते
परिबाधो अदेवीः ॥ अघशꣳसः स ते जरताꣳ रुजामि ह दिवैकचत्वारिꣳशच्च ॥
१। २। १४॥
आप उन्दन्त्वाकूत्यै दैवीमियं ते वस्व्यस्यꣳशुना ते सोमत उदायुषा प्र
च्यवस्वाग्नेरातिथ्यमꣳशुरꣳशुर्वित्तायनी मेसि युंजते कृणुष्व पाजश्चतुर्दश ॥

आपो वस्व्यसि या तवेयंगीश्चतुस्त्रिꣳशत् ॥
आप उन्दन्त्वदेवीः ॥

## प्रथमकाण्डे तृतीयः प्रश्नः ३

१ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददेऽभ्रिरसि नारिरसि परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान् द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपि कृन्तामि दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धतां लोकः पितृषदनो यवोऽसि यवयास्मद्द्वेषो
२ यवयारातीः पितृणाꣳ सदनमस्युद्दिवग्ग् स्तभानाऽन्तरिक्षं पृण पृथिवीं दृꣳह द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणयोर्ध्रुवेण धर्मणा ब्रह्मवनिं त्वा क्षत्रवनिꣳ सुप्रजावनिꣳ रायस्पोषवनिं पर्यूहामि ब्रह्म दृꣳह क्षत्रं दृꣳह प्रजां दृꣳह रायस्पोषं दृꣳह घृतेन द्यावापृथिवी आ पृणेथामिन्द्रस्य सदोऽसि विश्वजनस्य छाया परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतो वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टय इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमस्यैन्द्रमसीन्द्राय त्वा ॥ द्वेष इमा अष्टादश च ॥ १। ३। १॥
३ रक्षोहणो वलगहनो वैष्णवान्खनामीदमहं तं वलगमुद्वपामि यं नः समानो यमसमानो निचखानेदमेनमधरं करोमि यो नः समानो योऽसमानोऽरातीयति गायत्रेण छन्दसाऽवबाढो वलगः किमत्र भद्रं तन्नौ सह विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वाराडसि विश्वासां नाष्ट्राणाꣳ हन्ता
४ रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वलगहनोऽव नयामि वैष्णवान्, यवोऽसि यवयास्मद्द्वेषो यवयाराती रक्षोहणो वलगहनोऽव स्तृणामि वैष्णवान् रक्षोहणो वलगहनोऽभि जुहोमि वैष्णवान् रक्षोहणौ वलगहनावुप दधामि वैष्णवी रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी रक्षोहणौ वलगहनौ परि स्तृणामि वैष्णवी रक्षोहणौ वलगहनौ वैष्णवी बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं वद ॥ हन्तेन्द्राय द्वे च ॥ १। ३। २॥
५ विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः श्वात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदा उशिगसि कविरङ्घारिरसि बम्भारिरवस्युरसि दुवस्वाञ्छुन्ध्यूरसि मार्जालीयः सम्राडसि कृशानुः परिषद्योऽसि पवमानः प्रतक्वाऽसि नभस्वानसंमृष्टोऽसि हव्यसूद ऋतधामाऽसि सुवर्ज्योतिर्ब्रह्मज्योतिरसि सुवर्धामाऽजोऽस्येकपादहिरसि बुध्नियो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥ अनीकेनाष्टौ च ॥ १। ३। ३॥

६ त्वꣳ सो॑म तनू॒कृद्भ्यो॒ द्वेषो᳚भ्यो॒ऽन्यकृ॑तेभ्य उ॒रु य॒न्तासि॒ वरू॑थग्ग्॒ स्वाहा॑ जुषा॒णो अ॒प्तुरा॒ज्य॑स्य वे॒तु स्वाहा॒ऽयं नो॑ अ॒ग्निर्वरि॑वः कृणोत्व॒यं मृधः॑ पु॒र ए॑तु प्रभि॒न्दन्न्॒ । अ॒यꣳ शत्रू᳚ञ्जयतु॒ जर्हृ॑षाणो॒ऽयं वाजं॑ जयतु॒ वाज॑सातौ ॥ उ॒रु वि॒ष्णो॒ वि क्र॑मस्वो॒रु क्षया॑य नः कृधि । घृ॒तं घृ॑तयोने पिब॒ प्रप्र॑ य॒ज्ञप॑तिं तिर ॥

सोमो॑ जिगाति गातु॒विद्

७ दे॒वाना॑मेति निष्कृ॒तमृ॒तस्य॒ योनि॑मा॒सद॒मदि॑त्याः॒ सदो॒ऽस्यदि॑त्याः॒ सद॒ आ सी॑दै॒ष वो॑ देव सवितः॒ सोम॒स्तꣳ रक्ष॑ध्वं॒ मा वो॑ दभदे॒तत् त्वꣳ सो॑म दे॒वो दे॒वानुपा॑गा इ॒दम॒हं म॑नु॒ष्यो॑ मनु॒ष्या᳚न्थ्स॒ह प्र॒जया॑ स॒ह रा॒यस्पोषे॑ण॒ नमो॑ दे॒वेभ्यः॑ स्व॒धा पि॒तृभ्य॑ इ॒दम॒हं निर्व॑रु॒णस्य॒ पाशा॒त् सुव॑र॒भि

८ वि ख्ये॑षं वैश्वान॒रं ज्योति॑र॒ग्ने᳚ व्रतपते॒ त्वं व्र॒ताना᳚ं व्र॒तप॑तिरसि॒ या मम॑ त॒नूस्त्वय्यभू॑दि॒यꣳ सा मयि॒ या तव॑ त॒नूर्मय्यभू॑दे॒षा सा त्वयि॑ यथाय॒थं नौ᳚ व्रतपते व्र॒तिनो᳚र्व्र॒तानि॑ ॥ गा॒तु॒विद॒भ्येक॑त्रिꣳशच्च ॥ १। ३। ४॥

९ अत्य॒न्याँ अग॒ं नान्यानुपा॑गाम॒र्वाक्त्वा॒ परै॑रविदं प॒रोऽव॑रै॒स्तं त्वा॑ जु॒षे वै᳚ष्ण॒वं दे॑वय॒ज्यायै॑ दे॒वस्त्वा॑ सवि॒ता मध्वा॒ऽनक्तोष॑धे॒ त्राय॑स्वैनग्ग्॒ स्वधि॑ते॒ मैनꣳ हिꣳसीर्दिव॑म॒ग्रेण॒ मा ले॑खीर॒न्तरि॑क्षं॒ मध्ये॑न॒ मा हिꣳसीः पृथि॒व्या सं भ॑व॒ वन॑स्पते श॒तव॑ल्शो॒ वि रो॑ह स॒हस्र॑वल्शा॒ वि व॒यꣳ रु॑हेम॒ यं त्वा॒ऽयग्ग्॒ स्वधि॑ति॒स्तेति॑जानः प्रणि॒नाय॑ मह॒ते सौभ॑गा॒याऽच्छि॑न्नो॒ रायः॑ सु॒वीरः॑ ॥ यं दश॑ च ॥ १। ३। ५॥

१० पृ॒थि॒व्यै त्वा॒ऽन्तरि॑क्षाय त्वा दि॒वे त्वा॒ शुन्ध॑तां लो॒कः पि॑तृ॒षद॑नो॒ यवो॑ऽसि य॒वया॒स्मद् द्वेषो॑ य॒वयारा॑तीः पि॒तृणाꣳ सद॑नमसि॒ स्वा॒वे॒शो᳚ऽस्यग्रे॒गा ने॑तृ॒णां व॒नस्पति॒रधि॑ त्वा स्थास्यति॒ तस्य॑ वित्ताद्दे॒वस्त्वा॑ सवि॒ता मध्वा॑ऽनक्तु सुपिप्प॒लाभ्य॒स्त्वौष॑धीभ्य॒ उद्दिव॑ग्ग्॒ स्तभा॒नान्तरि॑क्षं पृण पृथि॒वीमुप॑रेण दृꣳह॒ ते ते॒ धामा᳚न्युश्मसी

११ ग॒मध्ये॒ गावो॒ यत्र॒ भूरि॑शृङ्गा अ॒यासः॑ । अत्राह॒ तदु॑रुगा॒यस्य॒ विष्णोः᳚ पर॒मं प॒दम॑व भाति॒ भूरेः᳚ ॥ विष्णोः॒ कर्मा॑णि पश्यत॒ यतो᳚ व्र॒तानि॑ पस्प॒शे । इन्द्र॑स्य॒ युज्यः॒ सखा᳚ ॥ तद्विष्णोः᳚ पर॒मं प॒दꣳ सदा॑ पश्यन्ति सू॒रयः॑ । दि॒वीव॒ चक्षु॒रात॑तम् ॥ ब्र॒ह्म॒वनिं॑ त्वा क्षत्र॒वनिꣳ सुप्रजा॒वनिꣳ रायस्पोष॒वनिं॒ पर्यू॑हामि॒ ब्रह्म॑ दृꣳह क्ष॒त्रं दृꣳह प्र॒जां दृꣳह रा॒यस्पोषं॑ दृꣳह परि॒वीर॑सि॒ परि॑ त्वा॒ दैवी॒र्विशो᳚ व्ययन्तां॒ परी॒मꣳ रा॒यस्पोषो॒ यज॑मानं मनु॒ष्या॑ अ॒न्तरि॑क्षस्य त्वा॒ सानाव॒व गूहामि ॥ उ॒श्म॒सी॒ पोषमे॒का॒न्नवि॒ꣳशतिश्च॑ ॥ १। ३।

६॥
१२ इषे त्वोपवीरस्युपो देवान्दैवीर्विशः प्रागुर्वह्नीरुशिजो बृहस्पते धारया वसूनि हव्या
ते स्वदन्तां देव त्वष्टर्वसु रण्व रेवती रमध्वमग्नेर्जनित्रमसि वृषणौ स्थ उर्वश्यस्यायुरसि
पुरूरवा घृतेनाक्ते वृषणं दधाथां गायत्रं छन्दोऽनु प्र जायस्व त्रैष्टुभं जागतं छन्दोऽनु
प्रजायस्व भवतं
१३ नः समनसौ समोकसावरेपसौ । मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ
शिवौ भवतमद्य नः ॥ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः । स्वाहाकृत्य
ब्रह्मणा ते जुहोमि मा देवानां मिथुयाकर्भागधेयम् ॥ भवतमेकत्रिꣳशच्च ॥
१। ३। ७॥
१४ आ ददं ऋतस्य त्वा देवहविः पाशेनाऽऽरभे धर्षा मानुषानद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यपां
पेरुरसि स्वात्तं चित् सदेवꣳ हव्यमापो देवीः स्वदतैनꣳ सं ते प्राणो वायुना गच्छताꣳ
सं यजत्रैरङ्गानि सं यज्ञपतिराशिषा घृतेनाक्तौ पशुं त्रायेथाꣳ रेवतीर्यज्ञपतिं प्रियधाऽऽ
विशतोरो अन्तरिक्ष सजूर्देवेन
१५ वातेनाऽस्य हविषस्त्मना यज समस्य तनुवा भव वर्षीयो वर्षीयसि यज्ञे यज्ञपतिं
धाः पृथिव्याः सम्पृचः पाहि नमस्त आतानाऽनर्वा प्रेहि घृतस्य कुल्यामनु सह प्रजया
सह रायस्पोषेणाऽऽपो देवीः शुद्धायुवः शुद्धा यूयं देवाꣳ ऊढ्वꣳ शुद्धा वयं परिविष्टाः
परिवेष्टारो वो भूयास्म ॥ देवेन चतुश्चत्वारिꣳशच्च ॥ १। ३। ८॥
१६ वाक्त आ प्यायतां प्राणस्त आ प्यायतां चक्षुस्त आ प्यायताग् श्रोत्रं त आ प्यायतां
या ते प्राणाञ्छुग्जगाम या चक्षुर्या श्रोत्रं यत् ते क्रूरं यदास्थितं तत् त आ प्यायतां तत्
त एतेन शुन्धतां नाभिस्त आ प्यायतां पायुस्त आ प्यायताꣳ शुद्धाश्चरित्राः शमद्भ्यः
१७ शमोषधीभ्यः शं पृथिव्यै शमहोभ्यामोषधे त्रायस्वैनग्ग् स्वधिते मैनꣳहिꣳसी रक्षसां
भागोऽसीदमहꣳ रक्षोऽधमं तमो नयामि योऽस्मान् द्वेष्टि यं च वयं द्विष्म इदमेनमधमं
तमो नयामीषे त्वा घृतेन द्यावापृथिवी प्रोर्ण्वाथामच्छिन्नो रायः सुवीर उर्वन्तरिक्षमन्विहि
वायो वीहि स्तोकानाग् स्वाहोर्ध्वनभसं मारुतं गच्छतम् ॥ अद्भ्यो वीहि पञ्च च ॥ १।
३। ९॥
१८ सं ते मनसा मनः सं प्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतवत् स्वाहैन्द्रः प्राणो अङ्गेअङ्गे
नि देध्यदैन्द्रोऽपानो अङ्गेअङ्गे वि बोभुवद्देव त्वष्टर्भूरि ते सꣳसमेतु विषुरूपा यत्
सलक्ष्माणो भवथ देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु श्रीरस्यग्निस्त्वा

श्रीणात्वापः समरिणन्वातस्य
१९ त्वा ध्रज्यै पूष्णो रꣳह्या अपामोषधीनाꣳ रोहिष्यै घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा त्वाऽन्तरिक्षाय दिशः प्रदिश आदिशो विदिश उद्दिशः स्वाहा दिग्भ्यो नमो दिग्भ्यः ॥ वातस्याष्टाविꣳशतिश्च ॥ १। ३। १०॥
२० समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देवꣳ सवितारं गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा सोमं गच्छ स्वाहा यज्ञं गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा नभो दिव्यं गच्छ स्वाहाऽग्निं वैश्वानरं गच्छ स्वाहाऽद्भ्यस्त्वौषधीभ्यो मनो मे हार्दि यच्छ तनूं त्वचं पुत्रं नप्तारमशीय शुगसि तमभि शोच योऽस्मान् द्वेष्टि यं च वयं द्विष्मो धाम्नोधाम्नो राजन्नितो वरुण नो मुञ्च यदापो अघ्निया वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ असि षड्विꣳशतिश्च ॥ १। ३। ११॥
२१ हविष्मतीरिमा आपो हविष्मान् देवो अध्वरो हविष्माꣳ आ विवासति हविष्माꣳ अस्तु सूर्यः ॥ अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनीः सुम्ने मा धत्तेन्द्राग्नियोर्भागधेयीः स्थ मित्रावरुणयोर्भागधेयीः स्थ विश्वेषां देवानां भागधेयीः स्थ यज्ञे जागृत ॥ हविष्मतीश्चतुस्त्रिꣳशत् ॥ १। ३। १२॥
२२ हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वोर्ध्वमिममध्वरं कृधि दिवि देवेषु होत्रा यच्छ सोम राजन्नेह्यव रोह मा भेर्मा सं विक्था मा त्वा हिꣳसिषं प्रजास्त्वमुपावरोह प्रजास्त्वामुपावरोहन्तु शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः । शृणोत ग्रावाणो विदुषो नु
२३ यज्ञꣳ शृणोतु देवः सविता हवं मे । देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं देवेभ्यो देवत्रा धत्त शुक्रꣳ शुक्रपेभ्यो येषां भागः स्थ स्वाहा कार्षिरस्यपापां मृध्रꣳ समुद्रस्य वोक्षित्या उन्नये । यमग्ने पृथ्सु मर्त्यमावो वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः ॥ नु सप्तचत्वारिꣳशच्च ॥ १। ३। १३॥
२४ त्वमग्ने रुद्रो असुरो महो दिवस्त्वꣳ शर्धो मारुतं पृक्ष ईशिषे । त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नु त्मना ॥
आ वो राजानमध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳ रोदस्योः । अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ अग्निर्होता निषसादा यजीयानुपस्थे मातुस्सुरभावु लोके । युवा कविः पुरुनिष्ठ

२५ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ॥ साध्वीमक र्देववीतिं नो अद्य यज्ञस्य
जिह्वामविदाम गुह्याम् । स आयुरागाथ्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ॥
अक्रन्ददग्निः स्तनयन्निव द्यौः, क्षामा रेरिहद्वीरुधः समञ्जन्न् । सद्यो जज्ञानो विहीमिद्धो
अख्यदा रोदसी भानुना भात्यन्तः ॥ त्वे वसूनि पुर्वणीक
२६ होतर्दोषा वस्तोरेरिरे यज्ञियासः । क्षामेव विश्वा भुवनानि यस्मिन्थ्सꣳ सौभगानि
दधिरे पावके ॥ तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे
॥ अश्याम तं काममग्ने तवोत्यश्याम रयिꣳ रयिवः सुवीरम् । अश्याम वाजमभि
वाजयन्तोऽश्याम द्युम्नमजराजरं ते ॥ श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमाभर ।
२७ वसो पुरुस्पृहꣳरयिम् ॥ स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः । यः
पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन्न् ॥ आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः ।
पुनस्ते प्राण आयति परा यक्ष्मꣳसुवामि ते ॥ आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको
घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि
२८ रक्षतादिमम् ॥ तस्मै ते प्रतिहर्यते जातवेदो विचर्षणे । अग्ने जनामि सुष्टुतिम् ॥
दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः । तृतीयमप्सु नृमणा अजस्र
मिन्धान एनं जरते स्वाधीः ॥ शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे । त्वं घृतेभिराहुतः
॥ दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतो अभवद्वयोभि
२९ र्यदेनं द्यौरजनयथ्सुरेताः ॥ आ यदिषे नृपतिं तेज आनट्छुचि रेतो निषिक्तं द्यौरभीके
। अग्निः शर्धमनवद्यं युवानग्ग् स्वाधियं जनयथ्सूदयच्च ॥ स तेजीयसा मनसा त्वोत
उत शिक्ष स्वपत्यस्य शिक्षोः । अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः
॥ अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम् । विश्वा य
३० श्चर्षणीरभ्यासा वाजेषु सासहत् ॥ तमग्ने पृतनासहꣳरयिꣳ सहस्व आ भर । त्वꣳ
हि सत्यो अद्भुतो दाता वाजस्य गोमतः ॥ उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे ।
स्तोमैर्विधेमाग्नये ॥ वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाज्मान्नम् । स त्वं न
ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः ॥ अग्न आयूꣳषि
३१ पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ अग्ने पवस्व स्वपा अस्मे
वर्चः सुवीर्यम् । दधत्पोषꣳरयिं मयि ॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
आ देवान्, वक्षि यक्षि च ॥ स नः पावक दीदिवोऽग्ने देवाꣳ इहा वह । उप यज्ञꣳ

हविश्च नः ॥

अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः ॥ उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतीग्ष्यर्चयः ॥ पुरुनिष्ठः पुर्वणीक भराऽभि वयोभिर्य आयूꣳषि विप्रः शुचिश्चतुर्दश च ॥ १। ३। १४॥

देवस्य रक्षोहणो विभूस्त्वꣳ सोमात्यन्यानगां पृथिव्या इषे त्वाऽऽददे वाक्ते सं ते समुद्रꣳ हविष्मतीर्हृदे त्वमग्ने रुद्रश्चतुर्दश ॥

देवस्य गमध्ये हविष्मतीः पवस एकत्रिꣳशत् ॥

देवस्यार्चयः ॥

## प्रथमकाण्डे चतुर्थः प्रश्नः ४

१ आ ददे ग्रावास्यध्वरकृद्देवेभ्यो गम्भीरमिममध्वरं कृध्युत्तमेन पविनेन्द्राय सोमꣳ सुषुतं मधुमन्तं पयस्वन्तं वृष्टिवनिमिन्द्राय त्वा वृत्रघ्न इन्द्राय त्वा वृत्रतुर इन्द्राय त्वाऽभिमातिघ्न इन्द्राय त्वाऽऽदित्यवत इन्द्राय त्वा विश्वदेव्यावते श्वात्राः स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीस्ता देवीर्देवत्रेमं यज्ञं धत्तोपहूताः सोमस्य पिबतोपहूतो युष्माकꣳ

२ सोमः पिबतु यत्ते सोम दिवि ज्योतिर्यत् पृथिव्यां यदुरावन्तरिक्षे तेनास्मै यजमानायोरु राया कृध्यधि दात्रे वोचो धिषणे वीडू सती वीडयेथामूर्जं दधाथामूर्जं मे धत्तं मा वाꣳ हिꣳसिषं मा मा हिꣳसिष्टं प्रागपागुदगधराक्तास्त्वा दिश आ धावन्त्वम्ब नि ष्वर । यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा ॥

युष्माकग्ग् स्वर यत्ते नव च ॥ १। ४। १॥

३ वाचस्पतये पवस्व वाजिन् वृषा वृष्णो अꣳशुभ्यां गभस्तिपूतो देवो देवानां पवित्रमसि येषां भागोऽसि तेभ्यस्त्वा स्वांकृतोऽसि मधुमतीर्न इषस्कृधि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टूर्वन्तरिक्षमन्विहि स्वाहा त्वा सुभवः सूर्याय देवेभ्यस्त्वा मरीचिपेभ्य एष ते योनिः प्राणाय त्वा ॥ वाचः सप्तचत्वारिꣳशत् ॥
१। ४। २॥

४ उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाहि सोममुरुष्य रायः समिषो यजस्वान्तस्ते दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षꣳ सजोषा देवैरवरैः परैश्चान्तर्यामे मघवन् मादयस्व स्वांकृतोऽसि मधुमतीर्न इषस्कृधि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टूर्वन्तरिक्षमन्विहि स्वाहा त्वा सुभवः सूर्याय देवेभ्यस्त्वा मरीचिपेभ्य एष ते

योनिरपानाय त्वा ॥ देवेभ्यः सप्त च ॥ १। ४। ३॥

५ आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार । उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥ उपयामगृहीतोऽसि वायवे त्वेन्द्रवायू इमे सुताः । उप प्रयोभिरा गतमिन्दवो वामुशन्ति हि ॥ उपयामगृहीतोऽसीन्द्रवायुभ्यां त्वैष ते योनिः सजोषाभ्यां त्वा ॥ आ वायो त्रिचत्वारिꣳशत् ॥ १। ४। ४॥

६ अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् । उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वैष ते योनिर् ऋतायुभ्यां त्वा ॥
अयं वां विꣳशतिः ॥ १। ४। ५॥

७ या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् । उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥ या वामष्टादश ॥ १। ४। ६॥

८ प्रातर्युजौ वि मुच्येथामश्विनावेह गच्छतम् । अस्य सोमस्य पीतये ॥ उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिरश्विभ्यां त्वा ॥
प्रातर्युजावेकान्नविꣳशतिः ॥ १। ४। ७॥

९ अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने । इममपाꣳ सङ्गमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥
उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरतां पाहि ॥ अयं वेनः पञ्चविꣳशतिः ॥ १। ४। ८॥

१० तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳसुवर्विदं प्रतीचीनं वृजनं दोहसे गिराऽऽशुं जयन्तमनु यासु वर्धसे । उपयामगृहीतोऽसि मर्काय त्वैष ते योनिः प्रजाः पाहि ॥
तꣳ षड्विꣳशतिः ॥ १। ४। ९॥

११ ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थाऽप्सुषदो महिनैकादश स्थ ते देवा यज्ञमिमं जुषध्वमुपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥
ये देवास्त्रिचत्वारिꣳशत् ॥ १। ४। १०॥

१२ त्रिꣳशत्त्रयश्च गणिनो रुजन्तो दिवꣳरुद्राः पृथिवीं च सचन्ते । एकादशासो अप्सुषदः सुतꣳ सोमं जुषन्ताꣳ सवनाय विश्वे ॥ उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणो

जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ त्रिꣳशद् द्विचत्वारिꣳशत् ॥ १। ४। ११॥
१३ उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवे यत् त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरिन्द्राय त्वोक्थायुवे ॥ उपयामगृहीतो द्वाविꣳशतिः ॥ १। ४। १२॥
१४ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ उपयामगृहीतोऽस्यग्नये त्वा वैश्वानराय ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमो ऽच्युतानामच्युत क्षित्तम एष ते योनिरग्नये त्वा वैश्वानराय ॥ मूर्धानं पञ्चत्रिꣳशत् ॥ १। ४। १३॥
१५ मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयामगृहीतोऽसि सꣳसर्पोऽस्यꣳहस्पत्याय त्वा ॥
मधुस्त्रिꣳशत् ॥ १। ४। १४॥
१६ इन्द्राग्नी आ गतꣳ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ॥ उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥
इन्द्राग्नी विꣳशतिः ॥ १। ४। १५॥
१७ ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वाꣳसो दाशुषः सुतम् ॥ उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ ओमासो विꣳशतिः ॥ १। ४। १६॥
१८ मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यꣳ शासमिन्द्रम् । विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम ॥
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ मरुत्वन्तꣳ षड्विꣳशतिः ॥ १। ४। १७॥
१९ इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य । तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः ॥
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ इन्द्रैकान्नत्रिꣳशत् ॥ १। ४। १८॥
२० मरुत्वाꣳ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय । आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वꣳ राजासि प्रदिवः सुतानाम् ॥

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ मरुत्वानेकान्न त्रिꣳशत् ॥ १। ४। १९॥

२१ महाꣳ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाꣳ इव । स्तोमैर्वथ्सस्य वावृधे ॥ उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ महानेकान्न विꣳशतिः ॥ १। ४। २०॥

२२ महाꣳ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः । अस्मद्रियग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥
महान्नृवत्षड्विꣳशतिः ॥ १। ४। २१॥

२३ कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥ उपयामगृहीतोऽस्यादित्येभ्यस्त्वा ॥ कदा चन प्र युच्छस्युभे नि पासि जन्मनी । तुरीयादित्य सवनं त इन्द्रियमा तस्थावमृतं दिवि ॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वो वर्वाची सुमतिर्ववृत्याद ꣳहोश्चिद्या वरिवोवित्तरासत् ॥ विवस्व आदित्यैष ते सोमपीथस्तेन मन्दस्व तेन तृप्य तृप्यास्म ते वयं तर्पयितारो या दिव्या वृष्टिस्तया त्वा श्रीणामि ॥
वः सप्तविꣳशतिश्च ॥ १। ४। २२॥

२४ वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳसावीः । वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥
उपयामगृहीतोऽसि देवाय त्वा सवित्रे ॥ वामं चतुर्विꣳशतिः ॥ १। ४। २३॥

२५ अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् । हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥
उपयामगृहीतोऽसि देवाय त्वा सवित्रे ॥ अदब्धेभिस्त्रयोविꣳशतिः ॥
१। ४। २४॥

२६ हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदम् ॥
उपयामगृहीतोऽसि देवाय त्वा सवित्रे ॥ हिरण्यपाणिं चतुर्दश ॥ १। ४। २५॥

२७ सुशर्मासि सुप्रतिष्ठानो बृहदुक्षे नम एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ सुशर्मा द्वादश ॥ १। ४। २६॥

२८ बृहस्पतिसुतस्य त इन्दो इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णाम्यग्ना ३ इ पत्नीवा ३ स्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा ॥ बृहस्पतिसुतस्य पञ्चदश ॥ १। ४। २७॥
२९ हरिरसि हारियोजनो हर्योः स्थाता वज्रस्य भर्ता पृश्नेः प्रेता तस्य ते देव सोमेष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य हरिवन्तं ग्रहं गृह्णामि हरीः स्थ हर्योर्धानाः सह सोमा इन्द्राय स्वाहा ॥ हरिः षड्विꣳशतिः ॥ १। ४। २८॥
३० अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ उपयामगृहीतोऽस्यग्नये त्वा तेजस्वत एष ते योनिरग्नये त्वा तेजस्वते ॥ अग्न आयूꣳषि त्रयोविꣳशतिः ॥ १। ४। २९॥
३१ उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः । सोममिन्द्र चमू सुतम् ॥ उपयामगृहीतोऽसीन्द्राय त्वौजस्वत एष ते योनिरिन्द्राय त्वौजस्वते ॥ उत्तिष्ठन्नेकविꣳशतिः ॥ १। ४। ३०॥
३२ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमा भासि रोचनम् ॥ उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिः सूर्याय त्वा भ्राजस्वते ॥ तरणिर्विꣳशतिः ॥ १। ४। ३१॥
३३ आ प्यायस्व मदिन्तम सोम विश्वाभिरूतिभिः । भवा नः सप्रथस्तमः ॥ आ प्यायस्व नव ॥ १। ४। ३२॥
३४ ईयुष्टे ये पूर्वतरामपश्यन् व्युच्छन्तीमुषसं मर्त्यासः । अस्माभिरू नु प्रतिचक्ष्याऽभूदो ते यन्ति ये अपरीषु पश्यान् ॥
ईयुरेकान्नविꣳशतिः ॥ १। ४। ३३॥
३५ ज्योतिष्मतीं त्वा सादयामि ज्योतिष्कृतं त्वा सादयामि ज्योतिर्विदं त्वा सादयामि भास्वतीं त्वा सादयामि ज्वलन्तीं त्वा सादयामि मल्मलाभवन्तीं त्वा सादयामि दीप्यमानां त्वा सादयामि रोचमानां त्वा सादयाम्यजस्रां त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि बोधयन्तीं त्वा सादयामि जाग्रतीं त्वा सादयामि ॥ ज्योतिष्मतीꣳ षड्विꣳशत् ॥ १। ४। ३४॥
३६ प्रयासाय स्वाहाऽऽयासाय स्वाहा वियासाय स्वाहा संयासाय स्वाहोद्यासाय स्वाहाऽवयासाय स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा ॥ प्रयासाय चतुर्विꣳशतिः ॥ १। ४। ३५॥

३७ चित्तँ सन्तानेन भवं यक्ना रुद्रं तनिम्ना पशुपतिग्ग् स्थूलहृदयेनाग्निँ हृदयेन रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादेवमन्तःपार्श्वेनौषिष्ठहनँ शिङ्गीनिकोश्याभ्याम् ॥
चित्तमष्टादश ॥ १। ४। ३६॥
३८ आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनँ सु ते मनो ग्रावा कृणोतु वग्नुना ॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
आ तिष्ठ षड्विँशतिः ॥ १। ४। ३७॥
३९ इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसमृषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
इन्द्रमित्रयोविँशतिः ॥ १। ४। ३८॥
४० असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि । आ त्वा पृणक्त्विन्द्रियँ रजः सूर्यं न रश्मिभिः ॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥ असावि सप्तविँशतिः ॥ १। ४। ३९॥
४१ सर्वस्य प्रतिशीवरी भूमिस्त्वोपस्थ आऽधित । स्योनास्मै सुषदा भव यच्छास्मै शर्म सप्रथाः ॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
सर्वस्य षड्विँशतिः ॥ १। ४। ४०॥
४२ महाँ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु । स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान् द्वेष्टि ॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥ सर्वस्य महान्थ्षड्विँशतिष्षड्विँशतिः ॥ १। ४। ४१॥
४३ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् । जहि शत्रूँ रप मृधो नुदस्वाऽथाभयं कृणुहि विश्वतो नः ॥
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
सजोषास्त्रिँशत् ॥ १। ४। ४२॥
४४ उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आऽप्रा द्यावापृथिवी अन्तरिक्षँ सूर्य आत्मा जगतस्तस्थुषश्च ॥ अग्ने नय सुपथा राये अस्मान्, विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ दिवं गच्छ सुवः पत रूपेण

४५ वो रूपमभ्यैमि वयसा वयः । तुथो वो विश्ववेदा वि भजतु वर्षिष्ठे अधि नाके ॥
एतत् ते अग्ने राध ऐति सोमच्युतं तन्मित्रस्य पथा नयर्तस्य पथा प्रेत चन्द्रदक्षिणा यज्ञस्य
पथा सुविता नयन्तीर्ब्राह्मणमद्य राध्यासमृषिमार्षेयं पितृमन्तं पैतृमत्यꣳ सुधातुदक्षिणं वि
सुवः पश्य व्यन्तरिक्षं यतस्व सदस्यै रस्मद्दात्रा देवत्रा गच्छत मधुमतीः प्रदातारमा
विशतानवहायास्मान् देवयानेन पथेत सुकृतां लोके सीदत तन्नः स२ꣳस्कृतम् ॥ रूपेण
सदस्यैरष्टादश च ॥ १। ४। ४३॥
४६ धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपतिर्नो अग्निः । त्वष्टा विष्णुः प्रजया
सꣳरराणो यजमानाय द्रविणं दधातु ॥ समिन्द्र णो मनसा नेषि गोभिः सꣳ
सूरिभिर्मघवन्थ्स२ꣳ स्वस्त्या । सं ब्रह्मणा देवकृतं यदस्ति सं देवानाꣳ सुमत्या
यज्ञियानाम् ॥ सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन । त्वष्टा
नो अत्र वरिवः कृणोत्व
४७ नु मार्ष्टु तनुवो यद्विलिष्टम् ॥ यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह
। ऋधगयाडृधगुताशमिष्ठाः प्रजानन्, यज्ञमुपयाहि विद्वान् ॥ स्वगा वो देवाः सदनमकर्म
य आजग्म सवनेदं जुषाणाः । जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽस्मे धत्त वसवो वसूनि
॥ यानाऽवह उशतो देव देवान् तान्
४८ प्रेरय स्वे अग्ने सधस्थे । वहमाना भरमाणा हवीꣳषि वसुं घर्मं दिवमा तिष्ठतानु ॥
यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहैष ते यज्ञो यज्ञपते सहसूक्तवाकः
सुवीरः स्वाहा देवा गातुविदो गातुं वित्वा गातुमित मनसस्पत इमं नो देव देवेषु
यज्ञ२ꣳ स्वाहा वाचि स्वाहा वाते धाः ॥ कृणोतु तानष्टाचत्वारिꣳशच्च ॥ १। ४। ४४॥
४९ उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ । अपदे पादा
प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥ शतं ते राजन् भिषजः सहस्रमुर्वी गम्भीरा
सुमतिष्टे अस्तु । बाधस्व द्वेषो निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥ अभिष्ठितो
वरुणस्य पाशोऽग्नेरनीकमप आ विवेश । अपां नपात् प्रतिरक्षन्नसुर्यं दमेदमे
५० समिधं यक्ष्यग्ने ॥ प्रति ते जिह्वा घृतमुच्चरण्येत् समुद्रे ते हृदयमप्स्वन्तः । सं त्वा
विशन्त्वोषधीरुताऽऽपो यज्ञस्य त्वा यज्ञपते हविर्भिः ॥ सूक्तवाके नमोवाके विधेमावभृथ
निचङ्कुण निचेरुरसि निचङ्कुणाव देवैर्देवकृतमेनोऽयाडव मर्त्यैर्मर्त्यकृतमुरोरा नो देव
रिषस्पाहि सुमित्रा न आप ओषधयः

५१ सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मो देवीराप एष वो गर्भस्तं वः सुप्रीतꣳ सुभृतमकर्म देवेषु नः सुकृतो ब्रूतात् प्रतियुतो वरुणस्य पाशः प्रत्यस्तो वरुणस्य पाश एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेह्यपो अन्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आऽगमं तं मा सꣳ सृज वर्चसा ॥ दमेदम ओषधय आ षट् च ॥ १। ४। ४५॥
५२ यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि । जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥ यस्मै त्वꣳ सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् । अश्विनꣳ स पुत्रिणं वीरवन्तं गोमन्तꣳ रयिं नशते स्वस्ति ॥ त्वे सु पुत्र शवसोऽवृत्रन् कामकातयः । न त्वामिन्द्राति रिच्यते ॥ उक्थौक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानꣳ
५३ सुतासः । यदीꣳ सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥ अग्ने रसेन तेजसा जातवेदो वि रोचसे । रक्षोहाऽमीवचातनः ॥ अपो अन्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आऽगमं तं मा सꣳ सृज वर्चसा ॥
वसुर्वसुपतिर्हिकमस्यग्ने विभावसुः । स्याम ते सुमतावपि ॥ त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे
५४ अध्वरेषु राजन् । त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृथ्सुतीर्मर्त्यानाम् । त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम् । स नो रास्व सुवीर्यम् ॥ अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन्न् । अयꣳ शत्रूञ्जयतु जर्हृषाणोऽयं वाजं जयतु वाजसातौ ॥ अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः ॥ त्वꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्थ्सता । सखा सख्या समिध्यसे ॥ उदग्ने शुचयस्तव वि ज्योतिषा ॥ मघवानं मन्दे ह्यग्ने चतुर्दश च ॥ १। ४। ४६॥
वाचः प्राणाय त्वा । उपयाम गृहीतोस्यपानाय त्वा । आ वायो वायवे सजोषाभ्यां त्वा । अयमृतायुभ्यां त्वा । या वामश्विभ्यां माध्वीभ्यां त्वा । प्रातर्युजावश्विभ्यां त्वा । अयं वेनः शण्डाय त्वैष ते योनिर्वीरतां पाहि । तं मर्काय त्वैष ते योनिः प्रजाः पाहि । ये देवास्त्रिꣳशदाग्रयणोसि विश्वेभ्यस्त्वा देवेभ्यः । उपयाम गृहीतोसींद्राय त्वोक्थायुवे । मूर्धानमग्नये त्वा वैश्वानराय । मधुश्च सꣳ सर्पोसि । इंद्राग्नी इंद्राग्निभ्यां त्वा । ओमासो विश्वेभ्यस्त्वा देवेभ्यः । मरुत्वंतं त्रीणींद्राय त्वा मरुत्वते । महान् द्वे महेंद्राय

त्वा । कदाचनादित्येभ्यस्त्वा । कदाचनस्तरीर्विवस्व आदित्य । इंद्रꣳ शुचिरपः । वामं त्रीन्देवाय त्वा सवित्रे । सुशर्मा विश्वेभ्यस्त्वा देवेभ्यः । बृहस्पतिस्त्वष्ट्रा सोमं पिब स्वाहा । हरिरसि सह सोमा इंद्राय स्वाहा । अग्न आयूग्ष्यग्नये त्वा तेजस्वते । उत्तिष्ठन्निंद्राय त्वौजस्वते । तरणिः सूर्याय त्वा भ्राजस्वते । आ तिष्ठाद्याः षडिंद्राय त्वा षोडशिने । उदु त्यं चित्रम् । अग्नेनय दिवं गच्छ । उरुमायुष्टे यद्देवा मुमुग्धि । अग्नाविष्णू मुमुक्तम् । परा वै पंक्त्यः । देवा वै ये देवाः पंक्त्यौ । परा वै सवाचम् । देवासुराः कार्यम् । भूमिर्व्यतृष्यन् । प्रजापतिर्व्यक्षुध्यन् । भूमिरादित्या वै । अग्नि होत्रमादित्यो वै । भूमिर्लेकः सलेकः सुलेकः । विष्णोरुदुत्तमम् । अन्नपते पुनस्त्वाऽदित्याः । उरुꣳ सꣳ सृज वर्चसा । यस्त्वा सुष्टुतम् । त्वमग्नेयुक्ष्वाहि सुष्टुतिम् । त्वमग्ने विचर्षणे । यस्त्वा विरोचसे ॥

आ ददे वाचस्पतय उपयामगृहीतोस्या वायो अयं वां या वां प्रातर्युजावयं तं ये देवास्त्रिꣳशदुपयाम गृहीतोसि मूर्धानं मधुश्चेंद्राग्नी ओमासो मरुत्वंतमिंद्र मरुत्वो मरुत्वान्महान्महान्नृवत्कदा वाममदब्धेभिर् हिरण्यपाणिꣳ सुशर्मा बृहस्पतिसुतस्य हरिरस्यग्न उत्तिष्ठन्तरणिरा प्यायस्वेयुष्टे ये ज्योतिष्मतीं प्रयासाय चित्तमा तिष्ठेंद्रमसावि सर्वस्य महान्थ्सजोषा उदु त्यं धातोरुꣳ हि यस्त्वा षट्चत्वारिꣳशत् ॥

आ ददे ये देवा महानुत्तिष्ठन्थ्सर्वस्य सन् दुर्मित्राश्चतुः पंचाशत् ॥

आ ददे तव वि ज्योतिषा ॥

## प्रथमकाण्डे पञ्चमः प्रश्नः ५

१ देवासुराः संयत्ता आसन् ते देवा विजयमुपयन्तोऽग्नौ वामं वसु सं न्यदधतेदमु नो भविष्यति यदि नो जेष्यन्तीति तदग्निर्न्यकामयत तेनापाक्रामत् तद्देवा विजित्यावरुरुथ्समाना अन्वायन् तदस्य सहसाऽदित्थ्सन्त सोऽरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वं यदश्र्वशीयत तद्

२ रजतꣳ हिरण्यमभवत् तस्माद्रजतꣳ हिरण्यमदक्षिण्यमश्रुजꣳ हि यो बर्हिषि ददाति पुराऽस्य संवथ्सराद्गृहे रुदन्ति तस्माद्बर्हिषि न देयꣳ सोऽग्निरब्रवीद्भाग्यसान्यथ व इदमिति पुनराधेयं ते केवलमित्यब्रुवन्नृध्नवत् खलु स इत्यब्रवीद्यो मद्देवत्यमग्निमादधाता इति तं पूषाऽऽधत्त तेन

३ पूषाऽऽर्ध्नोत् तस्मात् पौष्णाः पशव उच्यन्ते तं त्वष्टाऽऽधत्त तेन त्वष्टाऽऽर्ध्नोत् तस्मात्

त्वाष्ट्राः पशव उच्यन्ते तं मनुराऽधत्त तेन मनुरार्ध्नोत् तस्मान्मानव्यः प्रजा उच्यन्ते तं धाता ऽऽधत्त तेन धाताऽऽर्ध्नोत् संवथ्सरो वै धाता तस्मात् संवथ्सरं प्रजाः पशवोऽनु प्र जायन्ते य एवं पुनराधेयस्यर्द्धिं वेद

४ र्ध्नोत्येव योऽस्यैवं बन्धुतां वेद बन्धुमान् भवति भागधेयं वा अग्निराहित इच्छमानः प्रजां पशून्, यजमानस्योप दोद्रावोद्वास्य पुनरा दधीत भागधेयेनैवैनꣳ समर्धयत्यथो शान्तिरेवास्यैषा पुनर्वस्वोरा दधीतैतद्वै पुनराधेयस्य नक्षत्रं यत्पुनर्वसू स्वायामेवैनं देवतायामाधाय ब्रह्मवर्चसी भवति दर्भैरा दधात्ययातयामत्वाय दर्भैरा दधात्यद्भ्य एवैनमोषधीभ्योऽवरुध्याऽऽधत्ते पञ्चकपालः पुरोडाशो भवति पञ्च वा ऋतव ऋतुभ्य एवैनमवरुध्याऽऽधत्ते ॥ अशीयत तत् तेन वेद दर्भैः पञ्चविꣳशतिश्च ॥ १। ५। १॥

५ परा वा एष यज्ञं पशून्, वपति योऽग्निमुद्वासयते पञ्चकपालः पुरोडाशो भवति पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञमेव पशूनव रुन्धे वीरहा वा एष देवानां योऽग्निमुद्वासयते न वा एतस्य ब्राह्मणा ऋतायवः पुराऽन्नमक्षन् पङ्क्त्यो याज्यानुवाक्या भवन्ति पाङ्क्तो यज्ञः पाङ्क्तः पुरुषो देवानेव वीरं निरवदायाग्निं पुनरा

६ धत्ते शताक्षरा भवन्ति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति यद्वा अग्निराहितो नर्ध्यते ज्यायो भागधेयं निकामयमानो यदाग्नेयꣳ सर्वं भवति सैवास्यर्धिः सं वा एतस्य गृहे वाक् सृज्यते योऽग्निमुद्वासयते स वाचꣳ सꣳसृष्टां यजमान ईश्वरोऽनु पराभवितोर्विभक्तयो भवन्ति वाचो विधृत्यै यजमानस्यापराभावाय

७ विभक्तिं करोति ब्रह्मैव तदकरुपाꣳशु यजति यथा वामं वसु विविदानो गूहति तादृगेव तदग्निं प्रति स्विष्टकृतं निराह यथा वामं वसु विविदानः प्रकाशं जिगमिषति तादृगेव तद्विभक्ति मुक्त्वा प्रयाजेन वषट्करोत्यायतनादेव नैति यजमानो वै पुरोडाशः पशव एते आहुती यदभितः पुरोडाशमेते आहुती

८ जुहोति यजमानमेवोभयतः पशुभिः परि गृह्णाति कृतयजुः सम्भृतसम्भार इत्याहुर्न सम्भृत्याः सम्भारा न यजुः कर्तव्यमित्यथो खलु सम्भृत्या एव सम्भाराः कर्तव्यं यजुर्यज्ञस्य समृद्ध्यै पुनर्निष्कृतो रथो दक्षिणा पुनरुथ्स्यूतं वासः पुनरुथ्सृष्टोऽनड्वान् पुनराधेयस्य समृद्ध्यै सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रं जुहोति यत्रयत्रैवास्य न्यक्तं तत

९ एवैनमव रुन्धे वीरहा वा एष देवानां योऽग्निमुद्वासयते तस्य वरुण

एवर्णयादाग्निवारुणमेकादशकपालमनु निर्वपेद्यं चैव हन्ति यश्चास्यर्णयात्तौ भागधेयेन प्रीणाति नाऽऽर्तिमार्छति यजमानः ॥
आऽपराभावाय पुरोडाशमेते आहुती ततष्षड्विँशच्च ॥ १। ५। २॥
१० भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायाऽऽदधे ॥ आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरं च प्रयन्थ्सुवः ॥
त्रिँशद्धाम वि राजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः ॥ अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन्महिषः सुवः ॥ यत् त्वा
११ क्रुद्धः परोवप मन्युना यदवर्त्या । सुकल्पमग्ने तत् तव पुनस्त्वोद्दीपयामसि ॥ यत् ते मन्युपरोप्तस्य पृथिवीमनु दध्वसे । आदित्या विश्वे तद्देवा वसवश्च समाभरन् ॥ मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञँ समिमं दधातु । बृहस्पतिस्तनुतामिमं नो विश्वे देवा इह मादयन्ताम् ॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त
१२ ऋषयः सप्त धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन ॥ पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः ॥ सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि ॥ लेकः सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियन्तु केतः सकेतः सुकेतस्ते न आदित्या आज्यं जुषाणा वियन्तु विवस्वाँ अदितिर्देवजूतिस्ते न आदित्या आज्यं जुषाणा वियन्तु ॥
त्वा जिह्वाः सप्त सुकेतस्ते नस्त्रयोदश च ॥ १। ५। ३॥
१३ भूमिर्भूम्ना द्यौर्वरिणेत्याहाऽऽशिषैवैनमा धत्ते सर्पा वै जीर्यन्तोऽमन्यन्त स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत् ततो वै ते जीर्णास्तनूरपाघ्नत सर्पराज्ञिया ऋग्भिर्गार्हपत्यमा दधाति पुनर्नवमेवैनमजरं कृत्वाऽऽधत्तेऽथो पूतमेव पृथिवीमन्नाद्यं नोपानमथ्सैतं
१४ मन्त्रमपश्यत् ततो वै तामन्नाद्यमुपानमद्यथ्सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधात्यन्नाद्यस्यावरुद्ध्या अथो अस्यामेवैनं प्रतिष्ठितमा धत्ते यत्त्वा क्रुद्धः परोवपेत्याहापह्नुत एवास्मै तत् पुनस्त्वोद्दीपयामसीत्याह समिन्ध एवैनं यत्ते मन्युपरोप्तस्येत्याह देवताभिरेवै
१५ नँ सं भरति वि वा एतस्य यज्ञश्छिद्यते योऽग्निमुद्वासयते बृहस्पतिवत्यर्चोप तिष्ठते ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैव यज्ञँ सं दधाति विच्छिन्नं यज्ञँ समिमं दधात्वित्याह संतत्यै विश्वे देवा इह मादयन्तामित्याह संतत्यैव यज्ञं देवेभ्योऽनु दिशति

सप्त ते अग्ने समिधः सप्त जिह्वा
१६ इत्याह सप्तसप्त वै सप्तधाऽग्नेः प्रियास्तनुवस्ता एवाव रुन्धे पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुती जुहोति यजमानमेवोर्जा च रय्या चोभयतः परि गृह्णात्यादित्या वा अस्माल्लोकादमुं लोकमायन्तेऽमुष्मि३ꣳल्लोके व्यतृष्यन्त इमं लोकं पुनरभ्यवेत्याग्निमाधायैतान् होमानजुहवुस्त आर्ध्नुवन् ते सुवर्ग३ꣳल्लोकमायन् यः पराचीनं पुनराधेयादग्निमादधीत स एतान् होमाञ्जुहुयाद्यामेवाऽऽदित्या ऋद्धिमार्ध्नुवन् तामेवर्ध्नोति ॥
सैतं देवताभिरेव जिह्वा एतान् पञ्चविꣳशतिश्च ॥ १। ५। ४॥
१७ उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये । आरे अस्मे च शृण्वते ॥
अस्य प्रत्नामनु द्युतꣳशुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिम् ॥ अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥ अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥
उभा वामिन्द्राग्नी आहुवध्या
१८ उभा राधसः सह मादयध्यै । उभा दाताराविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम् ॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आ रोहाथा नो वर्धया रयिम् ॥ अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधत्पोषꣳरयिं
१९ मयि ॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्, वक्षि यक्षि च ॥ स नः पावक दीदिवोऽग्ने देवाꣳ इहाऽऽवह । उप यज्ञꣳ हविश्च नः ॥ अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः ॥ उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतीग्ष्यर्चयः ॥ आयुर्दा अग्नेऽस्यायुर्मे
२० देहि वर्चोदा अग्नेऽसि वर्चो मे देहि तनूपा अग्नेऽसि तनुवं मे पाह्यग्ने यन्मे तनुवा ऊनं तन्म आ पृण चित्रावसो स्वस्ति ते पारमशीयेन्धानास्त्वा शतꣳ हिमा द्युमन्तः समिधीमहि वयस्वन्तो वयस्कृतं यशस्वन्तो यशस्कृतꣳसुवीरासो अदाभ्यम् । अग्ने सपत्नदम्भनं वर्षिष्ठे अधि नाके ॥ सं त्वमग्ने सूर्यस्य वर्चसाऽगथाः समृषीणाग् स्तुतेन सं प्रियेण धाम्ना । त्वमग्ने सूर्यवर्चा असि सं मामायुषा वर्चसा प्रजया सृज ॥ आहुवध्यै पोषꣳरयिं मे वर्चसा सप्तदश च ॥ १। ५। ५॥
२१ सं पश्यामि प्रजा अहमिडप्रजसो मानवीः । सर्वा भवन्तु नो गृहे ॥

अम्भः स्थाम्भो वो भक्षीय महः स्थ महो वो भक्षीय सहः स्थ सहो वो भक्षीयोर्जः स्थोर्जं वो भक्षीय रेवती रमध्वमस्मि३ँ ल्लोकेऽस्मिन् गोष्ठेऽस्मिन् क्षयेऽस्मिन्, योनाविहैव स्तेतो माऽप गात बह्वीर्मे भूयास्त
२२ सँहितासि विश्वरूपीरा मोर्जा विशाऽऽगौपत्येनाऽऽ रायस्पोषेण सहस्रपोषं वः पुष्यासं मयि वो रायः श्रयन्ताम् ॥ उप त्वाऽग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि । राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानग्ग् स्वे दमे ॥ स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥ अग्ने
२३ त्वं नो अन्तमः । उत त्राता शिवो भव वरूथ्यः ॥ तं त्वा शोचिष्ठ दीदिवः । सुम्नाय नूनमीमहे सखिभ्यः ॥ वसुरग्निर्वसुश्रवाः । अच्छा नक्षि द्युमत्तमो रयिं दाः ॥ ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यतेडाः स्थ मधुकृतः स्योना माऽऽविशतेरा मदः । सहस्रपोषं वः पुष्यासं
२४ मयि वो रायः श्रयन्ताम् ॥ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ सोमानग्ग् स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजम् ॥ कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥ परि त्वाग्ने पुरं वयं विप्रँ सहस्य धीमहि । धृषद्वर्णं दिवेदिवे भेत्तारं भङ्गुरावतः ॥ अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासँ सुगृहपतिर्मया त्वं गृहपतिना भूयाः शतँ हिमास्तामाशिषमा शासे तन्तवे ज्योतिष्मतीं तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीम् ॥ भूयास्त स्वस्तयेऽग्ने पुष्यासं धृषद्वर्णमेकान्नत्रिँ शच्च ॥ १। ५। ६॥
२५ अयज्ञो वा एष योऽसामोपप्रयन्तो अध्वरमित्याह स्तोममेवास्मै युनक्त्युपेत्याह प्रजा वै पशव उपेमं लोकं प्रजामेव पशूनिमं लोकमुपैत्यस्य प्रत्नामनुद्युतमित्याह सुवर्गो वै लोकः प्रत्नः सुवर्गमेव लोकँ समारोहत्यग्निर्मूर्धा दिवः ककुदित्याह मूर्धान
२६ मेवैनँ समानानां करोत्यथो देवलोकादेव मनुष्यलोके प्रतितिष्ठत्ययमिह प्रथमो धायि धातृभिरित्याह मुख्यमेवैनं करोत्युभा वामिन्द्राग्नी आहुवध्या इत्याहौजो बलमेवाव रुन्धेऽयं ते योनिर्ऋत्विय इत्याह पशवो वै रयिः पशूनेवाव रुन्धे षड्भिरुप तिष्ठते षड्वा
२७ ऋतव ऋतुष्वेव प्रति तिष्ठति षड्भिरुत्तराभिरुप तिष्ठते द्वादश सं पद्यन्ते द्वादश मासाः संवथ्सरः संवथ्सर एव प्रति तिष्ठति यथा वै पुरुषोऽश्वो गौर्जीर्यत्येवमग्निराहितो जीर्यति संवथ्सरस्य परस्तादाग्निपावमानीभिरुप तिष्ठते पुनर्नवमेवैनमजरं करोत्यथो

पुनात्येवोप तिष्ठते योग एवास्यैष उप तिष्ठते
२८ दम एवास्यैष उप तिष्ठते याञ्चैवास्यैषोप तिष्ठते यथा पापीयाञ्छ्रेयस आहृत्य
नमस्यति तादृगेव तदायुर्दा अग्नेऽस्यायुर्मे देहीत्याहाऽऽयुर्दा ह्येष वर्चोदा अग्नेऽसि वर्चो
मे देहीत्याह वर्चोदा ह्येष तनूपा अग्नेऽसि तनुवं मे पाहीत्याह
२९ तनूपा ह्येषोऽग्ने यन्मे तनुवा ऊनं तन्म आ पृणेत्याह यन्मे प्रजायै पशूनामूनं तन्म
आ पूरयेति वावैतदाह चित्रावसो स्वस्ति ते पारमशीयेत्याह रात्रिर्वै चित्रावसुरव्युष्ट्यै वा
एतस्यै पुरा ब्राह्मणा अभैषुर्व्युष्टिमेवाव रुन्ध इन्धानास्त्वा शतꣳ
३० हिमा इत्याह शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्येषा वै
सूर्मी कर्णकावत्येतया ह स्म वै देवा असुराणाꣳ शततर्हाग् स्तृꣳहन्ति यदेतया
समिधमादधाति वज्रमेवैतच्छतघ्नीं यजमानो भ्रातृव्याय प्रहरति स्तृत्या अछम्बट्कारꣳ
सं त्वमग्ने सूर्यस्य वर्चसा गथा इत्याहैतत्त्वमसीदमहं भूयासमिति वावैतदाह त्वमग्ने
सूर्यवर्चा असीत्याहाऽऽशिषमेवैतामा शास्ते ॥ मूर्धानꣳ षड्वा एष उप तिष्ठते पाहीत्याह
शतमहꣳ षोडश च ॥ १। ५। ७॥
३१ सं पश्यामि प्रजा अहमित्याह यावन्त एव ग्राम्याः पशवस्तानेवाव रुन्धेऽम्भः स्थाम्भो
वो भक्षीयेत्याहाम्भो ह्येता महः स्थ महो वो भक्षीयेत्याह महो ह्येताः सहः स्थ सहो
वो भक्षीयेत्याह सहो ह्येता ऊर्जस्थोर्जं वो भक्षीयेत्या
३२ होर्जो ह्येता रेवती रमध्वमित्याह पशवो वै रेवतीः पशूनेवात्मन् रमयत इहैव
स्तेतो माऽप गातेत्याह ध्रुवा एवैना अनपगाः कुरुत इष्टकचिद्वा अन्योऽग्निः पशुचिदन्यः
सꣳहितासि विश्वरूपीरिति वथ्समभि मृशत्युपैवैनं धत्ते पशुचितमेनं कुरुते प्र
३३ वा एषोऽस्माल्लोकाच्च्यवते य आहवनीयमुप तिष्ठते गार्हपत्यमुप तिष्ठतेऽस्मिन्नेव
लोके प्रति तिष्ठत्यथो गार्हपत्यायैव नि ह्नुते गायत्रीभिरुप तिष्ठते तेजो वै गायत्री तेज
एवात्मन् धत्तेऽथो यदेतं तृचमन्वाह सन्तत्यै गार्हपत्यं वा अनु द्विपादो वीराः प्रजायन्ते
य एवं विद्वान् द्विपदाभिर्गार्हपत्यमुप तिष्ठत
३४ आऽस्य वीरो जायत ऊर्जा वः पश्याम्यूर्जा मा पश्यतेत्याहाऽऽशिषमेवैतामा शास्ते
तथ्सवितुर्वरेण्यमित्याह प्रसूत्यै सोमानग्ग् स्वरणमित्याह सोमपीथमेवाव रुन्धे कृणुहि
ब्रह्मणस्पत इत्याह ब्रह्मवर्चसमेवाव रुन्धे कदा चन स्तरीरसीत्याह न स्तरीꣳ रात्रिं
वसति

३५ य एवं विद्वानग्निमुप तिष्ठते परि त्वाग्ने पुरं वयमित्याह परिधिमेवैतं परि
दधात्यस्कन्दायाग्ने गृहपत इत्याह यथायजुरेवैतच्छतꣳ हिमा इत्याह शतं त्वा
हेमन्तानिन्धिषीयेति वावैतदाह पुत्रस्य नाम गृह्णात्यन्नादमेवैनं करोति तामाशिषमा
शासे तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रोऽजातः स्यात्तेजस्व्येवास्य ब्रह्मवर्चसी
पुत्रो जायते तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो जातः स्यात्
तेज एवास्मिन् ब्रह्मवर्चसं दधाति ॥ ऊर्जं वो भक्षीयेति प्र गार्हपत्यमुपतिष्ठते वसति
ज्योतिष्मतीमेकान्नत्रिꣳशच्च ॥ १। ५। ८॥
३६ अग्निहोत्रं जुहोति यदेव किञ्च यजमानस्य स्वं तस्यैव तद्रेतः सिञ्चति प्रजनने
प्रजननꣳ हि वा अग्निरथौषधीरन्तगता दहति तास्ततो भूयसीः प्रजायन्ते यथ्सायं
जुहोति रेत एव तथ्सिञ्चति प्रैव प्रातस्तनेन जनयति तद्रेतः सिक्तं न त्वष्ट्राऽविकृतं
प्रजायते यावच्छो वै रेतसः सिक्तस्य
३७ त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्रजायत एष वै दैव्यस्त्वष्टा यो यजते
बह्वीभिरुप तिष्ठते रेतस एव सिक्तस्य बहुशो रूपाणि वि करोति स प्रैव जायते श्वःश्वो
भूयान् भवति य एवं विद्वानग्निमुप तिष्ठतेऽहर्देवानामासीद्रात्रिरसुराणां तेऽसुरा यद्देवानां
वित्तं वेद्यमासीत्तेन सह
३८ रात्रिं प्राविशन् ते देवा हीना अमन्यन्त तेऽपश्यन्नाग्नेयी रात्रिराग्नेयाः पशव
इममेवाग्नि२ꣳ स्तवाम स नः स्तुतः पशून् पुनर्दास्यतीति तेऽग्निमस्तुवन्थ्स एभ्यः
स्तुतो रात्रिया अध्यहरभि पशून्निरार्जत् ते देवाः पशून्, वित्वा कामाꣳ अकुर्वत य एवं
विद्वानग्निमुपतिष्ठते पशुमान् भवत्या
३९ दित्यो वा अस्माल्लोकादमुं लोकमैत् सोऽमुं लोकं गत्वा पुनरिमं लोकमभ्यध्यायत्
स इमं लोकमागत्य मृत्योरबिभेन्मृत्युसंयुत इव ह्ययं लोकः सोऽमन्यतेममेवाग्नि२ꣳ
स्तवानि स मा स्तुतः सुवर्गं लोकं गमयिष्यतीति सोऽग्निमस्तौत् स एनगग् स्तुतः सुवर्गं
लोकमगमयद्य
४० एवं विद्वानग्निमुपतिष्ठते सुवर्गमेव लोकमेति सर्वमायुरेत्यभि वा एषोऽग्नी आ रोहति
य एनावुपतिष्ठते यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति नक्तमुप तिष्ठते
न प्रातः सꣳ हि नक्तं व्रतानि सृज्यन्ते सह श्रेयाग्श्च पापीयाग्श्चासाते ज्योतिर्वा
अग्निस्तमो रात्रिर्य

४१ न्नक्तमुपतिष्ठते ज्योतिषैव तमस्तरत्युपस्थेयोऽग्नी ३ र् नोपस्थेया ३ इत्याहुर्मनुष्यायेन्न्वै योऽहरहराहृत्याथैनं याचति स इन्न्वै तमुपार्छत्यथ को देवानहरहर्याचिष्यतीति तस्मान्नोपस्थेयोऽथो खल्वाहुराशिषे वै कं यजमानो यजत इत्येषा खलु वा
४२ आहिताग्नेराशीर्यदग्निमुप तिष्ठते तस्मादुपस्थेयः प्रजापतिः पशूनसृजत ते सृष्टा अहोरात्रे प्राविशन् ताञ्छन्दोभिरन्वविन्दद्यच्छन्दोभिरुपतिष्ठते स्वमेव तदन्विच्छति न तत्र जाम्यस्तीत्याहुर्योऽहरहरुपतिष्ठत इति यो वा अग्निं प्रत्यङ्ङुपतिष्ठते प्रत्येनमोषति यः पराङ् विष्वङ् प्रजया पशुभिरेति कवातिर्यङ्ङिवोप तिष्ठेत नैनं प्रत्योषति न विष्वङ् प्रजया पशुभिरेति ॥ सिक्तस्य सह भवति यो यत्खलु वै पशुभिस्त्रयोदश च ॥ १। ५। ९॥
४३ मम नाम प्रथमं जातवेदः पिता माता च दधतुर्यदग्रे । तत्त्वं बिभृहि पुनरा मदैतोस्तवाहं नाम बिभराण्यग्ने ॥ मम नाम तव च जातवेदो वाससी इव विवसानौ ये चरावः । आयुषे त्वं जीवसे वयं यथायथं वि परि दधावहै पुनस्ते ॥ नमोऽग्नयेऽप्रतिविद्धाय नमोऽनाधृष्टाय नमः सम्राजे । अषाढो
४४ अग्निर्बृहद्वया विश्वजिथ्सहन्त्यः श्रेष्ठो गन्धर्वः ॥ त्वत्पितारो अग्ने देवास्त्वामाहुतयस्त्वद्विवाचनाः । सं मामायुषा सं गौपत्येन सुहिते मा धाः ॥ अयमग्निः श्रेष्ठतमोऽयं भगवत्तमोऽयँ सहस्रसातमः । अस्मा अस्तु सुवीर्यम् ॥ मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञँ समिमं दधातु । या इष्टा उषसो निम्रुचश्च ताः सं दधामि हविषा घृतेन ॥ पयस्वतीरोषधयः
४५ पयस्वद्वीरुधां पयः । अपां पयसो यत्पयस्तेन मामिन्द्र सँ सृज ॥ अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ॥ अग्निँ होतारमिह तँ हुवे देवान्, यज्ञियानिह यान् हवामहे ॥
आ यन्तु देवाः सुमनस्यमाना वियन्तु देवा हविषो मे अस्य ॥ कस्त्वा युनक्ति स त्वा युनक्तु यानि घर्मे कपालान्युपचिन्वन्ति
४६ वेधसः । पूष्णस्तान्यपि व्रत इन्द्रवायू विमुञ्चताम् ॥ अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदगन् पुनः । इध्मो वेदिः परिधयश्च सर्वे यज्ञस्याऽऽयुरनु सं चरन्ति ॥ त्रयस्त्रिँशत्तन्तवो ये वितत्निरे य इमं यज्ञ२ँ स्वधया ददन्ते तेषां छिन्नं प्रत्येतद्दधामि स्वाहा घर्मो देवाँ अप्येतु ॥ अषाढ ओषधय उपचिन्वन्ति पञ्चचत्वारिँशच्च ॥ १। ५। १०॥

४७ वैश्वानरो न ऊत्याऽऽप्र यातु परावतः । अग्निरुक्थेन वाहसा ॥
ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ॥
वैश्वानरस्य दꣳसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः । उभा पितरा
महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो
विश्वा ओषधीरा विवेश । वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स
४८ रिषः पातु नक्तम् ॥ जातो यदग्ने भुवना व्यख्यः पशुं न गोपा इर्यः परिज्मा ।
वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः ॥ त्वमग्ने शोचिषा शोशुचान
आ रोदसी अपृणा जायमानः । त्वं देवाꣳ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा
॥ अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरꣳसुवीर्यम् । वयं जयेम शतिनꣳसहस्रिणं
वैश्वानर
४९ वाजमग्ने तवोतिभिः ॥ वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥ अव ते हेडो वरुण नमोभिरव
यज्ञेभिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनाꣳसि शिश्रथः कृतानि ॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय । अथा वयमादित्य
५० व्रते तवानागसो अदितये स्याम ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ॥
सुरभि नो मुखा करत् प्र ण आयूꣳषि तारिषत् ॥ आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य
इव ज्योतिषाऽपस्ततान । सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचाꣳसि
॥
अग्निर्मूर्धा भुवः । मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे । आ तू न
५१ उप गन्तन ॥ या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि
। अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम् ॥ अदितिर्न
उरुष्यत्वदितिः शर्म यच्छतु । अदितिः पात्वꣳहसः ॥ महीमूषु मातरꣳसुव्रतानामृतस्य
पत्नीमवसे हुवेम । तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ॥
सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् । दैवीं नावग्ग्
स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥ इमाꣳ सु नावमाऽरुहꣳ शतारित्राꣳ
शतस्फ्याम् । अच्छिद्रां पारयिष्णुम् ॥ दिवा स सहस्रिणं वैश्वानराऽऽदित्य तू
नोऽनेहसꣳसुशर्माणमेकान्नविꣳशतिश्च ॥ १। ५। ११॥ देवासुराः परा भूमिर्भूमिरुपप्रयन्तः
सं पश्याम्ययज्ञः सं पश्याम्यग्नि होत्रं मम नाम वैश्वानर एकादश ॥ देवासुराः क्रुद्धः सं

पश्यामि सं पश्यामि नक्तमुप गन्तनैक पंचाशत् ॥ देवासुराः पारयिष्णुम् ॥

## प्रथमकाण्डे षष्ठः प्रश्नः ६

१ सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च । बृहस्पतिप्रसूतो यजमान इह मा रिषत् ॥ आज्यमसि सत्यमसि सत्यस्याध्यक्षमसि हविरसि वैश्वानरं वैश्वदेवमुत्पूतशुष्मꣳ सत्यौजाः सहोऽसि सहमानमसि सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः सहस्व पृतन्यतः । सहस्रवीर्यमसि तन्मा जिन्वाऽऽज्यस्याऽऽज्यमसि सत्यस्य सत्यमसि सत्यायु

२ रसि सत्यशुष्ममसि सत्येन त्वाऽभि घारयामि तस्य ते भक्षीय पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि पञ्चानां त्वर्तूनां यन्त्राय धर्त्राय गृह्णामि पञ्चानां त्वा दिशां यन्त्राय धर्त्राय गृह्णामि पञ्चानां त्वा पञ्चजनानां यन्त्राय धर्त्राय गृह्णामि चरोस्त्वा पञ्चबिलस्य यन्त्राय धर्त्राय गृह्णामि ब्रह्मणस्त्वा तेजसे यन्त्राय धर्त्राय गृह्णामि क्षत्रस्य त्वौजसे यन्त्राय

३ धर्त्राय गृह्णामि विशे त्वा यन्त्राय धर्त्राय गृह्णामि सुवीर्याय त्वा गृह्णामि सुप्रजास्त्वाय त्वा गृह्णामि रायस्पोषाय त्वा गृह्णामि ब्रह्मवर्चसाय त्वा गृह्णामि भूरस्माकꣳहविर्देवानामाशिषो यजमानस्य देवानां त्वा देवताभ्यो गृह्णामि कामाय त्वा गृह्णामि ॥ सत्यायुरोजसे यन्त्राय त्रयस्त्रिꣳशच्च ॥ १। ६। १॥

४ ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेत्ता वसुविदुग्रोऽस्युग्रोऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता वसुविदभिभूरस्यभिभूरहꣳ सजातेषु भूयासमभिभूश्चेत्ता वसुविद्युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः । इन्धानास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥ यन्मे अग्ने अस्य यज्ञस्य रिष्या

५ द्यद्वा स्कन्दादाज्यस्योत विष्णो । तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि निर्ऋत्या उपस्थे । भूर्भुवः सुवरुच्छुष्मो अग्ने यजमानायैधि निशुष्मो अभिदासते । अग्ने देवेद्ध मन्विद्ध मन्द्रजिह्वामर्त्यस्य ते होतर्मूर्धन्ना जिघर्मि रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय मनोऽसि प्राजापत्यं मनसा मा भूतेनाऽऽविश वागस्यैन्द्री सपत्नक्षयणी

६ वाचा मेन्द्रियेणाऽऽविश वसन्तमृतूनां प्रीणामि स मा प्रीतः प्रीणातु ग्रीष्ममृतूनां प्रीणामि स मा प्रीतः प्रीणातु वर्षा ऋतूनां प्रीणामि ता मा प्रीताः प्रीणन्तु शरदमृतूनां प्रीणामि सा मा प्रीता प्रीणातु हेमन्तशिशिरावृतूनां प्रीणामि तौ मा प्रीतौ प्रीणीतामग्नीषोमयोरहं देवयज्यया चक्षुष्मान् भूयासमग्नेरहं देवयज्ययान्नादो भूयासं

७ दब्धिरस्यदब्धो भूयासममुं दभेयमग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासमिन्द्राग्नियोरहं

देवयज्ययैन्द्रियाव्यन्नादो भूयासमिन्द्रस्याहं देवयज्ययैन्द्रियावी भूयासं महेन्द्रस्याहं
देवयज्यया जेमानं महिमानं गमेयमग्नेः स्विष्टकृतोऽहं देवयज्ययाऽऽयुष्मान्, यज्ञेन
प्रतिष्ठां गमेयम् ॥ रिष्यात् सपत्नक्षयण्यन्नादो भूयासꣳ षड्विꣳशच्च ॥ १। ६। २॥
८ अग्निर्मा दुरिष्टात् पातु सविताऽघशꣳसाद्यो मेऽन्ति दूरेऽरातीयति तमेतेन जेषꣳ
सुरूपवर्षवर्ण एहीमान् भद्रान् दुर्याꣳ अभ्येहि मामनुव्रता न्यु शीर्षाणि मृढ्वमिड एह्यदित
एहि सरस्वत्येहि रन्तिरसि रमतिरसि सूनर्यसि जुष्टे जुष्टिं तेऽशीयोपहूत उपहवं
९ तेऽशीय सा मे सत्याशीरस्य यज्ञस्य भूयादरेडता मनसा तच्छकेयं यज्ञो दिवꣳ
रोहतु यज्ञो दिवं गच्छतु यो देवयानः पन्थास्तेन यज्ञो देवाꣳ अप्येत्वस्मास्विन्द्र इन्द्रियं
दधात्वस्मान्राय उत यज्ञाः सचन्तामस्मासु सन्त्वाशिषः सा नः प्रिया सुप्रतूर्तिर्मघोनी
जुष्टिरसि जुषस्व नो जुष्टा नो
१० ऽसि जुष्टिं ते गमेयं मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु ।
बृहस्पतिस्तनुतामिमं नो विश्वे देवा इह मादयन्ताम् ॥ ब्रध्न पिन्वस्व ददतो मे मा
क्षायि कुर्वतो मे मोपदसत् प्रजापतेर्भागोऽस्यूर्जस्वान् पयस्वान् प्राणापानौ मे पाहि
समानव्यानौ मे पाह्युदानव्यानौ मे पाह्यक्षितोऽस्यक्षित्यै त्वा मा मे क्षेष्ठा अमुत्रामुष्मिन्
लोके ॥ उपहवं जुष्टा नस्त्वा षट् च ॥ १। ६। ३॥
११ बर्हिषोऽहं देवयज्यया प्रजावान् भूयासं नराशꣳसस्याहं देवयज्यया
पशुमान् भूयासमग्नेः स्विष्टकृतोऽहं देवयज्ययाऽऽयुष्मान्, यज्ञेन प्रतिष्ठां
गमेयमग्नेरहमुज्जितिमनूज्जेषꣳ सोमस्याहमुज्जितिमनूज्जेषमग्नेरहमुज्जितिमनूज्जेषमग्नीषोमयोरहमुज्जितिम
१२ मुज्जितिमनूज्जेषं महेन्द्रस्याहमुज्जितिमनूज्जेषमग्नेः स्विष्टकृतोऽहमुज्जितिमनूज्जेषं वाजस्य
मा प्रसवेनोद्ग्राभेणोदग्रभीत् । अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः ॥ उद्ग्राभं
च निग्राभं च ब्रह्म देवा अवीवृधन् । अथा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् ॥
एमा अग्मन्नाशिषो दोहकामा इन्द्रवन्तो
१३ वनामहे धुक्षीमहि प्रजामिषम् ॥ रोहितेन त्वाऽग्निर्देवतां गमयतु हरिभ्यां त्वेन्द्रो
देवतां गमयत्वेतशेन त्वा सूर्यो देवतां गमयतु वि ते मुञ्चामि रशना वि रश्मीन्, वि
योक्त्रा यानि परिचर्तनानि धत्तादस्मासु द्रविणं यच्च भद्रं प्र णो ब्रूताद्भागधान् देवतासु
॥ विष्णोः शंयोरहं देवयज्यया यज्ञेन प्रतिष्ठां गमेयꣳ सोमस्याहं देवयज्यया
१४ सुरेता रेतो धिषीय त्वष्टुरहं देवयज्यया पशूनाꣳ रूपं पुषेयं देवानां

पत्नीरग्निर्गृहपतिर्यज्ञस्य मिथुनं तयोरहं देवयज्यया मिथुनेन प्रभूयासं वेदोऽसि
वित्तिरसि विदेय कर्मासि करुणमसि क्रियासꣳ सनिरसि सनितासि सनेयं घृतवन्तं
कुलायिनꣳ रायस्पोषꣳ सहस्रिणं वेदो ददातु वाजिनम् ॥
इन्द्रस्याहमिन्द्रवन्तः सोमस्याहं देवयज्यया चतुश्चत्वारिꣳशच्च ॥ १। ६। ४॥
१५ आ प्यायतां ध्रुवा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः । सूर्याया ऊधोऽदित्या उपस्थ
उरुधारा पृथिवी यज्ञे अस्मिन् ॥
प्रजापतेर्विभान्नाम लोकस्तस्मिग्ग्स्त्वा दधामि सह यजमानेन सदसि सन्मे भूयाः
सर्वमसि सर्वं मे भूयाः पूर्णमसि पूर्णं मे भूया अक्षितमसि मा मे क्षेष्ठाः प्राच्यां दिशि
देवा ऋत्विजो मार्जयन्तां दक्षिणायां
१६ दिशि मासाः पितरो मार्जयन्तां प्रतीच्यां दिशि गृहाः पशवो मार्जयन्तामुदीच्यां
दिश्याप ओषधयो वनस्पतयो मार्जयन्तामूर्ध्वायां दिशि यज्ञः संवथ्सरो यज्ञपतिर्मार्जयन्तां
विष्णोः क्रमोऽस्यभिमातिहा गायत्रेण छन्दसा पृथिवीमनु वि क्रमे निर्भक्तः स यं द्विष्मो
विष्णोः क्रमोऽस्यभिशस्तिहा त्रैष्टुभेन छन्दसाऽन्तरिक्षमनु वि क्रमे निर्भक्तः स यं द्विष्मो
विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतेन छन्दसा दिवमनु वि क्रमे निर्भक्तः स यं
द्विष्मो विष्णोः क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभेन छन्दसा दिशोऽनु वि क्रमे निर्भक्तः
स यं द्विष्मः ॥ दक्षिणायामन्तरिक्षमनु वि क्रमे निर्भक्तः स यं द्विष्मो विष्णोरेकान्न
त्रिꣳशच्च ॥ १। ६। ५॥
१७ अगन्म सुवः सुवरगन्म संदृशस्ते मा छिथ्सि यत्ते तपस्तस्मै ते माऽऽवृक्षि सुभूरसि
श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे धेहि वर्चोधा असि वर्चो मयि धेहीदमहममुं भ्रातृव्यमाभ्यो
दिग्भ्योऽस्यै दिवोऽस्मादन्तरिक्षादस्यै पृथिव्या अस्मादन्नाद्यान्निर्भजामि निर्भक्तः स यं
द्विष्मः ।
१८ सं ज्योतिषाऽभूवमैन्द्रीमावृतमन्वावर्ते समहं प्रजया सं मया प्रजा समहꣳ
रायस्पोषेण सं मया रायस्पोषः समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासं
वसुमान्, यज्ञो वसीयान् भूयासमग्न आयूꣳषि पवस आ सुवोर्जमिषं चनः । आरे
बाधस्व दुच्छुनाम् ॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
१९ दधत् पोषꣳ रयिं मयि । अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ
सुगृहपतिर्मया त्वं गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमा शासे तन्तवे ज्योतिष्मतीं

तामाशिषमाशासेऽमुष्मै ज्योतिष्मतीं कस्त्वा युनक्ति स त्वा विमुञ्चत्वग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधि यज्ञो बभूव स आ
२० बभूव स प्र जज्ञे स वावृधे । स देवानामधिपतिर्बभूव सो अस्मा ँ अधिपतीन् करोतु वयग्ग् स्याम पतयो रयीणाम् ॥ गोमा ँ अग्नेऽविमा ँ अश्वी यज्ञो नृवथ्सखा सदमिदप्रमृष्यः । इडावा ँ एषो असुर प्रजावान् दीर्घो रयिः पृथु बुध्नः सभावान् ॥ द्विष्मः सुवीर्य ँ स आ पञ्चत्रि ँ शच्च ॥ १। ६। ६॥
२१ यथा वै समृतसोमा एवं वा एते समृतयज्ञा यद्दर्शपूर्णमासौ कस्य वाह देवा यज्ञमा गच्छन्ति कस्य वा न बहूनां यजमानानां यो वै देवताः पूर्वः परिगृह्णाति स एनाः श्वो भूते यजत एतद्वै देवानामायतनं यदाहवनीयोऽन्तराग्नी पशूनां गार्हपत्यो मनुष्याणामन्वाहार्यपचनः पितृणामग्निं गृह्णाति स्व एवायतने देवताः परि
२२ गृह्णाति ताः श्वो भूते यजते व्रतेन वै मेध्योऽग्निर्व्रतपतिर्ब्राह्मणो व्रतभृद् व्रतमुपैष्यन् ब्रूयादग्ने व्रतपते व्रतं चरिष्यामीत्यग्निर्वै देवानां व्रतपतिस्तस्मा एव प्रतिप्रोच्य व्रतमालभते बर्हिषा पूर्णमासे व्रतमुपैति वथ्सैरमावास्यायामेतद्ध्येतयोरायतनमुपस्तीर्यः पूर्वश्चाग्निरपरश्चेत्याहुर्मनुष्या
२३ इन्न्वा उपस्तीर्णमिच्छन्ति किमु देवा येषां नवावसानमुपास्मिञ्छ्वो यक्ष्यमाणे देवता वसन्ति य एवं विद्वानग्निमुपस्तृणाति यजमानेन ग्राम्याश्च पशवोऽवरुध्या आरण्याश्चेत्याहुर्यद्ग्राम्यानुपवसति तेन ग्राम्यानव रुन्धे यदारण्यस्याश्नाति तेनारण्यान्, यदनाश्वानुपवसेत् पितृदेवत्यः स्यादारण्यस्याश्नातीन्द्रियं
२४ वा आरण्यमिन्द्रियमेवाऽऽत्मन् धत्ते यदनाश्वानुपवसेत् क्षोधुकः स्याद्यदश्नीयाद्रुद्रोऽस्य पशूनभिमन्येतापोऽश्नाति तन्नेवाशितं नेवानशितं न क्षोधुको भवति नास्य रुद्रः पशूनभि मन्यते वज्रो वै यज्ञः, क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो यदनाश्वानुपवसति वज्रेणैव साक्षात्क्षुधं भ्रातृव्य ँ हन्ति ॥ परि मनुष्या इन्द्रिय ँ साक्षात् त्रीणि च ॥ १। ६। ७॥
२५ यो वै श्रद्धामनारभ्य यज्ञेन यजते नास्येष्टाय श्रद्दधतेऽपः प्र णयति श्रद्धा वा आपः श्रद्धामेवाऽऽरभ्य यज्ञेन यजत उभयेऽस्य देवमनुष्या इष्टाय श्रद्दधते तदाहुरति वा एता वर्त्रन्नेदन्त्यति वाचं मनो वावैता नाति नेदन्तीति मनसा प्र णयतीयं वै मनो
२६ ऽनयैवैनाः प्र णयत्यस्कन्नहविर्भवति य एवं वेद यज्ञायुधानि संभरति यज्ञो वै यज्ञायुधानि यज्ञमेव तथ्संभरति यदेकमेक ँ संभरेत् पितृदेवत्यानि स्युर्यत् सह सर्वाणि

मानुषाणि द्वे द्वे संभरति याज्यानुवाक्ययोरेव रूपं करोत्यथो मिथुनमेव यो वै दश यज्ञायुधानि वेद मुखतोऽस्य यज्ञः कल्पते स्फ्य

२७ श्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानि य एवं वेद मुखतोऽस्य यज्ञः कल्पते यो वै देवेभ्यः प्रतिप्रोच्य यज्ञेन यजते जुषन्तेऽस्य देवा हव्यꣳ हविर्निरुप्यमाणमभि मन्त्रयेताग्निꣳ होतारमिह तꣳ हुव इति

२८ देवेभ्य एव प्रतिप्रोच्य यज्ञेन यजते जुषन्तेऽस्य देवा हव्यमेष वै यज्ञस्य ग्रहो गृहीत्वैव यज्ञेन यजते तदुदित्वा वाचं यच्छति यज्ञस्य धृत्या अथो मनसा वै प्रजापतिर्यज्ञमतनुत मनसैव तद्यज्ञं तनुते रक्षसामनन्ववचाराय यो वै यज्ञं योग आगते युनक्ति युङ्क्ते युञ्जानेषु कस्त्वा युनक्ति स त्वा युनक्त्वित्याह प्रजापतिर्वै कः प्रजापतिनैवैनं युनक्ति युङ्क्ते युञ्जानेषु

॥ वै मनः स्फ्य इति युनक्त्वेकादश च ॥ १। ६। ८॥

२९ प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं चामावास्यां चातिरात्रं च तानुदमिमीत यावदग्निहोत्रमासीत् तावानग्निष्टोमो यावती पौर्णमासी तावानुक्थ्यो यावत्यमावास्या तावानतिरात्रो य एवं विद्वानग्निहोत्रं जुहोति यावदग्निष्टोमेनोपाप्नोति तावदुपाऽऽप्नोति य एवं विद्वान् पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति

३० तावदुपाऽऽप्नोति य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाऽऽप्नोति परमेष्ठिनो वा एष यज्ञोऽग्र आसीत् तेन स परमां काष्ठामगच्छत् तेन प्रजापतिं निरवासाययत् तेन प्रजापतिः परमां काष्ठामगच्छत् तेनेन्द्रं निरवासाययत् तेनेन्द्रः परमां काष्ठामगच्छत् तेनाग्नीषोमौ निरवासाययत् तेनाग्नीषोमौ परमां काष्ठामगच्छतां य

३१ एवं विद्वान् दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छति यो वै प्रजातेन यज्ञेन यजते प्र प्रजया पशुभिर्मिथुनैर्जायते द्वादश मासाः संवथ्सरो द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि संपाद्यानीत्याहुर्वथ्सं चोपावसृजत्युखां चाधि श्रयत्यव च हन्ति दृषदौ च समाहन्त्यधि च वपते कपालानि चोप दधाति पुरोडाशं चा

३२ ऽधिश्रयत्याज्यं च स्तम्बयजुश्च हरत्यभि च गृह्णाति वेदिं च परिगृह्णाति पत्नीं च सं नह्यति प्रोक्षणीश्चाऽऽसादयत्याज्यं चैतानि वै द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि य एवꣳ संपाद्य यजते प्रजातेनैव यज्ञेन यजते प्र प्रजया पशुभिर्मिथुनैर्जायते ॥

उक्थ्येनोपाप्नोत्यगच्छतां यः पुरोडाशं च चत्वारि ँशच्च ॥ १। ६। ९॥
३३ ध्रुवोऽसि ध्रुवोऽहँ संजातेषु भूयासमित्याह ध्रुवानेवैनान् कुरुत उग्रोऽस्युग्रोऽहँ संजातेषु भूयासमित्याहाप्रतिवादिन एवैनान्कुरुतेऽभिभूरस्यभिभूरहँ संजातेषु भूयासमित्याह य एवैनं प्रत्युत्पिपीते तमुपास्यते युनज्मि त्वा ब्रह्मणा दैव्येनेत्याहैष वा अग्नेऱ्योगस्तेनै
३४ वैनं युनक्ति यज्ञस्य वै समृद्धेन देवाः सुवर्गं लोकमायन्, यज्ञस्य व्यृद्धेनासुरान् पराभावयन्, यन्मे अग्ने अस्य यज्ञस्य रिष्यादित्याह यज्ञस्यैव तथ्समृद्धेन यजमानः सुवर्गं लोकमेति यज्ञस्य व्यृद्धेन भ्रातृव्यान् परा भावयत्यग्नि होत्रमेताभिर्व्याहृतीभिरुप सादयेद्यज्ञमुखं वा अग्निहोत्रं ब्रह्मैता व्याहृतयो यज्ञमुख एव ब्रह्म
३५ कुरुते संवथ्सरे पर्यागत एताभिरेवोपसादयेद् ब्रह्मणैवोभयतः संवथ्सरं परिगृह्णाति दर्शपूर्णमासौ चातुर्मास्यान्यालभमान एताभिर्व्याहृतीभिर् हवीग्ष्यासादयेद्यज्ञमुखं वै दर्शपूर्णमासौ चातुर्मास्यानि ब्रह्मैता व्याहृतयो यज्ञमुख एव ब्रह्म कुरुते संवथ्सरे पर्यागत एताभिरेवासादयेद् ब्रह्मणैवोभयतः संवथ्सरं परिगृह्णाति यद्वै यज्ञस्य साम्ना क्रियते राष्ट्रं
३६ यज्ञस्याऽऽशीर्गच्छति यदृचा विशं यज्ञस्याऽऽशीर्गच्छत्यथ ब्राह्मणोऽनाशीर्केण यज्ञेन यजते सामिधेनीरनुवक्ष्यन्नेता व्याहृतीः पुरस्ताद्दध्याद् ब्रह्मैव प्रतिपदं कुरुते तथा ब्राह्मणः साशीर्केण यज्ञेन यजते यं कामयेत यजमानं भ्रातृव्यमस्य यज्ञस्याऽऽशीर्गच्छेदिति तस्यैता व्याहृतीः पुरोऽनुवाक्यायां दध्याद् भ्रातृव्यदेवत्या वै पुरोऽनुवाक्या भ्रातृव्यमेवास्य यज्ञस्या
३७ ऽशीर्गच्छति यान् कामयेत यजमानान्थ्समावत्येनान्, यज्ञस्याऽऽशीर्गच्छेदिति तेषामेता व्याहृतीः पुरोऽनुवाक्याया अर्धर्च एकां दध्याद्याज्यायै पुरस्तादेकां याज्याया अर्धर्च एकां तथैनान्थ्समावती यज्ञस्याऽऽशीर्गच्छति यथा वै पर्जन्यः सुवृष्टं वर्षत्येवं यज्ञो यजमानाय वर्षति स्थलयोदकं परिगृह्णन्त्याशिषा यज्ञं यजमानः परिगृह्णाति मनोऽसि प्राजापत्यं
३८ मनसा मा भूतेनाऽऽविशेत्याह मनो वै प्राजापत्यं प्राजापत्यो यज्ञो मन एव यज्ञमात्मन् धत्ते वागस्यैन्द्री सपत्नक्षयणी वाचा मेन्द्रियेणाऽऽ विशेत्याहैन्द्री वै वाग्वाचमेवैन्द्रीमात्मन् धत्ते ॥ तेनैव ब्रह्म राष्ट्रमेवास्य यज्ञस्य प्राजापत्यँ षड्विँशच्च ॥ १। ६। १०॥
३९ यो वै सप्तदशं प्रजापतिं यज्ञमन्वायत्तं वेद प्रति यज्ञेन तिष्ठति न यज्ञाद् भ्रँशत आ

श्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरं
द्व्यक्षरो वषट्कार एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्तो य एवं वेद प्रति यज्ञेन तिष्ठति
न यज्ञाद् भ्रꣳशते यो वै यज्ञस्य प्रायणं प्रतिष्ठा
४० मुदयनं वेद प्रतिष्ठितेनारिष्टेन यज्ञेन सग्ग्स्थां गच्छत्या श्रावयास्तु श्रौषड्यज ये
यजामहे वषट्कार एतद्वै यज्ञस्य प्रायणमेषा प्रतिष्ठैतदुदयनं य एवं वेद प्रतिष्ठितेनारिष्टेन
यज्ञेन सग्ग्स्थां गच्छति यो वै सूनृतायै दोहं वेद दुह एवैनां यज्ञो वै
सूनृताऽऽश्रावयेत्यैवैनामह्वदस्तु
४१ श्रौषडित्युपावास्राग्यजेत्युदनैषीद्ये यजामह इत्युपासदद्वषट्कारेण दोग्ध्येष वै सूनृतायै
दोहो य एवं वेद दुह एवैनां देवा वै सत्रमासत तेषां दिशोऽदस्यन्त एतामार्द्रां
पङ्क्तिमपश्यन्ना श्रावयेति पुरोवातमजनयन्नस्तु श्रौषडित्यभ्रꣳ समप्लावयन् यजेति विद्युत
४२ मजनयन्, ये यजामह इति प्रावर्षयन्नभ्यस्तनयन् वषट्कारेण ततो वै तेभ्यो दिशः
प्राप्यायन्त य एवं वेद प्रास्मै दिशः प्यायन्ते प्रजापतिं त्वो वेद प्रजापतिस्त्वं वेद
यं प्रजापतिर्वेद स पुण्यो भवत्येष वै छन्दस्यः प्रजापतिरा श्रावयास्तु श्रौषड्यज ये
यजामहे वषट्कारो य एवं वेद पुण्यो भवति वसन्त
४३ मृतूनां प्रीणामीत्याहर्तवो वै प्रयाजा ऋतूनेव प्रीणाति तेऽस्मै प्रीता यथापूर्वं
कल्पन्ते कल्पन्तेऽस्मा ऋतवो य एवं वेदाग्नीषोमयोरहं देवयज्यया चक्षुष्मान्
भूयासमित्याहाग्नीषोमाभ्यां वै यज्ञश्चक्षुष्मान् ताभ्यामेव चक्षुरात्मन् धत्तेऽग्नेरहं
देवयज्ययान्नादो भूयासमित्याहाग्निर्वै देवानामन्नादस्तेनैवा
४४ न्नाद्यमात्मन् धत्ते दब्धिरस्यदब्धो भूयासममुं दभेयमित्याहैतया वै दब्ध्या
देवा असुरानदभ्नुवन् तयैव भ्रातृव्यं दभ्नोत्यग्नीषोमयोरहं देवयज्यया वृत्रहा
भूयासमित्याहाग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन् ताभ्यामेव भ्रातृव्यग्ग् स्तृणुत इन्द्राग्नियोरहं
देवयज्ययेन्द्रियाव्यन्नादो भूयासमित्याहेन्द्रियाव्येवान्नादो भवतीन्द्रस्या
४५ हं देवयज्ययेन्द्रियावी भूयासमित्याहेन्द्रियाव्येव भवति महेन्द्रस्याहं देवयज्यया
जेमानं महिमानं गमेयमित्याह जेमानमेव महिमानं गच्छत्यग्नेः स्विष्टकृतोऽहं
देवयज्ययाऽऽयुष्मान्, यज्ञेन प्रतिष्ठां गमेयमित्याहायुरेवात्मन् धत्ते प्रति यज्ञेन तिष्ठति
॥ प्रतिष्ठामह्वदस्तु विद्युतं वसन्तमेवेन्द्रस्याऽष्टात्रिꣳशच्च ॥ १। ६। ११॥
४६ इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः॥ इन्द्रं नरो नेमधिता

हवन्ते यत्पार्या युनजते धियस्ताः । शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा
त्वं नः ॥ इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु । इन्द्र तानि त आ वृणे ॥ अनु
ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये । अनु
४७ क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥ आ यस्मिन्थ्सप्त वासवास्तिष्ठन्ति
स्वारुहो यथा । ऋषिर्ह दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः ॥ आमासु पक्वमैरय आ
सूर्यꣳरोहयो दिवि । घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे गिरः ॥
इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥
गायन्ति त्वा गायत्रिणो
४८ ऽर्चन्त्यर्कमर्किणः । ब्रह्माणस्त्वा शतक्रतवुद्वꣳशमिव येमिरे ॥ अꣳहोमुचे प्र
भरेमा मनीषामोषिष्ठदाव्ने सुमतिं गृणानाः । इदमिन्द्र प्रति हव्यं गृभाय सत्याः सन्तु
यजमानस्य कामाः ॥ विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः ।
अꣳहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ॥ प्र सम्राजं प्रथममध्वराणा
४९ मꣳहोमुचं वृषभं यज्ञियानाम् । अपां नपातमश्विना हयन्तमस्मिन्नर इन्द्रियं
धत्तमोजः ॥ वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । अधस्पदं तमीं कृधि
यो अस्माꣳ अभिदासति ॥ इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम् ।
अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम् ॥ मृगो न भीमः कुचरो गिरिष्ठाः
परावत
५० आ जगामा परस्याः । सृकꣳ सꣳशाय पविमिन्द्र तिग्मं वि शत्रून् ताढि वि
मृधो नुदस्व ॥ वि शत्रून् वि मृधो नुद वि वृत्रस्य हनू रुज । वि मन्युमिन्द्र
भामितोऽमित्रस्याभिदासतः ॥
त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूर मिन्द्रम् । हुवे नु शक्रं पुरुहूतमिन्द्रग्ग्
स्वस्ति नो मघवा धात्विन्द्रः ॥
मा ते अस्याꣳ
५१ सहसावन् परिष्टावघाय भूम हरिवः परादै । त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः
सूरिषु स्याम ॥ अनवस्ते रथमश्वाय तक्षन् त्वष्टा वज्रं पुरुहूत द्युमन्तम् । ब्रह्माण
इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥ वृष्णे यत् ते वृषणो अर्कमर्चानिन्द्र
ग्रावाणो अदितिः सजोषाः । अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून्

॥ वृत्रहत्येऽनु गायत्रिणोऽध्वराणां परावतोऽस्यामष्टाचत्वारिꣳशच्च ॥ १। ६। १२॥
सं त्वा सिंचामि ध्रुवोस्यग्निर्मा बर्हिषोऽहमाप्यायतामगन्म यथा वै यो वै श्रद्धां प्रजापतिर्यज्ञान् ध्रुवोसीत्याह यो वै सप्तदशमिंद्रं वो द्वादश ॥
सं त्वा बर्हिषोऽहं यथा वा एवं विद्वाञ्छ्रौषड्ढ् सहसावन्नेक पंचाशत् ॥
सं त्वा सिंचामि दस्यून् ॥

## प्रथमकाण्डे सप्तमः प्रश्नः ७

१ पाकयज्ञं वा अन्वाहिताग्नेः पशव उप तिष्ठन्त इडा खलु वै पाकयज्ञः सैषान्तरा प्रयाजानूयाजान्, यजमानस्य लोकेऽवहिता तामाह्रियमाणामभि मन्त्रयेत सुरूपवर्षवर्ण एहीति पशवो वा इडा पशूनेवोप ह्वयते यज्ञं वै देवा अदुह्रन्, यज्ञोऽसुराꣳ अदुहत् तेऽसुरा यज्ञदुग्धाः पराऽभवन् यो वै यज्ञस्य दोहं विद्वान्
२ यजतेऽप्यन्यं यजमानं दुहे सा मे सत्याऽऽशीरस्य यज्ञस्य भूयादित्याहैष वै यज्ञस्य दोहस्तेनैवैनं दुहे प्रत्ता वै गौर्दुहे प्रत्तेडा यजमानाय दुह एते वा इडायै स्तना इडोपहूतेति वायुर्वथ्सो यर्हि होतेडामुपह्वयेत तर्हि यजमानो होतारमीक्षमाणो वायुं मनसा ध्यायेन्
३ मात्रे वथ्समुपावसृजति सर्वेण वै यज्ञेन देवाः सुवर्गं लोकमायन् पाकयज्ञेन मनुरश्राम्यथ्सेडा मनुमुपावर्तत तान्देवासुरा व्यह्वयन्त प्रतीचीं देवाः पराचीमसुराः सा देवानुपावर्तत पशवो वै तद्देवानवृणत पशवोऽसुरानजहुर्यं कामयेतापशुः स्यादिति पराचीं तस्येडामुपह्वयेतापशुरेव भवति यं
४ कामयेत पशुमान्थ्स्यादिति प्रतीचीं तस्येडामुपह्वयेत पशुमानेव भवति ब्रह्मवादिनो वदन्ति स त्वा इडामुपह्वयेत य इडामुपहूयात्मानमिडायामुपह्वयेतेति सा नः प्रिया सुप्रतूर्तिर्मघोनीत्याहेडामेवोप हूयाऽऽत्मानमिडायामुप ह्वयते व्यस्तमिव वा एतद्यज्ञस्य यदिडा सामि प्राश्नन्ति
५ सामि मार्जयन्त एतत् प्रति वा असुराणां यज्ञो व्यच्छिद्यत ब्रह्मणा देवाः समदधुर्बृहस्पतिस्तनुतामिमं न इत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैव यज्ञꣳ संदधाति विच्छिन्नं यज्ञꣳ समिमं दधात्वित्याह संतत्यै विश्वे देवा इह मादयन्तामित्याह संतत्यैव यज्ञं देवेभ्योऽनु दिशति यां वै
६ यज्ञे दक्षिणां ददाति तामस्य पशवोऽनु संक्रामन्ति स एष ईजानोऽपशुर्भावुको यजमानेन खलु वै तत्कार्यमित्याहुर्यथा देवत्रा दत्तं कुर्वीतात्मन् पशून् रमयेतेति ब्रध्न

पिन्वस्वेत्याह यज्ञो वै ब्रघ्नो यज्ञमेव तन्महयत्यथो देवत्रैव दत्तं कुरुत आत्मन् पशून्
रमयते ददतो मे मा क्षायीत्याहाक्षितिमेवोपैति कुर्वतो मे मोप दसदित्याह भूमानमेवोपैति
॥ विद्वान् ध्यायेद्भवति यं प्राश्ञन्ति यां वै म एकान्नविꣳशतिश्च ॥ १। ७। १॥
७ स२ꣳश्रवा ह सौवर्चनसस्तुमिञ्जमौपोदितिमुवाच यथ्सत्रिणाꣳ होताऽभूः
कामिडामुपाह्वथा इति तामुपाह्व इति होवाच या प्राणेन देवान् दाधार व्यानेन
मनुष्यानपानेन पितृनिति छिनत्ति सा न छिनत्ती ३ इति छिनत्तीति होवाच शरीरं वा
अस्यै तदुपाह्वथा इति होवाच गौर्वा
८ अस्यै शरीरं गां वाव तौ तत्पर्यवदतां या यज्ञे दीयते सा प्राणेन देवान् दाधार यया
मनुष्या जीवन्ति सा व्यानेन मनुष्यान् यां पितृभ्यो घ्नन्ति साऽपानेन पितृन्, य एवं वेद
पशुमान् भवत्यथ वै तामुपाह्व इति होवाच या प्रजाः प्रभवन्तीः प्रत्याभवतीत्यन्नं वा
अस्यै तदु
९ पाह्वथा इति होवाचौषधयो वा अस्या अन्नमोषधयो वै प्रजाः प्रभवन्तीः प्रत्या भवन्ति
य एवं वेदान्नादो भवत्यथ वै तामुपाह्व इति होवाच या प्रजाः पराभवन्तीरनुगृह्णाति
प्रत्याभवन्तीर्गृह्णातीति प्रतिष्ठां वा अस्यै तदुपाह्वथा इति होवाचेयं वा अस्यै प्रतिष्ठे
१० यं वै प्रजाः पराभवन्तीरनु गृह्णाति प्रत्याभवन्तीर्गृह्णाति य एवं वेद प्रत्येव तिष्ठत्यथ
वै तामुपाह्व इति होवाच यस्यै निक्रमणे घृतं प्रजाः संजीवन्तीः पिबन्तीति छिनत्ति
सा न छिनत्ती ३ इति न छिनत्तीति होवाच प्र तु जनयतीत्येष वा इडामुपाह्वथा इति
होवाच वृष्टिर्वा इडा वृष्ट्यै वै निक्रमणे घृतं प्रजाः संजीवन्तीः पिबन्ति य एवं वेद प्रैव
जायतेऽन्नादो भवति ॥ गौर्वा अस्यै तत् प्रतिष्ठाऽह्वथा इति विꣳशतिश्च ॥ १। ७। २॥
११ परोक्षं वा अन्ये देवा इज्यन्ते प्रत्यक्षमन्ये यद्यजते य एव देवाः परोक्षमिज्यन्ते
तानेव तद्यजति यदन्वाहार्यमाहरत्येते वै देवाः प्रत्यक्षं यद् ब्राह्मणास्तानेव तेन प्रीणात्यथो
दक्षिणैवास्यैषाऽथो यज्ञस्यैव छिद्रमपि दधाति यद्वै यज्ञस्य क्रूरं यद्विलिष्टं तदन्वाहार्येणा
१२ ऽन्वाहरति तदन्वाहार्यस्यान्वाहार्यत्वं देवदूता वा एते यदृत्विजो यदन्वाहार्यमाहरति
देवदूतानेव प्रीणाति प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशत् स रिरिचानोऽमन्यत स
एतमन्वाहार्यमभक्तमपश्यत् तमात्मन्नधत्त स वा एष प्राजापत्यो यदन्वाहार्यो यस्यैवं
विदुषोऽन्वाहार्य आह्रियते साक्षादेव प्रजापतिमृध्नोत्यपरिमितो निरुप्योऽपरिमितः
प्रजापतिः प्रजापते

१३ रास्यै देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतं प्राजापत्यमन्वाहार्यमपश्यन्
तमन्वाहरन्त ततो देवा अभवन् परासुरा यस्यैवं विदुषोऽन्वाहार्य आह्रियते भवत्यात्मना
परास्य भ्रातृव्यो भवति यज्ञेन वा इष्टी पक्वेन पूर्ती यस्यैवं विदुषोऽन्वाहार्य आह्रियते
स त्वेवेष्टापूर्ती प्रजापतेर्भागोऽसी
१४ त्याह प्रजापतिमेव भागधेयेन समर्धयत्यूर्जस्वान् पयस्वानित्याहोर्जमेवास्मिन्
पयो दधाति प्राणापानौ मे पाहि समानव्यानौ मे पाहीत्याहाऽऽशिषमेवैतामा शास्ते
ऽक्षितोऽस्यक्षित्यै त्वा मा मे क्षेष्ठा अमुत्रामुष्मि३ँ ल्लोक इत्याह क्षीयते वा
अमुष्मि३ँल्लोकेऽन्नमितः प्रदानग्ग् ह्यमुष्मि३ँल्लोके प्रजा उपजीवन्ति यदेवमभि
मृशत्यक्षितिमेवैनद्गमयति नास्यामुष्मि३ँ ल्लोकेऽन्नं क्षीयते ॥ अन्वाहार्येण प्रजापतेरसि
ह्यमुष्मि३ँल्लोके पञ्चदश च ॥ १। ७। ३॥
१५ बर्हिषोऽहं देवयज्यया प्रजावान् भूयासमित्याह बर्हिषा वै प्रजापतिः प्रजा असृजत
तेनैव प्रजाः सृजते नराश३ँसस्याहं देवयज्यया पशुमान् भूयासमित्याह नराश३ँसेन
वै प्रजापतिः पशूनसृजत तेनैव पशून्थ्सृजतेऽग्नेः स्विष्टकृतोऽहं देवयज्यया ऽऽयुष्मान्,
यज्ञेन प्रतिष्ठां गमेयमित्याहाऽऽयुरेवात्मन् धत्ते प्रति यज्ञेन तिष्ठति दर्शपूर्णमासयो
१६ र्वै देवा उज्जितिमनूदजयन् दर्शपूर्णमासाभ्यामसुरानपानु दन्ताग्नेरहमुज्जितिमनूज्जे
षमित्याह दर्शपूर्णमासयोरेव देवतानां यजमान उज्जितिमनूज्जयति दर्शपूर्णमासाभ्यां
भ्रातृव्यानप नुदते वाजवतीभ्यां व्यूहत्यन्नं वै वाजोऽन्नमेवावरुन्धे द्वाभ्यां प्रतिष्ठित्यै
यो वै यज्ञस्य द्वौ दोहौ विद्वान्, यजत उभयत
१७ एव यज्ञं दुहे पुरस्ताच्चोप रिष्टाच्चैष वा अन्यो यज्ञस्य दोह इडायामन्यो यर्हि होता
यजमानस्य नाम गृह्णीयात् तर्हि ब्रूयादेमा अग्मन्नाशिषो दोहकामा इति स२ँस्तुता
एव देवता दुहेऽथो उभयत एव यज्ञं दुहे पुरस्ताच्चोपरिष्टाच्च रोहितेन त्वाऽग्निर्देवतां
गमयत्वित्याहैते वै देवाश्वा
१८ यजमानः प्रस्तरो यदेतैः प्रस्तरं प्रहरति देवाश्वैरेव यजमानँ सुवर्गं लोकं गमयति
वि ते मुञ्चामि रशना वि रश्मीनित्याहैष वा अग्नेर्विमोकस्तेनैवैनं वि मुञ्चति विष्णोः
शंयोरहं देवयज्यया यज्ञेन प्रतिष्ठां गमेयमित्याह यज्ञो वै विष्णुर्यज्ञ एवान्ततः प्रति
तिष्ठति सोमस्याहं देवयज्यया सुरेता
१९ रेतो धिषीयेत्याह सोमो वै रेतोधास्तेनैव रेत आत्मन् धत्ते त्वष्टुरहं देवयज्यया

पशूनाꣳ रूपं पुषेयमित्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृत्तेनैव पशूनाꣳ रूपमात्मन् धत्ते देवानां पत्नीरग्निर्गृहपतिर्यज्ञस्य मिथुनं तयोरहं देवयज्यया मिथुनेन प्र भूयासमित्याहैतस्माद्वै मिथुनात् प्रजापतिर्मिथुनेन

२० प्राजायत तस्मादेव यजमानो मिथुनेन प्र जायते वेदोऽसि वित्तिरसि विदेयेत्याह वेदेन वै देवा असुराणां वित्तं वेद्यमविन्दन्त तद्वेदस्य वेदत्वं यद्यद् भ्रातृव्यस्याभिध्यायेत् तस्य नाम गृह्णीयात् तदेवास्य सर्वं वृङ्क्ते घृतवन्तं कुलायिनꣳ रायस्पोषꣳ सहस्रिणं वेदो ददातु वाजिनमित्याह प्र सहस्रं पशूनाप्नोत्यास्य प्रजायां वाजी जायते य एवं वेद ॥ दर्शपूर्णमासयो रुभयतो देवाश्वाः सुरेताः प्रजापतिर्मिथुनेनाऽऽप्नोत्यष्टौ च ॥ १। ७। ४॥

२१ ध्रुवां वै रिच्यमानां यज्ञोऽनु रिच्यते यज्ञं यजमानो यजमानं प्रजा ध्रुवामाप्यायमानां यज्ञोऽन्वा प्यायते यज्ञं यजमानो यजमानं प्रजा आ प्यायतां ध्रुवा घृतेनेत्याह ध्रुवामेवाऽऽप्याययति तामाप्यायमानां यज्ञोऽन्वा प्यायते यज्ञं यजमानो यजमानं प्रजाः प्रजापतेर्विभान्नाम लोकस्तस्मिꣳग् स्त्वा दधामि सह यजमानेनेत्या

२२ हायं वै प्रजापतेर्विभान्नाम लोकस्तस्मिन्नेवैनं दधाति सह यजमानेन रिच्यत इव वा एतद्यद्यजते यद्यजमानभागं प्राश्नात्यात्मानमेव प्रीणात्येतावान् वै यज्ञो यावान् यजमानभागो यज्ञो यजमानो यद्यजमानभागं प्राश्नाति यज्ञ एव यज्ञं प्रतिष्ठापयत्येतद्वै सूयवसꣳ सोदकं यद्बर्हिश्चाऽऽपश्चैतद्

२३ यजमानस्याऽऽयतनं यद्वेदिर्यत् पूर्णपात्रमन्तर्वेदि निनयति स्व एवाऽऽयतने सूयवसꣳ सोदकं कुरुते सदसि सन्मे भूया इत्याहाऽऽपो वै यज्ञ आपोऽमृतं यज्ञमेवामृतमात्मन् धत्ते सर्वाणि वै भूतानि व्रतमुपयन्तमनूप यन्ति प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तामित्याहैष वै दर्शपूर्णमासयोरवभृथो

२४ यान्येवैनं भूतानि व्रतमुपयन्त मनूपयन्ति तैरेव सहावभृथमवैति विष्णुमुखा वै देवाश्छन्दोभिरिमान् लोकाननपजय्यमभ्यजयन् यद्विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमान् लोकाननपजय्यमभि जयति विष्णोः क्रमोऽस्यभिमातिहेत्याह गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिश श्छन्दोभिरेवेमान् लोकान्, यथापूर्वमभि जयति ॥ इत्येतदवभृथो दिशः सप्त च ॥ १। ७। ५॥

२५ अगन्म सुवः सुवरगन्मेत्याह सुवर्गमेव लोकमेति संदृशस्ते मा छित्सि यत्ते तपस्तस्मै ते मा वृक्षीत्याह यथायजुरेवैतत् सुभूरसि श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे

धेहीत्याहाऽऽशिषमेवैतामा शास्ते प्र वा एषोऽस्माल्लोकाच्च्यवते यो
२६ विष्णुक्रमान् क्रमते सुवर्गाय हि लोकाय विष्णुक्रमाः क्रम्यन्ते ब्रह्मवादिनो वदन्ति स त्वै विष्णुक्रमान् क्रमेत य इमान् लोकान् भ्रातृव्यस्य संविद्य पुनरिमं लोकं प्रत्यवरोहेदित्येष वा अस्य लोकस्य प्रत्यवरोहो यदाहेदमहममुं भ्रातृव्यमाभ्यो दिग्भ्योऽस्यै दिव इतीमानेव लोकान् भ्रातृव्यस्य संविद्य पुनरिमं लोकं प्रत्यवरोहति सं
२७ ज्योतिषाऽभूवमित्याहास्मिन्नेव लोके प्रति तिष्ठत्यैन्द्रीमावृतमन्वावर्त इत्याहासौ वा आदित्य इन्द्रस्तस्यैवाऽऽवृतमनु पर्यावर्तते दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तते समहं प्रजया सं मया प्रजेत्याहाऽऽशिष
२८ मेवैतामा शास्ते समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासमित्याह यथायजुरेवैतद्वसुमान्, यज्ञो वसीयान् भूयासमित्याहाऽऽशिषमेवैतामा शास्ते बहु वै गार्हपत्यस्यान्ते मिश्रमिव चर्यत आग्निपावमानीभ्यां गार्हपत्यमुप तिष्ठते पुनात्येवाग्निं पुनीत आत्मानं द्वाभ्यां प्रतिष्ठित्या अग्ने गृहपत इत्याह
२९ यथायजुरेवैतच्छतꣳ हिमा इत्याह शतं त्वा हेमन्तानिन्धिषीयेति वावैतदाह पुत्रस्य नाम गृह्णात्यन्नादमेवैनं करोति तामाशिषमा शासे तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रोऽजातः स्यात् तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो
३० जातः स्यात् तेज एवास्मिन् ब्रह्मवर्चसं दधाति यो वै यज्ञं प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवति कस्त्वा युनक्ति स त्वा वि मुञ्चत्वित्याह प्रजापतिर्वै कः प्रजापतिनैवैनं युनक्ति प्रजापतिना वि मुञ्चति प्रतिष्ठित्या ईश्वरं वै व्रतमविसृष्टं प्रदहोऽग्ने व्रतपते व्रतमचारिषमित्याह व्रतमेव
३१ वि सृजते शान्त्या अप्रदाहाय पराङ् वाव यज्ञ एति न नि वर्तते पुनऱ्यो वै यज्ञस्य पुनरालम्भं विद्वान्, यजते तमभि नि वर्तते यज्ञो बभूव स आ बभूवेत्याहैष वै यज्ञस्य पुनरालम्भस्तेनैवैनं पुनरालभतेऽनवरुद्धा वा एतस्य विराड्य आहिताग्निः सन्नसभः पशवः खलु वै ब्राह्मणस्य सभेष्ट्वा प्राङुत्क्रम्य ब्रूयाद्गोमाꣳअग्नेऽविमाꣳ अश्वी यज्ञ इत्यव सभाꣳ रुन्धे प्र सहस्रं पशूनाप्नोत्यास्य प्रजायां वाजी जायते ॥ यः स माशिषं गृहपत इत्याहामुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो व्रतमेव खलु वै चतुर्विꣳशतिश्च ॥ १।

७। ६॥
३२ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः । केतपूः केतं नः
पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः ॥
इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयाऽयं वृत्रं वध्यात् ॥ वाजस्य नु प्रसवे मातरं महीमदितिं
नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म
साविषत् ॥ अप्स्व
३३ न्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवथ वाजिनः ॥ वायुर्वा त्वा मनुर्वा त्वा
गन्धर्वाः सप्तविꣳशतिः । ते अग्रे अश्वमायुञ्जन्ते अस्मिञ्जवमादधुः ॥ अपां नपादाशुहेमन्
य ऊर्मिः ककुद्मान् प्रतूर्तिर्वाजसातमस्तेनायं वाजꣳसेत् ॥ विष्णोः क्रमोऽसि विष्णोः
क्रान्तमसि विष्णोर्विक्रान्तमस्यङ्कौ न्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनु संचरन्तौ
दूरेहेतिरिन्द्रियावान् पतत्री ते नोऽग्नयः पप्रयः पारयन्तु ॥ अप्सु न्यङ्कौ पञ्चदश च ॥ १।
७। ७॥
३४ देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषं देवस्याहꣳ सवितुः
प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकꣳरुहेयमिन्द्राय वाचं वदतेन्द्रं वाजं जापयतेन्द्रो
वाजमजयित् । अश्वाजनि वाजिनि वाजेषु वाजिनीवत्यश्वान्थ्समथ्सु वाजय ॥ अर्वासि
सप्तिरसि वाज्यसि वाजिनो वाजं धावत मरुतां प्रसवे जयत वि योजना मिमीध्वमध्वनः
स्कभ्नीत
३५ काष्ठां गच्छत वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ॥
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ ते नो अर्वन्तो हवनश्रुतो
हवं विश्वे शृण्वन्तु वाजिनः ॥ मितद्रवः सहस्रसा मेधसाता सनिष्यवः । महो ये
रत्नꣳ समिधेषु जभ्रिरे शं नो भवन्तु वाजिनो हवेषु ॥ देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयव
३६ न्नमीवाः ॥ एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि । क्रतुं
दधिक्रा अनु संतवीत्वत् पथामङ्काꣳस्यन्वापनीफणत् ॥ उत स्मास्य द्रवतस्तुरण्यतः पर्णं
न वेरनु वाति प्रगर्धिनः । श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः
॥ आ मा वाजस्य प्रसवो जगम्यादा द्यावापृथिवी विश्वशम्भू । आ मा गन्तां पितरा
३७ मातरा चाऽऽमा सोमो अमृतत्वाय गम्यात् ॥ वाजिनो वाजजितो वाजꣳसरिष्यन्तो
वाजं जेष्यन्तो बृहस्पतेर्भागमव जिघ्रत वाजिनो वाजजितो वाजꣳ ससृवाꣳसो

वाजं जिगिवाꣳसो बृहस्पतेर्भागे नि मृड्ढ्वमियं वः सा सत्या संधाऽभूद्यामिन्द्रेण समधध्वमजीजिपत वनस्पतय इन्द्रं वाजं विमुच्यध्वम् ॥ स्कभ्नीत युयवन्पितरा द्विचत्वारिꣳशच्च ॥ १। ७। ८॥

३८ क्षत्रस्योल्बमसि क्षत्रस्य योनिरसि जाय एहि सुवो रोहाव रोहाव हि सुवरहं नावुभयोः सुवो रोक्ष्यामि वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चाऽऽन्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च । आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो

३९ यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताꣳ सुवर्देवाꣳ अगन्मामृता अभूम प्रजापतेः प्रजा अभूम समहं प्रजया सं मया प्रजा समहꣳ रायस्पोषेण सं मया रायस्पोषोऽन्नाय त्वाऽन्नाद्याय त्वा वाजाय त्वा वाजजित्यायै त्वाऽमृतमसि पुष्टिरसि प्रजननमसि ॥ अपानो वाजाय नव च ॥ १। ७। ९॥

४० वाजस्येमं प्रसवः सुषुवे अग्रे सोमꣳ राजानमोषधीष्वप्सु । ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जाग्रियाम पुरोहिताः ॥
वाजस्येदं प्रसव आ बभूवेमा च विश्वा भुवनानि सर्वतः । स विराजं पर्येति प्रजानन् प्रजां पुष्टिं वर्धयमानो अस्मे ॥ वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् । अदित्सन्तं दापयतु प्रजानन् रयिं

४१ च नः सर्ववीरां नि यच्छतु ॥ अग्ने अच्छा वदेह नः प्रति नः सुमना भव । प्र णो यच्छ भुवस्पते धनदा असि नस्त्वम् ॥ प्र णो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः । प्र देवाः प्रोत सूनृता प्र वाग्देवी ददातु नः ॥ अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय । वाचं विष्णुꣳ सरस्वतीꣳ सवितारं

४२ च वाजिनम् ॥ सोमꣳ राजानं वरुणमग्निमन्वारभामहे । आदित्यान्, विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामि ॥ रयिꣳ सवितारꣳ षड्विꣳशच्च ॥
१। ७। १०॥

४३ अग्निरेकाक्षरेण वाचमुदजयदश्विनौ द्व्यक्षरेण प्राणापानावुदजयतां विष्णुस्त्र्यक्षरेण त्रीन्

लोकानुदजयत् सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत् पूषा पञ्चाक्षरेण पङ्क्तिमुदजयद्धाता षडक्षरेण षड्तूनुदजयन्मरुतः सप्ताक्षरेण सप्तपदाꣳ शक्करीमुदजयन् बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयन्मित्रो नवाक्षरेण त्रिवृतग्ग्‌ स्तोममुदजयद्
४४ वरुणो दशाक्षरेण विराजमुदजयदिन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयद्विश्वे देवा द्वादशाक्षरेण जगतीमुदजयन्वसवस्त्रयोदशाक्षरेण त्रयोदशग्ग्‌ स्तोममुदजयन् रुद्राश्चतुर्दशाक्षरेण चतुर्दशग्ग्‌ स्तोममुदजयन्नादित्याः पञ्चदशाक्षरेण पञ्चदशग्ग्‌ स्तोममुदजयन्नदितिष्षोडशाक्षरेण षोडशग्ग्‌ स्तोममुदजयत् प्रजापतिः सप्तदशाक्षरेण सप्तदशग्ग्‌ स्तोममुदजयत् ॥
त्रिवृतग्ग्‌ स्तोममुदजयत् षद्वत्वारिꣳशच्च ॥ १। ७। ११॥
४५ उपयामगृहीतोऽसि नृषदं त्वा द्रुषदं भुवनसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतोऽस्यप्सुषदं त्वा घृतसदं व्योमसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतोऽसि पृथिविषदं त्वाऽन्तरिक्षसदं नाकसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा ॥ ये ग्रहाः पञ्चजनीना येषां तिस्रः परमजाः । दैव्यः कोशः
४६ समुब्जितः । तेषां विशिप्रियाणामिषमूर्जꣳ समग्रभीमेष ते योनिरिन्द्राय त्वा ॥ अपाꣳ रसमुद्वयसꣳ सूर्यरश्मिꣳ समाभृतम् । अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममेष ते योनिरिन्द्राय त्वा ॥ अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः । स प्रत्युदैद्धरुणो मध्वो अग्रग्ग्‌ स्वायां यत्तनुवां तनूमैरयत । उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा ॥ कोशस्तनुवां त्रयोदश च ॥ १। ७। १२॥
४७ अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः । अन्विन्द्रꣳ रोदसी वावशाने अन्वापो अजिहत जायमानम् ॥ अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये । अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥ इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् । न ह्यस्या अपरं चन जरसा
४८ मरते पतिः ॥ नाहमिन्द्राणि रारण सख्युर्वृषाकपेर् ऋते । यस्येदमप्यꣳ हविः प्रियं देवेषु गच्छति ॥ यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत् । यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥ आ ते मह इन्द्रोत्युग्र समन्यवो यत् समरन्त सेनाः । पताति दिद्युन्नर्यस्य बाहुवोर्मा ते
४९ मनो विष्वद्रियग्विचारीत् ॥ मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि

यत् ते । नव्ये देष्णे शस्ते अस्मिन् त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः ॥ आ तू भर माकिरेतत् परिष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् । इन्द्र यत् ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व
५० प्र यन्धि ॥ प्रदातारꣳ हवामह इन्द्रमा हविषा वयम् । उभा हि हस्ता वसुना पृणस्वाऽऽप्र यच्छ दक्षिणादोत सव्यात् ॥ प्रदाता वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा । अस्मिन्, यज्ञे बर्हिष्या निषद्याथा भव यजमानाय शं योः ॥ इन्द्रः सुत्रामा स्ववाꣳ अवोभिः सुमृडीको भवतु विश्ववेदाः । बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य
५१ पतयः स्याम ॥ तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम । स सुत्रामा स्ववाꣳ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥ रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥
प्रोष्वस्मै पुरोरथमिन्द्राय शूषमर्चत । अभीके चिदु लोककृत् सङ्गे समत्सु वृत्रहा । अस्माकं बोधि चोदिता नभन्तामन्यकेषाम् । ज्याका अधि धन्वसु ॥ जरसा मा ते हर्यश्व सुवीर्यस्याध्येकं च ॥ १। ७। १३॥
पाकयज्ञꣳ सग्ग् श्रवाः परोक्षं बर्हिषोहं ध्रुवामगन्मेत्याह देव सवितर्देवस्याहं क्षत्रस्योल्बं वाजस्येममग्निरेकाक्षरेणोऽपयाम गृहीतोऽस्यन्वह मासास्त्रयोदश ॥
पाकयज्ञं परोक्षं ध्रुवां वि सृजते च नः सर्ववीरां पतयः स्यामैकं पंचाशत् ॥
पाकयज्ञं धन्वसु ॥

## प्रथमकाण्डे अष्टमः प्रश्नः ८

१ अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति धेनुर्दक्षिणा ये प्रत्यञ्चः शम्याया अवशीयन्ते तन्नैरृतमेककपालं कृष्णं वासः कृष्णतूषं दक्षिणा वीहि स्वाहाऽऽहुतिं जुषाण एष ते निर्ऋते भागो भूते हविष्मत्यसि मुञ्चेममꣳहसः स्वाहा नमो य इदं चकाराऽऽदित्यं चरुं निर्वपति वरो दक्षिणा ऽऽग्नावैष्णवमेकादशकपालं वामनो वही दक्षिणाऽग्नीषोमीयमे
२ कादशकपालꣳ हिरण्यं दक्षिणैन्द्रमेकादशकपालमृषभो वही दक्षिणाऽऽग्नेयमष्टाकपालमैन्द्रं दध्यृषभो वही दक्षिणैन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुं प्रथमजो वत्सो दक्षिणा सौम्यग्ग् श्यामाकं चरुं वासो दक्षिणा सरस्वत्यै चरुꣳ सरस्वते चरुं मिथुनौ गावौ दक्षिणा ॥
अग्नीषोमीयं चतुस्त्रिꣳशच्च ॥ १। ८। १॥
३ आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं

पौष्णं चरुं मारुतꣳ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालम् ॥ आग्नेयꣳ सौम्यं मारुतमष्टादश ॥ १। ८। २॥
४ ऐन्द्राग्नमेकादशकपालं मारुतीमामिक्षां वारुणीमामिक्षां कायमेककपालं प्रघास्यान् हवामहे मरुतो यज्ञवाहसः करम्भेण सजोषसः ॥ मो षू ण इन्द्र पृथ्सु देवास्तु स्म ते शुष्मिन्नवया । मही ह्यस्य मीढुषो यव्या । हविष्मतो मरुतो वन्दते गीः ॥ यद् ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये । यच्छूद्रे यदर्य एनश्चकृमा वयम् । यदेकस्याधि धर्मणि तस्यावयजनमसि स्वाहा ॥ अक्रन् कर्म कर्मकृतः सह वाचा मयो भुवा । देवेभ्यः कर्म कृत्वाऽस्तं प्रेत सुदानवः ॥ वयं यद्विꣳशतिश्च ॥ १। ८। ३॥
५ अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकꣳ सूर्येणोद्यता मरुद्भ्यः सान्तपनेभ्यो मध्यंदिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायं चरुम् पूर्णा दर्वि परा पत सुपूर्णा पुनरापत । वस्नेव वि क्रीणावहा इषमूर्जꣳ शतक्रतो ॥ देहि मे ददामि ते नि मे धेहि नि ते दधे । निहारमिन्नि मे हरा निहारं
६ नि हरामि ते ॥ मरुद्भ्यः क्रीडिभ्यः पुरोडाशꣳ सप्तकपालं निर्वपति साकꣳ सूर्येणोद्यताग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुमैन्द्राग्नमेकादशकपालमैन्द्रं चरुं वैश्वकर्मणमेककपालम् ॥
हरा निहारं त्रिꣳशच्च ॥ १। ८। ४॥
७ सोमाय पितृमते पुरोडाशꣳ षट्कपालं निर्वपति पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थ मेतत् ते तत ये च त्वामन्वेतत् ते पितामह प्रपितामह ये च त्वामन्वत्र पितरो यथाभागं मन्दध्वꣳ सुसंदृशं त्वा वयं मघवन् मन्दिषीमहि । प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशाꣳ अनु । योजा न्विन्द्र ते हरी ॥
८ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती । योजा न्विन्द्र ते हरी ॥ अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरोऽमीमृजन्त पितरः ॥ परेत पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः । अथा पितृन्थ्सुविदत्राꣳ अपीत यमेन ये सधमादं मदन्ति ॥ मनो न्वा हुवामहे नाराशꣳसेन स्तोमेन पितृणां च मन्मभिः ॥ आ
९ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ॥
पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातꣳ सचेमहि ॥

यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिꣳसिम । अग्निर्मा तस्मादेनसो
गार्हपत्यः प्र मुञ्चतु दुरिता यानि चकृम करोतु मामनेनसम् ॥ हरी मन्मभिरा
चतुश्चत्वारिꣳशच्च ॥ १। ८। ५॥
१० प्रतिपूरुषमेककपालान्निर्वपत्येकमतिरिक्तं यावन्तो गृह्याः स्मस्तेभ्यः कमकरं पशूनाꣳ
शर्मासि शर्म यजमानस्य शर्म मे यच्छैक एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र
पशुस्तं जुषस्वैष ते रुद्र भागः सह स्वस्राऽम्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय
भेषजमथो अस्मभ्यं भेषजꣳ सुभेषजं
११ यथाऽसति । सुगं मेषाय मेष्या अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम् । यथा
नः श्रेयसः करद्यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यवसाययात् ॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्
॥ एष ते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः
कृत्तिवासाः ॥ सुभेषजमिहि त्रीणि च ॥ १। ८। ६॥
१२ ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं वायव्यं
पयः सौर्यमेककपालं द्वादशगवꣳ सीरं दक्षिणा ऽऽग्नेयमष्टाकपालं निर्वपति रौद्रं
गावीधुकं चरुमैन्द्रं दधि वारुणं यवमयं चरुं वहिनी धेनुर्दक्षिणा ये देवाः पुरःसदोऽग्निनेत्रा
दक्षिणसदो यमनेत्राः पश्चात्सदः सवितृनेत्रा उत्तरसदो वरुणनेत्रा उपरिषदो बृहस्पतिनेत्रा
रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यो
१३ नमस्तेभ्यः स्वाहा समूढꣳ रक्षः संदग्धꣳ रक्ष इदमहꣳ रक्षोऽभि सं दहाम्यग्नये
रक्षोघ्ने स्वाहा यमाय सवित्रे वरुणाय बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा प्रष्टिवाही रथो
दक्षिणा देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ रक्षसो वधं जुहोमि
हतꣳ रक्षोऽवधिष्म रक्षो यद्वस्ते तद्दक्षिणा ॥ तेभ्यः पञ्चचत्वारिꣳशच्च ॥ १। ८। ७॥
१४ धात्रे पुरोडाशं द्वादशकपालं निर्वपत्यनुमत्यै चरुꣳ राकायै चरुꣳ सिनीवाल्यै चरुं
कुह्वै चरुं मिथुनौ गावौ दक्षिणाऽऽग्नावैष्णवमेकादश कपालं निर्वपत्यैन्द्रावैष्णवमेकादश
कपालं वैष्णवं त्रिकपालं वामनो वही दक्षिणाऽग्नीषोमीयमेकादशकपालं
निर्वपतीन्द्रासोमीयमेकादशकपालꣳ सौम्यं चरुं बभ्रुर्दक्षिणा सोमापौष्णं चरुं
निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुग्ग् श्यामो दक्षिणा वैश्वानरं द्वादशकपालं निर्वपति
हिरण्यं दक्षिणा वारुणं यवमयं चरुमश्वो दक्षिणा ॥ वैश्वानरं द्वादशकपालं निरष्टौ च
॥ १। ८। ८॥

१५ बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालꣳ राजन्यस्य गृह ऋषभो दक्षिणाऽऽदित्यं चरुं महिष्यै गृहे धेनुर्दक्षिणा नैर्ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं कृष्णा कूटा दक्षिणाऽऽग्नेयमष्टाकपालꣳ सेनान्यो गृहे हिरण्यं दक्षिणा वारुणं दशकपालꣳ सूतस्य गृहे महानिरष्टो दक्षिणा मारुतꣳ सप्तकपालं ग्रामण्यो गृहे पृश्निर्दक्षिणा सावित्रं द्वादशकपालं

१६ क्षत्तुर्गृह उपध्वस्तो दक्षिणाऽऽश्विनं द्विकपालꣳ संग्रहीतुर्गृहे संवात्यौ दक्षिणा पौष्णं चरुं भागदुघस्य गृहे श्यामो दक्षिणा रौद्रं गावीधुकं चरुमक्षावापस्य गृहे शबल उद्वारो दक्षिणेन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रति निर्वपतीन्द्रायाꣳहोमुचेऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यान्मैत्राबार्हस्पत्यं भवति श्वेतायै श्वेतवथ्सायै दुग्धे स्वयंमूर्ते स्वयंमथित आज्य आश्वत्थे

१७ पात्रे चतुःस्रक्तौ स्वयमवपन्नायै शाखायै कर्णाग्श्चाऽकर्णाग्श्च तण्डुलान्, वि चिनुयाद्ये कर्णाः स पयसि बार्हस्पत्यो येऽकर्णाः स आज्ये मैत्रः स्वयंकृता वेदिर्भवति स्वयंदिनं बर्हिः स्वयंकृत इध्मः सैव श्वेता श्वेतवथ्सा दक्षिणा ॥ सावित्रं द्वादशकपालमाश्वत्थे त्रयस्त्रिꣳशच्च ॥ १। ८। ९॥

१८ अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाꣳ सोमाय वनस्पतये श्यामाकं चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणाꣳ रुद्राय पशुपतये गावीधुकं चरुं बृहस्पतये वाचस्पतये नैवारं चरुमिन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणां मित्राय सत्यायाऽऽम्बानां चरुं वरुणाय धर्मपतये यवमयं चरुꣳ सविता त्वा प्रसवानाꣳसुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाꣳ रुद्रः पशूनां

१९ बृहस्पतिर्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां वरुणो धर्मपतीनां ये देवा देवसुवः स्थ त इमममामुष्यायणमनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा प्रति त्यन्नाम राज्यमधायि स्वां तनुवं वरुणो अशिश्रेच्छुचेर्मित्रस्य व्रत्या अभूमामन्महि महत ऋतस्य नाम सर्वे व्राता वरुणस्याभूवन्वि मित्र एवैररातिमतारीदसूषुदन्त यज्ञिया ऋतेन व्यु त्रितो जरिमाणं न आनड् विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि ॥ पशूनां व्राताः पञ्चविꣳशतिश्च ॥ १। ८। १०॥

२० अर्थेतः स्थाऽपां पतिरसि वृषास्यूर्मिर्वृषसेनोऽसि व्रजक्षितः स्थ मरुतामोजः स्थ
सूर्यवर्चसः स्थ सूर्यत्वचसः स्थ मान्दाः स्थ वाशाः स्थ शक्वरीः स्थ विश्वभृतः स्थ
जनभृतः स्थाऽग्नेस्तेजस्याः स्थाऽपामोषधीनाꣳ रसस्स्थाऽपो देवीर्मधुमतीरगृह्णन्नूर्जस्वती
राजसूयाय चितानाः । याभिर्मित्रावरुणावभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः ॥
राष्ट्रदाः स्थ राष्ट्रं दत्त स्वाहा राष्ट्रदाः स्थ राष्ट्रममुष्मै दत्त ॥ अत्येकादश च ॥ १। ८।
११॥
२१ देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वं महि वर्चः, क्षत्रियाय वन्वाना अनाधृष्टाः
सीदतोर्जस्वतीर्महि वर्चः, क्षत्रियाय दधतीरनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य
दात्रमसि शुक्रा वः शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय चितानाः
॥ सधमादो द्युम्निनीरूर्ज एता अनिभृष्टा अपस्युवो वसानः । पस्त्यासु चक्रे वरुणः
सधस्थमपाꣳ शिशु
२२ र्मातृतमास्वन्तः ॥ क्षत्रस्योल्बमसि क्षत्रस्य योनिरस्याविन्नो अग्निर्गृहपतिराविन्न
इन्द्रो वृद्धश्रवा आविन्नः पूषा विश्ववेदा आविन्नौ मित्रावरुणावृतावृधावाविन्ने द्यावापृथिवी
धृतव्रते आविन्ना देव्यदितिर्विश्वरूप्या विन्नोऽयमसावामुष्यायणोऽस्यां विश्यस्मिन् राष्ट्रे
महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं
ब्राह्मणानाꣳ राजेन्द्रस्य
२३ वज्रोऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्याच्छत्रुबाधनाः स्थ पात मा प्रत्यञ्चं पात मा
तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात विश्वाभ्यो मा नाष्ट्राभ्यः पात हिरण्यवर्णावुषसां
विरोकेऽयः स्थूणावुदितौ सूर्यस्याऽऽरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च
॥ शिशुरिन्द्रस्यैकचत्वारिꣳशच्च ॥
१। ८। १२॥
२४ समिधमा तिष्ठ गायत्री त्वा छन्दसामवतु त्रिवृथ् स्तोमो रथन्तरꣳ सामाग्निर्देवता
ब्रह्म द्रविण मुग्रामा तिष्ठ त्रिष्टुप् त्वा छन्दसामवतु पञ्चदशः स्तोमो बृहथ्सामेन्द्रो देवता
क्षत्रं द्रविणं विराजमा तिष्ठ जगती त्वा छन्दसामवतु सप्तदशः स्तोमो वैरूपꣳ साम
मरुतो देवता विड्द्रविणमुदीचीमा तिष्ठानुष्टुप् त्वा
२५ छन्दसामवत्वेकविꣳशः स्तोमो वैराजꣳ साम मित्रावरुणौ देवता बलं
द्रविणमूर्ध्वामा तिष्ठ पङ्क्तिस्त्वा छन्दसामवतु त्रिणवत्रयस्त्रिꣳशौ स्तोमौ शाक्वररैवते
सामनी बृहस्पतिर्देवता वर्चो द्रविणमीदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च

मितश्च संमितश्च सभराः । शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माग्श्च
सत्यश्चर्तपाश्चा
२६ ऽत्यꣳहाः । अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे
स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहाऽꣳशाय स्वाहा
भगाय स्वाहा क्षेत्रस्य पतये स्वाहा पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय
स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहाऽद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा
चराचरेभ्यः स्वाहा परिप्लवेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा ॥ अनुष्टुप्स्वर्तपाश्च सरीसृपेभ्यः
स्वाहा ॥
१। ८। १३॥
२७ सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादमृतमसि मृत्योर्मा पाहि दिद्योन्मा पाह्यवेष्टा
दन्दशूका निरस्तं नमुचेः शिरः ॥ सोमो राजा वरुणो देवा धर्मसुवश्च ये । ते ते वाचꣳ
सुवन्तां ते ते प्राणꣳ सुवन्तां ते ते चक्षुः सुवन्तां ते ते श्रोत्रꣳसुवन्ता ꣳ सोमस्य त्वा
द्युम्नेनाभिषिञ्चाम्यग्ने
२८ स्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण मरुतामोजसा क्षत्राणां
क्षत्रपतिरस्यति दिवस्पाहि समाववृत्रन्नधरागुदीचीरहिं बुध्नियमनु संचरन्तीस्ताः पर्वतस्य
वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयानाः ॥ रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि
यमेष्टमसि । प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते
जुहुमस्तन्नो अस्तु वयग्ग् स्याम पतयो रयीणाम् ॥ अग्ने स्तैकादश च ॥ १। ८। १४॥
२९ इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयाऽयं वृत्रं वध्यान्मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा
युनज्मि यज्ञस्य योगेन विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि मरुतां
प्रसवे जेषमाप्तं मनः समहमिन्द्रियेण वीर्येण पशूनां मन्युरसि तवेव मे मन्युर्भूयान्नमो
मात्रे पृथिव्यै माऽहं मातरं पृथिवीꣳ हिꣳसिषं मा
३० मां माता पृथिवी हिꣳसीदियदस्यायुरस्यायुर्मे धेह्यूर्गस्यूर्जं मे धेहि युङ्ङसि
वर्चोऽसि वर्चो मयि धेह्यग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहेन्द्रस्य बलाय
स्वाहा मरुतामोजसे स्वाहा हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ हिꣳसिषं मर्तजास्त्रीणि
च ॥ १। ८। १५॥
३१ मित्रोऽसि वरुणोऽसि समहं विश्वैर्देवैः, क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि स्योनामा

सीद सुषदामा सीद मा त्वा हिꣳसीन्मा मा हिꣳसीन्निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुर्ब्रह्मा ३ न् त्वꣳ राजन् ब्रह्माऽसि सविताऽसि सत्यसवो ब्रह्मा ३ न् त्वꣳ राजन् ब्रह्माऽसीन्द्रोऽसि सत्यौजा

३२ ब्रह्मा ३ न् त्वꣳ राजन् ब्रह्माऽसि मित्रोऽसि सुशेवो ब्रह्मा ३ न् त्वꣳ राजन् ब्रह्माऽसि वरुणोऽसि सत्यधर्मेन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तेन मे रध्य दिशोऽभ्ययꣳ राजाऽभूत् सुश्लोका ४ सुमङ्गला ४ सत्यराजा ३ न् । अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाऽग्नये गृहपतये स्वाहा ॥

सत्यौजाश्चत्वारिꣳशच्च ॥ १। ८। १६॥

३३ आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा सारस्वतं चरुं वथ्सतरी दक्षिणा सावित्रं द्वादशकपालमुपध्वस्तो दक्षिणा पौष्णं चरुग्ग् श्यामो दक्षिणा बार्हस्पत्यं चरुꣳ शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वारुणं दशकपालं महानिरष्टो दक्षिणा सौम्यं चरुं बभ्रुर्दक्षिणा त्वाष्ट्रमष्टाकपालꣳ शुण्ठो दक्षिणा वैष्णवं त्रिकपालं वामनो दक्षिणा ॥ आग्नेयꣳ हिरण्यꣳ सारस्वतं द्विचत्वारिꣳशत् ॥ १। ८। १७॥

३४ सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति पुण्डरिस्रजां प्र यच्छति दशभिर्वथ्सतरैः सोमं क्रीणाति दशपेयो भवति शतं ब्राह्मणाः पिबन्ति सप्तदशग्ग् स्तोत्रं भवति प्राकाशावध्वर्यवे ददाति स्रजमुद्गात्रे रुक्मꣳ होत्रेऽश्वं प्रस्तोतृप्रतिहर्तृभ्यां द्वादश पष्ठौहीर्ब्रह्मणे वशां मैत्रावरुणायर्षभं ब्राह्मणाच्छꣳसिने वाससी नेष्टापोतृभ्याग् स्थूरि यवाचितमच्छावाकायानड्वाहमग्नीधे भार्गवो होता भवति श्रायन्तीयं ब्रह्मसामं भवति वारवन्तीय मग्निष्टोमसामꣳ सारस्वतीरपो गृह्णाति ॥ वारवन्तीयं चत्वारि च ॥ १। ८। १८॥

३५ आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा मैत्रावरुणीमामिक्षां वशा दक्षिणा बार्हस्पत्यं चरुꣳ शितिपृष्ठो दक्षिणा ऽऽदित्यां मल्हां गर्भिणीमा लभते मारुतीं पृश्निं पष्ठौहीमश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति सरस्वते सत्यवाचे चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालं तिसृधन्वꣳ शुष्कदृतिर्दक्षिणा ॥ आग्नेयं बार्हस्पत्यꣳ सप्तचत्वारिꣳशत् ॥ १। ८। १९॥

३६ आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालं बार्हस्पत्यं चरुं त्वाष्ट्रमष्टाकपालं वैश्वानरं द्वादशकपालं दक्षिणो रथवाहनवाहो दक्षिणा सारस्वतं चरुं

निर्वपति पौष्णं चरुं मैत्रं चरुं वारुणं चरुं क्षैत्रपत्यं चरुमादित्यं चरुमुत्तरो रथवाहनवाहो दक्षिणा ॥ आग्नेयꣳ सौम्यं बार्हस्पत्यं चतुस्त्रिꣳशत् ॥ १। ८। २०॥
३७ स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेणामृताममृतेन सृजामि सꣳसोमेन सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व पुनातु ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता । वारेण शश्वता तना ॥ वायुः पूतः पवित्रेण प्रत्यङ्क्सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा ॥ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥ आश्विनं धूम्रमा लभते सारस्वतं मेषमैन्द्रमृषभ मैन्द्रमेकादशकपालं निर्वपति सावित्रं द्वादशकपालं वारुणं दशकपालꣳ सोमप्रतीकाः पितरस्तृप्णुत वडबा दक्षिणा ॥ भोजनानि षड्विꣳशतिश्च ॥ १। ८। २१॥
३८ अग्नाविष्णू महि तद्वां महित्वं वीतं घृतस्य गुह्यानि नाम । दमेदमे सप्त रत्ना दधाना प्रति वां जिह्वा घृतमा चरण्येत् ॥ अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा । दमेदमे सुष्टुतीर्वावृधाना प्रति वां जिह्वा घृतमुच्चरण्येत् ॥ प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु । आ नो दिवो बृहतः
३९ पर्वतादा सरस्वती यजता गन्तु यज्ञम् । हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ॥ बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य । रास्व रत्नानि दाशुषे ॥ एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः । बृहस्पते सुप्रजा वीरवन्तो वयग्ग् स्याम पतयो रयीणाम् ॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस
४० र्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजाꣳसि सुक्रतू ॥ प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन । आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥ अग्निं वः पूर्व्यं गिरा देवमीडे वसूनाम् । सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥ मक्षू देववतो रथः
४१ शूरो वा पृत्सु कासु चित् । देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ न यजमान रिष्यसि न सुन्वान न देवयो ॥ असदत्र सुवीर्यमुत त्यदाश्वश्वियम् ॥ नकिष्टं कर्मणा नशन्न प्र योषन्न योषति ॥ उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः । पृणन्तं च पपुरिं च
४२ श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः ॥ सोमारुद्रा वि वृहतं विषूचीममीवा या

नो गयमाविवेश । आरे बाधेथां निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुक्तमस्मत् ॥ सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् । अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥ सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः । जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥ इमौ देवौ जायमानौ जुषन्तेमौ तमाꣳसि गूहतामजुष्टा । आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु ॥ बृहतः शवसा रथः पपुरिं च दिवो जनना पञ्चविꣳशतिश्च ॥ १। ८। २२॥

अनुमत्या आग्नेयमैंद्राग्नमग्नये सोमाय प्रति पूरुषमैंद्राग्नं धात्रे बार्हस्पत्यमग्नये गृहपतयेऽर्थेतो देवीः समिधꣳ सोमस्येंद्रस्य मित्र आग्नेयꣳ सद्य आग्नेयꣳ हिरण्यमाग्नेय२ꣳ स्वाद्वीं त्वाग्नाविष्णू द्वाविꣳशतिः ॥

अनुमत्यै यथासति देवीरापो मित्रोसि शूरो वा द्विचत्वारिꣳशत् ॥

अनुमत्या उस्रियासु ॥

इति प्रथमं काण्डं संपूर्णम् ॥

॥ तैत्तिरीय-संहिता ॥

# तैत्तिरीय-संहिता

## ॥ द्वितीयं काण्डम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### द्वितीयकाण्डे प्रथमः प्रश्नः १

१ वायव्यग्ग् श्वेतमा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोप
धावति स एवैनं भूतिं गमयति भवत्येवातिक्षिप्रा देवतेत्याहुः सैनमीश्वरा प्रदह इत्येतमेव
सन्तं वायवे नियुत्वत आ लभेत नियुद्वा अस्य धृतिर्धृत एव भूतिमुपैत्यप्रदाहाय भवत्येव
२ वायवे नियुत्वत आ लभेत ग्रामकामो वायुर्वा इमाः प्रजा नस्योता नेनीय ते वायुमेव
नियुत्वन्तग्ग् स्वेन भागधेयेनोपधावति स एवास्मै प्रजा नस्योता नियच्छति ग्राम्येव
भवति नियुत्वं ते भवति ध्रुवा एवास्मा अनपगाः करोति वायवे नियुत्वत आ लभेत
प्रजाकामः प्राणो वै वायुरपानो नियुत्प्राणापानौ खलु वा एतस्य प्रजाया
३ अप क्रामतो योऽलं प्रजायै सन्प्रजां न विंदते वायुमेव नियुत्वन्तग्ग् स्वेन भागधेयेनोप
धावति स एवास्मै प्राणापानाभ्यां प्रजां प्र जनयति विन्दते प्रजां वायवे नियुत्वत
आलभेत ज्योगामयावी प्राणो वै वायुरपानो नियुत्प्राणापानौ खलु वा एतस्मादपक्रामतो
यस्य ज्योगामयति वायुमेव नियुत्वन्तग्ग् स्वेन भागधेयेनोप
४ धावति स एवास्मिन् प्राणापानौ दधात्युत यदीतासुर्भवति जीवत्येव प्रजापतिर्वा
इदमेक आसीथ्सोऽकामयत प्रजाः पशून्थ्सृजेयेति स आत्मनो वपामुदक्खिदत् तामग्नौ
प्रागृह्णात् ततोऽजस्तूपरः समभवत्त२ꣳ स्वायै देवताया आलभत ततो वै स प्रजाः
पशूनसृजत यः प्रजाकामः
५ पशुकामः स्यात् स एतं प्राजापत्यमजं तूपरमा लभेत प्रजापतिमेव स्वेन भागधेयेनोप
धावति स एवास्मै प्रजां पशून् प्र जनयति यच्छ्मश्रुणस्तत्पुरुषाणाꣳ रूपं यत्तूपरस्तदश्वानां
यदन्यतोदन्तद्गवां यदव्या इव शफास्तदवीनां यदजस्तदजानामेतावन्तो वै ग्राम्याः
पशवस्तान्

६ रूपेणैवावरुन्धे सोमापौष्णं त्रैतमा लभेत पशुकामो द्वौ वा अजायै स्तनौ नानैव
द्वावभि जायेते ऊर्जं पुष्टिं तृतीयः सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै
पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति
पूषा पशून् प्रजनयत्यौदुंबरो यूपो भवत्यूर्ग्वा उदुंबर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनव
रुन्धे ॥ २। १। १॥ अप्रदाहाय भवत्येव प्रजाया आमयति वायुमेव नियुत्त्वंतग्ग् स्वेन
भागधेयेनोप प्रजाकामस्तान्, यूपस्त्रयोदश च ॥ २। १। १॥
७ प्रजापतिः प्रजा असृजत ता अस्माथ्सृष्टाः पराचीरायन्ता वरुणमगच्छन्ता अन्वैत्ताः
पुनरयाचत ता अस्मै न पुनरददाथ्सोऽब्रवीद्वरं वृणीष्वाथ मे पुनर्देहीति तासां वरमालभत
स कृष्ण एकशितिपादभवद्यो वरुणगृहीतः स्याथ्स एतं वारुणं कृष्णमेकशितिपादमा लभेत
वरुण
८ मेव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुञ्चति कृष्ण एकशितिपाद्भवति
वारुणो ह्येष देवतया समृद्ध्यै सुवर्भानुरासुरः सूर्यं तमसाविध्यत् तस्मै देवाः
प्रायश्चित्तिमैच्छन्तस्य यत्प्रथमं तमोऽपाघ्नन्थ्सा कृष्णाविरभवद्यद्द्वितीयँ सा फल्गुनी
यत्तृतीयँ सा बलक्षी यदध्यस्थादपाकृन्तन् थ्साविर्वशा
९ समभवत्ते देवा अब्रुवन् देवपशुर्वा अयँ समभूत्कस्मा इममा लप्स्यामह इत्यथ
वैतर्ह्यल्पा पृथिव्यासीदजाता ओषधयस्तामविं वशामादित्येभ्यः कामायालभन्त ततो वा
अप्रथत पृथिव्यजायन्तौषधयो यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेयेति स
एतामविं वशामादित्येभ्यः कामाया
१० ऽलभेतादित्यानेव कामग्ग् स्वेन भागधेयेनोप धावति त एवैनं प्रथयन्ति पशुभिः प्र
प्रजया जनयन्त्यसावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एता मल्हा
आलभन्ताग्नेयीं कृष्णग्रीवीँ सँहितामैंद्रीग् श्वेतां बार्हस्पत्यां ताभिरेवास्मिन्रुचमदधुर्यो
ब्रह्मवर्चसकामः स्यात्तस्मा एता मल्हा आलभेता
११ ऽग्नेयीं कृष्णग्रीवीँ सँहितामैंद्रीग् श्वेतां बार्हस्पत्यामेता एव देवताः स्वेन
भागधेयेनोप धावति ता एवास्मिन् ब्रह्मवर्चसं दधति ब्रह्मवर्चस्येव भवति वसन्ता
प्रातराग्नेयीं कृष्णग्रीवीमा लभेत ग्रीष्मे मध्यन्दिने सँहितामैंद्रीँ शरद्यपराह्णे श्वेतां
बार्हस्पत्यां त्रीणि वा आदित्यस्य तेजाँसि वसन्ता प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णे
यावन्त्येव तेजाँसि तान्येवा

१२ ऽव रुन्धे संवथ्सरं पर्यालभ्यन्ते संवथ्सरो वै ब्रह्मवर्चसस्य प्रदाता संवथ्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति गर्भिणयो भवन्तींद्रियं वै गर्भ इंद्रियमेवास्मिन्दधति सारस्वतीं मेषीमा लभेत य ईश्वरो वाचो वदितोः सन्वाचं न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन्
१३ वाचं दधाति प्रवदिता वाचो भवत्यपन्नदती भवति तस्मान्मनुष्याः सर्वां वाचं वदन्त्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं ज्योगामयाव्यग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो यस्य ज्योगामयत्यग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्रसमुत यदीतासुर्भवति जीवत्येव सौम्यं बभ्रुमा लभेताग्नेयं कृष्णग्रीवं प्रजाकामः सोमो
१४ वै रेतोधा अग्निः प्रजानां प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजां प्र जनयति विन्दते प्रजामाग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं यो ब्राह्मणो विद्यामनूच्य न विरोचेत यदाग्नेयो भवति तेज एवास्मिन्तेन दधाति यथ्सौम्यो ब्रह्मवर्चसं तेन कृष्णग्रीव आग्नेयो भवति तम एवास्मादप हन्ति श्वेतो भवति
१५ रुचमेवास्मिन्दधाति बभ्रुः सौम्यो भवति ब्रह्मवर्चसमेवास्मिन् त्विषिं दधात्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं पुरोधायाग् स्पर्धमान आग्नेयो वै ब्राह्मणः सौम्यो राजन्योऽभितः सौम्यमाग्नेयौ भवतस्तेजसैव ब्रह्मणोभयतो राष्ट्रं परि गृह्णात्येकधा समावृङ्क्ते पुर एनं दधते ॥ २। १। २॥
लभेत वरुणं वशैतामविं वशामादित्येभ्यः कामाय मलुहा आ लभेत तान्येव सैवास्मिन्थ्सोमः श्वेतोभवति त्रिचत्वारिꣳ शच्च ॥
२। १। २॥
१६ देवासुरा एषु लोकेष्वस्पर्धन्त स एतं विष्णुर्वामनमपश्यत्तꣳ स्वायै देवताया आलभत ततो वै स इमान् लोकानभ्यजयद्वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमाꣳल्लोकानभि जयति विषम आ लभेत विषमा इव हीमे लोकाः समृद्ध्या इंद्राय मन्युमते मनस्वते ललामं प्राशृङ्गमा लभेत संग्रामे
१७ संयत्त इंद्रियेण वै मन्युना मनसा संग्रामं जयतींद्रमेव मन्युमन्तं मनस्वन्तग्ग् स्वेन भागधेयेनोप धावति स एवास्मिन्निंद्रियं मन्युं मनो दधाति जयति तꣳ संग्राममिंद्राय मरुत्वते पृश्निसक्थमा लभेत ग्रामकाम इंद्रमेव मरुत्वन्तग्ग् स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव भवति यदृषभस्तेनैं
१८ द्रो यत्पृश्निस्तेन मारुतः समृद्ध्यै पश्चात्पृश्निसक्थो भवति पश्चादन्ववसायिनीमेवास्मै

विशं करोति सौम्यं बभ्रुमा लभेतान्नकामः सौम्यं वा अन्नꣳ सोममेव स्वेन भागधेयेनोप
धावति स एवास्मा अन्नं प्रयच्छत्यन्नाद एव भवति बभ्रुर्भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै
सौम्यं बभ्रुमा लभेत यमलꣳ
१९ राज्याय सन्तꣳराज्यं नोपनमेथ्सौम्यं वै राज्यꣳ सोममेव स्वेन भागधेयेनोप धावति
स एवास्मै राज्यं प्रयच्छत्युपैनꣳ राज्यं नमति बभ्रुर्भवत्येतद्वै सोमस्य रूपꣳ समृद्ध्या
इंद्राय वृत्रतुरे ललामं प्राशृङ्गमा लभेत गतश्रीः प्रतिष्ठाकामः पाप्मानमेव वृत्रं तीर्त्वा
प्रतिष्ठां गच्छतींद्रायाभिमातिघ्ने ललामं प्राशृङ्गमा
२० लभेत यः पाप्मना गृहीतः स्यात्पाप्मा वा अभिमातिरिंद्रमेवाभिमातिहनग्ग् स्वेन
भागधेयेनोप धावति स एवास्मात् पाप्मानमभिमातिं प्र णुदत इंद्राय वज्रिणे ललामं
प्राशृङ्गमा लभेत यमलꣳ राज्याय सन्तꣳ राज्यं नोपनमेदिंद्रमेव वज्रिणग्ग् स्वेन
भागधेयेनोप धावति स एवास्मै वज्रं प्रयच्छति स एनं वज्रो भूत्वा इन्ध उपैनꣳ
राज्यं नमति ललामः प्राशृङ्गो भवत्येतद्वै वज्रस्य रूपꣳ समृद्ध्यै ॥ २। १। ३॥
संग्रामे तेनालमभिमातिघ्ने ललामं प्राशृङ्गमैनं पञ्चदश च ॥
२। १। ३॥
२१ असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एतां दशर्षभामालभन्त
तयैवास्मिन्रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एतां दशर्षभामा लभेतामुमेवादित्य२ꣳ
स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति वसन्ता
प्रातस्त्री३ꣳल्ललामाना लभेत ग्रीष्मे मध्यन्दिने
२२ त्रीञ्छितिपृष्ठां छरद्यपराह्णे त्रीञ्छितिवारान् त्रीणि वा आदित्यस्य तेजाꣳसि वसन्ता
प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णे यावन्त्येव तेजाꣳसि तान्येवाव रुन्धे त्रयस्त्रय आ
लभ्यन्तेऽभिपूर्वमेवास्मिन्तेजो दधाति संवथ्सरं पर्यालभ्यन्ते संवथ्सरो वै ब्रह्मवर्चसस्य
प्रदाता संवथ्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति संवथ्सरस्य
परस्तात्प्राजापत्यं कद्रु
२३ मा लभेत प्रजापतिः सर्वा देवता देवतास्वेव प्रतितिष्ठति यदि बिभीयाद्दुश्चर्मा
भविष्यामीति सोमापौष्ण२ꣳ श्याममा लभेत सौम्यो वै देवतया पुरुषः पौष्णाः पशवः
स्वयैवास्मै देवतया पशुभिस्त्वचं करोति न दुश्चर्मा भवति देवाश्च वै यमश्चास्मिन्
लोकेऽस्पर्धन्त स यमो देवानामिंद्रि यं वीर्यमयुवत तद्यमस्य
२४ यमत्वं ते देवा अमन्यन्त यमो वा इदमभूद्यद्वय२ꣳ स्म इति ते प्रजापतिमुपाधावन्थ्स

एतौ प्रजापतिरात्मन उक्षवशौ निरमिमीत ते देवा वैष्णावरुणीं वशामालभन्तैंद्रमुक्षाणं तं वरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राणुदन्तैंद्रेणैवास्यैंद्रियमवृञ्जत यो भ्रातृव्यवान्थ्स्याथ्स स्पर्धमानो वैष्णावरुणीं

२५ वशामा लभेतैंद्रमुक्षाणं वरुणेनैव भ्रातृव्यं ग्राहयित्वा विष्णुना यज्ञेन प्र णुदत ऐंद्रेणैवास्यैंद्रियं वृङ्क्ते भवत्यात्मना परास्य भ्रातृव्यो भवतींद्रो वृत्रमहन्तं वृत्रो हतः षोडशभिर्भोगैरसिनात्तस्य वृत्रस्य शीर्षतो गाव उदायन्ता वैदेह्योऽभवन्तासामृषभो जघनेऽनूदैत्तमिंद्रो

२६ ऽचायथ्सोऽमन्यत यो वा इममालभेत मुच्येतास्मात् पाप्मन इति स आग्नेयं कृष्णग्रीवमा लभतैंद्रमृषभं तस्याग्निरेव स्वेन भागधेयेनोपसृतः षोडशधा वृत्रस्य भोगानप्यदहदैंद्रेणैंद्रियमात्मन्नधत्त यः पाप्मना गृहीतः स्याथ्स आग्नेयं कृष्णग्रीवमा लभेतैंद्रमृषभमग्निरेवास्य स्वेन भागधेयेनोपसृतः

२७ पाप्मानमपि दहत्यैंद्रेणैंद्रियमात्मन्धत्ते मुच्यते पाप्मनो भवत्येव द्यावापृथिव्यां धेनुमा लभेत ज्योगपरुद्धोऽनयोर्हि वा एषोऽप्रतिष्ठितोऽथैष ज्योगपरुद्धो द्यावापृथिवी एव स्वेन भागधेयेनोप धावति ते एवैनं प्रतिष्ठां गमयतः प्रत्येवतिष्ठति पर्यारिणी भवति पर्यारीव ह्येतस्य राष्ट्रं यो ज्योगपरुद्धः समृद्ध्यै वायव्यं

२८ वथ्समा लभेत वायुर्वा अनयोर्वथ्स इमे वा एतस्मै लोका अपशुष्का विडपशुष्काथैष ज्योगपरुद्धो वायुमेव स्वेन भागधेयेनोप धावति स एवास्मा इमा३ँ ल्लोकान्, विशं प्र दापयति प्रास्मा इमे लोकाः स्नुवन्ति भुञ्जत्येनं विडुपतिष्ठ ते ॥ २। १। ४॥ मध्यंदिने कद्रुं यमस्य स्पर्धमानो वैष्णावरुणीं तमिंद्रोस्य स्वेन भागधेयेनोपसृतो वायव्यं द्विचत्वारिग्ंशच्च ॥ २। १। ४॥

२९ इंद्रो वलस्य बिलमपौर्णोथ्स य उत्तमः पशुरासीत्तं पृष्ठं प्रति संगृह्योदक्खिदत्तँ सहस्रं पशवोऽनूदायन्थ्स उन्नतोऽभवद्यः पशुकामः स्याथ्स एतमैंद्रमुन्नतमा लभेतेंद्रमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भवत्युन्नतो

३० भवति साहस्री वा एषा लक्ष्मी यदुन्नतो लक्ष्मियैव पशूनव रुन्धे यदा सहस्रं पशून् प्राप्नुयादथ वैष्णवं वामनमा लभेतैतस्मिन्वै तथ्सहस्रमध्यतिष्ठत्तस्मादेष वामनः समीषितः पशुभ्य एव प्रजातेभ्यः प्रतिष्ठां दधाति कोऽर्हति सहस्रं पशून् प्राप्तुमित्याहुरहोरात्राण्येव सहस्रँ संपाद्या लभेत पशवो वा

३१ अहोरात्राणि पशूनेव प्रजातान् प्रतिष्ठां गमयत्योषधीभ्यो वेहतमा लभेत प्रजाकाम

ओषधयो वा एतं प्रजायै परि बाधन्ते योऽलं प्रजायै सन्प्रजां न विन्दत ओषधयः खलु वा एतस्यै सूतुमपि घ्नन्ति या वेहद्भवत्योषधीरेव स्वेन भागधेयेनोप धावति ता एवास्मै स्वाद्योनेः प्रजां प्र जनयन्ति विन्दते
३२ प्रजामापो वा ओषधयोऽसत्पुरुष आप एवास्मा असतः सद्ददति तस्मादाहुर्यश्चैवं वेद यश्च नापस्त्वावासतः सद्ददतीत्यैंद्रीꣳ सूतवशामा लभेत भूतिकामोऽजातो वा एष योऽलंभूत्यै सन्भूतिं न प्राप्नोतींद्रं खलु वा एषा सूत्वा वशाभव
३३ दिंद्रमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येव यꣳ सूत्वा वशा स्यात्तमैंद्रमेवा लभेतैतद्वाव तदिंद्रियꣳ साक्षादेवेंद्रियमव रुन्ध ऐंद्राग्नं पुनरुथ्सृष्टमा लभेत य आतृतीयात्पुरुषाथ्सोमं न पिबेद्विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्ना
३४ तृतीयात् पुरुषात् सोमं न पिबतींद्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मै सोमपीथं प्र यच्छत उपैनꣳ सोमपीथो नमति यदैंद्रो भवतींद्रियं वै सोमपीथ इंद्रियमेव सोमपीथमव रुन्धे यदाग्नेयो भवत्याग्नेयो वै ब्राह्मणः स्वामेव देवतामनु संतनोति पुनरुथ्सृष्टो भवति पुनरुथ्सृष्ट इव ह्येतस्य
३५ सोमपीथः समृद्ध्यै ब्राह्मणस्पत्यं तूपरमा लभेताभिचरन्ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छति तूपरो भवति क्षुरपविर्वा एषा लक्ष्मी यत्तूपरः समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणात्येवैनं वैभीदक इध्मो भिनत्त्येवैनम् ॥ २। १। ५॥ भवत्युन्नतः पशवो जनयंति विंदतेभवथ्सन्नैतस्येध्मस्त्रीणि च ॥ २। १। ५॥
३६ बार्हस्पत्यꣳ शितिपृष्ठमा लभेत ग्रामकामो यः कामयेत पृष्ठꣳ समानानाग् स्यामिति बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनं पृष्ठꣳ समानानां करोति ग्राम्येव भवति शितिपृष्ठो भवति बार्हस्पत्यो ह्येष देवतया समृद्ध्यै पौष्ण२ꣳ श्याममा लभेतान्नकामोऽन्नं वै पूषा पूषणमेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नं
३७ प्र यच्छत्यन्नाद एव भवति श्यामो भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै मारुतं पृश्निमा लभेतान्नकामोऽन्नं वै मरुतो मरुत एव स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति पृश्निर्भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्या ऐंद्रमरुणमा लभेतेंद्रियकाम इंद्रमेव
३८ स्वेन भागधेयेनोप धावति स एवास्मिन्निंद्रियं दधातींद्रियाव्येव भवत्यरुणो

भ्रूमान्भवत्येतद्वा इंद्रस्य रूपꣳ समृद्ध्यै सावित्रमुपध्वस्तमा लभेत सनिकामः सविता
वै प्रसवानामीशे सवितारमेव स्वेन भागधेयेनोप धावति स एवास्मै सनिं प्रसुवति
दानकामा अस्मै प्रजा भवन्त्युपध्वस्तो भवति सावित्रो ह्येष
३९ देवतया समृद्ध्यै वैश्वदेवं बहुरूपमा लभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव
देवान्थ्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्रयच्छन्त्यन्नाद एव भवति बहुरूपो
भवति बहुरूप२ꣳ ह्यन्नꣳ समृद्ध्यै वैश्वदेवं बहुरूपमा लभेत ग्रामकामो वैश्वदेवा वै
सजाता विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त एवास्मै
४० सजातान् प्र यच्छन्ति ग्राम्येव भवति बहुरूपो भवति बहुदेवत्यो १ ह्येष समृद्ध्यै
प्राजापत्यं तूपरमा लभेत यस्यानाज्ञातमिव ज्योगामयेत्प्राजापत्यो वै पुरुषः प्रजापतिः
खलु वै तस्य वेद यस्यानाज्ञातमिव ज्योगामयति प्रजापतिमेव स्वेन भागधेयेनोप
धावति स एवैनं तस्माथ्स्रामान्मुञ्चति तूपरो भवति प्राजापत्यो ह्येष देवतया समृद्ध्यै
॥ २। १। ६॥ अस्मा इंद्रमेवैष सजाता विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त
एवास्मै प्राजापत्यो हि त्रीणि च ॥ २। १। ६॥
४१ वषट्कारो वै गायत्रियै शिरोऽच्छिनत्तस्यै रसः परापतत्तं बृहस्पतिरुपागृह्णाथ्सा
शितिपृष्ठा वशाभवद्यो द्वितीयः परापतत्तं मित्रावरुणावुपागृह्णीताꣳ सा द्विरूपा
वशाभवद्यस्तृतीयः परापतत्तं विश्वेदेवा उपागृह्णन्थ्सा बहुरूपा वशा भवद्यश्चतुर्थः परापतथ्स
पृथिवीं प्राविशत्तं बृहस्पतिरभ्य
४२ गृह्णादस्त्वेवायं भोगायेति स उक्षवशः समभवद्यल्लोहितं परापतत्तद्रुद्र उपागृह्णाथ्सा
रौद्री रोहिणी वशाभवद्बार्हस्पत्याꣳ शितिपृष्ठामा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव
स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति छन्दसां
वा एष रसो यद्वशा रस इव खलु
४३ वै ब्रह्मवर्चसं छन्दसामेव रसेन रसं ब्रह्मवर्चसमव रुन्धे मैत्रावरुणीं द्विरूपामा लभेत
वृष्टिकामो मैत्रं वा अहर्वारुणी रात्रिरहोरात्राभ्यां खलु वै पर्जन्यो वर्षति मित्रावरुणावेव
स्वेन भागधेयेनोप धावति तावेवास्मा अहोरात्राभ्यां पर्जन्यं वर्षयतश्छन्दसां वा एष
रसो यद्वशा रस इव खलु वै वृष्टिश्छन्दसामेव रसेन
४४ रसं वृष्टिमव रुन्धे मैत्रावरुणीं द्विरूपामा लभेत प्रजाकामो मैत्रं वा अहर्वारुणी
रात्रिरहोरात्राभ्यां खलु वै प्रजाः प्रजायन्ते मित्रावरुणावेव स्वेन भागधेयेनोप धावति

तावेवास्मा अहोरात्राभ्यां प्रजां प्रजनयतश्छन्दसां वा एष रसो यद्वशा रस इव खलु
वै प्रजा छन्दसामेव रसेन रसं प्रजामव
४५ रुन्धे वैश्वदेवीं बहुरूपामा लभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्थ्स्वेन
भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति छन्दसां वा एष रसो
यद्वशा रस इव खलु वा अन्नं छन्दसामेव रसेन रसमन्नमव रुन्धे वैश्वदेवीं बहुरूपामा
लभेत ग्रामकामो वैश्वदेवा वै
४६ सजाता विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति
ग्राम्येव भवति छन्दसां वा एष रसो यद्वशा रस इव खलु वै सजाताश्छन्दसामेव
रसेन रसꣳ सजातानव रुन्धे बार्हस्पत्यमुक्षवशमा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव
स्वेन भागधेयेनोप धावति स एवास्मिन्ब्रह्मवर्चसं
४७ दधाति ब्रह्मवर्चस्येव भवति वशं वा एष चरति यदुक्षा वश इव खलु वै
ब्रह्मवर्चसं वशेनैव वशं ब्रह्मवर्चसमव रुन्धे रौद्रीꣳ रोहिणीमा लभेताभिचरन् रुद्रमेव
स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छति रोहिणी भवति
रौद्री ह्येषा देवतया समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति
शरमयं बर्हिः शृणात्येवैनं वैभीदक इध्मो भिनत्त्येवैनम् ॥ २। १। ७॥ अभि खलु
वृष्टिश्छंदसामेव रसेन रसं प्रजामव वैश्वदेवा वै ब्रह्मवर्चसं यूप एकान्न विꣳशतिश्च २।
१। ७॥
४८ असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एताꣳ सौरीग् श्वेतां
वशामालभन्त तयैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एताꣳ सौरीग् श्वेतां
वशामा लभेतामुमेवादित्य२ꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्ब्रह्मवर्चसं दधाति
ब्रह्मवर्चस्येव भवति बैल्वो यूपो भवत्यसौ
४९ वा आदित्यो यतोऽजायत ततो बिल्व उदतिष्ठथ्सयोन्येव ब्रह्मवर्चसमव रुन्धे
ब्राह्मणस्पत्यां बभ्रुकर्णीमा लभेताभि चरन्वारुणं दशकपालं पुरस्तान्निर्वपेद्वरुणेनैव भ्रातृव्यं
ग्राहयित्वा ब्रह्मणा स्तृणुते बभ्रुकर्णी भवत्येतद्वै ब्रह्मणो रूपꣳ समृद्ध्यै स्फ्यो यूपो भवति
वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणा
५० त्येवैनं वैभीदक इध्मो भिनत्त्येवैनं वैष्णवं वामनमा लभेत यं यज्ञो नोपनमेद्विष्णुर्वै
यज्ञो विष्णुमेव स्वेन भागधेयेनोप धावति स एवास्मै यज्ञं प्र यच्छत्युपैनं यज्ञो नमति
वामनो भवति वैष्णवो ह्येष देवतया समृद्ध्यै त्वाष्ट्रं वडबमा लभेत पशुकामस्त्वष्टा वै

पशूनां मिथुनानां
५१ प्रजनयिता त्वष्टारमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून्मिथुनान् प्र जनयति प्रजा हि वा एतस्मिन्पशवः प्रविष्टा अथैष पुमान्थ्सन्वडबः साक्षादेव प्रजां पशूनव रुन्धे मैत्र२ँ श्वेतमा लभेत संग्रामे संयत्ते समयकामो मित्रमेव स्वेन भागधेयेनोप धावति स एवैनं मित्रेण सं नयति
५२ विशालो भवति व्यवसाययत्येवैनं प्राजापत्यं कृष्णमा लभेत वृष्टिकामः प्रजापतिर्वै वृष्ट्या ईशे प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यं वर्षयति कृष्णो भवत्येतद्वै वृष्ट्यै रूप२ँ रूपेणैव वृष्टिमव रुन्धे शबलो भवति विद्युतमेवास्मै जनयित्वा वर्षयत्यवाश्रृङ्गो भवति वृष्टिमेवास्मै नि यच्छति ॥ २। १। ८॥
असौ श्रृणाति मिथुनानां नयति यच्छति ॥ २। १। ८॥
५३ वरुण२ँ सुषुवाणमन्नाद्यं नोपानमथ्स एतां वारुणीं कृष्णां वशामपश्यत्ताग् स्वायै देवताया आलभत ततो वै तमन्नाद्यमुपानमद्यमलमन्नाद्याय संतमन्नाद्यं नोपनमेथ्स एतां वारुणीं कृष्णां वशामा लभेत वरुणमेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद
५४ एव भवति कृष्णा भवति वारुणी ह्येषा देवतया समृद्ध्यै मैत्र२ँ श्वेतमा लभेत वारुणं कृष्णमपां चौषधीनां च संधावन्नकामो मैत्रीर्वा ओषधयो वारुणीरापोऽपां च खलु वा ओषधीनां च रसमुप जीवामो मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अन्नं प्र यच्छतोऽन्नाद एव भव
५५ त्यपां चौषधीनां च संधावा लभत उभयस्यावरुद्ध्यै विशाखो यूपो भवति द्वे ह्येते देवते समृद्ध्यै मैत्र२ँ श्वेतमा लभेत वारुणं कृष्णं ज्योगामयावी यन्मैत्रो भवति मित्रेणैवास्मै वरुण२ँ शमयति यद्वारुणः साक्षादेवैनं वरुणपाशान्मुञ्चत्युत यदीतासुर्भवति जीवत्येव देवा वै पुष्टिं नाविन्दन्
५६ तां मिथुनेऽपश्यन् तस्यां न समराधयन् तावश्विनावब्रूतामावयोर्वा एषामैतस्यां वदध्वमिति साश्विनोरेवाभवद्यः पुष्टिकामः स्याथ्स एतामाश्विनीं यमीं वशामा लभेताश्विनावेव स्वेन भागधेयेनोप धावति तावेवास्मिन्पुष्टिं धत्तः पुष्यति प्रजया पशुभिः ॥ २। १। ९॥
अन्नादोऽन्नाद एव भवत्यविंदन् पंचचत्वारिग्ंशच्च ॥ २। १। ९॥

५७ आश्विनं धूम्रललाममा लभेत यो दुर्ब्राह्मणः सोमं पिपासेदश्विनौ वै
देवानामसोमपावास्तां तौ पश्चा सोमपीथं प्राप्नुतामश्विनावेतस्य देवता यो दुर्ब्राह्मणः
सोमं पिपासत्यश्विनावेव स्वेन भागधेयेनोप धावति तावेवास्मै सोमपीथं प्र यच्छत
उपैनꣳ सोमपीथो नमति यद्धूम्रो भवति धूम्रिमाणमेवास्मादप हन्ति ललामो
५८ भवति मुखत एवास्मिन्तेजो दधाति वायव्यं गोमृगमा लभेत यमजघ्निवाꣳ
समभिशꣳ सेयुरपूता वा एतं वागृच्छति यमजघ्निवाꣳ समभिशꣳसन्ति नैष ग्राम्यः
पशुर्नारण्यो यद्गोमृगो नेवैष ग्रामे नारण्ये यमजघ्निवाꣳसमभिशꣳसन्ति वायुर्वै देवानां
पवित्रं वायुमेव स्वेन भागधेयेनोप धावति स एवै
५९ नं पवयति पराची वा एतस्मै व्युच्छन्ती व्युच्छति तमः पाप्मानं प्र विशति
यस्याश्विने शस्यमाने सूऱ्यो नाविर्भवति सौर्यं बहुरूपमा लभेतामुमेवादित्य२ꣳ स्वेन
भागधेयेनोप धावति स एवास्मात्तमः पाप्मानमप हन्ति प्रतीच्यस्मै व्युच्छन्ती व्युच्छत्यप
तमः पाप्मानꣳहते ॥ २। १। १०॥ ललामः स एव षड्चत्वारिꣳशच्च ॥ २। १। १०॥
६० इंद्रं वो विश्वतस्परींद्रं नरो मरुतो यद्ध वो दिवो या वः शर्म ॥
भरेष्विंद्रꣳसुहवꣳहवामहेऽꣳ होमुचꣳसुकृतं दैव्यं जनम् । अग्निं मित्रं वरुणꣳ सातये
भगं द्यावापृथिवी मरुतः स्वस्तये ॥ ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां
वृषण्वान् । शिशीतमिंद्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ॥ प्रिया वो नाम
६१ हुवे तुराणाम् । आयत्तृपन्मरुतो वावशानाः ॥ श्रियसे कंभानुभिः सं मिमिक्षिरे
ते रश्मिभिस्त ऋक्वभिः सुखादयः । ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य
मारुतस्य धाम्नः ॥ अग्निः प्रथमो वसुभिर्नो अव्यात्सोमो रुद्रेभिरभि रक्षतु त्मना । इंद्रो
मरुद्भिर्ऋतुधा कृणोत्वादित्यैर्नो वरुणः सꣳ शिशातु ॥ सं नो देवो वसुभिरग्निः सꣳ
६२ सोमस्तनूभी रुद्रियाभिः । समिंद्रो मरुद्भिर्यज्ञियैः समादित्यैर्नो वरुणो अजिज्ञिपत्
॥ यथादित्या वसुभिः संबभूवुर्मरुद्भी रुद्राः समजानताभि । एवा त्रिणामन्नहृणीयमाना
विश्वे देवाः समनसो भवंतु ॥
कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने । अर्हन्तश्चिद्यमिन्धते संजनयन्ति जन्तवः ॥
सं यदिषो वनामहे सꣳ हव्या मानुषाणाम् । उत द्युम्नस्य शवस
६३ ऋतस्य रश्मिमा ददे ॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ
वोऽर्वाची सुमतिर्ववृत्याद ꣳहोश्चिद्या वरिवोवित्तरासत् ॥ शुचिरपः सूयवसा अदब्ध उप

क्षेति वृद्धवयाः सुवीरः । नकिष्टं २ घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥ धारयन्त आदित्यासो जगथ्स्था देवा विश्वस्य भुवनस्य गोपाः । दीर्घाधियो रक्षमाणा
६४ असुर्यमृतावानश्चयमाना ऋणानि ॥ तिस्रो भूमीर्धारयन्त्रीꣳ रुत द्यून्त्रीणि व्रता विदथे अन्तरेषाम् । ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ॥ त्यान्नु क्षत्रियाꣳ अव आदित्यान्, याचिषाम हे । सुमृडीकाꣳ अभिष्टये ॥ न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा । पाक्या चिद्वसवो धीर्या चिद्
६५ युष्मानीतो अभयं ज्योतिरश्याम् ॥ आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन । अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युरा च के ॥ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशꣳ स मा न आयुः प्र मोषीः ॥ २। १। ११॥ नामाऽग्निस्सꣳ शवसो रक्षमाणा धीर्या चिदेकान्न पंचाशच्च ॥ २। १। ११॥

वायव्यं प्रजापतिस्ता वरुणं देवासुरा एष्वसावादित्यो दशर्षभामिंद्रो वलस्य बार्हस्पत्यं वषट्कारोऽसौ सौरीं वरुणमाश्विनमिंद्रं वो नर एकादश ॥

वायव्यमाग्नेयीं कृष्णग्रीवीमसावादित्यो वा अहोरात्राणि वषट्कारः प्रजनयिता हुवे तुराणां पंचषष्टिः ॥

वायव्यां प्रमोषीः ॥

## द्वितीयकाण्डे द्वितीयः प्रश्नः २

१ प्रजापतिः प्रजा असृजत ताः सृष्टा इंद्राग्नी अपागूहताꣳ सोऽचायत्प्रजापतिरिंद्राग्नी वै मे प्रजा अपाघुक्षतामिति स एतमैंद्राग्नमेकादशकपालमपश्यत्तं निरवपत्तावस्मै प्रजाः प्रासाधयतामिंद्राग्नी वा एतस्य प्रजामप गूहतो योऽलं प्रजायै सन्प्रजां न विन्दत ऐंद्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इंद्राग्नी
२ एव स्वेन भागधेयेनोप धावति तावेवास्मै प्रजां प्र साधयतो विन्दते प्रजामैंद्राग्नमेकादशकपालं निर्वपेत् स्पर्धमानः, क्षेत्रे वा सजातेषु वेंद्राग्नी एव स्वेन भागधेयेनोप धावति ताभ्यामेवेंद्रियं वीर्यं भ्रातृव्यस्य वृङ्क्ते वि पाप्मना भ्रातृव्येण जयतेऽप वा एतस्मादिंद्रियं वीर्यं क्रामति यः संग्राममुपप्रयात्यैंद्राग्नमेकादशकपालं नि
३ र्वपेथ्संग्राममुपप्रयास्यन्निंद्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निंद्रियं वीर्यं धत्तः सहेंद्रियेण वीर्येणोप प्र याति जयति तꣳ संग्रामं वि वा एष इंद्रियेण वीर्येणर्ध्यते

यः संग्रामं जयत्यैंद्राग्नमेकादशकपालं निर्वपेथ्संग्रामं जित्वेंद्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निंद्रियं वीर्यं

४ धत्तो नेंद्रियेण वीर्येण व्यृध्यतेऽप वा एतस्मादिंद्रियं वीर्यं क्रामति य एति जनतामैंद्राग्नमेकादशकपालं निर्वपेज्जनतामेष्यन्निंद्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निंद्रियं वीर्यं धत्तः सहेंद्रियेण वीर्येण जनतामेति पौष्णं चरुमनु निर्वपेत्पूषा वा इंद्रियस्य वीर्यस्यानुप्रदाता पूषणमेव

५ स्वेन भागधेयेनोप धावति स एवास्मा इंद्रियं वीर्यमनु प्र यच्छति क्षैत्रपत्यं चरुं निर्वपेज्जनतामागत्येयं वै क्षेत्रस्य पतिरस्यामेव प्रति तिष्ठत्यैंद्राग्नमेकादशकपालमुपरिष्टान्निर्वपेदस्यामे प्रतिष्ठायैंद्रियं वीर्यमुपरिष्टादात्मन्धत्ते ॥ २। २। १॥

प्रजाकाम इंद्राग्नी उपप्रयात्यैंद्राग्नमेकादशकपालं निर्वीर्यं पूषणमेवैकान्नचत्वारिꣳशच्च ॥ २। २। १॥

६ अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयेत्पथो वा एषोऽध्यपथेनैति यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयत्यग्निमेव पथिकृतग्ग् स्वेन भागधेयेनोप धावति स एवैनमपथात्पन्थामपि नयत्यनड्वान्दक्षिणा वही ह्येष समृद्ध्या अग्नये व्रतपतये

७ पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदग्निमेव व्रतपतिग्ग् स्वेन भागधेयेनोप धावति स एवैनं व्रतमा लंभयति व्रत्यो भवत्यग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यꣳ रक्षाꣳसि सचेरन्नग्निमेव रक्षोहणग्ग् स्वेन भागधेयेनोप धावति स एवास्माद्रक्षाग्स्यप हन्ति निशितायां निर्वपेन्

८ निशितायाꣳ हि रक्षाꣳसि प्रेरते संप्रेर्णान्येवैनानि हन्ति परिश्रिते याजयेद्रक्षसामनन्ववचाराय रक्षोघ्नी याज्यानुवाक्ये भवतो रक्षसाग् स्तृत्या अग्नये रुद्रवते पुरोडाशमष्टाकपालं निर्वपेदभिचरन्नेषा वा अस्य घोरातनूर्यद्रुद्रस्तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छत्यग्नये सुरभिमते पुरोडाशमष्टाकपालं निर्वपेद्यस्य गावो वा पुरुषा

९ वा प्रमीयेरन् यो वा बिभीयादेषा वा अस्य भेषज्या तनूर्यथ्सुरभिमती तयैवास्मै भेषजं करोति सुरभिमते भवति पूतीगन्धस्यापहत्या अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेथ्संग्रामे संयत्ते भागधेयेनैवैनꣳ शमयित्वा परानभि निर्दिशति यमवरेषां विध्यन्ति जीवति स यं परेषां प्र स मीयते जयति तꣳ संग्राम

१० मभि वा एष एतानुच्यति येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते पुरुषाहुतिर्ह्यस्य प्रियतमाग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद्भागधेयेनैवैनꣳ शमयति नैषां पुरायुषोपरः प्र मीयतेऽभि वा एष एतस्य गृहानुच्यति यस्य गृहान्दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद्भागधेयेनैवैनꣳ शमयति नास्यापरं गृहान्दहति ॥ २। २। २॥ व्रतपतये निशितायां निर्वपेत्पुरुषाः संग्रामं न चत्वारि च ॥ २। २। २॥

११ अग्नये कामाय पुरोडाशमष्टाकपालं निर्वपेद्यं कामो नोपनमेदग्निमेव कामग्ग् स्वेन भागधेयेनोप धावति स एवैनं कामेन समर्धयत्युपैनं कामो नमत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेथ्स्पर्धमानः, क्षेत्रे वा सजातेषु वाग्निमेव यविष्ठग्ग् स्वेन भागधेयेनोप धावति तेनैवेंद्रियं वीर्यं भ्रातृव्यस्य

१२ युवते वि पाप्मना भ्रातृव्येण जयतेऽग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेदभिचर्यमाणोऽग्निमेव यविष्ठग्ग् स्वेन भागधेयेनोप धावति स एवास्माद्रक्षाꣳसि यवयति नैनमभिचरन्थ् स्तृणुतेऽग्नय आयुष्मते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत सर्वमायुरियामित्यग्निमेवायुष्मन्तग्ग् स्वेन भागधेयेनोप धावति स एवास्मि

१३ न्नायुर्दधाति सर्वमायुरेत्यग्नये जातवेदसे पुरोडाशमष्टाकपालं निर्वपेद्भूतिकामोऽग्निमेव जातवेदसग्ग् स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येवाग्नये रुक्मते पुरोडाशमष्टाकपालं निर्वपेद्रुक्कामोऽग्निमेव रुक्मन्तग्ग् स्वेन भागधेयेनोप धावति स एवास्मिन्रुचं दधाति रोचत एवाग्नये तेजस्वते पुरोडाश

१४ मष्टाकपालं निर्वपेत्तेजस्कामोऽग्निमेव तेजस्वन्तग्ग् स्वेन भागधेयेनोप धावति स एवास्मिन्तेजो दधाति तेजस्व्येव भवत्यग्नये साहन्त्याय पुरोडाशमष्टाकपालं निर्वपेथ्सीक्षमाणोऽग्निमेव साहन्त्य२ꣳ स्वेन भागधेयेनोप धावति तेनैव सहते यꣳ सीक्षते ॥ २। २। ३॥ भ्रातृव्यस्याऽस्मिन्तेजस्वते पुरोडाशमष्टात्रिꣳशच्च ॥ २। २। ३॥

१५ अग्नयेऽन्नवते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नवान्थ्स्यामित्यग्निमेवान्नवन्तग्ग् स्वेन भागधेयेनोप धावति स एवैनमन्नवन्तं करोत्यन्नवानेव भवत्यग्नयेऽन्नादाय पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नादः स्यामित्यग्निमेवान्नाद२ꣳ स्वेन भागधेयेनोप धावति स एवैनमन्नादं करोत्यन्नाद

१६ एव भवत्यग्नयेऽन्नपतये पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नपतिः स्यामित्यग्निमेवान्नपतिग्ग् स्वेन भागधेयेनोप धावति स एवैनमन्नपतिं करोत्यन्नपतिरेव

भवत्यग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये ज्योगामयावी
यदग्नये पवमानाय निर्वपति प्राणमेवास्मिन्तेन दधाति यदग्नये
१७ पावकाय वाचमेवास्मिन्तेन दधाति यदग्नये शुचय आयुरेवास्मिन्तेन दधात्युत
यदीतासुर्भवति जीवत्येवैतामेव निर्वपेच्चक्षुष्कामो यदग्नये पवमानाय निर्वपति
प्राणमेवास्मिन्तेन दधाति यदग्नये पावकाय वाचमेवास्मिन्तेन दधाति यदग्नये शुचये
चक्षुरेवास्मिन्तेन दधा
१८ त्युत यद्यन्धो भवति प्रैव पश्यत्यग्नये पुत्रवते पुरोडाशमष्टाकपालं निर्वपेदिंद्राय
पुत्रिणे पुरोडाशमेकादशकपालं प्रजाकामोऽग्निरेवास्मै प्रजां प्रजनयति वृद्धामिंद्रः प्र
यच्छत्यग्नये रसवतेऽजक्षीरे चरुं निर्वपेद्यः कामयेत रसवान्थ्स्यामित्यग्निमेव रसवन्तग्ग्
स्वेन भागधेयेनोप धावति स एवैनꣳ रसवन्तं करोति
१९ रसवानेव भवत्यजक्षीरे भवत्याग्नेयी वा एषा यदजा साक्षादेव रसमव रुन्धेऽग्नये
वसुमते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत वसुमान्थ्स्यामित्यग्निमेव वसुमन्तग्ग्
स्वेन भागधेयेनोप धावति स एवैनं वसुमन्तं करोति वसुमानेव भवत्यग्नये वाजसृते
पुरोडाशमष्टाकपालं निर्वपेथ्संग्रामे संयत्ते वाजं
२० वा एष सिसीर्षति यः संग्रामं जिगीषत्यग्निः खलु वै देवानां वाजसृदग्निमेव
वाजसृतग्ग् स्वेन भागधेयेनोप धावति धावति वाजꣳ हन्ति वृत्रं जयति
तꣳ संग्राममथो अग्निरिव न प्रतिधृषे भवत्यग्नयेऽग्निवते पुरोडाशमष्टाकपालं
निर्वपेद्यस्याग्नावग्निमभ्युद्धरेयुर्निर्दिष्टभागो वा एतयोरन्योऽनिर्दिष्टभागोऽन्यस्तौ संभवन्तौ
यजमान
२१ मभि संभवतः स ईश्वर आर्तिमार्तोर्यदग्नयेऽग्निवते निर्वपति भागधेयेनैवेनौ
शमयति नार्तिमार्च्छति यजमानोऽग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं
निर्वपेद्यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायेदपर आदीप्यानूद्धृत्य इत्याहुस्तत्तथा न
कार्यं यद्भागधेयमभि पूर्व उद्ध्रियते किमपरोऽभ्यु
२२ द्ध्रियेतेति तान्येवावक्षाणानि संनिधाय मन्थेदितः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि
जातवेदाः । स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति छन्दोभिरेवैनग्ग्
स्वाद्योनेः प्र जनयत्येष वाव सोऽग्निरित्याहुर्ज्योतिस्त्वा अस्य परापतितमिति यदग्नये
ज्योतिष्मते निर्वपति यदेवास्य ज्योतिः परापतितं तदेवाव रुन्धे ॥ २। २।

४॥ करोत्यन्नादो दधाति यदग्नये शुचये चक्षुरेवास्मिन्तेन दधाति करोति वाजं यजमानमुदेवास्य षट्च ॥ २। २। ४॥
२३ वैश्वानरं द्वादशकपालं निर्वपेद्वारुणं चरुं दधिक्राव्णे चरुमभिशस्यमानो यद्वैश्वानरो द्वादशकपालो भवति संवथ्सरो वा अग्निर्वैश्वानरः संवथ्सरेणैवैनग्ग् स्वदयत्यप पापं वर्णॅं॑हते वारुणेनैवैनं वरुणपाशान्मुञ्चति दधिक्राव्णा पुनाति हिरण्यं दक्षिणा पवित्रं वै हिरण्यं पुनात्येवैनमाद्यमस्यान्नं भवत्येतामेव निर्वपेत्प्रजाकामः संवथ्सरो
२४ वा एतस्याशान्तो योनिं प्रजायै पशूनां निर्दहति योऽलं प्रजायै सन्प्रजां न विन्दते यद्वैश्वानरो द्वादशकपालो भवति संवथ्सरो वा अग्निर्वैश्वानरः संवथ्सरमेव भागधेयेन शमयति सोऽस्मै शान्तः स्वाद्योनेः प्रजां प्र जनयति वारुणेनैवैनं वरुणपाशान्मुञ्चति दधिक्राव्णा पुनाति हिरण्यं दक्षिणा पवित्रं वै हिरण्यं पुनात्येवैनं
२५ विन्दते प्रजां वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिन्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निंद्रियं दधाति यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति यस्मिञ्जात एतामिष्टिं निर्वपति पूत
२६ एव तेजस्व्यन्नाद इंद्रियावी पशुमान्भवत्यव वा एष सुवर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वातिपादयति सुवर्गाय हि लोकाय दर्शपूर्णमासाविज्येते वैश्वानरं द्वादशकपालं निर्वपेदमावास्यां वा पौर्णमासीं वातिपाद्य संवथ्सरो वा अग्निर्वैश्वानरः संवथ्सरमेव प्रीणात्यथो संवथ्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्या
२७ अथो देवता एवान्वारभ्य सुवर्गं लोकमेति वीरहा वा एष देवानां योऽग्निमुद्वासयते न वा एतस्य ब्राह्मणा ऋतायवः पुरान्नमक्षन्नाग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन्, यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तस्मा आतिथ्यं करोत्यथो यथा जनं यतेऽवसं करोति तादृ
२८ गेव तद्द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवथ्सरः संवथ्सरः खलु वा अग्नेर्योनिः स्वामेवैनं योनिं गमयत्याद्यमस्यान्नं भवति वैश्वानरं द्वादशकपालं निर्वपेन्मारुतॅं॑ सप्तकपालं ग्रामकाम आहवनीये वैश्वानरमधि श्रयति गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवथ्सरः

संवथ्सरेणैवास्मै सजाताग्श्च्यावयति मारुतो भवति
२९ मरुतो वै देवानां विशो देवविशेनैवास्मै मनुष्यविशमव रुन्धे सप्तकपालो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्धेऽनूच्यमान आ सादयति विशमेवास्मा अनुवर्त्मानं करोति ॥ २। २। ५॥
प्रजाकामः संवथ्सरः पुनात्येवैनं पूतस्समष्ट्यै तादृङ्मारुतो भवत्येकान्न त्रिꣳशच्च ॥ २। २। ५॥
३० आदित्यं चरुं निर्वपेथ्संग्राममुपप्रयास्यन्नियं वा अदितिरस्यामेव पूर्वे प्रति तिष्ठन्ति वैश्वानरं द्वादशकपालं निर्वपेदायतनं गत्वा संवथ्सरो वा अग्निर्वैश्वानरः संवथ्सरः खलु वै देवानामायतनमेतस्माद्वा आयतनाद्देवा असुरानजयन् यद्वैश्वानरं द्वादशकपालं निर्वपति देवानामेवायतने यतते जयति तꣳ संग्राममेतस्मिन्वा एतौ मृजाते
३१ यो विद्विषाणयोरन्नमत्ति वैश्वानरं द्वादशकपालं निर्वपेद्विद्विषाणयोरन्नं जग्ध्वा संवथ्सरो वा अग्निर्वैश्वानरः संवथ्सरस्वदितमेवात्ति नास्मिन्मृजाते संवथ्सराय वा एतौ सममाते यौ सममाते तयोर्यः पूर्वोऽभि द्रुह्यति तं वरुणो गृह्णाति वैश्वानरं द्वादशकपालं निर्वपेथ्सममानयोः पूर्वोऽभिद्रुह्य संवथ्सरो वा अग्निर्वैश्वानरः संवथ्सरमेवाप्त्वा निर्वरुणं
३२ परस्तादभि द्रुह्यति नैनं वरुणो गृह्णात्याव्यं वा एष प्रति गृह्णाति योऽविं प्रतिगृह्णाति वैश्वानरं द्वादशकपालं निर्वपेदविं प्रतिगृह्य संवथ्सरो वा अग्निर्वैश्वानरः संवथ्सरस्वदितामेव प्रतिगृह्णाति नाव्यं प्रति गृह्णात्यात्मनो वा एष मात्रामाप्नोति य उभयादत्प्रतिगृह्णात्यश्वं वा पुरुषं वा वैश्वानरं द्वादशकपालं निर्वपेदुभयादत्
३३ प्रतिगृह्य संवथ्सरो वा अग्निर्वैश्वानरः संवथ्सरस्वदितमेव प्रति गृह्णाति नात्मनो मात्रामाप्नोति वैश्वानरं द्वादशकपालं निर्वपेथ्सनिमेष्यन्थ्संवथ्सरो वा अग्निर्वैश्वानरो यदा खलु वै संवथ्सरं जनतायां चरत्यथ स धनार्घो भवति यद्वैश्वानरं द्वादशकपालं निर्वपति संवथ्सरसातामेव सनिमभि प्र च्यवते दानकामा अस्मै प्रजा भवन्ति यो वै संवथ्सरं
३४ प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवत्येतमेव वैश्वानरं पुनरागत्य निर्वपेद्यमेव प्रयुङ्क्ते तं भागधेयेन वि मुञ्चति प्रतिष्ठित्यै यया रज्ज्वोत्तमां गामाजेत्तां भ्रातृव्याय प्र हिणुयान्निर्ऋतिमेवास्मै प्र हिणोति ॥ २। २। ६॥ मृजाते निर्वरुणं वपेदुभयादद्यो वै संवथ्सरगं षट्त्रिꣳशच्च ॥ २। २। ६॥
३५ ऐंद्रं चरुं निर्वपेत्पशुकाम ऐंद्रा वै पशव इंद्रमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भवति चरुर्भवति स्वादेवास्मै योनेः पशून्

प्र जनयतींद्रायेंद्रियावते पुरोडाशमेकादशकपालं निर्वपेत्पशुकाम इंद्रियं वै पशव इंद्रमेवेंद्रियावन्तग्ग् स्वेन भागधेयेनोप धावति स
३६ एवास्मा इंद्रियं पशून्प्र यच्छति पशुमानेव भवतींद्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेद्ब्रह्मवर्चसकामो ब्रह्मवर्चसं वै घर्म इंद्रमेव घर्मवन्तग्ग् स्वेन भागधेयेनोप धावति स एवास्मिन्ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवतींद्रायार्कवते पुरोडाशमेकादशकपालं निर्वपेदन्नकामोऽर्को वै देवानामन्नमिंद्रमेवार्कवन्तग्ग् स्वेन भागधेयेनो
३७ प धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद एव भवतींद्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेदिंद्रायेंद्रियावत इंद्रायार्कवते भूतिकामो यदिंद्राय घर्मवते निर्वपति शिर एवास्य तेन करोति यदिंद्रायेंद्रियावत आत्मानमेवास्य तेन करोति यदिंद्रायार्कवते भूत एवान्नाद्ये प्रति तिष्ठति भवत्येवेंद्राया
३८ ऽँ होमुचे पुरोडाशमेकादशकपालं निर्वपेद्यः पाप्मना गृहीतः स्यात्पाप्मा वा अँ ह इंद्रमेवाँ होमुचग्ग् स्वेन भागधेयेनोप धावति स एवैनं पाप्मनोऽग्ंहसो मुञ्चतींद्राय वैमृधाय पुरोडाशमेकादशकपालं निर्वपेद्यं मृधोऽभि प्रवेपेरन्राष्ट्राणि वाभि समियुरिंद्रमेव वैमृध२ँ स्वेन भागधेयेनोप धावति स एवास्मान्मृधो
३९ ऽप हन्तींद्राय त्रात्रे पुरोडाशमेकादशकपालं निर्वपेद्बद्धो वा परियत्तो वेंद्रमेव त्रातारग्ग् स्वेन भागधेयेनोप धावति स एवैनं त्रायत इंद्रायार्काश्वमेधवते पुरोडाशमेकादशकपालं निर्वपेद्यं महायज्ञो नोपनमेदेते वै महायज्ञस्यान्त्ये तनू यदर्काश्वमेधाविंद्रमेवार्काश्वमेधवन्तग्ग् स्वेन भागधेयेनोप धावति स एवास्मा अन्ततो महायज्ञं च्यावयत्युपैनं महायज्ञो नमति ॥
२। २। ७॥ इंद्रियावंतग्ग् स्वेन भागधेयेनोप धावति सोर्कवंतग्ग् स्वेन भागधेयेनैवेंद्रायास्मान्मृधोस्मै सप्त च ॥ २। २। ७॥
४० इंद्रायान्वृजवे पुरोडाशमेकादशकपालं निर्वपेद्ग्रामकाम इंद्रमेवान्वृजुग्ग् स्वेन भागधेयेनोप धावति स एवास्मै सजातानन्ुकान्करोति ग्राम्येव भवतींद्राण्यै चरुं निर्वपेद्यस्य सेनासँशितेव स्यादिंद्राणी वै सेनायै देवतेंद्राणीमेव स्वेन भागधेयेनोप धावति सैवास्य सेनाँ स२ँश्यति बल्बजानपी
४१ ध्मे सं नह्येद्गौर्यत्राधिष्कन्ना न्यमेहत्ततो बल्बजा उदतिष्ठन्गवामेवैनं न्यायमपिनीय गा वेदयतींद्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निर्वपेथ्संग्रामे संयत्त इंद्रियेण

वै मन्युना मनसा संग्रामं जयतींद्रमेव मन्युमन्तं मनस्वन्तग्ग् स्वेन भागधेयेनोप धावति स एवास्मिन्निंद्रियं मन्युं मनो दधाति जयति त॑
४२ संग्राममेतामेव निर्वपेद्यो हतमनाः स्वयं पाप इव स्यादेतानि हि वा एतस्मादपक्रान्तान्यथैष हतमनाः स्वयं पाप इंद्रमेव मन्युमन्तं मनस्वन्तग्ग् स्वेन भागधेयेनोप धावति स एवास्मिन्निंद्रियं मन्युं मनो दधाति न हतमनाः स्वयं पापो भवतींद्राय दात्रे पुरोडाशमेकादशकपालं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्यु
४३ रितींद्रमेव दातारग्ग् स्वेन भागधेयेनोप धावति स एवास्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवन्तींद्राय प्रदात्रे पुरोडाशमेकादशकपालं निर्वपेद्यस्मै प्रत्तमिव सन्न प्रदीयेतेंद्रमेव प्रदातारग्ग् स्वेन भागधेयेनोप धावति स एवास्मै प्र दापयतींद्राय सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपेदपरुद्धो वा
४४ ऽपरुध्यमानो वेंद्रमेव सुत्रामाणग्ग् स्वेन भागधेयेनोप धावति स एवैनं त्रायतेऽनपरुध्यो भवतींद्रो वै सदृङ्देवताभिरासीथ्स न व्यावृतमगच्छथ्स प्रजापतिमुपाधावत्तस्मा एतमैंद्रमेकादशकपालं निरवपत्तेनैवास्मिन्निंद्रियमदधाच्छक्करी याज्यानुवाक्ये अकरोद्वज्रो वै शक्करी स एनं वज्रो भूत्वा ऐन्ध
४५ सोऽभवथ्सोऽबिभेद्भूतः प्र मा धक्ष्यतीति स प्रजापतिं पुनरुपाधावथ्स प्रजापतिः शक्कर्या अधि रेवतीं निरमिमीत शान्त्या अप्रदाहाय योऽलग्ग् श्रियै सन्थ्सदृङ्ख्समानैः स्यात्तस्मा एतमैंद्रमेकादशकपालं निर्वपेदिंद्रमेव स्वेन भागधेयेनोप धावति स एवास्मिन्निंद्रियं दधाति रेवती पुरोऽनुवाक्या भवति शान्त्या अप्रदाहाय शक्करी याज्या वज्रो वै शक्करी स एनं वज्रो भूत्वा इन्धे भवत्येव ॥ २। २। ८॥ अपि तग्ग् स्युर्वैन्ध भवति चतुर्दश च ॥ २। २। ८॥
४६ आग्नावैष्णवमेकादशकपालं निर्वपेदभि चरन्थ्सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदाग्नावैष्णव एकादशकपालो भवत्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन चाभि चरति सरस्वत्याज्यभागा भवति वाग्वै सरस्वती वाचैवैनमभि चरति बार्हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवैनमभि चरति
४७ प्रति वै परस्तादभिचरन्तमभि चरन्ति द्वे द्वे पुरोऽनुवाक्ये कुर्यादति प्रयुक्त्या एतयैव यजेताभिचर्यमाणो देवताभिरेव देवताः प्रतिचरति यज्ञेन यज्ञं वाचा वाचं ब्रह्मणा ब्रह्म स देवताश्चैव यज्ञं च मध्यतो व्यवसर्पति तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्थ्

स्तृणुत आग्नावैष्णवमेकादशकपालं निर्वपेद्यं यज्ञो नो
४८ पनमेदग्निः सर्वा देवता विष्णुर्यज्ञोऽग्निं चैव विष्णुं च स्वेन भागधेयेनोप धावति तावेवास्मै यज्ञं प्र यच्छत उपैनं यज्ञो नमत्याग्नावैष्णवं घृते चरुं निर्वपेच्चक्षुष्कामोऽग्ने वै चक्षुषा मनुष्या वि पश्यन्ति यज्ञस्य देवा अग्निं चैव विष्णुं च स्वेन भागधेयेनोप धावति तावेवा
४९ ऽस्मिञ्चक्षुर्धत्तश्चक्षुष्मानेव भवति धेन्वै वा एतद्रेतो यदाज्यमनडुहस्तण्डुला मिथुनादेवास्मै चक्षुः प्र जनयति घृते भवति तेजो वै घृतं तेजश्चक्षुस्तेजसैवास्मै तेजश्चक्षुरव रुन्ध इंद्रियं वै वीर्यं वृङ्क्ते भ्रातृव्यो यजमानोऽयजमानस्याध्वरकल्पां प्रति निर्वपेद्भ्रातृव्ये यजमाने नास्यैंद्रियं
५० वीर्यं वृङ्क्ते पुरा वाचः प्रवदितोर्निर्वपेद्यावत्येव वाक्तामप्रोदितां भ्रातृव्यस्य वृङ्क्ते तामस्य वाचं प्रवदन्तीमन्या वाचोऽनु प्र वदन्ति ता इंद्रियं वीर्यं यजमाने दधत्याग्नावैष्णवमष्टाकपालं निर्वपेत्प्रातःसवनस्याकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रं प्रातः सवनं प्रातः सवनमेव तेनाप्नो
५१ त्याग्नावैष्णवमेकादशकपालं निर्वपेन्माध्यन्दिनस्य सवनस्याकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदेकादशकपालो भवत्येकादशाक्षरा त्रिष्टुत्रैष्टुभं माध्यन्दिनꣳ सवनं माध्यन्दिनमेव सवनं तेनाप्नोत्याग्नावैष्णवं द्वादशकपालं निर्वपेत्तृतीयसवनस्याकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यद्द्वादशकपालो भवति द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमेव तेनाप्नोति देवताभिरेव देवताः
५२ प्रतिचरति यज्ञेन यज्ञं वाचा वाचं ब्रह्मणा ब्रह्म कपालैरेव छन्दाग्ंस्याप्नोति पुरोडाशैः सवनानि मैत्रावरुणमेककपालं निर्वपेद्वशायै काले यैवासौ भ्रातृव्यस्य वशानूबन्ध्यासो एवैषैतस्यैककपालो भवति न हि कपालैः पशुमर्हत्याप्तुम् ॥ २। २। ९॥
ब्रह्मणेवैनमभि चरति यज्ञो न तावेवाऽस्यैंद्रियमाप्नोति देवताः सप्तत्रिꣳशच्च ॥ २। २। ९॥
५३ असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एतꣳ सोमारौद्रं चरुं निरवपन्तेनैवास्मिन्रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एतꣳ सोमारौद्रं चरुं निर्वपेथ्सोमं चैव रुद्रं च स्वेन भागधेयेनोप धावति तावेवास्मिन्ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव भवति तिष्यापूर्णमासे निर्वपेद्रुद्रो
५४ वै तिष्यः सोमः पूर्णमासः साक्षादेव ब्रह्मवर्चसमव रुन्धे परिश्रिते याजयति

ब्रह्मवर्चसस्य परिगृहीत्यै श्वेतायै श्वेतवथ्सायै दुग्धं मथितमाज्यं भवत्याज्यं प्रोक्षणमाज्येन मार्जयन्ते यावदेव ब्रह्मवर्चसं तथ्सर्वं करोत्यति ब्रह्मवर्चसं क्रियत इत्याहुरीश्वरो दुश्चर्मा भवितोरिति मानवी ऋचौ धाय्ये कुर्याद्यद्वै किं च मनुरवदत्तद्भेषजं
५५ भेषजमेवास्मै करोति यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णं चरुं निर्वपेथ्सौम्यो वै देवतया पुरुषः पौष्णाः पशवः स्वयैवास्मै देवतया पशुभिस्त्वचं करोति न दुश्चर्मा भवति सोमारौद्रं चरुं निर्वपेत्प्रजाकामः सोमो वै रेतोधा अग्निः प्रजानां प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजां प्र जनयति विन्दते
५६ प्रजाꣳ सोमारौद्रं चरुं निर्वपेदभिचरन्थ्सौम्यो वै देवतया पुरुष एष रुद्रो यदग्निः स्वाया एवैनं देवतायै निष्क्रीयरुद्रायापि दधाति ताजगार्तिमार्च्छति सोमारौद्रं चरुं निर्वपेज्ज्योगामयावी सोमं वा एतस्य रसो गच्छत्यग्निꣳ शरीरं यस्य ज्योगामयति सोमादेवास्य रसं निष्क्रीणात्यग्नेः शरीरमुत यदी
५७ तासुर्भवति जीवत्येव सोमारुद्रयोर्वा एतं ग्रसितꣳ होता निष्खिदति स ईश्वर आर्तिमार्तोरनड्वान्, होत्रा देयो वह्निर्वा अनड्वान्, वह्निर्होता वह्निनैव वह्निमात्मानग्ग् स्पृणोति सोमारौद्रं चरुं निर्वपेद्यः कामयेत स्वेऽस्मा आयतने भ्रातृव्यं जनयेयमिति वेदिं परिगृह्यार्धमुद्धन्यादर्धं नार्धं बर्हिषः स्तृणीयादर्धं नार्धमिध्मस्याभ्यादध्यादर्धं न स्व एवास्मा आयतने भ्रातृव्यं जनयति ॥ २। २। १०॥ रुद्रो भेषजं विंदते यदि स्तृणीयादर्धं द्वादश च ॥
२। २। १०॥
५८ ऐंद्रमेकादशकपालं निर्वपेन्मारुतꣳ सप्तकपालं ग्रामकाम इंद्रं चैव मरुतश्च स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवत्याहवनीय ऐंद्रमधि श्रयति गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै सप्तकपालो मारुतो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्धेऽनूच्यमान आ सादयति विशमेवा
५९ ऽस्मा अनुवर्त्मानं करोत्येतामेव निर्वपेद्यः कामयेत क्षत्राय च विशे च समदं दध्यामित्यैंद्रस्यावद्यन् ब्रूयादिंद्रायानु ब्रूहीत्याश्राव्य ब्रूयान्मरुतो यजेति मारुतस्यावद्यन् ब्रूयान्मरुद्भ्योऽनु ब्रूहीत्याश्राव्य ब्रूयादिंद्रं यजेति स्व एवैभ्यो भागधेये समदं दधाति वितृꣳहाणास्तिष्ठन्त्येतामेव
६० निर्वपेद्यः कामयेत कल्पेरन्निति यथादेवतमवदाय यथादेवतं यजेद्भागधेयेनैवैनान्, यथायथं कल्पयति कल्पन्त एवैंद्रमेकादशकपालं निर्वपेद्वैश्वदेवं द्वादशकपालं ग्रामकाम

इंद्रं चैव विश्वाग्ंश्च देवान्थ्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवत्यैंद्रस्यावदाय वैश्वदेवस्यावद्येदथैंद्रस्यो
६१ परिष्टादिंद्रियेणैवास्मा उभयतः सजातान्परि गृह्णात्युपाधाय्यपूर्वयं वासो दक्षिणा सजातानामुपहित्यै पृश्निये दुग्धे प्रैयङ्गवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकामः पृश्निये वै पयसो मरुतो जाताः पृश्नियै प्रियङ्गवो मारुताः खलु वै देवतया सजाता मरुत एव स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति प्रियवती याज्यानुवाक्ये
६२ भवतः प्रियमेवैनꣳ समानानां करोति द्विपदा पुरोऽनुवाक्या भवति द्विपद एवाव रुन्धे चतुष्पदा याज्या चतुष्पद एव पशूनव रुन्धे देवासुराः संयत्ता आसन् ते देवा मिथो विप्रिया आसन्तें१ऽन्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठमानाश्चतुर्धा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिंद्रो मरुद्भिर्वरुण आदित्यैः स इंद्रः प्रजापतिमुपाधावत्त
६३ मेतया संज्ञान्यायाजयदग्नये वसुमते पुरोडाशमष्टाकपालं निरवपथ्सोमाय रुद्रवते चरुमिंद्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायादित्यवते चरुं ततो वा इंद्रं देवा ज्यैष्ठ्यायाभि समजानत यः समानैर्मिथो विप्रियः स्यात्तमेतया संज्ञान्या याजयेदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेथ्सोमाय रुद्रवते चरुमिंद्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायादित्यवते चरुमिंद्रमेवैनं भूतं ज्यैष्ठ्याय समाना अभि सं जानते वसिष्ठः समानानां भवति ॥ २। २। ११॥ विशमेव तिष्ठंत्येतामेवाथैंद्रस्य याज्यानुवाक्ये तं वरुणाय चतुर्दश च ॥
२। २। ११॥
६४ हिरण्यगर्भ आपो ह यत् प्रजापते । स वेद पुत्रः पितरꣳ स मातरꣳ स सूनुर्भुवथ्स भुवत्पुनर्मघः । स द्यामौर्णोदन्तरिक्षꣳ स सुवः स विश्वा भुवो अभवथ्स आभवत् ॥ उदु त्यं चित्रम् ॥ स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता । बृहत्ततन्थ भानुना ॥ नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो
६५ नर्या पुरू णि । अग्निर्भुवद्रयिपती रयीणाꣳ सत्रा चक्राणो अमृतानि विश्वा ॥ हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदम् ॥ वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः । वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥
बडित्था पर्वतानां खिद्रं बिभर्षि पृथिवि । प्र या भूमि प्रवत्वति मह्ना जिनोषि

६६ महिनि ॥ स्तोमासस्त्वा विचारिणि प्रतिष्टोभन्त्यक्तुभिः । प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥ ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः । अयं यः सोमो न्यधाय्यस्मे तस्मा इंद्रं प्रतिरमेम्यच्छ ॥ आपान्तमन्युस्तृपल प्रभर्मा धुनिः शिमीवाञ्छरुमाꣳ ऋजीषी । सोमो विश्वान्यतसा वनानि नार्वागिंद्रं प्रतिमानानि देभुः ॥ प्र
६७ सुवानः सोम ऋतयुश्चिकेतेंद्राय ब्रह्म जमदग्निरर्चन्न् । वृषा यन्तासि शवसस्तुरस्यान्तर्यच्छ गृणते धर्त्रं दृꣳह ॥
सबाधस्ते मदंच शुष्मयं च ब्रह्म नरो ब्रह्मकृतः सपर्यन्न् । अर्को वा यत्तुरते सोमचक्षास्तत्रेदिंद्रो दधते पृथ्सु तुर्याम् ॥ वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
६८ वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥
प्रतत्ते अद्य शिपिविष्ट नामार्यः शꣳसामि वयुनानि विद्वान् । तं त्वा गृणामि तवसमतवीयान् क्षयन्तमस्य रजसः पराके ॥ किमित्ते विष्णो परिचक्ष्यं भूत् प्र यद्ववक्षे शिपिविष्टो अस्मि । मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥
६९ अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम् । शिशीहि नः सूनुमतः ॥ दा नो अग्ने शतिनो दाः सहस्रिणो दुरो न वाजग्ग् श्रुत्या अपा वृधि । प्राची द्यावापृथिवी ब्रह्मणा कृधि सुवर्ण शुक्रमुषसो वि दिद्युतुः ॥
अग्निर्दा द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति । अग्निर्दिवि हव्यमाततानाग्नेर्धामानि विभृता पुरुत्रा ॥ मा
७० नो मर्धीरा तू भर ॥ घृतं न पूतं तनूररेपाः शुचि हिरण्यम् । तत्ते रुक्मो न रोचत स्वधावः । उभे सुश्चंद्र सर्पिषो दर्वी श्रीणीष आसनि । उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषग्ग् स्तोतृभ्य आ भर ॥ वायो शतꣳ हरीणां युवस्व पोष्यानाम् । उत वा ते सहस्रिणो रथ आ यातु पाजसा ॥ प्र याभि
७१ र्यासि दाश्वाꣳ समच्छा नियुद्भिर्वायविष्टये दुरोणे । नि नो रयिꣳ सुभोजसं युवेह नि वीरवद्गव्यमश्वियं च राधः ॥
रेवतीर्नः सधमाद इंद्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥ रेवाꣳ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः । प्रे दु हरिवः श्रुतस्य ॥ २। २। १२॥ दधानो जिनोषि देभुः प्र हव्यं बभूथ मा याभिश्चत्वारिꣳशच्च ॥ २। २। १२॥

प्रजापतिस्तास्सृष्टा अग्नये पथिकृतेऽग्नये कामायाग्नयेऽन्नवते वैश्वानरमादित्यं चरुमैंद्रं
चरुमिंद्रायान्वृजव आग्नावैष्णवमसौ सोमारौद्रमैंद्रमेकादशकपालꣳ हिरण्यगर्भो द्वादश ॥
प्रजापतिरग्नये कामायाऽभि सं भवतो यो विद्विषाणयोरिध्मे संनह्येदाग्नावैष्णवमुपरिष्टाद्यासि
दाश्वाꣳ समेकसप्ततिः ॥
प्रजापतिः प्रेदु हरि वः श्रुतस्य ॥

## द्वितीयकाण्डे तृतीयः प्रश्नः ३

१ आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूतिकाम आदित्या वा एतं भूत्यै प्रति नुदन्ते योऽलं
भूत्यै सन्भूतिं न प्राप्नोत्यादित्यानेव भुवद्वतः स्वेन भागधेयेनोप धावति त एवैनं भूतिं
गमयन्ति भवत्येवाऽदित्येभ्यो धारयद्वद्भ्यश्चरुं निर्वपेदपरुद्धो वापरुध्यमानो वाऽदित्या वा
अपरोद्धार आदित्या अवगमयितार आदित्यानेव धारयद्वतः
२ स्वेन भागधेयेनोप धावति त एवैनं विशि दाध्रत्यनपरुध्यो भवत्यदितेऽनु
मन्यस्वेत्यपरुध्यमानोऽस्य पदमा ददीतेयं वा अदितिरियमेवास्मै राज्यमनु मन्यते
सत्याशीरित्याह सत्यामेवाशिषं कुरुत इह मन इत्याह प्रजा एवास्मै समनसः करोत्युप
प्रेत मरुतः
३ सुदानव एना विश्पतिनाभ्यमुꣳ राजानमित्याह मारुती वै विड्ज्येष्ठो विश्पतिर्विशैवैनꣳ
राष्ट्रेण समर्धयति यः परस्ताद्ग्राम्यवादी स्यात्तस्य गृहाद्व्रीहीना हरेच्छुक्लाग्श्च कृष्णाग्श्च वि
चिनुया द्ये शुक्लाः स्युस्तमादित्यं चरुं निर्वपेदादित्या वै देवतया विड्विशमेवाव गच्छ
४ त्यवगतास्य विडनवगतꣳ राष्ट्रमित्याहुर्ये कृष्णाः स्युस्तं वारुणं चरुं निर्वपेद्वारुणं
वै राष्ट्रमुभे एव विशं च राष्ट्रं चाव गच्छति यदि नावगच्छेदिममहमादित्येभ्यो भागं
निर्वपाम्यामुष्मादमुष्यै विशोऽवगन्तोरिति निर्वपेदादित्या एवैनं भागधेयं प्रेप्सन्तो विशमव
५ गमयन्ति यदि नावगच्छेदाश्वत्थान्मयूखान्थ्सप्त मध्यमेषायामुप हन्यादिदमहमादित्यान्बध्नाम्यामुष्
विशोऽवगन्तोरित्यादित्या एवैनं बद्धवीरा विशमव गमयन्ति यदि नावगच्छेदेतमेवादित्यं
चरुं निर्वपेदिध्मेऽपि मयूखान्थ्सं नह्येदनपरुध्यमेवाव गच्छत्याश्वत्था भवन्ति मरुतां वा
एतदोजो यदश्वत्थ ओजसैव विशमव गच्छति सप्त भवन्ति सप्तगणा वै मरुतो गणश
एव विशमव गच्छति ॥ २। ३। १॥ धारयद्वतो मरुतो गच्छति विशमवैतदष्टादश च ॥
२। ३। १॥
६ देवा वै मृत्योरबिभयुस्ते प्रजापतिमुपाधावन्तेभ्य एतां प्राजापत्याꣳ शतकृष्णलां
निरवपत्तयैवैष्वमृतमदधाद्यो मृत्योर्बिभीयात्तस्मा एतां प्राजापत्याꣳ शतकृष्णलां

निर्वपेत्प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन्नायुर्दधाति सर्वमायुरेति
शतकृष्णला भवति शतायुः पुरुषः शतेंद्रिय आयुष्येवेंद्रिये
७ प्रति तिष्ठति घृते भवत्यायुर्वै घृतममृतꣳ हिरण्यमायुश्चैवास्मा अमृतं च समीची
दधाति चत्वारिचत्वारि कृष्णलान्यवद्यति चतुरवत्तस्याप्त्या एकधा ब्रह्मण उप हरत्येकधैव
यजमान आयुर्दधात्यसावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन्तस्मा एतꣳ
सौर्यं चरुं निरवपन्तेनैवास्मिन्
८ रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात्तस्मा एतꣳ सौर्यं चरुं निर्वपेदमुमेवादित्य२ꣳ स्वेन
भागधेयेनोप धावति स एवास्मिन्ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवत्युभयतो रुक्मौ भवत
उभयत एवास्मिन्रुचं दधाति प्रयाजेप्रयाजे कृष्णलं जुहोति दिग्भ्य एवास्मै ब्रह्मवर्चसमव
रुन्ध आग्नेयमष्टाकपालं निर्वपेत्सावित्रं द्वादशकपालं भूम्यै
९ चरुं यः कामयेत हिरण्यं विन्देय हिरण्यं मोप नमेदिति यदाग्नेयो भवत्याग्नेयं वै
हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दते सावित्रो भवति सवितृप्रसूत एवैनद्विन्दते भूम्यै
चरुर्भवत्यस्यामेवैनद्विन्दत उपैनꣳ हिरण्यं नमति वि वा एष इंद्रियेण वीर्येणर्ध्यते यो
हिरण्यं विन्दत एता
१० मेव निर्वपेद्धिरण्यं वित्त्वा नेंद्रियेण वीर्येण व्यृध्यत एतामेव निर्वपेद्यस्य हिरण्यं
नश्येद्यदाग्नेयो भवत्याग्नेयं वै हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दति सावित्रो भवति
सवितृप्रसूत एवैनद्विन्दति भूम्यै चरुर्भवत्यस्यां वा एतन्नश्यति यन्नश्यत्यस्यामेवैनद्विन्दतींद्र
११ स्त्वष्टुः सोमममभीषहापिबत्स विष्वङ्व्यार्च्छत्स इंद्रियेण सोमपीथेन व्यार्ध्यत स
यदूर्ध्वमुदवमीत्ते श्यामाका अभवन्त्स प्रजापतिमुपाधावत्तस्मा एतꣳ सोमेंद्र२ꣳ श्यामाकं
चरुं निरवपत्तेनैवास्मिन्निंद्रियꣳ सोमपीथमदधाद्वि वा एष इंद्रियेण सोमपीथेनर्ध्यते यः
सोमं वमिति यः सोमवामी स्यात्तस्मा
१२ एतꣳ सोमेंद्र२ꣳ श्यामाकं चरुं निर्वपेत्सोमं चैवेंद्रं च स्वेन भागधेयेनोप धावति
तावेवास्मिन्निंद्रियꣳ सोमपीथं धत्तो नेंद्रियेण सोमपीथेन व्यृध्यते यत्सौम्यो भवति
सोमपीथमेवाव रुन्धे यदैंद्रो भवतींद्रियं वै सोमपीथ इंद्रियमेव सोमपीथमव रुन्धे
श्यामाको भवत्येष वाव स सोमः
१३ साक्षादेव सोमपीथमव रुन्धेऽग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिंद्राय प्रदात्रे
पुरोडाशमेकादशकपालं पशुकामोऽग्निरेवास्मै पशून् प्रजनयति वृद्धानिंद्रः प्र यच्छति

दधि मधु घृतमापो धाना भवन्त्येतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे पञ्चगृहीतं
भवति पाङ्क्ता हि पशवो बहुरूपं भवति बहुरूपा हि पशवः
१४ समृध्यै प्राजापत्यं भवति प्राजापत्या वै पशवः प्रजापतिरेवास्मै पशून् प्र
जनयत्यात्मा वै पुरुषस्य मधु यन्मध्वग्नौ जुहोत्यात्मानमेव तद्यजमानोऽग्नौ प्र दधाति
पङ्क्तौ याज्यानुवाक्ये भवतः पाङ्क्तः पुरुषः पाङ्क्ताः पशव आत्मानमेव मृत्योर्निष्क्रीयपशूनव
रुन्धे ॥ २। ३। २॥ इंद्रियैस्मिन् भूम्या एतामिंद्रः स्यात्तस्मै सोमो बहुरूपा हि पशव
एकचत्वारिꣳशच्च ॥ २। ३। २॥
१५ देवा वै सत्रमासतर्द्धिपरिमितं यशस्कामास्तेषाꣳ सोमꣳ राजानं यश आर्च्छथ्स
गिरिमुदैत्तमग्निरनूदैत्तावग्नीषोमौ समभवतां ताविंद्रो यज्ञविभ्रष्टोऽनु परैत्तावब्रवीद्याजयतं
मेति तस्मा एतामिष्टिं निरवपतामाग्नेयमष्टाकपालमैंद्रमेकादशकपालꣳ सौम्यं चरुं
तयैवास्मिन्तेज
१६ इंद्रियं ब्रह्मवर्चसमधत्तां यो यज्ञविभ्रष्टः स्यात्तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालमैंद्रमेकादश
सौम्यं चरुं यदाग्नेयो भवति तेज एवास्मिन्तेन दधाति यदैंद्रो भवतींद्रियमेवास्मिन्तेन
दधाति यथ्सौम्यो ब्रह्मवर्चसं तेनाग्नेयस्य च सौम्यस्य चैंद्रे समाश्लेषयेत्तेजश्चैवास्मिन्
ब्रह्मवर्चसं च समीची
१७ दधात्यग्नीषोमीयमेकादशकपालं निर्वपेद्यं कामो नोपनमेदाग्नेयो वै ब्राह्मणः स सोमं
पिबति स्वामेव देवताग् स्वेन भागधेयेनोप धावति सैवैनं कामेन समर्धयत्युपैनं कामो
नमत्यग्नीषोमीयमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकामोऽग्नीषोमावेव स्वेन भागधेयेनोप धावति
तावेवास्मिन्ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव
१८ भवति यदष्टाकपालस्तेनाग्नेयो यच्छ्यामाकस्तेन सौम्यः समृद्ध्यै सोमाय वाजिने
श्यामाकं चरुं निर्वपेद्यः क्लैब्याद्बिभीयाद्रेतो हि वा एतस्माद्वाजिनमपक्रामत्यथैष
क्लैब्याद्बिभाय सोममेव वाजिनग्ग् स्वेन भागधेयेनोप धावति स एवास्मिन्रेतो वाजिनं
दधाति न क्लीबो भवति ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद्ग्रामकामो
१९ ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव
भवति गणवती याज्यानुवाक्ये भवतः सजातैरेवैनं गणवन्तं करोत्येतामेव निर्वपेद्यः
कामयेत ब्रह्मन्विशं वि नाशयेयमिति मारुती याज्यानुवाक्ये कुर्याद्ब्रह्मन्नेव विशं वि
नाशयति ॥
२। ३। ३॥ तेजः समीची ब्रह्मवर्चस्येव ग्रामकामस्त्रिचत्वारिꣳशच्च ॥

२। ३। ३॥
२० अर्यम्णे चरुं निर्वपेथ्सुवर्गकामोऽसौ वा आदित्योर्यमार्यमणमेव स्वेन भागधेयेनोप
धावति स एवैनꣳसुवर्गं लोकं गमयत्यर्यम्णे चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजाः
स्युरित्यसौ वा आदित्योर्यमा यः खलु वै ददाति सोर्यमार्यमणमेव स्वेन भागधेयेनोप
धावति स एवा
२१ ऽस्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवन्त्यर्यम्णे चरुं निर्वपेद्यः
कामयेत स्वस्ति जनतामियामित्यसौ वा आदित्योर्यमार्यमणमेव स्वेन भागधेयेनोप
धावति स एवैनं तद्गमयति यत्र जिगमिषतींद्रो वै देवानामानुजावर आसीथ्स
प्रजापतिमुपाधावत्तस्मा एतमैंद्रमानुषूकमेकादशकपालं नि
२२ रवपत् तेनैवैनमग्रं देवतानां पर्यणयद्बुध्नवती अग्रवती याज्यानुवाक्ये
अकरोद्बुध्नादेवैनमग्रं पर्यणयद्यो राजन्य आनुजावरः स्यात्तस्मा एतमैंद्रमानुषूकमेका
दशकपालं निर्वपेदिंद्रमेव स्वेन भागधेयेनोप धावति स एवैनमग्रꣳ समानानां परि
णयति बुध्नवती अग्रवती याज्यानुवाक्ये भवतो बुध्नादेवैनमग्रं
२३ परि णयत्यानुषूको भवत्येषा ह्येतस्य देवता य आनुजावरः समृद्ध्यै यो
ब्राह्मण आनुजावरः स्यात्तस्मा एतं बार्हस्पत्यमानुषूकं चरुं निर्वपेद् बृहस्पतिमेव स्वेन
भागधेयेनोप धावति स एवैनमग्रꣳसमानानां परि णयति बुध्नवती अग्रवती याज्यानुवाक्ये
भवतो बुध्नादेवैनमग्रं परि णयत्यानुषूको भवत्येषा ह्येतस्य देवता य आनुजावरः समृद्ध्यै
॥ २। ३। ४॥ एव निरग्रमेतस्य चत्वारि च ॥ २। ३। ४॥
२४ प्रजापतेस्त्रयस्त्रिꣳशद्दुहितर आसन्ताः सोमाय राज्ञेऽददात्तासाꣳ रोहिणीमुपैत्ता
ईर्ष्यन्तीः पुनरगच्छन्ता अन्वैत्ताः पुनरयाचत ता अस्मै न पुनरददाथ्सोब्रवीदृतममीष्व
यथा समावच्छ उपैष्याम्यथ ते पुनर्दास्यामीति स ऋतमामीत्ता अस्मै पुनरददात्तासाꣳ
रोहिणीमेवोपैत्
२५ तं यक्ष्म आर्च्छद्राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म
यत्पापीयानभवत्तत्पापयक्ष्मस्य यज्जायाभ्योऽविन्दत्तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां
जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एता एव नमस्यन्नुपाधावत्ता अब्रुवन्वरं वृणामहै
समावच्छ एव न उपाय इति तस्मा एत
२६ मादित्यं चरुं निरवपन्तेनैवैनं पापाथ् स्रामादमुञ्चन्, यः पापयक्ष्मगृहीतः
स्यात्तस्मा एतमादित्यं चरुं निर्वपेदादित्यानेव स्वेन भागधेयेनोप धावति त एवैनं

पापाथ्स्रामान्मुञ्चन्त्यमावास्यायां निर्वपेदमुमेवैनमाप्यायमानमन्वा प्याययति नवो नवो भवति जायमान इति पुरोऽनुवाक्या भवत्यायुरेवास्मिन्तया दधाति यमादित्या अꣳशुमाप्याययन्तीति याज्यैवैनमेतयाऽप्याययति ॥ २। ३। ५॥

एवोपैतमस्मिन् त्रयोदश च ॥ २। ३। ५॥

२७ प्रजापतिर्देवेभ्योऽन्नाद्यं व्यादिशथ्सोऽब्रवीद्यदिमान्लोकानभ्यतिरिच्यातै तन्ममासदिति तदिमान्लोकानभ्यत्यरिच्यतेंद्रꣳ राजानमिंद्रमधिराजमिंद्रग्ग् स्वराजानं ततो वै स इमान्लोकाग् स्त्रेधाऽदुहत् तत् त्रिधातोस्त्रिधातुत्वं यं कामयेतान्नादः स्यादिति तस्मा एतं त्रिधातुं निर्वपेदिंद्राय राज्ञे पुरोडाश

२८ मेकादशकपालमिंद्रायाधिराजायेंद्राय स्वराज्ञेऽयं वा इंद्रो राजायमिंद्रोऽधिराजोऽसाविंद्रः स्वराडिमानेव लोकान्थ्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति यथा वथ्सेन प्रत्तां गां दुह एवमेवेमान्लोकान् प्रत्तान् काममन्नाद्यं दुह उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषा लोकानामाप्त्या उत्तरौत्तरो ज्यायान्भवत्येवमिव ही मे लोकाः समृद्ध्यै सर्वेषामभिगमयन्नव द्यत्यच्छंबट्कारं व्यत्यासमन्वाहानिर्दाहाय ॥ २। ३। ६॥ पुरोडाशं त्रयषड्विꣳशतिश्च ॥ २। ३। ६॥

(मे२एल्लगीएहेळबेकु)

२९ देवासुराः संयत्ता आसन्तान्देवानसुरा अजयन्ते देवाः पराजिग्याना असुराणां वैश्यमुपायन्तेभ्य इंद्रियं वीर्यमपाक्रामत् तदिंद्रोऽचायत् तदन्वपाक्रामत् तदवरुधं नाशक्नोत् तदस्मादभ्यर्धोऽचरथ्स प्रजापतिमुपाधावत् तमेतया सर्वपृष्ठया याजयत् तयैवास्मिन्निंद्रियं वीर्यमदधाद्य इंद्रियकामो (इळियवरे२एगीएमे२एल्लगीएहेळबेकु)

३० वीर्यकामः स्यात्तमेतया सर्वपृष्ठया याजयेदेता एव देवताः स्वेन भागधेयेनोप धावति ता एवास्मिन्निंद्रियं वीर्यं दधति यदिंद्राय राथंतराय निर्वपति यदेवाग्नेस्तेजस्तदेवाव रुन्धे यदिंद्राय बार्हताय यदेवेंद्रस्य तेजस्तदेवाव रुन्धे यदिंद्राय वैरूपाय यदेव सवितुस्तेजस्त

३१ देवाव रुन्धे यदिंद्राय वैराजाय यदेव धातुस्तेजस्तदेवाव रुन्धे यदिंद्राय शाक्कराय यदेव मरुतां तेजस्तदेवाव रुन्धे यदिंद्राय रैवताय यदेव बृहस्पतेस्तेजस्तदेवाव रुन्ध एतावन्ति वै तेजाꣳसि तान्येवाव रुन्ध उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय द्वादशकपालः पुरोडाशो

३२ भवति वैश्वदेवत्वाय समन्तं पर्यवद्यति समन्तमेवेंद्रियं वीर्यं यजमाने

दधाति व्यत्यासमन्वाहानिर्दहायाश्व ऋषभो वृष्णिर्बस्तः सा दक्षिणा वृषस्त्वायैतयैव
यजेताभिशस्यमान एताश्चेद्वा अस्य देवता अन्नमदन्त्यदन्त्युवेवास्य मनुष्याः ॥ २। ३।
७॥ इंद्रियकामः सवितुस्तेजस्तत्पुरोडाशोऽष्टात्रिꣳशच्च ॥ २। ३। ७॥
३३ रजनो वै कौणेयः क्रतुजितं जानकिं चक्षुर्वन्यमयात्तस्मा एतामिष्टिं निरवपदग्नये
भ्राजस्वते पुरोडाशमष्टाकपालꣳ सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालं
तयैवास्मिञ्चक्षुरदधाद्यश्चक्षुष्कामः स्यात्तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते
पुरोडाशमष्टाकपालꣳ सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालमग्नेर्वै चक्षुषा
मनुष्या वि
३४ पश्यन्ति सूर्यस्य देवा अग्निं चैव सूर्यं च स्वेन भागधेयेनोप धावति
तावेवास्मिञ्चक्षुर्धत्तश्चक्षुष्मानेव भवति यदाग्नेयौ भवतश्चक्षुषी एवास्मिन्तत्प्रति दधाति
यथ्सौऱ्यो नासिकां तेनाभितः सौर्यमाग्नेयौ भवतस्तस्मादभितो नासिकां चक्षुषी
तस्मान्नासिकया चक्षुषी विधृते समानी याज्यानुवाक्ये भवतः समानꣳ हि चक्षुः समृद्ध्या
उदु त्यं जातवेदसꣳ सप्त त्वा हरितो रथे चित्रं देवानामुदगादनीकमिति पिण्डान् प्र
यच्छति चक्षुरेवास्मै प्र यच्छति यदेव तस्य तत् ॥ २। ३। ८॥ वि ह्यष्टाविꣳशतिश्च ॥
२। ३। ८॥
३५ ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहꣳ
सजातेषु भूयासमुग्रश्चेत्ता वसुविद्ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमभिभूश्चेत्ता
वसुविदामनमस्यामनस्य देवा ये सजाताः कुमाराः समनसस्तानहं कामये हृदा ते
मां कामयन्ताꣳ हृदा तान्म आमनसः कृधि स्वाहामनम
३६ स्यामनस्य देवा याः स्त्रियः समनसस्ता अहं कामये हृदा ता मां कामयन्ताꣳ हृदा
ता म आमनसः कृधि स्वाहा वैश्वदेवीꣳ सांग्रहणीं निर्वपेद्ग्रामकामो वैश्वदेवा वै सजाता
विश्वानेव देवान्थ्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव
भवति सांग्रहणी भवति मनोग्रहणं वै संग्रहणं मन एव सजातानां
३७ गृह्णाति ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमिति परिधीन्परि दधात्याशिषमेवैतामा
शास्तेऽथो एतदेव सर्वꣳ सजातेष्वधि भवति यस्यैवं विदुष एते परिधयः परिधीयन्त
आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोत्येतावन्तो वै सजाता ये महान्तो ये
क्षुल्लका याः स्त्रियस्तानेवाव रुन्धे त एनमवरुद्धा उपतिष्ठन्ते ॥ २। ३। ९॥
स्वाहाऽमनमसि सजातानाꣳ रुंधे पंच च ॥ २। ३। ९॥

३८ यन्नवमैत् तन्नवनीतमभवद्यदसर्पत् तथ्सर्पिरभवद्यदध्रियत तद्घृतमभवदश्विनोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि स्वाहेंद्रस्य प्राणोऽसि तस्य ते ददातु यस्य प्राणोऽसि स्वाहा मित्रावरुणयोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि स्वाहा विश्वेषां देवानां प्राणोऽसि

३९ तस्य ते ददतु येषां प्राणोऽसि स्वाहा घृतस्य धाराममृतस्य पन्थामिंद्रेण दत्तां प्रयतां मरुद्भिः । तत्त्वा विष्णुः पर्यपश्यत्तत्त्वेडा गव्यैरयत् ॥ पावमानेन त्वा स्तोमेन गायत्रस्य वर्तन्योपाꣳशोर्वीर्येण देवस्त्वा सवितोथ्सृजतु जीवातवे जीवनस्यायै बृहद्रथन्तरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सवितोथ्

४० सृजतु जीवातवे जीवनस्यायाा अग्नेस्त्वा मात्रया जगत्यै वर्तन्याग्रयणस्य वीर्येण देवस्त्वा सवितोथ्सृजतु जीवातवे जीवनस्याया इममग्न आयुषे वर्चसे कृधि प्रियꣳ रेतो वरुण सोम राजन् । मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥ अग्निरायुष्मान्थ्स वनस्पतिभिरायुष्मान् तेन त्वायुषायुष्मन्तं करोमि सोम आयुष्मान्थ्स ओषधीभिर्यज्ञ आयुष्मान्थ्स दक्षिणाभिर्ब्रह्मायुष्मत् तद् ब्राह्मणैरायुष्मद्देवा आयुष्मन्तस्तेऽमृतेन पितर आयुष्मन्तस्ते स्वधयायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि ॥ २। ३। १०॥ विश्वेषां देवानां प्राणोसि त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सवितोथ्सोम आयुष्मान्पंच विगंशतिश्च ॥ २। ३। १०॥

४१ अग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो वरुण एनं वरुणपाशेन गृह्णाति सरस्वतीं वागग्नाविष्णू आत्मा यस्य ज्योगामयति यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालꣳ सौम्यं चरुं वारुणं दशकपालꣳ सारस्वतं चरुमाग्नावैष्णवमेकादशकपालमग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्रसं

४२ वारुणेनैवैनं वरुणपाशान्मुञ्चति सारस्वतेन वाचं दधात्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन च भिषज्यत्युत यदीतासुर्भवति जीवत्येव यन्नवमैत् तन्नवनीतमभवदित्याज्यमवेक्षते रूपमेवास्यैतन्महिमानं व्याचष्टेऽश्विनोः प्राणोऽसीत्याहाश्विनौ वै देवानां

४३ भिषजौ ताभ्यामेवास्मै भेषजं करोतींद्रस्य प्राणोऽसीत्याहेंद्रियमेवास्मिन्नेतेन दधाति मित्रावरुणयोः प्राणोऽसीत्याह प्राणापानावेवास्मिन्नेतेन दधाति विश्वेषां

देवानां प्राणोऽसीत्याह वीर्यमेवास्मिन्नेतेन दधाति घृतस्य धाराममृतस्य पन्थामित्याह यथायजुरेवैतत्पावमाने न त्वा स्तोमेनेत्या
४४ ह प्राणमेवास्मिन्नेतेन दधाति बृहद्रथन्तरयोस्त्वा स्तोमेनेत्याहौज एवास्मिन्नेतेन दधात्यग्नेस्त्वा मात्रयेत्याहात्मानमेवास्मिन्नेतेन दधात्यृत्विजः पर्याहुर्यावन्त एवर्त्विजस्त एनं भिषज्यन्ति ब्रह्मणो हस्तमन्वारभ्य पर्याहुरेकधैव यजमान आयुर्दधति यदेव तस्य तद्धिरण्याद्
४५ घृतं निष्पिबत्यायुर्वै घृतममृत१ँ हिरण्यममृतादेवायुर्निष्पिबति शतमानं भवति शतायुः पुरुषः शतेंद्रिय आयुष्येवेंद्रिये प्रतितिष्ठत्यथो खलु यावतीः समा एष्यन्मन्येत तावन्मान२ँ स्याथ्समृद्ध्या इममग्न आयुषे वर्चसे कृधीत्याहायुरेवास्मिन्वर्चोदधाति विश्वे देवा जरदष्टिर्यथासदित्याह जरदष्टिमेवैनं करोत्यग्निरायुष्मानिति हस्तं गृह्णात्येते वै देवा आयुष्मन्तस्त एवास्मिन्नायुर्दधति सर्वमायुरेति ॥ २। ३। ११॥ रसं देवानाग् स्तोमेनेति हिरण्यादसदिति द्वावि१ँशतिश्च ॥ २। ३। ११॥
४६ प्रजापतिर्वरुणायाश्वमनयथ्स स्वां देवतामार्च्छथ्स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तं निरवपत् ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति योऽश्वं प्रति गृह्णाति यावतोऽश्वान् प्रति गृह्णीयात्तावतो वारुणाश्चतुष्कपालान्निर्वपेद्वरुणमेव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुञ्चति
४७ चतुष्कपाला भवन्ति चतुष्पाद्ध्यश्वः समृद्ध्या एकमतिरिक्तं निर्वपेद्यमेव प्रतिग्राही भवति यं वा नाध्येति तस्मादेव वरुणपाशान्मुच्यते यद्यपरं प्रतिग्राही स्याथ्सौर्यमेककपालमनु निर्वपेदमुमेवादित्यमुच्चारं कुरुतेऽपोऽवभृथमवैत्यप्सु वै वरुणः साक्षादेव वरुणमव यजतेऽपोनप्त्रीयं चरुं पुनरेत्य निर्वपेदप्सुयोनिर्वा अश्वः स्वामेवैनं योनिं गमयति स एन१ँ शान्त उपतिष्ठते ॥ २। ३। १२॥ मुंचति चरुग् सप्तदश च ॥ २। ३। १२॥
४८ या वामिंद्रावरुणा यतव्या तनूस्तयेमम१ँहसो मुञ्चतं या वामिंद्रावरुणा सहस्या रक्षस्या तेजस्या तनूस्तयेमम१ँहसो मुञ्चतं यो वामिंद्रावरुणावग्नौ स्रामस्तं वामेतेनाव यजे यो वामिंद्रावरुणा द्विपाथ्सु पशुषु चतुष्पाथ्सु गोष्ठे गृहेष्वप्स्वोषधीषु वनस्पतिषु स्रामस्तं वामेतेनाव यज इंद्रो वा एतस्यै
४९ न्द्रियेणाऽप क्रामति वरुण एनं वरुणपाशेन गृह्णाति यः पाप्मना गृहीतो भवति यः पाप्मना गृहीतः स्यात्तस्मा एतामैंद्रावरुणीं पयस्यां निर्वपेदिंद्र एवास्मिन्निंद्रियं दधाति

वरुण एनं वरुणपाशान्मुञ्चति पयस्या भवति पयो हि वा एतस्मादपक्रामत्यथैष पाप्मना
गृहीतो यत्पयस्या भवति पय एवास्मिन्तया दधाति पयस्यायां
५० पुरोडाशमव दधात्यात्मन्वन्तमेवैनं करोत्यथो आयतनवन्तमेव चतुर्धा व्यूहति दिक्ष्वेव
प्रति तिष्ठति पुनः समूहति दिग्भ्य एवास्मै भेषजं करोति समूह्याव द्यति यथाविद्धं
निष्कृन्तति तादृगेव तद्यो वामिंद्रावरुणावग्नौ स्रामस्तं वामेतेनाव यज इत्याह दुरिष्ट्या
एवैनं पाति यो वामिंद्रावरुणा द्विपाथ्सु पशुषु स्रामस्तं वामेतेनाव यज इत्याहैतावतीर्वा
आप ओषधयो वनस्पतयः प्रजाः पशव उपजीवनीयास्ता एवास्मै वरुणपाशान्मुञ्चति ॥
२। ३। १३॥ एतस्य पयस्यायां पाति षड्विꣳशतिश्च ॥ २। ३। १३॥
५१ स प्रत्नवन्नि काव्येंद्रं वो विश्वतस्परींद्रं नरः । त्वं नः सोम विश्वतो रक्षा राजन्नघायतः
। न रिष्येत्त्वावतः सखा ॥ या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु
। तेभिर्नो विश्वैः सुमना अहेडन्राजन्थ्सोम प्रति हव्या गृभाय ॥ अग्नीषोमा सवेदसा
सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥ युव
५२ मेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् । युवꣳ सिन्धूꣳ
रभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् ॥
अग्नीषोमाविमꣳ सु मे शृणुतं वृषणा हवम् । प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥
आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः । अग्नीषोमा ब्रह्मणा वावृधानोरुं
यज्ञाय चक्रथुरु लोकम् ॥ अग्नीषोमा हविषः प्रस्थितस्य वीतꣳ
५३ हर्यतं वृषणा जुषेथाम् । सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः
॥ आ प्यायस्व सं ते ॥ गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रवस्तमम्
। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ स इज्जनेन स
विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः । देवानां यः पितरमाविवासति
५४ श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥ स सुष्टुभा स ऋक्कता गणेन वलꣳ रुरोज
फलिगꣳ रवेण । बृहस्पतिरुस्त्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥ मरुतो यद्ध
वो दिवो या वः शर्म ॥
अर्यमा याति वृषभस्तुविष्मान्दाता वसूनां पुरुहूतो अर्हन् । सहस्राक्षो
गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु ॥ ये तेऽर्यमन्बहवो देवयानाः पन्थानो
५५ राजन्दिव आचरन्ति । तेभिर्नो देव महि शर्म यच्छ शं न एधि द्विपदे शं चतुष्पदे

॥ बुध्नादग्रमंगिरोभिर्गृणानो वि पर्वतस्य दृꣳहितान्यैरत् । रुजद्रोधाꣳसि कृत्रिमाण्येषाꣳ सोमस्य ता मद इंद्रश्चकार ॥ बुध्नादग्रेण वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् । वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इंद्रश्चकार ।
५६ प्र यो जज्ञे विद्वाꣳ अस्य बंधुं विश्वानि देवो जनिमा विवक्ति । ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचादुच्चा स्वधयाभि प्रतस्थौ ॥ महान्मही अस्तभायद्वि जातो द्याꣳ सद्म पार्थिवं च रजः । स बुध्नादाष्ट जनुषाभ्यग्रं बृहस्पतिर्देवता यस्य सम्राट् ॥ बुध्नाद्यो अग्रमभ्यर्त्योजसा बृहस्पतिमा विवासन्ति देवाः । भिनद्वलं वि पुरो दर्दरीति कनिक्रदथ्सुवरपो जिगाय ॥ २। ३। १४॥ युवं वीतमाविवासति पन्थानो दीर्घयाथैः सोमस्य ता मद इंद्रश्चकार देवा नव च ॥ २। ३। १४॥
आदित्येभ्यो देवा वै मृत्योर्देवा वै सत्रमर्यम्णे प्रजापतेस्त्रयस्त्रिꣳशत् प्रजापतिर्देवेभ्योऽन्नाद्यं देवासुरास्तात्रजनो ध्रुवोसि यन्नवमैदग्निं वै प्रजापतिर्वरुणाय यावामिंद्रावरुणा स प्रत्नवच्चतुर्दश ॥
आदित्येभ्यस्त्वष्टुरस्मै दानकामा एवाव रुंधेग्निं वै स प्रत्नवथ्षद्वंचाशत् ॥
आदित्येभ्यः सुवरपो जिगाय ॥

## द्वितीयकाण्डे चतुर्थः प्रश्नः ४

१ देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षाꣳसि पिशाचास्तेऽन्यतस्तेषां देवानामुत यदल्पं लोहितमकुर्वन्तद्रक्षाꣳसि रात्रीभिरसुभ्नन्तान्थ्सुब्धान्मृतानभि व्यौच्छत्ते देवा अविदुर्यो वै नोऽयं म्रियते रक्षाꣳसिवा इमं घ्नन्तीति ते रक्षाग्स्युपामंत्रयंत तान्यब्रुवन्वरं वृणामहै य
२ दसुराञ्जयाम तन्नः सहासदिति ततो वै देवा असुरानजयन्तेऽसुरांजित्वा रक्षाग्स्यपानुदन्त तानि रक्षाग्स्यनृतमकर्तेति समन्तं देवान्पर्यविशन्ते देवा अग्नावनाथन्त तेऽग्नये प्रवते पुरोडाशमष्टाकपालं निरवपन्नग्नये विबाधवतेऽग्नये प्रतीकवते यदग्नये प्रवते निरवपन् यान्येव पुरस्ताद्रक्षाग्स्या
३ ऽसन्तानि तेन प्राणुदन्त यदग्नये विबाधवते यान्येवाभितो रक्षाग्स्यासन् तानि तेन व्यबाधन्त यदग्नये प्रतीकवते यान्येव पश्चाद्रक्षाग्स्यासन् तानि तेनापानुदन्त ततो देवा अभवन्परासुरा यो भ्रातृव्यवान्थ्स्याथ्स स्पर्धमान एतयेष्ट्या यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवते

४ ऽग्नये प्रतीकवते यदग्नये प्रवते निर्वपति य एवास्माच्छ्रेयान्भ्रातृव्यस्तं तेन प्र
णुदते यदग्नये विबाधवते य एवैनेन सदृङ्ङ् तेन वि बाधते यदग्नये प्रतीकवते य
एवास्मात्पापीयान्तं तेनाप नुदते प्र श्रेयाꣳसं भ्रातृव्यं नुदतेऽति सदृशं क्रामति नैनं
पापीयानाप्नोति य एवं विद्वानेतयेष्ट्या यजते ॥ २। ४। १॥ वृणामहे यत्पुरस्ताद्रक्षाꣳसि
वपेदग्नये विबाधवत एवं चत्वारि च ॥ २। ४। १॥
५ देवासुराः संयत्ता आसन् ते देवा अब्रुवन् यो नो वीर्यावत्तमस्तमनु समारभामहा
इति त इंद्रमब्रुवन्त्वं वै नो वीर्यावत्तमोऽसि त्वामनु समारभामहा इति सोऽब्रवीत्तिस्रो
म इमास्तनुवो वीर्यावतीस्ताः प्रीणीताथासुरानभि भविष्यथेति ता वै ब्रूहीत्यब्रुवन्नियमꣳ
होमुगियं विमृधेयमिंद्रियावती
६ त्यब्रवीत्त इंद्रायाꣳ होमुचे पुरोडाशमेकादशकपालं निरवपन्निंद्राय वैमृधायेंद्रायेंद्रियावते
यदिंद्रायाꣳ होमुचे निरवपन्नꣳहस एव तेनामुच्यन्त यदिंद्राय वैमृधाय मृध एव
तेनापाघ्नत यदिंद्रायेंद्रियावत इंद्रियमेव तेनात्मन्नदधत त्रयस्त्रिꣳशत्कपालं पुरोडाशं
निरवपन्त्रयस्त्रिꣳशद्वै देवतास्ता इंद्र आत्मन्ननु समारभयत भूत्यै
७ तां वाव देवा विजितिमुत्तमामसुरैर्व्यजयन्त यो भ्रातृव्यवान्थ्स्यात्थ्स स्पर्धमान एतयेष्ट्या
यजेतेंद्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिंद्राय वैमृधायेंद्रायेंद्रियावतेऽꣳहसा
वा एष गृहीतो यस्माच्छ्रेयान्भ्रातृव्योयदिंद्रायाꣳहोमुचे निर्वपत्यꣳहस एव तेन मुच्यते
मृधा वा एषोऽभिषण्णो यस्माथ्समानेष्वन्यः श्रेयानुता
८ ऽभ्रातृव्यो यदिंद्राय वैमृधाय मृध एव तेनाऽप हते यदिंद्रायेंद्रियावत इंद्रियमेव
तेनात्मन्धत्ते त्रयस्त्रिꣳशत् कपालं पुरोडाशं निर्वपति त्रयस्त्रिꣳशद्वै देवतास्ता एव यजमान
आत्मन्ननु समारभयते भूत्यै सा वा एषा विजितिर्नामेष्टिर्य एवं विद्वानेतयेष्ट्या यजत
उत्तमामेव विजितिं भ्रातृव्येण वि जयते ॥
२। ४। २॥ इंद्रियावती भूत्या उतैकान्न पंचाशच्च ॥ २। ४। २॥
९ देवासुराः संयत्ता आसन्तेषां गायत्र्योजो बलमिंद्रियं वीर्यं प्रजां पशून्थ्संगृह्यादायाप
क्रम्यातिष्ठत् तेऽमन्यन्त यतरान्, वा इयमुपावथ्स्र्यति त इदं भविष्यन्तीति तां
व्यह्वयन्त विश्वकर्मन्निति देवा दाभीत्यसुराः सा नान्यतराग्श्च नोपावर्तत ते देवा
एतद्यजुरपश्यन्नोजोऽसि सहोऽसि बलमसि
१० भ्राजोऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरिति वाव

देवा असुराणामोजो बलमिंद्रियं वीर्यं प्रजां पशूनवृञ्जत यद्गायत्र्यपक्रम्यातिष्ठत्तस्मादेतां गायत्रीतीष्टिमाहुः संवथ्सरो वै गायत्री संवथ्सरो वै तदपक्रम्यातिष्ठद्यदेतया देवा असुराणामोजो बलमिंद्रियं वीर्यं

११ प्रजां पशूनवृञ्जत तस्मादेताꣳ संवर्ग इतीष्टिमाहुर्यो भ्रातृव्यवान्थ्स्याथ्स स्पर्धमान एतयेष्ट्या यजेताग्नये संवर्गाय पुरोडाशमष्टाकपालं निर्वपेत्तꣳ शृतमासन्नमेतेन यजुषाभि मृशेदोज एव बलमिंद्रियं वीर्यं प्रजां पशून्भ्रातृव्यस्य वृङ्क्ते भवत्यात्मना परास्य भ्रातृव्यो भवति ॥ २। ४। ३॥ बलमस्येतया देवा असुराणामोजो बलमिंद्रियं वीर्यं पंच चत्वारिꣳशच्च ॥ २। ४। ३॥

१२ प्रजापतिः प्रजा असृजत ता अस्माथ्सृष्टाः पराचीरायन्ता यत्रावसन्ततो गर्मुदुदतिष्ठत्ता बृहस्पतिश्चान्ववैताꣳ सोऽब्रवीद्बृहस्पतिरनया त्वा प्रतिष्ठान्यथ त्वा प्रजा उपावथ्स्र्यन्तीति तं प्रातिष्ठत्ततो वै प्रजापतिं प्रजा उपावर्तन्त यः प्रजाकामः स्यात्तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेत्प्रजापति

१३ मेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजां प्र जनयति प्रजापतिः पशूनसृजत तेऽस्माथ्सृष्टाः पराञ्च आयन् ते यत्रावसन्ततो गर्मुदुदतिष्ठत् तान्पूषा चान्ववैताꣳ सोऽब्रवीत् पूषानया मा प्रतिष्ठाथ त्वा पशव उपावथ्स्र्यन्तीति मां प्रतिष्ठेति सोमोऽब्रवीन्मम वा

१४ अकृष्टपच्यमित्युभौ वां प्रतिष्ठानीत्यब्रवीत्तौ प्रातिष्ठत्ततो वै प्रजापतिं पशव उपावर्तन्त यः पशुकामः स्यात्तस्मा एतꣳ सोमापौष्णं गार्मुतं चरुं निर्वपेथ्सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून् प्र जनयति ॥ २। ४। ४॥ वपेत् प्रजापतिं वै दधाति पूषा त्रीणि च ॥ २। ४। ४॥

१५ अग्ने गोभिर्न आ गहीन्दो पुष्ट्या जुषस्व नः । इंद्रो धर्ता गृहेषु नः ॥ सविता यः सहस्रियः स नो गृहेषु रारणत् । आ पूषा एत्वा वसु ॥ धाता ददातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णे न वावनत् ॥

त्वष्टा यो वृषभो वृषा स नो गृहेषु रारणत् । सहस्रेणायुतेन च ॥ येन देवा अमृतं

१६ दीर्घꣳ श्रवो दिव्यैरयन्त । रायस्पोष त्वमस्मभ्यं गवां कुल्मिं जीवस आ युवस्व ॥ अग्निर्गृहपतिः सोमो विश्ववनिः सविता सुमेधाः स्वाहा । अग्ने गृहपते यस्ते घृत्यो भागस्तेन स ह ओज आक्रममाणाय धेहि श्रैष्ठ्यात्पथो मा योषं मूर्धा भूयासग्ग् स्वाहा

॥ २। ४। ५॥ अमृतमष्टात्रिꣳशच्च ॥ २। ४। ५॥

१७ चित्रया यजेत पशुकाम इयं वै चित्रा यद्वा अस्यां विश्वं भूतमधि प्रजायते तेनेयं चित्रा य एवं विद्वाग्श्चित्रया पशुकामो यजते प्र प्रजया पशुभिर्मिथुनैर्जायते प्रैवाग्ने येन वापयति रेतः सौम्येन दधाति रेत एव हितं त्वष्टा रूपाणि वि करोति सारस्वतो भवत एतद्वै दैव्यं मिथुनं दैव्यमेवास्मै

१८ मिथुनं मध्यतो दधाति पुष्ट्यै प्रजननाय सिनीवाल्यै चरुर्भवति वाग्वै सिनीवाली पुष्टिः खलु वै वाक्पुष्टिमेव वाचमुपैत्यैंद्र उत्तमो भवति तेनैव तन्मिथुनꣳ सप्तैतानि हवीꣳषि भवन्ति सप्त ग्राम्याः पशवः सप्तारण्याः सप्त छंदाग्स्युभयस्यावरुद्ध्या अथैता आहुतीर्जुहोत्येते वै देवाः पुष्टिपतयस्त एवास्मिन्पुष्टिं दधति पुष्यति प्रजया पशुभिरथो यदेता आहुतीर्जुहोति प्रतिष्ठित्यै ॥ २। ४। ६॥

अस्मै त एव द्वादश च ॥ २। ४। ६॥

१९ मारुतमसि मरुतामोजोऽपां धारां भिन्धि रमयत मरुतः श्येनमायिनं मनोजवसं वृषणꣳ सुवृक्तिम् । येन शर्ध उग्रमवसृष्टमेति तदश्विना परि धत्त२ꣳ स्वस्ति ॥

पुरोवातो वर्षंजिन्वरावृथ्स्वाहा वातावद्वर्षन्नुग्ररावृथ्स्वाहा स्तनयन्वर्षन् भीमरावृथ्स्वाहाऽनशन्यवस्फू
दिद्युद्वर्षन् त्वेषरावृथ्स्वाहातिरात्रं वर्षन्पूर्तिरावृथ्

२० स्वाहा बहु हायमवृषादिति श्रुतरावृथ्स्वाहातपति वर्षन्विराडावृथ्स्वाहावस्फूर्जन् दिद्युद्वर्षन् भूतरावृथ्स्वाहा मान्दा वाशाः शुन्ध्यूरजिराः । ज्योतिष्मतीस्तमस्वरीरुन्दतीः सुफेनाः । मित्रभृतः, क्षत्रभृतः सुराष्ट्रा इह मावत । वृष्णो अश्वस्य संदानमसिवृष्ट्यै त्वोप नह्यामि ॥ २। ४। ७॥

पूर्तिरावृद्धिचत्वारिꣳशच्च ॥ २। ४। ७॥

२१ देवा वसव्या अग्ने सोम सूर्य । देवाः शर्मण्या मित्रावरुणार्यमन् । देवाः सपीतयोऽपां नपादाशुहेमन् । उद्नो दत्तोऽदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्यावत । दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन । पृथिवीं यद्व्युंदन्ति ॥ आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः । वि पर्जन्याः सृजन्ति रोदसी अनु धन्वना यन्ति

२२ वृष्टयः ॥ उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः । न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृथ्सत ॥ सृजा वृष्टिं दिव आद्भिः समुद्रं पृण । अब्जा असि प्रथमजा बलमसि समुद्रियम् ॥ उन्नं भय पृथिवीं भिन्धीदं दिव्यं नभः ।

उद्रो दिव्यस्य नो देहीशानो वि सृजा दृतिम् ॥ ये देवा दिविभागा येऽन्तरिक्षभागा ये पृथिविभागाः । त इमं यज्ञमवन्तु त इदं क्षेत्रमा विशन्तु त इदं क्षेत्रमनु वि विशन्तु ॥ २। ४। ८॥
यन्ति देवा वि॑ँशतिश्च ॥ २। ४। ८॥
२३ मारुतमसि मरुतामोज इति कृष्णं वासः कृष्णतूषं परि धत्त एतद्वै वृष्ट्यै रूपꣳ सरूप एव भूत्वा पर्जन्यं वर्षयति रमयत मरुतः श्येनमायिनमिति पश्चाद्वातं प्रति मीवति पुरोवातमेव जनयति वर्षस्यावरुद्ध्यै वातनामानि जुहोति वायुर्वै वृष्ट्या ईशे वायुमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यं वर्षयत्यष्टौ
२४ जुहोति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव वृष्टिꣳ सं प्र च्यावयति कृष्णाजिने सं यौति हविरेवाकरन्तर्वेदि सं यौत्यवरुद्ध्यै यतीनामद्यमानानाꣳ शीर्षाणि परापतन्ते खर्जूरा अभवन्तेषाꣳ रस ऊर्ध्वोऽपतत्तानि करीराण्यभवन्थ्सौम्यानि वै करीराणि सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति यत्करीराणि भवन्ति
२५ सौम्ययैवाहुत्या दिवो वृष्टिमव रुन्धे मधुषा सं यौत्यपां वा एष ओषधीनाꣳ रसो यन्मध्वद्य एवौषधीभ्यो वर्षत्यथो अद्य एवौषधीभ्यो वृष्टिं नि नयति मान्दा वाशा इति सं यौति नामधेयैरेवैना अच्छैत्यथो यथा ब्रूयादसावेहीत्येवमेवैना नामधेयैरा
२६ च्यावयति वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामीत्याह वृषा वा अश्वो वृषा पर्जन्यः कृष्ण इव खलु वै भूत्वा वर्षति रूपेणैवैनꣳ समर्धयति वर्षस्यावरुद्ध्यै ॥ २। ४। ९॥ अष्टौ भवति नामधेयैरेकान्न त्रिꣳशच्च ॥ २। ४। ९॥
२७ देवा वसव्या देवाः शर्मण्या देवाः सपीतय इत्या बध्नाति देवताभिरेवान्वहं वृष्टिमिच्छति यदि वर्षेत्तावत्येव होतव्यं यदि न वर्षेच्छ्वो भूते हविर्निर्वपेदहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षति नक्तं वा हि दिवा वा वर्षति मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा
२८ अहोरात्राभ्यां पर्जन्यं वर्षयतोऽग्नये धामच्छदे पुरोडाशमष्टाकपालं निर्वपेन्मारुतꣳ सप्तकपालꣳ सौर्यमेककपालमग्निर्वा इतो वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति यदा खलु वा असावादित्यो न्यङ्ङ्रश्मिभिः पर्यावर्ततेऽथ वर्षति धामच्छदिव खलु वै भूत्वा वर्षत्येता वै देवता वृष्ट्या ईशते ता एव स्वेन भागधेयेनोप धावति ता
२९ एवास्मै पर्जन्यं वर्षयन्त्युतावर्षिष्यन्वर्षत्येव सृजा वृष्टिं दिव आद्भिः समुद्रं पृणेत्याहेमाश्चैवामूश्चापः समर्धयत्यथो आभिरेवामूरच्छैत्यब्जा असि प्रथमजा बलमसि

समुद्रियमित्याह यथायजुरेवैतदुन्नं भय पृथिवीमिति वर्षाह्वां जुहोत्येषा वा ओषधीनां वृष्टिवनिस्तयैव वृष्टिमा च्यावयति ये देवा दिविभागा इति कृष्णाजिनमव धूनोतीम एवास्मै लोकाः प्रीता अभीष्टा भवन्ति ॥ २। ४। १०॥ अस्मै धावति ता वा एकविꣳशतिश्च ॥ २। ४। १०॥

३० सर्वाणि छन्दाग्स्येतस्यामिष्ट्यामनूच्यानीत्याहुस्त्रिष्टुभो वा एतद्वीर्यं यत् ककुदुष्णिहा जगत्यै यदुष्णिह ककुभावन्वाह तेनैव सर्वाणि छन्दाग्स्यव रुन्धे गायत्री वा एषा यदुष्णिहा यानि चत्वार्यध्यक्षराणि चतुष्पाद एव ते पशवो यथा पुरोडाशे पुरोडाशोऽध्येवमेव तद्यदृच्यध्यक्षराणि यज्ञगत्या

३१ परिदध्यादन्तं यज्ञं गमयेत्त्रिष्टुभा परि दधातींद्रियं वै वीर्यं त्रिष्टुगिंद्रिय एव वीर्ये यज्ञं प्रति ष्ठापयति नान्तं गमयत्यग्ने त्री ते वाजिना त्री षधस्थेति त्रिवत्या परि दधाति सरूपत्वाय सर्वो वा एष यज्ञो यत्त्रैधातवीयं कामायकामाय प्र युज्यते सर्वेभ्यो हि कामेभ्यो यज्ञः प्रयुज्यते त्रैधातवीयेन यजेताभिचरन्थ्सर्वो वा

३२ एष यज्ञो यत्त्रैधातवीयꣳ सर्वेणैवैनं यज्ञेनाभि चरति स्तृणुत एवैनमेतयैव यजेताभिचर्यमाणः सर्वो वा एष यज्ञो यत्त्रैधातवीयꣳ सर्वेणैव यज्ञेन यजते नैनमभिचरन्थ्स्तृणुत एतयैव यजेत सहस्रेण यक्ष्यमाणः प्रजातमेवैनद्ददात्येतयैव यजेत सहस्रेणेजानोऽन्तं वा एष पशूनां गच्छति

३३ यः सहस्रेण यजतेप्रजापतिः खलु वै पशूनसृजत ताग् स्त्रैधातवीयेनैवासृजत य एवं विद्वाग् स्त्रैधातवीयेन पशुकामो यजते यस्मादेव योनेः प्रजापतिः पशूनसृजत तस्मादेवैनान्थ्सृजत उपैनमुत्तरꣳ सहस्रं नमति देवताभ्यो वा एष आ वृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत सर्वो वा एष यज्ञो

३४ यत्त्रैधातवीयꣳ सर्वेणैव यज्ञेन यजते न देवताभ्य आ वृश्च्यते द्वादशकपालः पुरोडाशो भवति ते त्रयश्चतुष्कपालात् त्रिष्षमृद्धत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्या उत्तरौत्तरो ज्यायान्भवत्येवमिव हीमे लोका यवमयो मध्य एतद्वा अन्तरिक्षस्य रूपꣳ समृद्ध्यै सर्वेषामभि गमयन्नवद्यत्यच्छंबट्कारꣳ हिरण्यं ददाति तेज एवा

३५ ऽव रुन्धे तार्प्यं ददाति पशूनेवाव रुन्धे धेनुं ददात्याशिष एवाव रुन्धे साम्नो वा एष वर्णो यद्धिरण्यं यजुषां तार्प्यमुक्थामदानां धेनुरेतानेव सर्वान्वर्णानव रुन्धे ॥ २। ४। ११॥

जगत्याभिचरन्थ्सर्वो वै गच्छति यज्ञस्तेज एव त्रिꣳशच्च ॥ २। ४। ११॥

३६ त्वष्टा हतपुत्रो वींद्रꣳ सोममाहरत्तस्मिन्निंद्र उपहवमैच्छत तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोमममपिबत्तस्य यदत्यशिष्यत तत्त्वष्टाहवनीयमुप प्रावर्तयथ्स्वाहेंद्रशत्रुर्वर्धस्वेति स यावदूर्ध्वः पराविध्यति तावति स्वयमेव व्यरमत यदि वा तावत्प्रवणमा

३७ ऽसीद्यदि वा तावदध्यग्नेरासीथ्स संभवन्नग्नीषोमावभि समभवथ्स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमा३ꣳ ल्लोकानवृणोद्यदिमा३ꣳ ल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वं तस्मादिंद्रोऽबिभेदपि त्वष्टा तस्मै त्वष्टा वज्रमसिञ्चत्तपो वै स वज्र आसीत्तमुद्यन्तुं नाशक्नोदथ वै तर्हि विष्णु

३८ रन्या देवताऽसीथ्सोऽब्रवीद्विष्णवेहीदमा हरिष्यावो येनायमिदमिति स विष्णुस्त्रेधात्मानं वि न्यधत्त पृथिव्यां तृतीयमन्तरिक्षे तृतीयं दिवि तृतीयमभि पर्यावर्ताद्धि बिभेद्यत् पृथिव्यां तृतीयमासीत् तेनेंद्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं

३९ मयि वीर्यं तत्ते प्र दास्यामीति तदस्मै प्रायच्छत्तत्प्रत्यगृह्णादधा मेति तद्विष्णवेति प्रायच्छत्तद्विष्णुः प्रत्यगृह्णादस्मास्विंद्र इंद्रियं दधात्विति यदन्तरिक्षे तृतीयमासीत्तेनेंद्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं

४० मयि वीर्यं तत्ते प्र दास्यामीति तदस्मै प्रायच्छत् तत्प्रत्यगृह्णाद्द्विर्माधा इति तद्विष्णवेति प्रायच्छत्तद्विष्णुः प्रत्यगृह्णादस्मास्विंद्र इंद्रियं दधात्विति यद्दिवि तृतीयमासीत्तेनेंद्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हार्येनाह

४१ मिदमस्मि तत्ते प दास्यामीति त्वी(३) इत्यब्रवीथ्संधां तु सं दधाव है त्वामेव प्र विशानीति यन्मां प्रविशेः किं मा भुञ्ज्या इत्यब्रवीत्त्वामेवेन्धीय तव भोगाय त्वां प्र विशेयमित्यब्रवीत्तम् वृत्रः प्राविशदुदरं वै वृत्रः, क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो

४२ य एवं वेद हन्ति क्षुधं भ्रातृव्यं तदस्मै प्रायच्छत्तत्प्रत्यगृह्णात्त्रिर्माधा इति तद्विष्णवेति प्रायच्छत्तद्विष्णुः प्रत्यगृह्णादस्मास्विंद्र इंद्रियं दधात्विति यत्त्रिः प्रायच्छत्त्रिः प्रत्यगृह्णात्तत्त्रिधातोस्त्रिधातुत्वं यद्विष्णुरन्वतिष्ठत विष्णवेति प्रायच्छत्तस्मादैंद्रावैष्णवꣳ हविर्भवति यद्वा इदं किं च तदस्मै तत्प्रायच्छदृचः सामानि यजूꣳषि सहस्रं वा अस्मै तत्प्रायच्छत्तस्माथ्सहस्रदक्षिणम् ॥

२। ४। १२॥ प्रवणं विष्णुर्वा इदमिदमहं यो भवत्येकवि॒ँ॒शतिश्च ॥
२। ४। १२॥
४३ देवा वै राजन्याज्जायमानादबिभयुस्तमन्तरेव सन्तं दाम्नापौंभन्त्स वा एषोऽपोंब्धो जायते यद्राजन्यो यद्वा एषोऽनपोब्धो जायेत वृत्रान् घ्न२ँ॒श्चरेद्यं कामयेत राजन्यमनपोब्धो जायेत वृत्रान्घ्न२ँ॒श्चरेदिति तस्मा एतमैंद्राबार्हस्पत्यं चरुं निर्वपेदैंद्रो वै राजन्यो ब्रह्म बृहस्पतिर्ब्रह्मणैवैनं दाम्नोऽपोंभनान्मुञ्चति हिरण्मयं दाम दक्षिणा साक्षादेवैनं दाम्नोऽपोंभनान्मुञ्चति ॥ २। ४। १३॥ एनं द्वादश च ॥ २। ४। १३॥
४४ नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे । भागं देवेभ्यो वि दधात्यायन् प्र चंद्रमास्तिरति दीर्घमायुः ॥ यमादित्या अ॒ँ॒शुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति । तेन नो राजा वरुणो बृहस्पतिरा प्याययन्तु भुवनस्य गोपाः ॥ प्राच्यां दिशि त्वमिंद्रासि राजोतोदीच्यां वृत्रहन्वृत्रहासि । यत्र यन्ति स्रोत्यास्त
४५ ज्जितं ते दक्षिणतो वृषभ एधि हव्यः । इंद्रो जयाति न परा जयाता अधिराजो राजसु राजयाति । विश्वा हि भूयाः पृतना अभिष्टीरुपसद्यो नमस्यो यथासत् ॥ अस्येदेव प्र रिरिचे महित्वं दिवः पृथिव्याः पर्यन्तरिक्षात् । स्वराडिंद्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय । अभि त्वा शूर नोनुमो ऽदुग्धा इव धेनवः । ईशान
४६ मस्य जगतः सुवर्दृशमीशानमिंद्र तस्थुषः ॥ त्वामिद्धि हवामहे साता वाजस्य कारवः । त्वां वृत्रेष्विंद्र सत्पतिं नरस्त्वां काष्ठास्ववर्वतः ॥ यद्याव इंद्र ते शत॒ँ॒ शतं भूमीरुत स्युः । न त्वा वज्रिन्त्सहस्र॒ँ॒ सूर्या अनु न जातमष्ट रोदसी ॥ पिबा सोममिंद्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ॥
४७ सोतुर्बाहुभ्या॒ँ॒ सुयतो नार्वा ॥ रेवतीर्नः सधमाद इंद्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥ उदग्ने शुचयस्तव वि ज्योतिषोदु त्यं जातवेदस॒ँ॒ सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्ष॒ँ॒ सूर्य आत्मा जगतस्तस्थुष
४८ श्च ॥ विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः ॥ विश्वे देवाः शृणुतेम॒ँ॒ हवं मे ये अन्तरिक्षे य उप द्यविष्ठ । ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥
२। ४। १४॥ तदीशानमद्रिस्तस्थुषस्त्रि॒ँ॒शच्च ॥ २। ४। १४॥
देवा मनुष्या देवासुरा अब्रुवन्देवासुरास्तेषां गायत्री प्रजापतिस्ता यत्राग्ने गोभिश्चित्रया

मारुतं देवा वसव्या अग्ने मारुतमिति देवा वसव्या देवाः शर्मण्याः सर्वाणि त्वष्टा
हतपुत्रो देवा वै राजन्यान्नवोनवश्चतुर्दश ॥
देवा मनुष्याः प्रजां पशून्देवा वसव्याः परिदध्यादिदमस्म्यष्टाचत्वारिꣳशत् ॥
देवा मनुष्या मादयध्वम् ॥

## द्वितीयकाण्डे पञ्चमः प्रश्नः ५

१ विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीथ्स्वस्रीयोऽसुराणां तस्य त्रीणि
शीर्षाण्यासन्थ्सोमपानꣳसुरापानमन्नादनꣳ स प्रत्यक्षं देवेभ्यो भागमवदत्परोऽक्षमसुरेभ्यः
सर्वस्मै वै प्रत्यक्षं भागं वदन्ति यस्मा एव परोऽक्षं वदन्ति तस्य
भाग उदितस्तस्मादिंद्रोऽबिभेदीदृङ्वै राष्ट्रं वि पर्यावर्तयतीति तस्य वज्रमादाय
शीर्षाण्यच्छिनद्यथ्सोमपान
२ मासीथ्स कपिञ्जलोऽभवद्यथ्सुरापानꣳ स कलविङ्को यदन्नादनꣳ स
तित्तिरिस्तस्याञ्जलिना ब्रह्महत्यामुपागृह्णात्ताꣳ संवथ्सरमबिभस्तं भूतान्यभ्यक्रोशन्
ब्रह्महन्निति स पृथिवीमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृहाणेति साब्रवीद्वरं वृणै
खातात् पराभविष्यन्ती मन्ये ततो मा परा भूवमिति पुरा ते
३ संवथ्सरादपि रोहादित्यब्रवीत् तस्मात्पुरा संवथ्सरात् पृथिव्यै खातमपि रोहति
वारेवृतग्ग् ह्यस्यै तृतीयं ब्रह्महत्यायै प्रत्यगृह्णात् तथ्स्वकृतमिरिणमभवत् तस्मादाहिताग्निः
श्रद्धादेवः स्वकृत इरिणे नाव स्येद्ब्रह्महत्यायै ह्येष वर्णः स वनस्पतीनुपासीददस्यै
ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति तेऽब्रुवन्वरं वृणामहै वृक्णात्
४ पराभविष्यन्तो मन्यामहे ततो मा परा भूमेत्याव्रश्चनाद्वो भूयाꣳस उत्तिष्ठानित्यब्रवीत्
तस्मादाव्रश्चनाद् वृक्षाणां भूयाꣳस उत्तिष्ठन्ति वारेवृतग्ग् ह्येषां तृतीयं ब्रह्महत्यायै
प्रत्यगृह्णन्थ्स निर्यासोऽभवत् तस्मान्निर्यासस्य नाश्यं ब्रह्महत्यायै ह्येष वर्णोऽथो खलु
य एव लोहितो यो वाव्रश्चनान्निर्येषति तस्य नाश्यं
५ काममन्यस्य स स्त्रीषꣳसादमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति
ता अब्रुवन्वरं वृणामहा ऋत्वियात्प्रजां विन्दामहै काममा विजनितोः संभवामेति
तस्मादृत्वियाथ्स्त्रियः प्रजां विन्दन्ते काममा विजनितोः संभवन्ति वारेवृतग्ग् ह्यासां
तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्थ्सा मलवद्वासा अभवत् तस्मान्मलवद्वाससा न सं वदेत
६ न सहासीत नास्या अन्नमद्याद् ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्यास्तेऽथो

खल्वाहुरभ्यञ्जनं वाव स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्यं काममन्यदिति यां मलवद्वाससꣳ संभवन्ति यस्ततो जायते सोऽभिशस्तो यामरण्ये तस्यै स्तेनो यां पराचीं तस्यै ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको या
७ ऽभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी याङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि निकृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुꣳ सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पिबेदखर्वेण वा पात्रेण प्रजायै गोपीथाय ॥ २। ५। १॥ यथ्सोमपानं ते वृक्णात्तस्य नाश्यं वदेत मारुको याखर्वेण वा त्रीणि च ॥ २। ५। १॥
८ त्वष्टा हतपुत्रो वींद्रꣳ सोममाहरत् तस्मिन्निंद्र उपहवमैच्छत तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टाहवनीयमुप प्रावर्तयथ् स्वाहेंद्रशत्रुर्वर्धस्वेति यदवर्तयत् तद्वृत्रस्य वृत्रत्वं यदब्रवीथ् स्वाहेंद्रशत्रुर्वर्धस्वेति तस्मादस्ये
९ न्द्रः शत्रुरभवथ्स संभवन्नग्नीषोमावभि समभवथ्स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमा३ꣳ ल्लोकानवृणोद्यदिमा३ꣳ ल्लोकानवृणोत् तद् वृत्रस्य वृत्रत्वं तस्मादिंद्रोऽबिभेथ्स प्रजापतिमुपाधावच्छत्रुर्मेऽजनीति तस्मै वज्रꣳ सिक्त्वा प्रायच्छदेतेन जहीति तेनाभ्यायत तावब्रूतामग्नीषोमौ मा
१० प्र हारावमन्तः स्व इति मम वै युव२ꣳ स्थ इत्यब्रवीन्मामभ्येतमिति तौ भागधेयमैच्छेतां ताभ्यामेतमग्नी षोमीयमेका दशकपालं पूर्णमासे प्रायच्छत् तावब्रूतामभि संदष्टौ वै स्वो न शक्नुव ऐतुमिति स इंद्र आत्मनः शीतरूरावजनयत् तच्छीतरूरयोर्जन्म य एवꣳ शीतरूरयोर्जन्म वेद
११ नैनꣳ शीतरूरौ हतस्ताभ्यामेनमभ्य नयत् तस्माज्जञ्जभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहितां प्राणो वै दक्षोऽपानः क्रतुस्तस्माज्जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू इति प्राणापानावेवात्मन्धत्ते सर्वमायुरेति स देवता वृत्रान्निर्हूय वार्त्रघ्नꣳ हविः पूर्णमासे निरवपद्घ्नन्ति वा एनं पूर्णमास आ
१२ ऽमावास्यायां प्याययन्ति तस्माद्वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायां तथ्सगग् स्थाप्य वार्त्रघ्नꣳ हविर्वज्रमादाय पुनरभ्यायत ते अब्रूतां द्यावापृथिवी मा प्र हारावयोर्वै श्रित इति ते अब्रूतां वरं वृणावहै नक्षत्र विहिताहमसानीत्यसावब्रवीच्चित्र

विहिताहमितीयं तस्मान्नक्षत्र विहितासौ चित्रविहितेऽयं य एवं द्यावापृथिव्यो
१३ र्वरं वेदैनं वरो गच्छति स आभ्यामेव प्रसूत इंद्रो वृत्रमहन्ते देवा वृत्रꣳ
हत्वाग्नीषोमावब्रुवन्, हव्यं नो वहतमिति तावब्रूतामपतेजसौ वै त्यौ वृत्रे वै त्ययोस्तेज
इति तेऽब्रुवन्क इदमच्छैतीति गौरित्यब्रुवन्गौर्वाव सर्वस्य मित्रमिति साब्रवीद्
१४ वरं वृणै मय्येव सतोऽभयेन भुनजाध्वा इति तद्गौराहरत् तस्माद्गवि सतोऽभयेन भुञ्जत
एतद्वा अग्नेस्तेजो यद्घृतमेतथ्सोमस्य यत्पयो य एवमग्नीषोमयोस्तेजो वेद तेजस्व्येव
भवति ब्रह्मवादिनो वदन्ति किंदेवत्यं पौर्णमासमिति प्राजापत्यमिति ब्रूयात्तेनेंद्रं ज्येष्ठं
पुत्रं निरवासाययदिति तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्ति ॥
२। ५। २॥ अस्य मा वेदा द्यावापृथिव्योरब्रवीदिति तस्माच्चत्वारि च ॥
२। ५। २॥
१५ इंद्रं वृत्रं जघ्निवाꣳ सं मृधोऽभि प्रावेपन्त स एतं वैमृधं पूर्णमासेऽनु निर्वाप्यमपश्यत्
तं निरवपत् तेन वै स मृधोऽपाहत यद्वैमृधः पूर्णमासेऽनु निर्वाप्यो भवति मृध एव तेन
यजमानोऽप हत इंद्रो वृत्रꣳ हत्वा देवताभिश्चेंद्रियेण च व्यार्ध्यत स एतमाग्नेयमष्टा
कपालममावास्यायामपश्यदैंद्रं दधि
१६ तं निरवपत्तेन वै स देवताश्चेंद्रियं चावारुन्ध यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवत्यैंद्रं
दधि देवताश्चैव तेनेंद्रियं च यजमानोऽव रुन्ध इंद्रस्य वृत्रं जघ्नुष इंद्रियं वीर्यं पृथिवीमनु
व्यार्च्छत्तदोषधयो वीरुधोऽभवन्थ्स प्रजापतिमुपाधावद्वृत्रं मे जघ्नुष इंद्रियं वीर्यं
१७ पृथिवीमनु व्यारत्तदोषधयो वीरुधोऽभूवन्निति स प्रजापतिः पशूनब्रवीदेतदस्मै सं
नयतेति तत्पशव ओषधीभ्योऽध्यात्मन्थ्समनयन् तत्प्रत्यदुहन्, यथ्समनयन् तथ्सांनाय्यस्य
सांनाय्यत्वं यत्प्रत्यदुहन् तत्प्रतिधुषः प्रतिधुक्त्वꣳ समनैषुः प्रत्यधुक्षन्न तु मयि श्रयत
इत्यब्रवीदेतदस्मै
१८ शृतं कुरुतेत्यब्रवीत्तदस्मै शृतमकुर्वन्निंद्रियं वावास्मिन्वीर्यं तदश्रयन्तच्छृतस्य शृतत्वꣳ
समनैषुः प्रत्यधुक्षञ्छृतमक्रन्न तु मा धिनोतीत्यब्रवीदेतदस्मै दधि कुरुतेत्यब्रवीत्तदस्मै
दध्यकुर्वन्तदेनमधिनोत्तद्दध्नो दधित्वं ब्रह्मवादिनो वदन्ति दध्नः पूर्वस्यावदेयं
१९ दधि हि पूर्वं क्रियत इत्यनादृत्य तच्छृतस्यैव पूर्वस्यावद्येदिंद्रियमेवास्मिन् वीर्यꣳ
श्रित्वा दध्नोपरिष्टाद्धिनोति यथापूर्वमुपैति यत्पूतीकैर्वा पर्णवल्कैर्वातञ्च्याथ्सौम्यं तद्यत्क्वलै
राक्षसं तद्यत्तण्डुलैर्वैश्वदेवं तद्यदातञ्चनेन मानुषं तद्यद्दध्ना तथ्सेंद्रं दध्नातनक्ति
२० सेंद्रत्वायाग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संतत्या इंद्रो वृत्रꣳ हत्वा परां

परावर्तमगच्छदपाराधमिति मन्यमानस्तं देवताः प्रैषमैच्छन्थ्सोऽब्रवीत्प्रजापतिर्यः प्रथमोऽनु विन्दति तस्य प्रथमं भागधेयमिति तं पितरोऽन्वविन्दन्तस्मात्पितृभ्यः पूर्वेद्युः क्रियते सोऽमावास्यां प्रत्यागच्छत्तं देवा अभि समगच्छन्तामा वै नो
२१ ऽद्य वसु वसतीतींद्रो हि देवानां वसु तदमावास्याया अमावास्यत्वं ब्रह्मवादिनो वदन्ति किंदेवत्यꣳ सांनाय्यमिति वैश्वदेवमिति ब्रूयाद्विश्वे हि तद्देवा भागधेयमभि समगच्छन्तेत्यथो खल्वैंद्रमित्येव ब्रूयादिंद्रं वाव ते तद्भिषज्यन्तोऽभि समगच्छन्तेति ॥ २। ५। ३॥ दधि मे जघ्नुष इंद्रियं वीर्यमित्यब्रवीदेतदस्मा अवदेयं तनक्ति नो द्विचत्वारिꣳशच्च ॥ २। ५। ३॥
२२ ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासौ यजेत य एनौ सेंद्रौ यजेतेति वैमृधः पूर्णमासेऽनु निर्वाप्यो भवति तेन पूर्णमासः सेंद्र ऐंद्रं दध्यमावास्यायां तेनामावास्या सेंद्रा य एवं विद्वान्दर्शपूर्णमासौ यजते सेंद्रावेवैनौ यजते श्वःश्वोऽस्मा ईजानाय वसीयो भवति देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता
२३ मिष्टिमपश्यन्नाग्नावैष्णवमेकादशकपालꣳ सरस्वत्यै चरुꣳ सरस्वते चरुं तां पौर्णमासꣳ सग्ग्स्थाप्यानु निरवपन्ततो देवा अभवन् परासुरा यो भ्रातृव्यवान्थ्स्यात्स पौर्णमासꣳ सग्ग्स्थाप्यैतामिष्टिमनु निर्वपेत् पौर्णमासेनैव वज्रं भ्रातृव्याय प्रहृत्याग्नावैष्णवेन देवताश्च यज्ञं च भ्रातृव्यस्य वृङ्क्ते मिथुनान् पशून्थ्सारस्वताभ्यां यावदेवास्यास्ति तथ्
२४ सर्वं वृङ्क्ते पौर्णमासीमेव यजेत भ्रातृव्यवान्नामावास्याꣳ हत्वा भ्रातृव्यं नाप्याययति साकं प्रस्थायीयेन यजेत पशुकामो यस्मै वा अल्पेनाहरन्ति नात्मना तृप्यति नान्यस्मै ददाति यस्मै महता तृप्यत्यात्मना ददात्यन्यस्मै महता पूर्णꣳ होतव्यं तृप्त एवैनमिंद्रः प्रजया पशुभिस्तर्पयति दारुपात्रेण जुहोति न हि मृन्मयमाहुतिमानश औदुंबरं
२५ भवत्यूर्ग्वा उदुंबर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे नागतश्रीर्महेंद्रं यजेत त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यस्तेषां महेंद्रो देवता यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान्भवति संवथ्सरमिंद्रं यजेत संवथ्सरꣳ हि व्रतं नाति स्वै
२६ वैनं देवतेज्यमाना भूत्या इन्धे वसीयान्भवति संवथ्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेथ्संवथ्सरमेवैनं वृत्रं जघ्निवाꣳ समग्निर्व्रतपतिर्व्रतमा लंभयति ततोऽधि कामं यजेत ॥ २। ५। ४॥

एतां तदौदुंबरग्ग् स्वा त्रिꣳशच्च ॥ २। ५। ४॥
२७ नासोमयाजी सं नयेदनागतं वा एतस्य पयो योऽसोमयाजी यदसोमयाजी सं नयेत्परिमोष एव सोऽनृतं करोत्यथो परैव सिच्यते सोमयाज्येव सं नयेत्पयो वै सोमः पयः सांनाय्यं पयसैव पय आत्मन्धत्ते वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा
२८ अभ्युदेति त्रेधातण्डुलान्वि भजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दध२ꣳश्चरुं येऽणिष्ठास्तान्, विष्णवे शिपिविष्टाय शृते चरुमग्निरेवास्मै प्रजां प्रजनयति वृद्धामिंद्रः प्र यच्छति यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति न द्वे
२९ यजेत यत्पूर्वया संप्रति यजेतोत्तरया छंबट्कुर्याद्यदुत्तरया संप्रति यजेत पूर्वया छंबट्कुर्यान्नेष्टिर्भवति न यज्ञस्तदनु ह्रीत मुख्यपगल्भो जायत एकामेव यजेत प्रगल्भोऽस्य जायतेऽनादृत्य तद्द्वे एव यजेत यज्ञमुखमेव पूर्वयालभते यजत उत्तरया देवता एव पूर्वयावरुन्ध इंद्रियमुत्तरया देवलोकमेव
३० पूर्वयाभिजयति मनुष्यलोकमुत्तरया भूयसो यज्ञक्रतूनुपैत्येषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चंद्रमा अभ्युदेत्यस्मिन्नेवास्मै लोकेऽर्धुकं भवति दाक्षायणयज्ञेन सुवर्गकामो यजेत पूर्णमासे सं नयेन् मैत्रा वरुण्यामिक्षयामावास्यायां यजेत पूर्णमासे वै देवानाꣳसुतस्तेषामेतमर्धमासं प्रसुतस्तेषां मैत्रावरुणी वशामावास्यायामनूबन्ध्या यत्
३१ पूर्वेद्युर्यजते वेदिमेव तत्करोति यद्वथ्सानपा करोति सदोहविर्धाने एव सं मिनोति यद्यजते देवैरेव सुत्याꣳ संपादयति स एतमर्धमासꣳ सधमादं देवैः सोमं पिबति यन्मैत्रा वरुण्यामिक्षयामा वास्यायां यजते यैवासौ देवानां वशानूबन्ध्या सो एवैषेतस्य साक्षाद्वा एष देवानभ्यारोहति य एषां यज्ञ
३२ मभ्यारोहति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान्भवति यदि नावविध्यति सदृङ्ख्यावृत्काम एतेन यज्ञेन यजेत क्षुरपविर्ह्येष यज्ञस्ताजक् पुण्यो वा भवति प्र वा मीयते तस्यैतद्व्रतं नानृतं वदेन्न माꣳसमश्नीयान्न स्त्रियमुपेयान्नास्य पल्पूलनेन वासः पल्पूलयेयुरेतद्धि देवाः सर्वं न कुर्वन्ति ॥ २। ५। ५॥ चंद्रमा द्वे देवलोकमेव यद्यज्ञं पल्पूलयेयुष्षट्च ॥ २। ५। ५॥
३३ एष वै देवरथो यद्दर्शपूर्णमासौ यो दर्शपूर्णमासाविष्ट्वा सोमेन यजते रथस्पष्ट

एवावसाने वरे देवानामव स्यत्येतानि वा अङ्गापरूꣳषि संवथ्सरस्य यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजतेऽङ्गापरूꣳष्येव संवथ्सरस्य प्रति दधात्येते वै संवथ्सरस्य चक्षुषी यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते ताभ्यामेव सुवर्गं लोकमनु पश्य
३४ त्येषा वै देवानां विक्रान्तिर्यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते देवानामेव विक्रान्तिमनु वि क्रमत एष वै देवयानः पन्था यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते य एव देवयानः पन्थास्तꣳ समारोहत्येतौ वै देवानाꣳ हरी यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते यावेव देवानाꣳ हरी ताभ्यां
३५ मेवैभ्यो हव्यं वहत्येतद्वै देवानामास्यं यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते साक्षादेव देवानामास्ये जुहोत्येष वै हविर्धानी यो दर्शपूर्णमास याजी सायं प्रातरग्निहोत्रं जुहोति यजते दर्शपूर्ण मासावहरहर् हविर्धानिनाꣳ सुतो य एवं विद्वान् दर्शपूर्णमासौ यजते हविर्धान्यस्मीति सर्वमेवास्य बर्हिष्यं दत्तंभवति देवा वा अह
३६ र्यज्ञियं नाविन्दन्ते दर्शपूर्णमासावपुनन्तौ वा एतौ पूतौ मेध्यौ यद्दर्शपूर्णमासौ य एवं विद्वान् दर्शपूर्णमासौ यजते पूतावेवैनौ मेध्यौ यजते नामावास्यायां च पौर्णमास्यां च स्त्रियमुपेयाद्यदुपेयान्निरिंद्रियः स्याथ्सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन्तासाममावास्यां च पौर्णमासीं च नोपैत्
३७ ते एनमभि समनह्येतां तं यक्ष्म आर्च्छद्राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत्पापीयानभवत् तत्पापयक्ष्मस्य यज्जायाभ्यामविन्दत् तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एते एव नमस्यन्नुपाधावत्ते अब्रूतां वरं वृणावहा आवं देवानां भागधे असावा
३८ ऽवदधि देवा इज्यान्ता इति तस्माथ् सदृशीनाꣳ रात्रीणाममावास्यायां च पौर्णमास्यां च देवा इज्यन्त एते हि देवानां भागधे भागधा अस्मै मनुष्या भवन्ति य एवं वेद भूतानि क्षुधमघ्नन्थ्सद्यो मनुष्या अर्धमासे देवा मासि पितरः संवथ्सरे वनस्पतयस्तस्मादहरहर्मनुष्या अशनमिच्छन्तेऽर्धमासे देवा इज्यन्ते मासि पितृभ्यः क्रियते संवथ्सरे वनस्पतयः फलं गृह्णन्ति य एवं वेद हन्ति क्षुधं भ्रातृव्यम् ॥ २। ५। ६॥ पश्यति ताभ्यामहरेदसाव फलꣳ सप्त च ॥ २। ५। ६॥
३९ देवा वै नर्चि न यजुष्यश्रयन्त ते सामन्नेवाश्रयन्त हिं करोति सामैवाकर्हिं करोति यत्रैव देवा अश्रयन्त तत एवैनान् प्र युङ्क्ते हिं करोति वाच एवैष योगो हिं करोति प्रजा

एव तद्यजमानः सृजते त्रिः प्रथमामन्वाह त्रिरुत्तमां यज्ञस्यैव तद्बर्सं
४० नह्यत्यप्रस्रꣳसाय संततमन्वाह प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै
राथंतरीं प्रथमामन्वाह राथंतरो वा अयं लोक इममेव लोकमभि जयति त्रिर्वि गृह्णाति
त्रय इमे लोका इमानेव लोकानभि जयति बार्हतीमुत्तमामन्वाह बार्हतो वा असौ
लोकोऽमुमेव लोकमभि जयति प्र वो
४१ वाजा इत्यनिरुक्तां प्राजापत्यामन्वाह यज्ञो वै प्रजापतिर्यज्ञमेव प्रजापतिमा रभते प्र
वो वाजा इत्यन्वाहान्नं वै वाजोऽन्नमेवाव रुन्धे प्र वो वाजा इत्यन्वाह तस्मात्प्राचीनꣳ
रेतो धीयतेऽग्न आ याहि वीतय इत्याह तस्मात्प्रतीचीः प्रजा जायन्ते प्र वो वाजा
४२ इत्यन्वाह मासा वै वाजा अर्धमासा अभिद्यवो देवा हविष्मन्तो गौर्घृताची
यज्ञो देवाञ्जिगाति यजमानः सुम्नयुरिदमसीदमसीत्येव यज्ञस्य प्रियं धामाव रुन्धे यं
कामयेत सर्वमायुरियादिति प्र वो वाजा इति तस्यानूच्याग्न आ याहि वीतय इति
संततमुत्तरमर्धर्चमा लभेत
४३ प्राणेनैवास्यापानं दाधार सर्वमायुरेति यो वा अरत्निꣳ सामिधेनीनां वेदारत्नावेव
भ्रातृव्यं कुरुतेऽर्धर्चौ सं दधात्येष वा अरत्निः सामिधेनीनां य एवं वेदारत्नावेव
भ्रातृव्यं कुरुत ऋषेर्ऋषेर्वा एता निर्मिता यथ्सामिधेन्यस्ता यदसंयुक्ताः स्युः प्रजया
पशुभिर्यजमानस्य वि तिष्ठेरन्नर्धर्चौ संदधाति सं युनक्त्येवैनास्ता अस्मै संयुक्ता अवरुद्धाः
सर्वामाशिषं दुह्रे ॥ २। ५। ७॥ बर्सं वो जायंते प्र वो वाजा लभेत दधाति सं दश
च ॥ २। ५। ७॥
४४ अयज्ञो वा एष योऽसामाऽग्न आ याहि वीतय इत्याह रथंतरस्यैष वर्णस्तं त्वा
समिद्भिरङ्गिर इत्याह वामदेव्यस्यैष वर्णो बृहदग्ने सुवीर्यमित्याह बृहत एष वर्णो यदेतं
तृचमन्वाह यज्ञमेव तथ्सामन्वन्तं करोत्यग्निरमुष्मि३ꣳल्लोक आसीदादित्योऽस्मिन्ताविमौ
लोकावशान्ता
४५ वास्तां ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यग्न आ याहि वीतय
इत्य३ꣳस्मिल्लोकेऽग्निमदधुर्बृहदग्ने सुवीर्यमित्यमुष्मि३ꣳल्लोक आदित्यं ततो वा इमौ
लोकावशाम्यतां यदेवमन्वाहानयोर्लोकयोः शान्त्यै शाम्यतोऽस्मा इमौ लोकौ य एवं
वेद पञ्चदश सामिधेनीरन्वाह पञ्चदश
४६ वा अर्धमासस्य रात्रयोऽर्धमासशः संवथ्सर आप्यते तासां त्रीणि च शतानि
षष्टिश्चाक्षराणि तावतीः संवथ्सरस्य रात्रयोऽक्षरश एव संवथ्सरमाप्नोति नृमेधश्च

परुच्छेपश्च ब्रह्मवाद्यमवदेतामस्मिन्दारावार्द्रेऽग्निं जनयाव यतरो नौ ब्रह्मीयानिति
नृमेधोऽभ्यवदथ्स धूममजनयत् परुच्छेपोऽभ्यवदत् सोऽग्निमजनयदृष इत्यब्रवीद्
४७ यथ्समावद्विद्व कथा त्वमग्निमजीजनो नाहमिति सामिधेनीनामेवाहं वर्णं
वेदेत्यब्रवीद्यद् घृतवत् पदमनूच्यते स आसां वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह
सामिधेनीष्वेव तज्ज्योतिर्जनयति स्त्रियस्तेन यदृच स्त्रियस्तेन यद्गायत्रियः स्त्रियस्तेन
यथ्सामिधेन्यो वृषण्वतीमन्वाह
४८ तेन पु२ꣳस्वतीस्तेन सेंद्रास्तेन मिथुना अग्निर्देवानां दूत आसीदुशना काव्योऽसुराणां
तौ प्रजापतिं प्रश्नमैताꣳ स प्रजापतिरग्निं दूतं वृणीमह इत्यभि पर्यावर्तत ततो देवा
अभवन्परासुरा यस्यैवं विदुषोऽग्निं दूतं वृणीमह इत्यन्वाह भवत्यात्मना परास्य भ्रातृव्यो
भवत्यध्वरवतीमन्वाह भ्रातृव्यमेवैतया
४९ ध्वरति शोचिष्केशस्तमीमह इत्याह पवित्रमेवैतद्यजमानमेवैतया पवयति समिद्धो
अग्न आहुतेत्याह परिधिमेवैतं परि दधात्यस्कन्दाय यदत ऊर्ध्वमभ्यादध्याद्यथा बहिः
परिधि स्कन्दति तादृगेव तत्त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणाꣳ
सहरक्षा असुराणां त एतर्ह्या शꣳसन्ते मां वरिष्यते मा
५० मिति वृणीध्वꣳ हव्यवाहनमित्याह य एव देवानां तं वृणीत आर्षेयं वृणीते बन्धोरेव
नैत्यथो संतत्यै परस्तादर्वाचो वृणीते तस्मात्परस्तादर्वाञ्चो मनुष्यान्पितरोऽनु प्र पिपते
॥
२। ५। ८॥ आशांतावाह पंचदशाब्रवीदन्वाहैतया वरिष्यते मामेकान्न त्रिꣳशच्च ॥ २।
५। ८॥
५१ अग्ने महाꣳ असीत्याह महान् ह्येष यदग्निर्ब्राह्मणेत्याह ब्राह्मणो ह्येष भारतेत्याहैष
हि देवेभ्यो हव्यं भरति देवेद्ध इत्याह देवा ह्येतमैन्धत मन्विद्ध इत्याह मनुर्ह्येतमुत्तरो
देवेभ्य ऐन्धर्षिष्टुत इत्याहर्षयो ह्येतमस्तुवन्विप्रानुमदित इत्याह
५२ विप्रा ह्येते यच्छुश्रुवाꣳसः कविशस्त इत्याह कवयो ह्येते यच्छुश्रुवाꣳसो
ब्रह्मसꣳशित इत्याह ब्रह्मसꣳशितो ह्येष घृताहवन इत्याह घृताहुतिर्ह्यस्य प्रियतमा
प्रणीर्यज्ञानामित्याह प्रणीर्ह्येष यज्ञानाꣳरथीरध्वराणामित्याहैष हि देवरथोऽतूर्तो होतेत्याह
न ह्येतं कश्चन
५३ तरति तूर्णिर्हव्यवाडित्याह सर्वग्ग् ह्येष तरत्यास्पात्रं जुहूर्देवानामित्याह जुहूर्ह्येष
देवानां चमसो देवपान इत्याह चमसो ह्येष देवपानोऽराꣳ इवाग्ने नेमिर्देवाग्स्त्वं

परिभूरसीत्याह देवान् ह्येष परिभूर्यद्ब्रूयादा वह देवान्देवयते यजमानायेति भ्रातृव्यमस्मै
५४ जनयेदा वह देवान्, यजमानायेत्याह यजमानमेवैतेन वर्धयत्यग्निमग्न आ वह सोममा
वहेत्याह देवता एव तद्यथापूर्वमुप ह्वयत आ चाग्ने देवान्, वह सुयजा च यज जातवेद
इत्याहाग्निमेव तथ्स२ꣳश्यति सोऽस्य सꣳशितो देवेभ्यो हव्यं वहत्यग्निर्होते
५५ त्याहाग्निर्वै देवानाꣳ होता य एव देवानाꣳ होता तं वृणीते स्मो
वयमित्याहात्मानमेव सत्त्वं गमयति साधु ते यजमान देवतेत्याहाशिषमेवैतामा शास्ते
यद्ब्रूयाद्योऽग्निꣳ होतारमवृथा इत्यग्निनोऽभयतो यजमानं परि गृह्णीयात् प्रमायुकः
स्याद्यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योऽपभृद्
५६ यद्वे इव ब्रूयाद्भ्रातृव्यमस्मै जनयेद्घृतवतीमध्वर्यो स्रुचमास्यस्वेत्याह यजमानमेवैतेन
वर्धयति देवायुवमित्याह देवान् ह्येषावति विश्ववारामित्याह विश्वग्ग् ह्येषावतीडामहै
देवाꣳ ईडेन्यान्नमस्याम नमस्यान् यजाम यज्ञियानित्याह मनुष्या वा ईडेन्याः पितरो
नमस्या देवा यज्ञिया देवता एव तद्यथाभागं यजति ॥
२। ५। ९॥ विप्रानुमदित इत्याह चनास्मै होतोपभृद्देवता एव त्रीणि च ॥ २। ५। ९॥
५७ त्रीग् स्तृचाननु ब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात्पुरुषा ब्राह्मणो वैश्यः
शूद्रस्तानेवास्मा अनुकान्करोति पञ्चदशानु ब्रूयाद्राजन्यस्य पञ्चदशो वै राजन्यः स्व
एवैनग्ग् स्तोमे प्रति ष्ठापयति त्रिष्टुभा परि दध्यादिंद्रियं वै त्रिष्टुगिंद्रियकामः खलु वै
राजन्यो यजते त्रिष्टुभैवास्मा इंद्रियं परि गृह्णाति यदि कामयेत
५८ ब्रह्मवर्चसमस्त्विति गायत्रिया परि दध्याद्ब्रह्मवर्चसं वै गायत्री ब्रह्मवर्चसमेव भवति
सप्तदशानु ब्रूयाद्वैश्यस्य सप्तदशो वै वैश्यः स्व एवैनग्ग् स्तोमे प्रतिष्ठापयति जगत्या
परि दध्याज्जागता वै पशवः पशुकामः खलु वै वैश्यो यजते जगत्यैवास्मै पशून्परि
गृह्णात्येकविꣳशतिमनु ब्रूयात् प्रतिष्ठा कामस्यैकविꣳशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्यै
५९ चतुर्विꣳशतिमनु ब्रूयाद्ब्रह्मवर्चसकामस्य चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं
गायत्रियैवास्मै ब्रह्मवर्चसमव रुन्धे त्रिꣳशतमनु ब्रूयादन्नकामस्य त्रिꣳशदक्षरा
विराडन्नं विराड्विराजैवास्मा अन्नाद्यमव रुन्धे द्वात्रिꣴशतमनु ब्रूयात्प्रतिष्ठाकामस्य
द्वात्रिꣴशदक्षरानुष्टुगनुष्टुप् छन्दसां प्रतिष्ठा प्रतिष्ठित्यै षड्विꣴशतमनु ब्रूयात्पशुकामस्य
षड्विꣴशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशू
६० नव रुन्धे चतुश्चत्वारिꣳशतमनु ब्रूयादिंद्रियकामस्य चतुश्चत्वारिꣳशदक्षरा

त्रिष्टुगिंद्रियं त्रिष्टुप्त्रिष्टुभैवास्मा इंद्रियमव रुन्धेऽष्टाचत्वारिꣳ शतमनु ब्रूयात्पशुकामस्याष्टाचत्वारिꣳ श
जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धे सर्वाणि छन्दाग्स्यनु ब्रूयाद्बहुयाजिनः
सर्वाणि वा एतस्य छन्दाग्स्यवरुद्धानि यो बहुयाज्यपरिमितमनु ब्रूयादपरिमितस्यावरुद्ध्यै
॥ २। ५। १०॥ कामयेत प्रतिष्ठित्यै पशून्थ्सप्त चत्वारिꣳ शच्च ॥ २। ५। १०॥

६१ निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानामुप व्ययते देवलक्ष्ममेव तत्कुरुते तिष्ठन्नन्वाह तिष्ठन् ह्याश्रुततरं वदति तिष्ठन्नन्वाह सुवर्गस्य लोकस्याभिजित्या आसीनो यजत्यस्मिन्नेव लोके प्रतितिष्ठति यत्क्रौञ्चमन्वाहासुरं तद्यन्मंद्रं मानुषं तद्यदन्तरा तथ्सदेवमन्तरानूच्यꣳ सदेवत्वाय विद्वाꣳ सो वै

६२ पुरा होतारोऽभूवन्तस्माद्विधृता अध्वानोऽभूवन्न पन्थानः समरुक्षन्नन्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्योऽथान्वाहाध्वनां विधृत्यै पथामसꣳरोहायाथो भूतं चैव भविष्यच्चाव रुन्धेऽथो परिमितं चैवापरिमितं चाव रुन्धेऽथो ग्राम्याग्श्चैव पशूनारण्याग्श्चाव रुन्धेऽथो

६३ देवलोकं चैव मनुष्यलोकं चाभि जयति देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्थ्स प्रजापतिस्तूष्णीमाघारमाऽघारयत्ततो वै देवा यज्ञमन्वपश्यन् यत्तूष्णीमाघारमाघारयति यज्ञस्यानुख्यात्या अथो सामिधेनीरेवाभ्यनक्त्यलूक्षो भवति य एवं वेदाथो तर्पयत्येवैनास्तृप्यति प्रजया पशुभि

६४ र्य एवं वेद यदेकयाघारयेदेकां प्रीणीयाद्यद्द्वाभ्यां द्वे प्रीणीयाद्यत्तिसृभिरति तद्रेचयेन्मनसाघारयति मनसा ह्यनाप्तमाप्यते तिर्यञ्चमा घारयत्यच्छंबट्कारं वाक्च मनश्चार्तीयेतामहं देवेभ्यो हव्यं वहामीति वागब्रवीदहं देवेभ्य इति मनस्तौ प्रजापतिं प्रश्नमैताꣳ सोऽब्रवीत्

६५ प्रजापतिर्दूतीरेव त्वं मनसोऽसि यद्धि मनसा ध्यायति तद्वाचा वदतीति तत्खलु तुभ्यं न वाचा जुहवन्नित्यब्रवीत् तस्मान्मनसा प्रजापतये जुह्वति मन इव हि प्रजापतिः प्रजापतेराप्त्यै परिधीन्थ्सं मार्ष्टि पुनात्येवैनान्त्रिर्मध्यमं त्रयो वै प्राणाः प्राणानेवाभि जयति त्रिर्दक्षिणार्ध्यं त्रय

६६ इमे लोका इमानेव लोकानभि जयति त्रिरुत्तरार्ध्यं त्रयो वै देवयानाः पन्थानस्तानेवाभि जयति त्रिरुप वाजयति त्रयो वै देवलोका देवलोकानेवाभि जयति द्वादश संपद्यन्ते द्वादश मासाः संवथ्सरः संवथ्सरमेव प्रीणात्यथो संवथ्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्या आघारमा घारयति तिर इव

६७ वै सुवर्गो लोकः सुवर्गमेवास्मै लोकं प्र रोचयत्यृजुमा घारयत्यृजुरिव हि प्राणः
संततमा घारयति प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै यं कामयेत प्रमायुकः
स्यादिति जिह्मं तस्याघारयेत् प्राणमेवास्माज्जिह्मं नयति ताजक् प्र मीयते शिरो वा
एतद्यज्ञस्य यदाघार आत्मा ध्रुवा
६८ ऽघारमाघार्य ध्रुवाꣳ समनक्त्यात्मन्नेव यज्ञस्य शिरः प्रति दधात्यग्निर्देवानां दूत
आसीद्दैव्योऽसुराणां तौ प्रजापतिं प्रश्नमैताꣳ स प्रजापतिर्ब्राह्मणमब्रवीदेतद्वि ब्रूहीत्या
श्रावयेतीदं देवाः शृणुतेति वाव तदब्रवीदग्निर्देवो होतेति य एव देवानां तमवृणीत ततो
देवा
६९ अभवन्परासुरा यस्यैवं विदुषः प्रवरं प्रवृणते भवत्यात्मना परास्य भ्रातृव्यो भवति
यद्ब्राह्मणश्चाब्राह्मणश्च प्रश्नमेयातां ब्राह्मणायाधि ब्रूयाद्यद्ब्राह्मणायाध्याहात्मनेऽध्याह यद्ब्राह्मणं
पराहात्मानं पराह तस्माद् ब्राह्मणो न परोच्यः ॥ २। ५। ११॥ वा आरण्याग्श्चाव रुंधेथो
पशुभिः सोब्रवीद्दक्षिणार्ध्यं त्रय इव ध्रुवा देवाश्चत्वारिꣳशच्च ॥ २। ५। ११॥
७० आयुष्ट आयुर्दा अग्न आ प्यायस्व संतेऽव ते हेड उदुत्तमं प्र णो देव्या नो
दिवोऽग्नाविष्णू अग्नाविष्णू इमं मे वरुण तत्त्वायाम्युदु त्यं चित्रम् ॥ अपां नपादा
ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः । तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः
परि यन्ति यह्वीः ॥ स
७१ मन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति । तमू शुचिꣳ शुचयो दीदिवाꣳ
समपां नपातं परि तस्थुरापः ॥ तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः
। स शुक्रेण शिक्वना रेवदग्निर्दीदायानिध्मो घृतनिर्णिगप्सु ॥
इंद्रावरुणयोरहꣳ सम्राजोरव आ वृणे । ता नो मृडात ईदृशे ॥
इंद्रावरुणा युवमध्वराय नो
७२ विशे जनाय महि शर्म यच्छतम् । दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम
पृतनासु दूढ्यः ॥ आ नो मित्रावरुणा प्र बाहवा । त्वं नो अग्ने वरुणस्य विद्वान्देवस्य
हेडोऽव या सिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत्
॥ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अव यक्ष्व नो वरुणꣳ
७३ रराणो वीहि मृडीकꣳ सुहवो न एधि ॥ प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न
रोचते बृहद्भाः । अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥ प्र

ते यक्षि प्रत इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु । धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् ॥
७४ वि पाजसा वि ज्योतिषा ॥ स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः । उरुक्षयेषु दीद्यत् ॥ तꣳ सुप्रतीकꣳ सुदृशग्ग् स्वञ्चमविद्वाꣳसो विदुष्टरꣳ सपेम । स यक्षद्विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् ॥ अꣳहोमुचे विवेष यन्मा वि न इंद्रेंद्र क्षत्रमिंद्रियाणि शतक्रतोऽनु ते दायि ॥ २। ५। १२॥
यह्वीस्समध्वराय नो वरुणꣳ राजग्ग्श्चतुश्चत्वारिꣳशच्च ॥ २। ५। १२॥ विश्वरूपस्त्वष्टेंद्रं वृत्रं ब्रह्मवादिनस्स त्वै नासोमयाज्येष वै देवरथो देवा वै नर्चि नायज्ञोग्ने महाग्नीन्निवीतमायुष्टे द्वादश ॥ विश्वरूपो नैनꣳ शितरूरावद्य वसु पूर्वेद्युर्वाजा इत्यग्ने महान्निवीतमन्या यंति चतुस्सप्ततिः ॥ विश्वरूपोनु ते दायि ॥

## द्वितीयकाण्डे षष्ठः प्रश्नः ६

१ समिधो यजति वसन्तमेवर्तूनामव रुन्धे तनूनपातं यजति ग्रीष्ममेवाव रुन्ध इडो यजति वर्षा एवाव रुन्धे बर्हिर्यजति शरदमेवाव रुन्धे स्वाहाकारं यजति हेमन्तमेवाव रुन्धे तस्मात्स्वाहाकृता हेमन्पशवोऽव सीदन्ति समिधो यजत्युषस एव देवतानामव रुन्धे तनूनपातं यजति यज्ञमेवाव रुन्ध
२ इडो यजति पशूनेवाव रुन्धे बर्हिर्यजति प्रजामेवाव रुन्धे समानयत उपभृतस्तेजो वा आज्यं प्रजा बर्हिः प्रजास्वेव तेजो दधाति स्वाहाकारं यजति वाचमेवाव रुन्धे दश संपद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धे समिधो यजत्यस्मिन्नेव लोके प्रति तिष्ठति तनूनपातं यजति
३ यज्ञ एवान्तरिक्षे प्रति तिष्ठतीडो यजति पशुष्वेव प्रति तिष्ठति बर्हिर्यजति य एव देवयानाः पन्थानस्तेष्वेव प्रति तिष्ठति स्वाहाकारं यजति सुवर्ग एव लोके प्रति तिष्ठत्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठति देवासुरा एषु लोकेष्वस्पर्धन्त ते देवाः प्रयाजैरेभ्यो लोकेभ्योऽसुरान्प्राणुदन्त तत्प्रयाजानां
४ प्रयाजत्वं यस्यैवं विदुषः प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भ्रातृव्यान्नुदतेऽभिक्रामं जुहोत्यभिजित्यै यो वै प्रयाजानां मिथुनं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते समिधो बह्वीरिव यजतितनूनपातमेकमिव मिथुनं तदिडो बह्वीरिव यजति बर्हिरेकमिव मिथुनं तदेतद्वै प्रयाजानां मिथुनं य एवं वेद प्र

५ प्रजया पशुभिर्मिथुनैर्जायते देवानां वा अनिष्टा देवता आसन्नथासुरा यज्ञमजिघाꣳसन्ते
देवा गायत्रीं व्यौहन् पञ्चाक्षराणि प्राचीनानि त्रीणि प्रतीचीनानि ततो वर्म यज्ञायाभवद्वर्म
यजमानाय यत्प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यज्ञाय क्रियते वर्म यजमानाय
भ्रातृव्याभिभूत्यै तस्माद्वरूथं पुरस्ताद्वर्षीयः पश्चाद्ध्रसीयो देवा वै पुरा रक्षोभ्य
६ इति स्वाहाकारेण प्रयाजेषु यज्ञꣳ सग्ग्स्थाप्यमपश्यन्त२ꣳ स्वाहाकारेण प्रयाजेषु
समस्थापयन्वि वा एतद्यज्ञं छिन्दन्ति यथ्स्वाहाकारेण प्रयाजेषु स२ꣳस्थापयन्ति
प्रयाजानिष्ट्वा हवीग्ष्यभि घारयति यज्ञस्य संतत्या अथो हविरेवाकरथो यथापूर्वमुपैति
पिता वै प्रयाजाः प्रजानूयाजा यत्प्रयाजानिष्ट्वा हवीग्ष्यभिघारयति पितैव तत्पुत्रेण
साधारणं
७ कुरुते तस्मादाहुर्यश्चैवं वेद यश्च न कथा पुत्रस्य केवलं कथा साधारणं
पितुरित्यस्कन्नमेव तद्यत्प्रयाजेष्विष्टेषु स्कन्दति गायत्र्येव तेन गर्भं धत्ते सा प्रजां पशून्,
यजमानाय प्र जनयति ॥
२। ६। १॥ यजति यज्ञमेवाव रुंधे तनूनपातं यजति प्रयाजानामेवं वेद प्र रक्षोभ्यः
साधारणं पंचत्रिꣳशच्च ॥ २। ६। १॥
८ चक्षुषी वा एते यज्ञस्य यदाज्यभागौ यदाज्यभागौ यजति चक्षुषी एव तद्यज्ञस्य
प्रति दधाति पूर्वार्धे जुहोति तस्मात् पूर्वार्धे चक्षुषी प्रबाहुग्जुहोति तस्मात्प्रबाहुक्चक्षुषी
देवलोकं वा अग्निना यजमानोऽनु पश्यति पितृलोकꣳ सोमेनोत्तरार्धेऽग्नये जुहोति
दक्षिणार्धे सोमायैवमिव हीमौ लोकावनयोर्लोकयोरनुख्यात्यै राजानौ वा एतौ देवतानां
९ यदग्नीषोमावन्तरा देवता इज्येते देवतानां विधृत्यै तस्माद्राज्ञा मनुष्या
विधृता ब्रह्मवादिनो वदन्ति किं तद्यज्ञे यजमानः कुरुते येनान्यतोदतश्च
पशून् दाधारोऽभयतोदतश्चेत्यृचमनूच्याज्यभागस्य जुषाणेन यजति तेनान्यतोदतो
दाधारर्चमनूच्य हविष ऋचा यजति तेनोभयतोदतो दाधार मूर्धन्वती पुरोऽनुवाक्या
भवति मूर्धानमेवैनꣳसमानानां करोति
१० नियुत्वत्या यजति भ्रातृव्यस्यैव पशून्नि युवते केशिनꣳ ह दार्भ्यं केशी
सात्यकामिरुवाच सप्तपदां ते शक्करीग् श्वो यज्ञे प्रयोक्तासे यस्यै वीर्येण प्र जातान्
भ्रातृव्यान्नुदते प्रति जनिष्यमाणान्, यस्यै वीर्येणोभयोर्लोकयोर्ज्योतिर्धत्ते यस्यै वीर्येण
पूर्वार्धेनानड्वान्भुनक्ति जघनार्धेन धेनुरिति पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवति जातानेव

भ्रातृव्यान् प्र णुदत उपरिष्टाल्लक्ष्मा
११ याज्या जनिष्यमाणानेव प्रति नुदते पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवत्यस्मिन्नेव लोके ज्योतिर्धत्त उपरिष्टाल्लक्ष्मा याज्यामुष्मिन्नेव लोके ज्योतिर्धत्ते ज्योतिष्मन्तावस्मा इमौ लोकौ भवतो य एवं वेद पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवति तस्मात् पूर्वार्धेनानड्वान् भुनक्त्युपरिष्टाल्लक्ष्मा याज्या तस्माज्जघनार्धेन धेनुर्य एवं वेद भुङ्क्त एनमेतौ वज्र आज्यं वज्र आज्यभागौ
१२ वज्रो वषट्कारस्त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरत्यच्छंबट्कारमपगूर्य वषट्करोति स्तृत्यै गायत्री पुरोऽनुवाक्या भवति त्रिष्टुग्याज्या ब्रह्मन्नेव क्षत्रमन्वारंभयति तस्माद् ब्राह्मणो मुख्यो मुख्यो भवति य एवं वेद प्रैवैनं पुरोऽनुवाक्ययाह प्रणयति याज्यया गमयति वषट्कारेणैवैनं पुरोऽनुवाक्यया दत्ते प्र यच्छति याज्यया प्रति
१३ वषट्कारेण स्थापयति त्रिपदा पुरोऽनुवाक्या भवति त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठति चतुष्पदा याज्या चतुष्पद एव पशूनव रुन्धे द्व्यक्षरो वषट्कारो द्विपाद्यजमानः पशुष्वेवोपरिष्टात् प्रति तिष्ठति गायत्री पुरोऽनुवाक्या भवति त्रिष्टुग्याज्यैषा वै सप्तपदा शक्वरी यद्वा एतया देवा अशिक्षन्तदशक्नुवन् य एवं वेद शक्नोत्येव यच्छिक्षति ॥ २। ६। २॥ देवतानां करोत्युपरिष्टाल्लक्ष्माज्य भागौ प्रति शक्नोत्येव द्वे च ॥ २। ६। २॥
१४ प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशथ्स आत्मन्नाज्यमधत्त तं देवा अब्रुवन्नेष वाव यज्ञो यदाज्यमप्येव नोत्रास्त्विति सोऽब्रवीद्यजान्, व आज्यभागावुप स्तृणानभि घारयानिति तस्माद्यजन्त्याज्यभागावुप स्तृणन्त्यभि घारयन्ति ब्रह्मवादिनो वदन्ति कस्माथ्सत्याद्यातयामान्यन्यानि हवीग्ष्ययातयाममाज्यमिति प्राजापत्य
१५ मिति ब्रूयादयातयामा हि देवानां प्रजापतिरिति छन्दाꣳसि देवेभ्योऽपाक्रामन्न वोऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुरवत्तमधारयन्पुरोऽनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुरवत्तं जुहोति छन्दाग्स्येव तत्प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्त्यंगिरसो वा इत उत्तमाः सुवर्गं लोकमायन्तदृषयो यज्ञवास्त्वभ्यवायन्ते
१६ ऽपश्यन्पुरोडाशं कूर्मं भूतꣳ सर्पन्तं तमब्रुवन्निंद्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्वेति स नाध्रियत तमब्रुवन्नग्नये ध्रियस्वेति सोऽग्नयेऽध्रियत यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति सुवर्गस्य लोकस्याभिजित्यै तमब्रुवन् कथाहास्था इत्यनु पाक्तोऽभूवमित्यब्रवीद्यथाक्षोऽनु

पात्क्तो
१७ ऽवार्च्छत्येवमवारमित्युपरिष्टादभ्यज्याधस्तादुपानक्ति सुवर्गस्य लोकस्य समष्ट्यै
सर्वाणि कपालान्यभि प्रथयति तावतः पुरोडाशानमुष्मि३ँ ल्लोकेऽभि जयति यो विदग्धः
स नैर्ऋतो योऽश्रृतः स रौद्रो यः श्रृतः स सदेवस्तस्मादविदहता श्रृतंकृत्यः सदेवत्वाय
भस्मनाभि वासयति तस्मान्माँ सेनास्थि छन्नं वेदेनाभि वासयति तस्मात्
१८ केशैः शिरश्छन्नं प्रच्युतं वा एतदस्माल्लोकादगतं देवलोकं यच्छृतँ हविरनभि
घारितमभि घार्योद्वासयति देवत्रैवैनद्गमयति यद्येकं कपालं नश्येदेको मासः
संवथ्सरस्यानवेतः स्यादथ यजमानः प्र मीयेत यद् द्वे नश्येतां द्वौ मासौ
संवथ्सरस्यानवेतौ स्यातामथ यजमानः प्र मीयेत संख्यायोद्वासयति यजमानस्य
१९ गोपीथाय यदि नश्येदाश्विनं द्विकपालं निर्वपेद्द्यावापृथिव्यमेक कपालमश्विनौ वै
देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोति द्यावापृथिव्य एककपालो भवत्यनयोर्वा
एतन्नश्यति यन्नश्यत्यनयोरेवैनद्विन्दति प्रतिष्ठित्यै ॥ २। ६। ३॥ प्राजापत्यं तेक्षोनु पात्क्तो
वेदेनाभि वानयति तस्माद्यजमानस्य द्वात्रिँशच्च ॥
२। ६। ३॥
२० देवस्य त्वा सवितुः प्रसव इति स्फ्यमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ
हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै शतभृष्टिरसि वानस्पत्यो द्विषतो
वध इत्याह वज्रमेव तथ्स२ँश्यति भ्रातृव्याय प्रहरिष्यन्थ्स्तंब यजुर्हरत्येतावती वै पृथिवी
यावती वेदिस्तस्या एतावत एव भ्रातृव्यं निर्भजति
२१ तस्मान्नाभागं निर्भजन्ति त्रिर्हरति त्रय इमे लोका एभ्य एवैनं लोकेभ्यो निर्भजति
तूष्णीं चतुर्थँ हरत्यपरिमितादेवैनं निर्भजत्युद्धन्ति यदेवास्या अमेध्यं तदप हंत्युद्धन्ति
तस्मादोषधयः परा भवन्ति मूलं छिनत्ति भ्रातृव्यस्यैव मूलं छिनत्ति पितृदेवत्याति
खातेयतीं खनति प्रजापतिना
२२ यज्ञमुखेन सं मितामा प्रतिष्ठायै खनति यजमानमेव प्रतिष्ठां गमयति दक्षिणतो
वर्षीयसीं करोति देवयजनस्यैव रूपमकः पुरीषवतीं करोति प्रजा वै पशवः पुरीषं
प्रजयैवैनं पशुभिः पुरीषवन्तं करोत्युत्तरं परिग्राहं परि गृह्णात्येतावती वै पृथिवी यावती
वेदिस्तस्या एतावत एव भ्रातृव्यं निर्भज्यात्मन उत्तरं परिग्राहं परि गृह्णाति क्रूरमिव वा
२३ एतत्करोति यद्वेदिं करोति धा असि स्वधा असीति योयुप्यते शान्त्यै प्रोक्षणीरा
सादयत्यापो वै रक्षोघ्नी रक्षसामपहत्यै स्फ्यस्य वर्त्मन्थ्सादयति यज्ञस्य संतत्यै यं

द्विष्यात्तं ध्यायेच्छुचैवैनमर्पयति ॥ २। ६। ४॥ भजति प्रजापतिनेव वै त्रयस्त्रिꣳशच्च ॥ २। ६। ४॥
२४ ब्रह्मवादिनो वदन्त्यद्भिर्हवीꣳषि प्रौक्षीः केनाप इति ब्रह्मणेति ब्रूयादद्भिर्ह्येव हवीꣳषि प्रोक्षति ब्रह्मणाप इध्माबर्हिः प्रोक्षति मेध्यमेवैनत्करोति वेदिं प्रोक्षत्यृक्षा वा एषालोमकामेध्या यद्वेदिर्मेध्यामेवैनां करोति दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वेति बर्हिरासाद्य प्रो
२५ क्षत्येभ्य एवैनल्लोकेभ्यः प्रोक्षति क्रूरमिव वा एतत्करोति यत्खनत्यपो नि नयति शान्त्यै पुरस्तात्प्रस्तरं गृह्णाति मुख्यमेवैनं करोतीयन्तं गृह्णाति प्रजापतिना यज्ञमुखेन सं मितं बर्हिः स्तृणाति प्रजा वै बर्हिः पृथिवी वेदिः प्रजा एव पृथिव्यां प्रति ष्ठापयत्यनतिदृश्नꣳ स्तृणाति प्रजयैवैनं पशुभिरनतिदृश्नं करो
२६ त्युत्तरं बर्हिषः प्रस्तरꣳ सादयति प्रजा वै बर्हिर्यजमानः प्रस्तरो यजमानमेवायजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरोऽन्तर्दधाति व्यावृत्या अनक्ति हविष्कृतमेवैनꣳ सुवर्गं लोकं गमयति त्रेधानक्ति त्रय इमे लोका एभ्य एवैनं लोकेभ्योऽनक्ति न प्रति शृणाति यत्प्रति शृणीयादनूर्ध्वं भावुकं यजमानस्य स्यादुपरीव प्र हर
२७ त्युपरीव हि सुवर्गो लोको नि यच्छति वृष्टिमेवास्मै नि यच्छति नात्यग्रं प्र हरेद्यदत्यग्रं प्रहरेदत्यासारिण्यध्वर्योर्नाशुका स्यान्न पुरस्तात् प्रत्यस्येद्यत्पुरस्तात् प्रत्यस्यैथ् सुवर्गाल्लोकाद्यजमानं प्रति नुदेत्प्राञ्चं प्र हरति यजमानमेव सुवर्गं लोकं गमयति न विष्वञ्चं वि युयाद्यद्विष्वञ्चं वियुयाथ्
२८ स्त्र्यस्य जायेतोर्ध्वमुद्यौत्यूर्ध्वमिव हि पुꣳसः पुमानेवास्य जायते यथ्स्फ्येन वोपवेषेण वा योयुप्येत स्तृतिरेवास्य सा हस्तेन योयुप्यते यजमानस्य गोपीथाय ब्रह्मवादिनो वदन्ति किं यज्ञस्य यजमान इति प्रस्तर इति तस्य क्व सुवर्गो लोक इत्याहवनीय इति ब्रूयाद्यत्प्रस्तरमाहवनीये प्रहरति यजमानमेव
२९ सुवर्गं लोकं गमयति वि वा एतद्यजमानो लिशते यत्प्रस्तरं योयुप्यन्ते बर्हिरनु प्र हरति शान्त्या अनारंभण इव वा एतर्ह्यध्वर्युः स ईश्वरो वेपनो भवितोर्ध्रुवासीतीमामभि मृशतीयं वै ध्रुवास्यामेव प्रतितिष्ठति न वेपनो भवत्यगा३नग्नीदित्याह यद्ब्रूयादगन्नग्निरित्यग्नावग्निं गमयेन्निर्यजमानꣳ सुवर्गाल्लोकाद्भजेदगन्नित्येव ब्रूयाद्यजमानमेव सुवर्गं लोकं गमयति ॥ २। ६। ५॥

आसाद्य प्रनतिदृश्नं करोति हरति वियुयाद्यजमानमेवाग्निरिरिति सप्तदश च ॥ २। ६। ५॥
३० अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त
सोऽग्निरबिभेदित्थं वाव स्य आर्तिमारिष्यतीति स निलायत सोऽपः प्राविशत्तं देवताः
प्रैषमैच्छन्तं मथ्स्यः प्राब्रवीत्तमशपद्धियाधिया त्वा वध्यासुर्यो मा प्रावोच इति
तस्मान्मथ्स्यं धियाधिया घ्नन्ति शप्तो
३१ हि तमन्वविन्दन्तमब्रुवन्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं
वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात् तन्मे भ्रातृणां भागधेयमसदिति
तस्माद्यद्गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति
परिधीन् परि दधाति रक्षसामपहत्यै स२ꣳ स्पर्शयति
३२ रक्षसामनन्ववचाराय न पुरस्तात् परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षाꣳस्यप
हन्त्यूर्ध्वे समिधावा दधात्युपरिष्टादेव रक्षाꣳस्यप हन्ति यजुषान्यां तूष्णीमन्यां मिथुनत्वाय
द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मवादिनो वदन्ति स त्वै यजेत यो यज्ञस्यार्त्या
वसीयान्थ्स्यादिति भूपतये स्वाहा भुवनपतये स्वाहा भूतानां
३३ पतये स्वाहेति स्कन्नमनु मन्त्रयेत यज्ञस्यैव तदार्त्या यजमानो वसीयान्भवति
भूयसीर्हि देवताः प्रीणाति जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ
पुरोडाशावुपाꣳशुयाजमन्तरा यजत्यजामित्वायाथो मिथुनत्वाया ग्निरमुष्मिꣳ३ꣳ ल्लोक
आसीद्यमोऽस्मिन् ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यन्नाद्येन देवा अग्नि
३४ मुपामन्त्रयन्त राज्येन पितरो यमं तस्मादग्निर्देवानामन्नादो यमः पितृणाꣳ राजा य
एवं वेद प्र राज्यमन्नाद्यमाप्नोति तस्मा एतद्भागधेयं प्रायच्छन् यदग्नये स्विष्टकृतेऽवद्यन्ति
यदग्नये स्विष्टकृतेऽवद्यति भागधेयेनैव तद्रुद्रꣳ समर्धयति सकृथ्सकृदव द्यति सकृदिव
हि रुद्र उत्तरार्धादव द्यत्येषा वै रुद्रस्य
३५ दिक्स्वायामेव दिशि रुद्रं निरवदयते द्विरभि घारयति चतुरवत्तस्याप्त्यै पशवो वै पूर्वा
आहुतय एष रुद्रो यदग्निर्यत्पूर्वा आहुतीरभि जुहुयाद्रुद्राय पशूनपि दध्यादपशुर्यजमानः
स्यादतिहाय पूर्वा आहुतीर्जुहोति पशूनां गोपीथाय ॥ २। ६। ६॥ शप्तस्पर्शयति
भूतानामग्निꣳ रुद्रस्य सप्तत्रिꣳशच्च ॥ २। ६। ६॥
३६ मनुः पृथिव्या यज्ञियमैच्छथ्स घृतं निषिक्तमविन्दथ्सोऽब्रवीत्कोऽस्येश्वरो यज्ञेऽपि
कर्तोरिति तावब्रूतां मित्रावरुणौ गोरेवावमीश्वरौ कर्तोः स्व इति तौ ततो गाꣳ

समैरयता ँ सा यत्रयत्र न्यक्रामत्ततो घृतमपीड्यत तस्माद् घृतपद्युच्यते तदस्यै जन्मोपहूत ँ रथंतर ँ सह पृथिव्येत्याहे
३७ यं वै रथंतरमिमामेव सहान्नाद्येनोप ह्वयत उपहूतं वामदेव्य ँ सहान्तरिक्षेणेत्याह पशवो वै वामदेव्यं पशूनेव सहान्तरिक्षेणोप ह्वयत उपहूतं बृहथ्सह दिवेत्याहैरं वै बृहदिरामेव सह दिवोप ह्वयत उपहूताः सप्त होत्रा इत्याह होत्रा एवोप ह्वयत उपहूता धेनुः
३८ सहर्षभेत्याह मिथुनमेवोप ह्वयत उपहूतो भक्षः सखेत्याह सोमपीथमेवोप ह्वयत उपहूतां ३ हो इत्याहात्मानमेवोप ह्वयत आत्मा ह्युपहूतानां वसिष्ठ इडामुप ह्वयते पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते चतुष्पादो हि पशवो मानवीत्याह मनुर्ह्येता
३९ मग्रेऽपश्यद् घृतपदीत्याह यदेवास्यै पदाद् घृतमपीड्यत तस्मादेवमाह मैत्रावरुणीत्याह मित्रावरुणौ ह्येना ँ समैरयतां ब्रह्म देवकृतमुप हूतमित्याह ब्रह्मैवोप ह्वयते दैव्या अध्वर्यव उपहूता उपहूता मनुष्या इत्याह देवमनुष्यानेवोप ह्वयते य इमं यज्ञमवान् ये यज्ञपतिं वर्धानित्याह
४० यज्ञाय चैव यजमानाय चाशिषमा शास्त उपहूते द्यावापृथिवी इत्याह द्यावापृथिवी एवोप ह्वयते पूर्वजे ऋतावरी इत्याह पूर्वजे ह्येते ऋतावरी देवी देवपुत्रे इत्याह देवी ह्येते देवपुत्रे उपहूतोऽयं यजमान इत्याह यजमानमेवोप ह्वयत उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण उपहूतो दिव्ये धामन्नुपहूत
४१ इत्याह प्रजा वा उत्तरा देवयज्या पशवो भूयो हविष्करण ँ सुवर्गो लोको दिव्यं धामेदमसीदमसीत्येव यज्ञस्य प्रियं धामोप ह्वयते विश्वमस्य प्रियमुप हूतमित्याहाछंबट्कारमेवोप ह्वयते ॥ २। ६। ७॥ आह धेनुरेतां वर्धानित्याह धामन्नुपहूतश्चतुस्त्रि ँ शच्च ॥ २। ६। ७॥
४२ पशवो वा इडा स्वयमा दत्ते काममेवात्मना पशूनामा दत्ते न ह्यन्यः कामं पशूनां प्रयच्छति वाचस्पतये त्वा हुतं प्राश्नामीत्याह वाचमेव भागधेयेन प्रीणाति सदसस्पतये त्वा हुतं प्राश्नामीत्याह स्वगाकृत्यै चतुरवत्तं भवति हविर्वै चतुरवत्तं पशवश्चतुरवत्तं यद्धोता प्राश्नीयाद्धोता
४३ ऽर्तिमार्च्छेद्यदग्नौ जुहुयाद्रुद्राय पशूनपि दध्यादपशुर्यजमानः स्याद्वाचस्पतये त्वा हुतं

प्राश्नामीत्याह परोऽक्षमेवैनज्जुहोति सदसस्पतये त्वा हुतं प्राश्नामीत्याह स्वगाकृत्यै प्राश्नन्ति
तीर्थ एव प्राश्नन्ति दक्षिणां ददाति तीर्थ एव दक्षिणां ददाति वि वा एतद्यज्ञं
४४ छिन्दन्ति यन्मध्यतः प्राश्नन्त्यद्भिर्मार्जयन्त आपो वै सर्वा देवता देवताभिरेव यज्ञꣳ
सं तन्वन्ति देवा वै यज्ञाद्रुद्रमन्तरायन्थ्स यज्ञमविध्यत्तं देवा अभि समगच्छन्त कल्पतां न
इदमिति तेऽब्रुवन्थ्स्विष्टं वै न इदं भविष्यति यदिमꣳ राधयिष्याम इति तथ्स्विष्टकृतः
स्विष्टकृत्त्वं तस्याविद्धं
४५ निरकृन्तन् यवेन संमितं तस्माद्यवमात्रमव द्येद्यज्यायोऽवद्येद्रोपयेत्तद्यज्ञस्य यदुप
च स्तृणीयादभि च घारयेदुभयतःसꣳ श्वायि कुर्यादवदायाभि घारयति द्विः सं पद्यते
द्विपाद्यजमानः प्रतिष्ठित्यै यत्तिरश्चीनमतिहरेदनभिविद्धं यज्ञस्याभि विध्येदग्रेण परि हरति
तीर्थेनैव परि हरति तत्पूष्णे पर्यहरन्तत्
४६ पूषा प्राश्य दतोऽरुणत्तस्मात्पूषा प्रपिष्टभागोऽदन्तको हि तं देवा अब्रुवन्, वि वा
अयमार्ध्यप्राशित्रियो वा अयमभूदिति तद्बृहस्पतये पर्यहरन्थ्सोऽबिभेद् बृहस्पतिरित्थं वाव
स्य आर्तिमारिष्यतीति स एतं मन्त्रमपश्यथ्सूर्यस्य त्वा चक्षुषा प्रति पश्यामीत्यब्रवीन्न हि
सूर्यस्य चक्षुः
४७ किं चन हिनस्ति सोऽबिभेत् प्रतिगृह्णन्तं मा हिꣳसिष्यतीति देवस्य त्वा सवितुः
प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामीत्यब्रवीत् सवितृप्रसूत एवैनद्ब्रह्मणा
देवताभिः प्रत्यगृह्णात् सोऽबिभेत् प्राश्नन्तं मा हिꣳसिष्यतीत्यग्नेस्त्वास्येन प्राश्नामीत्यब्रवीन्न
ह्यग्नेरास्यं किं चन हिनस्ति सोऽबिभेत्
४८ प्राशितं मा हिꣳसिष्यतीति ब्राह्मणस्योदरेणेत्यब्रवीन्न हि ब्राह्मणस्योदरं किं चन
हिनस्ति बृहस्पतेर्ब्रह्मणेति स हि ब्रह्मिष्ठोऽप वा एतस्मात् प्राणाः क्रामन्ति यः प्राशित्रं
प्राश्नात्यद्भिर्मार्जयित्वा प्राणान्थ्सं मृशतेऽमृतं वै प्राणा अमृतमापः प्राणानेव यथास्थानमुप
ह्वयते ॥ २। ६। ८॥
प्राश्नीयाद्धोता यज्ञं निरहरन्तचक्षुरास्यं किंचन हिनस्ति सोबिभेच्चतुश्चत्वारिꣳशच्च ॥ २।
६। ८॥
४९ अग्नीध आ दधात्यग्निमुखानेवर्तून् प्रीणाति समिधमा दधात्युत्तरासामाहुतीनां
प्रतिष्ठित्या अथो समिद्वत्येव जुहोति परिधीन्थ्सं मार्ष्टि पुनात्येवैनान्थ्सकृथ्सकृथ्सं मार्ष्टि
पराङिव ह्येतर्हि यज्ञश्चतुः संपद्य ते चतुष्पादः पशवः पशूनेवाव रुन्धे ब्रह्मन् प्र स्थास्याम
इत्याहात्र वा एतर्हि यज्ञः श्रितो

५० यत्र ब्रह्मा यत्रैव यज्ञः श्रितस्तत एवैनमा रभते यद्धस्तेन प्रमीवेद्वेपनः स्याद्यच्छीर्ष्णा
शीर्षक्तिमान्थ्स्याद्यत् तूष्णीमासीतासंप्रत्तो यज्ञः स्यात्प्रतिष्ठेत्येव ब्रूयाद्वाचि वै यज्ञः श्रितो
यत्रैव यज्ञः श्रितस्तत एवैनꣳ संप्र यच्छति देव सवितरेतत्ते प्रा
५१ ऽहेत्याह प्रसूत्यै बृहस्पतिर्ब्रह्मेत्याह स हि ब्रह्मिष्ठः स यज्ञं पाहि स यज्ञपतिं पाहि
स मां पाहीत्याह यज्ञाय यजमानायात्मने तेभ्य एवाशिषमा शास्तेऽनार्त्या आश्राव्याह
देवान्, यजेति ब्रह्मवादिनो वदन्तीष्टा देवता अथ कतम एते देवा इति छन्दाꣳसीति
ब्रूयाद्गायत्रीं त्रिष्टुभं
५२ जगतीमित्यथो खल्वाहुर्ब्राह्मणा वै छन्दाꣳसीति तानेव तद्यजति देवानां वा
इष्टा देवता आसन्नथाग्निर्नोदज्वलत्तं देवा आहुतीभिरनूयाजेष्वन्वविन्दन् यदनूयाजान्,
यजत्यग्निमेव तथ्समिन्ध एतदुर्वै नामासुर आसीथ्स एतर्हि यज्ञस्याशिषमवृङ्क्त यद् ब्रूयादेत
५३ दु द्यावापृथिवी भद्रमभूदित्येतदुमेवासुरं यज्ञस्याशिषं गमयेदिदं द्यावापृथिवी
भद्रमभूदित्येव ब्रूयाद्यजमानमेव यज्ञस्याशिषं गमयत्यार्ध्म सूक्तवाकमुत
नमोवाकमित्याहेदमराथ्स्मेति वावैतदाहोपश्रितो दिवः पृथिव्योरित्याह द्यावापृथिव्योर्हि
यज्ञ उपश्रित ओमन्वती तेऽस्मिन्, यज्ञे यजमान द्यावापृथिवी
५४ स्तामित्याहाशिषमेवैतामा शास्ते यद्ब्रूयाथ्सूपावसाना च स्वध्यवसाना चेति प्रमायुको
यजमानः स्याद्यदा हि प्रमीयतेऽथेमामुपावस्यति सूपचरणा च स्वधिचरणा चेत्येव
ब्रूयाद्वरीयसीमेवास्मै गव्यूतिमा शास्ते न प्रमायुको भवति तयोराविद्यग्निरिदꣳ
हविरजुषतेत्याह या अयाक्ष्म
५५ देवतास्ता अरीरधामेति वावैतदाह यन्न निर्दिशेत् प्रतिवेशं यज्ञस्याशीर्गच्छेदा
शास्तेऽयं यजमानोऽसावित्याह निर्दिश्यैवैनꣳ सुवर्गं लोकं गमयत्यायुरा शास्ते
सुप्रजास्त्वमा शास्त इत्याहाशिषमेवैतामा शास्ते सजातवनस्यामा शास्त इत्याह प्राणा
वै सजाताः प्राणानेव
५६ नान्तरेति तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषा इत्याहाग्निर्देवेभ्यो वनुते वयं
मनुष्येभ्य इति वावैतदाहेह गतिर्वामस्येदं च नमो देवेभ्य इत्याह याश्चैव देवता यजति
याश्च न ताभ्य एवोभयीभ्यो नमस्करोत्यात्मनोऽनार्त्यै ॥ २। ६। ९॥
श्रितस्ते प्र त्रिष्टुभमेतद्द्यावापृथिवी या अयाक्ष्म प्राणानेव षड्चत्वारिꣳशच्च ॥ २। ६। ९॥
५७ देवा वै यज्ञस्य स्वगाकर्तारं नाविन्दन्ते शंयुं बार्हस्पत्यमब्रुवन्निमं नो यज्ञꣳ

स्वगा कुर्विति सोऽब्रवीद्वरं वृणै यदेवाब्राह्मणोक्तोऽश्रद्दधानो यजातै सा मे यज्ञस्याशीरसदिति तस्माद्यदब्राह्मणोक्तोऽश्रद्दधानो यजते शंयुमेव तस्य बार्हस्पत्यं यज्ञस्याशीर्गच्छत्येतन्ममेत्यब्रवीत्किं मे प्रजाया

५८ इति योऽपगुरातै शतेन यातयाद्यो निहनत् सहस्रेण यातयाद्यो लोहितं करवद्यावतः प्रस्कद्य पाꣳसून्थ्सं गृह्णात्तावतः संवथ्सरान्पितृलोकं न प्र जानादिति तस्माद्ब्राह्मणाय नाप गुरेत न नि हन्यान्न लोहितं कुर्यादेतावता हैनसा भवति तच्छंयोरा वृणीमह इत्याह यज्ञमेवतथ्स्वगा करोति त

५९ च्छंयोरा वृणीमह इत्याह शंयुमेव बार्हस्पत्यं भागधेयेन समर्धयति गातुं यज्ञाय गातुं यज्ञपतय इत्याहाशिषमेवैतामा शास्ते सोमं यजति रेत एव तद्दधाति त्वष्टारं यजति रेत एव हितं त्वष्टा रूपाणि वि करोति देवानां पत्नीर्यजति मिथुनत्वायाग्निं गृहपतिं यजति प्रतिष्ठित्यै जामि वा एतद्यज्ञस्य क्रियते

६० यदाज्येन प्रयाजा इज्यन्त आज्येन पत्नीसंयाजा ऋचमनूच्य पत्नीसंयाजानामृचा यजत्यजामित्वायाथो मिथुनत्वाय पंक्तिप्रायणो वै यज्ञः पंक्त्युदयनः पंच प्रयाजा इज्यन्ते चत्वारः पत्नीसंयाजाः समिष्टयजुः पंचमं पंक्तिमेवानु प्रयन्ति पंक्तिमनूद्यन्ति ॥ २। ६। १०॥ प्रजायाः करोति तत्क्रियते त्रयस्त्रिꣳशच्च ॥ २। ६। १०॥

६१ युक्ष्वा हि देवहूतमाꣳ अश्वाꣳ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥ उत नो देव देवाꣳ अच्छा वोचो विदुष्टरः । श्रद्विश्वा वार्या कृधि ॥ त्वꣳ ह यद्यविष्ठ्य सहसः सूनवाहुत । ऋतावा यज्ञियो भुवः ॥ अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥ तं नेमिमृभवो यथानमस्व सहूतिभिः । नेदीयो यज्ञ

६२ मङ्गिरः ॥ तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ॥ कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः । पणिं गोषु स्तरामहे ॥ मा नो देवानां विशः प्रस्नातीरिवोस्राः । कृशं न हासुरघ्नियाः ॥
मा नः समस्य दूढ्यः परिद्वेषसो अꣳहतिः । ऊर्मिर्न नावमा वधीत् ॥
नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमै

६३ रमित्रमर्दय ॥ कुविथ्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् । उरुकृदुरुणस्कृधि ॥ मा नो अस्मिन्महाधने परा वर्ग्भारभृद्यथा । संवर्गꣳ सꣳ रयिं जय ॥ अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छुना । वर्धा नो अमवच्छवः ॥ यस्याजुषन्नमस्विनः शमीमदुर्मखस्य

वा । तं घेदग्निर्वृधावति ॥ परस्या अधि
६४ संवतोऽवराꣳ अभ्या तर । यत्राहमस्मि ताꣳ अव ॥ विद्मा हि ते पुरा वयमग्ने
पितुर्यथावसः । अधा ते सुम्नमीम हे । य उग्र इव शर्यहा तिग्मशृङ्गो न वꣳसगः । अग्ने
पुरो रुरोजिथ ॥ सखायः सं वः सम्यञ्चमिषग्ग् स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो
नप्त्रे सहस्वते ॥ सꣳ समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स
नो वसून्या भर ॥ प्रजापते स वेद सोमापूषणेमौ देवौ ॥ २। ६। ११॥ यज्ञममैरधि
वृषन्नेकान्न विꣳशतिश्च ॥ २। ६। ११॥
६५ उशन्तस्त्वा हवामह उशन्तः समिधीमहि । उशन्नुशत आ वह पितॄन् हविषे अत्तवे
॥ त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम् । तव प्रणीती पितरो
न इन्दो देवेषु रत्नमभजन्त धीराः ॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः
पवमान धीराः । वन्वन्नवातः परिधीꣳ रपोर्णु वीरेभिरश्वैर्मघवा भवा
६६ नः ॥ त्वꣳ सोम पितृभिः संविदानोऽनु द्यावापृथिवी आततन्थ । तस्मै त इन्दो
हविषा विधेम वय२ꣳ स्याम पतयो रयीणाम् ॥ अग्निष्वात्ताः पितर एह गच्छत
सदः सदः सदत सुप्रणीतयः । अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं
दधातन ॥ बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् । त आ गतावसा
शंतमेनाथास्मभ्यꣳ
६७ शं योररपो दधात ॥ आहं पितॄन्थ्सुविदत्राꣳअवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ उपहूताः पितरः सोम्यासो
बर्हिष्येषु निधिषु प्रियेषु । त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु ते अवन्त्वस्मान् ॥
उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः । असुं
६८ य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ इदं पितृभ्यो नमो अस्त्वद्य ये
पूर्वासो य उपरास ईयुः । ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः । शुचीदयन्दीधितिमुक्थशासः,
क्षामा भिन्दन्तो अरुणीरप व्रन् ॥ यदग्ने
६९ कव्यवाहन पितॄन्, यक्ष्यृतावृधः । प्र च हव्यानि वक्ष्यसि देवेभ्यश्च पितृभ्य आ
॥ त्वमग्न ईडितो जातवेदो ऽवाड्ढव्यानि सुरभीणि कृत्वा । प्रादाः पितृभ्यः स्वधया
ते अक्षन्नद्धि त्वं देव प्रयता हवीꣳषि ॥ मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्

ऋक्वभिर्वावृधानः । याग्श्च देवा वावृधुर्ये च देवान्थ्स्वाहान् ये स्वधयान्ये मदन्ति ।
७० इमं यम प्रस्तरमा हि सीदांगिरोभिः पितृभिः संविदानः । आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥ अंगिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व । विवस्वन्तꣳ हुवे यः पिता तेऽस्मिन्, यज्ञे बर्हिष्या निषद्य ॥ अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः । तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ २। ६। १२॥ भवास्मभ्यमसुं यदग्ने मदन्ति सौमनस एकं च ॥ २। ६। १२॥
समिधश्चक्षुषी प्रजापतिराज्यं देवस्य स्फ्यं ब्रह्मवादिनोद्भिरग्नेस्त्रयो मनुः पृथिव्याः पशवोग्नीधे देवा वै यज्ञस्य युक्ष्वोशंतस्त्वा द्वादश ॥
समिधो याज्या तस्मान्नाभागꣳ हितमन्वित्याह प्रजा वा आहेत्याह युक्ष्वा हि संततिः ॥
समिधः सौमनसे स्याम ॥
इति द्वितीयं काण्डं संपूर्णम् ॥
॥ तैत्तिरीय-संहिता ॥

# तैत्तिरीय-संहिता

## ॥ तृतीयं काण्डम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### तृतीयकाण्डे प्रथमः प्रश्नः १

१ प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत स सर्पानसृजत सोऽकामयत प्रजाः सृजेयेति स द्वितीयमतप्यत स वयाग्ंस्यसृजत सोऽकामयत प्रजाः सृजेयेति स तृतीयमतप्यत स एतं दीक्षितवादमपश्यत् तमवदत् ततो वै स प्रजा असृजत यत्तपस्तप्त्वा दीक्षितवादं वदति प्रजा एव तद्यजमानः

२ सृजते यद्वै दीक्षितोऽमेध्यं पश्यत्यपास्माद्दीक्षा क्रामति नीलमस्य हरो व्येत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाग्ं श्रेष्ठो दीक्षे मा मा हासीरित्याह नास्माद्दीक्षाऽप क्रामति नास्य नीलं न हरो व्येति यद्वै दीक्षितमभिवर्षति दिव्या आपोऽशान्ता ओजो बलं दीक्षां

३ तपोऽस्य निर्घ्नन्त्युन्दतीर्बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेत्याहैतदेव सर्वमात्मन्धत्ते नास्यौजो बलं न दीक्षां न तपो निर्घ्नन्त्यग्निर्वै दीक्षितस्य देवता सोऽस्मादेतर्हि तिर इव यर्हि याति तमीश्वरꣳ रक्षाꣳसि हन्तोः

४ भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुर एता ते अस्त्वित्याह ब्रह्म वै देवानां बृहस्पतिस्तमेवान्वारभते स एनꣳ सं पारयत्येदमगन्म देवयजनं पृथिव्या इत्याह देवयजनग्ं ह्येष पृथिव्या आगच्छति यो यजते विश्वे देवा यदजुषन्त पूर्व इत्याह विश्वे ह्येतद्देवा जोषयन्ते यद्ब्राह्मणा ऋक्सामाभ्यां यजुषा सन्तरन्त इत्याहर्क्सामाभ्याग्ं ह्येष यजुषा सन्तरति यो यजते रायस्पोषेण समिषा मदेमेत्याहाशिषमेवैतामा शास्ते ॥ ३। १। १॥

यजमानो दीक्षाꣳ हंतोर्ब्राह्मणाश्चतुर्विꣳशतिश्च ॥ ३। १। १॥

५ एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूताद्यो वै सोमꣳ राजानꣳ

साम्राज्यं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं छन्दाꣳसि खलु वै
सोमस्य राज्ञः साम्राज्यो लोकः पुरस्ताथ्सोमस्य क्रयादेवमभि मन्त्रयेत साम्राज्यमेवै
६ नं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं यो वै तानूनप्त्रस्य प्रतिष्ठां
वेद प्रत्येव तिष्ठति ब्रह्मवादिनो वदन्ति न प्राश्नन्ति न जुह्वत्यथ क्व तानूनप्त्रं प्रति
तिष्ठतीति प्रजापतौ मनसीति ब्रूयात्त्रिरव जिघ्रेत्प्रजापतौ त्वा मनसि जुहोमीत्येषा वै
तानूनप्त्रस्य प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति यो
७ वा अध्वर्योः प्रतिष्ठां वेद प्रत्येव तिष्ठति यतो मन्येतानभिक्रम्य होष्यामीति तत्तिष्ठन्ना
श्रावयेदेषा वा अध्वर्योः प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति यदभिक्रम्य जुहुयात्प्रतिष्ठाया
इयात् तस्माथ्समानत्र तिष्ठता होतव्यं प्रतिष्ठित्यै यो वा अध्वर्योः स्वं वेद स्ववानेव
भवति स्रुग्वा अस्य स्वं वायव्यमस्य
८ स्वं चमसोऽस्य स्वं यद्वायव्यं वा चमसं वानन्वारभ्याश्रावयेत् स्वादियात्
तस्मादन्वारभ्याश्राव्यग्ग् स्वादेव नैति यो वै सोममप्रतिष्ठाप्य स्तोत्रमुपाकरोत्यप्रतिष्ठितः
सोमो भवत्यप्रतिष्ठितः स्तोमोऽप्रतिष्ठितान्युक्थान्यप्रतिष्ठितो यजमानोऽप्रतिष्ठितोऽध्वर्युर्वायव्यं
वै सोमस्य प्रतिष्ठा चमसोऽस्य प्रतिष्ठा सोमः स्तोमस्य स्तोम उक्थानां ग्रहं वा गृहीत्वा
चमसं वोन्नीय स्तोत्रमुपाकुर्यात्प्रत्येव सोमग्ग् स्थापयति प्रति स्तोमं प्रत्युक्थानि प्रति
यजमानस्तिष्ठति प्रत्यध्वर्युः ॥ ३। १। २॥
एव तिष्ठति यो वायव्यमस्य ग्रहंवैकान्न विꣳशतिश्च ॥ ३। १। २॥
९ यज्ञं वा एतथ्सं भरन्ति यथ्सोमक्रयण्यै पदं यज्ञमुखꣳ हविर्धाने यर्हि हविर्धाने प्राची
प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्याद्यज्ञमुख एव यज्ञमनु सं तनोति प्राञ्चमग्निं प्र हरन्त्युत्पत्नीमा
नयन्त्यन्वनाꣳसि प्र वर्तयन्त्यथ वा अस्यैष धिष्णियो हीयते सोऽनु ध्यायति स ईश्वरो
रुद्रो भूत्वा
१० प्रजां पशून्, यजमानस्य शमयितोर्यर्हि पशुमाप्रीतमुदञ्चं नयन्ति तर्हि तस्य
पशुश्रपणꣳ हरेत् तेनैवैनं भागिनं करोति यजमानो वा आहवनीयो यजमानं वा एतद्वि
कर्षन्ते यदाहवनीयात् पशुश्रपणꣳ हरन्ति स वैव स्यान्निर्मन्थ्यं वा कुर्याद्यजमानस्य
सात्मत्वाय यदि पशोरवदानं नश्येदाज्यस्य प्रत्याख्यायमव द्येथ्सैव ततः प्रायश्चित्तिर्ये
पशुं विमथ्नीरन्, यस्तान् कामयेतार्तिमार्च्छेयुरिति कुविदङ्गेति नमो वृक्तिवत्यर्चाग्नीध्रे
जुहुयान्नमो वृक्तिमेवैषां वृङ्क्ते ताजगार्तिमार्च्छन्ति ॥ ३। १। ३॥ भूत्वा ततष्षड्विꣳशतिश्च
॥ ३। १। ३॥

११ प्रजापतेर्जायमानाः प्रजा जाताश्च या इमाः । तस्मै प्रति प्र वेदय चिकित्वाꣳ
अनु मन्यताम् ॥ इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने सुकृतस्य मध्ये । अनु मन्यस्व
सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यम् ॥ प्रजानन्तः प्रति गृह्णन्ति पूर्वे प्राणमङ्गेभ्यः
पर्याचरन्तम् । सुवर्गं याहि पथिभिर्देवयानैरोषधीषु प्रति तिष्ठा शरीरैः ॥ येषामीशे
१२ पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम् । निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा
यजमानस्य सन्तु ॥ ये बध्यमानमनु बध्यमाना अभ्यैक्षन्त मनसा चक्षुषा च । अग्निस्ताꣳ
अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया संविदानः ॥ य आरण्याः पशवो विश्वरूपा विरूपाः
सन्तो बहुधैकरूपाः । वायुस्ताꣳ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया संविदानः ॥
प्रमुञ्चमाना
१३ भुवनस्य रेतो गातुं धत्त यजमानाय देवाः । उपाकृतꣳ शशमानं यदस्थाज्जीवं
देवानामप्येतु पाथः ॥ नाना प्राणो यजमानस्य पशुना यज्ञो देवेभिः सह देवयानः ।
जीवं देवानामप्येतु पाथः सत्याः सन्तु यजमानस्य कामाः ॥ यत्पशुर्मायुमकृतोरो वा
पद्भिराहते । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ शमितार उपेतन यज्ञं
१४ देवेभिरिन्वितम् । पाशात् पशुं प्र मुञ्चत बन्धाद्यज्ञपतिं परि ॥ अदितिः पाशं प्र
मुमोक्त्वेतं नमः पशुभ्यः पशुपतये करोमि । अरातीयन्तमधरं कृणोमि यं द्विष्मस्तस्मिन्प्रति
मुञ्चामि पाशम् ॥
त्वामु ते दधिरे हव्यवाहꣳ शृतं कर्तारमुत यज्ञियं च । अग्ने सदक्षः सतनुर्हि भूत्वाथ
हव्या जातवेदो जुषस्व ॥ जातवेदो वपया गच्छ देवान्त्वꣳ हि होता प्रथमो बभूथ
। घृतेन त्वं तनुवो वर्धयस्व स्वाहाकृतꣳ हविरदन्तु देवाः ॥ स्वाहा देवेभ्यो देवेभ्यः
स्वाहा ॥ ३। १। ४॥ ईशे प्रमुंचमाना यज्ञं त्वꣳ षोडश च ॥ ३। १। ४॥
१५ प्राजापत्या वै पशवस्तेषाꣳरुद्रोऽधिपतिर्यदेताभ्यामुपाकरोति ताभ्यामेवैनं प्रतिप्रोच्या
लभत आत्मनोऽनाव्रस्काय द्वाभ्यामुपाकरोति द्विपाद्यजमानः प्रतिष्ठित्या उपाकृत्य पञ्च
जुहोति पाङ्क्ताः पशवः पशूनेवाव रुंधे मृत्यवे वा एष नीयते यत्पशुस्तं यदन्वारभेत
प्रमायुको यजमानः स्यान्नाना प्राणो यजमानस्य पशुनेत्याह व्यावृत्त्यै
१६ यत्पशुर्मायुमकृतेति जुहोति शान्त्यै शमितार उपेतनेत्याह यथायजुरेवैतद्वपायां वा
आह्रियमाणायामग्नेर्मेधोऽप क्रामति त्वामु ते दधिरे हव्यवाहमिति वपामभि जुहोत्यग्नेरेव
मेधमव रुंधेऽथो शृतत्वाय पुरस्ताथ्स्वाहाकृतयो वा अन्ये देवा उपरिष्टाथ्स्वाहाकृतयोऽन्ये

स्वाहा देवेभ्यो देवेभ्यः स्वाहेत्यभितो वपां जुहोति तानेवोभयान्प्रीणाति ॥ ३। १। ५॥ व्यावृत्या अभितो वपां पंच च ॥ ३। १। ५॥
१७ यो वा अयथादेवतं यज्ञमुपचरत्या देवताभ्यो वृश्च्यते पापीयान्भवति यो यथादेवतं न देवताभ्य आ वृश्च्यते वसीयान्भवत्याग्नेय्यर्चाग्नीध्रमभि मृशेद्वैष्णव्या हविर्धानमाग्नेय्या स्रुचो वायव्यया वायव्यान्यैन्द्रिया सदो यथादेवतमेव यज्ञमुप चरति न देवताभ्य आ वृश्च्यते वसीयान्भवति युनज्मि ते पृथिवीं ज्योतिषा सह युनज्मि वायुमन्तरिक्षेण
१८ ते सह युनज्मि वाचꣳसह सूर्येण ते युनज्मि तिस्रो विपृचः सूर्यस्य ते । अग्निर्देवता गायत्री छंद उपाꣳशोः पात्रमसि सोमो देवता त्रिष्टुप्छन्दोऽन्तर्यामस्य पात्रमसीन्द्रो देवता जगती छंद इन्द्रवायुवोः पात्रमसि बृहस्पतिर्देवतानुष्टुप्छन्दो मित्रावरुणयोः पात्रमस्यश्विनौ देवता पङ्क्तिश्छन्दोऽश्विनोः पात्रमसि सूर्यो देवता बृहती
१९ छंदः शुक्रस्य पात्रमसि चन्द्रमा देवता सतोबृहती छन्दो मन्थिनः पात्रमसि विश्वे देवा देवतोष्णिहा छंद आग्रयणस्य पात्रमसीन्द्रो देवता ककुच्छंद उक्थानां पात्रमसि पृथिवी देवता विराड्छन्दो ध्रुवस्य पात्रमसि ॥ ३। १। ६॥ अंतरिक्षेण बृहती त्रयस्त्रिꣳशच्च ॥ ३। १। ६॥
२० इष्टर्गो वा अध्वर्युर्यजमानस्येष्टर्गः खलु वै पूर्वोऽर्ष्टुः, क्षीयत आसन्यान्मा मन्त्रात्पाहि कस्याश्चिदभिशस्त्या इति पुरा प्रातरनुवाकाज्जुहुयादात्मन एव तदध्वर्युः पुरस्ताच्छर्म नह्यतेऽनार्त्यै संवेशाय त्वोपवेशाय त्वा गायत्रियास्त्रिष्टुभो जगत्या अभिभूत्यै स्वाहा प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं देवतासु वा एते प्राणापानयो
२१ र्व्यायच्छन्ते येषाꣳ सोमः समृच्छते संवेशाय त्वोपवेशाय त्वेत्याह छन्दाꣳसि वै संवेश उपवेशश्छन्दोभिरेवास्य छन्दाꣳसि वृङ्क्ते प्रेतिवन्त्याज्यानि भवन्त्यभिजित्यै मरुत्वतीः प्रतिपदो विजित्या उभे बृहद्रथन्तरे भवत इयं वाव रथंतरमसौ बृहदाभ्यामेवैनमन्तरेत्यद्य वाव रथंतरꣳ श्वो बृहदद्याश्वादेवैनमन्तरेति भूतं
२२ वाव रथंतरं भविष्यद् बृहद्भूताश्चैवैनं भविष्यतश्चान्तरेति परिमितं वाव रथंतरमपरिमितं बृहत् परिमिताच्चैवैनमपरिमिताच्चान्तरेति विश्वामित्रजमदग्नीवसिष्ठेनास्पर्धेताꣳ स एतज्जमदग्निर्विहव्यमपश्यत्तेन वै स वसिष्ठस्येन्द्रियं वीर्यमवृङ्क्त यद्विहव्यꣳ शस्यत इन्द्रियमेव तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते यस्य भूयाꣳसो यज्ञक्रतव इत्याहुः स देवता वृङ्क्त इति यद्यग्निष्टोमः सोमः परस्तात्स्यादुक्थ्यं कुर्वीत यद्युक्थ्यः स्यादतिरात्रं कुर्वीत यज्ञक्रतुभिरेवास्य देवता वृङ्क्ते वसीयान्भवति ॥ ३। १। ७॥ प्राणापानयोर्भूतं

वृक्तेष्टाविँशतिश्च ॥ ३। १। ७॥

२३ निग्राभ्याः स्थ देवश्रुत आयुर्मे तर्पयत प्राणं मे तर्पयतापानं मे तर्पयत व्यानं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत मनो मे तर्पयत वाचं मे तर्पयतात्मानं मे तर्पयताङ्गानि मे तर्पयत प्रजां मे तर्पयत पशून् मे तर्पयत गृहान् मे तर्पयत गणान् मे तर्पयत सर्वगणं मा तर्पयत तर्पयत मा

२४ गणा मे मा वि तृषन्नोषधयो वै सोमस्य विशो विशः खलु वै राज्ञः प्रदातोरीश्वरा ऐन्द्रः सोमोऽवीवृधं वो मनसा सुजाता ऋतप्रजाता भग इद्वः स्याम । इन्द्रेण देवीर्वीरुधः संविदाना अनु मन्यन्ताँ सवनाय सोममित्याहौषधीभ्य एवैनग्ग् स्वायै विशः स्वायै देवतायै निर्याच्याभि षुणोति यो वै सोमस्याभिषूयमाणस्य

२५ प्रथमोँशुः स्कन्दति स ईश्वर इन्द्रियं वीर्यं प्रजां पशून्, यजमानस्य निर्हन्तोस्तमभि मन्त्रयेता मास्कान्थ्सह प्रजया सह रायस्पोषेणेन्द्रियम् मे वीर्यं मा निर्वधीरित्याशिषमेवैतामा शास्त इन्द्रियस्य वीर्यस्य प्रजायै पशूनामनिर्घाताय द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः । तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ ३। १। ८॥ तर्पयत माभिषूयमाणस्य यश्च दश च ॥ ३। १। ८॥

२६ यो वै देवान् देवयशसेनार्पयति मनुष्यान्मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येषु यान् प्राचीनमाग्रयणाद् ग्रहान् गृह्णीयात् तानुपाँशु गृह्णीयाद्यानूर्ध्वाग् स्तानुपब्दिमतो देवानेव तद्देवयशसेनार्पयति मनुष्यान् मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येष्वग्निः प्रातःसवने पात्वस्मान्वैश्वानरो महिना विश्वशंभूः । स नः पावको द्रविणं दधा

२७ त्वायुष्मन्तः सहभक्षाः स्याम ॥ विश्वे देवा मरुत इन्द्रो अस्मानस्मिन्द्वितीये सवने न जह्युः । आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानाँसुमतौ स्याम ॥ इदं तृतीयँ सवनं कवीनामृतेन ये चमसमैरयन्त । ते सौधन्वनाः सुवरानशानाः स्विष्टिं नो अभि वसीयो नयन्तु ॥ आयतनवतीर्वा अन्या आहुतयो हूयन्तेऽनायतना अन्या या आघारवतीस्ता आयतनवतीर्याः

२८ सौम्यास्ता अनायतना ऐन्द्रवायवमादायाघारमाघारयेदध्वरो यज्ञोऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय विश्वस्मै भूतायाध्वरोऽसि स पिन्वस्व घृतवद्देव सोमेति सौम्या एव तदाहुतीरायतनवतीः करोत्यायतनवान्भवति य एवं वेदाथो द्यावापृथिवी एव

घृतेन व्युनक्ति ते व्युत्ते उपजीवनी ये भवत उपजीवनीयो भवति
२९ य एवं वेदैष ते रुद्र भागो यं निरयाचथास्तं जुषस्व विदेर्गौपत्यꣳ रायस्पोषꣳसुवीर्यꣳ संवथ्सरीणाग्ं स्वस्तिम् ॥ मनुः पुत्रेभ्यो दायं व्यभजथ्स नाभानेदिष्ठं ब्रह्मचर्यं वसन्तं निरभजथ्स आगच्छथ्सोऽब्रवीत्कथा मा निरभागिति न त्वा निरभाक्षमित्यब्रवीदंगिरस इमे सत्रमासते ते
३० सुवर्गं लोकं न प्र जानन्ति तेभ्य इदं ब्राह्मणं ब्रूहि ते सुवर्गं लोकं यन्तो य एषां पशवस्ताग्स्ते दास्यन्तीति तदेभ्योऽब्रवीत्ते सुवर्गं लोकं यन्तो य एषां पशव आसन्तानस्मा अददुस्तं पशुभिश्चरन्तं यज्ञवास्तौ रुद्र आगच्छथ्सोऽब्रवीन्मम वा इमे पशव इत्यदुर्वै
३१ मह्यमिमानित्यब्रवीन्न वै तस्य त ईशत इत्यब्रवीद्यद्यज्ञवास्तौ हीयते मम वै तदिति तस्माद्यज्ञवास्तु नाभ्यवेत्यꣳ सोऽब्रवीद्यज्ञे मा भजाथ ते पशून्नाभि मग्ग्स्य इति तस्मा एतं मन्थिनः सग्ग् स्रावमजुहोत्ततो वै तस्य रुद्रः पशून्नाभ्यमन्यत यत्रैतमेवं विद्वान्मन्थिनः स२ꣳ स्रावं जुहोति न तत्र रुद्रः पशूनभि मन्यते ॥ ३। १। ९॥ दधात्वायतनवतीर्या उप जीवनीयो भवति तेऽदुर्वै यत्रैतमेकादश च ॥ ३। १। ९॥
३२ जुष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाक् । यद्वाचो मधुमत्तस्मिन्माधाः स्वाहा सरस्वत्यै ॥ ऋचा स्तोमꣳ समर्धय गायत्रेण रथंतरम् । बृहद्गायत्रवर्तनि ॥ यस्ते द्रप्स स्कन्दति यस्ते अꣳशुर्बाहुच्युतो धिषणयोरुपस्थात् । अध्वर्य्वोर्वा परि यस्ते पवित्राथ् स्वाहाकृतमिंद्राय तं जुहोमि ॥ यो द्रप्सो अꣳशुः पतितः पृथिव्यां परिवापात्
३३ पुरोडाशात् करंभात् । धानासोमान्मन्थिन इन्द्र शुक्रात् स्वाहाकृतमिन्द्राय तं जुहोमि ॥ यस्ते द्रप्सो मधुमाꣳ इन्द्रियावान्थ्स्वाहाकृतः पुनरप्येति देवान् । दिवः पृथिव्याः पर्यन्तरिक्षाथ्स्वाहाकृतमिन्द्राय तं जुहोमि ॥ अध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन स्तोमो योक्तव्य इत्याहुर्वागग्रेगा अग्र एत्वृजुगा देवेभ्यो यशो मयि दधती प्राणान्पशुषु प्रजां मयि
३४ च यजमाने चेत्याह वाचमेव तद्यज्ञमुखे युनक्ति वास्तु वा एतद्यज्ञस्य क्रियते यद्ग्रहान्गृहीत्वा बहिष्पवमानꣳ सर्पन्ति पराञ्चो हि यन्ति पराचीभिः स्तुवते वैष्णव्यर्चा पुनरेत्योप तिष्ठते यज्ञो वै विष्णुर्यज्ञमेवाकर्विष्णो त्वं नो अन्तमः शर्म यच्छ सहन्त्य । प्र ते धारा मधुश्चुत उथ्सं दुह्रते अक्षितमित्याह यदेवास्य शयानस्योप शुष्यति तदेवास्यैतेनाप्याययति ॥ ३। १। १०॥

परिवापात्प्रजां मयि दुह्रते चतुर्दश च ॥ ३। १। १०॥
३५ अग्निना रयिमश्नवत् पोषमेव दिवे दिवे । यशसं वीरवत्तमम् ॥
गोमाꣳ अग्नेऽविमाꣳ अश्वी यज्ञो नृवथ्सखा सदमिदप्रमृष्यः । इडावाꣳ एषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान् ॥ आ प्यायस्व सं ते ॥ इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये । अस्माकमस्तु केवलः ॥ तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व । यतो वीरः
३६ कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ शिवस्त्वष्टरिहा गहि विभुः पोष उत त्मना । यज्ञे यज्ञे न उदव ॥ पिशंगरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः । प्रजां त्वष्टा विष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥ प्रणो देव्या नो दिवः ॥ पीपिवाꣳ सꣳ सरस्वतः स्तनं यो विश्वदर्शतः । धुक्षीमहि प्रजामिषम् ॥
३७ ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः । तेषां ते सुम्नमीमहे ॥ यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः । यस्य व्रते पुष्टिपतिर्निविष्टस्तꣳ सरस्वन्तमवसे हुवेम ॥
दिव्यꣳ सुपर्णं वयसं बृहन्तमपां गर्भं वृषभमोषधीनाम् । अभीपतो वृष्ट्या तर्पयन्तं तꣳ सरस्वन्तमवसे हुवेम ॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्य
३८ माहुतं प्रजां देवि दिदिड्ढि नः ॥ या सुपाणिः स्वङ्गुरिः सुषूमा बहुसूवरी । तस्यै विश्पत्नियै हविः सिनीवाल्यै जुहोतन ॥ इन्द्रं वो विश्वतस्परीन्द्रं नरः ॥ असितवर्णा हरयः सुपर्णा मिहो वसाना दिवमुत्पतन्ति । त आववृत्रन्थ्सदनानि कृत्वादित्पृथिवी घृतैर्व्युद्यते ॥ हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव ध्रजीमान् । शुचिभ्राजा उषसो
३९ नवेदा यशस्वतीरपस्युवो न सत्याः ॥ आ ते सुपर्णा अमिनन्त एवैः कृष्णो नोनाव वृषभो यदीदम् । शिवाभिर्न स्मयमानाभिरागात्पतन्ति मिहः स्तनयन्त्यभ्रा ॥ वाश्रेव विद्युन्मिमाति वथ्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि ॥ पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चिथ्सानु रेजत स्वने वः । यत्क्रीडथ मरुत
४० ऋष्टिमन्त आप इव सध्रियञ्चो धवध्वे ॥ अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन । दृतिꣳ सु कर्ष विषितं न्यञ्चꣳ समा भवन्तूद्वता निपादाः ॥ त्वं त्या चिदच्युताग्ने पशुर्न यवसे । धामाह यत्ते अजर वना वृश्चन्ति शिक्वसः ॥ अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य धाम । याश्च

४१ माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ॥
दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः । अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥
पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः । अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम् ॥
उदप्रुतो मरुतस्ताꣳ इयर्त वृष्टिं
४२ ये विश्वे मरुतो जुनन्ति । क्रोशाति गर्दा कन्येव तुन्ना पेरुं तुञ्जाना पत्येव जाया ॥
घृतेन द्यावापृथिवी मधुना समुक्षत पयस्वतीः कृणुताप ओषधीः । ऊर्जं च तत्र सुमतिं च पिन्वथ यत्रा नरो मरुतः सिञ्चथा मधु ॥ उदु त्यं चित्रम् ॥
और्वभृगुवच्छुचिमप्रवानवदा हुवे । अग्निꣳ समुद्रवाससम् ॥ आ सवꣳ सवितुर्यथा भगस्येव भुजिꣳ हुवे । अग्निꣳ समुद्रवाससम् ॥ हुवे वातस्वनं कविं पर्जन्यक्रन्द्यꣳ सहः । अग्निꣳ समुद्रवाससम् ॥ ३। १। ११॥ वीर इषꣳ हव्यमुषसो मरुतश्च वृष्टिं भगस्य द्वादश च ॥ ३। १। ११॥
प्रजापतिरकामयतैष ते गायत्रो यज्ञं वै प्रजापतेर्जायमानाः प्राजापत्या यो वा अयथा देवतमिष्टर्गो निग्राभ्याःस्थ यो वै देवाञ्जुष्टोऽग्निना रयिमेकादश ॥
प्रजापतिरकामयत प्रजापतेर्जायमाना व्यायच्छंते मह्यमिमान्माया मायिनां द्विचत्वारिꣳशत् ॥
प्रजापतिरकामयताग्निꣳ समुद्रवाससम् ॥

## तृतीयकाण्डे द्वितीयः प्रश्नः २

१ यो वै पवमानानामन्वारोहान्, विद्वान्, यजतेऽनु पवमानाना रोहति न पवमानेभ्योऽवच्छिद्यते श्येनोऽसि गायत्र छन्दा अनु त्वारभे स्वस्ति मा सं पारय सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वारभे स्वस्ति मा सं पारय सघासि जगती छन्दा अनु त्वारभे स्वस्ति मा सं पारयेत्याहैते
२ वै पवमानानामन्वारोहास्तान्, य एवं विद्वान्, यजतेऽनु पवमानाना रोहति न पवमानेभ्योऽव च्छिद्यते यो वै पवमानस्य सन्ततिं वेद सर्वमायुरेति न पुरायुषः प्र मीयते पशुमान्भवति विन्दते प्रजां पवमानस्य ग्रहा गृह्यन्तेऽथ वा अस्यैतेऽगृहीता द्रोणकलश आधवनीयः पूतभृत्तान्, यदगृहीत्वोपाकुर्यात्पवमानं वि

३ च्छिन्द्यात्तं विच्छिद्यमानमध्वर्योः प्राणोऽनु वि च्छिद्येतोपयामगृहीतोऽसि प्रजापतये
त्वेति द्रोणकलशमभि मृशेदिन्द्राय त्वेत्याधवनीयं विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतं
पवमानमेव तथ्सं तनोति सर्वमायुरेति न पुरायुषः प्र मीयते पशुमान्भवति विन्दते
प्रजाम् ॥ ३। २। १॥ एते द्विचत्वारिꣳशच्च ॥ ३। २। १॥
४ त्रीणि वाव सवनान्यथ तृतीयꣳ सवनमव लुंपन्त्यनꣳशु कुर्वन्त उपाꣳशुꣳ
हुत्वोपाꣳशु पात्रेऽꣳशुमवास्य तं तृतीय सवनेऽपिसृज्याभि षुणुयाद्यदाप्याययति
तेनाꣳशुमद्यदभिषुणोति तेनर्जीषि सर्वाण्येव तथ्सवनान्यꣳशुमन्ति शुक्रवन्ति
समावद्वीर्याणि करोति द्वौ समुद्रौ विततावजूर्यौ पर्यावर्तेते जठरेव पादाः । तयोः
पश्यन्तो अति यन्त्यन्यमपश्यन्तः
५ सेतुनाति यन्त्यन्यम् ॥ द्वे द्रधसी सतती वस्त एकः केशी विश्वा भुवनानि विद्वान्
। तिरोधायैत्यसितं वसानः शुक्रमा दत्ते अनुहाय जार्यै ॥ देवा वै यद्यज्ञेऽकुर्वत
तदसुरा अकुर्वत ते देवा एतं महायज्ञमपश्यन्तमतन्वताग्निहोत्रं व्रतमकुर्वत तस्माद्द्विव्रतः
स्याद्द्विर्ह्यग्निहोत्रं जुह्वति पौर्णमासं यज्ञमग्नीषोमीयं
६ पशुमकुर्वत दार्श्यं यज्ञमाग्नेयं पशुमकुर्वत वैश्वदेवं प्रातः सवनमकुर्वत
वरुणप्रघासान्माध्यन्दिनꣳ सवनꣳ साकमेधान् पितृयज्ञं त्र्यंबकाग् स्तृतीयसवनमकुर्वत
तमेषामसुरा यज्ञमन्ववाजिगाꣳ सन्तं नान्ववायन्तेऽब्रुवन्नध्वर्तव्या वा इमे देवा अभूवन्निति
तदध्वरस्याध्वरत्वं ततो देवा अभवन्परासुरा य एवं विद्वान्थ्सोमेन यजते भवत्यात्मना
परास्य भ्रातृव्यो भवति ॥
३। २। २॥ अपश्यंतोऽग्नीषोमीयमात्मना परा त्रीणि च ॥ ३। २। २॥
७ परिभूरग्निं परिभूरिन्द्रं परिभूर्विश्वान् देवान्परिभूर्माꣳ सह ब्रह्मवर्चसेन स नः पवस्व शं
गवे शं जनाय शमर्वते शꣳ राजन्नोषधीभ्योऽच्छिन्नस्य ते रयिपते सुवीर्यस्य रायस्पोषस्य
ददितारः स्याम । तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे ॥
प्राणाय मे वर्चोदा वर्चसे पवस्वापानाय व्यानाय वाचे
८ दक्ष क्रतुभ्यां चक्षुर्भ्यां मे वर्चोदौ वर्चसे पवेथाग् श्रोत्रायात्मनेऽङ्गेभ्य आयुषे वीर्याय
विष्णोरिन्द्रस्य विश्वेषां देवानां जठरमसि वर्चोदा मे वर्चसे पवस्व कोऽसि को नाम
कस्मै त्वा काय त्वा यं त्वा सोमेनातीतृपं यं त्वा सोमेनामीमदꣳ सुप्रजाः प्रजया
भूयासꣳ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैर्विश्वेभ्यो मे रूपेभ्यो वर्चोदा

९ वर्चसे पवस्व तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे ॥
बुभूषन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तो भूत्याभि
पवते ब्रह्मवर्चसकामोऽवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं
तृप्तो ब्रह्मवर्चसेनाभि पवत आमयाव्य
१० वेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्त आयुषाभि
पवतेऽभिचरन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तः
प्राणापानाभ्यां वाचो दक्षक्रतुभ्यां चक्षुर्भ्यां श्रोत्राभ्यामात्मनोऽङ्गेभ्य आयुषोऽन्तरेति
ताजक् प्र धन्वति ॥ ३। २। ३॥ वाचे रूपेभ्यो वर्चोदा आमयावी पंच चत्वारिꣳशच्च
॥ ३। २। ३॥
११ स्फ्यः स्वस्तिर्विघनः स्वस्तिः पर्शुर्वेदिः परशुर्नः स्वस्तिः । यज्ञिया यज्ञकृतः स्थ
ते मास्मिन्, यज्ञ उप ह्वयध्वमुप मा द्यावापृथिवी ह्वयेतामुपास्तावः कलशः सोमो
अग्निरुप देवा उप यज्ञ उप मा होत्रा उपहवे ह्वयन्तां नमोऽग्नये मखघ्ने मखस्य मा
यशोऽर्यादित्याहवनीयमुप तिष्ठते यज्ञो वै मखो
१२ यज्ञं वाव स तदहन्तस्मा एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै नमो रुद्राय
मखघ्ने नमस्कृत्या मा पाहीत्याग्नीध्रं तस्मा एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै नम
इन्द्राय मखघ्न इंद्रियं मे वीर्यं मा निर्वधीरिति होत्रीयमाशिषमेवैतामा शास्त इन्द्रियस्य
वीर्यस्यानिर्घाताय या वै
१३ देवताः सदस्यार्तिमार्पयन्ति यस्ता विद्वान्प्रसर्पति न सदस्यार्तिमार्च्छति नमोऽग्नये
मखघ्न इत्याहैता वै देवताः सदस्यार्तिमार्पयन्ति ता य एवं विद्वान्प्रसर्पति न
सदस्यार्तिमार्छति दृढे स्थः शिथिरे समीची माꣳहसस्पातꣳ सूर्यो मा देवो
दिव्यादꣳहसस्पातु वायुरन्तरिक्षा
१४ ऽदग्निः पृथिव्या यमः पितृभ्यः सरस्वती मनुष्येभ्यो देवी द्वारौ मा मा संताप्तं नमः
सदसे नमः सदसस्पतये नमः सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्या अहे
दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योऽस्मत्पाकतर उन्निवत उदुद्वतश्च गेषं पातं मा
द्यावापृथिवी अद्याह्नः सदो वै प्रसर्पन्तं
१५ पितरोऽनु प्र सर्पन्ति त एनमीश्वरा हिꣳसितोः सदः प्रसृप्य दक्षिणार्धं परेक्षेतागन्त
पितरः पितृमानहं युष्माभिर्भूयासꣳ सुप्रजसो मया यूयं भूयास्तेति तेभ्य एव नमस्कृत्य
सदः प्र सर्पत्यात्मनोऽनार्त्यै ॥ ३। २। ४॥ मखो वा अंतरिक्षात्प्रसर्पंतं त्रयस्त्रिꣳशच्च ॥

३। २। ४॥
१६ भक्षेहि मा विश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय वर्चसे सुप्रजास्त्वायेहि वसो पुरोवसो प्रियो मे हृदोऽस्यश्विनोस्त्वा बाहुभ्याꣳ सघ्यासं नृचक्षसं त्वा देव सोम सुचक्षा अव ख्येषं मन्द्राभिभूतिः केतुर्यज्ञानां वाग्जुषाणा सोमस्य तृप्यतु मन्द्रा स्वर्वाच्यदितिरनाहतशीर्ष्णी वाग्जुषाणा सोमस्य तृप्यत्वेहि विश्वचर्षणे
१७ शं भूर्मयोभूः स्वस्ति मा हरिवर्ण प्र चर क्रत्वे दक्षाय रायस्पोषाय सुवीरतायै मा मा राजन्वि बीभिषो मा मे हार्दित्विषा वधीः । वृषणे शुष्मायायुषे वर्चसे ॥ वसुमद्गणस्य सोम देव ते मतिविदः प्रातः सवनस्य गायत्र छंदस इन्द्रपीतस्य नराशꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि रुद्रवद्गणस्य सोम देव ते मतिविदो माध्यन्दिनस्य सवनस्य त्रिष्टुप्छंदस इन्द्रपीतस्य नराशꣳसपीतस्य
१८ पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयाम्यादित्यवद्गणस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगती छंदस इन्द्रपीतस्य नराशꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि ॥
आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियम् । भवा वाजस्य सङ्गथे ॥
हिन्व मे गात्रा हरिवो गणान्मे मा वि तीतृषः । शिवो मे सप्तर्षीनुप तिष्ठस्व मा मेवाङ्गाभिमति
१९ गाः ॥ अपाम सोमममृता अभूमादर्श्म ज्योतिरविदाम देवान् । किमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥
यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिः । पुनरग्निश्चक्षुरदात्पुनरिन्द्रो बृहस्पतिः । पुनर्मे अश्विना युवं चक्षुरा धत्तमक्ष्योः ॥ इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य
२० शस्तोक्थस्य हरिवत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि ॥ आपूर्याः स्था मा पूरयत प्रजया च धनेन च ॥ एतत्ते तत ये च त्वामन्वेतत्ते पितामह प्रपितामह ये च त्वामन्वत्र पितरो यथाभागं मन्दध्वं नमो वः पितरो रसाय नमो वः पितरः शुष्माय नमो वः पितरो जीवाय नमो वः पितरः
२१ स्वधायै नमो वः पितरो मन्यवे नमो वः पितरो घोराय पितरो नमो वो य एतस्मिं३ꣳल्लोके स्थ युष्माग्स्तेऽनु येऽस्मिं३ꣳल्लोके मां तेऽनु य एतस्मिं३ꣳल्लोके स्थ यूयं तेषां वसिष्ठा भूयास्त येऽस्मिं३ꣳल्लोकेऽहं तेषां वसिष्ठो भूयासं प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।

२२ यत्कामास्ते जुहुमस्तन्नो अस्तु वय२ँ स्याम पतयो रयीणाम् ॥
देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमस्यप्सु धौतस्य सोम देव ते नृभिः सुतस्येष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य यो भक्षो अश्वसनिर्ज्यो गोसनिस्तस्य ते पितृभिर्भक्षं कृतस्योपहूतस्योपहूतो भक्षयामि ॥ ३। २।
५॥ विश्वचर्षणे त्रिष्टुप्छंदस इंद्रपीतस्य नराश२ँसपीतस्याति स्तुतस्तोमस्य जीवाय नमो वः पितरो बभूव चतुश्चत्वारि२ँशच्च ॥ ३। २। ५॥
२३ महीनां पयोऽसि विश्वेषां देवानां तनूर्ऋध्यासमद्य पृषतीनां ग्रहं पृषतीनां ग्रहोऽसि विष्णोर्हृदयमस्येकमिष विष्णुस्त्वानु वि चक्रमे भूतिर्दध्ना घृतेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमा गम्याज्ज्योतिरसि वैश्वानरं पृश्निये दुग्धं यावती द्यावापृथिवी महित्वा यावच्च सप्त सिन्धवो वितस्थुः । तावन्तमिन्द्र ते
२४ ग्रह२ँ सहोर्जा गृह्णाम्यस्तृतम् ॥ यत्कृष्णशकुनः पृषदाज्यमवमृशेच्छूद्रा अस्य प्रमायुकाः स्युर्यच्छ्वाव मृशेच्चतुष्पादोऽस्य पशवः प्रमायुकाः स्युर्यत् स्कन्देद्यजमानः प्रमायुकः स्यात्पशवो वै पृषदाज्यं पशवो वा एतस्य स्कन्दन्ति यस्य पृषदाज्य२ँ स्कन्दति यत्पृषदाज्यं पुनर्गृह्णाति पशूनेवास्मै पुनर्गृह्णाति प्राणो वै पृषदाज्यं प्राणो वा
२५ एतस्य स्कन्दति यस्य पृषदाज्य२ँ स्कन्दति यत्पृषदाज्यं पुनर्गृह्णाति प्राणमेवास्मै पुनर्गृह्णाति हिरण्यमवधाय गृह्णात्यमृतं वै हिरण्यं प्राणः पृषदाज्यममृतमेवास्य प्राणे दधाति शतमानं भवति शतायुः पुरुषः शतेंद्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यश्वमव घ्रापयति प्राजापत्यो वा अश्वः प्राजापत्यः प्राणः स्वादेवास्मै योनेः प्राणं निर्मिमीते वि वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्य२ँ स्कन्दति वैष्णव्यर्चा पुनर्गृह्णाति यज्ञो वै विष्णुर्यज्ञेनैव यज्ञ२ँ सं तनोति ॥ ३। २। ६॥ ते पृषदाज्यं प्राणो वै योनेः प्राणं द्वावि२ँशतिश्च ॥ ३। २। ६॥
२६ देव सवितरेतत्ते प्राह तत्प्र च सुव प्र च यज बृहस्पतिर्ब्रह्मायुष्मत्या ऋचो मा गात तनूपाथ्साम्नः सत्या व आशिषः सन्तु सत्या आकूतय ऋतं च सत्यं च वदत स्तुत देवस्य सवितुः प्रसवे स्तुतस्य स्तुतमस्यूर्जं मह्यग्ग् स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्र
२७ मस्यूर्जं मह्य२ँशस्त्रं दुहामा मा शस्त्रस्य शस्त्रं गम्यादिन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषम् ॥ सा मे सत्याशीर्देवेषु भूयाद्ब्रह्म वर्चसं मागम्यात् ॥ यज्ञो बभूव स आ बभूव स प्र जज्ञे स वावृधे । स देवानामधिपतिर्बभूव सो अस्मा२ँ अधिपतीन्करोतु

वय२ँ स्याम पतयो रयीणाम् ॥ यज्ञो वा वै
२८ यज्ञपतिं दुहे यज्ञपतिर्वा यज्ञं दुहे स यः स्तुतशस्त्रयोर्दोहमविद्वान् यजते तं यज्ञो दुहे स इष्ट्वा पापीयान्भवति य एनयोर्दोहं विद्वान् यजते स यज्ञं दुहे स इष्ट्वा वसीयान्भवति स्तुतस्य स्तुतमस्यूर्जं मह्यग्ग् स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्रमस्यूर्जं मह्यँशस्त्रं दुहामा मा शस्त्रस्य शस्त्रं गम्यादित्याहैष वै स्तुतशस्त्रयोर्दोहस्तं य एवं विद्वान् यजते दुह एव यज्ञमिष्ट्वा वसीयान्भवति ॥ ३। २। ७॥
शस्त्रं वै शस्त्रं दुहां द्वाविँशतिश्च ॥ ३। २। ७॥
२९ श्येनाय पत्वने स्वाहा वट्थ्स्वयमभिगूर्ताय नमो विष्टंभाय धर्मणे स्वाहा वट्थ्स्वयमभिगूर्ताय नमः परिधये जनप्रथनाय स्वाहा वट्थ्स्वयमभिगूर्ताय नम ऊर्जे होत्राणाग् स्वाहा वट्थ्स्वयमभिगूर्ताय नमः पयसे होत्राणाग् स्वाहा वट्थ्स्वयमभिगूर्ताय नमः प्रजापतये मनवे स्वाहा वट्थ्स्वयमभिगूर्ताय नम ऋतमृतपाः सुवर्वाट् थ्स्वाहा वट्थ्स्वयमभिगूर्ताय नमस्तृंपन्ता ँ होत्रा मधोर्घृतस्य यज्ञपतिमृषय एनसा
३० ऽहुः । प्रजा निर्भक्ता अनुतप्यमाना मधव्यौ स्तोकावप तौ रराध । सं नस्ताभ्याँ सृजतु विश्वकर्मा घोरा ऋषयो नमो अस्त्वेभ्यः । चक्षुष एषां मनसश्च सन्धौ बृहस्पतये महि षद्युमन्नमः । नमो विश्वकर्मणे स उ पात्वस्माननन्यान्थ्सोमपान् मन्यमानः । प्राणस्य विद्वान्थ्समरे न धीर एनश्चकृवान्महि बद्ध एषाम् ॥ तं विश्वकर्मन्
३१ प्र मुञ्चा स्वस्तये ये भक्षयन्तो न वसून्यानृहुः । यानग्नयोऽन्वतप्यन्त धिष्णिया इयं तेषामवया दुरिष्ट्यै स्विष्टिं नस्तां कृणोतु विश्वकर्मा ॥ नमः पितृभ्यो अभि ये नो अख्यन्, यज्ञकृतो यज्ञकामाः सुदेवा अकामा वो दक्षिणां न नीनिम मा नस्तस्मादेनसः पापयिष्ट । यावन्तो वै सदस्यास्ते सर्वेदक्षिण्यास्तेभ्यो यो दक्षिणां न
३२ नयेदेभ्यो वृश्च्येत यद्वैश्वकर्मणानि जुहोति सदस्यानेव तत्प्रीणात्यस्मे देवासो वपुषे चिकित्सत यमाशिरा दंपती वाममश्नुतः । पुमान्पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः ॥
आशीर्दाया दंपती वाममश्नुतामरिष्टो रायः सचता ँ समोकसा । य आसिचथ्संदुग्धं कुंभ्या सहेष्टेन यामन्नमतिं जहातु सः ॥
सर्पिर्ग्रीवी
३३ पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य । सहजानिर्यः सुमखस्यमान

इन्द्रायाशिरꣳ सह कुंभ्यादात् ॥ आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणꣳ
सवर्चसम् । सञ्जयन् क्षेत्राणि सहसाहमिन्द्र कृण्वानो अन्याꣳ अधरान्त्सपत्नान् ॥
भूतमसि भूते मा धा मुखमसि मुखं भूयासं द्यावापृथिवीभ्यां त्वा परि गृह्णामि विश्वे
त्वा देवा वैश्वानराः
३४ प्र च्यावयन्तु दिवि देवान् दृꣳहान्तरिक्षे वयाꣳसि पृथिव्यां पार्थिवान्ध्रुवं ध्रुवेण हविषाव
सोमं नयामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥ यथा न इन्द्र इद्विशः
केवलीः सर्वाः समनसः करत् । यथा नः सर्वा इद्दिशोऽस्माकं केवलीरसन् ॥ ३। २।
८॥ एनसा विश्वकर्मन् यो दक्षिणां न सर्पिर्ग्रीवी वैश्वानराश्चत्वारिꣳशच्च ॥ ३। २। ८॥
३५ यद्वै होताध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयत्युक्थशा इत्याह प्रातःसवनं प्रतिगीर्य
त्रीण्येतान्यक्षराणि त्रिपदा गायत्री गायत्रं प्रातःसवनं गायत्रियैव प्रातःसवने वज्रमन्तर्धत्त
उक्थं वाचीत्याह माध्यन्दिनꣳ सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुत्रैष्टुभं
माध्यन्दिनꣳ सवनं त्रिष्टुभैव माध्यन्दिने सवने वज्रमन्तर्धत्त
३६ उक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वरो
वज्रो वज्रेणैव तृतीयसवने वज्रमन्तर्धत्ते ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यो
यथासवनं प्रतिगरे छन्दाꣳसि संपादयेत्तेजः प्रातःसवन आत्मन् दधीतेंद्रियं माध्यन्दिने
सवने पशूग्स्तृतीयसवन इत्युक्थशा इत्याह प्रातःसवनं प्रतिगीर्य त्रीण्येतान्यक्षराणि
३७ त्रिपदा गायत्री गायत्रं प्रातःसवनं प्रातःसवन एव प्रतिगरे छन्दाꣳसि सं पादयत्यथो
तेजो वै गायत्री तेजः प्रातःसवनं तेज एव प्रातःसवन आत्मन्धत्त उक्थं वाचीत्याह
माध्यन्दिनꣳ सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुत्रैष्टुभं माध्यन्दिनꣳ
सवनं माध्यन्दिन एव सवने प्रतिगरे छन्दाꣳसि सं पादयत्यथो इंद्रियं वै त्रिष्टुगिंद्रियं
माध्यन्दिनꣳ सवन
३८ मिन्द्रियमेव माध्यन्दिने सवन आत्मन्धत्त उक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य
सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वराः पशवो जागतं तृतीयसवनं तृतीयसवन एव
प्रतिगरे छन्दाꣳसि सं पादयत्यथो पशवो वै जगती पशवस्तृतीयसवनं पशूनेव तृतीयसवन
आत्मन्धत्ते यद्वै होताध्वर्युमभ्याह्वयत आव्यमस्मिन्दधाति तद्यन्ना
३९ ऽपहनीत पुरास्य संवथ्सराद्गृह आ वेवीरङ्गोꣳसा मोद इवेति प्रत्याह्वयते तेनैव तदप
हते यथा वा आयतां प्रतीक्षत एवमध्वर्युः प्रतिगरं प्रतीक्षते यदभिप्रतिगृणीयाद्यथायतया

समृच्छते तादृगेव तद्यदर्धर्चाल्लुप्येत यथा धावद्भ्यो हीयते तादृगेव तत्प्रबाहुग्वा ऋत्विजामुद्गीथा उद्गीथ एवोद्गातृणा
४० मृचः प्रणव उक्थशꣳसिनां प्रतिगरोऽध्वर्यूणां य एवं विद्वान्प्रतिगृणात्यन्नाद एव भवत्यास्य प्रजायां वाजी जायत इयं वै होतासावध्वर्युर्यदासीनः शꣳसत्यस्या एव तद्धोता नैत्यास्त इव हीयमथो इमामेव तेन यजमानो दुहे यत्तिष्ठन् प्रतिगृणात्यमुष्या एव तदध्वर्युर्नैति
४१ तिष्ठतीव ह्यसावथो अमूमेव तेन यजमानो दुहे यदासीनः शꣳसति तस्मादितः प्रदानं देवा उप जीवन्ति यत्तिष्ठन्प्रतिगृणाति तस्मादमुतः प्रदानं मनुष्या उप जीवन्ति यत्प्राङासीनः शꣳसति प्रत्यङ्तिष्ठन्प्रतिगृणाति तस्मात्प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते यद्वै होताध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयति पराङा वर्तते वज्रमेव तन्नि करोति ॥ ३। २। ९॥ सवने वज्रमंतर्धत्ते त्रीण्यैतान्यक्षराणींद्रियं माध्यंदिनꣳ सवनं नोद्गातृणामध्वर्युर्नैति वर्तयत्यष्टौ च ॥ ३। २। ९॥
४२ उपयामगृहीतोऽसि वाक्षसदसि वाक्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णाम्युपयामगृहीतोऽस्यृतसदसि चक्षुष्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णाम्युपयामगृहीतोऽसि श्रुतसदसि श्रोत्रपाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामि देवेभ्यस्त्वा विश्वदेवेभ्यस्त्वा विश्वेभ्यस्त्वा देवेभ्यो विष्णवुरुक्रमैष ते सोमस्तꣳ रक्षस्व
४३ तं ते दुश्चक्षा मा व ख्यन्मयि वसुः पुरोवसुर्वाक्पा वाचं मे पाहि मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे पाहि मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रम् मे पाहि भूरसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं मे पाहि धूरसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहि यो न इन्द्रवायू मित्रावरुणावश्विनावभिदासति भ्रातृव्य उत्पिपीते शुभस्पती इदमहं तमधरं पादयामि यथेन्द्राहमुत्तमश्चेतयानि ॥ ३। २। १०॥ रक्षस्व भ्रातृव्यस्त्रयोदश च ॥ ३। २। १०॥
४४ प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः । यस्य त्वꣳ सख्यमाविथ ॥ प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् । विपां ज्योतीꣳषि बिभ्रते न वेधसे ॥ अग्ने त्रीते वाजिना त्रीषधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः । तिस्र उ ते तनुवो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥ सं वां कर्मणा समिषा
४५ हिनोमीन्द्राविष्णू अपसस्पारे अस्य । जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः

पारयन्ता ॥ उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥ त्रीण्यायूꣳषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने । ताभिर्देवानामवो यक्षि विद्वानथा
४६ भव यजमानाय शं योः ॥ अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः । स त्रीꣳरेकादशाꣳ इह । यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतः । नभन्तामन्यके समे ॥ इन्द्राविष्णू दृꣳहिताः शंबरस्य नव पुरो नवतिं च श्नथिष्टम् । शतं वर्चिनः सहस्रं च साकꣳ हथो अप्रत्यसुरस्य वीरान् ॥ उत माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः । अथाब्रवीद् वृत्रमिन्द्रो हनिष्यन्थ्सखे विष्णो वितरं वि क्रमस्व ॥ ३। २। ११॥
इषाथ त्वा त्रयोदश च ॥ ३। २। ११॥
यो वै पवमानानां त्रीणि परिभूस्फ्यस्वस्तिर्भक्षेहि महीनां पयोसि देव सवितरेतत्ते श्येनाय यद्वै होतोपयामगृहीतोसि वाक्षसदसि प्र सो अग्न एकादश ॥
योवै स्फ्यस्वस्ति स्वधायै नमः प्रमुंच तिष्ठती वषड्वत्वारिꣳशत् ॥
योवै पवमानानां वि क्रमस्व ॥

## तृतीयकाण्डे तृतीयः प्रश्नः ३

१ अग्ने तेजस्विन्तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु दीक्षायै च त्वा तपसश्च तेजसे जुहोमि तेजोविदसि तेजो मा मा हासीन्माहं तेजो हासिषं मा मां तेजो हासीदिन्द्रौजस्विन्नोजस्वी त्वं देवेषु भूया ओजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु ब्रह्मणश्च त्वा क्षत्रस्य चौ
२ जसे जुहोम्योजोविदस्योजो मा मा हासीन्माहमोजो हासिषं मा मामोजो हासीथ्सूर्य भ्राजस्विन्भ्राजस्वी त्वं देवेषु भूया भ्राजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु वायोश्च त्वापां च भ्राजसे जुहोमि सुवर्विदसि सुवर्मा मा हासीन्माहꣳ सुवर्हासिषं मा माꣳ सुवर्हासीन्मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ ३। ३। १॥
क्षत्रस्य च मयि त्रयोविꣳशतिश्च ॥ ३। ३। १॥
३ वायुर्हिंकर्ताग्निः प्रस्तोता प्रजापतिः साम बृहस्पतिरुद्गाता विश्वे देवा उपगातारो मरुतः प्रतिहर्तार इन्द्रो निधनं ते देवाः प्राणभृतः प्राणं मयि दधत्वेतद्वै सर्वमध्वर्युरुपाकुर्वन्नुद्गातृभ्य उपाकरोति ते देवाः प्राणभृतः प्राणं मयि दधत्वित्याहैतदेव सर्वमात्मन्धत्त इडा

देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शꣳसिषद्विश्वे देवाः
४ सूक्तवाचः पृथिवि मातर्मा मा हिꣳसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनु मदन्तु ॥ ३। ३। २॥ शꣳसिषद्विश्वे देवा अष्टाविꣳशतिश्च ॥ ३। ३। २॥
५ वसवस्त्वा प्र वृहन्तु गायत्रेण छंदसाग्नेः प्रियं पाथ उपेहि रुद्रास्त्वा प्र वृहन्तु त्रैष्टुभेन छंदसेन्द्रस्य प्रियं पाथ उपेह्यादित्यास्त्वा प्र वृहन्तु जागतेन छंदसा विश्वेषां देवानां प्रियं पाथ उपेहि मान्दा सु ते शुक्र शुक्रमा धूनोमि भन्दनासु कोतनासु नूतनासु रेशीषु मेषीषु वाशीषु विश्वभृथ्सु माध्वीषु ककुहासु शक्करीषु
६ शुक्रासु ते शुक्र शुक्रमा धूनोमि शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः । आस्मिन्नुग्रा अचुच्यवुर्दिवो धारा असश्चत ॥ ककुहꣳ रूपं वृषभस्य रोचते बृहथ्सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः । यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहोशिक्त्वं देव सोम गायत्रेण छंदसाग्नेः
७ प्रियं पाथो अपीहि वशी त्वं देव सोम त्रैष्टुभेन छंदसेन्द्रस्य प्रियं पाथो अपीह्यस्मथ्सखा त्वं देव सोम जागतेन छंदसा विश्वेषां देवानां प्रियं पाथो अपीह्या नः प्राण एतु परावत आन्तरिक्षाद्दिवस्परि । आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा । इन्द्राग्नी मे वर्चः कृणुतां वर्चः सोमो बृहस्पतिः । वर्चो मे विश्वे देवा वर्चो मे धत्तमश्विना ॥ दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत् । परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥
३। ३। ३॥ शक्करीष्वग्नेर्बृहस्पतिः पंचविꣳशतिश्च ॥ ३। ३। ३॥
८ एतद्वा अपां नामधेयं गुह्यं यदाधावा मान्दासु ते शुक्र शुक्रमा धूनोमीत्याहापामेव नामधेयेन गुह्येन दिवो वृष्टिमव रुंधे शुक्रं ते शुक्रेण गृह्णामीत्याहैतद्वा अह्नो रूपं यद्रात्रिः सूर्यस्य रश्मयो वृष्ट्या ईशतेऽह्न एव रूपेण सूर्यस्य रश्मिभिर्दिवो वृष्टिं च्यावयत्यास्मिन्नुग्रा
९ अचुच्यवुरित्याह यथायजुरेवैतत्ककुहꣳ रूपं वृषभस्य रोचते बृहदित्याहैतद्वा अस्य ककुहꣳ रूपं यद्वृष्टी रूपेणैव वृष्टिमव रुंधे यत्ते सोमादाभ्यं नाम जागृवीत्याहैष ह वै हविषा हविर्यजति योऽदाभ्यं गृहीत्वा सोमाय जुहोति परा वा एतस्यायुः प्राण एति
१० योऽꣳशुं गृह्णात्या नः प्राण एतु परावत इत्याहायुरेव प्राणमात्मन्धत्तेऽमृतमसि प्राणाय त्वेति हिरण्यमभि व्यनित्यमृतं वै हिरण्यमायुः प्राणोऽमृतेनैवायुरात्मन्धत्ते शतमानं भवति शतायुः पुरुषः शतेंद्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यप उप स्पृशति भेषजं वा आपो

भेषजमेव कुरुते ॥ ३। ३। ४॥ उग्रा एत्यापस्त्रीणि च ॥ ३। ३। ४॥
११ वायुरसि प्राणो नाम सवितुराधिपत्येऽपानम् मे दाश्चक्षुरसि श्रोत्रं नाम धातुराधिपत्य आयुर्मेदा रूपमसि वर्णो नाम बृहस्पतेराधिपत्ये प्रजां मे दा ऋतमसि सत्यं नामेन्द्रस्याधिपत्ये क्षत्रम् मे दा भूतमसि भव्यं नाम पितृणामाधिपत्येऽपामोषधीनां गर्भं धा ऋतस्य त्वा व्योमन ऋतस्य
१२ त्वा विभूमन ऋतस्य त्वा विधर्मण ऋतस्य त्वा सत्यायर्तस्य त्वा ज्योतिषे प्रजापतिर्विराजमपश्यत्तया भूतं च भव्यं चासृजत तामृषिभ्यस्तिरोऽदधात्तां जमदग्निस्तपसापश्यत्तया वै स पृश्नीन्कामानसृजत तत्पृश्नीनां पृश्नित्वं यत्पृश्नयो गृह्यन्ते पृश्नीनेव तैः कामान् यजमानोऽव रुंधे वायुरसि प्राणो
१३ नामेत्याह प्राणापानावेवाव रुंधे चक्षुरसि श्रोत्रं नामेत्याहायुरेवाव रुंधे रूपमसि वर्णो नामेत्याह प्रजामेवाव रुंध ऋतमसि सत्यं नामेत्याह क्षत्रमेवाव रुंधे भूतमसि भव्यं नामेत्याह पशवो वा अपामोषधीनां गर्भः पशूनेवा
१४ ऽव रुंध एतावद्वै पुरुषं परितस्तदेवाव रुंध ऋतस्य त्वा व्योमन इत्याहेयं वा ऋतस्य व्योमेमामेवाभि जयत्यृतस्य त्वा विभूमन इत्याहान्तरिक्षं वा ऋतस्य विभूमान्तरिक्षमेवाभि जयत्यृतस्य त्वा विधर्मण इत्याह द्यौर्वा ऋतस्य विधर्म दिवमेवाभि जयत्यृतस्य
१५ त्वा सत्यायेत्याह दिशो वा ऋतस्य सत्यं दिश एवाभि जयत्यृतस्य त्वा ज्योतिष इत्याह सुवर्गो वै लोक ऋतस्य ज्योतिः सुवर्गमेव लोकमभि जयत्येतावन्तो वै देवलोकास्तानेवाभि जयति दश संपद्यन्ते दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठति ॥ ३। ३। ५॥ व्योमन ऋतस्य प्राणः पशूनेव विधर्म दिवमेवाभि जयत्यृतस्य षट्चत्वारिꣳशच्च ॥ ३। ३। ५॥
१६ देवा वै यद्यज्ञेन नावारुंधत तत्परैरवारुंधत तत्पराणां परत्वं यत्परे गृह्यन्ते यदेव यज्ञेन नावरुंधे तस्यावरुद्ध्यै यं प्रथमं गृह्णातीममेव तेन लोकमभि जयति यं द्वितीयमन्तरिक्षं तेन यं तृतीयममुमेव तेन लोकमभि जयति यदे ते गृह्यन्त एषां लोकानामभिजित्या
१७ उत्तरेष्वहः स्वमुतोऽर्वाञ्चो गृह्यन्तेऽभिजित्यैवेमा३ꣳ ल्लोकान्पुनरिमं लोकं प्रत्यवरोहन्ति यत्पूर्वेष्वहः स्वितः पराञ्चो गृह्यन्ते तस्मादितः पराञ्च इमे लोका यदुत्तरेष्वहःस्वमुतोऽर्वाञ्चो गृह्यन्ते तस्मादमुतोऽर्वाञ्च इमे लोकास्तस्मादयातयाम्नो

लोकान्मनुष्या उप जीवन्ति ब्रह्मवादिनो वदन्ति कस्माथ्सत्यादद्भ्य ओषधयः संभवन्त्योषधयो

१८ मनुष्याणामन्नं प्रजापतिं प्रजा अनु प्र जायन्त इति परानन्विति ब्रूयाद्यद्गृह्णात्यद्भ्यस्त्वौषधीभ्यो गृह्णामीति तस्मादद्भ्य ओषधयः संभवन्ति यद्गृह्णात्योषधीभ्यस्त्वा प्रजाभ्यो गृह्णामीति तस्मादोषधयो मनुष्याणामन्नं यद्गृह्णाति प्रजाभ्यस्त्वा प्रजापतये गृह्णामीति तस्मात्प्रजापतिं प्रजा अनु प्र जायन्ते ॥ ३। ३। ६॥ अभिजित्यै भवंत्योषधयोष्टा चत्वारि२ꣳशच्च ॥ ३। ३। ६॥

१९ प्रजापतिर्देवासुरानसृजत तदनु यज्ञोऽसृज्यत यज्ञं छन्दा२ꣳसि ते विष्वञ्चो व्यक्रामन्थ्सोऽसुराननु यज्ञोऽपाक्रामद्यज्ञं छन्दा२ꣳसि ते देवा अमन्यन्तामी वा इदमभूवन्, यद्वय२ꣳ स्म इति ते प्रजापतिमुपाधावन्थ्सोऽब्रवीत्प्रजापतिश्छंदसां वीर्यमादाय तद्वः प्र दास्यामीति स छंदसां वीर्य

२० मादाय तदेभ्यः प्रायच्छत्तदनु च्छंदाग्स्यपाक्रामञ्छन्दा२ꣳसि यज्ञस्ततो देवा अभवन्परासुरा य एवं छंदसां वीर्यं वेदा श्रावयास्तु श्रौषड्यज ये यजामहे वषट्कारो भवत्यात्मना परास्य भ्रातृव्यो भवति ब्रह्मवादिनो वदन्ति कस्मै कमध्वर्युरा श्रावयतीति छंदसां वीर्यायेति ब्रूयादेतद्वै

२१ छंदसां वीर्यमा श्रावयास्तु श्रौषड्यज ये यजामहे वषट्कारो य एवं वेद सवीर्यैरेव छन्दोभिरर्चति यत्किं चार्चति यदिन्द्रो वृत्रमहन्नमेध्यं तद्यद्यतीनपावपदमेध्यं तदथ कस्मादैन्द्रो यज्ञ आ स२ꣳस्थातोरित्याहुरिन्द्रस्य वा एषा यज्ञिया तनूर्यद्यज्ञस्तामेव तद्यजन्ति य एवं वेदोपैनं यज्ञो नमति ॥ ३। ३। ७॥ छंदसां वीर्यं वा एव तदष्टौ च ॥ ३। ३। ७॥

२२ आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमम् ॥ आ वृश्च्यते वा एतद्यजमानोऽग्निभ्यां यदेनयोः शृतं कृत्याथान्यत्रावभृथमवैत्यायुर्दा अग्ने हविषो जुषाण इत्यवभृथमवैष्यञ्जुहुयादाहुत्यैवैनौ शमयति नार्तिमार्च्छति यजमानो यत्कुसीद

२३ मप्रतीत्तं मयि येन यमस्य बलिना चरामि । इहैव सन्निरवदये तदेतत्तदग्ने अनृणो भवामि । विश्वलोप विश्वदावस्य त्वा सञ्जुहोम्यग्धादेकोऽहुतादेकः समसनादेकः । ते नः कृण्वन्तु भेषज२ꣳ सदः सहो वरेण्यम् ॥ अयं नो नभसा पुरः सग्ग्स्फानो अभि रक्षतु । गृहाणामसमर्त्यै बहवो नो गृहा असन् ॥ स त्वं नो

२४ नभसस्पत ऊर्जं नो धेहि भद्रया । पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि ॥ देव सऽस्फान सहस्रपोषस्येशिषे स नो रास्वाज्यानिꣳ रायस्पोषꣳसुवीर्यꣳसंवथ्सरीणाग्ं स्वस्तिम् ॥
अग्निर्वाव यम इयं यमी कुसीदं वा एतद्यमस्य यजमान आ दत्ते यदोषधीभिर्वेदिग्ग्ं स्तृणाति यदनुपौष्य प्रयायाद् ग्रीवबद्धमेन
२५ ममुष्मिꣳल्लोके नेनीयेरन् यत्कुसीदमप्रतीत्तं मयीत्युपौषतीहैव सन्, यमं कुसीदं निरवदायानृणः सुवर्गं लोकमेति यदि मिश्रमिव चरेदञ्जलिना सक्तून्प्रदाव्ये जुहुयादेष वा अग्निर्वैश्वानरो यत्प्रदाव्यः स एवैनग्ग्ं स्वदयत्यह्नां विधान्यामेकाष्टकायामपूपं चतुःशरावं पक्त्वा प्रातरेतेन कक्षमुपौषेद्यदि
२६ दहति पुण्यसमं भवति यदि न दहति पापसममेतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्रमुप यन्ति यो वा उपद्रष्टारमुपश्रोतारमनुख्यातारं विद्वान्, यजते सममुष्मिꣳल्लोक इष्टापूर्तेन गच्छतेऽग्निर्वा उपद्रष्टा वायुरुप श्रोतादित्योऽनु ख्याता तान्, य एवं विद्वान्, यजते सममुष्मिꣳल्लोक इष्टापूर्तेन गच्छतेऽयं नो नभसा पुर
२७ इत्याहाग्निर्वै नभसा पुरोऽग्निमेव तदाहैतन्मे गोपायेति स त्वं नो नभसस्पत इत्याह वायुर्वै नभसस्पतिर्वायुमेव तदाहैतन्मे गोपायेति देव सऽस्फानेत्याहासौ वा आदित्यो देवः सग्ग्स्फान आदित्यमेव तदाहैतन्मे गोपायेति ॥ ३। ३। ८॥ कुसीदं त्वं न एनमोषेद्यदि पुर आदित्यमेव तदाहैतन्मे गोपायेति ॥ ३। ३। ८॥
२८ एतं युवानं परि वो ददामि तेन क्रीडन्तीश्चरत प्रियेण । मा नः शाप्त जनुषा सुभागा रायस्पोषेण समिषा मदेम ॥ नमो महिम्न उत चक्षुषे ते मरुतां पितस्तदहं गृणामि । अनु मन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यम् ॥ देवानामेष उपनाह आसीदपां गर्भ ओषधीषु न्यक्तः । सोमस्य द्रप्समवृणीत पूषा
२९ बृहन्नद्रिरभवत्तदेषाम् ॥ पिता वथ्सानां पतिरघ्नियानामथो पिता महतां गर्गराणाम् । वथ्सो जरायु प्रतिधुक्पीयूष आमिक्षामस्तु घृतमस्य रेतः ॥ त्वां गावोऽवृणत राज्याय त्वाꣳ हवन्त मरुतः स्वर्काः । वर्ष्मन् क्षत्रस्य ककुभि शिश्रियाणस्ततो न उग्रो वि भजा वसूनि ॥ व्यृद्धेन वा एष पशुना यजते यस्यैतानि न क्रियन्त एष ह्वै समृद्धेन यजते यस्यैतानि क्रियन्ते ॥ ३। ३। ९॥ पूषा क्रियंत एषोऽष्टौ च ॥ ३। ३। ९॥
३० सूऱ्यो देवो दिविषद्भ्यो धाता क्षत्राय वायुः प्रजाभ्यः । बृहस्पतिस्त्वा प्रजापतये

ज्योतिष्मतीं जुहोतु ॥ यस्यास्ते हरितो गर्भोऽथो योनिर्हिरण्ययी । अङ्गान्यह्रुता यस्यै
तां देवैः समजीगमम् ॥ आ वर्तन वर्तय नि निवर्तन वर्तयेन्द्र नर्दबुद । भूम्याश्चतस्रः
प्रदिशस्ताभिरा वर्तया पुनः ॥ वि ते भिनद्मि तिकरीं वि योनिं वि गवीन्यौ । वि
३१ मातरं च पुत्रं च वि गर्भं च जरायु च । बहिस्ते अस्तु बालिति । उरुद्रप्सो
विश्वरूप इन्दुः पवमानो धीर आनञ्ज गर्भम् ॥ एकपदी द्विपदी त्रिपदी चतुष्पदी
पञ्चपदी षट्पदी सप्तपद्यष्टापदी भुवनानु प्रथताग् स्वाहा । मही द्यौः पृथिवी च न इमं
यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ ३। ३। १०॥
गवीन्यौ वि चतुश्चत्वारिꣳशच्च ॥ ३। ३। १०॥
३२ इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती । उक्थं मदश्च शस्यते ॥
अयं वां परिषिच्यते सोम इन्द्राबृहस्पती । चारुर्मदाय पीतये ॥ अस्मे इन्द्राबृहस्पती
रयिं धत्तꣳ शतग्विनम् । अश्वावन्तꣳ सहस्रिणम् ॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः । इन्द्रः पुरस्तादुत मध्यतो नः सखा
सखिभ्यो वरिवः कृणोतु ॥ वि ते विष्वग्वातजूतासो अग्ने भामासः
३३ शुचे शुचयश्चरन्ति । तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः
॥ त्वामग्ने मानुषीरीडते विशो होत्राविदं विविचिꣳ रत्नधातमम् । गुहा सन्तꣳ
सुभगविश्वदर्शतं तुविष्मणसꣳ सुयजं घृतश्रियम् ॥ धाता ददातु नो रयिमीशानो
जगतस्पतिः । स नः पूर्णेन वावनत् ॥ धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं
जजान । धाता पुत्रं यजमानाय दाता
३४ तस्मा उ हव्यं घृतवद्विधेम ॥ धाता ददातु नो रयिं प्राचीं जीवातुमक्षिताम् । वयं
देवस्य धीमहि सुमतिꣳ सत्यराधसः ॥
धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे । तस्मै देवा अमृताः सं व्ययन्तां
विश्वे देवासो अदितिः सजोषाः ॥ अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च
हव्यवाहनो भवतां दाशुषे मयः ॥ अन्विदनुमते त्वं
३५ मन्यासै शं च नः कृधि । क्रत्वे दक्षाय नो हिनु प्रण आयूꣳषि तारिषः ॥ अनु
मन्यतामनुमन्यमाना प्रजावन्तꣳ रयिमक्षीयमाणम् । तस्यै वयꣳ हेडसि मापि भूम
सा नो देवी सुहवा शर्म यच्छतु ॥
यस्यामिदं प्रदिशि यद्विरोचतेऽनुमतिं प्रति भूषन्त्यायवः । यस्या उपस्थ उर्वन्तरिक्षꣳ

सा नो देवी सुहवा शर्म यच्छतु ॥
३६ राकामहꣳ सुहवाꣳ सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना । सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरꣳ शतदायमुक्थ्यम् ॥ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषꣳ सुभगे रराणा ॥ सिनीवालि या सुपाणिः ॥ कुहूमहꣳ सुभगां विद्मनापसमस्मिन्, यज्ञे सुहवां जोहवीमि । सा नो ददातु श्रवणं पितृणां तस्यास्ते देवि हविषा विधेम ॥ कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषश्चिकेतु । सं दाशुषे किरतु भूरि वामꣳ रायस्पोषं चिकितुषे दधातु ॥ ३। ३। ११॥ भामासो दाता त्वमंतरिक्षꣳ सा नो देवी सुहवा शर्म यच्छतु श्रवणं चतुर्विꣳशतिश्च ॥ ३। ३। ११॥

अग्ने तेजस्विन्वायुर्वसवस्त्वैतद्वा अपां नामधेयं वायुरसि प्राणो नाम देवा वै यद्यज्ञेन न प्रजापतिर्देवासुरानायुर्दा एतं युवानꣳ सूर्यो देव इदं वामेकादश ॥

अग्ने तेजस्विन्वायुरसि छंदसां वीर्यं मातरं च षड्विꣳशत् ॥

अग्ने तेजस्विन् चिकितुषे दधातु ॥

## तृतीयकाण्डे चतुर्थः प्रश्नः ४

१ वि वा एतस्य यज्ञ ऋध्यते यस्य हविरतिरिच्यते सूर्यो देवो दिविषद्भ्य इत्याह बृहस्पतिना चैवास्य प्रजापतिना च यज्ञस्य व्यृद्धमपि वपति रक्षाꣳसि वा एतत्पशुꣳ सचन्ते यदेकदेवत्य आलब्धो भूयान्भवति यस्यास्ते हरितो गर्भ इत्याह देवत्रैवैनां गमयति रक्षसामपहत्या आ वर्तन वर्तयेत्याह

२ ब्रह्मणैवैनमा वर्तयति वि ते भिनद्मि तकरीमित्याह यथा यजुरेवैतदुरुद्रप्सो विश्वरूप इन्दुरित्याह प्रजा वै पशव इन्दुः प्रजयैवैनं पशुभिः समर्धयति दिवं वै यज्ञस्य व्यृद्धं गच्छति पृथिवीमतिरिक्तं तद्यन्न शमयेदार्तिमार्च्छेद्यजमानो मही द्यौः पृथिवी च न इत्या

३ ऽह द्यावापृथिवीभ्यामेव यज्ञस्य व्यृद्धं चातिरिक्तं च शमयति नार्तिमार्च्छति यजमानो भस्मनाभि समूहति स्वगाकृत्या अथो अनयोर्वा एष गर्भोऽनयोरेवैनं दधाति यदवद्येदति तद्रेचयेद्यन्नावद्येत् पशोरालब्धस्य नाव द्येत् पुरस्तान्नाभ्या अन्यदवद्येदुपरिष्टादन्यत्पुरस्ताद्वै नाभ्यै

४ प्राण उपरिष्टादपानो यावानेव पशुस्तस्याव द्यति विष्णवे शिपिविष्टाय जुहोति यद्वै यज्ञस्यातिरिच्यते यः पशोर्भूमा या पुष्टिस्तद्विष्णुः शिपिविष्टोऽतिरिक्त एवातिरिक्तं

दधात्यतिरिक्तस्य शान्त्या अष्टाप्रुड्ढिरण्यं दक्षिणाष्टापदी ह्येषात्मा नवमः पशोराप्त्या
अन्तरकोश उष्णीषेणाविष्टितं भवत्येवमिव हि पशुरुल्बमिव चर्मेव माꣳसमिवास्थीव
यावानेव पशुस्तमाप्त्वाव रुंधे यस्यैषा यज्ञे प्रायश्चित्तिः क्रियत इष्ट्वा वसीयान्भवति ॥ ३।
४। १॥ वर्तयेत्याह न इति वै नाभ्या उल्बमिवैकविꣳशतिश्च ॥ ३। ४। १॥
५ आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार । उपो ते अन्धो मद्यमयामि
यस्य देव दधिषे पूर्वपेयम् ॥ आकूत्यै त्वा कामाय त्वा समृधे त्वा किक्किटा ते मनः
प्रजापतये स्वाहा किक्किटा ते प्राणं वायवे स्वाहा किक्किटा ते चक्षुः सूर्याय स्वाहा
किक्किटा ते श्रोत्रं द्यावापृथिवीभ्याग् स्वाहा किक्किटा ते वाचꣳ सरस्वत्यै स्वाहा
६ त्वं तुरीया वशिनी वशासि सकृद्यत्त्वा मनसा गर्भ आशयत् । वशा त्वं वशिनी
गच्छ देवान्थ्सत्याः संतु यजमानस्य कामाः ॥
अजासि रयिष्ठा पृथिव्याꣳ सीदोर्ध्वान्तरिक्षमुप तिष्ठस्व दिवि ते बृहद्भाः । तन्तुं
तन्वन्नजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् । अनुल्बणं वयत
जोगुवामपो मनुर्भव जनया दैव्यं जनम् ॥ मनसो हविरसि प्रजापतेर्वर्णो गात्राणां
ते गात्रभाजो भूयास्म ॥ ३। ४। २॥ सरस्वत्यै स्वाहा मनुस्त्रयोदश च ॥ ३। ४। २॥
७ इमे वै सहास्तां ते वायुर्व्यवात्ते गर्भमदधातां तꣳ सोमः प्राजनयदग्निरग्रसत स एतं
प्रजापतिराग्नेयमष्टाकपालमपश्यत्तं निरवपत्तेनैवेनामग्नेरधि निरक्रीणात्तस्मादप्यन्यदेवत्यामालभमान
आग्नेयमष्टाकपालं पुरस्तान्निर्वपेदग्नेरेवैनामधि निष्क्रीयालभते यद्
८ वायुर्व्यवात्तस्माद्वायव्या यदिमे गर्भमदधातां तस्माद् द्यावापृथिव्या यथ्सोमः
प्राजनयदग्निरग्रसत तस्मादग्नीषोमीया यदनयोर्वियत्योर्वागवदत्तस्माथ्सारस्वती
यत्प्रजापतिरग्नेरधि निरक्रीणात् तस्मात् प्राजापत्या सा वा एषा सर्वदेवत्या यदजा वशा
वायव्यामा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन
९ भागधेयेनोप धावति स एवैनं भूतिं गमयति द्यावापृथिव्यामा लभेत कृषमाणः
प्रतिष्ठाकामो दिव एवास्मै पर्जन्यो वर्षति व्यस्यामोषधयो रोहन्ति समर्धुकमस्य
सस्यं भवत्यग्नीषोमीयामा लभेत यः कामयेतान्नवानन्नादः स्यामित्यग्निनैवान्नमव रुंधे
सोमेनान्नाद्यमन्नवानेवान्नादो भवति सारस्वतीमा लभेत य
१० ईश्वरो वाचो वदितोः सन्वाचं न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप
धावति सैवास्मिन्वाचं दधाति प्राजापत्यामा लभेत यः कामयेतानभिजितमभि

जयेयमिति प्रजापतिः सर्वा देवता देवताभिरेवानभिजितमभि जयति वायव्ययोपाकरोति वायोरेवैनामवरुध्या लभत आकूत्यै त्वा कामाय त्वे
११ त्याह यथायजुरेवैतत् किंक्किटाकारं जुहोति किंक्किटाकारेण वै ग्राम्याः पशवो रमन्ते प्रारण्याः पतन्ति यत्किंक्किटाकारं जुहोति ग्राम्याणां पशूनां धृत्यै पर्यग्नौ क्रियमाणे जुहोति जीवन्तीमेवैनाꣳसुवर्गं लोकं गमयति त्वं तुरीया वशिनी वशासीत्याह देवत्रैवैनां गमयति सत्याः सन्तु यजमानस्य कामा इत्याहैष वै कामो
१२ यजमानस्य यदनार्त उदृचं गच्छति तस्मादेवमाहाजासि रयिष्ठेत्याहैष्वेवैनां लोकेषु प्रतिष्ठापयति दिवि ते बृहद्भा इत्याह सुवर्ग एवास्मै लोके ज्योतिर्दधाति तन्तुं तन्वन्नजसो भानुमन्विहीत्याहेमानेवास्मै लोकाञ्ज्योतिष्मतः करोत्यनुल्बणं वयत जोगुवामप इत्या
१३ ऽह यदेव यज्ञ उल्बणं क्रियते तस्यैवैषा शान्तिर्मनुर्भव जनया दैव्यं जनमित्याह मानव्यो वै प्रजास्ता एवाद्याः कुरुते मनसो हविरसीत्याह स्वगाकृत्यै गात्राणां ते गात्रभाजो भूयास्मेत्याहाशिषमेवैतामा शास्ते तस्यै वा एतस्या एकमेवादेवयजनं यदालब्धायामभ्रो
१४ भवति यदालब्धायामभ्रः स्यादप्सु वा प्रवेशयेथ्सर्वां वा प्राश्नीयाद्यदप्सु प्रवेशयेद्यज्ञवेशसं कुर्याथ्सर्वामेव प्राश्नीयादिन्द्रियमेवात्मन्धत्ते सा वा एषा त्रयाणामेवावरुद्धा संवथ्सरसदः सहस्रयाजिनो गृहमेधिनस्त एवैतया यजेरन्तेषामेवैषाप्ता ॥ ३। ४। ३॥ यथ्स्वेन सारस्वतीमा लभेत यः कामाय त्वा कामोप इत्यभ्रो द्विचत्वारिꣳशच्च ॥ ३। ४। ३॥
१५ चित्तं च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञानं च मनश्च शक्करीश्च दर्शश्च पूर्णमासश्च बृहच्च रथंतरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव देवासुराः संयत्ता आसन्थ्स इन्द्रः प्रजापतिमुपाधावत्तस्मा एताञ्जयान् प्रायच्छत् तानजुहोत्ततो वै देवा असुरानजयन् यदजयन्तज्जयानां जयत्वꣳ स्पर्धमानेनैते होतव्या जयत्येव तां पृतनाम् ॥ ३। ४। ४॥ उप पंच विꣳशतिश्च ॥ ३। ४। ४॥
१६ अग्निर्भूतानामधिपतिः स मावत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोऽपाꣳ समुद्रः स्रोत्यानामन्नꣳ साम्राज्यानामधिपति तन्मावतु सोम ओषधीनाꣳ सविता प्रसवानाꣳ

रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते मावन्तु पितरः
पितामहाः परेऽवरे ततास्ततामहा इह मावत । अस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्यां
पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्याम् ॥ ३। ४। ५॥ अवरे सप्तदश च ॥ ३। ४। ५॥
१७ देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतानभ्यातानानपश्यन्तानभ्यातन्वत
यद्देवानां कर्मासीदार्ध्यत तद्यदसुराणां न तदार्ध्यत येन कर्मणेर्त्सेत्तत्र
होतव्या ऋध्नोत्येव तेन कर्मणा यद्विश्वे देवाः समभरन्तस्मादभ्याताना वैश्वदेवा
यत्प्रजापतिर्जयान्प्रायच्छत्तस्माज्जयाः प्राजापत्या
१८ यद्राष्ट्रभृद्भी राष्ट्रमाददत तद्राष्ट्रभृताꣳ राष्ट्रभृत्त्वं ते देवा अभ्यातानैरसुरानभ्यातन्वत
जयैरजयन् राष्ट्रभृद्भी राष्ट्रमाददत यद्देवा अभ्यातानैरसुरानभ्यातन्वत तदभ्यातानानामभ्यातानत्वं
यज्जयैरजयन्तज्जयानां जयत्वं यद्राष्ट्रभृद्भी राष्ट्रमाददत तद्राष्ट्रभृताꣳ राष्ट्रभृत्त्वं ततो देवा
अभवन्परासुरा यो भ्रातृव्यवान्थ्स्याथ्स एताञ्जुहुयादभ्यातानैरेव भ्रातृव्यानभ्यातनुते
जयैर्जयति राष्ट्रभृद्भी राष्ट्रमा दत्ते भवत्यात्मना परास्य भ्रातृव्यो भवति ॥ ३। ४। ६॥
प्राजापत्यास्सोष्टादश च ॥ ३। ४। ६॥
१९ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता
इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य
मरीचयोऽप्सरस आयुवः सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो
भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः स्तवाः प्रजापतिर्विश्वकर्मा मनो
२० गन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्नय इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरसो
मुदा भुवनस्य पते यस्य त उपरि गृहा इह च । स नो रास्वाज्यानिꣳ रायस्पोषꣳ
सुवीर्यꣳ संवथ्सरीणाग् स्वस्तिम् ॥ परमेष्ठ्यधिपतिर्मृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवः
सुक्षितिः सुभूतिर्भद्रकृथ्सुवर्वान्पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसो रुचो दूरेहेतिरमृडयो
२१ मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवश्चारुः कृपणकाशी कामो
गन्धर्वस्तस्याधयोऽप्सरसः शोचयन्तीर्नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म
क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा स नो भुवनस्य पते यस्य त उपरि गृहा इह च
। उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ ॥ ३। ४। ७॥ मनोऽमृडयष्षट्चत्वारिꣳशच्च
॥ ३। ४। ७॥
२२ राष्ट्रकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रेणैवास्मै राष्ट्रमव रुंधे राष्ट्रमेव भवत्यात्मने
होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रं प्रजा राष्ट्रं पशवो राष्ट्रं यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमव

रुंधे वसिष्ठः समानानां भवति ग्रामकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रꣳ सजाता राष्ट्रेणैवास्मै राष्ट्रꣳ सजातानव रुंधे ग्रा
२३ म्येव भवत्यधिदेवने जुहोत्यधिदेवन एवास्मै सजातानव रुंधे त एनमवरुद्धा उप तिष्ठन्ते रथमुख ओजस्कामस्य होतव्या ओजो वै राष्ट्रभृत ओजो रथ ओजसैवास्मा ओजोऽव रुंध ओजस्व्येव भवति यो राष्ट्रादपभूतः स्यात्तस्मै होतव्या यावन्तोऽस्य रथाः स्युस्तान्ब्रूयाद्युङ्ग्ध्वमिति राष्ट्रमेवास्मै युनक्त्या
२४ ऽहुतयो वा एतस्याक्लृप्ता यस्य राष्ट्रं न कल्पते स्वरथस्य दक्षिणं चक्रं प्रवृह्य नाडीमभि जुहुयादाहुतीरेवास्य कल्पयति ता अस्य कल्पमाना राष्ट्रमनु कल्पते संग्रामे संयत्ते होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रे खलु वा एते व्यायच्छन्ते ये संग्रामꣳ संयन्ति यस्य पूर्वस्य जुह्वति स एव भवति जयति तꣳ संग्रामं मान्धुक इध्मो
२५ भवत्यङ्गारा एव प्रतिवेष्टमाना अमित्राणामस्य सेनां प्रति वेष्टयन्ति य उन्माद्येत्तस्मै होतव्या गन्धर्वाप्सरसो वा एतमुन्मादयन्ति य उन्माद्यत्येते खलु वै गन्धर्वाप्सरसो यद्राष्ट्रभृतस्तस्मै स्वाहा ताभ्यः स्वाहेति जुहोति तेनैवैनाञ्छमयति नैयग्रोध औदुंबर आश्वत्थः प्लाक्ष इतीध्मो भवत्येते वै गन्धर्वाप्सरसां गृहाः स्व एवैना
२६ नायतने शमयत्यभिचरता प्रतिलोमꣳ होतव्याः प्राणानेवास्य प्रतीचः प्रति यौति तं ततो येन केन च स्तृणुते स्वकृत इरिणे जुहोति प्रदरे वैतद्वा अस्यै निर्ऋतिगृहीतं निर्ऋतिगृहीत एवैनं निर्ऋत्या ग्राहयति यद्वाचः क्रूरं तेन वषट्करोति वाच एवैनं क्रूरेण प्र वृश्चति ताजगार्तिमार्च्छति यस्य कामयेतान्नाद्य
२७ मा ददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति तृणानि सं गृह्णीयात्प्रजापतिर्वै भुवनस्य पतिः प्रजापतिनैवास्यान्नाद्यमा दत्त इदमहममुष्यामुष्यायणस्यान्नाद्यꣳ हरामीत्याहान्नाद्यमेवास्य हरति षड्भिर्हरति षड्वा ऋतवः प्रजापतिनैवास्यान्नाद्यमादायर्तवोऽस्मा अनु प्र यच्छन्ति
२८ यो ज्येष्ठबन्धुरपभूतः स्यात्तꣳ स्थलेऽवसाय्य ब्रह्मौदनं चतुःशरावं पक्त्वा तस्मै होतव्या वर्ष्म वै राष्ट्रभृतो वर्ष्म स्थलं वर्ष्मणैवैनं वर्ष्म समानानां गमयति चतुःशरावो भवति दिक्ष्वेव प्रति तिष्ठति क्षीरे भवति रुचमेवास्मिन्दधात्युद्धरति शृतत्वाय सर्पिष्वान्भवति मेध्यत्वाय चत्वार आर्षेयाः प्राश्नन्ति दिशामेव ज्योतिषि जुहोति ॥ ३। ४। ८॥ ग्रामी युनक्तीध्मः स्व एवैनानन्नाद्यं यच्छंत्येकान्न पंचाशच्च ॥ ३। ४। ८॥

२९ देविका निर्वपेत्प्रजाकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव खलु वै प्रजाश्छन्दोभिरेवास्मै प्रजाः प्र जनयति प्रथमं धातारं करोति मिथुनी एव तेन करोत्यन्वेवास्मा अनुमतिर्मन्यते राते राका प्र सिनीवाली जनयति प्रजास्वेव प्रजातासु कुह्वा वाचं दधात्येता एव निर्वपेत्पशुकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसी
३० व खलु वै पशवश्छन्दोभिरेवास्मै पशून् प्र जनयति प्रथमं धातारं करोति प्रैव तेन वापयत्यन्वेवास्मा अनुमतिर्मन्यते राते राका प्र सिनीवाली जनयति पशूनेव प्रजातान्कुह्वा प्रतिष्ठापयत्येता एव निर्वपेद्ग्रामकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव खलु वै ग्रामश्छन्दोभिरेवास्मै ग्राम
३१ मव रुंधे मध्यतो धातारं करोति मध्यत एवैनं ग्रामस्य दधात्येता एव निर्वपेज्ज्योगामयावी छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु वा एतमभि मन्यन्ते यस्य ज्योगामयति छन्दोभिरेवैनमगदं करोति मध्यतो धातारं करोति मध्यतो वा एतस्याऽक्लृप्तं यस्य ज्योगामयति मध्यत एवास्य तेन कल्पयत्येता एव नि
३२ र्वपेद्यं यज्ञो नोपनमेच्छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु वा एतं नोप नमन्ति यं यज्ञो नोपनमति प्रथमं धातारं करोति मुखत एवास्मै छन्दाꣳसि दधात्युपैनं यज्ञो नमत्येता एव निर्वपेदीजानश्छन्दाꣳसि वै देविका यातयामानीव खलु वा एतस्य छन्दाꣳसि य ईजान उत्तमं धातारं करो
३३ त्युपरिष्टादेवास्मै छन्दाग्स्ययातयामान्यव रुंध उपैनमुत्तरो यज्ञो नमत्येता एव निर्वपेद्यं मेधा नोपनमेच्छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु वा एतं नोप नमन्ति यं मेधा नोपनमति प्रथमं धातारं करोति मुखत एवास्मै छन्दाꣳसि दधात्युपैनं मेधा नमत्येता एव निर्वपेद्
३४ रुक्कामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव खलु वै रुक्छन्दोभिरेवास्मिन्रुचं दधाति क्षीरे भवन्ति रुचमेवास्मिन्दधति मध्यतो धातारं करोति मध्यत एवैनꣳ रुचो दधाति गायत्री वा अनुमतिस्त्रिष्टुग्राका जगती सिनीवाल्यनुष्टुप्कुहूर्धाता वषट्कारः पूर्वपक्षो राकापरपक्षः कुहूरमावास्या सिनीवाली पौर्णमास्यनुमतिश्चन्द्रमा धाताष्टौ
३५ वसवोऽष्टाक्षरा गायत्र्येकादश रुद्रा एकादशाक्षरा त्रिष्टुब्द्वादशादित्या द्वादशाक्षरा जगती प्रजापतिरनुष्टुब्धाता वषट्कार एतद्वै देविकाः सर्वाणि च छन्दाꣳसि सर्वाश्च देवता वषट्कारस्ता यथ्सह सर्वा निर्वपेदीश्वरा एनं प्रदहो द्वे प्रथमे निरुप्य धातुस्तृतीयं निर्वपेत्तथो

एवोत्तरे निर्वपेत्तथैनं न प्र दहन्त्यथो यस्मै कामाय निरुप्यन्ते तमेवाभिरुपाप्नोति ॥ ३। ४। ९॥
पशुकामश्छंदाꣳसि वै देविकाश्छंदाꣳसि ग्रामं कल्पयत्येता एव निरुत्तमं धातारं करोति मेधा नमत्येता एव निर्वपेदष्टौ दहंति नव च ॥ ३। ४। ९॥ देविकाः प्रजाकामो मिथुनी प्रजानु पशुकामः प्रैव ग्रामकामो ज्योगामयावीयं यज्ञो य ईजानो यं मेधा रुक्कामोष्टौ ॥ देविका भवंति दधति राष्ट्रकामाय भवति दधाति ॥
३६ वास्तोष्पते प्रति जानीह्यस्मान्थ्स्वावेशो अनमीवो भवा नः । यत्त्वेमहे प्रति तन्नो जुषस्व शं न एधि द्विपदे शं चतुष्पदे ॥ वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या । आवः, क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥ यथ्सायं प्रातरग्निहोत्रं जुहोत्याहुतीष्टका एव ता उप धत्ते
३७ यजमानोऽहोरात्राणि वा एतस्येष्टका य आहिताग्निर्यथ्सायं प्रातर्जुहोत्यहोरात्राण्येवाप्त्वेष्टकाः कृत्वोप धत्ते दश समानत्र जुहोति दशाक्षरा विराड्विराजमेवाप्त्वेष्टकां कृत्वोप धत्तेऽथो विराज्येव यज्ञमाप्नोति चित्यश्चित्योऽस्य भवति तस्माद्यत्र दशोषित्वा प्रयाति तद्यज्ञवास्त्ववास्त्वेव तद्यत्ततोऽर्वाचीनꣳ
३८ रुद्रः खलु वै वास्तोष्पतिर्यदहुत्वा वास्तोष्पतीयं प्रयायाद्रुद्र एनं भूत्वाग्निरनूत्थाय हन्याद्वास्तोष्पतीयं जुहोति भागधेयेनैवैनꣳ शमयति नार्तिमार्च्छति यजमानो यद्युक्ते जुहुयाद्यथा प्रयाते वास्तावाहुतिं जुहोति तादृगेव तद्यदयुक्ते जुहुयाद्यथा क्षेम आहुतिं जुहोति तादृगेव तदहुतमस्य वास्तोष्पतीयग्ग् स्याद्
३९ दक्षिणो युक्तो भवति सव्योऽयुक्तोऽथ वास्तोष्पतीयं जुहोत्युभयमेवाकरपरिवर्गमेवैनꣳ शमयति यदेकया जुहुयाद्दर्विहोमं कुर्यात् पुरोऽनुवाक्यामनूच्य याज्यया जुहोति सदेवत्वाय यद्धुत आदध्याद्रुद्रं गृहानन्वारोहयेद्यदवक्षाणान्यसं प्रक्षाप्य प्रयायाद्यथा यज्ञवेशसं वादहनं वा तादृगेव तदयंते योनिर्ऋत्विय इत्यरण्योः समारोहय
४० त्येष वा अग्नेर्योनिः स्व एवैनं योनौ समारोहयत्यथो खल्वाहुर्यदरण्योः समारूढो नश्येदुदस्याग्निः सीदेत्पुनराधेयः स्यादिति या ते अग्ने यज्ञिया तनूस्तयेह्या रोहेत्यात्मन्थ्समारोहयते यजमानो वा अग्नेर्योनिः स्वायामेवैनं योन्याꣳसमारोहयते ॥ ३। ४। १०॥
धत्तेऽर्वाचीनग्ग् स्याथ्समारोहयति पंच चत्वारिꣳशच्च ॥ ३। ४। १०॥
४१ त्वमग्ने बृहद्वयो दधासि देव दाशुषे । कविर्गृहपतिर्युवा ॥ हव्यवाडग्निरजरः पिता

नो विभुर्विभावा सुदृशीको अस्मे । सुगार्हपत्याः समिषो दिदीह्यस्मद्रियक्सं मिमीहि
श्रवाꣳसि ॥
त्वं च सोम नो वशो जीवातुं न मरामहे । प्रियस्तोत्रो वनस्पतिः ॥ ब्रह्मा देवानां
पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणाग् स्वधितिर्वनानाꣳ सोमः
४२ पवित्रमत्येति रेभन् ॥ आ विश्वदेवꣳ सत्पतिꣳ सूक्तैरद्या वृणीमहे । सत्यसवꣳ
सवितारम् ॥ आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता
रथेना देवो याति भुवना विपश्यन् ॥ यथा नो अदितिः करत् पश्वे नृभ्यो यथा गवे ।
यथा तोकाय रुद्रियम् ॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा
४३ नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥
उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः । गिरिभ्रजो नोर्मयो मदन्तो
बृहस्पतिमभ्यर्का अनावन् ॥
हꣳसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् । बृहस्पतिरभिकनिक्रदद्गा उत
प्रास्तौदुच्च विद्वाꣳ अगायत् ॥
एन्द्र सानसिꣳ रयिꣳ
४४ सजित्वानꣳ सदासहम् । वर्षिष्ठमूतये भर ॥ प्र ससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते
शुष्म इह रातिरस्तु । इन्द्रा भर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम् ॥
त्वꣳ सुतस्य पीतये सद्यो वृद्धो अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ॥ भुवस्त्वमिन्द्र
ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः । भुवो नृग्श्च्यौत्नो विश्वस्मिन् भरे ज्येष्ठश्च
मन्त्रो
४५ विश्वचर्षणे ॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । सत्यं चित्रश्रवस्तमम् ॥
मित्रो जनान् यातयति प्रजानन्मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाभि
चष्टे सत्याय हव्यं घृतवद्विधेम ॥ प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य
शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैनमꣳहो अश्नोत्यन्तितो न दूरात् ॥ य
४६ च्चिद्धि ते विशो यथा प्र देव वरुण व्रतम् । मिनीमसि द्यविद्यवि ॥ यत्किं चेदं वरुण
दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो
देव रीरिषः ॥
कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म । सर्वा ता विष्य शिथिरेव
देवाथा ते स्याम वरुण प्रियासः ॥ ३। ४। ११॥ सोमो गोषु मा रयिं मंत्रो यच्छिथिरा

सप्त च ॥ ३। ४। ११॥
वि वा एतस्याऽवायो इमे वै चित्तं चाग्निर्भूतानां देवा वा अभ्यातानानृताषाड्राष्ट्र कामाय देविका वास्तोष्पते त्वमग्ने बृहदेकादश ॥
विवा एतस्येत्याह मृत्युर्गंधर्वोव रुंधे मध्यतस्त्वमग्ने बृहत्षट् चत्वारिꣳशत् ॥
विवा एतस्य प्रियासः ॥

## तृतीयकाण्डे पञ्चमः प्रश्नः ५

१ पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय । तस्यां देवा अधि संवसन्त उत्तमे नाक इह मादयन्ताम् ॥ यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा । सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम् ॥ निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती । सहस्रपोषꣳ सुभगा रराणा सा न आ गन्वर्चसा
२ संविदाना ॥ अग्नीषोमौ प्रथमौ वीर्येण वसून्रुद्रानादित्यानिह जिन्वतम् । माध्यꣳ हि पौर्णमासं जुषेथां ब्रह्मणा वृद्धौ सुकृतेन सातावथास्मभ्यꣳ सहवीराꣳ रयिं नि यच्छतम् ॥ आदित्याश्चांगिरसश्चाग्नीनादधत ते दर्शपूर्णमासौ प्रैप्सन्तेषामंगिरसां निरुप्तꣳ हविरासीदथादित्या एतौ होमावपश्यन्तावजुहवुस्ततो वै ते दर्शपूर्णमासौ
३ पूर्व आलभन्त दर्शपूर्णमासावालभमान एतौ होमौ पुरस्ताज्जुहुयात्साक्षादेव दर्शपूर्णमासावा लभते ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासावा लभेत य एनयोरनुलोमं च प्रतिलोमं च विद्यादित्यमावास्याया ऊर्ध्वं तदनुलोमं पौर्णमास्यै प्रतीचीनं तत्प्रतिलोमं यत्पौर्णमासीं पूर्वामालभेत प्रतिलोममेनावा लभेतामुमपक्षीयमाणमन्वप
४ क्षीयेत सारस्वतौ होमौ पुरस्ताज्जुहुयादमावास्या वै सरस्वत्यनुलोममेवैनावा लभतेऽमुमाप्यायमानमन्वा प्यायत आग्नावैष्णवमेकादशकपालं पुरस्तान्निर्वपेत्सरस्वत्यै चरुꣳ सरस्वते द्वादशकपालं यदाग्नेयो भवत्यग्निर्वै यज्ञमुखं यज्ञमुखमेवर्धिं पुरस्ताद्धत्ते यद्वैष्णवो भवति यज्ञो वै विष्णुर्यज्ञमेवारभ्य प्र तनुते सरस्वत्यै चरुर्भवति सरस्वते द्वादशकपालोऽमावास्या वै सरस्वती पूर्णमासः सरस्वान्तावेव साक्षादा रभत ऋध्नोत्याभ्यां द्वादशकपालः सरस्वते भवति मिथुनत्वाय प्रजात्यै मिथुनौ गावौ दक्षिणा समृद्ध्यै ॥ ३। ५। १॥ वर्चसा वै ते दर्शपूर्णमासावप तनुते सरस्वत्यै पंचविꣳशतिश्च ॥ ३। ५। १॥
५ ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन्तं वसिष्ठः प्रत्यक्षं पश्यत्सोऽब्रवीद् ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्तेऽथ मेतरेभ्य ऋषिभ्यो मा प्र वोच इति तस्मा

एतान्थ्स्तोमभागानब्रवीत्ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्त तस्माद्वासिष्ठो ब्रह्मा कार्यः प्रैव जायते रश्मिरसि क्षयाय त्वा क्षयं जिन्वे
६ त्याह देवा वै क्षयो देवेभ्य एव यज्ञं प्राह प्रेतिरसि धर्माय त्वा धर्मं जिन्वेत्याह मनुष्या वै धर्मो मनुष्येभ्य एव यज्ञं प्राहान्वितिरसि दिवे त्वा दिवं जिन्वेत्याहैभ्य एव लोकेभ्यो यज्ञं प्राह विष्टंभोऽसि वृष्ट्यै त्वा वृष्टिं जिन्वेत्याह वृष्टिमेवाव
७ रुंधे प्रवास्यनुवासीत्याह मिथुनत्वायोशिगसि वसुभ्यस्त्वा वसूंजिन्वेत्याहाष्टौ वसव एकादश रुद्रा द्वादशादित्या एतावन्तो वै देवास्तेभ्य एव यज्ञं प्राहौजोऽसि पितृभ्यस्त्वा पितॄंजिन्वेत्याह देवानेव पितृननु सं तनोति तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्वे
८ त्याह पितृनेव प्रजा अनु सं तनोति पृतनाषाडसि पशुभ्यस्त्वा पशूंजिन्वेत्याह प्रजा एव पशूननु सं तनोति रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वेत्याहौषधीष्वेव पशून्प्रति ष्ठापयत्यभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वेत्याहाभिजित्या अधिपतिरसि प्राणाय त्वा प्राणं
९ जिन्वेत्याह प्रजास्वेव प्राणान्दधाति त्रिवृदसि प्रवृदसीत्याह मिथुनत्वाय सꣳरोहोऽसि नीरोहोऽसीत्याह प्रजात्यै वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीत्याह प्रतिष्ठित्यै ॥ ३। ५। २॥ जिन्वेत्यव प्रजा जिन्व प्राणं त्रिꣳशच्च ॥ ३। ५। २॥
१० अग्निना देवेन पृतना जयामि गायत्रेण छंदसा त्रिवृता स्तोमेन रथन्तरेण साम्ना वषट्कारेण वज्रेण पूर्वजान् भ्रातृव्यानधरान् पादयाम्यवैनान् बाधे प्रत्येनान्नुदेऽस्मिन् क्षयेऽस्मिन् भूमिलोके योऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येनान् क्रामामीन्द्रेण देवेन पृतना जयामि त्रैष्टुभेन छंदसा पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण
११ सहजान्विश्वेभिर्देवेभिः पृतना जयामि जागतेन छंदसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणापरजानिन्द्रेण सयुजो वयꣳ सासह्याम पृतन्यतः । घ्नन्तो वृत्राण्यप्रति । यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं यत्ते अग्ने हरस्तेनाहꣳ हरस्वी भूयासम् ॥ ३। ५। ३॥ बृहता साम्ना वषट्कारेण वज्रेण षट् चत्वारिꣳशच्च ॥ ३। ५। ३॥
१२ ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामध्यासते । अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ॥ आगन्म मित्रावरुणा वरेण्या रात्रीणां भागो युवयोर्यो अस्ति । नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥ ये देवा यज्ञहनो

यज्ञमुषोऽन्तरिक्षेऽध्यासते । वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ॥ यास्ते रात्रीः
सवित
१३ देवयानीरन्तरा द्यावापृथिवी वियन्ति । गृहैश्च सर्वैः प्रजयान्वग्रे सुवो रुहाणास्तरता
रजाँसि ॥ ये देवा यज्ञहनो यज्ञमुषो दिव्यध्यासते । सूऱ्यो मा तेभ्यो रक्षतु गच्छेम
सुकृतो वयम् ॥ येनेन्द्राय समभरः पयाग्ँस्युत्तमे न हविषा जातवेदः । तेनाग्ने त्वमुत
वर्धयेमँ सजातानाग् श्रैष्ठ्य आ धेह्येनम् ॥
यज्ञहनो वै देवा यज्ञमुषः
१४ सन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य । ये देवा
यज्ञहनः पृथिव्यामध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकाग्स्तीर्त्वा सगृहः सपशुः
सुवर्गं लोकमेत्यप वै सोमेनेजानाद्देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चकपालमुदवसानीयं
निर्वपेदग्निः सर्वा देवताः
१५ पाङ्क्तो यज्ञो देवताश्चैव यज्ञं चाव रुंधे गायत्रो वा अग्निर्गायत्रछन्दास्तं छंदसा व्यर्धयति
यत्पञ्चकपालं करोत्यष्टाकपालः काऱ्योऽष्टाक्षरा गायत्री गायत्रोऽग्निर्गायत्र छन्दाः स्वेनैवैनं
छंदसा समर्धयति पङ्क्तौ याज्यानुवाक्ये भवतः पाङ्क्तो यज्ञस्तेनैव यज्ञान्नैति ॥ ३। ५।
४॥ सवितर्देवा यज्ञमुषः सर्वा देवतास्त्रिचत्वारिँशच्च ॥ ३। ५। ४॥
१६ सूऱ्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्यजमानोऽग्निर्मा पातु चक्षुषः । सक्ष
शूष सवितर्विश्वचर्षण एतेभिः सोम नामभिर्विधेम ते तेभिः सोम नामभिर्विधेम ते ।
अहं परस्तादहमवस्तादहं ज्योतिषा वि तमो ववार । यदन्तरिक्षं तदु मे पिताभूदहँ
सूर्यमुभयतो ददर्शाहं भूयासमुत्तमः समानाना
१७ मा समुद्रादान्तरिक्षात् प्रजापतिरुदधिं च्यावयातीन्द्रः प्र स्नौतु मरुतो वर्षयन्तून्नंभय
पृथिवीं भिन्द्धीदं दिव्यं नभः । उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिम् ॥ पशवो वा
एते यदादित्य एष रुद्रो यदग्निरोषधीः प्रास्याग्नावादित्यं जुहोति रुद्रादेव पशूनन्तर्दधात्यथो
ओषधीष्वेव पशून्
१८ प्रतिष्ठापयति कविर्यज्ञस्य वि तनोति पन्थां नाकस्य पृष्ठे अधि रोचने दिवः । येन
हव्यं वहसि यासि दूत इतः प्रचेता अमुतः सनीयान् ॥ यास्ते विश्वाः समिधः सन्त्यग्ने
याः पृथिव्यां बर्हिषि सूर्ये याः । तास्ते गच्छन्त्वाहुतिं घृतस्य देवायते यजमानाय
शर्म ॥ आशासानः सुवीर्यँरायस्पोषग्ग् स्वश्वियम् । बृहस्पतिना राया स्वगाकृतो मह्यं
यजमानाय तिष्ठ ॥ ३। ५। ५॥ समानानामोषधीष्वेव पशून्मह्यं यजमानायैकं च ॥ ३।

५। ५॥
१९ सं त्वा नह्यामि पयसा घृतेन सं त्वा नह्याम्यप ओषधीभिः । सं त्वा नह्यामि प्रजयाहमद्य सा दीक्षिता सनवो वाजमस्मे ॥
प्रैतु ब्रह्मणस्पत्नी वेदिं वर्णेन सीदतु । अथाहमनुकामिनी स्वे लोके विशा इह । सुप्रजसस्त्वा वयꣳ सुपत्नीरुप सेदिम । अग्ने सपत्नदंभनमदब्धासो अदाभ्यम् ॥ इमं विष्यामि वरुणस्य पाशं
२० यमबध्नीत सविता सुकेतः । धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि ॥ प्रेह्युदेह्यृतस्य वामीरन्वग्निस्तेऽग्रं नयत्वदितिर्मध्यं ददताꣳ रुद्रावसृष्टासि युवा नाम मा मा हिꣳसीर्वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो वो देवेभ्यः पन्नेजनीर्गृह्णामि यज्ञाय वः पन्नेजनीः सादयामि विश्वस्य ते विश्वावतो वृष्णियावत
२१ स्तवाग्ने वामीरनु संदृशि विश्वा रेताꣳसि धिषीयागन्देवान्, यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्नस्मिन्थ्सुन्वति यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गन्धर्वमा तिष्ठतानु । वातस्य पत्मन्निड ईडिताः ॥ ३। ५। ६॥ पाशं वृष्णियावतस्त्रिꣳ शच्च ॥ ३। ५। ६॥
२२ वषट्कारो वै गायत्रियै शिरोऽच्छिनत् तस्यै रसः परापतथ्स पृथिवीं प्राविशथ्स खदिरोऽभवद्यस्य खादिरः स्रुवो भवति छंदसामेव रसेनाव द्यति सरसा अस्याहुतयो भवन्ति तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहरत्तस्य पर्णमच्छिद्यत तत्पर्णोऽभवत्तत्पर्णस्य पर्णत्वं यस्य पर्णमयी जुहूर्
२३ भवति सौम्या अस्याहुतयो भवन्ति जुषन्तेऽस्य देवा आहुतीर्देवा वै ब्रह्मन्नवदन्त तत्पर्ण उपाश्रृणोथ्सुश्रवा वै नाम यस्य पर्णमयी जुहूर्भवति न पाप२ꣳ श्लोकꣳ शृणोति ब्रह्म वै पर्णो विण्मरुतोऽन्नं विण्मारुतोऽश्वत्थो यस्य पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद्ब्रह्मणैवान्नमव रुंधेऽथो ब्रह्मै
२४ व विश्यध्यूहति राष्ट्रं वै पर्णो विडश्वत्थो यत्पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद्राष्ट्रमेव विश्यध्यूहति प्रजापतिर्वा अजुहोथ्सा यत्राहुतिः प्रत्यतिष्ठत्ततो विकङ्कत उदतिष्ठत्ततः प्रजा असृजत यस्य वैकङ्कती ध्रुवा भवति प्रत्येवास्याहुतयस्तिष्ठन्त्यथो प्रैव जायत एतद्वै स्रुचाꣳ रूपं यस्यैवꣳ रूपाः स्रुचो भवन्ति सर्वाण्येवैनꣳ रूपाणि पशूनामुप तिष्ठन्ते नास्यापरूपमात्मञ्जायते ॥ ३। ५। ७॥ जुहूरधो ब्रह्म स्रुचाꣳ सप्तदश च ॥ ३। ५। ७॥
२५ उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय

दक्षवृधे रातं देवेभ्योऽग्निजिह्वेभ्यस्त्वर्तायुभ्य इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः
पर्जन्यात्मभ्यो दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वापेन्द्र द्विषतो मनोऽप जिज्यासतो
जह्यप यो नोऽरातीयति तं जहि प्राणाय त्वापानाय त्वा व्यानाय त्वा सते त्वासते
त्वाद्भ्यस्त्वौषधीभ्यो विश्वेभ्यस्त्वा भूतेभ्यो यतः प्रजा अक्खिद्रा अजायन्त तस्मै त्वा
प्रजापतये विभूदाव्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि ॥ ३। ५। ८॥ ओषधीभ्यश्चतुर्दश
च ॥ ३। ५। ८॥
२६ यां वा अध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आ वृश्च्येते प्राजापत्यं दधिग्रहं
गृह्णीयात्प्रजापतिः सर्वा देवता देवताभ्य एव नि ह्नुवाते ज्येष्ठो वा एष ग्रहाणां यस्यैष
गृह्यते ज्यैष्ठ्यमेव गच्छति सर्वासां वा एतद्देवतानाꣳ रूपं यदेष ग्रहो यस्यैष गृह्यते
सर्वाण्येवैनꣳ रूपाणि पशूनामुप तिष्ठन्त उपयामगृहीतो
२७ ऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामीत्याह ज्योतिरेवैनꣳ समानानां
करोत्यग्निजिह्वेभ्यस्त्वर्तायुभ्य इत्याहैतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो गृह्णात्यपेन्द्र
द्विषतो मन इत्याह भ्रातृव्यापनुत्त्यै प्राणाय त्वापानाय त्वेत्याह प्राणानेव यजमाने दधाति
तस्मै त्वा प्रजापतये विभूदाव्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमी
२८ त्याह प्रजापतिः सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो जुहोत्याज्यग्रहं
गृह्णीयात्तेजस्कामस्य तेजो वा आज्यं तेजस्व्येव भवति सोमग्रहं गृह्णीयाद्
ब्रह्मवर्चसकामस्य ब्रह्मवर्चसं वै सोमो ब्रह्मवर्चस्येव भवति दधिग्रहं गृह्णीयात्
पशुकामस्योर्ग्वै दध्यूर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनव रुंधे ॥ ३। ५। ९॥ उपयाम
गृहीतो जुहोमि त्रि चत्वारिꣳशच्च ॥ ३। ५। ९॥
२९ त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः । स्वादोः स्वादीयः स्वादुना सृजा
समत ऊषु मधु मधुनाभि योधि ॥
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा । प्राणग्रहान्
गृह्णात्येतावद्वा अस्ति यावदेते ग्रहाः स्तोमाश्छन्दाꣳसि पृष्ठानि दिशो यावदेवास्ति त
३० दव रुंधे ज्येष्ठा वा एतान्ब्राह्मणाः पुरा विदामक्रन्तस्मात्तेषाꣳ सर्वा दिशोऽभिजिता
अभूवन्, यस्यैते गृह्यन्ते ज्यैष्ठ्यमेव गच्छत्यभि दिशो जयति पञ्च गृह्यन्ते पञ्च दिशः
सर्वास्वेव दिक्ष्वृध्नुवन्ति नवनव गृह्यन्ते नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधति
प्रायणीये चोदयनीये च गृह्यन्ते प्राणा वै प्राणग्रहाः
३१ प्राणैरेव प्र यन्ति प्राणैरुद्यन्ति दशमेऽहन् गृह्यन्ते प्राणा वै प्राणग्रहाः प्राणेभ्यः खलु

वा एतत्प्रजा यन्ति यद्वामदेव्यं योनेश्च्यवते दशमेऽहन्वामदेव्यं योनेश्च्यवते यद्दशमेऽहन् गृह्यन्ते प्राणेभ्य एव तत्प्रजा न यन्ति ॥ ३। ५। १०॥ तत्प्राण ग्रहास्सप्त त्रिꣳशच्च ॥ ३। ५। १०॥

३२ प्र देवं देव्या धिया भरता जातवेदसम् । हव्या नो वक्षदानुषक् ॥
अयमुष्य प्र देवयुर्होता यज्ञाय नीयते । रथो न योरभीवृतो घृणीवाञ्चेतति त्मना ॥
अयमग्निरुरुष्यत्यमृतादिव जन्मनः । सहसश्चिथ्सहीयान्देवो जीवातवे कृतः ॥ इडायास्त्वा पदे वयं नाभा पृथिव्या अधि । जातवेदो नि धीमह्यग्ने हव्याय वोढवे ॥
३३ अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम् । कुलायिनं घृतवन्तꣳ सवित्रे यज्ञं नय यजमानाय साधु ॥ सीद होतः स्व उ लोके चिकित्वान्थ्सादया यज्ञꣳ सुकृतस्य योनौ । देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥ नि होता होतृषदने विदानस्त्वेषो दीदिवाꣳ असदथ्सुदक्षः । अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रं भरः शुचिजिह्वो अग्निः ॥ त्वं दूतस्त्व
३४ मु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता । अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः ॥ अभि त्वा देव सवितरीशानं वार्याणाम् । सदावन्भागमीमहे ॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ त मु
३५ त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरंदरम् ॥
त मु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनंजयꣳ रणेरणे ॥ उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि । धनंजयो रणेरणे ॥
आ यꣳ हस्ते न खादिनꣳ शिशुं जातं न बिभ्रति । विशामग्नि२ꣳ स्वध्वरम् ॥ प्र देवं देववीतये भरता वसुवित्तमम् । आ स्वे योनौ निषीदतु ॥ आ
३६ जातं जातवेदसि प्रियꣳ शिशीतातिथिम् । स्योन आ गृहपतिम् ॥
अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड्जुह्वास्यः ॥
त्व२ꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्थ्सता । सखा सख्या समिध्यसे ॥ तं मर्जयन्त सुक्रतुं पुरो यावानमाजिषु । स्वेषु क्षयेषु वाजिनम् ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥ ३। ५। ११॥
वोढवे दूतस्त्वं तमुसीदत्वा यत्र चत्वारि च ॥ ३। ५। ११॥

पू॒र्णर्ष॑यो॒ऽग्निना॒ ये दे॒वास्सूज़्यो॑ मा॒ सं त्वा॑ नह्यामि वषट्का॒रस्स ख॑दि॒र उ॑पया॒म गृ॑हीतोसि॒
यां वै त्वे ऋतुं॒ प्र दे॒वमेका॑दश ॥
पू॒र्णा स॑ह॒जान्तवा᳚ऽग्ने प्रा॒णैरे॒व षड्विꣳशत् ॥
पू॒र्णा संति॑ दे॒वाः ॥
इति तृतीयं काण्डं संपूर्णम् ३॥
॥ तैत्तिरीय-संहिता ॥

# तैत्तिरीय-संहिता

## ॥ चतुर्थं काण्डम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### चतुर्थकाण्डे प्रथमः प्रश्नः १

१ युञ्जानः प्रथमं मनस्तत्वाय सविता धियः । अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत्
॥ युक्त्वाय मनसा देवान्थ्सुवर्यतो धिया दिवम् । बृहज्ज्योतिः करिष्यतः सविता प्र सुवाति
तान् ॥ युक्तेन मनसा वयं देवस्य सवितुः सवे । सुवर्गेयाय शक्त्यै ॥ युञ्जते मन उत
युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इन्
२ मही देवस्य सवितुः परिष्टुतिः ॥ युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोका यन्ति
पथ्येव सूराः । शृण्वन्ति विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥
यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमर्चतः । यः पार्थिवानि विममे स एतशो
रजाꣳसि देवः सविता महित्वना ॥ देव सवितः प्र सुव यज्ञं प्र सुव
३ यज्ञपतिं भगाय दिव्यो गन्धर्वः । केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः
॥ इमं नो देव सवितर्यज्ञं प्र सुव देवायुवꣳ सखिविदꣳ सत्राजितं धनजितꣳ सुवर्जितम्
॥
ऋचा स्तोमꣳ समर्धय गायत्रेण रथंतरम् । बृहद्गायत्रवर्तनि ॥ देवस्य त्वा सवितुः
प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण छंदसाऽददेऽङ्गिरस्वदभ्रिरसि नारि
४ रसि पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भर त्रैष्टुभेन त्वा
छंदसाऽददेऽङ्गिरस्वद्बभ्रिरसि नारिरसि त्वया वयꣳ सधस्थ आग्निꣳ शकेम खनितुं
पुरीष्यं जागतेन त्वा छंदसाऽददेऽङ्गिरस्वद्धस्त आधाय सविता बिभ्रदभ्रिꣳ हिरण्ययीम्
। तया ज्योतिरजस्रमिदग्निं खात्वीन आ भरानुष्टुभेन त्वा छंदसा ददेऽङ्गिरस्वत् ॥ ४।
१। १॥ इद्यज्ञं प्र सुव नारिरानुष्टुभेन त्वा छंदसा त्रीणि च ॥ ४। १। १॥
५ इमामगृभ्णन्रशनामृतस्य पूर्व आयुषि विदथेषु कव्या । तया देवाः सुतमा बभूवुर्ऋतस्य

सामन्थ्सरमारपन्ती ॥ प्रतूर्तं वाजिन्ना द्रव वरिष्ठामनु संवतम् । दिवि ते जन्म परममन्तरिक्षे नाभिः पृथिव्यामधि योनिः ॥ युञ्जाथा ꣳ रासभं युवमस्मिन् यामे वृषण्वसू । अग्निं भरन्तमस्मयुम् ॥ योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥ प्रतूर्व
६ न्ने ह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यान्मयोभूरेहि । उर्वन्तरिक्षमन्विहि स्वस्तिगव्यूतिरभयानि कृण्वन् ॥ पूष्णा सयुजा सह । पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेह्यग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामोऽग्निं पुरीष्यमङ्गिरस्वद्भरामः ॥ अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य
७ पुरुत्रा च रश्मीननु द्यावापृथिवी आ ततान ॥ आगत्य वाज्यध्वनः सर्वा मृधो वि धूनुते । अग्निꣳ सधस्थे महति चक्षुषा नि चिकीषते ॥ आक्रम्य वाजिन्पृथिवीमग्निमिच्छ रुचा त्वम् । भूम्या वृत्वाय नो ब्रूहि यतः खनाम तं वयम् ॥ द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रस्ते योनिः । विख्याय चक्षुषा त्वमभि तिष्ठ
८ पृतन्यतः ॥ उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन् । वय२ꣳ स्याम सुमतौ पृथिव्या अग्निं खनिष्यन्त उपस्थे अस्याः ॥ उदक्रमीद्द्रविणोदा वाज्यर्वाकः स लोकꣳ सुकृतं पृथिव्याः । ततः खनेम सुप्रतीकमग्निꣳ सुवो रुहाणा अधि नाक उत्तमे ॥ अपो देवीरुप सृज मधुमतीरयक्ष्माय प्रजाभ्यः । तासाग् स्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ जिघर्म्य
९ ग्निं मनसा घृतेन प्रतिक्ष्यन्तं भुवनानि विश्वा । पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नꣳ रभसं विदानम् ॥ आ त्वा जिघर्मि वचसा घृतेनारक्षसा मनसा तज्जुषस्व । मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तनुवा जर्हृषाणः ॥ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ परि त्वाग्ने पुरं वयं विप्रꣳ सहस्य धीमहि । धृषद्वर्णं दिवेदिवे भेत्तारं भङ्गुरावतः ॥
त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ ४। १। २॥
प्रतूर्वन्थ्सूर्यस्य तिष्ठ जिघर्मि भेत्तारं विꣳशतिश्च ॥ ४। १। २॥
१० देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां पृथिव्याः सधस्थेऽग्निं

पुरीष्यमङ्गिरस्वत्खनामि ॥ ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यानम् ।
शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत्खनामि ॥ अपां पृष्ठमसि
सप्रथा उर्वग्निं भरिष्यदपरावपिष्ठम् । वर्धमानं मह आ च पुष्करं दिवो मात्रया वरिणा
प्रथस्व ॥ शर्म च स्थो
११ वर्म च स्थो अच्छिद्रे बहुले उभे । व्यचस्वती सं वसाथां भर्तमग्निं पुरीष्यम् ॥ सं
वसाथाꣳ सुवर्विदा समीची उरसा त्मना । अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित्
॥
पुरीष्योऽसि विश्वभराः । अथर्वा त्वा प्रथमो निरमन्थदग्ने ॥ त्वामग्ने पुष्करादध्यथर्वा
निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ तमु त्वा दध्यङ्ङृषिः पुत्र ईधे
१२ अथर्वणः । वृत्रहणं पुरंदरम् ॥ तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् ।
धनंजयꣳ रणेरणे ॥ सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य
योनौ । देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥ नि होता होतृषदने
विदानस्त्वेषो दीदिवाꣳ असदथ्सुदक्षः । अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो
अग्निः ॥ सꣳ सीदस्व महाꣳ असि शोचस्व
१३ देववीतमः । वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥
जनिष्वा हि जेन्यो अग्रे अह्नाꣳ हितो हितेष्वरुषो वनेषु । दमेदमे सप्त रत्ना
दधानोऽग्निर्होता निषसादा यजीयान् ॥ ४। १। ३॥ स्थ ईधे शोचस्व सप्तविꣳशतिश्च ॥
४। १। ३॥
१४ सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं यद्विलिष्टम् । देवानां यश्चरति प्राणथेन
तस्मै च देवि वषडस्तु तुभ्यम् ॥ सुजातो ज्योतिषा सह शर्म वरूथमासदः सुवः ।
वासो अग्ने विश्वरूपꣳ सं व्ययस्व विभावसो ॥ उदु तिष्ठ स्वध्वरावा नो देव्या कृपा
। दृशे च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः ॥
१५ ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता । ऊर्ध्वो वाजस्य सनिता
यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रः शिशुः परि तमाग्स्यक्तः प्र मातृभ्यो अधि कनिक्रदद्गाः ॥ स्थिरो भव वीड्वङ्ग
आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः ॥ शिवो भव
१६ प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवी अभि शूशुचो मान्तरिक्षं मा
वनस्पतीन् ॥ प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निं पुरीष्यं मा पाद्यायुषः

पुरा ॥ रासभो वां कनिक्रदथ्सुयुक्तो वृषणा रथे । स वामग्निं पुरीष्यमाशुर्दूतो वहादितः ॥ वृषाग्निं वृषणं भरन्नपां गर्भꣳसमुद्रियम् । अग्न आ याहि

१७ वीतय ऋतꣳ सत्यम् ॥ ओषधयः प्रति गृह्णीताग्निमेतꣳ शिवमायन्तमभ्यत्र युष्मान् । व्यस्यन्विश्वा अमतीररातीर्निषीदन्नो अप दुर्मतिꣳ हनत् ॥ ओषधयः प्रति मोदध्वमेनं पुष्पावतीः सुपिप्पलाः । अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासदत् ॥ ४। १। ४॥ सुशस्तिभिः शिवो भव याहि षड्विꣳशच्च ॥ ४। १। ४॥

१८ वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः । सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीतौ ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेऽह नः । उशतीरिव मातरः ॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ मित्रः

१९ सꣳसृज्य पृथिवीं भूमिं च ज्योतिषा सह । सुजातं जातवेदसमग्निं वैश्वानरं विभुम् ॥ अयक्ष्माय त्वा सꣳ सृजामि प्रजाभ्यः । विश्वे त्वा देवा वैश्वानराः सꣳ सृजन्त्वानुष्टुभेन छंदसाङ्गिरस्वत् ॥ रुद्राः संभृत्य पृथिवीं बृहज्ज्योतिः समीधिरे । तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते ॥ सꣳसृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् । हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली करोतु

२० ताम् ॥ सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा । सा तुभ्यमदिते मह ओखां दधातु हस्तयोः ॥ उखां करोतु शक्त्या बाहुभ्यामदितिर्धिया । माता पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भ आ ॥ मखस्य शिरोऽसि यज्ञस्य पदे स्थः । वसवस्त्वा कृण्वन्तु गायत्रेण छंदसाङ्गिरस्वत् पृथिव्यसि रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छंदसाङ्गिरस्वदन्तरिक्षमस्या

२१ ऽदित्यास्त्वा कृण्वन्तु जागतेन छंदसाङ्गिरस्वद्द्यौरसि विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छंदसाङ्गिरस्वद्दिशोऽसि ध्रुवासि धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान् यजमानायादित्यै रास्नास्यदितिस्ते बिलं गृह्णातु पाङ्क्तेन छंदसाङ्गिरस्वत् । कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये । तां पुत्रेभ्यः संप्रायच्छददितिः श्रपयानिति ॥ ४। १। ५॥ मित्रः करोत्वन्तरिक्षमसि प्र चत्वारि च ॥ ४। १। ५॥

२२ वसवस्त्वा धूपयन्तु गायत्रेण छंदसाङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छंदसाङ्गिरस्वदादित्यास्त्वा धूपयन्तु जागतेन छंदसाङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छंदसाङ्गिरस्वदिन्द्रस्त्वा धूपयत्वङ्गिरस्वद्विष्णुस्त्वा

धूपयत्वङ्गिरस्वद्वरुणस्त्वा धूपयत्वङ्गिरस्वददितिस्त्वा देवी विश्वदेव्यावती पृथिव्याः
सधस्थेऽङ्गिरस्वत्खनत्ववट देवानां त्वा पत्नी
२३ देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वद्दधतूखे धिषणास्त्वा देवीर्विश्वदेव्यावतीः
पृथिव्याः सधस्थेऽङ्गिरस्वदभीन्धतामुखे ग्नास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः
सधस्थेऽङ्गिरस्वच्छ्रपयन्तूखे वरूत्रयो जनयस्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः
सधस्थेऽङ्गिरस्वत्पचन्तूखे । मित्रैतामुखां पचैषा मा भेदि । एतां ते परि ददाम्यभित्त्यै
। अभीमां
२४ महिना दिवं मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् ॥ मित्रस्य चर्षणीधृतः
श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तमम् ॥ देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः
। सुबाहुरुत शक्त्या ॥ अपद्यमाना पृथिव्याशा दिश आ पृण । उत्तिष्ठ बृहती भवोर्ध्वा
तिष्ठ ध्रुवा त्वम् ॥ वसवस्त्वाच्छृन्दन्तु गायत्रेण छंदसाङ्गिरस्वद्रुद्रास्त्वाच्छृन्दन्तु त्रैष्टुभेन
छंदसाङ्गिरस्वदादित्यास्त्वाच्छृन्दन्तु जागतेन छंदसाङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा आ
च्छृन्दन्त्वानुष्टुभेन छंदसाङ्गिरस्वत् ॥ ४। १। ६॥ पत्नीरिमाꣳ रुद्रास्त्वाऽच्छृन्दत्वेकान्न
विꣳशतिश्च ॥ ४। १। ६॥
२५ समास्त्वाग्न ऋतवो वर्धयन्तु संवथ्सरा ऋषयो यानि सत्या । सं दिव्येन दीदिहि
रोचनेन विश्वा आ भाहि प्रदिशः पृथिव्याः ॥ सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ
महते सौभगाय । मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥ त्वामग्ने
वृणते ब्राह्मणा इमे शिवो अग्ने
२६ सं वरणे भवा नः । सपत्नहा नो अभिमाति जिच्च स्वे गये जागृह्यप्रयुच्छन् ॥
इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन्पूर्वचितो निकारिणः । क्षत्रमग्ने सुयममस्तु
तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥ क्षत्रेणाग्ने स्वायुः सꣳ रभस्व मित्रेणाग्ने मित्रधेये
यतस्व । सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥ अति
२७ निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने । विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ
सहवीराꣳ रयिं दाः ॥ अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह । विश्वा
आशाः प्रमुञ्चन्मानुषीर्भियः शिवाभिरद्य परि पाहि नो वृधे ॥ बृहस्पते सवितर्बोधयैनꣳ
सꣳशितं चिथ्संतराꣳ सꣳ शिशाधि । वर्धयैनं महते सौभगाय
२८ विश्वे एनमनु मदन्तु देवाः ॥ अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।

प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥ उद्वयं तमसस्परि पश्यन्तो
ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ ४। १। ७॥ इमे शिवो अग्नेऽति
सौभगाय चतुस्त्रिꣳशच्च ॥ ४। १। ७॥
२९ ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीग्ष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः
॥ तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथ आनक्ति मध्वा घृतेन ॥ मध्वा यज्ञं
नक्षसे प्रीणानो नराशꣳसो अग्ने । सुकृद्देवः सविता विश्ववारः ॥ अच्छायमेति शवसा
घृतेनेडानो वह्निर्नमसा । अग्नि२ꣳ स्रुचो अध्वरेषु प्रयथ्सु ॥ स यक्षदस्य महिमानमग्नेः
स
३० ई मन्द्रासु प्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥ द्वारो देवीरन्वस्य विश्वे व्रता ददन्ते
अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः ॥ ते अस्य योषणे दिव्ये न योनावुषासानक्ता ।
इमं यज्ञमवतामध्वरं नः ॥ दैव्या होतारावूर्ध्वमध्वरं नोऽग्नेर्जिह्वामभि गृणीतम् । कृणुतं
नः स्विष्टिम् ॥ तिस्रो देवीर्बर्हिरेदꣳ सदन्त्विडा सरस्वती
३१ भारती । मही गृणाना ॥ तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीरम् । रायस्पोषं विष्यतु
नाभिमस्मे ॥ वनस्पतेऽव सृजा रराणस्त्मना देवेषु । अग्निर्हव्यꣳ शमिता सूदयाति
॥ अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् । विश्वे देवा हविरिदं जुषन्ताम् ॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्या
३२ मुतेमां कस्मै देवाय हविषा विधेम ॥ यः प्राणतो निमिषतो महित्वैक इद्राजा
जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ य आत्मदा
बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य छायामृतं यस्य मृत्युः कस्मै
देवाय हविषा विधेम ॥ यस्ये मे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सह
३३ ऽहुः । यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥
यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने । यत्राधि सूर उदितौ व्येति
कस्मै देवाय हविषा विधेम ॥ येन द्यौरुग्रा पृथिवी च दृढे येन सुवः स्तभितं येन नाकः
। यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ आपो ह यन्महतीर्विश्व
३४ मायन्दक्षं दधाना जनयन्तीरग्निम् । ततो देवानां निरवर्ततासुरेकः कस्मै देवाय
हविषा विधेम ॥ यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीरग्निम् । यो देवेष्वधि
देव एक आसीत् कस्मै देवाय हविषा विधेम ॥ ४। १। ८॥ अग्नेस्स सरस्वती द्याꣳ
सह विश्वं चतुस्त्रिꣳशच्च ॥ ४। १। ८॥ ऊर्ध्वा यः प्राणतो य आत्मदा यस्येमे यं क्रंदसी

येन द्यौरापो ह यत्ततो देवानां यश्चिदापो यो देवेषु नव ॥
३५ आकूतिमग्निंप्रयुजग्ग् स्वाहा मनो मेधामग्निं प्रयुजग्ग् स्वाहा चित्तं विज्ञातमग्निं
प्रयुजग्ग् स्वाहा वाचो विधृतिमग्निं प्रयुजग्ग् स्वाहा प्रजापतये मनवे स्वाहाग्नये
वैश्वानराय स्वाहा विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं
वृणीत पुष्यसे स्वाहा मासुभित्था मासुरिषो दृꣳहस्व वीडयस्व सु । अंब धृष्णु
वीरयस्वा
३६ ग्निश्चेदं करिष्यथः ॥ दृꣳहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृतासि
। जुष्टं देवानामिदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ॥ मित्रैतामुखां तपैषा मा
भेदि । एतां ते परि ददाम्यभित्त्यै । द्वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो
अद्भुतः ॥ परस्या अधि संवतोऽवराꣳ अभ्या
३७ तर । यत्राहमस्मि ताꣳ अव ॥ परमस्याः परावतो रोहिदश्व इहाऽगहि । पुरीष्यः
पुरुप्रियोऽग्ने त्वं तरा मृधः ॥ सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान्
। मैनामर्चिषा मा तपसाभि शूशुचोऽन्तरस्याꣳ शुक्रज्योतिर्वि भाहि ॥ अन्तरग्ने रुचा
त्वमुखायै सदने स्वे । तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव ॥ शिवो भूत्वा
मह्यमग्नेऽथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहासदः ॥ ४।
१। ९॥ वीरयस्वाऽतपन्विꣳशतिश्च ॥
४। १। ९॥
३८ यदग्ने यानि कानि चाऽते दारूणि दध्मसि । तदस्तु तुभ्यमिद्घृतं तज्जुषस्व यविष्ठ्य
॥ यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥ रात्रिꣳ
रात्रिमप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै । रायस्पोषेण समिषा मदन्तोऽग्ने मा ते
प्रतिवेशा रिषाम ॥ नाभा
३९ पृथिव्याः समिधानमग्निꣳ रायस्पोषाय बृहते हवामहे । इरंमदं बृहदुक्थं यजत्रं
जेतारमग्निं पृतनासु सासहिम् ॥
याः सेना अभीत्वरीराव्याधिनीरुगणा उत । ये स्तेना ये च तस्करास्ताग्स्ते अग्नेऽपि
दधाम्यास्ये ॥ दꣳष्ट्राभ्यां मलिम्लूञ्जंभ्यैस्तस्कराꣳ उत । हनूभ्याग् स्तेनान्भगवस्ताग्स्त्वं
खाद सुखादितान् ॥ ये जनेषु मलिम्लवः स्तेनासस्तस्करा वने । ये
४० कक्षेष्वघायवस्ताग्स्ते दधामि जंभयोः ॥ यो अस्मभ्यमरातीयाद्यश्च नो द्वेष ते जनः
। निन्दाद्यो अस्मान्दिप्साच्च सर्वं तं मस्मसा कुरु ॥

सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम् । सꣳशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः
॥ उदेषां बाहू अतिरमुद्वर्च उदू बलम् । क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि
४१ स्वाꣳ अहम् । दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतो
अभवद्वयोभिर्यदेनं द्यौरजनयथ्सुरेताः ॥
विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे । वि नाकमख्यथ्सविता
वरेण्योऽनु प्रयाणमुषसो वि राजति ॥ नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ
समीची । द्यावा क्षामा रुक्मो
४२ अन्तर्वि भाति देवा अग्निं धारयन् द्रविणोदाः ॥ सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो
गायत्रं चक्षु स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं
छन्दाग्स्यङ्गानि धिष्णियाः शफा यजूꣳषि नाम । सुपर्णोऽसि गरुत्मान् दिवं गच्छ सुवः
पत ॥ ४। १। १०॥ नाभा वने ये नयामि क्षामा रुक्मोष्टात्रिꣳशच्च ॥ ४। १। १०॥
४३ अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्देवेषु गच्छति ॥ सोम यास्ते मयोभुव
ऊतयः सन्ति दाशुषे । ताभिर्नोऽविता भव ॥
अग्निर्मूर्धा भुवः ॥ त्वं नः सोम या ते धामानि ॥ तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि
। धियो यो नः प्रचोदयात् ॥ अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता
।
४४ देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ॥ चोदयित्री सूनृतानां
चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥ पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी
धियं धात् । ग्नाभिरच्छिद्रꣳ शरणꣳ सजोषा दुराधर्षं गृणते शर्म यꣳसत् ॥ पूषा गा
अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजꣳसनोतु नः ॥ शुक्रं ते अन्यद्यजतं ते अन्यद्
४५ विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावो भद्रा ते
पूषन्निह रातिरस्तु ॥ तेऽवर्धन्त स्वतवसो महित्वनाऽनाकं तस्थुरुरु चक्रिरे सदः ।
विष्णुर्यद्धावद्वृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये । प्र चित्रमर्कं गृणते तुराय
मारुताय स्वतवसे भरध्वम् । ये सहाꣳसि सहसा सहन्ते
४६ रेजते अग्ने पृथिवी मखेभ्यः ॥ विश्वे देवा विश्वे देवाः ॥ द्यावा नः पृथिवी इमꣳ
सिध्रमद्य दिविस्पृशम् । यज्ञं देवेषु यच्छताम् ॥ प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः
कृणुध्वꣳ सदने ऋतस्य । आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथम्
॥

अग्नि२ँ स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ॥ स हव्यवाडमर्त्य उशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥ शं नो भवन्तु वाजेवाजे ॥ ४। १। ११॥
पूरुषत्वता यजतं ते अन्यथ्सहन्ते च नोहितोऽष्टौ च ॥ ४। १। ११॥
युंजान इमामगृभ्णन्देवस्य सं ते वि पाजसा वसवस्त्वा समास्त्वोर्ध्वा अस्याकूतिं यदग्ने यान्यग्ने यं यज्ञमेकादश ॥
युंजानो वर्म च स्थ आदित्यास्त्वा भारती स्वा२ँ अह२ँ षड्वत्वारि२ँशत् ॥
युंजानो वाजेवाजे ॥

## चतुर्थकाण्डे द्वितीयः प्रश्नः २

१ विष्णोः क्रमोऽस्यभिमातिहा गायत्रं छंद आ रोह पृथिवीमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यभिशस्तिहा त्रैष्टुभं छंद आ रोहान्तरिक्षमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छंद आ रोह दिवमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः

२ क्रमोऽसि शत्रूयतो हन्तानुष्टुभं छंद आ रोह दिशोऽनु वि क्रमस्व निर्भक्तः स यं द्विष्मः । अक्रन्ददग्नि स्तनयन्निव द्यौः, क्षामा रेरिहद्वीरुधः समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ अग्नेऽभ्यावर्तिन्नभिन आ वर्तस्वायुषा वर्चसा सन्या मेधया प्रजया धनेन ॥ अग्ने

३ अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः । तासां पोषस्य पोषेण पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि ॥
पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाहि विश्वतः ॥
सह रय्यानिवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि ॥ उदुत्तमं वरुण पाशमस्मदवाधमं

४ वि मध्यम२ँ श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाङ्छन्त्वस्मिन्राष्ट्रमधि श्रय ॥ अग्रे बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्मिवान्तमसो ज्योतिषागात् । अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः ॥ सीद त्वं मातुरस्या

५ उपस्थे विश्वान्यग्ने वयुनानि विद्वान् । मैनामर्चिषा मा तपसाभि शूशुचोऽन्तरस्या२ँ शुक्रज्योतिर्वि भाहि ॥ अन्तरग्ने रुचा त्वमुखायै सदने स्वे । तस्यास्त्व२ँ हरसा

तपञ्जातवेदः शिवो भव ॥ शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहासदः ॥ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ ४। २। १॥ दिवमनु वि क्रमस्व निर्भक्तस्स यन्द्विष्मो विष्णोर्धनेनाग्नेऽधममस्याः शुचिषथ्षोडश च ॥ ४। २। १॥

६ दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः । तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥ विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा । विद्मा ते नाम परमं गुहा यद्विद्मा तमुथ्सं यत आजगन्थ ॥ समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् । तृतीये त्वा

७ रजसि तस्थिवाꣳसमृतस्य योनौ महिषा अहिन्वन् ॥ अक्रन्ददग्निः स्तनयन्निव द्यौः, क्षामा रेरिहद्वीरुधः समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो निधायि । इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षत् ॥ विश्वस्य केतुर्भुवनस्य गर्भ आ

८ रोदसी अपृणाज्जायमानः । वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च ॥ श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः । वसोः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः ॥ यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने । प्र तं नय प्रतरं वस्यो अच्छाभि द्युम्नं देवभक्तं यविष्ठ ॥ आ

९ तं भज सौश्रवसेष्वग्न उक्थ उक्थ आ भज शस्यमाने । प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥

त्वामग्ने यजमाना अनु द्यून्, विश्वा वसूनि दधिरे वार्याणि । त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विवव्रुः ॥ दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः । अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयथ्सुरेताः ॥ ४। २। २॥ तृतीये त्वा गर्भ आ यविष्ठाऽयच्चत्वारि च ॥ ४। २। २॥

१० अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवतमः सुप्रतीको विभावसुः ॥ प्रेदग्ने ज्योतिष्मान्, याहि शिवेभिरर्चिभिस्त्वम् । बृहद्भिर्भानुभिर्भासन्मा हिꣳसीस्तनुवा प्रजाः ॥ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आ

११ ऽस्मिन् हव्या जुहोतन ॥ प्रप्रायमग्निर्भरतस्य शृण्वे वि यथ्सूर्यो न रोचते बृहद्भाः

। अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥ आपो देवीः प्रति गृह्णीत भस्मैतथ्स्योने कृणुध्वꣳ सुरभावु लोके । तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृता स्वेनम् ॥ अप्स्वग्ने सधिष्टव
१२ सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥ गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ॥
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । स ꣳसृज्य मातृभिस्त्वं ज्योतिष्मान् पुनरासदः ॥ पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्याꣳ शिवतमः ॥ पुनरूर्जा
१३ निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाहि विश्वतः ॥ सह रय्यानिवर्तस्वाग्ने पिन्वस्व धारया । विश्वफ्स्निया विश्वतस्परि ॥
पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तनुवो वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ बोधा नो अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः । पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तनुवं वन्दे अग्ने ॥ स बोधि सूरिर्मघवा वसुदावा वसुपतिः । युयोध्यस्मद्द्वेषाꣳसि ॥ ४। २। ३॥ आ तवोर्जाऽनु षोडश च ॥ ४। २। ३॥
१४ अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः । अदादिदं यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ॥ अग्नेर्भस्मास्यग्नेः पुरीषमसि संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् ॥ सं या वः प्रियास्तनुवः सं प्रिया हृदयानि वः । आत्मा वो अस्तु
१५ सं प्रियः सं प्रियास्तनुवो मम ॥ अयꣳ सो अग्निर्यस्मिन्थ्सोममिन्द्रः सुतं दधे जठरे वावशानः । सहस्रियं वाजमत्यं न सप्तिꣳससवान्थ्सन्थ्स्तूयसे जातवेदः ॥ अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाꣳ ऊचिषे धिष्णिया ये । याः परस्ताद्रोचने सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥ अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्व
१६ प्सु वा यजत्र । येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥ पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः । जुषन्ताꣳहव्यमाहुतमनमीवा इषो महीः ॥ इडामग्ने पुरुदꣳ सꣳसनिं गोः शश्वत्तमꣳ हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ अयं ते योनिरृत्वियो यतो जातो अरोचथाः । तं जान

१७ न्नग्न आ रोहाथा नो वर्धया रयिम् ॥ चिदसि तया देवतयाङ्गिरवद्ध्रुवा सीद परिचिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीद लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन्, योनावसीषदन् ॥ ता अस्य सूददोहसः सोमग्ग् श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥ ४। २। ४॥

अस्त्वोषधीषु जानन्नष्टा चत्वारिँ शच्च ॥ ४। २। ४॥

१८ समितꣳ सं कल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि संवसानौ सं वां मनाꣳसि सं व्रता स मु चित्तान्याकरम् ॥ अग्ने पुरीष्याधिपा भवा त्वं नः । इषमूर्जं यजमानाय धेहि ॥ पुरीष्यस्त्वमग्ने रयिमान्पुष्टिमाꣳ असि । शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहासदः ॥ भवतं नः समनसौ समोकसा

१९ वरेपसौ । मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥ मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा । तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु ॥ यदस्य पारे रजसः शुक्रं ज्योतिरजायत । तन्नः पर्षदति द्विषोऽग्ने वैश्वानर स्वाहा ॥

नमः सु ते निर्ऋते विश्वरूपे

२० ऽयस्मयं वि चृता बन्धमेतम् । यमेन त्वं यम्या संविदानोत्तमं नाकमधि रोहयेमम् ॥ यत्ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचर्त्यम् । इदं ते तद्विष्याम्यायुषो न मध्यादथा जीवः पितुमद्धि प्रमुक्तः ॥ यस्यास्ते अस्याः क्रूर आसञ्जुहोम्येषां बन्धानामवसर्जनाय । भूमिरिति त्वा जना विदुर्निर्ऋति

२१ रिति त्वाहं परि वेद विश्वतः ॥ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यां तस्करस्यान्वेषि । अन्यमस्मदिच्छ सात इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ देवीमहं निर्ऋतिं वन्दमानः पितेव पुत्रं दसये वचोभिः । विश्वस्य या जायमानस्य वेद शिरः शिरः प्रति सूरी वि चष्टे ॥ निवेशनः संगमनो वसूनां विश्वा रूपाभि चष्टे

२२ शचीभिः । देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥ सं वरत्रा दधातन निराहावान् कृणोतन । सिञ्चामहा अवटमुद्रिणं वयं विश्वाहादस्तमक्षितम् ॥ निष्कृताहावमवटꣳ सुवरत्रꣳ सुषेचनम् । उद्रिणꣳ सिञ्चे अक्षितम् ॥ सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया । युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह

२३ बीजम् । गिरा च श्रुष्टिः सभरा असन्नो नेदीय इथ्सृण्या पक्कमायत् ॥
लाङ्गलं पवीरवꣳ सुशेवꣳ सुमतिथ्सरु । उदित्कृषति गामविं प्रफर्व्यं च पीवरीम्
। प्रस्थावद्रथवाहनम् ॥ शुनं नः फाला वि तुदन्तु भूमिꣳ शुनं कीनाशा अभि यन्तु
वाहान् । शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मा सु धत्तम् ॥ कामं कामदुघे
धुक्ष्व मित्राय वरुणाय च । इन्द्रायाग्नये पूष्ण ओषधीभ्यः प्रजाभ्यः ॥ घृतेन सीता
मधुना समक्ता विश्वैर्देवैरनुमता मरुद्भिः । ऊर्जस्वती पयसा पिन्वमानास्मान्थ्सीते
पयसाऽभ्याववृथ्स्व ॥ ४। २। ५॥ समोकसौ विश्वरूपे विदुर्निर्ऋतिरभि चष्ट इह मित्राय
द्वाविꣳशतिश्च ॥ ४। २। ५॥
२४ या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा । मन्दामि बभ्रूणामहꣳ शतं धामानि सप्त च
॥ शतं वो अंब धामानि सहस्रमुत वो रुहः । अथा शतक्रत्वो यूयमिमं मे अगदं कृत
॥ पुष्पावतीः प्रसूवतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः
॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे । रपाꣳसि विघ्नतीरित रप
२५ श्चातयमानाः ॥ अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता । गोभाज इत्किलासथ
यथ्सनवथ पूरुषम् ॥ यदहं वाजयन्निमा ओषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति
पुरा जीवगृभो यथा ॥ यदोषधयः संगच्छन्ते राजानः समिताविव । विप्रः स उच्यते
भिषग्रक्षोहामीवचातनः ॥ निष्कृतिर्नाम वो माताथा यूयꣳ स्थ संकृतीः । सराः
पतत्रिणीः
२६ स्थन यदामयति निष्कृत ॥ अन्या वो अन्यामवत्वन्यान्यस्या उपावत । ताः सर्वा
ओषधयः संविदाना इदं मे प्रावता वचः ॥ उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते ।
धनꣳ सनिष्यन्तीनामात्मानं तव पूरुष ॥ अति विश्वाः परिष्ठा स्तेन इव व्रजमक्रमुः ।
ओषधयः प्राचुच्यवुर्यत्किं च तनुवाꣳ रपः ॥ या
२७ स्त आतस्थुरात्मानं या आविविशुः परुःपरुः । तास्ते यक्ष्मं वि बाधन्तामुग्रो
मध्यमशीरिव ॥ साकं यक्ष्म प्र पत श्येनेन किकिदीविना । साकं वातस्य ध्राज्या साकं
नश्य निहाकया ॥
अश्वावतीꣳ सोमवतीमूर्जयन्तीमुदोजसम् । आ वित्सि सर्वा ओषधीरस्मा अरिष्टतातये
॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पति प्रसूतास्ता नो
मुञ्चन्त्वꣳहसः ॥ या

२८ ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु । तासां त्वमस्युत्तमा प्रणो जीवातवे सुव
॥ अवपतन्तीरवदन्दिव ओषधयः परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥
याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः । इह संगत्य ताः सर्वा अस्मै संदत्त भेषजम् ॥
मा वो रिषत्खनिता यस्मै चाऽहं खनामि वः । द्विपच्चतुष्पदस्माकꣳ सर्वमस्त्वनातुरम्
॥ ओषधयः सं वदन्ते सोमेन सह राज्ञा । यस्मै करोति ब्राह्मणस्तꣳ राजन् पारयामसि
॥ ४। २। ६॥ रपः पतत्रिणीर्या अꣳहसो याः खनामि वोष्टादश च ॥ ४। २। ६॥
२९ मा नो हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा जजान । यश्चापश्चन्द्रा
बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥
अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते अग्निरिषितोऽव सर्पतु ॥ अग्ने यत्ते
शुक्रं यच्चन्द्रं यत्पूतं यद्यज्ञियम् । तद्देवेभ्यो भरामसि ॥ इषमूर्जमहमित आ
३० दद ऋतस्य धाम्नो अमृतस्य योनेः । आ नो गोषु विशत्वौषधीषु जहामि
सेदिमनिराममीवाम् ॥ अग्ने तव श्रवो वयो महि भ्राजन्त्यर्चयो विभावसो । बृहद्भानो
शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ॥
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य । स दर्शतस्य वपुषो वि राजसि पृणक्षि
सानसिꣳ रयिम् ॥ ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व
३१ धीतिभिर्हितः । त्वे इषः सं दधुर्भूरि रेतसश्चित्रोतयो वामजाताः ॥ पावकवर्चाः
शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना । पुत्रः पितरा विचरन्नुपावस्युभे पृणक्षि रोदसी ॥
ऋतावानं महिषं विश्वचर्षणिमग्निꣳ सुम्नाय दधिरे पुरो जनाः । श्रुत्कर्णꣳ सप्रथस्तमं
त्वा गिरा दैव्यं मानुषा युगा॥ निष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसे महे । रातिं
भृगूणामुशिजं कविक्रतुं पृणक्षि सानसिꣳ
३२ रयिम् ॥ चितः स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाङ्गिरस्वद्ध्रुवाः सीदत
॥ आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियम् । भवा वाजस्य संगथे ॥ सं ते
पयाꣳसि समु यन्तु वाजाः सं वृष्णियान्यभिमातिषाहः । आप्यायमानो अमृताय सोम
दिवि श्रवाग् स्युत्तमानि धिष्व ॥ ४। २। ७॥ आ मन्दस्व सानसिमेकान्न चत्वारिꣳशच्च
॥ ४। २। ७॥
३३ अभ्यस्थाद्विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह । बृहस्पतिः सविता
तन्म आह पूषा माधात्सुकृतस्य लोके ॥ यदक्रन्दः प्रथमं जायमान उद्यन्थ्समुद्रादुत वा
पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उपस्तुतं जनिम तत्ते अर्वन् ॥ अपां पृष्ठमसि

योनिरग्नेः समुद्रमभितः पिन्वमानम् । वर्धमानं मह
३४ आ च पुष्करं दिवो मात्रया वरिणा प्रथस्व ॥ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः
सुरुचो वेन आवः । स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥ द्रप्सश्चस्कन्द पृथिवीमनु
३५ द्यामिमं च योनिमनु यश्च पूर्वः । तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त
होत्राः ॥ नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः
सर्पेभ्यो नमः ॥ येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदः कृतं तेभ्यः
सर्पेभ्यो नमः ॥ या इषवो यातुधानानां ये वा वनस्पतीꣳरनु । ये वा वटेषु शेरते
तेभ्यः सर्पेभ्यो नमः ॥ ४। २। ८॥ महोऽनु यातुधानानामेकादश च ॥ ४। २। ८॥
३६ ध्रुवासि धरुणास्तृता विश्वकर्मणा सुकृता । मा त्वा समुद्र उद्वधीन्मा
सुपर्णोऽव्यथमाना पृथिवीं दृꣳह ॥ प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठे व्यचस्वतीं
प्रथस्वतीं प्रथोऽसि पृथिव्यसि भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य
धर्त्री पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय
प्रतिष्ठायै
३७ चरित्रायाग्निस्त्वाभि पातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा
सीद ॥ काण्डात्काण्डात् प्ररोहन्ती परुषःपरुषः परि । एवा नो दूर्वे प्र तनु सहस्रेण
शतेन च ॥ या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा
वयम् ॥ अषाढासि सहमाना सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः सहस्व
पृतन्यतः । सहस्रवीर्या
३८ ऽसि सा मा जिन्व ॥ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः
सन्त्वोषधीः ॥ मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ मही द्यौः पृथिवी
च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ तद्विष्णोः परमं
३९ पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ ध्रुवासि पृथिवि सहस्व
पृतन्यतः । स्यूता देवेभिरमृतेनागाः ॥ यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति
रश्मिभिः । ताभिः सर्वाभी रुचे जनाय नस्कृधि ॥ या वो देवाः सूर्ये रुचो गोष्वश्वेषु

या रुचः । इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥ विराड्
४० ज्योतिरधारयत् सम्राड् ज्योतिरधारयत् स्वराड् ज्योतिरधारयत् ॥ अग्ने युक्ष्वा हि
ये तवाश्वासो देव साधवः । अरं वहन्त्याशवः ॥ युक्ष्वा हि देवहूतमाꣳ अश्वाꣳ अग्ने
रथीरिव । नि होता पूर्व्यः सदः ॥
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः । तृतीयं योनिमनु संचरन्तं
द्रप्सं जुहोम्यनु सप्त
४१ होत्राः ॥ अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च । अग्निर्ज्योतिषा
ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान् ॥ ऋचे त्वा रुचे त्वा समिथ्स्रवन्ति सरितो न
धेनाः । अन्तर्हृदा मनसा पूयमानाः ॥ घृतस्य धारा अभि चाकशीमि । हिरण्ययो वेतसो
मध्य आसाम् ॥
तस्मिन्थ्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः । तस्यासते हरयः सप्त तीरे
स्वधां दुहाना अमृतस्य धाराम् ॥ ४। २। ९॥ प्रतिष्ठायै सहस्रवीर्या परमं विराट्थ्सप्त
तीरे चत्वारि च ॥
४। २। ९॥
४२ आदित्यं गर्भं पयसा समञ्जन्थ्सहस्रस्य प्रतिमां विश्वरूपम् । परि वृङ्धि हरसा माभि
मृक्षः शतायुषं कृणुहि चीयमानः ॥
इमं मा हिꣳसीर्द्विपादं पशूनाꣳ सहस्राक्ष मेध आ चीयमानः । मयुमारण्यमनु ते दिशामि
तेन चिन्वानस्तनुवो नि षीद ॥ वातस्य ध्राजिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य
मध्ये । शिशुं नदीनाꣳ हरिमद्रिबुद्धमग्ने मा हिꣳसीः
४३ परमे व्योमन् ॥ इमं मा हिꣳसीरेकशफं पशूनां कनिक्रदं वाजिनं वाजिनेषु
। गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥ अजस्रमिन्दुमरुषं
भुरण्युमग्निमीडे पूर्वचित्तौ नमोभिः । स पर्वभिर्ऋतुशः कल्पमानो गां मा हिꣳसीरदितिं
विराजम् ॥ इमꣳ समुद्रꣳ शतधारमुथ्सं व्यच्यमानं भुवनस्य मध्ये । घृतं दुहानामदितिं
जनायाग्ने मा
४४ हिꣳसीः परमे व्योमन् । गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥
वरूत्रिं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् । महीꣳ साहस्रीमसुरस्य
मायामग्ने मा हिꣳसीः परमे व्योमन् ॥ इमामूर्णायुं वरुणस्य मायां त्वचं पशूनां द्विपदां
चतुष्पदाम् । त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिꣳसीः परमे व्योमन् । उष्ट्रमारण्यमनु

४५ ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥ यो अग्निरग्नेस्तपसोऽधि जातः शोचात्पृथिव्या उत वा दिवस्परि । येन प्रजा विश्वकर्मा व्यानट्तमग्ने हेडः परि ते वृणक्तु ॥ अजा ह्यग्नेरजनिष्ट गर्भाथ्सा वा अपश्यज्जनितारमग्रे । तया रोहमायन्नुप मेध्यासस्तया देवा देवतामग्र आयन् । शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥ ४। २। १०॥ अग्ने मा हिꣳसीरग्ने मोष्ट्रमारण्यमनु शरभन्नव च ॥ ४। २। १०॥

४६ इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद्वां चेति प्र वीर्यम् ॥ श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् । इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता ॥ प्र चर्षणिभ्यः पृतना हवेषु प्र पृथिव्या रिरिचाथे दिवश्च । प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या ॥

मरुतो यस्य हि

४७ क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥ यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनाम् । मरुतः शृणुता हवम् ॥ श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः । ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥ अव ते हेड उदुत्तमम् । कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥

४८ को अद्य युङ्क्ते धुरिगा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् । आसन्निषून्, हृथ्स्वसो मयोभून्, य एषां भृत्यामृणधथ्स जीवात् ॥

अग्ने नयादेवानाꣳ शं नो भवन्तु वाजेवाजे । अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥ वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥ इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने ॥ ४। २। ११॥ हि वृता म एकादश च ॥ ४। २। ११॥

विष्णोः क्रमोसि दिवस्पर्यन्नपतेऽपेत समितं या जाता मा नो हिꣳसीदभ्यस्थाद्ध्रुवासि धरुणादित्यं गर्भमिंद्राग्नी रोचनैकादश ॥

विष्णोरस्मिन् हव्येति त्वाहं धीतिभिर् होत्रा अष्टाचत्वारिꣳशत् ॥

विष्णोः क्रमोसि त्वन्नो अग्ने स त्वन्नो अग्ने ॥

# चतुर्थकाण्डे तृतीयः प्रश्नः ३

१ अपां त्वेमन्थ्सादयाम्यपां त्वोद्मन्थ्सादयाम्यपां त्वा भस्मन्थ्सादयाम्यपां त्वा ज्योतिषि सादयाम्यपां त्वायने सादयाम्यर्णवे सदने सीद समुद्रे सदने सीद सलिले सदने सीदापां क्षये सीदापाꣳ सधिषि सीदापां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा योनौ सादयाम्यपां त्वा पाथसि सादयामि गायत्री छंदस्त्रिष्टुप्छन्दो जगती छन्दोऽनुष्टुप्छंदः पङ्क्तिश्छंदः ॥ ४। ३। १॥ योनौ पंचदश च ॥
४। ३। १॥

२ अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्रियै गायत्रं गायत्रा दुपाꣳशुरुपाꣳशोस्त्रिवृत् त्रिवृतो रथंतरꣳ रथंतराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्योऽयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुग्ग्रैष्मी त्रिष्टुभ ऐडमैडादन्तर्यामोऽन्तर्यामात्पञ्चदशः पञ्चदशाद्बृहद्बृहतो भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो

३ गृह्णामि प्रजाभ्योयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाणि चाक्षुषाणि जगती वार्षी जगत्या ऋक्षममृक्षमाच्छुक्रः शुक्राथ्सप्तदशः सप्तदशाद्वैरूपं वैरूपाद्विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्य इदमुत्तराथ्सुवस्तस्य श्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनुष्टुप्छारद्यनुष्टुभः स्वारꣳ स्वारान्मन्थी मन्थिन एकविꣳश एकविꣳशाद्वैराजं वैराजाज्जमदग्निर्ऋषिः प्रजापतिगृहीतया

४ त्वया श्रोत्रं गृह्णामि प्रजाभ्य इयमुपरि मतिस्तस्यै वाङ्माती हेमन्तो वाच्यायनः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात्त्रिणवत्रयस्त्रिꣳशौ त्रिणवत्रयस्त्रिꣳशाभ्याꣳशाक्वररैवते शाक्वररैवताभ्यां विश्वकर्मर्षिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ॥ ४। ३। २॥ त्वया मनो जमदग्निर् ऋषिः प्रजापतिगृहीतया त्रिꣳशच्च ॥ ४। ३। २॥

५ प्राची दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृथ्स्तोमः स उ पञ्चदशवर्तनिस्त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषिर्दक्षिणा दिशां ग्रीष्म ऋतूनामिन्द्रो देवता क्षत्रं द्रविणं पञ्चदशः स्तोमः स उ सप्तदशवर्तनिर्दित्यवाड्वयस्त्रेतायानां दक्षिणाद्वातो वातः सनातन ऋषिः प्रतीची दिशां वर्षा ऋतूनां विश्वे देवा देवता विड्

६ द्रविणꣳ सप्तदशः स्तोमः स उ एकविꣳशवर्तनिस्त्रिवथ्सो वयो द्वापरोऽयानां पश्चाद्वातो

वातोऽहभून ऋषिरुदीची दिशाꣳ शरदृतूनां मित्रावरुणौ देवता पुष्टं द्रविणमेकविꣳशः स्तोमः स उ त्रिणववर्तनिस्तुर्यवाड्वय आस्कन्दोऽयानामुत्तराद्वातो वातः प्रत्न ऋषिरूर्ध्वा दिशाꣳ हेमन्तशिशिरावृतूनां बृहस्पतिर्देवता वर्चो द्रविणं त्रिणवः स्तोमः स उ त्रयस्त्रिꣳशवर्तनिः पष्ठवाड्वयोऽभिभूरयानां विष्वग्वातो वातः सुपर्ण ऋषिः पितरः पितामहाः परेऽवरे ते नः पान्तु ते नोऽवन्त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याम् ॥

४। ३। ३॥ विद्वष्ठवाड्वयोऽष्टा विꣳशतिश्च ॥ ४। ३। ३॥

७ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवां योनिमा सीद साध्या । उख्यस्य केतुं प्रथमं पुरस्तादश्विनाध्वर्यू सादयतामिह त्वा ॥ स्वे दक्षे दक्षपितेह सीद देवत्रा पृथिवी बृहती रराणा । स्वासस्था तनुवा सं विशस्व पितेवैधि सूनव आसुशेवाश्विनाध्वर्यू सादयतामिह त्वा ॥ कुलायिनी वसुमती वयोधा रयिं नो वर्ध बहुलꣳ सुवीरम् ।

८ अपामतिं दुर्मतिं बाधमाना रायस्पोषे यज्ञपतिमाभजन्ती सुवर्धेहि यजमानाय पोषमश्विनाध्वर्यू सादयतामिह त्वा ॥ अग्नेः पुरीषमसि देवयानी तां त्वा विश्वे अभि गृणन्तु देवाः । स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्वाश्विनाध्वर्यू सादयतामिह त्वा ॥

दिवो मूर्धासि पृथिव्या नाभिर्विष्टंभनी दिशामधिपत्नी भुवनानाम् ॥

९ ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह त्वा ॥ सजूरृतुभिः सजूर्विधाभिः सजूर्वसुभिः सजू रुद्रैः सजूरादित्यैः सजूर्विश्वैर्देवैः सजूर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ॥ प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्म उर्व्या वि भाहि श्रोत्रं मे श्लोकयापस्पिन्वौषधीर्जिन्व द्विपात्पाहि चतुष्पादव दिवो वृष्टिमेरय ॥ ४। ३। ४॥ सुवीरं भुवनामुर्व्या सप्तदश च ॥ ४। ३। ४॥

१० त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छंदः पञ्चाविर्वयो गायत्री छंदस्त्रिवथ्सो वय उष्णिहा छंदस्तुर्यवाड्वयोऽनुष्टुप्छंदः पष्ठवाड्वयो बृहती छंद उक्षा वयः सतो बृहती छंद ऋषभो वयः ककुच्छन्दो धेनुर्वयो जगती छन्दोऽनड्वान्, वयः पङ्क्तिश्छन्दो बस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छंदः पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छंदः सिꣳहो वयश्छदिश्छन्दो विष्टंभो वयोऽधिपतिश्छंदः, क्षत्रं वयो मयन्दं छन्दो विश्वकर्मा वयः परमेष्ठी छन्दो मूर्धा वयः प्रजापतिश्छंदः ॥ ४। ३। ५॥ पुरुषो वयष्षड्विꣳशतिश्च

॥ ४। ३। ५॥
११ इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतं युवम् । पृष्ठेन द्यावापृथिवी अन्तरिक्षं च वि बाधताम् ॥ विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीं भास्वतीꣳ सूरिमतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षमन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय वायुस्त्वाभि पातु मह्या स्वस्त्या छर्दिषा
१२ शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद । राज्ञ्यसि प्राची दिग्विराडसि दक्षिणा दिक्सम्राडसि प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिगायुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो मे जिन्व वाचं मे पिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ ॥ ४। ३। ६॥ छर्दिषा पिन्व षट्च ॥ ४। ३। ६॥
१३ मा छंदः प्रमा छंदः प्रतिमा छन्दोऽस्रीविश्छंदः पङ्क्तिश्छंद उष्णिहा छन्दो बृहती छन्दोऽनुष्टुप्छन्दो विराट्छन्दो गायत्री छंदस्त्रिष्टुप्छन्दो जगती छंदः पृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छंदः समाश्छन्दो नक्षत्राणि छन्दो मनश्छन्दो वाक्छंदः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजा छन्दोऽश्वश्छंदः ॥
अग्निर्देवता
१४ वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता विश्वे देवा देवता मरुतो देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता मूर्धासि राड्ध्रुवासि धरुणा यन्त्र्यसि यमित्रीषे त्वोर्जे त्वा कृष्यै त्वा क्षेमाय त्वा यन्त्री राड्ध्रुवासि धरणी धर्त्र्यसि धरित्र्यायुषे त्वा वर्चसे त्वौजसे त्वा बलाय त्वा ॥ ४। ३। ७॥ देवताऽयुषे त्वा षट्च ॥ ४। ३। ७॥
१५ आशुस्त्रिवृद्भान्तः पञ्चदशो व्योम सप्तदशः प्रतूर्तिरष्टादशस्तपो नवदशोऽभिवर्तः सविꣳशो धरुण एकविꣳशो वर्चो द्वाविꣳशः संभरणस्त्रयोविꣳशो योनिश्चतुर्विꣳशो गर्भाः पञ्चविꣳश ओजस्त्रिणवः क्रतुरेकत्रिꣳशः प्रतिष्ठा त्रयस्त्रिꣳशो ब्रध्नस्य विष्टपं चतुस्त्रिꣳशो नाकः षट्त्रिꣳशो विवर्तोऽष्टाचत्वारिꣳशो धर्त्रश्चतुष्टोमः ॥ ४। ३। ८॥ आशुस्सप्त त्रिꣳशत् ॥ ४। ३। ८॥
१६ अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृथ्स्तोम इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रꣳ स्पृतं पञ्चदशः स्तोमो नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रꣳ स्पृतꣳ सप्तदशः स्तोमो मित्रस्य भागोऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वाताः

स्पृता एकवि ँ॒शः स्तोमोऽदित्यै भागोऽसि पूष्ण आधिपत्यमोजः स्पृतं त्रिणवः स्तोमो
वसूनां भागोऽसि
१७ रुद्राणामाधिपत्यं चतुष्पाथ्स्पृतं चतुर्वि ँ॒शः स्तोम आदित्यानां भागोऽसि
मरुतामाधिपत्यं गर्भाः स्पृताः पञ्चवि ँ॒शः स्तोमो देवस्य सवितुर्भागोऽसि
बृहस्पतेराधिपत्य ँ॒ समीचीर्दिशः स्पृताश्चतुष्टोमः स्तोमो यावानां भागोऽस्ययावानामाधिपत्यं
प्रजाः स्पृताश्चतुश्चत्वारि ँ॒शः स्तोम ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं
निशान्त२ ँ॒ स्पृतं त्रयस्त्रि ँ॒शः स्तोमः ॥ ४। ३। ९॥ वसूनां भागोसि षड्वत्वारि ँ॒शच्च
॥ ४। ३। ९॥
१८ एकयास्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवत
ब्रह्मासृज्यत ब्रह्मणस्पतिरधि पतिरासीत् पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां
पतिरधिपतिरासीथ्सप्तभिरस्तुवत सप्तऋषयोऽसृज्यन्त धाताधिपतिरासीन्नवभिरस्तुवत
पितरोऽसृज्यन्तादितिरधि पत्न्यासीदेकादशभिरस्तुवतर्तवोऽसृज्यन्तार्तवोऽधिपतिरासीत्त्रयोदशभिरस
मासा असृज्यन्त संवथ्सरोऽधिपति
१९ रासीत्पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीथ्सप्तदशभिरस्तुवत
पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीन्नवदशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे
अधिपत्नी आस्तामेकवि ँ॒शत्यास्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्त्रयोवि ँ॒शत्यास
क्षुद्राः पशवोऽसृज्यन्त पूषाधि पतिरासीत् पञ्चवि ँ॒शत्यास्तुवतारण्याः पशवोऽसृज्यन्त
वायुरधिपतिरासीथ्सप्तवि ँ॒शत्यास्तुवत द्यावापृथिवी व्यै
२० तां वसवो रुद्रा आदित्या अनु व्यायन्तेषामाधिपत्यमासीन्नववि ँ॒शत्यास्तुवत
वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीदेकत्रि ँ॒शतास्तुवत प्रजा असृज्यन्त
यावानां चायावानां चाधिपत्यमासीत्त्रयस्त्रि ँ॒शतास्तुवत भूतान्यशाम्यन् प्रजापतिः
परमेष्ठ्यधिपतिरासीत् ॥ ४। ३। १०॥ संवथ्सरोऽधिपतिर्वि पंचत्रि ँ॒शच्च ॥ ४। ३। १०॥
२१ इयमेव सा या प्रथमा व्यौच्छदन्तरस्यां चरति प्रविष्टा । वधूर्जजान नवगज्ञनित्री
त्रय एनां महिमानः सचन्ते ॥ छंदस्वती उषसा पेपिशाने समानं योनिमनु संचरन्ती ।
सूर्यपत्नी वि चरतः प्रजानती केतुं कृण्वाने अजरे भूरिरेतसा ॥ ऋतस्य पन्थामनु तिस्र
आगुस्त्रयो घर्मासो अनु ज्योतिषागुः । प्रजामेका रक्षत्यूर्जमेका
२२ व्रतमेका रक्षति देवयूनाम् ॥ चतुष्टोमो अभवद्या तुरीया यज्ञस्य पक्षावृषयो भवन्ती
। गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कं युञ्जानाः सुवराभरन्निदम् ॥ पञ्चभिर्धाता वि

दधाविदं यत्तासाग् स्वसृरजनयत्पञ्चपञ्च । तासामु यन्ति प्रयवेण पञ्च नाना रूपाणि
ऋतवो वसानाः ॥ त्रि ँ शथ्स्वसार उप यन्ति निष्कृत ँ समानं केतुं प्रतिमुञ्चमानाः ।
२३ ऋतूग् स्तन्वते कवयः प्रजानतीर्मध्ये छंदसः परि यन्ति भास्वतीः ॥ ज्योतिष्मती
प्रति मुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि । वि पश्यन्ति पशवो जायमाना नानारूपा
मातुरस्या उपस्थे ॥ एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् ।
तेन दस्यून्व्यसहन्त देवा हन्तासुराणामभवच्छचीभिः ॥ अनानुजामनुजां मामकर्त सत्यं
वदन्त्यन्विच्छ एतत् । भूयास
२४ मस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्र युक्त ॥ अभून्मम सुमतौ विश्ववेदा
आष्ट प्रतिष्ठामविदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा
प्र युक्त ॥ पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च । पञ्च दिशः पञ्चदशेन
क्लृप्ताः समानमूर्ध्नीरभि लोकमेकम् ॥
२५ ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति । सूर्यस्यैका चरति
निष्कृतेषु घर्मस्यैका सवितैकां नियच्छति ॥ या प्रथमा व्यौच्छथ्सा धेनुरभवद्यमे ।
सा नः पयस्वती धुक्ष्वोत्तरामुत्तरा ँ समाम् ॥ शुक्रर्षभा नभसा ज्योतिषागाद्विश्वरूपा
शबलीरग्निकेतुः । समानमर्थग्ग् स्वपस्यमाना बिभ्रती जरामजर उष आगाः ॥ ऋतूनां
पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम् । एका सती बहुधोषो व्युच्छस्यजीर्णा
त्वं जरयसि सर्वमन्यत् ॥ ४। ३। ११॥ ऊर्जमेका प्रतिमुंचमाना भूयासमेकं पत्न्येकान्न
वि ँ शतिश्च ॥ ४। ३। ११॥
२६ अग्ने जातान् प्रणुदा नः सपत्नान् प्रत्यजाताञ्जातवेदोनुदस्व । अस्मे दीदिहि सुमना
अहेडन्तव स्या ँ शर्मन् त्रिवरूथ उद्भित् ॥ सहसा जातान् प्रणुदा नः सपत्नान्
प्रत्यजाताञ्जातवेदोनुदस्व । अधि नो ब्रूहि सुमनस्यमानो वय२ ँ स्याम प्रणुदा नः
सपत्नान् ॥ चतुश्चत्वारि ँ शः स्तोमो वर्चो द्रविण ँ षोडशः स्तोम ओजो द्रविणं
पृथिव्याः पुरीषमस्य
२७ प्सो नाम । एवश्छन्दो वरिवश्छंदः शंभूश्छंदः परिभूश्छंद आच्छच्छन्दो मनश्छन्दो
व्यचश्छंदः सिन्धुश्छंदः समुद्रं छंदः सलिलं छंदः संयच्छन्दो वियच्छन्दो बृहच्छन्दो
रथंतरं छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छंदः सष्टुप्छन्दोऽनुष्टुप्छंदः
ककुच्छंदस्त्रिककुच्छंदः काव्यं छन्दोऽङ्कुपं छंदः

२८ पदपङ्क्तिश्छन्दोऽक्षरपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छंदः, क्षुरो भृज्वाङ्छंदः प्रच्छच्छंदः पक्षश्छंद एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विशालं छन्दो विष्पर्धाश्छंदश्छदिश्छन्दो दूरोहणं छंदस्तन्द्रं छन्दोऽङ्काङ्कं छंदः ॥ ४। ३। १२॥
अस्यंकुपं छंदस्त्रयस्त्रिँ शच्च ॥ ४। ३। १२॥
२९ अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥ त्वँ सोमासि सत्पतिस्त्वँ राजोत वृत्रहा । त्वं भद्रो असि क्रतुः ॥ भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः । न यत्ते शोचिस्तमसा वरन्त न ध्वस्मानस्तनु वि रेप आधुः ॥ भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य ।
३० रुशद्दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नम् ॥
सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति । अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥ स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव । यथ्सीमहि दिविजात प्रशस्तं तदस्मासु द्रविणं धेहि चित्रम् ॥ यथा होतर्मनुषो
३१ देवता ता यज्ञेभिः सूनो सहसो यजासि । एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् ॥ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारँ रत्नधातमम् ॥ वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥ सांतपना इदँ हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः ॥ यो नो मर्तो वसवो दुर्हृणायुस्तिरः सत्यानि मरुतो
३२ जिघाँसात् । द्रुहः पाशं प्रति स मुचीष्ट तपिष्ठेन तपसा हन्तना तम् ॥ संवथ्सरीणा मरुतः स्वर्का उरुक्षयाः सगणा मानुषेषु । तेऽस्मत्पाशान् प्र मुञ्चन्त्वँहसः सांतपना मदिरा मादयिष्णवः ॥
पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँ ऋतुपते यजेह । ये दैव्या ऋत्विजस्तेभिरग्ने त्वँ होतॄणामस्यायजिष्ठः ॥ अग्ने यदद्य विशो अध्वरस्य होतः पावक
३३ शोचे वेष्ट्वँ हि यज्वा । ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य ॥ अग्निना रयिमश्नवत्पोषमेव दिवेदिवे । यशसं वीरवत्तमम् ॥ गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः । सुमित्रः सोम नो भव ॥ गृहमेधास आ गत मरुतो मा प भूतन । प्रमुञ्चन्तो नो अँहसः ॥ पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम् । महोभि
३४ श्चर्षणीनाम् ॥ प्र बुध्निया ईरते वो महाँसि प्रणामानि प्रयज्यवस्तिरध्वम् ।

सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् ॥ उप यमेति युवतिः सुदक्षं दोषा वस्तोर् हविष्मती घृताची । उप स्वैनमरमतिर्वसूयुः ॥ इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ । प्रति न ईꣳ सुरभीणि वियन्तु । क्रीडं वः शर्धो मारुतमनर्वाणꣳ रथेशुभम् ।

३५ कण्वा अभि प्र गायत ॥ अत्यासो न ये मरुतः स्वश्चो यक्षदृशो न शुभयन्त मर्याः । ते हर्म्येष्ठाः शिशवो न शुभ्रा वथ्सासो न प्रक्रीडिनः पयोधाः ॥ प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे । ते क्रीडयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः ॥ उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन

३६ चित्पथा । श्चोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥ अग्निमग्निꣳ हवीमभिः सदा हवन्त विश्पतिम् । हव्यवाहं पुरुप्रियम् ॥ तꣳ हि शश्वन्त ईडते स्रुचा देवं घृतश्चुता । अग्निꣳ हव्याय वोढवे ॥ इन्द्राग्नी रोचना दिवः श्नथद्वृत्रमिन्द्रं वो विश्वतस्परीन्द्रं नरो विश्वकर्मन् हविषा वावृधानो विश्वकर्मन् हविषा वर्धनेन ॥ ४। ३। १३॥ सूर्यस्य मनुषो मरुतः पावक महोभी रथे शुभं केन षट्चत्वारिꣳशच्च ॥ ४। ३। १३॥

अपांत्वेमन्नयं पुरः प्राची ध्रुवक्षितिस्त्र्यविरिंद्राग्नी मा छंद आशुस्त्रिवृदग्नेर्भागोस्येकयेयमेव सा याग्ने जातानग्निर्वृत्राणि त्रयोदश ॥

अपां त्वेंद्राग्नी इयमेव सा देवताता षड्विꣳशत् ॥

अपां त्वेमन् हविषा वर्धनेन ॥

## चतुर्थकाण्डे चतुर्थः प्रश्नः ४

१ रश्मिरसि क्षयाय त्वा क्षयं जिन्व प्रेतिरसि धर्माय त्वा धर्मं जिन्वान्वितिरसि दिवे त्वा दिवं जिन्व संधिरस्यन्तरिक्षाय त्वान्तरिक्षं जिन्व प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व विष्टंभोऽसि वृष्ट्यै त्वा वृष्टिं जिन्व प्रवास्यह्ने त्वाहर्जिन्वानुवासि रात्रियै त्वा रात्रिं जिन्वोशिगसि

२ वसुभ्यस्त्वा वसूञ्जिन्व प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व सुदीतिरस्यादित्येभ्यस्त्वादित्यांजिन्वौजो पितृभ्यस्त्वा पितॄञ्जिन्व तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वाभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वाधिपतिरसि प्राणाय

३ त्वा प्राणं जिन्व यन्तास्यपानाय त्वापानं जिन्व सꣳ सर्पोऽसि चक्षुषे त्वा चक्षुर्जिन्व वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व त्रिवृदसि प्रवृदसि संवृदसि विवृदसि सꣳ रोहोऽसि नीरोहोऽसि प्ररोहोऽस्यनुरोहोऽसि वसुकोऽसि वेषश्रिरसि वस्यष्टिरसि ॥ ४। ४। १॥ उशिगसि प्राणाय त्रि चत्वारिꣳशच्च ॥ ४। ४। १॥

४ राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत्त्वा स्तोमः पृथिव्याग् श्रयत्वाज्यमुक्थमव्यथयथ्स्तभ्नातु रथंतरꣳ साम प्रतिष्ठित्यै विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याग् श्रयतु प्रौगमुक्थमव्यथयथ्स्तभ्नातु बृहथ्साम प्रतिष्ठित्यै सम्राडसि प्रतीची दि

५ गादित्यास्ते देवा अधिपतयः सोमो हेतीनां प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्याग् श्रयतु मरुत्वतीयमुक्थमव्यथयथ्स्तभ्नातु वैरूपꣳ साम प्रतिष्ठित्यै स्वराडस्युदीची दिग्विश्वे ते देवा अधिपतयो वरुणो हेतीनां प्रतिधर्तैकविꣳशस्त्वा स्तोमः पृथिव्याग् श्रयतु निष्केवल्यमुक्थमव्यथयथ्स्तभ्नातु वैराजꣳ साम प्रतिष्ठित्या अधिपत्न्यसि बृहती दिङ्मरुतस्ते देवा अधिपतयो

६ बृहस्पतिर्हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याग् श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथयन्ती स्तभ्नीताꣳ शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षायर्षयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे सुवर्गे लोके यजमानं च सादयन्तु ॥ ४। ४। २॥ प्रतीची दिङ्मरुतस्ते देवा अधिपतयश्चत्वारिꣳशच्च ॥ ४। ४। २॥

७ अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृथ्सश्च रथौजाश्च सेनानिग्रामण्यौ पुञ्जिकस्थला च कृतस्थला चाप्सरसौ यातुधाना हेती रक्षाꣳसि प्रहेतिरयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानिग्रामण्यौ मेनका च सहजन्या चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरयं पश्चाद्विश्वव्यचास्तस्य रथ प्रोतश्चासमरथश्च सेनानि ग्रामण्यौ प्रम्लोचन्ती चा

८ ऽनुम्लोचन्ती चाप्सरसौ सर्पा हेतिर्व्याघ्राः प्रहेतिरयमुत्तराथ्सं यद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानिग्रामण्यौ विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिरयमुपर्यर्वाग्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च पूर्वचित्तिश्चाप्सरसौ विद्युद्धेतिरवस्फूर्जन्प्र हेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यं

९ द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधाम्यायोस्त्वा सदने सादयाम्यवतश्छायायां नमः समुद्राय नमः समुद्रस्य चक्षसे परमेष्ठी त्वा सादयतु दिवः पृष्ठे व्यचस्वतीं प्रथस्वतीं विभूमतीं प्रभूमतीं परिभूमतीं दिवं यच्छ दिवं दृꣳह दिवं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय सूर्यस्त्वाभि पातु मह्या स्वस्त्या छर्दिषा शं तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद । प्रोथदश्वो न यवसे अविष्यन्, यदा महः संवरणाद्व्यस्थात् । आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥ ४। ४। ३॥ प्रम्लोचन्ती च यग्ग् स्वस्त्याऽष्टा विꣳशतिश्च ॥ ४। ४। ३॥

१० अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥ भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥
अबोध्यग्निः समिधा जनानां

११ प्रति धेनुमिवायतीमुषासम् । यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥ अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे । गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुर्व्यञ्चमश्रेत् ॥ जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे । घृतप्रतीको बृहता दिवि स्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥ त्वामग्ने अंगिरसो

१२ गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने । स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥ यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते । इन्द्रेण देवैः सरथꣳ स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥ त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे ॥
सखायः सं वः सम्यञ्चमिषग्ग्

१३ स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥
सꣳ समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स नो वसून्या भर ॥ एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम् ॥ स योजते अरुषो विश्वभोजसा स दुद्रवथ्स्वाहुतः । सुब्रह्मा यज्ञः सुशमी

१४ वसूनां देवꣳ राधो जनानाम् ॥ उदस्य शोचिरस्थादाजुह्वानस्य मीढुषः । उद्धूमासो

अरुषासो दिविस्पृशः समग्निमिन्धते नरः ॥ अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
अस्मे धेहि जातवेदो महि श्रवः ॥ स इधानो वसुष्कविरग्निरीडेन्यो गिरा । रेवदस्मभ्यं
पुर्वणीक दीदिहि ॥ क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । स तिग्मजंभ
१५ रक्षसो दह प्रति ॥ आ ते अग्न इधीमहि द्युमन्तं देवाजरम् । यद्ध स्या ते
पनीयसी समिद्दीदयति द्यवीषग्ग् स्तोतृभ्य आ भर ॥ आ ते अग्न ऋचा हविः शुक्रस्य
ज्योतिषस्पते । सुश्चन्द्र दस्म विश्पते हव्यवाट्तुभ्यꣳहूयत इषग्ग् स्तोतृभ्य आ भर ॥
उ भे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि । उतोन उत्पुपूर्या
१६ उक्थेषु शवसस्पत इषग्ग् स्तोतृभ्य आ भर ॥ अग्ने तमद्याश्वं न स्तोमैः क्रतुं न
भद्रꣳ हृदिस्पृशम् । ऋध्यामा त ओहैः ॥
अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीर्ऋतस्य बृहतो बभूथ ॥ आभि ष्टे अद्य
गीर्भिर्गृणन्तोऽग्ने दाशेम । प्र ते दिवो न स्तनयन्ति शुष्माः ॥ एभिर्नो अर्कैर्भवा नो
अर्वाङ्
१७ सुवर्न ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैः ॥ अग्निꣳ होतारं मन्ये दास्वन्तं
वसोः सूनुꣳ सहसो जातवेदसम् । विप्रं न जातवेदसम् ॥
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा । घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य
सर्पिषः ॥ अग्ने त्वम्नो अन्तमः । उत त्राता शिवो भव वरूथ्यः ॥ तं त्वा शोचिष्ठ
दीदिवः । सुम्नाय नूनमीमहे सखिभ्यः ॥ वसुरग्निर्वसुश्रवाः । अच्छा नक्षि द्युमत्तमो रयिं
दाः ॥ ४। ४। ४॥ जनानामंगिरस इषꣳसुशमी तिग्मजंभ पुपूर्या अर्वाङ् वसुश्रवाः
पंच च ॥ ४। ४। ४॥
१८ इन्द्राग्निभ्यां त्वा सयुजा युजा युनज्म्याघाराभ्यां तेजसा वर्चसोक्थेभिः
स्तोमेभिश्छन्दोभी रय्यै पोषाय सजातानां मध्यमस्थेयाय मया त्वा सयुजा युजा
युनज्म्यंबा दुलानितत्निरभ्रयन्ती मेघयन्ती वर्षयन्ती चुपुणीका नामासि प्रजापतिना त्वा
विश्वाभिर्धीभिरुप दधामि पृथिव्युदपुरमन्नेन विष्टा मनुष्यास्ते गोप्तारोऽग्निर्वियत्तोऽस्यां
तामहं प्र पद्ये सा
१९ मे शर्म च वर्म चास्त्वधिद्यौरन्तरिक्षं ब्रह्मणा विष्टा मरुतस्ते गोप्तारो वायुर्वियत्तोऽस्यां
तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु द्यौरपराजितामृतेन विष्टादित्यास्ते गोप्तारः
सूर्यो वियत्तोऽस्यां तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु ॥ ४। ४। ५॥
साष्टा चत्वारिꣳशच्च ॥ ४। ४। ५॥

२० बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छाग्निस्तेऽधिपतिर्विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ वायुस्तेऽधिपतिः प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ परमेष्ठी तेऽधिपतिः पुरोवात सनिरस्यभ्रसनिरसि विद्युथ्सनि

२१ रसि स्तनयित्नुसनिरसि वृष्टिसनिरस्यग्नेर्यान्यसि देवानामग्नेयान्यसि वायोर्यान्यसि देवानां वायोयान्यस्यन्तरिक्षस्य यान्यसि देवानामन्तरिक्षयान्यस्यन्तरिक्षमस्यन्तरिक्षाय त्वा सलिलाय त्वा सर्णीकाय त्वा सतीकाय त्वा केताय त्वा प्रचेतसे त्वा विवस्वते त्वा दिवस्त्वा ज्योतिष आदित्येभ्यस्त्वर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा यशोदां त्वा यशसि तेजोदां त्वा तेजसि पयोदां त्वा पयसि वर्चोदां त्वा वर्चसि द्रविणोदां त्वा द्रविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ ४। ४। ६॥ विद्युथ्सनिर्द्युते त्वैकान्न त्रिꣳशच्च ॥ ४। ४। ६॥

२२ भूयस्कृदसि वरिवस्कृदसि प्राच्यस्यूर्ध्वास्यन्तरिक्षसदस्यन्तरिक्षे सीदाप्सुषदसि श्येनसदसि गृध्रसदसि सुपर्णसदसि नाकसदसि पृथिव्यास्त्वा द्रविणे सादयाम्यन्तरिक्षस्य त्वा द्रविणे सादयामि दिवस्त्वा द्रविणे सादयामि दिशां त्वा द्रविणे सादयामि द्रविणोदां त्वा द्रविणे सादयामि प्राणं मे पाह्यपानं मे पाहि व्यानं मे

२३ पाह्यायुर्मे पाहि विश्वायुर्मे पाहि सर्वायुर्मे पाह्यग्ने यत्ते परꣳ हृन्नाम तावेहि सꣳरभावहै पाञ्चजन्येष्वप्येध्यग्ने यावा अयावा एवा ऊमाः सब्दः सगरः सुमेकः ॥ ४। ४। ७॥ व्यानं मे द्वात्रिꣳशच्च ॥
४। ४। ७॥

२४ अग्निना विश्वाषाट् सूर्येण स्वराट्क्रत्वा शचीपतिर्ऋषभेण त्वष्टा यज्ञेन मघवान्दक्षिणया सुवर्गो मन्युना वृत्रहा सौहार्द्येन तनूधा अन्नेन गयः पृथिव्यासनोदृग्भिरन्नादो वषट्कारेणर्द्धः साम्ना तनूपा विराजा ज्योतिष्मान्ब्रह्मणा सोमपा गोभिर्यज्ञं दाधार क्षत्रेण मनुष्यानश्वेन च रथेन च वज्र्यृतुभिः प्रभुः संवथ्सरेण परिभूस्तपसानाधृष्टः सूर्यः सन्तनूभिः ॥ ४। ४। ८॥ अग्निनैकान्न पंचाशत् ॥ ४। ४। ८॥

२५ प्रजापतिर्मनसान्धोऽच्छेतो धाता दीक्षायाꣳ सविता भृत्यां पूषा सोमक्रयण्यां वरुण उपनद्धोऽसुरः क्रीयमाणो मित्रः क्रीतः शिपिविष्ट आसादितो नरं धिषः प्रोह्यमाणोऽधिपतिरागतः प्रजापतिः प्रणीयमानोऽग्निराग्नीध्रे बृहस्पतिराग्नीध्रात्प्रणीयमान

इन्द्रो हविर्धानेऽदितिरासादितो विष्णुरुपावह्नियमाणोऽथर्वोपोत्तो यमोऽभिषुतोऽपूतपा आधूयमानो वायुः पूयमानो मित्रः, क्षीरश्रीर्मन्थी सक्तुश्रीर्वैश्वदेव उन्नीतो रुद्र आहुतो वायुरावृत्तो नृचक्षाः प्रतिख्यातो भक्ष आगतः पितृणां नाराशꣳसोऽसुरात्तः सिन्धुरवभृथमवप्रयन्थ्समुद्रोऽवगतः सलिलः प्रप्लुतः सुवरुदृचं गतः ॥ ४। ४। ९॥ रुद्र एकविꣳशतिश्च ॥ ४। ४। ९॥

२६ कृत्तिका नक्षत्रमग्निर्देवताग्ने रुचः स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता मृगशीर्षं नक्षत्रꣳ सोमो देवतार्द्रा नक्षत्रꣳ रुद्रो देवता पुनर्वसू नक्षत्रमदितिर्देवता तिष्यो नक्षत्रं बृहस्पतिर्देवताश्रेषा नक्षत्रꣳ सर्पा देवता मघा नक्षत्रं पितरो देवता फल्गुनी नक्षत्र

२७ मर्यमा देवता फल्गुनी नक्षत्रं भगो देवता हस्तो नक्षत्रꣳ सविता देवता चित्रा नक्षत्रमिन्द्रो देवता स्वाती नक्षत्रं वायुर्देवता विशाखे नक्षत्रमिन्द्राग्नी देवतानूराधा नक्षत्रं मित्रो देवता रोहिणी नक्षत्रमिन्द्रो देवता विचृतौ नक्षत्रं पितरो देवताषाढा नक्षत्रमापो देवताषाढा नक्षत्रं विश्वे देवा देवता श्रोणा नक्षत्रं विष्णुर्देवता श्रविष्ठा नक्षत्रं वसवो

२८ देवता शतभिषङ्नक्षत्रमिन्द्रो देवता प्रोष्ठपदा नक्षत्रमज एकपाद्देवता प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो देवता रेवती नक्षत्रं पूषा देवताश्वयुजौ नक्षत्रमश्विनौ देवतापभरणीर्नक्षत्रं यमो देवता पूर्णा पश्चाद्यत्ते देवा अदधुः ॥ ४। ४। १०॥ फल्गुनी नक्षत्रं वसवस्त्रयस्त्रिꣳशच्च ॥ ४। ४। १०॥

२९ मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तः श्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रता

३० येऽग्नयः समनसोऽन्तरा द्यावापृथिवी शैशिरावृतू अभि कल्पमाना इन्द्रमिव देवा अभि सं विशन्तु सं यच्च प्रचेताश्चाग्नेः सोमस्य सूर्यस्योग्रा च भीमा च पितृणां यमस्येन्द्रस्य ध्रुवा च पृथिवी च देवस्य सवितुर्मरुतां वरुणस्य धर्त्री च धरित्री च मित्रावरुणयोर्मित्रस्य धातुः प्राची च प्रतीची च वसूनाꣳ रुद्राणां

३१ मादित्यानां ते तेऽधिपतयस्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि सहस्रस्य प्रमा असि सहस्रस्य प्रतिमा असि सहस्रस्य विमा असि

सहस्रस्योन्मा असि साहस्रोऽसि सहस्राय त्वेमा मे अग्न इष्टका धेनवः सन्त्वेका च
शतं च सहस्रं चायुतं च
३२ नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चेमा मे
अग्न इष्टका धेनवः सन्तु षष्टिः सहस्रमयुतमक्षीयमाणा ऋतस्थाः स्थर्तावृधो घृतश्चुतो
मधुश्चुत ऊर्जस्वतीः स्वधाविनीस्ता मे अग्न इष्टका धेनवः सन्तु विराजो नाम कामदुघा
अमुत्रामुष्मिꣳ ल्लोके ॥ ४। ४। ११॥ सव्रता रुद्राणामयुतं च पंच चत्वारिꣳशच्च ॥
४। ४। ११॥
३३ समिद्दिशामाशया नः सुवर्विन्मधोरतो माधवः पात्वस्मान् । अग्निर्देवो दुष्टरीतुरदाभ्य
इदं क्षत्रꣳ रक्षतु पात्वस्मान् ॥ रथंतरꣳ सामभिः पात्वस्मान्गायत्री छंदसां विश्वरूपा
। त्रिवृन्नो विष्ठया स्तोमो अह्नाꣳसमुद्रो वात इदमोजः पिपर्तु ॥
उग्रा दिशामभिभूतिर्वयोधाः शुचिः शुक्रे अहन्योजसीना । इन्द्राधिपतिः पिपृतादतो नो
महि
३४ क्षत्रं विश्वतो धारयेदम् ॥ बृहथ्साम क्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजः शुभितमुग्रवीरम् ।
इन्द्र स्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ॥ प्राची दिशाꣳ सहयशा यशस्वती
विश्वे देवाः प्रावृषाह्नाꣳ सुवर्वती । इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्टꣳ सहस्रियꣳ
सहस्वत् ॥ वैरूपे सामन्निह तच्छकेम जगत्यैनं विक्ष्वा वेशयामः । विश्वे देवाः सप्तदशेन
३५ वर्च इदं क्षत्रꣳ सलिलवातमुग्रम् ॥ धर्त्री दिशां क्षत्रमिदं दाधारोपस्थाशानां
मित्रवदस्त्वोजः । मित्रावरुणा शरदाह्नां चिकित्नू अस्मै राष्ट्राय महि शर्म यच्छतम्
॥ वैराजे सामन्नधि मे मनीषानुष्टुभा सं भृतं वीर्यꣳ सहः । इदं क्षत्रं मित्रवदार्द्रदानु
मित्रावरुणा रक्षतमाधिपत्यैः ॥ सम्राड्दिशाꣳ सहसाम्नी सहस्वत्यृतुर्हेमन्तो विष्ठया नः
पिपर्तु । अवस्युवाता
३६ बृहतीर्नु शक्वरीरिमं यज्ञमवन्तु नो घृताचीः ॥ सुवर्वती सुदुघानः पयस्वती दिशां
देव्यवतु नो घृताची । त्वं गोपाः पुर एतोत पश्चाद्बृहस्पते याम्यां युङ्ग्धि वाचम् ॥ ऊर्ध्वा
दिशाꣳ रन्तिराशौषधीनाꣳ संवथ्सरेण सविता नो अह्नाम् । रेवथ्सामातिच्छन्दा उ
छन्दोजातशत्रुः स्योना नो अस्तु ॥ स्तोमत्रयस्त्रिꣳशे भुवनस्य पत्नि विवस्वद्वाते अभि
नो
३७ गृणाहि । घृतवती सवितराधिपत्यैः पयस्वती रन्तिराशा नो अस्तु ॥ ध्रुवा दिशां
विष्णुपत्न्यघोरास्येशाना सहसो या मनोता । बृहस्पतिर्मातरिश्वोत वायुः सं धुवाना वाता

अभि नो गृणन्तु ॥
विष्टंभो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी । विश्वव्यचा इषयन्ती सुभूतिः शिवा नो अस्त्वदितिरुपस्थे ॥
वैश्वानरो न ऊत्या पृष्टो दिव्यनुनोऽद्यानु मतिरन्विदनुमते त्वं कया नश्चित्र आ भुवत्को अद्य युङ्क्ते ॥ ४। ४। १२॥ महि सप्तदशेनाऽवस्युवाता अभि नोनु नश्चतुर्दश च ॥ ४। ४। १२॥
रश्मिरसि राज्ञ्यस्ययं पुरोहरिकेशोऽग्निर्मूर्धेंद्राग्निभ्यां बृहस्पतिर्भूयस्कृदस्यग्निना विश्वाषाट् प्रजापतिर्मनसा कृत्तिका मधुः समिद्दिशां द्वादश ॥
रश्मिरसि प्रतिधेनुमसि स्तनयित्नु सनिरस्यादित्यानाꣳ सप्तत्रिꣳशत् ॥
रश्मिरसि को अद्ययुङ्क्ते ॥

## चतुर्थकाण्डे पञ्चमः प्रश्नः ५

१ नमस्ते रुद्र मन्यव उतोत इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ यात इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय ॥ या ते रुद्र शिवा तनूरघोरापापकाशिनी । तया नस्तनुवा शंतमया गिरिशन्ताभि चाकशीहि ॥ यामिषुं गिरिशन्त हस्ते
२ बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥ शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीꣳश्च सर्वाञ्जंभयन्थ्सर्वाश्च यातुधान्यः ॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चेमाꣳ रुद्रा अभितो दिक्षु
३ श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे ॥ असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृशन्नदृशन्नुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ॥ नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥ प्र मुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् । याश्च ते हस्त इषवः
४ परा ता भगवो वप ॥ अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत । अनेशन्नस्येषव आभुरस्य निषङ्गथिः ॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्, विश्वतस्त्वमयक्ष्मया परि ब्भुज

॥ नमस्ते अस्त्वायुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्नि धेहि तम् ॥ ४। ५। १॥ हस्ते दिक्ष्विषव उभाभ्यां द्वा विँशतिश्च ॥ ४। ५। १॥

५ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायातताविने क्षेत्राणां पतये नमो नमः सूतायाहन्त्याय वनानां पतये नमो नमो

६ रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नवीताय धावते सत्वनां पतये नमः ॥ ४। ५। २॥ वनानां पतये नमो नम एकान्न त्रिँशच्च ॥ ४। ५। २॥

७ नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्यो जिघाँसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम

८ इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥ ४। ५। ३॥ कुलुञ्चानां पतये नमो नमोश्वपतिभ्यस्त्रीणि च ॥ ४। ५। ३॥

९ नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृँहतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः, क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यो

१० रथपतिभ्यश्च वो नमो नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः, क्षत्तृभ्यः संग्रहीतृभ्यश्च

वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥ ४। ५। ४॥ रथेभ्यः श्वपतिभ्यश्च द्वे च ॥ ४। ५। ४॥

११ नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृध्वने च

१२ नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च ॥ ४। ५। ५॥ संवृद्ध्वने च पञ्च विँशतिश्च ॥ ४। ५। ५॥

१३ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चावसान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च

१४ नम आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च ॥ ४। ५। ६॥ प्रतिश्रवाय च पञ्च विँशतिश्च ॥ ४। ५। ६॥

१५ नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च

१६ नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चातप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥ ४। ५। ७॥

वैशन्ताय च त्रिँशच्च ॥ ४। ५। ७॥

१७ नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च

नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमः शंभवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च
१८ नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥ ४। ५। ८॥
शिवतराय च त्रिꣳशच्च ॥ ४। ५। ८॥
१९ नम इरिण्याय च प्रपथ्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पाꣳसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च
२० नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आक्खिदते च प्रक्खिदते च नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः ॥ ४। ५। ९॥ उलप्याय च त्रयस्त्रिꣳशच्च ॥ ४। ५। ९॥
२१ द्रापे अन्धसस्पते दरिद्रन्नीललोहित । एषां पुरुषाणामेषां पशूनां मा भेर्मारो मो एषां किं चनाममत् ॥ या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥
इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतिम् । यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मि
२२ न्ननातुरम् ॥ मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो
२३ रुद्र रीरिषः ॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥ आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥ स्तुहि

२४ श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्नि वपन्तु सेनाः ॥
परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥ मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं
२५ बिभ्रदा गहि ॥ विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥ सहस्राणि सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥ ४। ५। १०॥ अस्मिग्ग् स्तनुवः स्तुहि पिनाकमेकान्न त्रिꣳशच्च ॥ ४। ५। १०॥
२६ सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषाꣳसहस्रयोजनेऽव धन्वानि तन्मसि ॥ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । नीलग्रीवाः शितिकण्ठाः शर्वा अधः, क्षमाचराः ॥ नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः । ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । ये भूतानामधिपतयो विशिखासः कपर्दिनः । ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । ये पथां पथिरक्षय ऐलबृदा यव्युधः । ये तीर्थानि
२७ प्रचरन्ति सृकावन्तो निषङ्गिणः । य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥ ४। ५। ११॥ तीर्थानि यश्च षट्च ॥ ४। ५। ११॥
नमस्ते रुद्र नमो हिरण्यबाहवे नमः सहमानाय नम आव्याधिनीभ्यो नमो भवाय नमो ज्येष्ठाय नमो दुन्दुभ्याय नमः सोमाय नम इरिण्याय द्रापे सहस्राण्येकादश ॥
नमस्ते रुद्र नमो भवाय द्रापे सप्तविꣳशतिः ॥
नमस्ते रुद्र तं वो जंभे दधामि ॥

## चतुर्थकाण्डे षष्ठः प्रश्नः ६

१ अश्मन्नूर्जं पर्वते शिश्रियाणां वाते पर्जन्ये वरुणस्य शुष्मे । अद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि संभृतां तां न इषमूर्जं धत्त मरुतः सꣳ रराणाः ॥ अश्मग्ग्स्ते क्षुदमुं ते शुगृच्छतु यं द्विष्मः ॥ समुद्रस्य त्वाऽवाकयाग्ने परि व्ययामसि । पावको अस्मभ्यꣳ

शिवो भव ॥ हिमस्य त्वा जरायुणाग्ने परि व्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥ उप

२ ज्मन्नुप वेतसेऽवत्तरं नदीष्वा । अग्ने पित्तमपामसि ॥ मण्डूकि ताभिरा गहि सेमं नो यज्ञम् । पावकवर्णꣳ शिवं कृधि ॥

पावक आ चितयन्त्या कृपा । क्षामन्रुरुच उषसो न भानुना ॥

तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे । न ततृषाणो अजरः ॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्

३ वक्षि यक्षि च ॥ स नः पावक दीदिवोऽग्ने देवाꣳ इहाऽवह । उप यज्ञꣳ हविश्च नः ॥ अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् । अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥

नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ नृषदे वड

४ प्सुषदे वड्वनसदे वड्बर्हिषदे वड्सुवर्विदे वट् ॥ ये देवा देवानां यज्ञिया यज्ञियानाꣳ संवथ्सरीणमुप भागमासते । अहुतादो हविषो यज्ञे अस्मिन्थ्स्वयं जुहुध्वं मधुनो घृतस्य ॥ ये देवा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुर एतारो अस्य । येभ्यो नर्ते पवते धाम किं चन न ते दिवो न पृथिव्या अधि स्नुषु ॥ प्राणदा

५ अपानदा व्यानदाश्चक्षुर्दा वर्चोदा वरिवोदाः । अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ अग्निस्तिग्मेन शोचिषा यꣳ सद्विश्वं न्यत्रिणम् । अग्निर्नो वꣳसते रयिम् ॥

सैनानीकेन सुविदत्रो अस्मे यष्टा देवाꣳ आयजिष्ठः स्वस्ति । अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥ ४। ६। १॥ उप देवान्, वड्प्राणदाश्चतुश्चत्वारिꣳशच्च ॥ ४। ६। १॥

६ य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः । स आशिषा द्रविणमिच्छमानः परमच्छदो वर आ विवेश ॥ विश्वकर्मा मनसा यद्विहाया धाता विधाता परमोत सन्दृक् । तेषामिष्टानि समिषा मदन्ति यत्र सप्तर्षीन्पर एकमाहुः ॥ यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सज्जजान ।

७ यो देवानां नामधा एक एव तꣳ सं प्रश्नं भुवना यन्त्यन्या ॥ त आयजन्त द्रविणꣳ समस्मा ऋषयः पूर्वे जरितारो न भूना । असूर्ता सूर्ता रजसो विमाने ये भूतानि

समकृण्वन्निमानि ॥ न तं विदाथ य इदं जजानान्यद्युष्माकमन्तरं भवाति । नीहारेण
प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ परो दिवा पर एना
८ पृथिव्या परो देवेभिरसुरैर्गुहा यत् । क२ꣳ स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः
समगच्छन्त विश्वे ॥ तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे । अजस्य
नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधि श्रितम् ॥
विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद्द्वितीयः । तृतीयः पिता जनितौषधीना
९ मपां गर्भं व्यदधात्पुरुत्रा ॥ चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृꣳ हन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम् ॥ विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोहस्त उत विश्वतस्पात् । सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः
॥ कि२ꣳ स्विदासीदधिष्ठानमारंभणं कतमथ्स्वित्किमासीत् । यदी भूमिं जनय
१० न्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥ कि२ꣳ स्विद्वनं क उ स वृक्ष
आसीद्यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि
धारयन् ॥ या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा । शिक्षा सखिभ्यो
हविषि स्वधावः स्वयं यजस्व तनुवं जुषाणः ॥ वाचस्पतिं विश्वकर्माणमूतये
११ मनोयुजं वाजे अद्या हुवेम । स नो नेदिष्ठा हवनानि जोषते विश्वशंभूरवसे साधुकर्मा
॥ विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व तनुवं जुषाणः । मुह्यन्त्वन्ये अभितः सपत्ना
इहास्माकं मघवा सूरिरस्तु ॥ विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥ समुद्राय वयुनाय सिन्धूनां
पतये नमः अदीनाꣳ सर्वासां पित्रे जुहुता विश्वकर्मणे विश्वाहामर्त्यꣳ हविः ॥ ४। ६।
२॥ जजानैनौषधीनां भूमिं जनयन्नूतये नमो नव च ॥ ४। ६। २॥
१२ उदेनमुत्तरां नयाग्ने घृतेनाहुत । रायस्पोषेण सꣳ सृज प्रजया च धनेन च ॥ इन्द्रेमं
प्रतरां कृधि सजातानामसद्वशी । समेनं वर्चसा सृज देवेभ्यो भागधा असत् ॥ यस्य
कुर्मो हविर्गृहे तमग्ने वर्धया त्वम् । तस्मै देवा अधि ब्रवन्नयं च ब्रह्मणस्पतिः ॥ उदु
त्वा विश्वे देवा
१३ अग्ने भरन्तु चित्तिभिः । स नो भव शिवतमः सुप्रतीको विभावसुः ॥ पञ्च दिशो
दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः । रायस्पोषे यज्ञपतिमाभजन्तीः ॥ रायस्पोषे
अधि यज्ञो अस्थाथ्समिद्धे अग्नावधि मामहानः । उक्थपत्र ईड्यो गृभीतस्तप्तं घर्मं

परिगृह्यायजन्त ॥ ऊर्जा यद्यज्ञमशमन्त देवा दैव्याय धर्त्रे जोष्ट्रे । देवश्रीः श्रीमणाः शतपयाः
१४ परिगृह्य देवा यज्ञमायन् ॥ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाꣳ अजस्रम् । तस्य पूषा प्रसवं याति देवः सं पश्यन्विश्वा भुवनानि गोपाः ॥ देवा देवेभ्यो अध्वर्यन्तो अस्थुर्वीतꣳ शमित्रे शमिता यजध्यै । तुरीयो यज्ञो यत्र हव्यमेति ततः पावका आशिषो नो जुषन्ताम् ॥ विमान एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरिक्षम् । स विश्वाचीरभि
१५ चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥ उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश । मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसः पात्यन्तौ ॥ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यच सं गिरः । रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥ सुम्नहूर्यज्ञो देवाꣳ आ च वक्षद्यक्षदग्निर्देवो देवाꣳ आ च वक्षत् । वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत् । अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः ॥ उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् । अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ॥ ४। ६। ३॥ विश्वेदेवाः शतपया अभि वाजस्य षड्विꣳशतिश्च ॥ ४। ६। ३॥
१६ आशुः शिशानो वृषभो न युध्मो घनाघनः, क्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयथ्साकमिन्द्रः ॥
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तथ्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ स इषुहस्तैः स निषङ्गिभिर्वशी स२ꣳ स्रष्टा स युध इन्द्रो गणेन । सꣳसृष्टजिथ्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता ॥ बृहस्पते परि दीया
१७ रथेन रक्षोहामित्राꣳअपबाधमानः । प्रभञ्जन्थ्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥ गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा । इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳसखायोऽनु सꣳ रभध्वम् ॥ बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥ अभि गोत्राणि सहसा गाहमानोऽदायो
१८ वीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्र युथ्सु ॥ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभि भञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे ॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ

शर्ध उग्रम् । महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥ अस्माकमिन्द्रः
समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
१९ अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु ॥ उद्धर्षय
मघवन्नायुधान्युथ्सत्वनां मामकानां महाꣳसि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां
जयतामेतु घोषः ॥ उप प्रेत जयता नरः स्थिरा वः सन्तु बाहवः । इन्द्रो वः शर्म
यच्छत्वनाधृष्या यथासथ ॥
अवसृष्टा परा पत शरव्ये ब्रह्म सꣳशिता । गच्छामित्रान् प्र
२० विश मैषां कं चनोच्छिषः ॥ मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा
राजामृतेनाभिऽवस्ताम् । उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः ॥
यत्र बाणाः संपतन्ति कुमारा विशिखा इव । इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु
॥ ४। ६। ४॥ दीयादायो जयन्त्वमित्रान्प्र चत्वारिꣳ शच्च ॥ ४। ६। ४॥
२१ प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह । विश्वा आशा दीद्यानो वि
भाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥
क्रमध्वमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः । दिवः पृष्ठꣳ सुवर्गत्वा मिश्रा
देवेभिराध्वम् ॥ पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् । दिवो नाकस्य
पृष्ठाथ्सुवर्ज्योतिरगा
२२ महम् ॥ सुवर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति रोदसी । यज्ञं ये विश्वतोधारꣳ
सुविद्वाꣳसो वितेनिरे ॥ अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् । इयक्षमाणा
भृगुभिः सजोषाः सुवर्यन्तु यजमानाः स्वस्ति ॥ नक्तोषासा समनसा विरूपे धापयेते
शिशुमेकꣳ समीची । द्यावा क्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः ॥
अग्ने सहस्राक्ष
२३ शतमूर्धञ्छतं ते प्राणाः सहस्रमपानाः । त्वꣳ साहस्रस्य राय ईशिषे तस्मै ते विधेम
वाजाय स्वाहा ॥ सुपर्णोऽसि गरुत्मान्पृथिव्याꣳ सीद पृष्ठे पृथिव्याः सीद भासान्तरिक्षमा
पृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृꣳह ॥ आजुह्वानः सुप्रतीकः पुरस्तादग्ने
स्वां योनिमा सीद साध्या । अस्मिन्थ्सधस्थे अध्युत्तरस्मिन्विश्वे देवा
२४ यजमानश्च सीदत ॥ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्यायविष्ठ । त्वाꣳ
शश्वन्त उप यन्ति वाजाः ॥ विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।

यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवीꣳषि जुहुरे समिद्धे ॥ ताꣳ सवितुर्वरेण्यस्य
चित्रामाहं वृणे सुमतिं विश्वजन्याम् । यामस्य कण्वो अदुहत्प्रपीनाꣳ सहस्रधारां
२५ पयसा महीं गाम् ॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन ॥ ईदृङ्चान्यादृङ्चैतादृङ्च प्रतिदृङ्च
मितश्च संमितश्च सभराः । शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च
सत्यश्चर्तपाश्चात्यꣳहाः ॥
२६ ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चान्त्यमित्रश्च दूरे अमित्रश्च गणः । ऋतश्च
सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः । ईदृक्षास एतादृक्षास ऊ षुणः
सदृक्षासः प्रतिसदृक्षास एतन । मितासश्च संमितासश्च न ऊतये सभरसो मरुतो
यज्ञे अस्मिन्निंद्रं दैवीर्विशो मरुतोऽनुवर्त्मानो यथेंद्रं दैवीर्विशो मरुतोऽनुवर्त्मान एवमिमं
यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥ ४। ६। ५॥ अगाꣳ सहस्राक्ष
देवाः सहस्रधारामत्यꣳहा अनुवर्त्मानः षोडश च ॥ ४। ६। ५॥
२७ जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । अनाविद्धया तनुवा जय
त्वꣳ स त्वा वर्मणो महिमा पिपर्तु ॥ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः
समदो जयेम । धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ वक्ष्यन्तीवेदा
गनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना । योषेव शिङ्क्ते वितताधि धन्वन्
२८ ज्या इयꣳ समने पारयन्ती ॥ ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे
। अप शत्रून् विध्यताꣳ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥ बह्वीनां पिता
बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य । इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो
जयति प्रसूतः ॥ रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः । अभीशूनां
महिमानं
२९ पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥ तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा
रथेभिः सह वाजयन्तः । अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूꣳरनपव्ययन्तः ॥
रथवाहनꣳ हविरस्य नाम यत्रायुधं निहितमस्य वर्म । तत्रा रथमुप शग्मꣳ सदेम
विश्वाहा वयꣳ सुमनस्यमानाः ॥ स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो
गभीराः । चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥ ब्राह्मणासः
३० पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा । पूषा नः पातु दुरितादृतावृधो

रक्षा माकिर्नो अघशꣳस ईशत ॥ सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति
प्रसूता । यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यꣳसन् ॥ ऋजीते
परि वृङ्धि नोऽश्मा भवतु नस्तनूः । सोमो अधि ब्रवीतु नोऽदितिः
३१ शर्म यच्छतु ॥ आ जङ्घन्ति सान्वेषां जघनाꣳ उप जिघ्न ते । अश्वाजनि
प्रचेतसोऽश्वान्थ्समथ्सु चोदय ॥ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः
। हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाꣳसं परि पातु विश्वतः ॥ वनस्पते वीड्वङ्गो
हि भूया अस्मथ्सखा प्रतरणः सुवीरः । गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु
जेत्वानि ॥ दिवः पृथिव्याः पर्योज
३२ उद्भृतं वनस्पतिभ्यः पर्याभृतꣳ सहः । अपामोज्मानं परि गोभिरावृतमिन्द्रस्य
वज्रꣳहविषा रथं यज ॥ इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ उप श्वासय पृथिवीमुत द्यां
पुरुत्रा ते मनुतां विष्ठितं जगत् । स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्
३३ दवीयो अप सेध शत्रून् ॥ आ क्रन्दय बलमोजोन आ धा निष्टनिहि दुरिता बाधमानः
। अप प्रोथ दुन्दुभे दुच्छुनाꣳइत इन्द्रस्य मुष्टिरसि वीडयस्व ॥ आमूरज प्रत्यावर्तयेऽमाः
केतुमद्दुन्दुभिर्वावदीति । समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ ४।
६। ६॥ धन्वन्महिमानं ब्राह्मणासोदितिः पृथिव्याः परि दूरादेक चत्वारिꣳशच्च ॥ ४। ६।
६॥
३४ यदक्रन्दः प्रथमं जायमान उद्यन्थ्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य
बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो
अध्यतिष्ठत् । गन्धर्वो अस्य रशनामगृभ्णाथ्सूरादश्वं वसवो निरतष्ट ॥ असि यमो
अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन । असि सोमेन समया विपृक्त
३५ आहुस्ते त्रीणि दिवि बन्धनानि ॥ त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः
समुद्रे । उतेव मे वरुणश्छन्थ्स्यर्वन् यत्रा त आहुः परमं जनित्रम् ॥ इमा ते
वाजिन्नवमार्जनानीमा शफानाꣳसनितुर्निधाना । अत्रा ते भद्रा रशना अपश्यमृतस्ययया
अभिरक्षन्ति गोपाः ॥ आत्मानं ते मनसारादजानामवो दिवा
३६ पतयन्तं पतङ्गम् । शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥ अत्रा ते
रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः । यदा ते मर्तो अनु भोगमानडादिद्ग्रसिष्ठ
ओषधीरजीगः ॥ अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् । अनु

व्राता॑सस्तव॑ स॒ख्यमी॑यु॒रनु॑ दे॒वा म॑मिरे वी॒र्यं॑
३७ ते ॥ हिर॑ण्यशृङ्गो॒ऽयो॑ अ॒स्य पादा॒ मनो॑जवा॒ अव॑र॒ इन्द्र॑ आसीत् । दे॒वा इ॒द॑स्य ह॒वि॒रद्य॑माय॒न्, यो अर्व॑न्तं प्रथ॒मो अ॒ध्यति॑ष्ठत् ॥ ईर्मा॑न्ता॒सः सिलि॑कमध्यमा॒सः स॒ꣳ शूर॑णासो दि॒व्यासो॒ अत्याः॑ । ह॒ꣳसा इ॒व श्रे॑णि॒शो य॑तन्ते॒ यदाक्षि॑षुर्दि॒व्यमज्म॒मश्वाः॑ ॥ तव॒ शरी॑रं पतयि॒ष्ण्व॑र्व॒न्तव॑ चि॒त्तं वात॑ इ॒व ध्रजी॑मान् । तव॒ शृङ्गा॑णि॒ विष्ठि॑ता पु॒रु॒त्रार॑ण्येषु॒ जर्भु॑राणा चरन्ति ॥ उ॒प
३८ प्राग॒च्छस॑नं वा॒ज्यर्वा॑ देव॒द्रीचा॒ मन॑सा॒ दीध्या॑नः । अ॒जः पु॒रो नी॑यते॒ नाभि॑र॒स्यानु॑ प॒श्चात्क॒वयो॑ यन्ति रे॒भाः ॥ उ॒प प्रागा॑त्परमं यथ्स॒धस्थ॒मर्वा॒ꣳ अच्छा॑ पि॒तरं॑ मा॒तरं॑ च । अ॒द्या दे॒वाञ्जुष्ट॑तमो॒ हि ग॒म्या अथाशा॑स्ते दा॒शुषे॒ वार्या॑णि ॥ ४। ६। ७॥
विपृ॑क्तो दि॒वा वी॒र्य॑मु॒पैका॒न्न च॒त्वारि॒ꣳशच्च॑ ॥ ४। ६। ७॥
३९ मा नो॑ मि॒त्रो वरु॑णो अर्य॒मायुरिन्द्र॑ ऋभु॒क्षा म॒रुतः॒ परि॑ ख्यन् । यद्वा॒जिनो॑ दे॒वजा॑तस्य॒ सप्तेः॑ प्रव॒क्ष्यामो॑ वि॒दथे॑ वी॒र्या॑णि ॥
यन्नि॒र्णिजा॒ रेक्ण॑सा॒ प्रावृ॑तस्य रा॒तिं गृ॒भीतां॑ मु॒ख॒तो न॒यन्ति॑ । सुप्रा॑ङ्जो॒ मेम्य॑द्वि॒श्वरू॑प इन्द्रापू॒ष्णोः प्रि॒यमप्ये॑ति॒ पाथः॑ ॥
ए॒ष च्छागः॑ पु॒रो अश्वे॑न वा॒जिना॑ पू॒ष्णो भा॒गो नी॑यते वि॒श्वदे॑व्यः । अ॒भि॒प्रियं॒ यत्पु॑रो॒डाश॒मर्व॑ता॒ त्वष्टे
४० दे॑न॒ꣳ सौश्रव॒साय॑ जिन्वति ॥ यद्ध॒विष्य॑मृतु॒शो दे॑व॒यानं॑ त्रि॒र्मानु॑षाः॒ पर्यश्वं॑ न॒यन्ति॑ । अत्रा॑ पू॒ष्णः प्र॑थ॒मो भा॒ग ए॑ति य॒ज्ञं दे॒वेभ्यः॑ प्रतिवे॒दय॑न्न॒जः ॥ होता॑ध्व॒र्युराव॑या अग्निमि॒न्धो ग्रा॑वग्रा॒भ उ॒त श॒ꣳस्ता सुवि॑प्रः । तेन॑ य॒ज्ञेन॒ स्व॑रं कृ॒तेन॒ स्वि॑ष्टेन व॒क्षणा॒ आ पृ॑णध्वम् ॥ यू॒प॒व्र॒स्का उ॒त ये यू॑पवा॒हाश्च॒षालं॒ ये अ॑श्वयू॒पाय॒ तक्ष॑ति । ये चार्व॑ते॒ पच॑न॒ꣳ सं॒ भर॑न्त्यु॒तो
४१ तेषा॑म॒भिगू॑र्तिर्न इन्वतु ॥ उ॒प प्रागा॑थ्सु॒मन्मे॑ऽधायि॒ मन्म॑ दे॒वाना॒माशा॒ उप॑ वी॒तपृ॑ष्ठः । अन्वे॑नं॒ विप्रा॒ ऋष॑यो मदन्ति दे॒वानां॑ पुष्टे॒ च॑कृमा सु॒बन्धु॑म् ॥ यद्वा॒जिनो॒ दाम॑ सं॒दान॒मर्व॑तो॒ या शी॑र्ष॒ण्या॑ रश॒ना रज्जु॑रस्य । यद्वा॑ घास्य॒ प्रभृ॑तमा॒स्ये॑ तृ॒ण॒ꣳ सर्वा॒ ता ते॒ अपि॑ दे॒वेष्व॑स्तु ॥ यद॑श्वस्य क्र॒विषो॒
४२ मक्षि॒काश॒ यद्वा॒ स्वरौ॒ स्वधि॑तौ रि॒प्तमस्ति॑ । यद्धस्त॑योः शमि॒तुर्यन्न॒खेषु॒ सर्वा॒ ता ते॒ अपि॑ दे॒वेष्व॑स्तु ॥

यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति । सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ श्रृतपाकं पचन्तु ॥ यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति । मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥
४। ६। ८॥ इदुतो क्रविषः श्रिषथ्सप्त च ॥ ४। ६। ८॥
४३ ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति । ये चार्वतो माꣳस भिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥ यन्नीक्षणं माग्स्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि । ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥ निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः । यच्च पपौ यच्च घासिं
४४ जघास सर्वा ता ते अपि देवेष्वस्तु ॥ मा त्वाग्निर्ध्वनयिद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः । इष्टं वीतमभिगूर्तं वषद्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥
यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै । सन्दानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥ यत्ते सादे महसा शूकृतस्य पार्ष्णिया वा कशया
४५ वा तुतोद । स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥ चतुस्त्रिꣳशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति । अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥ एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथर्तुः । या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ ॥ मा त्वा तपत्
४६ प्रिय आत्माऽपियन्तं मा स्वधितिस्तनुव आ तिष्ठिपत्ते । मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥ न वा उवेतन्म्रियसे न रिष्यसि देवाꣳ इदेषि पथिभिः सुगेभिः । हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥ सुगव्यं नो वाजी स्वश्वियं पुꣳसः पुत्राꣳ उत विश्वापुषꣳरयिम् । अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनताꣳ हविष्मान् ॥
४। ६। ९॥ घासिं कशया तपद्रयिं नव च ॥ ४। ६। ९॥
अश्मन् य इमोदेनमाशुः प्राचीं जीमूतस्य यदक्रंदो मा नो मित्रो ये वाजिनं नव ॥
अश्मन् मनोयुजं प्राचीमनु शर्म यच्छतु तेषामभिगूर्तिः षद्वत्वारिꣳशत् ॥
अश्मन् हविश्मान् ॥

## चतुर्थकाण्डे सप्तमः प्रश्नः ७

१ अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरा गतम् ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपान

२ श्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे ॥ ४। ७। १॥ अपानस्तनूश्च मेऽष्टादश च ॥ ४। ७। १॥

३ ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च

४ मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ ४। ७। २॥ जगच्चर्धिश्चतुर्दश च ॥ ४। ७। २॥

५ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च

६ मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ ४। ७। ३॥
विश्वं च शयनमष्टौ च ॥ ४। ७। ३॥

७ ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च

८ मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥ ४। ७। ४॥ विभु च मसुराश्चतुर्दश च ॥ ४। ७। ४॥

९ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च
१० मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥ ४। ७। ५॥ कृष्टपच्यश्चाऽष्टा चत्वारिँशच्च ॥ ४। ७। ५॥
११ अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च
१२ म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ४। ७। ६॥ त्वष्टा च द्यौश्च म एक विँशतिश्च ॥ ४। ७। ६॥
१३ अँशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाँशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च
१४ मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ ४। ७। ७॥ ऋतुग्रहाश्च चतुस्त्रिँशच्च ॥ ४। ७। ७॥
१५ इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ ४। ७। ८॥ गृहाश्च षोडश च ॥ ४। ७। ८॥
१६ अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्करीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥ ४। ७। ९॥ दीक्षाऽष्टादश च ॥ ४। ७। ९॥

१७ गर्भाश्च मे वथ्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवथ्सश्च मे त्रिवथ्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च
१८ मे वेहच्च मेऽनड्वाश्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताग् श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥ ४। ७। १०॥ ऋषभश्च चत्वारिꣳशच्च ॥ ४। ७। १०॥
१९ एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च
२० मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥
४। ७। ११॥ त्रयस्त्रिꣳशच्च व्यश्नियं एकादश च ॥ ४। ७। ११॥
२१ वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः । वाजो नो विश्वैर्देवैर्धनसाताविहावतु ॥ विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः । विश्वे नो देवा अवसागमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥ वाजस्य प्रसवं देवा रथैर्याता हिरण्ययैः । अग्निरिन्द्रो बृहस्पतिर्मरुतः सोमपीतये ॥ वाजेवाजेऽवत वाजिनो नो धनेषु
२२ विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ वाजः पुरस्तादुत मध्यतो नो वाजो देवाꣳ ऋतुभिः कल्पयाति । वाजस्य हि प्रसवो नन्नमीति विश्वा आशा वाजपतिर्भवेयम् ॥ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाम् । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ संमा सृजामि पयसा घृतेन सं मा सृजाम्यप
२३ ओषधीभिः । सोऽहं वाजꣳ सनेयमग्ने ॥ नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची । द्यावा क्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः ॥ समुद्रोऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा मारुतोसि मरुतां गणः

शंभूर्मयोभूरभि मा वाहि स्वाहावस्युरसि दुवस्वाञ्छंभूर्मयोभूरभि मा वाहि स्वाहा ॥ ४। ७। १२॥ धनैष्वपो दुवश्वाञ्छंभूर्मयोभूरभि मा द्वे च ॥ ४। ७। १२॥

२४ अग्निं युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं वयसा बृहन्तम् । तेन वयं पतेम ब्रध्नस्य विष्टपꣳ सुवो रुहाणा अधि नाक उत्तमे ॥ इमौ ते पक्षावजरौ पतत्रिणो याभ्याꣳ रक्षाग्स्यपह२ꣳस्यग्ने । ताभ्यां पतेम सुकृतामु लोकं यत्रर्षयः प्रथमजा ये पुराणाः ॥ चिदसि समुद्रयोनिरिन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युर्महान्त्सधस्थे ध्रुव

२५ आ निषत्तः ॥ नमस्ते अस्तु मा मा हिꣳसीर्विश्वस्य मूर्धन्नधि तिष्ठसि श्रितः । समुद्रे ते हृदयमन्तरायुर्द्यावापृथिवी भुवनेष्वर्पिते ॥ उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्यावत । दिवो मूर्धासि पृथिव्या नाभिरूर्गपामोषधीनाम् । विश्वायुः शर्म सप्रथा नमस्पथे ॥ येनर्षयस्तपसा सत्र

२६ मासतेन्धाना अग्निꣳ सुवराभरन्तः । तस्मिन्नहं नि दधे नाके अग्निमेतं यमाहुर्मनवः स्तीर्णबर्हिषम् ॥ तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः । नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥ आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः । पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुते

२७ ये पृतन्यवः ॥ अयमग्निर्वीरतमो वयोधाः सहस्रियो दीप्यतामप्रयुच्छन् । विभ्राजमानः सरिरस्य मध्य उप प्र यात दिव्यानि धाम ॥ सं प्र च्यवध्वमनु सं प्र याताग्ने पथो देवयानान् कृणुध्वम् । अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥ येना सहस्रं वहसि येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो वह देवयानो य

२८ उत्तमः ॥ उद्बुध्यस्वाग्ने प्रति जागृह्येनमिष्टापूर्ते सꣳ सृजेथामयं च । पुनः कृण्व२ꣳस्त्वा पितरं युवानमन्वाताꣳसीत्त्वयि तन्तुमेतम् ॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आ रोहाथा नो वर्धया रयिम् ॥ ४। ७। १३॥ ध्रुवस्सत्रं कृणुते यस्सप्तत्रिꣳशच्च ॥ ४। ७। १३॥

२९ ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तनुवं पुषेम । मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥ मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुरग्निः । ममान्तरिक्षमुरु गोपमस्तु मह्यं वातः पवतां कामे अस्मिन् ॥ मयि देवा द्रविणमा यजन्तां मय्याशीरस्तु मयि देवहूतिः । दैव्या होतारा वनिषन्त

३० पूर्वेरिष्टाः स्याम तनुवा सुवीराः ॥ मह्यं यजन्तु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु । एनो मा नि गां कतमच्चनाऽहं विश्वे देवासो अधि वोचता मे ॥ देवीः षडुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयध्वम् । मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥ अग्निर्मन्युं प्रतिनुदन्पुरस्ता
३१ ददब्धो गोपाः परि पाहिनस्त्वम् । प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधा वि नेशत् ॥ धाता धातृणां भुवनस्य यस्पतिर्देवꣳ सवितारमभिमातिषाहम् । इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात् ॥ उरुव्यचा नो महिषः शर्म यꣳसदस्मिन् हवे पुरुहूतः पुरुक्षु । स नः प्रजायै हर्यश्व मृडयेन्द्र मा
३२ नो रीरिषो मा परादाः ॥ ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधाम हे तान् । वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥ अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः । इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मे दिनं त्वा ॥ ४। ७। १४॥ वनिषन्त पुरस्तान्मा त्रिचत्वारिꣳशच्च ॥ ४। ७। १४॥
३३ अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवः समिन्धते । विश्वस्यां विशि प्रविविशिवाꣳसमीमहे स नो मुञ्चत्वꣳहसः ॥
यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानं च केवलम् । स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः ॥ इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः । यो दाशुषः सुकृतो हवमुप गन्ता
३४ स नो मुञ्चत्वꣳहसः ॥ यः संग्रामं नयति सं वशी युधे यः पुष्टानि सꣳसृजति त्रयाणि । स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः ॥ मन्वे वां मित्रावरुणा तस्य वित्तꣳ सत्यौजसा दृꣳहणा यं नुदेथे । या राजानꣳ सरथं याथ उग्रा ता नो मुञ्चतमागसः ॥ यो वाꣳ रथ ऋजुरश्मिः सत्यधर्मा मिथुश्चरन्तमुपयाति दूषयन् । स्तौमि
३५ मित्रावरुणा नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥ वायोः सवितुर्विदथानि मन्महे यावात्मन्वद्बिभृतो यौ च रक्षतः । यौ विश्वस्य परि भू बभूवतुस्तौ नो मुञ्चतमागसः ॥ उप श्रेष्ठा न आशिषो देवयोर्धर्मे अस्थिरन् । स्तौमि वायुꣳ सवितारं नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥ रथीतमौ रथीनामह्व ऊतये शुभं गमिष्ठौ सुयमेभिरश्वैः । ययो
३६ र्वां देवौ देवेष्वनिशितमोजस्तौ नो मुञ्चतमागसः ॥ यदयातं वहतुꣳ सूर्यायास्त्रिचक्रेण

स ꣳ सदमिच्छमानौ । स्तौमि देवावश्विनौ नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥
मरुतां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे । आशून् हुवे सुयमानूतये
ते नो मुञ्चन्त्वेनसः ॥ तिग्ममायुधं वीडितꣳ सहस्वद्दिव्यꣳ शर्धः
३७ पृतनासु जिष्णु । स्तौमि देवान्मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ॥
देवानां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे । आशून् हुवे सुयमानूतये
ते नो मुञ्चन्त्वेनसः ॥ यदिदं माभिशोचति पौरुषेयेण दैव्येन । स्तौमि विश्वान्देवान्नाथितो
जोहवीमि ते नो मुञ्चन्त्वेनसः ॥ अनु नोऽद्यानुमतिर
३८ न्विदनुमते त्वं वैश्वानरो न ऊत्या पृष्टो दिवि । ये अप्रथेताममितेभिरोजोभिर्ये प्रतिष्ठे
अभवतां वसूनाम् । स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः ॥
उर्वीरोदसी वरिवः कृणोतं क्षेत्रस्य पत्नी अधि नो ब्रूयातम् । स्तौमि द्यावापृथिवी नाथितो
जोहवीमि ते नो मुञ्चतमꣳहसः ॥ यत्ते वयं पुरुषत्रा यविष्ठाविद्वाꣳसश्चकृमा कच्चना
३९ ऽगः । कृधी स्वस्माꣳ अदितेरनागाव्येनाꣳसि शिश्रथो विष्वगग्ने ॥ यथाह तद्वसवो
गौर्यं चित्पदि षिताममुञ्चता यजत्राः । एवा त्वमस्मत् प्र मुञ्चा व्यꣳहः प्रातार्यग्ने प्रतरांन
आयुः ॥ ४। ७। १५॥ गन्ता दूषयन्थ्स्तौमि ययोः शर्धोऽनुमतिरनु चन चतुस्त्रिꣳशच्च ॥
४। ७। १५॥ अग्नेर्मन्वे यस्येदमिंद्रस्य यस्संग्रामꣳ सनो मुंचत्वꣳहसः । मन्वे वां ता
नो मुंचतमागसः ॥ यो वां वायोरुप रथीतमौ यदयातमश्विनौ तौ नो मुंचतमागसः ।
मरुतां तिग्मं मरुतो देवानां यदिदं विश्वान्ते नो मुंचन्त्वेनसः । अनु न उर्वी द्यावापृथिवी
ते नो मुंचतमꣳहसो यत्ते ॥ चतुरꣳहसः षडागसश्चतुरेनसो द्विरꣳहसः ॥
अग्नाविष्णू ज्यैष्ठꣳ शं चोर्क्राऽश्मा चाग्निश्चाऽꣳशुश्चेध्मश्चाग्निश्च गर्भाश्चैका च वाजो
नोग्निं युनज्मि ममाग्नेऽग्नेर्मन्वे पंचदश ॥
अग्नाविष्णू अग्निश्च वाजो नो अदब्धो गोपा नवत्रिꣳशत् ॥
अग्नाविष्णू प्रतरां न आयुः ॥
इति चतुर्थं काण्डं संपूर्णम् ४॥
॥ तैत्तिरीय-संहिता ॥

# तैत्तिरीय-संहिता

## ॥ पंचमं काण्डम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### पञ्चमकाण्डे प्रथमः प्रश्नः १

१ सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोति चतुष्पादः पशवः पशूनेवाव रुंधे चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति छन्दाँसि देवेभ्योऽपाक्रामन्न वोऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुर्गृहीतमधारयन् पुरोऽनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर्गृहीतं जुहोति छन्दाग्स्येव तत्प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति यं कामयेत

२ पापीयान्थ्स्यादित्येकैकं तस्य जुहुयादाहुतीभिरेवैनमप गृह्णाति पापीयान्भवति यं कामयेत वसीयान्थ्स्यादिति सर्वाणि तस्यानुद्रुत्य जुहुयादाहुत्यैवैनमभि क्रमयति वसीयान्भवत्यथो यज्ञस्यैवैषाभिक्रान्तिरेति वा एष यज्ञमुखादृद्धा योऽग्नेर्देवताया एत्यष्टावेतानि सावित्राणि भवन्त्यष्टाक्षरा गायत्री गायत्रो

३ ऽग्निस्तेनैव यज्ञमुखादृद्धा अग्नेर्देवतायै नैत्यष्टौ सावित्राणि भवन्त्याहुतिर्नवमी त्रिवृतमेव यज्ञमुखे वि यातयति यदि कामयेत छन्दाँसि यज्ञयशसेनार्पयेयमित्यृचमन्तमां कुर्याच्छन्दाग्स्येव यज्ञयशसेनार्पयति यदि कामयेत यजमानं यज्ञयशसेनार्पयेयमिति यजुरन्तमं कुर्याद्यजमानमेव यज्ञयशसेनार्पयत्यृचा स्तोमँ समर्धयेत्या

४ ऽह समृद्ध्यै चतुर्भिरभ्रिमा दत्ते चत्वारि छन्दाँसि छन्दोभिरेव देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्या अग्निर्देवेभ्यो निलायत स वेणुं प्राविशथ्स एतामूतिमनु समचरद्यद्वेणोः सुषिरँ सुषिराभ्रिर्भवति सयोनित्वाय स यत्रयत्रावसत्तत्कृष्णमभवत्कल्माषी भवति रूपसमृद्ध्या उभयतः, क्ष्णूर्भवतीतश्चामुतश्चार्कस्यावरुद्ध्यै व्याममात्री भवत्येतावद्वै पुरुषे वीर्यं वीर्यसंमिताऽपरिमिता भवत्यपरिमितस्यावरुद्ध्यै यो वनस्पतीनां फलग्रहिः स एषां वीर्यावान्फलग्रहिर्वेणुर्वैणवी भवति वीर्यस्यावरुद्ध्यै ॥ ५। १। १॥

कामयेत गायत्रीर्धयेति च सप्तविꣳशतिश्च ॥ ५। १। १॥
५ व्यृद्धं वा एतद्यज्ञस्य यदयजुष्केण क्रियत इमामगृभ्णन् रशनामृतस्येत्यश्वाभि
धानीमा दत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै प्रतूर्तं वाजिन्ना द्रवेत्यश्वमभि दधाति
रूपमेवास्यैतन्महिमानं व्याचष्टे युञ्जाथाꣳ रासभं युवमिति गर्दभमसत्येव गर्दभं प्रति
ष्ठापयति तस्मादश्वाद्गर्दभोऽसत्तरो योगेयोगे तवस्तरमित्याह
६ योगेयोग एवैनं युङ्क्ते वाजेवाजे हवामह इत्याहान्नं वै वाजोऽन्नमेवाव
रुंधे सखाय इन्द्रमूतय इत्याहेन्द्रियमेवाव रुंधेऽग्निर्देवेभ्यो निलायत तं
प्रजापतिरन्वविन्दत्प्राजापत्योऽश्वोऽश्वेन संभरत्यनुवित्त्यै पापवस्य सं वा एतत्क्रियते
यच्छ्रेयसा च पापीयसा च समानं कर्म कुर्वन्ति पापीयान्
७ ह्यश्वाद्गर्दभोऽश्वं पूर्वं नयन्ति पापवस्यसस्य व्यावृत्त्यै तस्माच्छ्रेयाꣳसं
पापीयान्पश्चादन्वेति बहुर्वै भवतो भ्रातृव्यो भवतीव खलु वा एष योऽग्निं चिनुते
वज्र्यश्वः प्रतूर्वन्नेह्यवक्रामन्नशस्तीरित्याह वज्रेणैव पाप्मानं भ्रातृव्यमव क्रामति रुद्रस्य
गाणपत्यादित्याह रौद्रा वै पशवो रुद्रादेव
८ पशून्निर्याच्यात्मने कर्म कुरुते पूष्णा सयुजा सहेत्याह पूषा वा अध्वनाꣳ
सन्नेता समष्ट्यै पुरीषायतनो वा एष यदग्निरंगिरसो वा एतमग्रे देवतानाꣳ
समभरन्पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेहीत्याह सायतनमेवैनं देवताभिः
संभरत्यग्निं पुरीष्यमङ्गिरस्वदच्छेम इत्याह येन
९ सङ्गच्छते वाजमेवास्य वृङ्क्ते प्रजापतये प्रतिप्रोच्याग्निः संभृत्य इत्याहुरियं वै
प्रजापतिस्तस्या एतच्छ्रोत्रं यद्वल्मीकोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्याम इति वल्मीकवपामुप
तिष्ठते साक्षादेव प्रजापतये प्रतिप्रोच्याग्निꣳ सं भरत्यग्निं पुरीष्यमङ्गिरस्वद्भराम इत्याह
येन सङ्गच्छते वाजमेवास्य वृङ्क्तेऽन्वग्निरुषसामग्र
१० मख्यदित्याहानुख्यात्या आगत्य वाज्यध्वन आक्रम्य वाजिन्पृथिवीमित्याहेच्छत्येवैनं
पूर्वया विन्दत्युत्तरया द्वाभ्यामा क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः
पशवः प्र जायन्ते द्यौस्ते पृष्ठं पृथिवी सधस्थमित्याहैभ्यो वा एतं लोकेभ्यः
प्रजापतिः समैरयद्रूपमेवास्यैतन्महिमानं व्याचष्टे वज्रीवा एष यदश्वो दद्भिरन्यतोदद्भ्यो
भूया३ꣳल्लोमभिरुभयादद्भ्यो यं द्विष्यात्तमधस्पदं ध्यायेद्वज्रेणैवैनगग्ं स्तृणुते ॥ ५। १। २॥
आह पापीयान्रुद्रादेव येनाऽग्रं वज्री वै सप्तदश च ॥ ५। १। २॥

११ उत्क्रामोदक्रमीदिति द्वाभ्यामुत्क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः
प्र जायन्तेऽप उप सृजति यत्र वा आप उप गच्छन्ति तदोषधयः प्रति तिष्ठन्त्योषधीः प्रति
तिष्ठन्तीः पशवोऽनु प्रति तिष्ठन्ति पशून्, यज्ञो यज्ञं यजमानो यजमानं प्रजास्तस्मादप
उप सृजति प्रतिष्ठित्यै यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः
१२ स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति
न यज्ञꣳ रक्षाꣳसि घ्नन्ति जिघर्म्यग्निं मनसा घृतेनेत्याह मनसा हि पुरुषो यज्ञमभि
गच्छति प्रतिक्ष्यन्तं भुवनानि विश्वेत्याह सर्वग्ग्ं ह्येष प्रत्यङ्ङेति पृथुं तिरश्चा वयसा
बृहन्तमित्याहाल्पो ह्येष जातो महान्
१३ भवति व्यचिष्ठमन्नꣳ रभसं विदानमित्याहान्नमेवास्मै स्वदयति सर्वमस्मै स्वदते य
एवं वेदात्वा जिघर्मि वचसा घृतेनेत्याह तस्माद्यत्पुरुषो मनसाभि गच्छति तद्वाचा
वदत्यरक्षसेत्याह रक्षसामपहत्यै मर्यश्रीः स्पृहयद्वर्णो अग्निरित्याहाप चितिमेवास्मिन्
दधात्यप चितिमान्भवति य एवं
१४ वेद मनसा त्वै तामाप्तुमर्हति यामध्वर्युरनग्ना वाहुतिं जुहोति मनस्वतीभ्यां
जुहोत्याहुत्योराप्त्यै द्वाभ्यां प्रतिष्ठित्यै यज्ञमुखे यज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि
जिघाꣳसन्त्येतर्हि खलु वा एतद्यज्ञमुखं यर्ह्येनदाहुतिरश्नुते परि लिखति रक्षसामपहत्यै
तिसृभिः परि लिखति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्माद्रक्षाग्स्यप हन्ति
१५ गायत्रिया परि लिखति तेजो वै गायत्री तेजसैवैनं परि गृह्णाति त्रिष्टुभा परि
लिखतींद्रियं वै त्रिष्टुगिंद्रियेणैवैनं परि गृह्णात्यनुष्टुभा परि लिखत्यनुष्टुप्सर्वाणि छन्दाꣳसि
परिभूः पर्याप्त्यै मध्यतोऽनुष्टुभा वाग्वा अनुष्टुप्तस्मान्मध्यतो वाचा वदामो गायत्रिया
प्रथमया परि लिखत्यथानुष्टुभाथ त्रिष्टुभा तेजो वै गायत्री यज्ञोऽनुष्टुगिंद्रियं त्रिष्टुप्तेजसा
चैवेन्द्रियेण चोभयतो यज्ञं परि गृह्णाति ॥ ५। १। ३॥ अन्धोऽध्वर्युर्महान्भवति य एवꣳ
हन्ति त्रिष्टुभा तेजो वै गायत्री त्रयोदश च ॥ ५। १। ३॥
१६ देवस्य त्वा सवितुः प्रसव इति खनति प्रसूत्या अथो धूममेवैतेन जनयति
ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमित्याह ज्योतिरेवैतेन जनयति सोऽग्निर्जातः प्रजाः शुचार्पयत्तं
देवा अर्धर्चेनाशमयञ्छिवं प्रजाभ्योऽहिꣳसन्तमित्याह प्रजाभ्य एवैनꣳ शमयति द्वाभ्यां
खनति प्रतिष्ठित्या अपां पृष्ठमसीति पुष्करपर्णमा
१७ हरत्यपां वा एतत्पृष्ठं यत्पुष्करपर्णꣳ रूपेणैवैनदा हरति पुष्करपर्णेन संभरति

योनिर्वा अग्नेः पुष्करपर्णꣳ सयोनिमेवाग्निꣳ संभरति कृष्णाजिनेन संभरति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञꣳ संभरति यद्ग्राम्याणां पशूनां चर्मणा संभरेद् ग्राम्यान् पशूञ्छुचार्पयेत्कृष्णाजिनेन संभरत्यारण्यानेव पशून्
१८ छुचार्पयति तस्मात्समावत्पशूनां प्रजायमानानामारण्याः पशवः कनीयाꣳसः शुचा ह्यृता लोमतः संभरत्यतो ह्यस्य मेध्यं कृष्णाजिनं च पुष्करपर्णं च सꣳ स्तृणातीयं वै कृष्णाजिनमसौ पुष्करपर्णमाभ्यामेवैनमुभयतः परि गृह्णात्यग्निर्देवेभ्यो निलायत तमथर्वान्वपश्यदथर्वा त्वा प्रथमो निरमन्थदग्न इत्या
१९ ऽह य एवैनमन्वपश्यत्तेनैवैनꣳ संभरति त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रितमविन्दत्तमु त्वा दध्यङ्ङृषिरित्याह दध्यङ् वा आथर्वणस्तेजस्व्यासीत् तेज एवास्मिन्दधाति तमु त्वा पाथ्यो वृषेत्याह पूर्वमेवोदितमुत्तरेणाभि गृणाति
२० चतसृभिः संभरति चत्वारि छन्दाꣳसि छन्दोभिरेव गायत्रीभिर्ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुग्भी राजन्यस्य त्रैष्टुभो हि राजन्यो यं कामयेत वसीयान्थ्स्यादित्युभयीभिस्तस्य संभरेत्तेजश्चैवास्मा इंद्रियं च समीची दधात्यष्टाभिः संभरत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तꣳ संभरति सीद होतरित्याह देवता एवास्मै सꣳ सादयति नि होतेति मनुष्यान्थ्सꣳ सीदस्वेति वयाꣳसि जनिष्वा हि जेन्यो अग्रे अह्नामित्याह देवमनुष्यानेवास्मै सꣳ सन्नान् प्र जनयति ॥ ५। १। ४॥
ऐव पशूनिति गृणाति होतरिति सप्तविꣳशतिश्च ॥ ५। १। ४॥
२१ क्रूरमिव वा अस्या एतत्करोति यत्खनत्यप उप सृजत्यापो वै शान्ताः शान्ताभिरेवास्यै शुचꣳ शमयति सं ते वायुर्मातरिश्वा दधात्वित्याह प्राणो वै वायुः प्राणेनैवास्यै प्राणꣳ सं दधाति सं ते वायुरित्याह तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते तस्मै च देवि वषडस्तु
२२ तुभ्यमित्याह षड्वा ऋतव ऋतुष्वेव वृष्टिं दधाति तस्मात्सर्वानृतून्, वर्षति यद्वषट् कुर्याद्यातयामास्य वषट्कारः स्याद्यन्न वषट् कुर्याद्रक्षाꣳसि यज्ञꣳ हन्युर्वडित्याह परोऽक्षमेव वषट्करोति नास्य यातयामा वषट्कारो भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति सुजातो ज्योतिषा सहेत्यनुष्टुभोप नह्यत्यनुष्टुप्
२३ सर्वाणि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनं तनुवा परि दधाति वेदुको वासो भवति य एवं वेद वारुणो वा अग्निरुपनद्ध उदु तिष्ठ स्वध्वरोर्ध्व ऊषुण ऊतय इति सावित्रीभ्यामुत्तिष्ठति सवितृप्रसूत एवास्योर्ध्वां वरुणमेनिमुत्सृजति

द्वाभ्यां प्रतिष्ठित्यै स जातो गर्भो असि
२४ रोदस्योरित्याहेमे वै रोदसी तयोरेष गर्भो यदग्निस्तस्मादेवमाहाग्ने चारुर्विभृत
ओषधीष्वित्याह यदा ह्येतं विभरन्त्यथ चारुतरो भवति प्र मातृभ्यो अधि कनिक्रदद्गा
इत्याहौषधयो वा अस्य मातरस्ताभ्य एवैनं प्र च्यावयति स्थिरो भव वीड्वङ्ग इति गर्दभ
आ सादयति
२५ सं नह्यत्येवैनमेतया स्थेम्ने गर्दभेन सं भरति तस्माद्गर्दभः पशूनां भारभारितमो गर्दभेन
सं भरति तस्माद्गर्दभोऽप्यनालेशेऽत्यन्यान्पशून्मेद्यत्यन्नग्ग् ह्येनेनार्कँ सं भरन्ति गर्दभेन
सं भरति तस्माद्गर्दभो द्विरेताः सन्कनिष्ठं पशूनां प्र जायतेऽग्निर्ह्यस्य योनिं निर्दहति
प्रजासु वा एष एतर्ह्यारूढः
२६ स ईश्वरः प्रजाः शुचा प्रदहः शिवो भव प्रजाभ्य इत्याह प्रजाभ्य एवैनँ शमयति
मानुषीभ्यस्त्वमङ्गिर इत्याह मानव्यो हि प्रजा मा द्यावापृथिवी अभि शूशुचो मान्तरिक्षं
मा वनस्पतीनित्याहैभ्य एवैनं लोकेभ्यः शमयति प्रैतु वाजी कनिक्रददित्याह वाजी ह्येष
नानदद्रासभः पत्वेत्या
२७ ऽह रासभ इति ह्येतमृषयोऽवदन् भरन्नग्निं पुरीष्यमित्याहाग्निँ ह्येष भरति मा
पाद्यायुषः पुरेत्याहायुरेवास्मिन्दधाति तस्माद्गर्दभः सर्वमायुरेति तस्माद्गर्दभे पुरायुषः प्रमीते
बिभ्यति वृषाग्निं वृषणं भरन्नित्याह वृषा ह्येष वृषाग्निरपां गर्भँ
२८ समुद्रियमित्याहापाग् ह्येष गर्भो यदग्निरग्न आ याहि वीतय इति वा इमौ लोकौ
व्यैतामग्न आ याहि वीतय इति यदाहानयोर्लोकयोर्वीत्यै प्रच्युतो वा एष आयतनादगतः
प्रतिष्ठाँ स एतर्ह्यध्वर्युं च यजमानं च ध्यायत्यृतँ सत्यमित्याहेयं वा ऋतमसौ
२९ सत्यमनयोरेवैनं प्रति ष्ठापयति नार्तिमार्च्छत्यध्वर्युर्न यजमानो वरुणो वा एष
यजमानमभ्यैति यदग्निरुपनद्ध ओषधयः प्रति गृह्णीताग्निमेतमित्याह शान्त्यै व्यस्यन्विश्वा
अमतीररातीरित्याह रक्षसामपहत्यै निषीदन्नो अप दुर्मतिँ हनदित्याह प्रतिष्ठित्या
ओषधयः प्रति मोदध्व
३० मेनमित्याहौषधयो वा अग्नेर्भागधेयं ताभिरेवैनँ समर्धयति पुष्पावतीः सुपिप्पला
इत्याह तस्मादोषधयः फलं गृह्णन्त्ययं वो गर्भ ऋत्वियः प्रत्नँ सधस्थमासददित्याह
याभ्य एवैनं प्रच्यावयति तास्वेवैनं प्रति ष्ठापयति द्वाभ्यामुपाव हरति प्रतिष्ठित्यै ॥ ५।
१। ५॥ अस्त्वनुष्टुबसि सादयत्यारूढः पत्वेति गर्भमसौ मोदध्वं द्विचत्वारिँशच्च॥ ५।

१। ५॥
३१ वारुणो वा अग्निरुपनद्धो वि पाजसेति वि स्रꣳसयति सवितृप्रसूत एवास्य विषूचीं
वरुणमेनिं वि सृजत्यप उप सृजत्यापो वै शान्ताः शान्ताभिरेवास्य शुचꣳ शमयति
तिसृभिरुप सृजति त्रिवृद्धा अग्निर्यावानेवाग्निस्तस्य शुचꣳ शमयति मित्रः सꣳसृज्य
पृथिवीमित्याह मित्रो वै शिवो देवानां तेनैवै
३२ नꣳ सꣳ सृजति शान्त्यै यद्ग्राम्याणां पात्राणां कपालैः सꣳसृजेद्ग्राम्याणि
पात्राणि शुचार्पयेदर्मकपालैः सꣳ सृजत्येतानि वा अनुपजीवनीयानि तान्येव शुचार्पयति
शर्कराभिः सꣳ सृजति धृत्या अथो शन्त्वायाजलोमैः सꣳ सृजत्येषा वा अग्नेः प्रिया
तनूर्यदजा प्रिययैवैनं तनुवा सꣳ सृजत्यथो तेजसा कृष्णाजिनस्य लोमभिः सꣳ
३३ सृजति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञꣳ सꣳ सृजति रुद्राः संभृत्य
पृथिवीमित्याहैता वा एतं देवता अग्रे समभरन्ताभिरेवैनꣳ सं भरति मखस्य
शिरोऽसीत्याह यज्ञो वै मखस्तस्यैतच्छिरो यदुखा तस्मादेवमाह यज्ञस्य पदे स्थ इत्याह
यज्ञस्य ह्येते
३४ पदे अथो प्रतिष्ठित्यै प्रान्याभिर्यच्छत्यन्वन्यैर्मन्त्रयते मिथुनत्वाय त्र्युद्धिं करोति त्रय
इमे लोका एषां लोकानामाप्त्यै छन्दोभिः करोति वीर्यं वै छन्दाꣳसि वीर्येणैवैनां करोति
यजुषा बिलं करोति व्यावृत्त्या इयतीं करोति प्रजापतिना यज्ञमुखेन संमितां द्विस्तनां
करोति द्यावापृथिव्योर्दोहाय चतुःस्तनां करोति पशूनां दोहायाष्टास्तनां करोति छंदसां
दोहाय नवाश्रिमभि चरतः कुर्यात्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्यै
कृत्वाय सा महीमुखामिति नि दधाति देवतास्वेवैनां प्रति ष्ठापयति ॥ ५। १। ६॥ तेनैव
लोमभिस्समेते अभिचरत एकविꣳशतिश्च ॥ ५। १। ६॥
३५ सप्तभिर्धूपयति सप्त वै शीर्षण्याः प्राणाः शिर एतद्यज्ञस्य यदुखा शीर्षन्नेव यज्ञस्य
प्राणान्दधाति तस्माथ्सप्त शीर्षन्प्राणा अश्व शकेन धूपयति प्राजापत्यो वा अश्वः
सयोनित्वायादितिस्त्वेत्याहेयं वा अदितिरदित्यैवादित्यां खनत्यस्या अक्रूरङ्काराय न हि
स्वः स्वꣳ हिनस्ति देवानां त्वा पत्नीरित्याह देवानां
३६ वा एतां पत्नयोऽग्रेऽकुर्वन्ताभिरेवैनां दधाति धिषणास्त्वेत्याह विद्या वै धिषणा
विद्याभिरेवैनामभीन्द्धे ग्नास्त्वेत्याह छन्दाꣳसि वै ग्नाश्छन्दोभिरेवैनाग् श्रपयति
वरूत्रयस्त्वेत्याह होत्रा वै वरूत्रयो होत्राभिरेवैनां पचति जनयस्त्वेत्याह देवानां
वै पत्नी

३७ र्जनयस्ताभिरेवैनां पचति षड्भिः पचति षड्वा ऋतव ऋतुभिरेवैनां पचति द्विः पचन्त्वित्याह तस्माद्द्विः संवथ्सरस्य सस्यं पच्यते वारुण्युखाभीद्धा मैत्रियोपैति शान्त्यै देवस्त्वा सवितोद्वपत्वित्याह सवितृप्रसूत एवैनां ब्रह्मणा देवताभिरुद्वपत्यपद्यमाना पृथिव्याशा दिश आ पृणे

३८ त्याह तस्मादग्निः सर्वा दिशोऽनु वि भात्युत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमित्याह प्रतिष्ठित्या असुर्यं पात्रमनाच्छृण्णमा च्छृणत्ति देवत्राकरज क्षीरेणाऽ च्छृणत्ति परमं वा एतत्पयो यदजक्षीरं परमेणैवेनां पयसाऽच्छृणत्ति यजुषा व्यावृत्त्यै छन्दोभिरा च्छृणत्ति छन्दोभिर्वा एषा क्रियते छन्दोभिरेव छन्दाग्स्या च्छृणत्ति ॥ ५। १। ७॥ आह देवानां वै पत्नीः पृणैषा षद्व ॥ ५। १। ७॥

३९ एकवि२ँशत्या माषैः पुरुषशीर्षमच्छैत्यमेध्या वै माषा अमेध्यं पुरुषशीर्षममेध्यैरेवास्यामेध्यं निरवदाय मेध्यं कृत्वाहरत्येकवि२ँशतिर्भवन्त्येकवि२ँशो वै पुरुषः पुरुषस्यास्त्यै व्यृद्धं वा एतत्प्राणैरमेध्यं यत्पुरुषशीर्ष२ँ सप्तधा वितृण्णां वल्मीकवपां प्रति नि दधाति सप्त वै शीर्षण्याः प्राणाः प्राणैरेवैनथ्समर्धयति मेध्यत्वाय यावन्तो

४० वै मृत्युबन्धवस्तेषां यम आधिपत्यं परीयाय यमगाथाभिः परि गायति यमादेवैनद्वृङ्क्ते तिसृभिः परि गायति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो वृङ्क्ते तस्माद्गायते न देयं गाथा हि तद्वृङ्क्तेऽग्निभ्यः पशूना लभते कामा वा अग्नयः कामानेवाव रुंधे यत् पशून्नालभेतानवरुद्धा अस्य

४१ पशवः स्युर्यत् पर्यग्निकृतानुथ्सृजेद्यज्ञवेशसं कुर्याद्यथ्सग्ग् स्थापयेद्यातयामानि शीर्षाणि स्युर्यत्पशूनालभते तेनैव पशूनव रुंधे यत्पर्यग्निकृतानुथ्सृजति शीर्ष्णामयातयामत्वाय प्राजापत्येन स२ँ स्थापयति यज्ञो वै प्रजापतिर्यज्ञ एव यज्ञं प्रति ष्ठापयति प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एता आप्रीरपश्यत्ताभिर्वै स मुखत

४२ आत्मानमाप्रीणीत यदेता आप्रियो भवन्ति यज्ञो वै प्रजापतिर्यज्ञमेवैताभिर्मुखत आ प्रीणात्यपरिमितछंदसो भवन्त्यपरिमितः प्रजापतिः प्रजापतेराप्त्यै ऊनातिरिक्ता मिथुनाः प्रजात्यै लोमशं वै नामैतच्छंदः प्रजापतेः पशवो लोमशाः पशूनेवाव रुंधे सर्वाणि वा एता रूपाणि सर्वाणि रूपाण्यग्नौ चित्यै क्रियन्ते तस्मादेता अग्नेश्चित्यस्य

४३ भवन्त्येकविꣳशतिꣳ सामिधेनीरन्वाह रुग्वा एकविꣳशो रुचमेव गच्छत्यथो
प्रतिष्ठामेव प्रतिष्ठा ह्येकविꣳशश्चतुर्विꣳशतिमन्वाह चतुर्विꣳशतिरर्धमासाः संवथ्सरः
संवथ्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुंधे पराचीरन्वाह पराङिव हि सुवर्गो
लोकः समास्त्वाग्न ऋतवो वर्धयन्त्वित्याह समाभिरेवाग्निं वर्धय
४४ त्यृतुभिः संवथ्सरं विश्वा आ भाहि प्रदिशः पृथिव्या इत्याह तस्मादग्निः सर्वा दिशोऽनु
वि भाति प्रत्यौहतामश्विना मृत्युमस्मादित्याह मृत्युमेवास्माद पनुदत्युद्वयं तमसस्परीत्याह
पाप्मा वै तमः पाप्मानमेवास्मादप हन्त्यगन्म ज्योतिरुत्तममित्याहासौ वा आदित्यो
ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छति न संवथ्सरस्तिष्ठति नास्य श्रीस्तिष्ठति
यस्यैताः क्रियन्ते ज्योतिष्मतीमुत्तमामन्वाह ज्योतिरेवास्मा उपरिष्टाद्दधाति सुवर्गस्य
लोकस्यानुख्यात्यै ॥ ५। १। ८॥ यावन्तोस्य मुखतश्चित्यस्य वर्धयत्यादित्योष्टाविꣳशतिश्च
॥ ५। १। ८॥
४५ षड्भिर्दीक्षयति षड्वा ऋतव ऋतुभिरेवैनं दीक्षयति सप्तभिर्दीक्षयति सप्त
छन्दाꣳसि छन्दोभिरेवैनं दीक्षयति विश्वे देवस्य नेतुरित्यनुष्टुभोत्तमया जुहोति
वाग्वा अनुष्टुप्तस्मात्प्राणानां वागुत्तमैकस्मादक्षरादनाप्तं प्रथमं पदं तस्माद्यद्वाचोऽनाप्तं
तन्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः
४६ प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्यै
यदर्चिषि प्रवृञ्ज्याद्भूतमव रुंधीत यदङ्गारेषु भविष्यदङ्गारेषु प्र वृणक्ति भविष्यदेवाव रुंधे
भविष्यद्धि भूयो भूताद्द्वाभ्यां प्र वृणक्ति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मणा वा एषा यजुषा
संभृता यदुखा सा यद्भिद्येतार्तिमार्च्छे
४७ द्यजमानो हन्येतास्य यज्ञो मित्रैतामुखां तपेत्याह ब्रह्म वै मित्रो ब्रह्मन्नेवैनां
प्रतिष्ठापयति नार्तिमार्च्छति यजमानो नास्य यज्ञो हन्यते यदि भिद्येत तैरेव कपालैः
सꣳसृजेथ्सैव ततः प्रायश्चित्तिर्यो गतश्रीः स्यान्मथित्वा तस्याव दध्याद्भूतो वा एष स
स्वां
४८ देवतामुपैति यो भूतिकामः स्याद्य उखायै संभवेथ्स एव तस्य
स्यादतो ह्येष संभवत्येष वै स्वयंभूर्नाम भवत्येव यं कामयेत भ्रातृव्यमस्मै
जनयेयमित्यन्यतस्तस्याहृत्याव दध्याथ्साक्षादेवास्मै भ्रातृव्यं जनयत्यंबरीषादन्नकामस्याव
दध्यादंबरीषे वा अन्नं भ्रियते सयोन्येवान्न
४९ मव रुंधे मुञ्जानव दधात्यूर्ग्वै मुञ्जा ऊर्जमेवास्मा अपि दधात्यग्निर्देवेभ्यो निलायत

स क्रुमुकं प्राविशत्क्रुमुकमवं दधाति यदेवास्य तत्र न्यक्तं तदेवाव रुंध आज्येन सं यौत्येतद्वा अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा
५० वैकङ्कतीमा दधाति भा एवाव रुंधे शमीमयीमा दधाति शान्त्यै सीद त्वं मातुरस्या उपस्थ इति तिसृभिर्जातमुप तिष्ठते त्रय इमे लोका एष्वेव लोकेष्वाविदं गच्छत्यथो प्राणानेवात्मन्धत्ते ॥ ५। १। ९॥ प्रजापतिर् ऋच्छेथ्स्वामेवान्नं तेजसा चतुस्त्रिꣳशच्च ॥ ५। १। ९॥
५१ न ह स्म वै पुराग्निरपरशुवृक्णं दहति तदस्मै प्रयोग एवर्षिरस्वदयद्यदग्ने यानि कानि चेति समिधमा दधात्यपरशुवृक्णमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदौदुंबरीमा दधात्यूर्ग्वा उदुंबर ऊर्जमेवास्मा अपि दधाति प्रजापतिरग्निमसृजत तꣳ सृष्टꣳ रक्षाग्ंस्य
५२ जिघाꣳसन्थ्स एतद्राक्षोघ्नमपश्यत्तेन वै स रक्षाग्ंस्यपाहत यद्राक्षोघ्नं भवत्यग्नेरेव तेन जाताद्रक्षाग्ंस्यप हन्त्याश्वत्थीमा दधात्यश्वत्थो वै वनस्पतीनाꣳ सपत्नसाहो विजित्यै वैकङ्कतीमा दधाति भा एवाव रुंधे शमीमयीमा दधाति शान्त्यै सꣳशितं मे ब्रह्मोदेषां बाहू अतिरमित्युत्तमे औदुंबरी
५३ वाचयति ब्रह्मणैव क्षत्रꣳ सꣳश्यति क्षत्रेण ब्रह्म तस्माद्ब्राह्मणो राजन्यवानत्यन्यं ब्राह्मणं तस्माद्राजन्यो ब्राह्मणवानत्यन्यꣳ राजन्यं मृत्युर्वा एष यदग्निरमृतꣳ हिरण्यꣳ रुक्ममन्तरं प्रति मुञ्चतेऽमृतमेव मृत्योरन्तर्धत्त एकविꣳशतिनिर्बाधो भवत्येकविꣳशतिर्वै देवलोका द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य
५४ एकविꣳश एतावन्तो वै देवलोकास्तेभ्य एव भ्रातृव्यमन्तरेति निर्बाधैर्वै देवा असुरान्निर्बाधेऽकुर्वत तन्निर्बाधानां निर्बाधत्वं निर्बाधी भवति भ्रातृव्यानेव निर्बाधे कुरुते सावित्रिया प्रति मुञ्चते प्रसूत्यै नक्तोषासेत्युत्तरयाहोरात्राभ्यामेवैनमुद्यच्छते देवा अग्निं धारयन्द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदा अहोरात्राभ्यामेवैनमुद्यत्य
५५ प्राणैर्दाधारासीनः प्रति मुञ्चते तस्मादासीनाः प्रजाः प्र जायन्ते कृष्णाजिनमुत्तरं तेजो वै हिरण्यं ब्रह्म कृष्णाजिनं तेजसा चैवैनं ब्रह्मणा चोभयतः परि गृह्णाति षड्द्यामꣳ शिक्यं भवति षड्वा ऋतव ऋतुभिरेवैनमुद्यच्छते यद्द्वादशोद्यामꣳ संवथ्सरेणैव मौञ्जं भवत्यूर्ग्वै मुञ्जा ऊर्जैवैनꣳ समर्धयति सुपर्णोऽसि गरुत्मानित्यवेक्षते रूपमेवास्यैतन्महिमानं व्याचष्टे दिवं गच्छ सुवः पतेत्याह सुवर्गमेवैनं लोकं गमयति ॥ ५। १। १०॥
रक्षाग्ंस्यौदुंबरी आदित्य उद्यत्य सं चतुर्विꣳशतिश्च ॥ ५। १। १०॥

५६ समिद्धो अञ्जन्कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः । वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥ घृतेनाञ्जन्थ्सं पथो देवयानान् प्रजानन्वाज्यप्येतु देवान् । अनु त्वा सप्ते प्रदिशः सचन्ताग् स्वधामस्मै यजमानाय धेहि ॥ ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते । अग्निष्ट्वा
५७ देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥ स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् । देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥ एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः । ऋष्वाः सतीः कवषः शुंभमाना द्वारो देवीः सुप्रायणा भवन्तु ॥ अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने । उषासा वाꣳ
५८ सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि ॥ प्रथमा वाꣳ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा । अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥ आदित्यैर्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न आवीत् । इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥ त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ।
५९ त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥
अश्वो घृतेन त्मन्या समक्त उप देवाꣳ ऋतुशः पाथ एतु । वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥
प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने । स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥ ५। १। ११॥
अग्निष्ट्वा वामश्वो द्वि चत्वारिꣳशच्च ॥ ५। १। ११॥
सावित्राणि व्यृद्धमुत्क्राम देवस्य खनति क्रूरं वारुणः सप्तभिरेकविꣳशत्या षड्भिर्न ह स्म समिद्धो अञ्जन्नेकादश ॥
सावित्राण्युत्क्राम क्रूरं वारुणः पशवः स्युर्न ह स्म नव पंचाशत् ॥
सावित्राणि हविरदन्तु देवाः ॥

## पञ्चमकाण्डे द्वितीयः प्रश्नः २

१ विष्णुमुखा वै देवाश्छन्दोभिरिमा३ꣳल्लोकाननप जय्यमभ्यजयन् यद्विष्णुक्रमान्क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमा३ꣳल्लोकाननपजय्यमभि जयति विष्णोः

क्रमोऽस्यभिमातिहेत्याह गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिशश्छन्दोभिरेवेमा३
यथापूर्वमभि जयति प्रजापतिरग्निमसृजत सोऽस्मात्सृष्टः
२ पराङैत्तमेतयान्वैदक्रन्ददिति तया वै सोऽग्नेः प्रियं धामावारुंध यदेतामन्वाहाग्नेरेवैतया
प्रियं धामाव रुंध ईश्वरो वा एष पराङ्प्रदघो यो विष्णुक्रमान्क्रमते चतसृभिरा वर्तते
चत्वारि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रियामेवास्य तनुवमभि
३ पर्यावर्तते दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद्दक्षिणोऽर्ध आत्मनो
वीर्यावत्तरोऽथो आदित्यस्यैवावृतमनु पर्यावर्तते शुनःशेपमाजीगर्तिं वरुणोऽगृह्णात्स एतां
वारुणीमपश्यत्तया वै स आत्मानं वरुणपाशादमुञ्चद्वरुणो वा एतं गृह्णाति य उखां
प्रतिमुञ्चत उदुत्तमं वरुणपाशमस्मदित्याहात्मानमेवैतया
४ वरुणपाशान्मुञ्चत्या त्वाहार्षमित्याहाह्येनꣳ हरति ध्रुवस्तिष्ठाविचाचलिरित्याह
प्रतिष्ठित्यै विशस्त्वा सर्वावाञ्छन्त्वित्याह विशैवैनꣳ समर्धयत्यस्मिन्राष्ट्रमधि श्रयेत्याह
राष्ट्रमेवास्मिन्ध्रुवमकर्यं कामयेत राष्ट्र२ꣳ स्यादिति तं मनसा ध्यायेद्राष्ट्रमेव भव
५ त्यग्रे बृहन्नुषसामूर्ध्वो अस्थादित्याहाग्रमेवैनꣳ समानानां करोति निर्जग्मिवान्तमस
इत्याह तम एवास्मादप हन्ति ज्योतिषागादित्याह ज्योतिरेवास्मिन्दधाति चतसृभिः
सादयति चत्वारि छन्दाꣳसि छन्दोभिरेवातिच्छंदसोत्तमया वर्ष्म वा एषा छंदसां
यदतिच्छन्दा वर्ष्मैवैनꣳ समानानां करोति सद्वती
६ भवति सत्त्वमेवैनं गमयति वाथ्सप्रेणोप तिष्ठत एतेन वै वथ्सप्रीर्भालन्दनोऽग्नेः प्रियं
धामावारुंधाग्नेरेवैतेन प्रियं धामाव रुंध एकादशं भवत्येकधैव यजमाने वीर्यं दधाति
स्तोमेन वै देवा अस्मि३ꣳल्लोक आर्ध्नुवञ्छन्दोभिरमुष्मिन्थ्स्तोमस्येव खलु वा एतद्रूपं
यद्वाथ्सप्रं यद्वाथ्सप्रेणोप तिष्ठत
७ इममेव तेन लोकमभि जयति यद्विष्णुक्रमान्क्रमतेऽमुमेव तैर्लोकमभि जयति पूर्वेद्युः
प्र क्रामत्युत्तरेद्युरुप तिष्ठते तस्माद्योगेऽन्यासां प्रजानां मनः, क्षेमेऽन्यासां तस्माद्यायावरः,
क्षेम्यस्येशे तस्माद्यायावरः, क्षेम्यमध्यवस्यति मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्यै
॥ ५। २। १॥ सृष्टो(१)भ्येतया भवति सद्वत्युप तिष्ठते द्विचत्वारिꣳशच्च ॥ ५। २। १॥
८ अन्नपतेऽन्नस्य नो देहीत्याहाग्निर्वा अन्नपतिः स एवास्मा अन्नं प्रयच्छत्यनमीवस्य
शुष्मिण इत्याहायक्ष्मस्येति वावैतदाह प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद
इत्याहाशिषमेवैतामा शास्त उदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः

९ प्राणैरेवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैनꣳ समर्धयति चतसृभिरा सादयति चत्वारि छन्दाꣳसि छन्दोभिरेवातिच्छंदसोत्तमया वर्ष्म वा एषा छंदसां यदतिच्छन्दा वर्ष्मैवैनꣳ समानानां करोति सद्वती भवति सत्त्वमेवैनं गमयति प्रेदग्ने ज्योतिष्मान्

१० याहीत्याह ज्योतिरेवास्मिन्दधाति तनुवा वा एष हिनस्ति यꣳ हिनस्ति मा हिꣳसीस्तनुवा प्रजा इत्याह प्रजाभ्य एवैनꣳ शमयति रक्षाꣳसि वा एतद्यज्ञꣳ सचन्ते यदन उथ्सर्जत्यक्रन्ददित्यन्वाह रक्षसामपहत्या अनसा वहन्त्यपचितिमेवास्मिन्दधाति तस्मादनस्वी च रथी चातिथीनामपचिततमा

११ वपचितिमान्भवति य एवं वेद समिधाग्निं दुवस्यतेति घृतानुषिक्तामवसिते समिधमा दधाति यथातिथय आगताय सर्पिष्वदातिथ्यं क्रियते तादृगेव तद्गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्योऽप्सु भस्म प्र वेशयत्यप्सुयोनिर्वा अग्निः स्वामेवैनं योनिं गमयति तिसृभिः प्र वेशयति त्रिवृद्वा

१२ अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति परा वा एषोऽग्निं वपति योऽप्सु भस्म प्रवेशयति ज्योतिष्मतीभ्यामव दधाति ज्योतिरेवास्मिन्दधाति द्वाभ्यां प्रतिष्ठित्यै परा वा एष प्रजां पशून्, वपति योऽप्सु भस्म प्रवेशयति पुनरूर्जा सह रय्येति पुनरुदैति प्रजामेव पशूनात्मन्धत्ते पुनस्त्वादित्या

१३ रुद्रा वसवः समिन्धतामित्याहैता वा एतं देवता अग्रे समैन्धत ताभिरेवैनꣳ समिन्धे बोधा स बोधीत्युप तिष्ठते बोधयत्येवैनं तस्माथ्सुप्त्वा प्रजाः प्र बुध्यन्ते यथास्थानमुप तिष्ठते तस्माद्यथास्थानं पशवः पुनरेत्योप तिष्ठन्ते ॥ ५। २। २॥ वै विश्वे देवा ज्योतिष्मानपचिततमौ त्रिवृद्वा आदित्या द्विचत्वारिꣳशच्च ॥ ५। २। २॥

१४ यावती वै पृथिवी तस्यै यम आधिपत्यं परीयाय यो वै यमं देवयजनमस्या अनिर्याच्याग्निं चिनुते यमायैनꣳ स चिनुतेऽपेतेत्यध्यवसाययति यममेव देवयजनमस्यै निर्याच्यात्मनेऽग्निं चिनुत इष्वग्रेण वा अस्या अनामृतमिच्छन्तो नाविन्दन्ते देवा एतद्यजुरपश्यन्नपेतेति यदेतेनाध्यवसाययत्य

१५ नामृत एवाग्निं चिनुत उद्धन्ति यदेवास्या अमेध्यं तदप हन्त्यपोऽवोक्षति शान्त्यै सिकतानि वपत्येतद्वा अग्नेर्वैश्वानरस्य रूपꣳ रूपेणैव वैश्वानरमव रुंध ऊषान्नि वपति पुष्टिर्वा एषा प्रजननं यदूषाः पुष्ट्यामेव प्रजननेऽग्निं चिनुतेऽथो संज्ञान एव संज्ञानग्ग्

ह्येतत्
१६ पशूनां यदूषा द्यावापृथिवी सहास्तां ते वियती अब्रूतामस्त्वेव नौ सह यज्ञियमिति यदमुष्या यज्ञियमासीत्तदस्यामदधात्त ऊषा अभवन् यदस्या यज्ञियमासीत्तदमुष्यामदधात्तददश्चन्द्रमसि कृष्णमूषान्निवपन्नदो ध्यायेद्द्यावापृथिव्योरेव यज्ञियेऽग्निं चिनुतेऽयꣳ सो अग्निरिति विश्वामित्रस्य
१७ सूक्तं भवत्येतेन वै विश्वामित्रोऽग्नेः प्रियं धामावारुंधाग्नेरेवैतेन प्रियं धामाव रुंधे छन्दोभिर्वै देवाः सुवर्ग३ꣳ लोकमायश्चतस्रः प्राचीरुप दधाति चत्वारि छन्दाꣳसि छन्दोभिरेव तद्यजमानः सुवर्ग३ꣳ लोकमेति तेषाꣳसुवर्ग३ꣳ लोकं यतां दिशः समव्लीयन्त ते द्वे पुरस्तात्समीची उपादधत
१८ द्वे पश्चात्समीची ताभिर्वै ते दिशोऽदृꣳहन् यद्वे पुरस्तात्समीची उपदधाति द्वे पश्चात्समीची दिशां विधृत्या अथो पशवो वै छन्दाꣳसि पशूनेवास्मै समीचो दधात्यष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तं चिनुतेऽष्टावुप दधात्यष्टाक्षरा गायत्री गायत्री सुवर्ग३ꣳ लोकमञ्जसा वेद सुवर्गस्य लोकस्य
१९ प्रज्ञात्यै त्रयोदश लोकं पृणा उप दधात्येकविꣳशतिः सं पद्यन्ते प्रतिष्ठा वा एकविꣳशः प्रतिष्ठा गार्हपत्य एकविꣳशस्यैव प्रतिष्ठां गार्हपत्यमनु प्रति तिष्ठति प्रत्यग्निं चिक्यानस्तिष्ठति य एवं वेद पञ्च चितीकं चिन्वीत प्रथमं चिन्वानः पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञमेव पशूनव रुंधे त्रि चितीकं चिन्वीत द्वितीयं चिन्वानस्त्रय इमे लोका एष्वेव लोकेषु
२० प्रति तिष्ठत्येक चितीकं चिन्वीत तृतीयं चिन्वान एकधा वै सुवर्गो लोक एकवृतैव सुवर्ग३ꣳ लोकमेति पुरीषेणाभ्यूहति तस्मान्माꣳसेनास्थि छन्नं न दुश्चर्मा भवति य एवं वेद पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठति ॥ ५। २। ३॥
अध्यवसाययति ह्येतद्विश्वामित्रस्याऽदधत द्वे लोकस्य लोकेषु सप्तचत्वारिꣳशच्च ॥ ५। २। ३॥
२१ वि वा एतौ द्विषाते यश्च पुराग्निर्यश्चोखायाꣳ समितमिति चतसृभिः सं नि वपति चत्वारि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनौ तनुवा सꣳ शास्ति समितमित्याह तस्माद्ब्रह्मणा क्षत्रꣳ समेति यत्सं न्युप्य वि हरति तस्माद्ब्रह्मणा क्षत्रं व्येत्यृतुभि

२२ वा एतं दीक्षयन्ति स ऋतुभिरेव विमुच्यो मातेव पुत्रं पृथिवी
पुरीष्यमित्याहर्तुभिरेवैनं दीक्षयित्वर्तुभिर्वि मुञ्चति वैश्वानर्या शिक्यमा दत्ते
स्वदयत्येवैनन्नैर्ऋतीः कृष्णास्तिस्रस्तुषपक्का भवन्ति निर्ऋत्यै वा एतद्भागधेयं यत्तुषा
निर्ऋत्यै रूपं कृष्णꣳ रूपेणैव निर्ऋतिं निरवदयत इमां दिशं यन्त्येषा
२३ वै निर्ऋत्यै दिक्स्वायामेव दिशि निर्ऋतिं निरवदयते स्वकृत इरिण उप दधाति
प्रदरे वैतद्वै निर्ऋत्या आयतनग्ग् स्व एवायतने निर्ऋतिं निरवदयते शिक्यमभ्युप दधाति
नैर्ऋतो वै पाशः साक्षादेवैनं निर्ऋतिपाशान्मुञ्चति तिस्र उप दधाति त्रेधाविहितो वै पुरुषो
यावानेव पुरुषस्तस्मान्निर्ऋतिमव यजते पराचीरुप
२४ दधाति पराचीमेवास्मान्निर्ऋतिं प्र णुदतेऽप्रतीक्षमा यन्ति निर्ऋत्या अन्तर्हित्यै
मार्जयित्वोप तिष्ठन्ते मेध्यत्वाय गार्हपत्यमुप तिष्ठन्ते निर्ऋतिलोक एव चरित्वा पूता
देवलोकमुपावर्तन्त एकयोप तिष्ठन्त एकधैव यजमाने वीर्यं दधति निवेशनः सङ्गमनो
वसूनामित्याह प्रजा वै पशवो वसु प्रजयैवैनं पशुभिः समर्धयन्ति ॥ ५। २। ४॥
ऋतुभिरेषा पराचीरुपाऽष्टा चत्वारिꣳशच्च ॥ ५। २। ४॥
२५ पुरुषमात्रेण वि मिमीते यज्ञेन वै पुरुषः संमितो यज्ञपरुषैवैनं वि मिमीते यावान्पुरुष
ऊर्ध्वबाहुस्तावान्भवत्येतावद्वै पुरुषे वीर्यं वीर्येणैवैनं वि मिमीते पक्षी भवति न ह्यपक्षः
पतितुमर्हत्यरत्निना पक्षौ द्राघीयाꣳसौ भवतस्तस्मात्पक्षप्रवयाꣳसि वयाꣳसि व्याममात्रौ
पक्षौ च पुच्छं च भवत्येतावद्वै पुरुषे वीर्यं
२६ वीर्यसंमितो वेणुना वि मिमीत आग्नेयो वै वेणुः सयोनित्वाय यजुषा युनक्ति
यजुषा कृषति व्यावृत्त्यै षड्गवेन कृषति षड्वा ऋतव ऋतुभिरेवैनं कृषति यद्द्वादश गवेन
संवथ्सरेणैवेयं वा अग्नेरति दाहादबिभेथ्सैतद् द्विगुणमपश्यत् कृष्टं चाकृष्टं च ततो वा
इमां नात्यदहद्यत्कृष्टं चाकृष्टं च
२७ भवत्यस्या अनतिदाहाय द्विगुणं त्वा अग्निमुद्यन्तुमर्हतीत्याहुर्यत्कृष्टं चाकृष्टं च
भवत्यग्नेरुद्यत्या एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च तान्, यत्प्राच उथ्सृजेद्रुद्रायापि
दध्याद्यद्दक्षिणा पितृभ्यो नि धुवेद्यत्प्रतीचो रक्षाꣳसि हन्युरुदीच उथ्सृजत्येषा वै
देवमनुष्याणाꣳ शान्ता दिक्
२८ तामेवैनाननूथ्सृजत्यथो खल्विमां दिशमुथ्सृजत्यसौ वा आदित्यः प्राणः
प्राणमेवैनाननूथ्सृजति दक्षिणा पर्यावर्तन्ते स्वमेव वीर्यमनु पर्यावर्तन्ते तस्माद्दक्षिणोऽर्ध

आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवावृतमनु पर्यावर्तन्ते तस्मात्पराञ्चः पशवो वि तिष्ठन्ते प्रत्यञ्च आ वर्तन्ते तिस्रस्तिस्रः सीताः
२९ कृषति त्रिवृतमेव यज्ञमुखे वि यातयत्योषधीर्वपति ब्रह्मणान्नमव रुंधेऽर्केऽर्कश्चीयते चतुर्दशभिर्वपति सप्त ग्राम्या ओषधयः सप्तारण्या उभयीषामवरुद्ध्या अन्नस्यान्नस्य वपत्यन्नस्यान्नस्यावरुद्ध्यै कृष्टे वपति कृष्टे ह्योषधयः प्रति तिष्ठन्त्यनु सीतं वपति प्रजात्यै द्वादशसु सीतासु वपति द्वादश मासाः संवथ्सरः संवथ्सरेणैवास्मा अन्नं पचति यदग्निचि
३० दनवरुद्धस्याश्नीयादवरुद्धेन व्यृध्येत ये वनस्पतीनां फलग्रहयस्तानिध्मेऽपि प्रोक्षेदनवरुद्धस्यावरुद्ध्यै दिग्भ्यो लोष्टान्थ्समस्यति दिशामेव वीर्यमवरुध्य दिशां वीर्येऽग्निं चिनुते यं द्विष्याद्यत्र स स्यात्तस्यै दिशो लोष्टमा हरेदिषमूर्जमहमित आ दद इतीषमेवोर्जं तस्यै दिशोऽव रुंधे क्षोधुको भवति यस्तस्यां दिशि भवत्युत्तरवेदिमुप वपत्युत्तरवेद्याग् ह्यग्निश्चीयतेऽथो पशवो वा उत्तरवेदिः पशूनेवाव रुंधेऽथो यज्ञपरुषोऽनन्तरित्यै ॥ ५। २। ५॥ च भवत्येतावद्वै पुरुषे वीर्यं यत्कृष्टं चाऽकृष्टं च दिख्सीता अग्नि चिदव पंच विꣳशतिश्च ॥ ५। २। ५॥
३१ अग्ने तव श्रवो वय इति सिकता नि वपत्येतद्वा अग्नेर्वैश्वानरस्य सूक्तꣳ सूक्तेनैव वैश्वानरमव रुंधे षड्भिर्नि वपति षड्वा ऋतवः संवथ्सरः संवथ्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुंधे समुद्रं वै नामैतच्छंदः समुद्रमनु प्रजाः प्र जायन्ते यदेतेन सिकतानि वपति प्रजानां प्रजननायेन्द्रो
३२ वृत्राय वज्रं प्राहरथ्स त्रेधा व्यभवत् स्फ्यस्तृतीयꣳ रथस्तृतीयं यूपस्तृतीयं येऽन्तः शरा अशीर्यन्त ताः शर्करा अभवन्तच्छर्कराणाꣳ शर्करत्वं वज्रो वै शर्कराः पशुरग्निर्यच्छर्कराभिरग्निं परि मिनोति वज्रेणैवास्मै पशून्परि गृह्णाति तस्माद्वज्रेण पशवः परि गृहीतास्तस्मात् स्थेयानस्थेयसो नोप हरते त्रि सप्ताभिः पशुकामस्य
३३ परि मिनुयाथ्सप्त वै शीर्षण्याः प्राणाः प्राणाः पशवः प्राणैरेवास्मै पशूनव रुंधे त्रिणवाभिर्भ्रातृव्यवतस्त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्या अपरिमिताभिः परि मिनुयादपरिमितस्यावरुद्ध्यै यं कामयेतापशुः स्यादित्यपरिमित्य तस्य शर्कराः सिकता व्यूहेदपरिगृहीत एवास्य विषूचीनꣳ रेतः परा सिञ्चत्यपशुरेव भवति
३४ यं कामयेत पशुमान्थ्स्यादिति परिमित्य तस्य शर्कराः सिकता व्यूहेत्परिगृहीत एवास्मै समीचीनꣳ रेतः सिञ्चति पशुमानेव भवति सौम्या व्यूहति सोमो वै रेतोधा रेत एव तद्दधाति गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि

राजन्यः शंयुं बार्हस्पत्यं मेधो नोपानमथ्सोऽग्निं प्राविश
३५ थ्सोऽग्नेः कृष्णो रूपं कृत्वोदायत सोऽश्वं प्राविशत् सोऽश्वस्यावान्तरशफोऽभवद्यदश्वमाक्रमयति
य एव मेधोऽश्वं प्राविशत्तमेवाव रुंधे प्रजापतिनाग्निश्चेतव्य इत्याहुः प्राजापत्योऽश्वो यदश्वमाक्रमयति प्रजापतिनैवाग्निं चिनुते पुष्करपर्णमुप दधाति योनिर्वा अग्नेः पुष्करपर्णꣳ सयोनिमेवाग्निं चिनुतेऽपां पृष्ठमसीत्युप दधात्यपां वा एतत्पृष्ठं यत्पुष्करपर्णꣳ रूपेणैवैनदुप दधाति ॥ ५। २। ६॥ इंद्रः पशुकामस्य भवत्यविशथ्सयोनिं विꣳशतिश्च
॥ ५। २। ६॥
३६ ब्रह्म जज्ञानमिति रुक्ममुप दधाति ब्रह्ममुखा वै प्रजापतिः प्रजा असृजत ब्रह्ममुखा एव तत्प्रजा यजमानः सृजते ब्रह्म जज्ञानमित्याह तस्माद्ब्राह्मणो मुख्यो मुख्यो भवति य एवं वेद ब्रह्मवादिनो वदन्ति न पृथिव्यां नांतरिक्षे न दिव्यग्निश्चेतव्य इति यत्पृथिव्यां चिन्वीत पृथिवीꣳ शुचार्पयेन्नौषधयो न वनस्पतयः
३७ प्र जायेरन् यदन्तरिक्षे चिन्वीतान्तरिक्षꣳ शुचार्पयेन्न वयाꣳसि प्र जायेरन् यद्दिवि चिन्वीत दिवꣳ शुचार्पयेन्न पर्जन्यो वर्षेद्रुक्ममुप दधात्यमृतं वै हिरण्यममृत एवाग्निं चिनुते प्रजात्यै हिरण्मयं पुरुषमुप दधाति यजमानलोकस्य विधृत्यै यदिष्टकाया आतृण्णमनूपदध्यात्पशूनां च यजमानस्य च प्राणमपि दध्याद्दक्षिणतः
३८ प्राञ्चमुप दधाति दाधार यजमानलोकं न पशूनां च यजमानस्य च प्राणमपि दधात्यथो खल्विष्टकाया आतृण्णमनूप दधाति प्राणानामुथ्सृष्ट्यै द्रप्सश्चस्कन्देत्यभि मृशति होत्रास्वेवैनं प्रतिष्ठापयति स्रुचावुप दधात्याज्यस्य पूर्णां कार्ष्मर्यमयीं दध्नः पूर्णामौदुंबरीमियं वै कार्ष्मर्यमय्यसावौदुंबरीमे एवोप धत्ते
३९ तूष्णीमुप दधाति न ही मे यजुषाप्तुमर्हति दक्षिणां कार्ष्मर्यमयीमुत्तरामौदुंबरीं तस्मादस्या असावुत्तराज्यस्य पूर्णां कार्ष्मर्यमयीं वज्रो वा आज्यं वज्रः कार्ष्मर्यो वज्रेणैव यज्ञस्य दक्षिणतो रक्षाग्स्यप हन्ति दध्नः पूर्णामौदुंबरीं पशवो वै दध्यूर्गुदुंबरः पशुष्वेवोर्जं दधाति पूर्णे उप दधाति पूर्णे एवैन
४० ममुष्मि३ꣳल्लोक उप तिष्ठेते विराज्यग्निश्चेतव्य इत्याहुः स्रुग्वै विराड्यथ्स्रुचावुप दधाति विराज्येवाग्निं चिनुते यज्ञमुखे यज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति यज्ञमुखꣳ रुक्मो यद्रुक्मं व्याघारयति यज्ञमुखादेव रक्षाग्स्यप हन्ति पञ्चभिर्व्याघारयति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्माद्रक्षाग्स्यप हन्त्यक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै ॥ ५। २। ७॥ वनस्पतयो दक्षिणतो

धत्त एनं तस्मादक्षणया पंच च ॥ ५। २। ७॥
४१ स्वयमातृण्णामुप दधातीयं वै स्वयमातृण्णेमामेवोप धत्तेऽश्वमुप घ्रापयति प्राणमेवास्यां
दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते प्रथमेष्टकोपधीयमाना पशूनां च
यजमानस्य च प्राणमपि दधाति स्वयमातृण्णा भवति प्राणानामुथ्सृष्ट्या अथो सुवर्गस्य
लोकस्यानुख्यात्या अग्नावग्निश्चेतव्य इत्याहुरेष वा
४२ अग्निर्वैश्वानरो यद्ब्राह्मणस्तस्मै प्रथमामिष्टकां यजुष्कृतां प्र यच्छेत्तां ब्राह्मणश्चोप
दध्यातामग्नावेव तदग्निं चिनुत ईश्वरो वा एष आर्तिमार्तोऱ्योऽविद्वानिष्टकामुप दधाति
त्रीन्, वरान्दद्यात्त्रयो वै प्राणाः प्राणानाग् स्तृत्यै द्वावेव देयौ द्वौ हि प्राणावेक एव देय
एको हि प्राणः पशु
४३ र्वा एष यदग्निर्न खलु वै पशव आयवसे रमन्ते दूर्वेष्टकामुप दधाति पशूनां धृत्यै
द्वाभ्यां प्रतिष्ठित्यै काण्डात्काण्डात्प्ररोहन्तीत्याह काण्डेन काण्डेन ह्येषा प्रतितिष्ठत्येवा
नो दूर्वे प्रतनु सहस्रेण शतेन चेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै देवलक्ष्मं वै
त्र्यालिखिता तामुत्तरलक्ष्माणं देवा उपादधताधरलक्ष्माणमसुरा यं
४४ कामयेत वसीयान्थ्स्यादित्युत्तरलक्ष्माणं तस्योप दध्याद्वसीयानेव भवति यं
कामयेत पापीयान्थ्स्यादित्यधरलक्ष्माणं तस्योप दध्यादसुरयोनिमेवैनमनु परा
भावयति पापीयान्भवति त्र्यालिखिता भवतीमे वै लोकास्त्र्यालिखितैभ्य एव लोकेभ्यो
भ्रातृव्यमन्तरेत्यंगिरसः सुवर्ग३ँ लोकं यतः पुरोडाशः कूर्मो भूत्वानु प्रासर्प
४५ द्यत्कूर्ममुपदधाति यथा क्षेत्रविदञ्जसा नयत्येवमेवैनं कूर्मः सुवर्गं लोकमञ्जसा नयति
मेधो वा एष पशूनां यत्कूर्मो यत्कूर्ममुपदधाति स्वमेव मेधं पश्यन्तः पशव उप तिष्ठन्ते
श्मशानं वा एतत्क्रियते यन्मृतानां पशूनाँ शीर्षाण्युपधीयन्ते यज्जीवन्तं कूर्ममुपदधाति
तेनाश्मशानचिद्वास्तव्यो वा एष यत्
४६ कूर्मो मधु वाता ऋतायत इति दध्नामधुमिश्रेणाभ्यनक्ति स्वदयत्येवैनं ग्राम्यं वा
एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेणाभ्यनक्त्युभयस्यावरुद्ध्यै मही द्यौः पृथिवी च
न इत्याहाभ्यामेवैनमुभयतः परि गृह्णाति प्राञ्चमुप दधाति सुवर्गस्य लोकस्य समष्ट्यै
पुरस्तात्प्रत्यञ्चमुप दधाति तस्मात्
४७ पुरस्तात्प्रत्यञ्चः पशवो मेधमुप तिष्ठन्ते यो वा अपनाभिमग्निं चिनुते यजमानस्य
नाभिमनु प्र विशति स एनमीश्वरो हिँसितोरुलूखलमुप दधात्येषा वा अग्नेर्नाभिः

सनाभिमेवाग्निं चिनुते हिꣳसाया औदुंबरं भवत्यूर्ग्वा उदुंबर ऊर्जमेवाव रुंधे मध्यत
उप दधाति मध्यत एवास्मा ऊर्जं दधाति तस्मान्मध्यत ऊर्जा भुञ्जत इयद्भवति
प्रजापतिना यज्ञमुखेन संमितमव हन्त्यन्नमेवाकर्वैष्णव्यर्चोप दधाति विष्णुर्वै यज्ञो
वैष्णवा वनस्पतयो यज्ञ एव यज्ञं प्रतिष्ठापयति ॥ ५। २। ८॥ एष वै पशुर्यमसर्पदेष
यत्तस्मात्तस्माथ्सप्तविꣳशतिश्च ॥ ५। २। ८॥
४८ एषां वा एतल्लोकानां ज्योतिः संभृतं यदुखा यदुखामुपदधात्येभ्य एव लोकेभ्यो
ज्योतिरव रुंधे मध्यत उप दधाति मध्यत एवास्मै ज्योतिर्दधाति तस्मान्मध्यतो
ज्योतिरुपास्महे सिकताभिः पूरयत्येतद्वा अग्नेर्वैश्वानरस्य रूपꣳ रूपेणैव वैश्वानरमव
रुंधे यं कामयेत क्षोधुकः स्यादित्यूनां तस्योप
४९ दध्यात्क्षोधुक एव भवति यं कामयेतानुपदस्यदन्नमद्यादिति पूर्णां तस्योप
दध्यादनुपदस्यदेवान्नमत्ति सहस्रं वै प्रति पुरुषः पशूनां यच्छति सहस्रमन्ये पशवो
मध्ये पुरुषशीर्षमुप दधाति सवीर्यत्वायोखायामपि दधाति प्रतिष्ठामेवैनद्गमयति व्यृद्धं
वा एतत्प्राणैरमेध्यं यत्पुरुषशीर्षममृतं खलु वै प्राणा
५० अमृतꣳ हिरण्यं प्राणेषु हिरण्यशल्कान्प्रत्यस्यति प्रतिष्ठामेवैनद्गमयित्वा प्राणैः
समर्धयति दध्ना मधुमिश्रेण पूरयति मधव्योऽसानीति शृतातङ्क्येन मेध्यत्वाय ग्राम्यं वा
एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेण पूरयत्युभयस्यावरुद्ध्यै पशुशीर्षाण्युप दधाति
पशवो वै पशुशीर्षाणि पशूनेवाव रुंधे यं कामयेतापशुः स्यादिति
५१ विषूचीनानि तस्योप दध्याद्विषूच एवास्मात्पशून्दधात्यपशुरेव भवति यं कामयेत
पशुमान्थ्स्यादिति समीचीनानि तस्योप दध्याथ्समीच एवास्मै पशून्दधाति पशुमानेव
भवति पुरस्तात्प्रतीचीनमश्वस्योप दधाति पश्चात्प्राचीनमृषभस्यापशवो वा अन्ये गो
अश्वेभ्यः पशवो गो अश्वानेवास्मै समीचो दधात्येतावन्तो वै पशवो
५२ द्विपादश्च चतुष्पादश्च तान्, वा एतदग्नौ प्र दधाति यत्पशुशीर्षाण्युपदधात्यमुमारण्यमनु
ते दिशामीत्याह ग्राम्येभ्य एव पशुभ्य आरण्यान्पशूञ्छुचमनूथ्सृजति तस्माथ्समावत्पशूनां
प्रजायमानानामारण्याः पशवः कनीयाꣳसः शुचा ह्यृताः सर्पशीर्षमुप दधाति यैव सर्पे
त्विषिस्तामेवाव रुंधे
५३ यथ्समीचीनं पशुशीर्षैरुप दध्याद्ग्राम्यान्पशून्दꣳशुकाः स्युर्यद्विषूचीनमारण्यान्,
यजुरेव वदेदव तान्त्विषिꣳ रुंधे या सर्पे न ग्राम्यान्पशून् हिनस्ति नारण्यानथो

खलूपधेयमेव यदुपदधाति तेन तां त्विषिमव रुंधे या सर्पे यद्यजुर्वदति तेन शान्तम् ॥ ५। २। ९॥ ऊनान्तस्योप प्राणाः स्यादिति वै पशवो रुंधे चतुश्चत्वारिꣳशच्च ॥ ५। २। ९॥
५४ पशुर्वा एष यदग्निर्योनिः खलु वा एषा पशोर्वि क्रियते यत्प्राचीनमैष्टकाद्यजुः क्रियते रेतोऽपस्या अपस्या उप दधाति योनावेव रेतो दधाति पञ्चोप दधाति पाङ्क्ताः पशवः पशूनेवास्मै प्र जनयति पञ्च दक्षिणतो वज्रो वा अपस्या वज्रेणैव यज्ञस्य दक्षिणतो रक्षाग्स्यप हन्ति पञ्च पश्चात्
५५ प्राचीरुप दधाति पश्चाद्वै प्राचीनꣳ रेतो धीयते पश्चादेवास्मै प्राचीनꣳ रेतो दधाति पञ्च पुरस्तात्प्रतीचीरुप दधाति पञ्च पश्चात्प्राचीस्तस्मात्प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते पञ्चोत्तरतश्छंदस्याः पशवो वै छंदस्याः पशूनेव प्रजातान्थ्स्वमायतनमभि पर्यूहत इयं वा अग्नेरतिदाहादबिभेथ्सैता
५६ अपस्या अपश्यत्ता उपाधत्त ततो वा इमां नात्यदहद्यदपस्या उपदधात्यस्या अनतिदाहायोवाच हेयमददिथ्स ब्रह्मणान्नं यस्यैता उपधीयान्तै य उ चैना एवं वेददिति प्राणभृत उप दधाति रेतस्येव प्राणान्दधाति तस्माद्वदन् प्राणन् पश्यञ्छृण्वन् पशुर्जायतेऽयं पुरो
५७ भुव इति पुरस्तादुप दधाति प्राणमेवैताभिर्दाधारायं दक्षिणा विश्वकर्मेति दक्षिणतो मन एवैताभिर्दाधारायं पश्चाद्विश्वव्यचा इति पश्चाच्चक्षुरेवैताभिर्दाधारेदमुत्तराथ् सुवरित्युत्तरतः श्रोत्रमेवैताभिर्दाधारेयमुपरि मतिरित्युपरिष्टाद्वाचमेवैताभिर्दाधार दश दशोप दधाति सवीर्यत्वायाक्ष्णयो
५८ ऽप दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै याः प्राचीस्ताभिर्वसिष्ठ आर्ध्नोद्या दक्षिणा ताभिर्भरद्वाजो याः प्रतीचीस्ताभिर्विश्वामित्रो या उदीचीस्ताभिर्जमदग्निर्या ऊर्ध्वास्ताभिर्विश्वकर्मा य एवमेतासामृद्धिं वेदर्ध्नोत्येव य आसामेवं बन्धुतां वेद बन्धुमान्भवति य आसामेवं क्लृप्तं वेद कल्पते
५९ ऽस्मै य आसामेवमायतनं वेदायतनवान्भवति य आसामेवं प्रतिष्ठां वेद प्रत्येव तिष्ठति प्राणभृत उपधाय संयत उप दधाति प्राणानेवास्मिन्धित्वा संयद्भिः सं यच्छति तथ्संयताꣳ संयत्त्वमथो प्राण एवापानं दधाति तस्मात्प्राणापानौ सं चरतो विषूचीरुप दधाति तस्माद्विष्वञ्चौ प्राणापानौ यद्वा अग्नेरसंयत
६० मसुवर्ग्यमस्य तथ्सुवर्ग्योऽग्निर्यथ्संयत उप दधाति समेवैनं यच्छति

सुवर्ग्यमेवाकस्त्र्यविर्वयः कृतमयानामित्याह वयोभिरेवायानव रुंधेऽयैर्वयाꣳसि सर्वतो वायुमतीर्भवन्ति तस्मादयꣳ सर्वतः पवते ॥ ५। २। १०॥ पश्चादेताः पुरोऽक्ष्णया कल्पतेऽसंयतं पंच त्रिꣳशच्च ॥ ५। २। १०॥

६१ गायत्री त्रिष्टुब्जगत्यनुष्टुक्पङ्क्त्या सह । बृहत्युष्णिहा ककुथ्सूचीभिः शिम्यन्तु त्वा ॥ द्विपदा या चतुष्पदा त्रिपदा या च षट्पदा । सछन्दा या च विच्छन्दाः सूचीभिः शिम्यन्तु त्वा ॥ महानाम्नी रेवतयो विश्वा आशाः प्रसूवरीः । मेघ्या विद्युतो वाचः सूचीभिः शिम्यन्तु त्वा ॥ रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः । अश्वस्य वाजिनस्त्वचि सूचीभिः शिम्यन्तु त्वा ॥ नारी

६२ स्ते पत्नयो लोम वि चिन्वन्तु मनीषया । देवानां पत्नीर्दिशः सूचीभिः शिम्यन्तु त्वा ॥ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥ ५। २। ११॥ नारीस्त्रिꣳशच्च ॥ ५। २। ११॥

६३ कस्त्वा छ्यति कस्त्वा वि शास्ति कस्ते गात्राणि शिम्यति । क उ ते शमिता कविः ॥ ऋतवस्त ऋतुधा परुः शमितारो वि शासतु । संवथ्सरस्य धायसा शिमीभिः शिम्यन्तु त्वा ॥ दैव्या अध्वर्यवस्त्वा छ्यन्तु वि च शासतु । गात्राणि पर्वशस्ते शिमाः कृण्वन्तु शिम्यन्तः ॥ अर्धमासाः परूꣳषि ते मासाश्छ्यन्तु शिम्यन्तः । अहोरात्राणि मरुतो विलिष्टꣳ

६४ सूदयन्तु ते ॥ पृथिवी तेऽन्तरिक्षेण वायुश्छिद्रं भिषज्यतु । द्यौस्ते नक्षत्रैः सह रूपं कृणोतु साधुया ॥ शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः । शमस्थभ्यो मज्जभ्यः शमु ते तनुवे भुवत् ॥ ५। २। १२॥ विलिष्टं त्रिꣳशच्च ॥ ५। २। १२॥

विष्णुमुखा अन्नपते यावती वि वै पुरुषमात्रेणाग्ने तव श्रवो वयो ब्रह्म जज्ञानग्ग् स्वयमातृण्णामेषां वै पशुर्गायत्री कस्त्वा द्वादश ॥

विष्णुमुखा अपचितिमान्वि वा एतावग्ने तव स्वयमातृण्णां विषूचीनानि गायत्री चतुष्षष्टिः ॥

विष्णुमुखास्तनुवे भुवत् ॥

## पञ्चमकाण्डे तृतीयः प्रश्नः ३

१ उथ्सन्नयज्ञो वा एष यदग्निः किं वाहैतस्य क्रियते किं वा न यद्वै यज्ञस्य क्रियमाणस्यान्तर्यन्ति पूयति वा अस्य तदाश्विनीरुप दधात्यश्विनौ वै देवानां भिषजौ

ताभ्यामेवास्मै भेषजं करोति पञ्चोप दधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्मै भेषजं करोत्यृतव्या उप दधात्यृतूनां क्लृप्त्यै
२ पञ्चोप दधाति पञ्च वा ऋतवो यावन्त एवर्तवस्तान्कल्पयति समानप्रभृतयो भवन्ति समानोदर्कास्तस्माथ्समाना ऋतव एकेन पदेन व्यावर्तन्ते तस्मादृतवो व्यावर्तन्ते प्राणभृत उप दधात्यृतुष्वेव प्राणान्दधाति तस्माथ्समानाः सन्त ऋतवो न जीर्यन्त्यथो प्र जनयत्येवैनानेष वै वायुर्यत्प्राणो यदृतव्या उपधाय प्राणभृत
३ उपदधाति तस्माथ्सर्वानृतूननु वायुरा वरीवर्ति वृष्टिसनीरुप दधाति वृष्टिमेवाव रुंधे यदेकधोपदध्यादेकमृतुं वर्षेदनुपरिहारꣳ सादयति तस्माथ्सर्वानृतून्, वर्षति यत्प्राणभृत उपधाय वृष्टिसनीरुपदधाति तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते पशवो वै वयस्या नानामनसः खलु वै पशवो नाना व्रतास्तेऽप एवाभि समनसो
४ यं कामयेतापशुः स्यादिति वयस्यास्तस्योपधायापस्या उप दध्यादसंज्ञानमेवास्मै पशुभिः करोत्यपशुरेव भवति यं कामयेत पशुमान्थ्स्यादित्यपस्यास्तस्योपधाय वयस्या उप दध्याथ्सं ज्ञानमेवास्मै पशुभिः करोति पशुमानेव भवति चतस्रः पुरस्तादुप दधाति तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे
५ मूर्धन्वतीर्भवन्ति तस्मात्पुरस्तान्मूर्धा पञ्च दक्षिणायाग् श्रोण्यामुप दधाति पञ्चोत्तरस्यां तस्मात्पश्चाद्वर्षीयान्पुरस्तात्प्रवणः पशुर्बस्तो वय इति दक्षिणेऽꣳस उप दधाति वृष्णिर्वय इत्युत्तरेऽꣳसावेव प्रति दधाति व्याघ्रो वय इति दक्षिणे पक्ष उप दधाति सिꣳहो वय इत्युत्तरे पक्षयोरेव वीर्यं दधाति पुरुषो वय इति मध्ये तस्मात्पुरुषः पशूनामधिपतिः ॥
५। ३। १॥ क्लृप्त्या उपधाय प्राणभृतः समनसः कृष्णे पुरुषो वय इति पंच च ॥
५। ३। १॥
६ इन्द्राग्नी अव्यथमानामिति स्वयमातृण्णामुप दधातीन्द्राग्निभ्यां वा इमौ लोकौ विधृतावनयोर्लोकयोर्विधृत्या अधृतेव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषेन्द्राग्नी इत्याहेन्द्राग्नी वै देवानामोजोभृतावोजसैवैनामन्तरिक्षे चिनुते धृत्यै स्वयमातृण्णामुप दधात्यन्तरिक्षं वै स्वयमातृण्णान्तरिक्षमेवोप धत्तेऽश्वमुप
७ घ्रापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते स्वयमातृण्णा भवति प्राणानामुथ्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्यै देवानां वै सुवर्गं लोकं यतां दिशः समव्लीयन्त त एता दिश्या अपश्यन्ता उपादधत ताभिर्वै ते दिशोऽदृꣳहन् यद्दिश्या उपदधाति दिशां विधृत्यै दश प्राणभृतः पुरस्तादुप

८ दधाति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव पुरस्ताद्धत्ते तस्मात्पुरस्तात्प्राणा
ज्योतिष्मतीमुत्तमामुप दधाति तस्मात्प्राणानां वाग्ज्योतिरुत्तमा दशोप दधाति दशाक्षरा
विराड्विराड्छंदसां ज्योतिर्ज्योतिरेव पुरस्ताद्धत्ते तस्मात्पुरस्ताज्ज्योतिरुपास्महे छन्दाꣳसि
पशुष्वाजिमयुस्तान् बृहत्युदजयत् तस्माद्बार्हताः
९ पशव उच्यन्ते मा छंद इति दक्षिणत उप दधाति तस्माद्दक्षिणावृतो मासाः पृथिवी
छंद इति पश्चात्प्रतिष्ठित्या अग्निर्देवतेत्युत्तरत ओजो वा अग्निरोज एवोत्तरतो धत्ते
तस्मादुत्तरतोऽभिप्रयायी जयति षड्विꣳशथ्सं पद्यन्ते षड्विꣳशदक्षरा बृहती बार्हताः पशवो
बृहत्यैवास्मै पशूनव रुंधे बृहती छंदसाग् स्वाराज्यं परीयाय यस्यैता
१० उपधीयन्ते गच्छति स्वाराज्यꣳ सप्त वालखिल्याः पुरस्तादुप दधाति सप्त पश्चाथ्सप्त
वै शीर्षण्याः प्राणा द्वाववाञ्चौ प्राणानाꣳसवीर्यत्वाय मूर्धासि राडिति पुरस्तादुप दधाति
यन्त्री राडिति पश्चात्प्राणानेवास्मै समीचो दधाति ॥ ५। ३। २॥ अश्वमुप पुरस्तादुप
बार्हता एताश्चतुस्त्रिꣳशच्च ॥ ५। ३। २॥
११ देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता अक्ष्णयास्तोमीया
अपश्यन्ता अन्यथानूच्यान्यथोपादधत तदसुरा नान्ववायन्ततो देवा अभवन्परासुरा
यदक्ष्णयास्तोमीया अन्यथानूच्यान्यथोपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य
भ्रातृव्यो भवत्याशुस्त्रिवृदिति पुरस्तादुप दधाति यज्ञमुखं वै त्रिवृ
१२ द्यज्ञमुखमेव पुरस्ताद्वि यातयति व्योम सप्तदश इति दक्षिणतोऽन्नं वै व्योमान्नꣳ
सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते धरुण एकविꣳश इति पश्चात्प्रतिष्ठा
वा एकविꣳशः प्रतिष्ठित्यै भान्तः पञ्चदश इत्युत्तरत ओजो वै भान्त ओजः पञ्चदश
ओज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति प्रतूर्तिरष्टादश इति पुरस्ता
१३ दुप दधाति द्वौ त्रिवृतावभिपूर्वं यज्ञमुखे वि यातयत्यभिवर्तः सविꣳश इति
दक्षिणतोऽन्नं वा अभिवर्तोऽन्नꣳ सविꣳशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते
वर्चो द्वाविꣳश इति पश्चाद्यद्विꣳशतिर्द्वे तेन विराजौ यद्द्वे प्रतिष्ठा तेन
विराजोरेवाभिपूर्वमन्नाद्ये प्रति तिष्ठति तपो नवदश इत्युत्तरतस्तस्माथ्सव्यो
१४ हस्तयोस्तपस्वितरो योनिश्चतुर्विꣳश इति पुरस्तादुप दधाति चतुर्विꣳशत्यक्षरा
गायत्री गायत्री यज्ञमुखं यज्ञमुखमेव पुरस्ताद्वि यातयति गर्भाः पञ्चविꣳश इति
दक्षिणतोऽन्नं वै गर्भा अन्नं पञ्चविꣳशोन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यत

ओजस्त्रिणव इति पश्चादिमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठति सं
भरणस्त्रयोविꣳश इ
१५ त्युत्तरतस्तस्माथ्सव्यो हस्तयोः सं भार्यतरः क्रतुरेकत्रिꣳश इति पुरस्तादुप दधाति
वाग्वै क्रतुर्यज्ञमुखं वाग्यज्ञमुखमेव पुरस्ताद्वि यातयति ब्रध्नस्य विष्टपं चतुस्त्रिꣳश इति
दक्षिणतोऽसौ वा आदित्यो ब्रध्नस्य विष्टपं ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो
ब्रह्मवर्चसितरः प्रतिष्ठा त्रयस्त्रिꣳश इति पश्चात्प्रतिष्ठित्यै नाकः षट्त्रिꣳश इत्युत्तरतः
सुवर्गो वै लोको नाकः सुवर्गस्य लोकस्य समष्ट्यै ॥ ५। ३। ३॥ वै त्रिवृदिति
पुरस्ताथ्सव्यस्त्रयोविꣳश इति सुवर्गो वै पंच च ॥ ५। ३। ३॥ आशुर्व्योम धरुणो भान्तः
प्रतूर्तिरभिवर्तो वर्चस्तपो योनिर्गर्भा ओजस्संभरणः क्रतुर्ब्रध्नस्य प्रतिष्ठा नाकष्षोडश ॥
१६ अग्नेर्भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वा अग्निर्यज्ञमुखं दीक्षा यज्ञमुखं
ब्रह्म यज्ञमुखं त्रिवृद्यज्ञमुखमेव पुरस्ताद्वि यातयति नृचक्षसां भागोऽसीति दक्षिणतः
शुश्रुवाꣳसो वै नृचक्षसोऽन्नं धाता जातायैवास्मा अन्नमपि दधाति तस्माज्जातोऽन्नमत्ति
जनित्रग्ग् स्पृतꣳ सप्तदशः स्तोम इत्याहान्नं वै जनित्र
१७ मन्नꣳ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते मित्रस्य भागोऽसीति
पश्चात्प्राणो वै मित्रोऽपानो वरुणः प्राणापानावेवास्मिन्दधाति दिवो वृष्टिर्वाताः स्पृता
एकविꣳशः स्तोम इत्याह प्रतिष्ठा वा एकविꣳशः प्रतिष्ठित्या इन्द्रस्य भागोऽसीत्युत्तरत
ओजो वा इन्द्र ओजो विष्णुरोजः, क्षत्रमोजः पञ्चदश
१८ ओज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति वसूनां भागोऽसीति पुरस्तादुप
दधाति यज्ञमुखं वै वसवो यज्ञमुखꣳ रुद्रा यज्ञमुखं चतुर्विꣳशो यज्ञमुखमेव पुरस्ताद्वि
यातयत्यादित्यानां भागोऽसीति दक्षिणतोऽन्नं वा आदित्या अन्नं मरुतोऽन्नं गर्भा अन्नं
पञ्चविꣳशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यतेऽदित्यै भागो
१९ ऽसीति पश्चात्प्रतिष्ठा वा अदितिः प्रतिष्ठा पूषा प्रतिष्ठा त्रिणवः प्रतिष्ठित्यै
देवस्य सवितुर्भागोऽसीत्युत्तरतो ब्रह्म वै देवः सविता ब्रह्म बृहस्पतिर्ब्रह्म चतुष्टोमो
ब्रह्मवर्चसमेवोत्तरतो धत्ते तस्मादुत्तरोऽर्धो ब्रह्मवर्चसितरः सावित्रवती भवति प्रसूत्यै
तस्माद्ब्राह्मणानामुदीची सनिः प्रसूता धर्त्रश्चतुष्टोम इति पुरस्तादुप दधाति यज्ञमुखं वै
धर्त्रो
२० यज्ञमुखं चतुष्टोमो यज्ञमुखमेव पुरस्ताद्वि यातयति यावानां भागोऽसीति दक्षिणतो

मासा वै यावा अर्धमासा अयावास्तस्माद्दक्षिणावृतो मासा अन्नं वै यावा अन्नं प्रजा अन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यत ऋभूणां भागोऽसीति पश्चात्प्रतिष्ठित्यै विवर्तोऽष्टाचत्वारिꣳश इत्युत्तरतोऽनयोर्लोकयोः सवीर्यत्वाय तस्मादिमौ लोकौ समावद्वीर्यौ

२१ यस्य मुख्यवतीः पुरस्तादुपधीयन्ते मुख्य एव भवत्यास्य मुख्यो जायते यस्यान्नवतीर्दक्षिणतोऽत्त्यन्नमास्यान्नादो जायते यस्य प्रतिष्ठावतीः पश्चात्प्रत्येव तिष्ठति यस्यौजस्वतीरुत्तरत ओजस्व्येव भवत्यास्यौजस्वी जायतेऽर्को वा एष यदग्निस्तस्यैतदेव स्तोत्रमेतच्छस्त्रं यदेषा विधा

२२ विधीयतेऽर्क एव तदर्क्यमनु वि धीयतेऽत्त्यन्नमास्यान्नादो जायते यस्यैषा विधा विधीयते य उ चैनामेवं वेद सृष्टीरुप दधाति यथासृष्टमेवाव रुंधे न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा एता व्युष्टीरपश्यन्ता उपादधत ततो वा इदं व्यौच्छद्यस्यैता उपधीयन्ते व्येवास्मा उच्छत्यथो तम एवाप हते ॥ ५। ३। ४॥

वै जनित्रं पंचदशोदित्यै भागो वै धर्त्रः समावद्वीर्यौ विधा ततो वा इदं चतुर्दश च ॥ ५। ३। ४॥ अग्नेर्नृचक्षसां जनित्रं मित्रस्येंद्रस्य वसूनामादित्यानामदित्यै देवस्य सवितुः सावित्रवती धर्त्रो यावानामृभूणां विवर्तश्चतुर्दश ॥

२३ अग्ने जातान् प्रणुदा नः सपत्नानिति पुरस्तादुप दधाति जातानेव भ्रातृव्यान् प्र णुदते सहसा जातानिति पश्चाज्जनिष्यमाणानेव प्रति नुदते चतुश्चत्वारिꣳशः स्तोम इति दक्षिणतो ब्रह्मवर्चसं वै चतुश्चत्वारिꣳशो ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः षोडश स्तोम इत्युत्तरत ओजो वै षोडश ओज एवोत्तरतो धत्ते तस्मा

२४ दुत्तरतोऽभिप्रयायी जयति वज्रो वै चतुश्चत्वारिꣳशो वज्रः षोडशो यदेते इष्टके उप दधाति जाताꣳश्चैव जनिष्यमाणाꣳश्च भ्रातृव्यान्प्रणुद्य वज्रमनु प्र हरति स्तृत्यै पुरीषवतीं मध्य उप दधाति पुरीषं वै मध्यमात्मनः सात्मानमेवाग्निं चिनुते सात्मामुष्मि३ꣳल्लोके भवति य एवं वेदैता वा असपत्ना नामेष्टका यस्यैता उपधीयन्ते

२५ नास्य सपत्नो भवति पशुर्वा एष यदग्निर्विराज उत्तमायां चित्यामुप दधाति विराजमेवोत्तमां पशुषु दधाति तस्मात्पशुमानुत्तमां वाचं वदति दशदशोप दधाति सवीर्यत्वायाक्ष्णयोप दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यानि वै छन्दाꣳसि सुवर्ग्याण्यासन्तैर्देवाः सुवर्गं लोकमायन्तेनर्षयो

२६ ऽश्राम्यन्ते तपोऽतप्यन्त तानि तपसापश्यन्तेभ्य एता इष्टका निरमिमतेवश्छन्दो वरिवश्छंद इति ता उपादधत ताभिर्वै ते सुवर्गं लोकमायन् यदेता इष्टका उपदधाति यान्येव छन्दाꣳसि सुवर्ग्याणि तैरेव यजमानः सुवर्गं लोकमेति यज्ञेन वै प्रजापतिः प्रजा असृजत ताः स्तोमभागैरेवासृजत यथ्

२७ स्तोमभागा उपदधाति प्रजा एव तद्यजमानः सृजते बृहस्पतिर्वा एतद्यज्ञस्य तेजः समभरद्यथ्स्तोमभागा यथ्स्तोमभागा उपदधाति सतेजसमेवाग्निं चिनुते बृहस्पतिर्वा एतां यज्ञस्य प्रतिष्ठामपश्यद्यथ्स्तोमभागा यथ्स्तोमभागा उपदधाति यज्ञस्य प्रतिष्ठित्यै सप्तसप्तोप दधाति सवीर्यत्वाय तिस्रो मध्ये प्रतिष्ठित्यै ॥ ५। ३। ५॥ उत्तरतो धत्ते तस्मादुपधीयन्त ऋषयोऽसृजत यत्रिचत्वारिꣳशच्च ॥ ५। ३। ५॥

२८ रश्मिरित्येवादित्यमसृजत प्रेतिरिति धर्ममन्वितिरिति दिवꣳ सन्धिरित्यन्तरिक्षं प्रतिधिरिति पृथिवीं विष्टंभ इति वृष्टिं प्रवेत्यहरनुवेति रात्रिमुशिगिति वसून्प्रकेत इति रुद्रान्थ्सुदीतिरित्यादित्यानोज इति पितृग् स्तन्तुरिति प्रजाः पृतनाषाडिति पशून्रेवदित्योषधीरभिजिदसि युक्तग्रावे

२९ न्द्राय त्वेन्द्रं जिन्वेत्येव दक्षिणतो वज्रं पर्यौहदभिजित्यै ताः प्रजा अपप्राणा असृजत तास्वधिपतिरसीत्येव प्राणमदधाद्यन्तेत्यपानꣳ स ꣳ सर्प इति चक्षुर्वयोधा इति श्रोत्रं ताः प्रजाः प्राणतीरपानतीः पश्यन्तीः शृण्वतीर्न मिथुनी अभवन्तासु त्रिवृदसीत्येव मिथुनमदधात्ताः प्रजा मिथुनी

३० भवन्तीर्न प्राजायन्त ताः सꣳरोहोऽसि नी रोहोऽसीत्येव प्राजनयत्ताः प्रजाः प्रजाता न प्रत्यतिष्ठन्ता वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीत्येवैषु लोकेषु प्रत्यस्थापयद्यदाह वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीति प्रजा एव प्रजाता एषु लोकेषु प्रति ष्ठापयति सात्मान्तरिक्षꣳ रोहति सप्राणोऽमुष्मि३ꣳल्लोके प्रति तिष्ठत्यव्यर्धुकः प्राणापानाभ्यां भवति य एवं वेद ॥ ५। ३। ६॥ युक्तग्रावा प्रजा मिथुन्यंतरिक्षं द्वादश च ॥ ५। ३। ६॥

३१ नाकसद्भिर्वै देवाः सुवर्गं लोकमायन्तन्नाकसदां नाकसत्त्वं यन्नाकसद उपदधाति नाकसद्भिरेव तद्यजमानः सुवर्गं लोकमेति सुवर्गो वै लोको नाको यस्यैता उपधीयन्ते नास्मा अकं भवति यजमानायतनं वै नाकसदो यन्नाकसद उपदधात्यायतनमेव तद्यजमानः कुरुते पृष्ठानां वा एतत्तेजः संभृतं यन्नाकसदो यन्नाकसद

३२ उपदधाति पृष्ठानामेव तेजोऽव रुंधे पञ्चचोडा उप दधात्यप्सरस एवैनमेता भूता

अमुष्मिं३ꣳ ल्लोक उप शेरेऽथो तनूपानीरेवैता यजमानस्य यं द्विष्यात्तमुपदधद्ध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्च्छत्युत्तरा नाकसद्भ्य उप दधाति यथा जायामानीय गृहेषु निषादयति तादृगेव तत्

३३ पश्चात्प्राचीमुत्तमामुप दधाति तस्मात्पश्चात्प्राची पत्न्यन्वास्ते स्वयमातृण्णां च विकर्णीं चोत्तमे उप दधाति प्राणो वै स्वयमातृण्णायुर्विकर्णी प्राणं चैवायुश्च प्राणानामुत्तमौ धत्ते तस्मात्प्राणश्चायुश्च प्राणानामुत्तमौ नान्यामुत्तरामिष्टकामुप दध्याद्यदन्यामुत्तरामिष्टकामुपदध्यात्पशूनां

३४ च यजमानस्य च प्राणं चायुश्चापि दध्यात्तस्मान्नान्योत्तरेष्टकोपधेया स्वयमातृण्णामुप दधात्यसौ वै स्वयमातृण्णामूमेवोप धत्तेऽश्वमुप घ्रापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते स्वयमातृण्णा भवति प्राणानामुथ्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्या एषा वै देवानां विक्रान्तिर्यद्विकर्णी यद्विकर्णीमुपदधाति देवानामेव विक्रान्तिमनु वि क्रमत उत्तरत उप दधाति तस्मादुत्तरत उपचारोऽग्निर्वायुमती भवति समिद्ध्यै ॥ ५। ३। ७॥ संभृतं यन्नाकसदो यन्नाकसदस्तत्पशूनामेषा वै द्वा विꣳशतिश्च ॥ ५। ३। ७॥

३५ छन्दाग्स्युप दधाति पशवो वै छन्दाꣳसि पशूनेवाव रुंधे छन्दाꣳसि वै देवानां वामं पशवो वाममेव पशूनव रुंध एताꣳ ह वै यज्ञसेनश्चैत्रियायणश्चितिं विदां चकार तया वै स पशूनवारुंध यदेतामुपदधाति पशूनेवाव रुंधे गायत्रीः पुरस्तादुप दधाति तेजो वै गायत्री तेज एव

३६ मुखतो धत्ते मूर्धन्वतीर्भवन्ति मूर्धानमेवैनꣳ समानानां करोति त्रिष्टुभ उप दधातींद्रियं वै त्रिष्टुगिन्द्रियमेव मध्यतो धत्ते जगतीरुप दधाति जागता वै पशवः पशूनेवाव रुंधेऽनुष्टुभ उप दधाति प्राणा वा अनुष्टुप्प्राणानामुथ्सृष्ट्यै बृहतीरुष्णिहाः पंक्तीरक्षरपंक्तीरिति विषुरूपाणि छन्दाग्स्युप दधाति विषुरूपा वै पशवः पशव

३७ श्छन्दाꣳसि विषुरूपानेव पशूनव रुंधे विषुरूपमस्य गृहे दृश्यते यस्यैता उपधीयन्ते य उ चैना एवं वेदातिच्छंदसमुप दधात्यतिच्छन्दा वै सर्वाणि छन्दाꣳसि सर्वेभिरेवैनं छन्दोभिश्चिनुते वर्ष्म वा एषा छंदसां यदतिच्छन्दा यदतिच्छंदसमुपदधाति वर्ष्मैवैनꣳ समानानां करोति द्विपदा उप दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ॥ ५। ३। ८॥ तेज एव पशवः पशवो यजमान एकं च ॥ ५। ३। ८॥

३८ सर्वाभ्यो वै देवताभ्योऽग्निश्चीयते यथ्सयुजो नोपदध्याद्देवता अस्याग्निं वृञ्जीरन्

यथ्सयुजं उपदधात्यात्मनैवैनꣳसयुजं चिनुते नाग्निना व्यृध्यतेऽथो यथा पुरुषः स्नावभिः सन्तत एवमेवैताभिरग्निः सन्ततोऽग्निना वै देवाः सुवर्गं लोकमायन्ता अमूः कृत्तिका अभवन् यस्यैता उपधीयन्ते सुवर्गमेव
३९ लोकमेति गच्छति प्रकाशं चित्रमेव भवति मण्डलेष्टका उप दधातीमे वै लोका मण्डलेष्टका इमे खलु वै लोका देवपुरा देवपुरा एव प्र विशति नार्तिमार्च्छत्यग्निं चिक्यानो विश्वज्योतिष उप दधातीमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो प्राणानेवैता यजमानस्य दाध्रत्येता वै देवताः सुवर्ग्यास्ता एवान्वारभ्य सुवर्गं लोकमेति ॥
५। ३। ९॥ सुवर्गमेव ता एव चत्वारि च ॥ ५। ३। ९॥
४० वृष्टिसनीरुप दधाति वृष्टिमेवाव रुंधे यदेकधोपदध्यादेकमृतुं वर्षेदनुपरिहारꣳसादयति तस्माथ्सर्वानृतून् वर्षति पुरोवात सनिरसीत्याहैतद्वै वृष्ट्यै रूपꣳ रूपेणैव वृष्टिमव रुंधे संयानीभिर्वै देवा इमा३ꣳल्लोकान्थ्समयुस्तथ्संयानीनाꣳ संयानित्वं यथ्संयानीरुप दधाति यथाप्सु नावा संयात्येव
४१ मेवैताभिर्यजमान इमा३ꣳल्लोकान्थ्सं याति प्लवो वा एषोऽग्नेर्यथ्संयानीर्यथ्संयानीरुप दधाति प्लवमेवैतमग्नय उप दधात्युत यस्यैतासूपहितास्वापोऽग्निꣳ हरन्त्यहृत एवास्याग्निरादित्येष्टका उप दधात्यादित्या वा एतं भूत्यै प्रति नुदन्ते योऽलं भूत्यै सन्भूतिं न प्राप्नोत्यादित्या
४२ एवैनं भूतिं गमयन्त्यसौ वा एतस्यादित्यो रुचमा दत्ते योऽग्निं चित्वा न रोचते यदादित्येष्टका उपदधात्यसावेवास्मिन्नादित्यो रुचं दधाति यथासौ देवानाꣳ रोचत एवमेवैष मनुष्याणाꣳ रोचते घृतेष्टका उप दधात्येतद्वा अग्नेः प्रियं धाम यद्घृतं प्रियेणैवैनं धाम्ना समर्धय
४३ त्यथो तेजसाऽनुपरिहारꣳसादयत्यपरिवर्गमेवास्मिन्तेजो दधाति प्रजापतिरग्निमचिनुत स यशसा व्यार्ध्यत स एता यशोदा अपश्यत्ता उपाधत्त ताभिर्वै स यश आत्मन्नधत्त यद्यशोदा उप दधाति यश एव ताभिर्यजमान आत्मन्धत्ते पञ्चोप दधाति पाङ्क्तः पुरुषो यावानेव पुरुषस्तस्मिन् यशो दधाति ॥ ५। ३। १०॥
एवं प्राप्नोत्यादित्या अर्धयत्येकान्न पंचाशच्च ॥ ५। ३। १०॥
४४ देवासुराः संयत्ता आसन्कनीयाꣳसो देवा आसन्भूयाꣳसोऽसुरास्ते देवा एता इष्टका अपश्यन्ता उपादधत भूयस्कृदसीत्येव भूयाꣳसोऽ भवन्वनस्पतिभि रोषधीभिर्वरिव

स्कृदसीतीमामंजयन् प्राच्यसीति प्राचीं दिशमजयन्नूर्ध्वासीत्य मूमंजयन्नन्तरिक्ष सदस्यन्तरिक्षे सीदेत्यन्तरिक्षमजयन्ततो देवा अभवन्
४५ परासुरा यस्यैता उपधीयन्ते भूयानेव भवत्यभीमा३ँल्लोकाञ्जयति भवत्यात्मना परास्य भ्रातृव्यो भवत्यप्सुषदसि श्येनसदसीत्याहैतद्वा अग्ने रूपँ रूपेणैवाग्निमव रुंधे पृथिव्यास्त्वा द्रविणे सादयामीत्याहेमानेवैताभिर्लोकान् द्रविणावतः कुरुत आयुष्या उप दधात्यायुरेवा
४६ ऽस्मिन्दधात्यग्ने यत्ते परँ हृन्नामेत्याहैतद्वा अग्नेः प्रियं धाम प्रियमेवास्य धामोपाप्नोति तावेहि सँ रभावहा इत्याह व्येवैनेन परि धत्ते पाञ्चजन्येष्वप्येध्यग्न इत्याहैष वा अग्निः पाञ्चजन्यो यः पञ्चचितीकस्तस्मादेवमाहर्तव्या उप दधात्येतद्वा ऋतूनां प्रियं धाम यदृतव्या ऋतूनामेव प्रियं धामाव रुंधे सुमेक इत्याह संवथ्सरो वै सुमेकः संवथ्सरस्यैव प्रियं धामोपाप्नोति ॥ ५। ३। ११॥ अभवन्नायुरेवर्तव्या उप षड्विँशतिश्च ॥ ५। ३। ११॥
४७ प्रजापतेरक्ष्यश्वयत् तत् परापतत् तदश्वोऽभवद्यदश्वयत् तदश्वस्याश्वत्वं तद्देवा अश्वमेधेनैव प्रत्यदधुरेष वै प्रजापतिँ सर्वं करोति योऽश्वमेधेन यजते सर्व एव भवति सर्वस्य वा एषा प्रायश्चित्तिः सर्वस्य भेषजँ सर्वं वा एतेन पाप्मानं देवा अतरन्नपि वा एतेन ब्रह्महत्यामतरन्थ्सर्वं पाप्मानं
४८ तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदोत्तरं वै तत् प्रजापतेरक्ष्यश्वयत् तस्मादश्वस्योत्तरतोऽव द्यन्ति दक्षिणतोऽन्येषां पशूनां वैतसः कटो भवत्यप्सुयोनिर्वा अश्वोऽप्सुजो वेतसः स्व एवैनं योनौ प्रतिष्ठापयति चतुष्टोमः स्तोमो भवति सरड्ढ वा अश्वस्य सक्थ्यावृहत्तद्देवाश्चतुष्टोमेनैव प्रत्यदधुर्यच्चतुष्टोमः स्तोमो भवत्यश्वस्य सर्वत्वाय ॥ ५। ३। १२॥
सर्वं पाप्मानमवृहद्द्वादश च ॥ ५। ३। १२॥
उथ्सन्न यज्ञ इंद्राग्नी देवा वा अक्ष्णया स्तोमीया अग्नेर्भागोऽस्यग्ने जातान् रश्मिरिति नाकसद्भिश्छंदाँसि सर्वाभ्यो वृष्टिसनीर्देवासुराः कनीयाँसः प्रजापतेरक्षि द्वादश ॥
उथ्सन्न यज्ञो देवा वै यस्य मुख्यवतीर्नाक सद्भिरेवैताभिरष्टा चत्वारिँशत् ॥
उथ्सन्न यज्ञः सर्वत्वाय ॥

# पञ्चमकाण्डे चतुर्थः प्रश्नः ४

१ देवासुराः संयत्ता आसन्तेन व्यंजयन्त स एता इन्द्रस्तनूरपश्यत्ता उपाधत्त ताभिर्वै स तनुवमिंद्रियं वीर्यमात्मन्नधत्त ततो देवा अभवन्परासुरा यदिन्द्रतनूरुपदधाति तनुवमेव ताभिरिंद्रियं वीर्यं यजमान आत्मन्धत्तेऽथो सेन्द्रमेवाग्निꣳ सतनुं चिनुते भवत्यात्मना परास्य भ्रातृव्यो

२ भवति यज्ञो देवेभ्योऽपाक्रामत्तमवरुधं नाशक्नुवन्त एता यज्ञतनूरपश्यन्ता उपादधत ताभिर्वै ते यज्ञमवारुंधत यद्यज्ञतनूरुपदधाति यज्ञमेव ताभिर्यजमानोऽव रुंधे त्रयस्त्रिꣳशतमुप दधाति त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुंधेऽथो सात्मानमेवाग्निꣳ सतनुं चिनुते सात्मामुष्मिꣳ३ ꣳ ल्लोके

३ भवति य एवं वेद ज्योतिष्मतीरुप दधाति ज्योतिरेवास्मिन्दधात्येताभिर्वा अग्निश्चितो ज्वलति ताभिरेवैनꣳ समिन्ध उभयोरस्मै लोकयोर्ज्योतिर्भवति नक्षत्रेष्टका उप दधात्येतानि वै दिवो ज्योतीꣳषि तान्येवाव रुंधे सुकृतां वा एतानि ज्योतीꣳषि यन्नक्षत्राणि तान्येवाप्नोत्यथो अनूकाशमेवैतानि

४ ज्योतीꣳषि कुरुते सुवर्गस्य लोकस्यानुख्यात्यै यथ्स२ꣳस्पृष्टा उपदध्याद्वृष्टै लोकमपि दध्यादवर्षुकः पर्जन्यः स्यादसग्ग्ं स्पृष्टा उप दधाति वृष्ट्या एव लोकं करोति वर्षुकः पर्जन्यो भवति पुरस्तादन्याः प्रतीचीरुप दधाति पश्चादन्याः प्राचीस्तस्मात्प्राचीनानि च प्रतीचीनानि च नक्षत्राण्या वर्तन्ते ॥ ५। ४। १॥ भ्रातृव्यो लोक एवैतान्येक चत्वारिꣳशच्च ॥ ५। ४। १॥

५ ऋतव्या उप दधात्यृतूनां क्लृप्त्यै द्वन्द्वमुप दधाति तस्माद्द्वन्द्वमृतवोऽधृतेव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषा द्वन्द्वमन्यासु चितीषूप दधाति चतस्रो मध्ये धृत्या अन्तः श्लेषणं वा एताश्चितीनां यदृतव्या यदृतव्या उप दधाति चितीनां विधृत्या अवकामनूप दधात्येषा वा अग्नेर्योनिः सयोनि

६ मेवाग्निं चिनुत उवाच ह विश्वामित्रोऽददिथ्स ब्रह्मणान्नं यस्यैता उपधीयान्तै य उ चैना एवं वेददिति संवथ्सरो वा एतं प्रतिष्ठायै नुदते योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथषष्ठीं चितिं चिनुते षड्वा ऋतवः संवथ्सर ऋतुष्वेव संवथ्सरे प्रति तिष्ठत्येता वा

७ अधिपत्नीर्नामेष्टका यस्यैता उपधीयन्तेऽधिपतिरेव समानानां भवति यं

द्विष्यात्तमुपदधद्ध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्च्छेत्यंगिरसः सुवर्गं लोकं यन्तो या यज्ञस्य निष्कृतिरासीत्तामृषिभ्यः प्रत्यौहन्तद्धिरण्यमभवद्यद्धिरण्यशल्कैः प्रोक्षति यज्ञस्य निष्कृत्या अथो भेषजमेवास्मै करो

८ ऽत्यथो रूपेणैवैनꣳ समर्धयत्यथो हिरण्यज्योतिषैव सुवर्गं लोकमेति साहस्रवता प्रोक्षति साहस्रः प्रजापतिः प्रजापतेराप्त्या इमा मे अग्न इष्टका धेनवः सन्त्वित्याह धेनूरेवैनाः कुरुते ता एनं कामदुघा अमुत्रामुष्मि३ꣳ ल्लोक उप तिष्ठन्ते ॥ ५। ४। २॥ सयोनिमेता वै करोत्येकान्न चत्वारिꣳशच्च ॥ ५। ४। २॥

९ रुद्रो वा एष यदग्निः स एतर्हि जातो यर्हि सर्वश्चितः स यथा वथ्सो जातः स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति तस्मै यदाहुतिं न जुहुयादध्वर्युं च यजमानं च ध्यायेच्छतरुद्रीयं जुहोति भागधेयेनैवैनꣳ शमयति नार्तिमार्च्छेत्यध्वर्युर्न यजमानो यद्ग्राम्याणां पशूनां

१० पयसा जुहुयाद् ग्राम्यान् पशूञ्छुचार्पयेद्यदारण्यानामारण्याञ्जर्ति लयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा न ग्राम्यान्पशून् हिनस्ति नारण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोत्याग्नेयी वा एषा यदजाऽहुत्यैव जुहोति न ग्राम्यान्पशून् हिनस्ति नारण्यानंगिरसः सुवर्गं लोकं यन्तो

११ ऽजायां घर्मं प्रासिञ्चन्थ्सा शोचन्ती पर्णं पराजिहीत सो२ऽर्कोऽभवत्तदर्कस्यार्कत्वमर्कपर्णेन जुहोति सयोनित्वायोदङ्तिष्ठञ्जुहोत्येषा वै रुद्रस्य दिक्स्वायामेव दिशि रुद्रं निरवदयते चरमायामिष्टकायां जुहोत्यन्तत एव रुद्रं निरवदयते त्रेधाविभक्तं जुहोति त्रय इमे लोका इमानेव लोकान्थ्समावद्वीर्यान्करोतीयत्यग्रे जुहो

१२ ऽत्यथेयत्यथेयति त्रय इमे लोका एभ्य एवैनं लोकेभ्यः शमयति तिस्र उत्तरा आहुतीर्जुहोति षट्थ्सं पद्यन्ते षड्वा ऋतव ऋतुभिरेवैनꣳ शमयति यदनुपरिक्रामं जुहुयादन्तरवचारिणꣳ रुद्रं कुर्यादथो खल्वाहुः कस्यां वाह दिशि रुद्रः कस्यां वेत्यनुपरिक्राममेव होतव्यमपरिवर्गमेवैनꣳ शमय

१३ त्येता वै देवताः सुवर्ग्या या उत्तमास्ता यजमानं वाचयति ताभिरेवैनꣳ सुवर्गं लोकं गमयति यं द्विष्यात्तस्य सञ्चरे पशूनां न्यस्येद्यः प्रथमः पशुरभितिष्ठति स आर्तिमार्च्छति ॥ ५। ४। ३॥ पशूनां यन्तोऽग्रे जुहोत्यपरिवर्गमेवैनꣳ शमयति त्रिꣳशच्च ॥ ५। ४। ३॥

१४ अश्मन्नूर्जमिति परि षिञ्चति मार्जयत्येवैनमथो तर्पयत्येव स एनं

तृप्तोऽक्षुध्यन्नशोचन्नमुष्मि३ꣳल्लोक उप तिष्ठते तृप्यति प्रजया पशुभिर्य एवं वेद तां न
इषमूर्जं धत्त मरुतः सꣳरराणा इत्याहान्नं वा ऊर्गन्नं मरुतोऽन्नमेवाव रुंधेऽश्मग्ग्स्ते
क्षुदमुं ते शु
१५ गृच्छतु यं द्विष्म इत्याह यमेव द्वेष्टि तमस्य क्षुधा च शुचा चार्पयति त्रिः
परिषिञ्चन्पर्येति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्य शुचꣳशमयति त्रिः पुनः पर्येति षट्थ्सं
पद्यन्ते षड्वा ऋतव ऋतुभिरेवास्य शुचꣳशमयत्यपां वा एतत्पुष्पं यद्वेतसोऽपाꣳ
१६ शरोऽवका वेतसशाखया चावकाभिश्च वि कर्षत्यापो वै शान्ताः शान्ताभिरेवास्य
शुचꣳ शमयति यो वा अग्निं चितं प्रथमः पशुरधिक्रामतीश्वरो वै तꣳ शुचा प्रदहो
मण्डूकेन वि कर्षत्येष वै पशूनामनुपजीवनीयो न वा एष ग्राम्येषु पशुषु हितो नारण्येषु
तमेव शुचार्पयत्यष्टाभिर्वि कर्ष
१७ त्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तस्य शुचꣳशमयति पावकवतीभिरन्नं
वै पावकोऽन्नेनैवास्य शुचꣳशमयति मृत्युर्वा एष यदग्निर्ब्रह्मण एतद्रूपं यत्कृष्णाजिनं कार्ष्णी
उपानहावुप मुञ्चते ब्रह्मणैव मृत्योरन्तर्धत्तेऽन्तर्मृत्योर्धत्तेऽन्तरन्नाद्यादित्याहुरन्यामुपमुञ्चतेऽन्यान्नान्त
१८ रेव मृत्योर्धत्तेऽवान्नाद्यꣳ रुंधे नमस्ते हरसे शोचिष इत्याह नमस्कृत्य हि
वसीयाꣳसमुपचरन्त्यन्यं ते अस्मत्तपन्तु हेतय इत्याह यमेव द्वेष्टि तमस्य शुचार्पयति
पावको अस्मभ्यꣳ शिवो भवेत्याहान्नं वै पावकोऽन्नमेवाव रुंधे द्वाभ्यामधि क्रामति
प्रतिष्ठित्या अपस्यवतीभ्याꣳ शान्त्यै ॥ ५। ४। ४॥
शुग्वेतसोऽपामष्टाभिर्वि कर्षति नान्तरेकान्न पंचाशच्च ॥ ५। ४। ४॥
१९ नृषदे वडिति व्याघारयति पङ्क्त्याहुत्या यज्ञमुखमा रभतेऽक्ष्णया व्याघारयति
तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यद्वषड्कुर्याद्यातयामास्य वषट्कारः स्याद्यन्न
वषड्कुर्याद्रक्षाꣳसि यज्ञꣳ हन्युर्वडित्याह परोऽक्षमेव वषट् करोति नास्य यातयामा वषट्कारो
भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति हुतादो वा अन्ये देवा
२० अहुतादोऽन्ये तानग्निचिदेवोभयान्प्रीणाति ये देवा देवानामिति दध्ना मधुमिश्रेणावोक्षति
हुतादश्चैव देवानहुतादश्च यजमानः प्रीणाति ते यजमानं प्रीणन्ति दध्नैव हुतादः प्रीणाति
मधुषाऽहुतादो ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेणावोक्षत्युभयस्यावरुद्ध्यै
ग्रुमुष्टिनावोक्षति प्राजापत्यो
२१ वै ग्रुमुष्टिः सयोनित्वाय द्वाभ्यां प्रतिष्ठित्या अनुपरिचारमवोक्षत्यपरिवर्गमेवैनान्प्रीणाति

वि वा एष प्राणैः प्रजया पशुभिर्ऋध्यते योऽग्निं चिन्वन्नधि क्रामति प्राणदा अपानदा
इत्याह प्राणानेवात्मन्धत्ते वर्चोदा वरिवोदा इत्याह प्रजा वै वर्चः पशवो वरिवः प्रजामेव
पशूनात्मन्धत्त इन्द्रो वृत्रमहन्तं वृत्रो
२२ हतः षोडशभिर्भोगैरसिनात्स एतामग्नयेऽनीकवत आहुतिमपश्यत्तामजुहोत्तस्याग्निरनीकवान्थ्स्वे
भागधेयेन प्रीतः षोडशधा वृत्रस्य भोगानप्यदहद्वैश्वकर्मणेन पाप्मनो निरमुच्यत
यदग्नयेऽनीकवत आहुतिं जुहोत्यग्निरेवास्यानीकवान्थ्स्वेन भागधेयेन प्रीतः पाप्मानमपि
दहति वैश्वकर्मणेन पाप्मनो निर्मुच्यते यं कामयेत चिरं पाप्मनो
२३ निर्मुच्येतेत्येकैकं तस्य जुहुयाच्चिरमेव पाप्मनो निर्मुच्यते यं कामयेत ताजक्पाप्मनो
निर्मुच्येतेति सर्वाणि तस्यानुद्रुत्य जुहुयात्ताजगेव पाप्मनो निर्मुच्यतेऽथो खलु नानैव
सूक्ताभ्यां जुहोति नानैव सूक्तयोर्वीर्यं दधात्यथो प्रतिष्ठित्यै ॥ ५। ४। ५॥
देवाः प्राजापत्यो वृत्रश्चिरं पाप्मनश्चत्वारिꣳशच्च ॥ ५। ४। ५॥
२४ उदेनमुत्तरां नयेति समिध आ दधाति यथा जनं यतेऽव सं करोति तादृगेव
तत्तिस्र आ दधाति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्मै भागधेयं करोत्यौदुंबरीर्भवन्त्यूर्ग्वा
उदुंबर ऊर्जमेवास्मा अपि दधात्युदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः प्राणै
२५ रेवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैनꣳ
समर्धयति पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरित्याह दिशो ह्येषोऽनु प्रच्यवतेऽपामतिं दुर्मतिं
बाधमाना इत्याह रक्षसामपहत्यै रायस्पोषे यज्ञपतिमाभजन्तीरित्याह पशवो वै रायस्पोषः
२६ पशूनेवाव रुंधे षड्भिर्हरति षड्वा ऋतव ऋतुभिरेवैनꣳ हरति द्वे परिगृह्यवती
भवतो रक्षसामपहत्यै सूर्यरश्मिर्हरिकेशः पुरस्तादित्याह प्रसूत्यै ततः पावका आशिषो
नो जुषन्तामित्याहान्नं वै पावकोऽन्नमेवाव रुंधे देवासुराः संयत्ता आसन्ते देवा
एतदप्रतिरथमपश्यन्तेन वै ते प्रत्य
२७ सुरानजयन्तदप्रतिरथस्याप्रतिरथत्वं यदप्रतिरथं द्वितीयो होतान्वाहाप्रत्येव तेन
यजमानो भ्रातृव्याञ्जयत्यथो अनभिजितमेवाभि जयति दशर्चं भवति दशाक्षरा
विराड्विराजेमौ लोकौ विधृतावनयोर्लोकयोर्विधृत्या अथो दशाक्षरा विराडन्नं
विराड्विराज्येवान्नाद्ये प्रति तिष्ठत्यसदिव वा अन्तरिक्षमन्तरिक्षमिवाग्नीध्रमाग्नीध्रे
२८ ऽश्मानं नि दधाति सत्त्वाय द्वाभ्यां प्रतिष्ठित्यै विमान एष दिवो मध्य आस्त इत्याह
व्येवैतया मिमीते मध्ये दिवो निहितः पृश्निरश्मेत्याहान्नं वै पृश्न्यन्नमेवाव रुंधे चतसृभिरा

पुच्छादेति चत्वारि छन्दाँसि छन्दोभिरेवेन्द्रं विश्वा अवीवृधन्नित्याह वृद्धिमेवोपावर्तते
वाजानाँ सत्पतिं पति
२९ मित्याहान्नं वै वाजोऽन्नमेवाव रुंधे सुम्नहूर्यज्ञो देवाँ आ च वक्षदित्याह प्रजा वै
पशवः सुम्नं प्रजामेव पशूनात्मन्धत्ते यक्षदग्निर्देवो देवाँ आ च वक्षदित्याह स्वगाकृत्यै
वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीदित्याहासौ वा आदित्य उद्यन्नुद्ग्राभ एष निम्रोचन्निग्राभो
ब्रह्मणैवात्मानमुद्गृह्णाति ब्रह्मणा भ्रातृव्यं नि गृह्णाति ॥ ५। ४। ६॥ प्राणैः पोषोऽप्रत्याग्नीद्ध्रे
पतिमेष दश च ॥ ५। ४। ६॥
३० प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह देवलोकमेवैतयोपावर्तते क्रमध्वमग्निना
नाकमित्याहेमानेवैतया लोकान्क्रमते पृथिव्या अहमुदन्तरिक्षमारुहमित्याहेमानेवैतया
लोकान्थ्समारोहति सुवर्यन्तो नापेक्षन्त इत्याह सुवर्गमेवैतया लोकमेत्यग्ने प्रेहि
३१ प्रथमो देवयतामित्याहोभयेष्वेवैतया देवमनुष्येषु चक्षुर्दधाति पञ्चभिरधि क्रामति
पाङ्क्तो यज्ञो यावानेव यज्ञस्तेन सह सुवर्गं लोकमेति नक्तोषासेति पुरोऽनुवाक्यामन्वाह
प्रत्त्या अग्ने सहस्राक्षेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै तस्मै ते विधेम वाजाय
स्वाहेत्याहान्नं वै वाजोऽन्नमेवाव
३२ रुंधे दध्नः पूर्णामौदुंबरीग् स्वयमातृण्णायां जुहोत्यूर्ग्वै दध्यूर्गुदुंबरोऽसौ
स्वयमातृण्णामुष्यामेवोर्जं दधाति तस्मादमुतोऽर्वाचीमूर्जमुप जीवामस्तिसृभिः सादयति
त्रिवृद्वा अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुंबरीमा
दधात्येषा वै सूर्मी कर्णकावत्येतया ह स्म
३३ वै देवा असुराणाँ शततर्हाग्स्तृँहन्ति यदेतया समिधमादधाति वज्रमेवैतच्छतघ्नीं
यजमानो भ्रातृव्याय प्र हरति स्तृत्या अछंबट्कारं विधेम ते परमे जन्मन्नग्न इति
वैकङ्कतीमा दधाति भा एवाव रुंधे ताँ सवितुर्वरेण्यस्य चित्रामिति शमीमयीँ
शान्त्या अग्निर्वा ह वा अग्निचितं दुहेऽग्निचिद्वाग्निं दुहे ताँ
३४ सवितुर्वरेण्यस्य चित्रामित्याहैष वा अग्नेर्दोहस्तमस्य कण्व एव श्रायसोऽवेत्तेन ह
स्मैनँ स दुहे यदेतया समिधमा दधात्यग्निचिदेव तदग्निं दुहे सप्त ते अग्ने समिधः
सप्त जिह्वा इत्याह सप्तैवास्य साप्तानि प्रीणाति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः
प्रजापते
३५ राप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाँ सृष्ट्यै

अग्निर्देवेभ्यो निलायत स दिशोऽनु प्राविशञ्जुह्वन्मनसा दिशो ध्यायेद्दिग्भ्य एवैनमव रुंधे दध्ना पुरस्ताञ्जुहोत्याज्येनोपरिष्टात्तेजश्चैवास्मा इंद्रियं च समीची दधाति द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवथ्सरः संवथ्सरोऽग्निर्वैश्वानरः साक्षा

३६ देव वैश्वानरमव रुंधे यत्प्रयाजानूयाजान्कुर्याद्विकस्तिः सा यज्ञस्य दर्विहोमं करोति यज्ञस्य प्रतिष्ठित्यै राष्ट्रं वै वैश्वानरो विण्मरुतो वैश्वानरꣳ हुत्वा मारुताञ्जुहोति राष्ट्र एव विशमनु बध्नात्युच्चैर्वैश्वानरस्या श्रावयत्युपाꣳशु मारुताञ्जुहोति तस्माद्राष्ट्रं विशमति वदति मारुता भवन्ति मरुतो वै देवानां विशो देवविशेनैवास्मै मनुष्यविशमव रुंधे सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव रुंधे गणेन गणमनुद्रुत्य जुहोति विशमेवास्मा अनुवर्त्मानं करोति ॥ ५। ४। ७॥ अग्ने प्रेह्यव स्म दुहे तां प्रजापतेः साक्षान्मनुष्यविशमेक विꣳशतिश्च ॥ ५। ४। ७॥

३७ वसोर्धारां जुहोति वसोर्मे धारासदिति वा एषा हूयते घृतस्य वा एनमेषा धारामुष्मिꣳल्लोके पिन्वमानोप तिष्ठत आज्येन जुहोति तेजो वा आज्यं तेजो वसोर्धारा तेजसैवास्मै तेजोऽव रुंधेऽथो कामा वै वसोर्धारा कामानेवाव रुंधे यं कामयेत प्राणानस्यान्नाद्यं वि

३८ च्छिंन्द्यामिति विग्राहं तस्य जुहुयात्प्राणानेवास्यान्नाद्यं वि च्छिंनत्ति यं कामयेत प्राणानस्यान्नाद्यꣳ सं तनुयामिति संततां तस्य जुहुयात्प्राणानेवास्यान्नाद्यꣳ सं तनोति द्वादश द्वादशानि जुहोति द्वादश मासाः संवथ्सरः संवथ्सरेणैवास्मा अन्नमव रुंधेऽन्नं च मेऽक्षुच्च म इत्याहैतद्वा

३९ अन्नस्य रूपꣳ रूपेणैवान्नमव रुंधेऽग्निश्च म आपश्च म इत्याहैषा वा अन्नस्य योनिः सयोन्येवान्नमव रुंधेऽर्धेन्द्राणि जुहोति देवता एवाव रुंधे यथ्सर्वेषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तम इंद्रमुत्तरमाहेन्द्रियमेवास्मिन्नुपरिष्टाद्दधाति यज्ञायुधानि जुहोति यज्ञो

४० वै यज्ञायुधानि यज्ञमेवाव रुंधेऽथो एतद्वै यज्ञस्य रूपꣳ रूपेणैव यज्ञमव रुंधेऽवभृथश्च मे स्वगाकारश्च म इत्याह स्वगाकृत्या अग्निश्च मे घर्मश्च म इत्याहैतद्वै ब्रह्मवर्चसस्य रूपꣳ रूपेणैव ब्रह्मवर्चसमव रुंध ऋक्क मे साम च म इत्याहै

४१ तद्वै छंदसाꣳ रूपꣳ रूपेणैव छन्दाꣳस्यव रुंधे गर्भाश्च मे वथ्साश्च म इत्याहैतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुंधे कल्पाञ्जुहोत्यक्लृप्तस्य क्लृप्त्यै युग्मदयुजे जुहोति

मिथुनत्वायोत्तरावती भवतोऽभिक्रान्त्या एका च मे तिस्रश्च म इत्याह देवछंदसं वा एका च तिस्रश्च

४२ मनुष्यछंदसं चतस्रश्चाष्टौ च देवछंदसं चैव मनुष्यछंदसं चाव रुंध आ त्रयस्त्रिꣳशतो जुहोति त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुंध आष्टाचत्वारिꣳशतो जुहोत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुंधे वाजश्च प्रसवश्चेति द्वादशं जुहोति द्वादश मासाः संवथ्सरः संवथ्सर एव प्रति तिष्ठति ॥ ५। ४। ८॥ वि वै यज्ञः साम च म इत्याह च तिस्रश्चैकान्न पंचाशच्च ॥ ५। ४। ८॥

४३ अग्निर्देवेभ्योऽपाक्रामद्भागधेयमिच्छमानस्तं देवा अब्रुवन्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणे मह्यमेव वाजप्रसवीयं जुहवन्निति तस्मादग्नये वाजप्रसवीयं जुह्वति यद्वाजप्रसवीयं जुहोत्यग्निमेव तद्भागधेयेन समर्धयत्यथो अभिषेक एवास्य स चतुर्दशभिर्जुहोति सप्त ग्राम्या ओषधयः सप्त

४४ ऽरण्या उभयीषामवरुद्ध्या अन्नस्यान्नस्य जुहोत्यन्नस्यान्नस्यावरुद्ध्या औदुंबरेण स्रुवेण जुहोत्यूर्ग्वा उदुंबर ऊर्गन्नमूर्जैवास्मा ऊर्जमन्नमव रुंधेऽग्निर्वै देवानामभिषिक्तोऽग्निचिन्मनुष्याणां तस्मादग्निचिद्वर्षति न धावेदवरुद्धग्ग्ं ह्यस्यान्नमन्नमिव खलु वै वर्षं यद्धावेदन्नाद्याद्धावेदुपावर्तेतान्नाद्यमेवाभ्यु

४५ पावर्तते नक्तोषासेति कृष्णायै श्वेतवथ्सायै पयसा जुहोत्यह्नैवास्मै रात्रिं प्र दापयति रात्रियाहरहोरात्रे एवास्मै प्रत्ते काममन्नाद्यं दुहाते राष्ट्रभृतो जुहोति राष्ट्रमेवाव रुंधे षड्भिर्जुहोति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठति भुवनस्य पत इति रथमुखे पञ्चाहुतीर्जुहोति वज्रो वै रथो वज्रेणैव दिशो

४६ ऽभि जयत्यग्निचितꣳ ह वा अमुष्मि३ꣳल्लोके वातोऽभि पवते वातनामानि जुहोत्यभ्येवैनममुष्मि३ꣳल्लोके वातः पवते त्रीणि जुहोति त्रय इमे लोका एभ्य एव लोकेभ्यो वातमव रुंधे समुद्रोऽसि नभस्वानित्याहैतद्वै वातस्य रूपꣳ रूपेणैव वातमव रुंधेऽञ्जलिना जुहोति न ह्येतेषामन्यथाहुतिरवकल्पते ॥ ५। ४। ९॥
ओषधयः सप्ताभि दिशोऽन्यथा द्वे च ॥ ५। ४। ९॥

४७ सुवर्गाय वै लोकाय देवरथो युज्यते यत्राकूताय मनुष्यरथ एष खलु वै देवरथो यदग्निरग्निं युनज्मि शवसा घृतेनेत्याह युनक्त्येवैनꣳ स एनं युक्तः सुवर्गं लोकमभि वहति यथ्सर्वाभिः पञ्चभिर्युञ्ज्याद्युक्तोऽस्याग्निः प्रच्युतः स्यादप्रतिष्ठिता आहुतयः स्युरप्रतिष्ठिताः

स्तोमा अप्रतिष्ठितान्युक्थानि तिसृभिः प्रातःसवनेऽभि मृशति त्रिवृ
४८ द्वा अग्निर्यावानेवाग्निस्तं युनक्ति यथानसि युक्त आधीयत एवमेव तत्प्रत्याहुतयस्तिष्ठन्ति प्रति स्तोमाः प्रत्युक्थानि यज्ञायज्ञियस्य स्तोत्रे द्वाभ्याममभि मृशत्येतावान्, वै यज्ञो यावानग्निष्टोमो भूमा त्वा अस्यात ऊर्ध्वः क्रियते यावानेव यज्ञस्तमंततोऽन्वारोहति द्वाभ्यां प्रतिष्ठित्या एकयाऽप्रस्तुतं भवत्यथा
४९ ऽभि मृशत्युपैनमुत्तरो यज्ञो नमत्यथो संतत्यै प्र वा एषोऽस्मा३ँ ल्लोकाच्च्यवते योऽग्निं चिनुते न वा एतस्यानिष्टक आहुतिरव कल्पते यां वा एषोऽनिष्टक आहुतिं जुहोति स्रवति वै सा ताग् स्रवन्तीं यज्ञोऽनु परा भवति यज्ञं यजमानो यत्पुनश्चितिं चिनुत आहुतीनां प्रतिष्ठित्यै प्रत्याहुतयस्तिष्ठन्ति
५० न यज्ञः पराभवति न यजमानोऽष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रेणैवेनं छंदसा चिनुते यदेकादश त्रैष्टुभेन यद्द्वादश जागतेन छन्दोभिरेवैनं चिनुते नपात्को वै नामैषोऽग्निर्यत्पुनश्चितिर्य एवं विद्वान्पुनश्चितिं चिनुत आ तृतीयात्पुरुषादन्नमत्ति यथा वै पुनराधेय एवं पुनश्चितिर्योऽग्न्याधेयेन न
५१ र्ध्नोति स पुनराधेयमा धत्ते योऽग्निं चित्वा नर्ध्नोति स पुनश्चितिं चिनुते यत्पुनश्चितिं चिनुत ऋद्ध्या अथो खल्वाहुर्न चेतव्येति रुद्रो वा एष यदग्निर्यथा व्याघ्रँ सुप्तं बोधयति तादृगेव तदथो खल्वाहुश्चेतव्येति यथा वसीयाँ सं भागधेयेन बोधयति तादृगेव तन्मनुरग्निमचिनुत तेन नार्ध्नोथ्स एतां पुनश्चितिमपश्यत्तामचिनुत तया वै स आर्ध्नोद्यत्पुनश्चितिं चिनुत ऋद्ध्यै ॥ ५। ४। १०॥ त्रिवृदथ तिष्ठन्त्यग्न्याधेयेन नाऽचिनुत सप्तदश च ॥ ५। ४। १०॥
५२ छंदश्चितं चिन्वीत पशुकामः पशवो वै छन्दाँसि पशुमानेव भवति श्येनचितं चिन्वीत सुवर्गकामः श्येनो वै वयसां पतिष्ठः श्येन एव भूत्वा सुवर्गं लोकं पतति कङ्कचितं चिन्वीत यः कामयेत शीर्षण्वानमुष्मि३ँ ल्लोके स्यामिति शीर्षण्वानेवामुष्मि३ँ ल्लोके भवत्यलजचितं चिन्वीत चतुः सीतं प्रतिष्ठाकामश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति प्र उगचितं चिन्वीत भ्रातृव्यवान्प्रे
५३ व भ्रातृव्यान्नुदत उभयतः प्रौगं चिन्वीत यः कामयेत प्रजातान्भ्रातृव्यान्नुदेय प्रति जनिष्यमाणानिति प्रेव जातान्भ्रातृव्यान्नुदते प्रति जनिष्यमाणान्नथचक्रचितं चिन्वीत भ्रातृव्यवान् वज्रो वै रथो वज्रमेव भ्रातृव्येभ्यः प्र हरति द्रोणचितं चिन्वीतान्नकामो

द्रोणे वा अन्नं भ्रियते सयोन्येवान्नमव रुंधे समूह्यं चिन्वीत पशुकामः पशुमानेव भवति
५४ परिचाय्यं चिन्वीत ग्रामकामो ग्राम्येव भवति श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति पितृलोक एवर्ध्नोति विश्वामित्रजमदग्नी वसिष्ठेनास्पर्धेता ँ स एता जमदग्निर्विहव्या अपश्यत्ता उपाधत्त ताभिर्वै स वसिष्ठस्येन्द्रियं वीर्यमवृङ्क्त यद्विहव्या उप दधातीन्द्रियमेव ताभिर्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते होतुर्धिष्णिय उप दधाति यजमानायतनं वै
५५ होता स्व एवास्मा आयतन इंद्रियं वीर्यमव रुंधे द्वादशोप दधाति द्वादशाक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुंधेऽष्टावष्टावन्येषु धिष्णियेषूप दधात्यष्टाशफाः पशवः पशूनेवाव रुंधे षण्मार्जालीये षड्वा ऋतव ऋतवः खलु वै देवाः पितर ऋतूनेव देवान्पितृन्प्रीणाति ॥ ५। ४। ११॥ प्र भवति यजमानायतनं वा अष्टा चत्वारि ँ शच्च ॥ ५। ४। ११॥
५६ पवस्व वाजसातय इत्यनुष्टुक्प्रतिपद्भवति तिस्रोऽनुष्टुभश्चतस्रो गायत्रियो यत् तिस्रोऽनुष्टुभ स्तस्मादश्वस्त्रिभि स्तिष्ठग्ग्ँस्तिष्ठति यच्चतस्रो गायत्रियस्तस्माथ्सर्वाग्ँश्चतुरः पदः प्रतिदधत्पलायते परमा वा एषा छंदसां यदनुष्टुक्परमश्चतुष्टोमः स्तोमानां परमस्त्रिरात्रो यज्ञानां परमोऽश्वः पशूनां परमेणैवैनं परमतां गमयत्येकवि ँ शमहर्भवति
५७ यस्मिन्नश्व आलभ्यते द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकवि ँ श एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षादृध्नोति शक्करयः पृष्ठं भवन्त्यन्यदन्यच्छन्दोऽन्यैन्ये वा एते पशव आ लभ्यन्त उतेव ग्राम्या उतेवारण्या यच्छक्करयः पृष्ठं भवन्त्यश्वस्य सर्वत्वाय पार्थुरश्मं ब्रह्मसामं भवति रश्मिना वा अश्वो
५८ यत ईश्वरो वा अश्वोऽयतोऽप्रतिष्ठितः परां परावतं गन्तोर्यत्पार्थुरश्मं ब्रह्मसामं भवत्यश्वस्य यत्यै धृत्यै संकृत्यच्छावाकसामं भवत्युथ्सन्नयज्ञो वा एष यदश्वमेधः कस्तद्वेदेत्याहुर्यदि सर्वो वा क्रियते न वा सर्व इति यथ्संकृत्यच्छावाकसामं भवत्यश्वस्य सर्वत्वाय पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति ॥ ५। ४। १२॥ अहर्भवति वा अश्वोऽहर्भवति दश च ॥ ५। ४। १२॥
देवासुरास्तेनर्तव्या रुद्रोऽश्मन्नृषदे वडुदेनं प्राचीमिति वसोर्धारामग्निर्देवेभ्यः सुवर्गाय यत्राकूताय छंदश्चितं पवस्व द्वादश ॥
देवासुरा अजायां घर्मं वै ग्रुमुष्टिः प्रथमो देवयतामेतद्वै छन्दसामृध्नोत्यष्टौ पंचाशत् ॥

देवासुराः सर्वं जयति ॥

## पञ्चमकाण्डे पञ्चमः प्रश्नः ५

१ यदेकेन सऽ२ऽस्थापयति यज्ञस्य संतत्या अविच्छेदायैन्द्राः पशवो ये मुष्करा यदैन्द्राः सन्तोऽग्निभ्य आ लभ्यन्ते देवताभ्यः समदं दधात्याग्नेयीस्त्रिष्टुभो याज्यानुवाक्याः कुर्याद्यदाग्नेयीस्तेनाग्नेया यत्त्रिष्टुभस्तेनैन्द्राः समृद्ध्यै न देवताभ्यः समदं दधाति वायवे नियुत्वते तूपरमा लभते तेजोऽग्नेर्वायुस्तेजस एष आ लभ्यते तस्माद्यद्रियङ् वायु
२ र्वाति तद्रियङ्ङग्निर्दहति स्वमेव तत्तेजोऽन्वेति यन्न नियुत्वते स्यादुन्माद्येद्यजमानो नियुत्वते भवति यजमानस्यानुन्मादाय वायुमती श्वेतवती याज्यानुवाक्ये भवतः सतेजस्त्वाय हिरण्यगर्भः समवर्तताग्र इत्याघारमा घारयति प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय सर्वाणि वा एष रूपाणि पशूनां प्रत्या लभ्यते यच्छ्मश्रुणस्तत्
३ पुरुषाणाꣳ रूपं यत्तूपरस्तदश्वानां यदन्यतोदन्तद्गवां यदव्या इव शफास्तदवीनां यदजस्तदजानां वायुर्वै पशूनां प्रियं धाम यद्वायव्यो भवत्येतमेवैनमभि संजानानाः पशव उप तिष्ठन्ते वायव्यः कार्या(३)ः प्राजापत्या(३) इत्याहुर्यद्वायव्यं कुर्यात्प्रजापतेरियाद्यत्प्राजापत्यं कुर्याद्वायो
४ रियाद्यद्वायव्यः पशुर्भवति तेन वायोर्नैति यत्प्राजापत्यः पुरोडाशो भवति तेन प्रजापतेर्नैति यद्द्वादशकपालस्तेन वैश्वानरान्नैत्याग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चाऽरभतेऽग्निरवमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता
५ एवोभयतः परिगृह्य यजमानोऽव रुंधे पुरोडाशेन वै देवा अमुष्मिꣳ३ꣳल्लोक आर्ध्नुवञ्चरुणास्मिन्, यः कामयेतामुष्मिꣳ३ꣳल्लोक ऋध्नुयामिति स पुरोडाशं कुर्वीतामुष्मिन्नेव लोक ऋध्नोति यदष्टाकपालस्तेनाग्नेयो यत्त्रिकपालस्तेन वैष्णवः समृद्ध्यै यः कामयेतास्मिꣳ३ꣳल्लोक ऋध्नुयामिति स चरुं कुर्वीताग्नेर्घृतं विष्णोस्तण्डुलास्तस्मा
६ च्चरुः कार्योऽस्मिन्नेव लोक ऋध्नोत्यादित्यो भवतीयं वा अदितिरस्यामेव प्रति तिष्ठत्यथो अस्यामेवाधि यज्ञं तनुते यो वै संवथ्सर मुख्यमभृत्वाग्निं चिनुते यथा सामि गर्भोऽव पद्यते तादृगेव तदार्तिमार्च्छेद्वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेथ्संवथ्सरो वा अग्निर्वैश्वानरो यथा संवथ्सरमाप्त्वा
७ काल आगते विजायत एवमेव संवथ्सरमाप्त्वा काल आगतेऽग्निं चिनुते

नार्तिमार्च्छत्येषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियामेवास्य तनुवमव रुंधे त्रीण्येतानि हवीꣳषि भवन्ति त्रय इमे लोका एषां लोकानाꣳ रोहाय ॥ ५। ५। १॥ यद्रियङ्वायुर्यच्छश्रुणस्तद्वायोर्निर्वपति देवतास्तस्मादात्वाष्टा त्रिꣳशच्च ॥ ५। ५। १॥
८ प्रजापतिः प्रजाः सृष्ट्वा प्रेणानु प्राविशत्ताभ्यः पुनः संभवितुं नाशक्नोत्सोऽब्रवीदृध्नवदित्स यो मेऽतः पुनः संचिनवदिति तं देवाः समचिन्वन्ततो वै त आर्ध्नुवन्यत्समचिन्वन्तच्चित्यस्य चित्यत्वं य एवं विद्वानग्निं चिनुत ऋध्नोत्येव कस्मै कमग्निश्चीयत इत्याहुरग्निवा
९ नसानीति वा अग्निश्चीयतेऽग्निवानेव भवति कस्मै कमग्निश्चीयत इत्याहुर्देवा मा वेदन्निति वा अग्निश्चीयते विदुरेनं देवाः कस्मै कमग्निश्चीयत इत्याहुर्गृह्यसानीति वा अग्निश्चीयते गृह्येव भवति कस्मै कमग्निश्चीयत इत्याहुः पशुमानसानीति वा अग्नि
१० श्चीयते पशुमानेव भवति कस्मै कमग्निश्चीयत इत्याहुः सप्त मा पुरुषा उप जीवानिति वा अग्निश्चीयते त्रयः प्राञ्चस्त्रयः प्रत्यञ्च आत्मा सप्तम एतावन्त एवैनममुष्मिꣳल्लोक उप जीवन्ति प्रजापतिरग्निमचिकीषत तं पृथिव्यब्रवीन्न मय्यग्निं चेष्यसेति मा धक्ष्यति सा त्वाति दह्यमाना वि धविष्ये
११ स पापीयान्भविष्यसीति सोऽब्रवीत्तथा वा अहं करिष्यामि यथा त्वा नातिधक्ष्यतीति स इमामभ्यमृशत्प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीदेतीमामेवेष्टकां कृत्वोपाधत्तानतिदाहाय यत्प्रत्यग्निं चिन्वीत तदभि मृशेत्प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवासीदे
१२ तीमामेवेष्टकां कृत्वोप धत्तेऽनतिदाहाय प्रजापतिरकामयत प्र जायेयेति स एतमुख्यमपश्यत्तꣳ संवथ्सरमबिभस्ततो वै स प्राजायत तस्माथ्संवथ्सरं भार्यः प्रैव जायते तं वसवोऽब्रुवन् प्र त्वमजनिष्ठा वयं प्र जायामहा इति तं वसुभ्यः प्रायच्छत्तं त्रीण्यहान्यबिभरुस्तेन
१३ त्रीणि च शतान्यसृजन्त त्रयस्त्रिꣳशतं च तस्मात्र्यहं भार्यः प्रैव जायते तान्रुद्रा अब्रुवन् प्र यूयमजनिढ्वं वयं प्र जायामहा इति तꣳ रुद्रेभ्यः प्रायच्छन्तꣳ षडहान्यबिभरुस्तेन त्रीणि च शतान्यसृजन्त त्रयस्त्रिꣳशतं च तस्मात्षडहं भार्यः प्रैव जायते तानादित्या अब्रुवन् प्र यूयमजनिढ्वं वयं
१४ प्र जायामहा इति तमादित्येभ्यः प्रायच्छन्तं द्वादशाहान्यबिभरुस्तेन त्रीणि च

शतान्यसृजन्त त्रयस्त्रि꣡ꣳशतं च तस्माद्द्वादशाहं भार्यः प्रैव जायते तेन वै ते सहस्रमसृजन्तोखाꣳ सहस्रतमीं य एवमुख्यꣳसाहस्रं वेद प्र सहस्रं पशूनाप्नोति ॥ ५। ५। २॥ अग्निवान्पशुमानसानीति वा अग्निर्धविष्ये मृशेत्प्रजापतिस्त्वा सादयतु तया देवतयाङ्गिरस्वद्ध्रुवा सीद तानादित्या अब्रुवन्प्र यूयमजनिढ्वं वयं चत्वारिꣳशच्च ॥ ५। ५। २॥

१५ यजुषा वा एषा क्रियते यजुषा पच्यते यजुषा वि मुच्यते यदुखा सा वा एषैतर्हि यातयाम्नी सा न पुनः प्रयुज्येत्याहुरग्ने युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाꣳ इत्युखायां जुहोति तेनैवैनां पुनः प्र युङ्क्ते तेनायातयाम्नी यो वा अग्निं योग आगते युनक्ति युङ्क्ते युञ्जानेष्वग्ने

१६ युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाꣳ इत्याहैष वा अग्नेर्योगस्तेनैवैनं युनक्ति युङ्क्ते युञ्जानेषु ब्रह्मवादिनो वदन्ति न्यङ्ङग्निश्चेतव्या(३) उत्ताना(३) इति वयसां वा एष प्रतिमया चीयते यदग्निर्यन्न्यञ्चं चिनुयात्पृष्टित एनमाहुतय ऋच्छेयुर्यदुत्तानं न पतितुꣳ शक्नुयादसुवर्ग्योऽस्य स्यात्प्राचीनमुत्तानं

१७ पुरुषशीर्‌षमुप दधाति मुखत एवैनमाहुतय ऋच्छन्ति नोत्तानं चिनुते सुवर्ग्योऽस्य भवति सौर्या जुहोति चक्षुरेवास्मिन्प्रति दधाति द्विर्जुहोति द्वे हि चक्षुषी समान्या जुहोति समानꣳ हि चक्षुः समृद्ध्यै देवासुराः संयत्ता आसन्ते वामं वसु सं न्यदधत तद्देवा वामभृतावृञ्जत तद्वामभृतो वामभृत्त्वं यद्वामभृतमुप दधाति वाममेव तया वसु यजमानो भ्रातृव्यस्य वृङ्क्ते हिरण्यमूर्ध्नी भवति ज्योतिर्वै हिरण्यं ज्योतिर्वामं ज्योतिषैवास्य ज्योतिर्वामं वृङ्क्ते द्वियजुर्भवति प्रतिष्ठित्यै ॥ ५। ५। ३॥ युञ्जानेष्वग्ने प्राचीनमुत्तानं वामभृतश्चतुर्विꣳशतिश्च ॥ ५। ५। ३॥

१८ आपो वरुणस्य पत्नय आसन्ता अग्निरभ्यध्यायत्ताः समभवत्तस्य रेतः परापतत्तदियमभवद्यद्द्वितीयं परापतत्तदसावभवदियं वै विराडसौ स्वराड्यद्विराजावुपदधातीमे एवोप धत्ते यद्वा असौ रेतः सिञ्चति तदस्यां प्रति तिष्ठति तत्प्र जायते ता ओषधयो

१९ वीरुधो भवन्ति ता अग्निरत्ति य एवं वेद प्रैव जायतेऽन्नादो भवति यो रेतस्वी स्यात्प्रथमायां तस्य चित्यामुभे उप दध्यादिमे एवास्मै समीची रेतः सिञ्चतो यः सिक्तरेताः स्यात्प्रथमायां तस्य चित्यामन्यामुप दध्यादुत्तमायामन्याꣳ रेत एवास्य सिक्तमाभ्यामुभयतः परि गृह्णाति संवथ्सरं न क

२० श्चन प्रत्यवरोहेन्न हीमे कं चन प्रत्यवरोहतस्तदेनयोर्व्रतं यो वा अपशीर्षाणमग्निं

चिनुतेऽपशीर्षामुष्मि३ꣳ ल्लोके भवति यः सशीर्षाणं चिनुते सशीर्षामुष्मि३ꣳ ल्लोके भवति चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन्वीतिहोत्रा ऋतावृधः समुद्रस्य वयुनस्य पत्मञ्जुहोमि विश्वकर्मणे विश्वाहामर्त्यꣳ हविरिति स्वयमातृण्णामुपधाय जुहोत्ये

२१ तद्वा अग्नेः शिरः सशीर्षाणमेवाग्निं चिनुते सशीर्षामुष्मि३ꣳ ल्लोके भवति य एवं वेद सुवर्गाय वा एष लोकाय चीयते यदग्निस्तस्य यदयथापूर्वं क्रियतेऽसुवर्ग्यमस्य तथ्सुवर्ग्योऽग्निश्चितिमुपधायाभि मृशेच्चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान्राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्येति यथापूर्वमेवैनामुप धत्ते प्राञ्चमेनं चिनुते सुवर्ग्योऽस्य भवति ॥

५। ५। ४॥ ओषधयः कञ्जुहोति स्वपत्यायाऽष्टादश च ॥ ५। ५। ४॥

२२ विश्वकर्मा दिशां पतिः स नः पशून्पातु सोऽस्मान्पातु तस्मै नमः प्रजापती रुद्रो वरुणोऽग्निर्दिशां पतिः स नः पशून्पातु सोऽस्मान्पातु तस्मै नम एता वै देवता एतेषां पशूनामधिपतयस्ताभ्यो वा एष आ वृश्च्यते यः पशुशीर्षाण्युपदधाति हिरण्येष्टका उप दधात्येताभ्य एव देवताभ्यो नमस्करोति ब्रह्मवादिनो

२३ वदन्त्यग्नौ ग्राम्यान्पशून् प्र दधाति शुचारण्यानर्पयति किं तत उच्छिꣳषतीति यद्धिरण्येष्टका उपदधात्यमृतं वै हिरण्यममृतेनैव ग्राम्येभ्यः पशुभ्यो भेषजं करोति नैनान्, हिनस्ति प्राणो वै प्रथमा स्वयमातृण्णा व्यानो द्वितीयापानस्तृतीयानु प्राण्यात्प्रथमाग् स्वयमातृण्णामुपधाय प्राणेनैव प्राणꣳ समर्धयति व्यन्याद्

२४ द्वितीयामुपधाय व्यानेनैव व्यानꣳ समर्धयत्यपान्यात् तृतीयामुपधायापानेनैवापानꣳ समर्धयत्यथो प्राणैरेवैनꣳ समिन्द्धे भूर्भुवः सुवरिति स्वयमातृण्णा उप दधातीमे वै लोकाः स्वयमातृण्णा एताभिः खलु वै व्याहृतीभिः प्रजापतिः प्राजायत यदेताभिर्व्याहृतीभिः स्वयमातृण्णा उपदधातीमानेव लोकानुपधायैषु

२५ लोकेष्वधि प्र जायते प्राणाय व्यानायापानाय वाचे त्वा चक्षुषे त्वा तया देवतयाङ्गिरस्वद्ध्रुवा सीदाग्निना वै देवाः सुवर्गं लोकमजिगाꣳसन्तेन पतितुं नाशक्नुवन्त एताश्चतस्रः स्वयमातृण्णा अपश्यन्ता दिक्षूपादधत तेन सर्वतश्चक्षुषा सुवर्गं लोकमायन् यच्चतस्रः स्वयमातृण्णा दिक्षूपदधाति सर्वतश्चक्षुषैव तदग्निना यजमानः सुवर्गं लोकमेति

॥ ५। ५। ५॥ ब्रह्मवादिनो व्यन्यादेषु यजमानस्त्रीणि च ॥ ५। ५। ५॥

२६ अग्न आ याहि वीतय इत्याहाह्वतैवैनमग्निं दूतं वृणीमह इत्याह हुत्वैवैनं

वृणीतेऽग्निनाग्निः समिध्यत इत्याह समिन्ध एवैनमग्निर्वृत्राणि जङ्घनदित्याह समिद्ध
एवास्मिन्निंद्रियं दधात्यग्नेः स्तोमं मनामह इत्याह मनुत एवैनमेतानि वा अह्नाꣳरूपाण्य
२७ न्वहमेवैनं चिनुतेऽवाह्नाꣳरूपाणि रुंधे ब्रह्मवादिनो वदन्ति कस्मात्सत्याद्यातयाम्नीरन्या
इष्टका अयातयाम्नी लोकं पृणेत्यैन्द्राग्नी हि बार्हस्पत्येति ब्रूयादिन्द्राग्नी च हि देवानां
बृहस्पतिश्चायातयामानोऽनुचरवती भवत्यजामित्वायानुष्टुभानु चरत्यात्मा वै लोकं पृणा
प्राणोऽनुष्टुप्तस्मात्प्राणः सर्वाण्यङ्गान्यनु चरति ता अस्य सूददोहस
२८ इत्याह तस्मात्परुषिपरुषि रसः सोमग्ग् श्रीणन्ति पृश्नय इत्याहान्नं वै
पृश्न्यन्नमेवाव रुंधेऽर्को वा अग्निरर्कोऽन्नमन्नमेवाव रुंधे जन्मन्देवानां विशस्त्रिष्वा रोचने
दिव इत्याहेमानेवास्मै लोकाञ्ज्योतिष्मतः करोति यो वा इष्टकानां प्रतिष्ठां वेद प्रत्येव
तिष्ठति तया देवतयाङ्गिरस्वद्ध्रुवा सीदेत्याहैषा वा इष्टकानां प्रतिष्ठा य एवं वेद प्रत्येव
तिष्ठति ॥ ५। ५। ६॥ रूपाणि सूददोहसस्तया षोडश च ॥ ५। ५। ६॥
२९ सुवर्गाय वा एष लोकाय चीयते यदग्निर्वज्र एकादशिनी यदग्नावेकादशिनीं
मिनुयाद्वज्रेणैनꣳ सुवर्गाल्लोकादन्तर्दध्याद्यन्न मिनुयात्स्वरुभिः पशून्व्यर्धयेदेकयूपं मिनोति
नैनं वज्रेण सुवर्गाल्लोकादन्तर्दधाति न स्वरुभिः पशून्व्यर्धयति वि वा एष इन्द्रियेण
वीर्येणर्ध्यते योऽग्निं चिन्वन्नधि क्रामत्यैन्द्रिय
३० र्चा क्रमणं प्रतीष्टकामुप दध्यान्नेन्द्रियेण वीर्येण व्यृध्यते रुद्रो वा एष यदग्निस्तस्य
तिस्रः शरव्याः प्रतीची तिरश्च्यनूची ताभ्यो वा एष आ वृश्च्यते योऽग्निं चिनुतेऽग्निं चित्वा
तिसृधन्वमयाचितं ब्राह्मणाय दद्यात्ताभ्य एव नमस्करोत्यथो ताभ्य एवात्मानं निष्क्रीणीते
यत्ते रुद्र पुरो
३१ धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र संवथ्सरेण नमस्करोमि यत्ते रुद्र दक्षिणा
धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र परिवथ्सरेण नमस्करोमि यत्ते रुद्र पश्चाद्धनुस्तद्वातो
अनु वातु ते तस्मै ते रुद्रेदावथ्सरेण नमस्करोमि यत्ते रुद्रोत्तराद्धनुस्तद्
३२ वातो अनु वातु ते तस्मै ते रुद्रेदुवथ्सरेण नमस्करोमि यत्ते रुद्रोपरि धनुस्तद्वातो
अनु वातु ते तस्मै ते रुद्र वथ्सरेण नमस्करोमि रुद्रो वा एष यदग्निः स यथा व्याघ्रः
क्रुद्धस्तिष्ठत्येवं वा एष एतर्हि संचितमेतैरुप तिष्ठते नमस्कारैरेवैनꣳशमयति येऽग्नयः
३३ पुरीष्याः प्रविष्टाः पृथिवीमनु । तेषां त्वमस्युत्तमः प्रणो जीवातवे सुव ॥ आपं
त्वाग्ने मनसापं त्वाग्ने तपसापं त्वाग्ने दीक्षयापं त्वाग्न उपसद्भिरापं त्वाग्ने सुत्ययापं

त्वाग्ने दक्षिणाभिरापं त्वाग्नेऽवभृथेनापं त्वाग्ने वशयापं त्वाग्ने स्वगाकारेणेत्याहैषा वा अग्नेराप्तिस्तयैवैनमाप्नोति ॥ ५। ५। ७॥ ऐंद्रिया पुर उत्तराद्धनुस्तदग्नय आहाष्टौ च ॥ ५। ५। ७॥

३४ गायत्रेण पुरस्तादुप तिष्ठते प्राणमेवास्मिन्दधाति बृहद्रथंतराभ्यां पक्षावोज एवास्मिन्दधात्यृतुस्था यज्ञायज्ञियेन पुच्छमृतुष्वेव प्रति तिष्ठति पृष्ठैरुप तिष्ठते तेजो वै पृष्ठानि तेज एवास्मिन्दधाति प्रजापतिरग्निमसृजत सोऽस्मात्सृष्टः पराङैत्तं वारवन्तीयेनावारयत तद्वारवन्तीयस्य वारवन्तीयत्व२ँ श्यैतेन श्येती अकुरुत तच्छ्यैतस्य श्यैतत्वं

३५ यद्वारवन्तीयेनोपतिष्ठते वारयत एवैनग्ग् श्यैतेन श्येती कुरुते प्रजापतेर् हृदयेनापि पक्षं प्रत्युप तिष्ठते प्रेमाणमेवास्य गच्छति प्राच्या त्वा दिशा सादयामि गायत्रेण छंदसाग्निना देवतयाग्नेः शीर्ष्णाग्नेः शिर उप दधामि दक्षिणया त्वा दिशा सादयामि त्रैष्टुभेन छंदसेन्द्रेण देवतयाग्नेः पक्षेणाग्नेः पक्षमुप दधामि प्रतीच्या त्वा दिशा सादयामि

३६ जागतेन च्छंदसा सवित्रा देवतयाग्नेः पुच्छेनाग्नेः पुच्छमुप दधाम्युदीच्या त्वा दिशा सादयाम्यानुष्टुभेन छंदसा मित्रावरुणाभ्यां देवतयाग्नेः पक्षेणाग्नेः पक्षमुप दधाम्यूर्ध्वया त्वा दिशा सादयामि पाङ्क्तेन छंदसा बृहस्पतिना देवतयाग्नेः पृष्ठेनाग्नेः पृष्ठमुप दधामि यो वा अपात्मानमग्निं चिनुतेऽपात्माऽमुष्मि३ँ ल्लोके भवति यः सात्मानं चिनुते सात्मामुष्मि३ँ ल्लोके भवत्यात्मेष्टका उप दधात्येष वा अग्नेरात्मा सात्मानमेवाग्निं चिनुते सात्मामुष्मि३ँ ल्लोके भवति य एवं वेद ॥ ५। ५। ८॥ श्यैतत्वं प्रतीच्या त्वा दिशा सादयामि यस्सात्मानश्चिनुते द्वावि२ँशतिश्च ॥ ५। ५। ८॥

३७ अग्न उदधे यात इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्माग्ने दुध्र गह्य कि२ँशिल वन्य यात इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्म पञ्च वा एतेऽग्नयो यच्चितय उदधिरेव नाम प्रथमो दुध्रो

३८ द्वितीयो गह्यस्तृतीयः कि२ँशिलश्चतुर्थो वन्यः पञ्चमस्तेभ्यो यदाहुतीर्न जुहुयादध्वर्युं च यजमानं च प्र दहेयुर्यदेता आहुतीर्जुहोति भागधेयेनैवैनाञ्छमयति नार्तिमार्च्छत्यध्वर्युर्न यजमानो वाङ्म आसन्नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाहुवोर्बलमूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनू

३९ स्तनुवा मे सह नमस्ते अस्तु मा मा हि२ँसीरप वा एतस्मात्प्राणाः क्रामन्ति योऽग्निं

चिन्वन्नधिक्रामति वाङ्म आसन्नसोः प्राण इत्याह प्राणानेवात्मन्धत्ते यो रुद्रो अग्नौ यो
अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्त्वाहुतिभागा वा
अन्ये रुद्रा हविर्भागा
४० अन्ये शतरुद्रीयँ हुत्वा गावीधुकं चरुमेतेन यजुषा चरमायामिष्टकायां नि
दध्याद्भागधेयेनैवैनँ शमयति तस्य त्वै शतरुद्रीयँ हुतमित्याहुर्यस्यैतदग्नौ क्रियत इति
वसवस्त्वा रुद्रैः पुरस्तात्पान्तु पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्वादित्यास्त्वा
विश्वैर्देवैः पश्चात्पान्तु द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतः पातु
४१ देवास्त्वेन्द्रज्येष्ठा वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पान्तु न वा एतेन पूतो न मेध्यो
न प्रोक्षितो यदेनमतः प्राचीनं प्रोक्षति यथ्संचितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन
प्रोक्षितः ॥
५। ५। ९॥ दुध्रस्तनूर् हविर्भागाः पातु द्वात्रिँशच्च ॥ ५। ५। ९॥
४२ समीची नामासि प्राची दिक्तस्यास्तेऽग्निरधिपतिरसितो रक्षिता यश्चाधिपतिर्यश्च गोप्ता
ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधाम्योजस्विनी
नामासि दक्षिणा दिक्तस्यास्त इन्द्रोऽधिपतिः पृदाकुः प्राची नामासि प्रतीची दिक्तस्यास्ते
४३ सोमोऽधिपतिः स्वजोऽवस्थावा नामास्युदीची दिक्तस्यास्ते वरुणोऽधिपतिस्तिरश्चराजिरधिपत्नी
नामासि बृहती दिक्तस्यास्ते बृहस्पतिरधिपतिः श्वित्रो वशिनी नामासीयं दिक्तस्यास्ते
यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां
ते यं द्विष्मो यश्च
४४ नो द्वेष्टि तं वां जम्भे दधाम्येता वै देवता अग्निं चितँ रक्षन्ति ताभ्यो यदाहुतीर्न
जुहुयादध्वर्युं च यजमानं च ध्यायेयुर्यदेता आहुतीर्जुहोति भागधेयेनैवैनाञ्छमयति
नार्तिमार्च्छत्यध्वर्युर्न यजमानो हेतयो नाम स्थ तेषां वः पुरो गृहा अग्निर्व इषवः
सलिलो निलिंपा नाम
४५ स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवः सगरो वज्रिणो नाम स्थ तेषां वः
पश्चाद्गृहाः स्वप्नो व इषवो गह्वरोऽवस्थावानो नाम स्थ तेषां व उत्तराद्गृहा आपो व
इषवः समुद्रोऽधिपतयो नाम स्थ तेषां व उपरि गृहा वर्षं व इषवोऽवस्वान्क्रव्या नाम
स्थ पार्थिवास्तेषां व इह गृहा
४६ अन्नं व इषवोऽनिमिषो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो

द्वेष्टि तं वो जम्भे दधामि हुतादो वा अन्ये देवा अहुतादोऽन्ये तानग्निचिदेवोभयान्प्रीणाति दध्ना मधुमिश्रेणैता आहुतीर्जुहोति भागधेयेनैवैनान्प्रीणात्यथो खल्वाहुरिष्टका वै देवा अहुताद इत्य
४७ नुपरिक्रामं जुहोत्यपरिवर्गमेवैनान्प्रीणातीम२ँ स्तनमूर्जस्वन्तं धयापां प्रप्यातमग्ने सरिरस्य मध्ये । उत्सं जुषस्व मधुमन्तमूर्व समुद्रियँ सदनमा विशस्व ॥ यो वा अग्निं प्रयुज्य न विमुञ्चति यथाश्वो युक्तोऽविमुच्यमानः, क्षुध्यन्पराभवत्येवमस्याग्निः परा भवति तं पराभवन्तं यजमानोऽनु परा भवति सोऽग्निं चित्वा लूक्षो
४८ भवतीम२ँ स्तनमूर्जस्वन्तं धयापामित्याज्यस्य पूर्णाग् स्रुचं जुहोत्येष वा अग्नेर्विमोको विमुच्यैवास्मा अन्नमपि दधाति तस्मादाहुर्यश्चैवं वेद यश्च न सुधायँ ह वै वाजी सुहितो दधातीत्यग्निर्वाव वाजी तमेव तत्प्रीणाति स एनं प्रीतः प्रीणाति वसीयान्भवति ॥ ५। ५। १०॥ प्रतीची दिक्तस्यास्ते द्विष्मो यश्च निलिंपा नामेह गृहा इति लूक्षो वसीयान्भवति ॥ ५। ५। १०॥
४९ इन्द्राय राज्ञे सूकरो वरुणाय राज्ञे कृष्णो यमाय राज्ञ ऋश्य ऋषभाय राज्ञे गवयः शार्दूलाय राज्ञे गौरः पुरुषराजाय मर्कटः, क्षिप्रश्येनस्य वर्तिका नीलङ्गोः क्रिमिः सोमस्य राज्ञः कुलुङ्गः सिन्धोः शिँशुमारो हिमवतो हस्ती ॥ ५। ५। ११॥ इंद्राय राज्ञेऽष्टा विँशतिः ॥ ५। ५। ११॥
५० मयुः प्राजापत्य ऊलो हलीक्ष्णो वृषदँशस्ते धातुः सरस्वत्यै शारिः श्येता पुरुषवाक्सरस्वते शुकः श्येतः पुरुषवागारण्योऽजो नकुलः शका ते पौष्णा वाचे क्रौञ्चः ॥ ५। ५। १२॥ मयुस्त्रयोविँशतिः ॥ ५। ५। १२॥
५१ अपां नप्त्रे जषो नाक्रो मकरः कुलीकयस्तेऽकूपारस्य वाचे पैङ्गराजो भगाय कुषीतक आतीवाहसो दर्विदाते वायव्या दिग्भ्यश्चक्रवाकः ॥ ५। ५। १३॥ अपामेकान्न विँशतिः ॥ ५। ५। १३॥
५२ बलायाजगर आखुः सृजया शयण्डकस्ते मैत्रा मृत्यवेऽसितो मन्यवे स्वजः कुंभीनसः पुष्करसादो लोहिताहिस्ते त्वाष्ट्राः प्रतिश्रुत्कायै वाहसः ॥ ५। ५। १४॥
५३ पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पतीनामेण्यह्ने कृष्णो रात्रियै पिकः, क्ष्विङ्का नीलशीर्ष्णी तेऽर्यम्णे धातुः कत्कटः ॥ ५। ५। १५॥
५४ सौरी बलाकश्र्यो मयूरः श्येनस्ते गन्धर्वाणां वसूनां कपिञ्जलो रुद्राणां तित्तिरी रोहित्कुण्डृणाची गोलत्तिका ता अप्सरसामरण्याय सृमरः ॥ ५। ५। १६॥

५५ पृषतो वैश्वदेवः पित्वो न्यङ्कुः कशस्तेऽनुमत्या अन्यवापोऽर्धमासानां मासां कश्यपः
क्वयिः कुटरुर्दात्यौहस्ते सिनीवाल्यै बृहस्पतये शित्पुटः ॥ ५। ५। १७॥
५६ शका भौमी पान्त्रः कशो मान्थीलवस्ते पितृणामृतूनां जहका संवथ्सराय लोपा
कपोत उलूकः शशस्ते नैरृताः कृकवाकुः सावित्रः ॥ ५। ५। १८॥ बलाय पुरुषमृगः
सौरी पृषतः शकाष्टादशाष्टादश ॥ ५। ५। १८॥
५७ रुरू रौद्रः कृकलासः शकुनिः पिप्पका ते शरव्यायै हरिणो मारुतो ब्रह्मणे
शार्गस्तरक्षुः कृष्णः श्वा चतुरक्षो गर्दभस्त इतर जनानामग्नये धूङ्क्षा ॥ ५। ५। १९॥
रुरुर्विꣳशतिः ॥ ५। ५। १९॥
५८ अलज आन्तरिक्ष उद्रो मद्गुः प्लवस्तेऽपामदित्यै हꣳससाचिरिन्द्राण्यै कीर्शा गृध्रः
शितिकक्षी वार्ध्राणसस्ते दिव्या द्यावापृथिव्या श्वावित् ॥ ५। ५। २०॥
५९ सुपर्णः पार्जन्यो हꣳसो वृको वृषदꣳशस्त ऐन्द्रा अपामुद्रोऽर्यम्णे लोपाशः
सिꣳहो नकुलो व्याघ्रस्ते महेन्द्राय कामाय परस्वान् ॥ ५। ५। २१॥ अलजः
सुपर्णोऽष्टादशाष्टादश ॥
५। ५। २१॥
६० आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः
शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः सꣳहितोऽधोरामः सावित्रो वारुणः
पेत्वः ॥ ५। ५। २२॥ आग्नेयो द्वाविꣳशतिः ॥ ५। ५। २२॥
६१ अश्वस्तूपरो गोमृगस्ते प्राजापत्या आग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ शितिपृष्ठौ
बार्हस्पत्यौ धात्रे पृषोदरः सौर्यो बलक्षः पेत्वः ॥ ५। ५। २३॥ अश्वष्षोडश ॥ ५। ५।
२३॥
६२ अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ
पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः कृष्ण
एकशितिपात्पेत्वः ॥ ५। ५। २४॥ अग्नयेऽनीकवते द्वाविꣳशतिः ॥ ५। ५। २४॥
यदेकेन प्रजापतिः प्रेणाऽनु यजुषाऽपो विश्वकर्माऽग्न आ याहि सुवर्गाय वज्रो
गायत्रेणाऽग्न उदधे समीचींद्राय मयुरपां बलाय पुरुषमृगः सौरी पृषतः शका रुरुरलजः
सुपर्ण आग्नेयोऽश्वोऽग्नयेऽनीकवते चतुर्विꣳशतिः ॥
यदेकेन स पापीयानेतद्वा अग्नेर्धनुस्तद्देवास्त्वेंद्रज्येष्ठा अपान्नप्त्रेऽश्वस्तूपरो द्विषष्टिः ॥
यदेकेनैकशितिपात्पेत्वः ॥

## पञ्चमकाण्डे षष्ठः प्रश्नः ६

१ हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । अग्निं या गर्भं दधिरे
विरूपास्तान आपः श२ँ स्योना भवन्तु ॥
यासा२ँ राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्चुतः शुचयो
याः पावकास्तान आपः श२ँ स्योना भवन्तु ॥ यासां देवा दिवि कृण्वन्ति भक्षं या
अन्तरिक्षे बहुधा भवन्ति । याः पृथिवीं पयसोऽन्दन्ति
२ शुक्रास्ता न आपः श२ँ स्योना भवन्तु ॥ शिवेन मा चक्षुषा पश्यतापः शिवया
तनुवोऽप स्पृशत त्वचम् मे । सर्वा२ँ अग्नी२ँ रप्सुषदो हुवे वो मयि वर्चो बलमोजो
नि धत्त ॥ यददः सं प्रयतीरहावनदताहे ते । तस्मादा नद्यो नाम स्थ ता वो नामानि
सिन्धवः ॥ यत्प्रेषिता वरुणेन ताः शीभ२ँ समवल्गत ।
३ तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु स्थन ॥ अपकाम२ँ स्यन्दमाना अवीवरत
वो हिकम् । इन्द्रो वः शक्तिभिर्देवीस्तस्माद्वार्णाम वो हितम् ॥ एको देवो
अप्यतिष्ठथ्स्यन्दमाना यथावशम् । उदानिषुर्महीरिति तस्मादुदकमुच्यते ॥ आपो भद्रा
घृतमिदाप आसुरग्नीषोमौ बिभ्रत्याप इत्ताः । तीव्रो रसो मधुपृचा
४ मरंगम आ मा प्राणेन सह वर्चसागन् ॥ आदित्पश्याम्युत वा शृणोम्या मा घोषो
गच्छति वाङ्ङ आसाम् । मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः ॥
आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वः शिवतमो
रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ तस्मा अरं गमाम वो यस्य क्षयाय
जिन्वथ । आपो जनयथा च नः ॥ दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या संभव
ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वा ॥ ५। ६। १॥
उन्दन्ति समवल्गत मधुपृचा मातरो द्वाविꣳशतिश्च ॥ ५। ६। १॥
५ अपां ग्रहान्गृह्णात्येतद्वाव राजसूयं यदेते ग्रहाः सवोऽग्निर्वरुणसवो
राजसूयमग्निसवश्चित्यस्ताभ्यामेव सूयतेऽथो उभावेव लोकावभि जयति
यश्च राजसूयेनेजानस्य यश्चाग्निचित आपो भवन्त्यापो वा अग्नेर्भ्रातृव्या
यदपोऽग्नेरधस्तादुपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य भ्रातृव्यो भवत्यमृतं
६ वा आपस्तस्मादद्भिरवतान्तमभि षिञ्चन्ति नार्तिमार्च्छति सर्वमायुरेति यस्यैता
उपधीयन्ते य उ चैना एवं वेदान्नं वा आपः पशव आपोऽन्नं पशवोऽन्नादः पशुमान्भवति

यस्यैता उपधीयन्ते य उ चैना एवं वेद द्वादश भवन्ति द्वादश मासाः संवथ्सरः संवथ्सरेणैवास्मा
७ अन्नमव रुंधे पात्राणि भवन्ति पात्रे वा अन्नमद्यते सयोन्येवान्नमव रुंध आ द्वादशात्पुरुषादन्नमत्त्यथो पात्रान्न छिद्यते यस्यैता उपधीयन्ते य उ चैना एवं वेद कुंभाश्च कुंभीश्च मिथुनानि भवन्ति मिथुनस्य प्रजात्यै प्र प्रजया पशुभिर्मिथुनैर्जायते यस्यैता उपधीयन्ते य उ
८ चैना एवं वेद शुग्वा अग्निः सोऽध्वर्युं यजमानं प्रजाः शुचार्पयति यदप उपदधाति शुचमेवास्य शमयति नार्तिमार्च्छत्यध्वर्युर्न यजमानः शाम्यन्ति प्रजा यत्रैता उपधीयन्तेऽपां वा एतानि हृदयानि यदेता आपो यदेता अप उपदधाति दिव्याभिरेवैनाः सꣳ सृजति वर्षुकः पर्जन्यो
९ भवति यो वा एतासामायतनं क्लृप्तिं वेदायतनवान्भवति कल्पतेऽस्मा अनुसीतमुप दधात्येतद्वा आसामायतनमेषा क्लृप्तिर्य एवं वेदायतनवान्भवति कल्पतेऽस्मै द्वंद्वमन्या उप दधाति चतस्रो मध्ये धृत्या अन्नं वा इष्टका एतत्खलु वै साक्षादन्नं यदेष चरुर्यदेतं चरुमुपदधाति साक्षा
१० देवास्मा अन्नमव रुंधे मध्यत उप दधाति मध्यत एवास्मा अन्नं दधाति तस्मान्मध्यतोऽन्नमद्यते बार्हस्पत्यो भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मा अन्नमव रुंधे ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वेत्याह तेजस्वी ब्रह्मवर्चसी भवति यस्यैष उपधीयते य उ चैनमेवं वेद ॥ ५। ६। २॥ अमृतमस्मै जायते यस्यैता उपधीयन्ते य उ पर्जन्य उपदधाति साक्षाथ्सप्त चत्वारिꣳशच्च ॥ ५। ६। २॥
११ भूतेष्टका उप दधात्यत्रात्र वै मृत्युर्जायते यत्रयत्रैव मृत्युर्जायते तत एवैनमव यजते तस्मादग्निचिथ्सर्वमायुरेति सर्वे ह्यस्य मृत्यवोऽवेष्टास्तस्मादग्निचिन्नाभिचरित वै प्रत्यगेनमभिचारः स्तृणुते सूयते वा एष योऽग्निं चिनुते देवसुवामेतानि हवीꣳषि भवन्त्येतावन्तो वै देवानाꣳसवास्त एवा
१२ ऽस्मै सवान् प्र यच्छन्ति त एनꣳ सुवन्ते सवोऽग्निर्वरुणसवो राजसूयं ब्रह्मसवश्चित्यो देवस्य त्वा सवितुः प्रसव इत्याह सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरभि षिंचत्यन्नस्यान्नस्याभि षिंचत्यन्नस्यान्नस्यावरुद्ध्यै पुरस्तात्प्रत्यञ्चमभि षिंचति पुरस्ताद्धि प्रतीचीनमन्नमद्यते शीर्षतोऽभि षिंचति शीर्षतो ह्यन्नमद्यत आ मुखादन्ववस्रावयति

१३ मुखत एवास्मा अन्नाद्यं दधात्यग्नेस्त्वा साम्राज्येनाभिषिञ्चामीत्याहैष वा अग्नेः सवस्तेनैवैनमभि षिञ्चति बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवैनमभि षिञ्चतीन्द्रस्य त्वा साम्राज्येनाभि षिञ्चामीत्याहेन्द्रियमेवास्मिन्नुपरिष्टाद्दधात्येत
१४ द्वै राजसूयस्य रूपं य एवं विद्वानग्निं चिनुत उभावेव लोकावभि जयति यश्च राजसूयेनेजानस्य यश्चाग्निचित इन्द्रस्य सुषुवाणस्य दशधेंद्रियं वीर्यं परापतत्तद्देवाः सौत्रामण्या समभरन्थ्सूयते वा एष योऽग्निं चिनुतेऽग्निं चित्वा सौत्रामण्या यजेतेन्द्रियमेव वीर्यꣳ संभृत्यात्मन्धत्ते ॥ ५। ६। ३॥ त एवाऽन्ववस्रावयत्येतदष्टा चत्वारिꣳशच्च ॥ ५। ६। ३॥
१५ सजूरब्दोऽयावभिः सजूरुषा अरुणीभिः सजूः सूर्य एतशेन सजोषावश्विना दꣳसोभिः सजूरग्निर्वैश्वानर इडाभिर्घृतेन स्वाहा संवथ्सरो वा अब्दो मासा अयावा उषा अरुणीः सूर्य एतश इमे अश्विना संवथ्सरोऽग्निर्वैश्वानरः पशव इडा पशवो घृतꣳ संवथ्सरं पशवोऽनु प्र जायन्ते संवथ्सरेणैवास्मै पशून् प्र जनयति दर्भस्तम्बे जुहोति यद्
१६ वा अस्या अमृतं यद्वीर्यं तद्दर्भास्तस्मिञ्जुहोति प्रैव जायतेऽन्नादो भवति यस्यैवं जुह्वत्येता वै देवता अग्नेः पुरस्ताद्भागास्ता एव प्रीणात्यथो चक्षुरेवाग्नेः पुरस्तात्प्रति दधात्यनन्धो भवति य एवं वेदापो वा इदमग्रे सलिलमासीथ्स प्रजापतिः पुष्करपर्णे वातो भूतोऽलेलायथ्सः
१७ प्रतिष्ठां नाविन्दत स एतदपां कुलायमपश्यत्तस्मिन्नग्निमचिनुत तदियमभवत्ततो वै स प्रत्यतिष्ठद्यां पुरस्तादुपादधात्तच्छिरोऽभवथ्सा प्राची दिग्यां दक्षिणत उपादधाथ्स दक्षिणः पक्षोऽभवथ्सा दक्षिणा दिग्यां पश्चादुपादधात्तत्पुच्छमभवथ्सा प्रतीची दिग्यामुत्तरत उपादधाथ्
१८ स उत्तरः पक्षोऽभवथ्सोदीची दिग्यामुपरिष्टादुपादधात् तत् पृष्ठमभवथ् सोर्ध्वा दिगियं वा अग्निः पञ्चेष्टकस्तस्माद्यदस्यां खनन्त्यभीष्टकां तृन्दन्त्यभि शर्कराꣳ सर्वा वा इयं वयोभ्यो नक्तं दृशे दीप्यते तस्मादिमां वयाꣳसि नक्तं नाध्यासते य एवं विद्वानग्निं चिनुते प्रत्येव
१९ तिष्ठत्यभि दिशो जयत्याग्नेयो वै ब्राह्मणस्तस्माद्ब्राह्मणाय सर्वासु दिक्ष्वर्धुकग्ग् स्वामेव तद्दिशमन्वेत्यपां वा अग्निः कुलायं तस्मादापोऽग्निꣳ हारुकाः स्वामेव तद्योनिं प्र विशन्ति ॥ ५। ६। ४॥

यदलेलायथ्स उत्तरत उपादधादेव द्वा त्रिꣳशच्च ॥ ५। ६। ४॥
२० संवथ्सरमुख्यं भृत्वा द्वितीये संवथ्सर आग्नेयमष्टाकपालं निर्वपेदैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुं वैष्णवं त्रिकपालं तृतीये संवथ्सरेऽभिजिता यजेत यदष्टाकपालो भवत्यष्टाक्षरा गायत्र्याग्नेयं गायत्रं प्रातःसवनं प्रातःसवनमेव तेन दाधार गायत्रीं छन्दो यदेकादशकपालो भवत्येकादशाक्षरा त्रिष्टुगैन्द्रं त्रैष्टुभं माध्यंदिनꣳ सवनं माध्यंदिनमेव सवनं तेन दाधार त्रिष्टुभं
२१ छन्दो यद्द्वादशकपालो भवति द्वादशाक्षरा जगती वैश्वदेवं जागतं तृतीयसवनं तृतीयसवनमेव तेन दाधार जगतीं छन्दो यद्बार्हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मैव तेन दाधार यद्वैष्णवस्त्रिकपालो भवति यज्ञो वै विष्णुर्यज्ञमेव तेन दाधार यत्तृतीये संवथ्सरेऽभिजिता यजतेऽभिजित्यै यथ्संवथ्सरमुख्यं बिभर्तीममेव
२२ तेन लोकꣳ स्पृणोति यद्द्वितीये संवथ्सरेऽग्निं चिनुतेऽन्तरिक्षमेव तेन स्पृणोति यत्तृतीये संवथ्सरे यजतेऽमुमेव तेन लोकꣳ स्पृणोत्येतं वै पर आट्णारः कक्षीवाꣳ औशिजो वीतहव्यः श्रायसस्त्रसदस्युः पौरुकुथ्स्यः प्रजाकामा अचिन्वत ततो वै ते सहस्रꣳ सहस्रं पुत्रानविन्दन्त प्रथते प्रजया पशुभिस्तां मात्रामाप्नोति यां तेऽगच्छन्, य एवं विद्वानेतमग्निं चिनुते ॥ ५। ६। ५॥ दाधार त्रिष्टुभमिममेवैवं चत्वारि च ॥ ५। ६। ५॥
२३ प्रजापतिरग्निमचिनुत स क्षुरपविर्भूत्वातिष्ठत्तं देवा बिभ्यतो नोपायन्ते छन्दोभिरात्मानं छादयित्वोपायन्तच्छंदसां छंदस्त्वं ब्रह्म वै छन्दाꣳसि ब्रह्मण एतद्रूपं यत्कृष्णाजिनं कार्ष्णी उपानहावुप मुञ्चते छन्दोभिरेवात्मानं छादयित्वाग्निमुप चरत्यात्मनोऽहिꣳसायै देवनिधिर्वा एष नि धीयते यदग्नि
२४ रन्ये वा वै निधिमगुप्तं विन्दन्ति न वा प्रति प्र जानात्युखामा क्रामत्यात्मानमेवाधिपां कुरुते गुप्त्या अथो खल्वाहुर्नाक्रम्येति नैर्ऋत्युखा यदाक्रामेन्निर्ऋत्या आत्मानमपि दध्यात्तस्मान्नाक्रम्या पुरुषशीर्षमुप दधाति गुप्त्या अथो यथा ब्रूयादेतन्मे गोपायेति तादृगेव तत्
२५ प्रजापतिर्वा अथर्वाग्निरेव दध्यङ्ङाथर्वणस्तस्येष्टका अस्थान्येतꣳ ह वाव तदृषिरभ्यनूवाचेन्द्रो दधीचो अस्थभिरिति यदिष्टकाभिरग्निं चिनोति सात्मानमेवाग्निं चिनुते सात्मामुष्मिꣳल्लोके भवति य एवं वेद शरीरं वा एतदग्नेर्यच्चित्य आत्मा वैश्वानरो यच्चिते वैश्वानरं जुहोति शरीरमेव सग्ग्स्कृत्या

२६ ऽभ्यारोहति शरीरं वा एतद्यजमानः स२ँ स्कुरुते यदग्निं चिनुते यच्चिते वैश्वानरं जुहोति शरीरमेव सग्ग्स्कृत्यात्मनाभ्यारोहति तस्मात्तस्य नाव द्यन्ति जीवन्नेव देवानप्येति वैश्वानर्यर्चा पुरीषमुप दधातीयं वा अग्निर्वैश्वानरस्तस्यैषा चितिर्यत्पुरीषमग्निमेव वैश्वानरं चिनुत एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियामेवास्य तनुवमव रुंधे ॥ ५। ६। ६॥ अग्निस्तथ्सग्ग्स्कृत्याऽग्नेर्दश च ॥ ५। ६। ६॥

२७ अग्नेर्वै दीक्षया देवा विराजमाप्नुवन्तिस्रो रात्रीर्दीक्षितः स्यात्त्रिपदा विराड्विराजमाप्नोति षड्रात्रीर्दीक्षितः स्यात् षड्वा ऋतवः संवथ्सरः संवथ्सरो विराड्विराजमाप्नोति दश रात्रीर्दीक्षितः स्याद्दशाक्षरा विराड्विराजमाप्नोति द्वादश रात्रीर्दीक्षितः स्याद्द्वादश मासाः संवथ्सरः संवथ्सरो विराड्विराजमाप्नोति त्रयोदश रात्रीर्दीक्षितः स्यात्त्रयोदश

२८ मासाः संवथ्सरः संवथ्सरो विराड्विराजमाप्नोति पञ्चदश रात्रीर्दीक्षितः स्यात्पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवथ्सर आप्यते संवथ्सरो विराड्विराजमाप्नोति सप्तदश रात्रीर्दीक्षितः स्याद्द्वादश मासाः पञ्चर्तवः स संवथ्सरः संवथ्सरो विराड्विराजमाप्नोति चतुर्वि२ँ शति२ँ रात्रीर्दीक्षितः स्याच्चतुर्वि२ँ शतिरर्धमासाः संवथ्सरः संवथ्सरो विराड्विराजमाप्नोति त्रि२ँ शत२ँ रात्रीर्दीक्षितः स्यात्

२९ त्रि२ँ शदक्षरा विराड्विराजमाप्नोति मासं दीक्षितः स्याद्यो मासः स संवथ्सरः संवथ्सरो विराड्विराजमाप्नोति चतुरो मासो दीक्षितः स्याच्चतुरो वा एतं मासो वसवोऽबिभरुस्ते पृथिवीमाजयन्गायत्रीं छन्दोऽष्टौ रुद्रास्तेऽन्तरिक्षमाजयन्त्रिष्टुभं छन्दो द्वादशादित्यास्ते दिवमाजयञ्जगतीं छंदस्ततो वै ते व्यावृतमगच्छञ्छ्रैष्ठ्यं देवानां तस्माद्द्वादश मासो भृत्वाग्निं चिन्वीत द्वादश मासाः संवथ्सरः संवथ्सरोऽग्निश्चित्यस्तस्याहोरात्राणीष्टका आप्तेष्टकमेनं चिनुतेऽथो व्यावृतमेव गच्छति श्रैष्ठ्य२ँ समानानाम् ॥

५। ६। ७॥ स्यात्त्रयोदश त्रि२ँ शत२ँ रात्रीर्दीक्षितः स्याद्द्वे तेऽष्टावि२ँशतिश्च ॥ ५। ६। ७॥

३० सुवर्गाय वा एष लोकाय चीयते यदग्निस्तं यन्नान्वारोहेथ्सुवर्गाल्लोकाद्यजमानो हीयेत पृथिवीमाक्रमिषं प्राणो मा मा हासीदन्तरिक्षमाक्रमिषं प्रजा मा मा हासीद्दिवमाक्रमिष२ँ सुवरगन्मेत्याहैष वा अग्नेरन्वारोहस्तेनैवैनमन्वारोहति सुवर्गस्य लोकस्य समष्ट्यै यत्पक्षसंमितां मिनुयात्

३१ कनीया२ँसं यज्ञक्रतुमुपेयात्पापीयस्यस्यात्मनः प्रजा स्याद्वेदिसंमितां मिनोति ज्याया२ँसमेव यज्ञक्रतुमुपैति नास्यात्मनः पापीयसी प्रजा भवति साहस्रं चिन्वीत प्रथमं

चिन्वानः सहस्रसंमितो वा अयं लोक इममेव लोकमभि जयति द्विषाहस्रं चिन्वीत द्वितीयं
चिन्वानो द्विषाहस्रं वा अन्तरिक्षमन्तरिक्षमेवाभि जयति त्रिषाहस्रं चिन्वीत तृतीयं चिन्वान
३२ स्त्रिषाहस्रो वा असौ लोकोऽमुमेव लोकमभि जयति जानुदघ्नं चिन्वीत
प्रथमं चिन्वानो गायत्रियैवेमं लोकमभ्यारोहति नाभिदघ्नं चिन्वीत द्वितीयं
चिन्वानस्त्रिष्टुभैवान्तरिक्षमभ्यारोहति ग्रीवदघ्नं चिन्वीत तृतीयं चिन्वानो जगत्यैवामुं
लोकमभ्यारोहति नाग्निं चित्वा रामामुपेयादयोनौ रेतो धास्यामीति न द्वितीयं
चित्वान्यस्य स्त्रिय
३३ मुपेयान्न तृतीयं चित्वा कां च नोपेयाद्रेतो वा एतन्नि धत्ते यदग्निं चिनुते यदुपेयाद्रेतसा
व्यृध्येताथो खल्वाहुरप्रजस्यं तद्यन्नोपेयादिति यद्रेतःसिचावुप दधाति ते एव यजमानस्य
रेतो बिभृतस्तस्मादुपेयाद्रेतसोऽस्कन्दाय त्रीणि वाव रेताꣳसि पिता पुत्रः पौत्रो
३४ यद्वे रेतःसिचावुपदध्याद्रेतोऽस्य वि च्छिंन्द्यात्तिस्र उप दधाति रेतसः संतत्या इयं वाव
प्रथमा रेतःसिग्वाग्वा इयं तस्मात्पश्यन्तीमां पश्यन्ति वाचं वदन्तीमन्तरिक्षं द्वितीया प्राणो
वा अन्तरिक्षं तस्मान्नान्तरिक्षं पश्यन्ति न प्राणमसौ तृतीया चक्षुर्वा असौ तस्मात्पश्यन्त्यमूं
पश्यन्ति चक्षुर्यजुषेमां चा
३५ ऽमूं चोप दधाति मनसा मध्यमामेषां लोकानां क्लृप्त्या अथो प्राणानामिष्टो यज्ञो
भृगुभिराशीर्दा वसुभिस्तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीयेत्याह स्तुतशस्त्रे एवैतेन
दुहे पिता मातरिश्वाच्छिद्रा पदा धा अच्छिद्रा उशिजः पदानु तक्षुः सोमो विश्वविन्नेता
नेषद्बृहस्पतिरुक्थामदानि शꣳसिषदित्याहैतद्वा अग्नेरुक्थं तेनैवैनमनु शꣳसति ॥ ५।
६। ८॥ मिनुयात्तृतीयं चिन्वानस्त्रियं पौत्रश्च वै सप्त च ॥ ५। ६। ८॥
३६ सूयते वा एषोऽग्नीनां य उखायां भ्रियते यदधः सादयेद्गर्भाः प्रपादुकाः स्युरथो
यथा सवात्प्रत्यवरोहति तादृगेव तदासन्दी सादयति गर्भाणां धृत्या अप्रपादायाथो
सवमेवैनं करोति गर्भो वा एष यदुख्यो योनिः शिक्यं यच्छिक्यादुखां निरूहेद्योनेर्गर्भं
निर्हण्यात्षडुद्यामꣳ शिक्यं भवति षोढाविहितो वै
३७ पुरुष आत्मा च शिरश्च चत्वार्यङ्गान्यात्मन्नेवैनं बिभर्ति प्रजापतिर्वा एष
यदग्निस्तस्योखा चोलूखलं च स्तनौ तावस्य प्रजा उप जीवन्ति यदुखां चोलूखलं
चोपदधाति ताभ्यामेव यजमानोऽमुष्मिꣳल्लोकेऽग्निं दुहे संवथ्सरो वा एष यदग्निस्तस्य
त्रेधाविहिता इष्टकाः प्राजापत्या वैष्णवी

३८ वैश्वकर्मणीरहोरात्राण्येवास्य प्राजापत्या यदुख्यं बिभर्ति प्राजापत्या एव तदुप धत्ते यथ्समिध आदधाति वैष्णवा वै वनस्पतयो वैष्णवीरेव तदुप धत्ते यदिष्टकाभिरग्निं चिनोतीयं वै विश्वकर्मा वैश्वकर्मणीरेव तदुप धत्ते तस्मादाहुस्त्रिवृदग्निरिति तं वा एतं यजमान एव चिन्वीत यदस्यान्यश्चिनुयाद्यत्तं दक्षिणाभिर्न राधयेदग्निमस्य वृञ्जीत योऽस्याग्निं चिनुयात्तं दक्षिणाभी राधयेदग्निमेव तथ्स्पृणोति ॥ ५। ६। ९॥ षोढाविहितो वै वैष्णवीरन्यो विꣳशतिश्च ॥ ५। ६। ९॥

३९ प्रजापतिरग्निमचिनुतर्तुभिः संवथ्सरं वसन्तेनैवास्य पूर्वार्धमचिनुत ग्रीष्मेण दक्षिणं पक्षं वर्षाभिः पुच्छꣳशरदोत्तरं पक्षꣳ हेमन्तेन मध्यं ब्रह्मणा वा अस्य तत्पूर्वार्धमचिनुत क्षत्रेण दक्षिणं पक्षं पशुभिः पुच्छं विशोत्तरं पक्षमाशया मध्यं य एवं विद्वानग्निं चिनुत ऋतुभिरेवैनं चिनुतेऽथो एतदेव सर्वमव

४० रुंधे शृण्वन्त्येनमग्निं चिक्यानमत्त्यन्नꣳ रोचत इयं वाव प्रथमा चितिरोषधयो वनस्पतयः पुरीषमन्तरिक्षं द्वितीया वयाꣳसि पुरीषमसौ तृतीया नक्षत्राणि पुरीषं यज्ञश्चतुर्थी दक्षिणा पुरीषं यजमानः पञ्चमी प्रजा पुरीषं यत्त्रिचितीकं चिन्वीत यज्ञं दक्षिणामात्मानं प्रजामन्तरियात्तस्मात्पञ्च चितीकश्चेतव्य एतदेव सर्वग्ग् स्पृणोति यत्तिस्रश्चितय

४१ स्त्रिवृद्ध्यग्निर्यद् द्वे द्विपाद्यजमानः प्रतिष्ठित्यै पञ्च चितयो भवन्ति पाङ्क्तः पुरुष आत्मानमेव स्पृणोति पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सं पद्यन्ते दशाक्षरो वै पुरुषो यावानेव पुरुषस्त२ꣳ स्पृणोत्यथो दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठति संवथ्सरो वै षष्ठी चितिर्ऋतवः पुरीषꣳ षड्चितयो भवन्ति षड्पुरीषाणि द्वादश सं पद्यन्ते द्वादश मासाः संवथ्सरः संवथ्सर एव प्रति तिष्ठति ॥ ५। ६। १०॥

अव चितयः पुरीषं पञ्चदश च ॥ ५। ६। १०॥

४२ रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते प्राजापत्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते रौद्राः श्येतः श्येताक्षः श्येतग्रीवस्ते पितृदेवत्यास्तिस्रः कृष्णा वशा वारुण्यस्तिस्रः श्वेता वशाः सौर्यो मैत्राबार्हस्पत्या धूम्रललामास्तूपराः ॥ ५। ६। ११॥

रोहितः षड्विꣳशतिः ॥ ५। ६। ११॥

४३ पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी बलक्षी ताः सारस्वत्यः पृषती स्थूलपृषती क्षुद्रपृषती ता वैश्वदेव्यस्तिस्रः श्यामा वशाः पौष्णियस्तिस्रो रोहिणीर्वशा

मैत्रिय ऐन्द्राबार्हस्पत्या अरुणललामास्तूपराः ॥ ५। ६। १२॥ पृश्निः षड्विꣳशतिः ॥ ५। ६। १२॥

४४ शितिबाहुरन्यतः शितिबाहुः समन्तशितिबाहुस्त ऐन्द्रवायवाः शितिरन्ध्रोऽन्यतः शितिरन्ध्रः समन्तशितिरन्ध्रस्ते मैत्रावरुणाः शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनास्तिस्रः शिल्पा वशा वैश्वदेव्यस्तिस्रः श्येनीः परमेष्ठिने सोमापौष्णाः श्यामललामास्तूपराः ॥ ५। ६। १३॥

४५ उन्नत ऋषभो वामनस्त ऐन्द्रावरुणाः शितिककुच्छितिपृष्ठः शितिभसत्त ऐन्द्राबार्हस्पत्याः शितिपाच्छित्योष्ठः शितिभ्रुस्त ऐन्द्रावैष्णवास्तिस्रः सिध्मा वशा वैश्वकर्मण्यस्तिस्रो धात्रे पृषोदरा ऐन्द्रापौष्णाः श्येतललामास्तूपराः ॥ ५। ६। १४॥ शितिबाहुरुन्नतः पञ्चविꣳशतिः पञ्चविꣳशतिः ॥ ५। ६। १४॥

४६ कर्णास्त्रयो यामाः सौम्यास्त्रयः श्वितिङ्गा अग्नये यविष्ठाय त्रयो नकुलास्तिस्रो रोहिणीस्त्र्यव्यस्ता वसूनां तिस्रोऽरुणा दित्यौह्यस्ता रुद्राणाꣳसोमैन्द्रा बभ्रुललामास्तूपराः ॥ ५। ६। १५॥ कर्णास्त्रयोविꣳशतिः ॥ ५। ६। १५॥

४७ शुण्ठास्त्रयो वैष्णवा अधीलोधकर्णास्त्रयो विष्णव उरुक्रमाय लप्सुदिनस्त्रयो विष्णव उरुगायाय पञ्चावीस्तिस्र आदित्यानां त्रिवथ्सास्तिस्रोऽङ्गिरसामैन्द्रावैष्णवा गौरललामास्तूपराः ॥ ५। ६। १६॥
शुण्ठा विꣳशतिः ॥ ५। ६। १६॥

४८ इन्द्राय राज्ञे त्रयः शितिपृष्ठा इन्द्रायाधिराजाय त्रयः शितिककुद इन्द्राय स्वराज्ञे त्रयः शितिभसदस्तिस्रस्तुर्यौह्यः साध्यानां तिस्रः पष्ठौह्यो विश्वेषां देवानामाग्नेन्द्राः कृष्णललामास्तूपराः ॥ ५। ६। १७॥ इन्द्राय राज्ञे द्वाविꣳशतिः ॥ ५। ६। १७॥

४९ अदित्यै त्रयो रोहितैता इन्द्राण्यै त्रयः कृष्णैताः कुह्वै त्रयोऽरुणैतास्तिस्रो धेनवो राकायै त्रयोऽनड्वाहः सिनीवाल्या आग्नावैष्णवा रोहितललामास्तूपराः ॥ ५। ६। १८॥
अदित्या अष्टादश ॥ ५। ६। १८॥

५० सौम्यास्त्रयः पिशंगाः सोमाय राज्ञे त्रयः सारङ्गाः पार्जन्या नभोरूपास्तिस्रोऽजा मल्हा इन्द्राण्यै तिस्रो मेष्य आदित्या द्यावापृथिव्या मालङ्गास्तूपराः ॥ ५। ६। १९॥
सौम्या एकान्न विꣳशतिः ॥
५। ६। १९॥

५१ वारुणास्त्रयः कृष्णललामा वरुणाय राज्ञे त्रयो रोहितललामा वरुणाय

रिशादसे त्रयोऽरुणललामाः शिल्पास्त्रयो वैश्वदेवास्त्रयः पृश्नयः सर्वदेवत्या ऐन्द्रासूराः श्येतललामास्तूपराः ॥ ५। ६। २०॥ वारुणा विꣳशतिः ॥ ५। ६। २०॥

५२ सोमाय स्वराज्ञेऽनोवाहावनड्वाहाविन्द्राग्निभ्यामोजो दाभ्यामुष्टाराविन्द्राग्निभ्यां बलदाभ्याꣳ सीरवाहाववी द्वे धेनू भौमी दिग्भ्यो वडबे द्वे धेनू भौमी वैराजी पुरुषी द्वे धेनू भौमी वायव आरोहणवाहावनड्वाहौ वारुणी कृष्णे वशे अराड्यौ दिव्यावृषभौ परिमरौ ॥ ५। ६। २१॥ सोमाय स्वराज्ञे चतुस्त्रिꣳशत् ॥ ५। ६। २१॥

५३ एकादश प्रातर्गव्याः पशव आ लभ्यन्ते छगलः कल्माषः किकिदीविर्विदीगयस्ते त्वाष्ट्राः सौरीर्नव श्वेता वशा अनूबन्ध्या भवन्त्याग्नेय ऐन्द्राग्न आश्विनस्ते विशालयूप आ लभ्यन्ते ॥ ५। ६। २२॥

एकादश प्रातः पंच विꣳशतिः ॥ ५। ६। २२॥

५४ पिशङ्गास्त्रयो वासन्ताः सारङ्गास्त्रयो ग्रैष्माः पृषन्तस्त्रयो वार्षिकाः पृश्नयस्त्रयः शारदाः पृश्निसक्थास्त्रयो हैमन्तिका अवलिप्तास्त्रयः शैशिराः संवथ्सराय निवक्षसः ॥ ५। ६। २३॥ पिशङ्गा विꣳशतिः ॥ ५। ६। २३॥

रोहितः कृष्णा धूम्रललामाः पृश्निः श्यामा अरुणललामाः शितिबाहुः शिल्पाः श्येनीः श्यामललामा उन्नतः सिध्मा धात्रे पौष्णाः श्येतललामाः कर्णा बभ्रुललामाः शुण्ठा गौरललामा इंद्राय कृष्णललामा अदित्यै रोहितललामाः सौम्या मालङ्गा वारुणाः सूराः श्येतललामा दश ॥

हिरण्यवर्णा अपां ग्रहान्भूतेष्टकाः सजूः संवथ्सरं प्रजापतिः स क्षुरपविरग्नेर्वै दीक्षया सुवर्गाय तं यन्वसूयते प्रजापतिर् ऋतुभी रोहितः पृश्निः शितिबाहुरुन्नतः कर्णाः शुण्ठा इंद्रायादित्यै सौम्यावारुणाः सोमायैकादश पिशङ्गास्त्रयोविꣳशतिः ॥

हिरण्यवर्णा भूतेष्टकाश्छंदो यत्कनीयाꣳसं त्रिवृद्ध्यग्निर्वारुणाश्चतुः पंचाशत् ॥

हिरण्यवर्णा नि वक्षसः ॥

## पञ्चमकाण्डे सप्तमः प्रश्नः ७

१ यो वा अयथादेवतमग्निं चिनुत आ देवताभ्यो वृश्च्यते पापीयान्भवति यो यथादेवतं न देवताभ्य आ वृश्च्यते वसीयान्भवत्याग्नेय्या गायत्रिया प्रथमां चितिमभि मृशेत्त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथादेवतमेवाग्निं चिनुते न देवताभ्य आ वृश्च्यते वसीयान्भवतीडायै वा एषा विभक्तिः पशव इडा पशुभिरेनं

२ चिनुते यो वै प्रजापतये प्रतिप्रोच्याग्निं चिनोति नार्तिमार्च्छत्यश्वावभितस्तिष्ठेतां कृष्ण
उत्तरतः श्वेतो दक्षिणस्तावालभ्येष्टका उप दध्यादेतद्वै प्रजापते रूपं प्राजापत्योऽश्वः
साक्षादेव प्रजापतये प्रतिप्रोच्याग्निं चिनोति नार्तिमार्च्छत्येतद्वा अह्नो रूपं यच्छ्वेतोऽश्वो
रात्रियै कृष्ण एतदह्नो
३ रूपं यदिष्टका रात्रियै पुरीषमिष्टका उपधास्यङ्ङेतमश्वमभि मृशेत् पुरीषमुपधास्यन्
कृष्णमहोरात्राभ्यामेवैनं चिनुते हिरण्यपात्रं मधोः पूर्णं ददाति मधव्योऽसानीति सौर्या
चित्रवत्यावेक्षते चित्रमेव भवति मध्यंदिनेऽश्वमव घ्रापयत्यसौ वा आदित्य इन्द्र
एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षादृध्नोति ॥ ५। ७। १॥ एनमेतदह्नोऽष्टा
चत्वारिँशच्च ॥ ५। ७। १॥
४ त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम् । अस्थूरिणो गार्हपत्यानि सन्तु
तिग्मेन नो ब्रह्मणा सँ शिशाधि ॥ पशवो वा एते यदिष्टकाश्चित्यां चित्यामृषभमुप
दधाति मिथुनमेवास्य तद्यज्ञे करोति प्रजननाय तस्माद्यूथेयूथ ऋषभः ॥ संवथ्सरस्य
प्रतिमां यां त्वा रात्र्युपासते । प्रजाँ सुवीरां कृत्वा विश्वमायुर्व्यश्नवत् ॥ प्राजापत्या
५ मेतामुप दधातीयं वावैषैकाष्टका यदेवैकाष्टकायामन्नं क्रियते तदेवैतयाव रुंध एषा
वै प्रजापतेः कामदुघा तयैव यजमानोऽमुष्मि३ँल्लोकेऽग्निं दुहे येन देवा ज्योतिषोर्ध्वा
उदायन् येनादित्या वसवो येन रुद्राः । येनांगिरसो महिमानमानशुस्तेनैतु यजमानः
स्वस्ति ॥ सुवर्गाय वा एष लोकाय
६ चीयते यदग्निर्येन देवा ज्योतिषोर्ध्वा उदायन्नित्युख्यँ समिन्द्ध इष्टका एवैता उप
धत्ते वानस्पत्याः सुवर्गस्य लोकस्य समष्ट्यै शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे
। शतं यो नः शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा ॥ ये चत्वारः पथयो
देवयाना अन्तरा द्यावापृथिवी वियन्ति । तेषां यो अज्यानिमजीतिमावहात्तस्मै नो देवाः
७ परि दत्तेह सर्वे ॥ ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षाः सुवितं नो अस्तु
। तेषामृतूनाँ शतशारदानां निवात एषामभये स्याम ॥ इदुवथ्सराय परिवथ्सराय
संवथ्सराय कृणुता बृहन्नमः । तेषां वयँ सुमतौ यज्ञियानां ज्योगजीता अहताः स्याम
॥ भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा । स नो मयोभूः पितो
८ आ विशस्व शं तोकाय तनुवे स्योनः ॥ अज्यानीरेता उप दधात्येता वै देवता
अपराजितास्ता एव प्र विशति नैव जीयते ब्रह्मवादिनो वदन्ति यदर्धमासा मासा

ऋतवः संवथ्सर ओषधीः पचन्त्यथ कस्मादन्याभ्यो देवताभ्य आग्रयणं निरुप्यत इत्येता हि तद्देवता उदजयन् यदृतुभ्यो निर्वपेद्देवताभ्यः समदं दध्यादाग्रयणं निरुप्यैता आहुतीर्जुहोत्यर्धमासानेव मासानृतून्थ्संवथ्सरं प्रीणाति न देवताभ्यः समदं दधाति भद्रान्नः श्रेयः समनैष्ट देवा इत्याह हुताद्याय यजमानस्यापराभावाय ॥ ५। ७। २॥ प्राजापत्यां लोकाय देवाः पितो दध्यादाग्रयणं पञ्च विꣳशतिश्च ॥ ५। ७। २॥

९ इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः । यो नः पुरस्ताद्दक्षिणतः पश्चादुत्तरतोऽघायुरभिदासत्येतꣳ सोऽश्मानमृच्छतु ॥ देवासुराः संयत्ता आसन्तेऽसुरा दिग्भ्य आबाधन्त तान्देवा इष्वा च वज्रेण चापानुदन्त यद्वज्रिणीरुपदधातीष्वा चैव तद्वज्रेण च यजमानो भ्रातृव्यानप नुदते दिक्षूप

१० दधाति देवपुरा एवैतास्तनूपानीः पर्यूहतेऽग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरा गतम् ॥ ब्रह्मवादिनो वदन्ति यन्न देवतायै जुह्वत्यथ किंदेवत्या वसोर्धारेत्यग्निर्वसुस्तस्यैषा धारा विष्णुर्वसुस्तस्यैषा धाराग्नावैष्णव्यर्चा वसोर्धारां जुहोति भागधेयेनैवैनौ समर्धयत्यथो एता

११ मेवाहुतिमायतनवतीं करोति यत्काम एनां जुहोति तदेवाव रुंधे रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्या शिवान्या यच्छतरुद्रीयं जुहोति यैवास्य घोरा तनूस्तां तेन शमयति यद्वसोर्धारां जुहोति यैवास्य शिवा तनूस्तान्तेन प्रीणाति यो वै वसोर्धारायै

१२ प्रतिष्ठां वेद प्रत्येव तिष्ठति यदाज्यमुच्छिष्येत तस्मिन्ब्रह्मौदनं पचेत्तं ब्राह्मणाश्चत्वारः प्राश्नीयुरेष वा अग्निर्वैश्वानरो यद्ब्राह्मण एषा खलु वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियायामेवैनां तनुवां प्रति ष्ठापयति चतस्रो धेनूर्दद्यात्ताभिरेव यजमानोऽमुष्मिꣳल्लोकेऽग्निं दुहे ॥ ५। ७। ३॥ उपैतां धारायै षड्चत्वारिꣳशच्च ॥ ५। ७। ३॥

१३ चित्तिं जुहोमि मनसा घृतेनेत्याहादाभ्या वै नामैषाहुतिर्वैश्वकर्मणी नैनं चिक्यानं भ्रातृव्यो दभ्नोत्यथो देवता एवाव रुंधेऽग्ने तमद्येति पङ्क्त्या जुहोति पङ्क्त्याहुत्या यज्ञमुखमा रभते सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह होत्रा एवाव रुंधेऽग्निर्देवेभ्योऽपाक्रामद्भागधेय

१४ मिच्छमानस्तस्मा एतद्भागधेयं प्रायच्छन्नेतद्वा अग्नेरग्निहोत्रमेतर्हि खलु वा एष जातो यर्हि सर्वश्चितो जातायैवास्मा अन्नमपि दधाति स एनं प्रीतः प्रीणाति वसीयान्भवति ब्रह्मवादिनो वदन्ति यदेष गार्हपत्यश्चीयतेऽथ क्वास्याहवनीय इत्यसावादित्य इति

ब्रूयादेतस्मिन् हि सर्वाभ्यो देवताभ्यो जुह्वति
१५ य एवं विद्वानग्निं चिनुते साक्षादेव देवता ऋध्नोत्यग्ने यशस्विन् यशसेममर्पयेन्द्रावतीमपचितीमिहा वह । अयं मूर्धा परमेष्ठी सुवर्चाः समानानामुत्तमश्लोको अस्तु ॥ भद्रं पश्यन्त उप सेदुरग्रे तपो दीक्षामृषयः सुवर्विदः । ततः, क्षत्रं बलमोजश्च जातन्तदस्मै देवा अभि सं नमन्तु ॥ धाता विधाता परमो
१६ त संदृक्प्रजापतिः परमेष्ठी विराजा । स्तोमाश्छन्दाँसि निविदो म आहुरेतस्मै राष्ट्रमभि सं नमाम ॥ अभ्यावर्तध्वमुपमेत साकमयँ शास्ताधिपतिर्वो अस्तु । अस्य विज्ञानमनु सँ रभध्वमिमं पश्चादनु जीवाथ सर्वे ॥ राष्ट्रभृत एता उप दधात्येषा वा अग्नेश्चिती राष्ट्रभृत्तयैवास्मिन्राष्ट्रं दधाति राष्ट्रमेव भवति नास्माद्राष्ट्रं भ्रँशते ॥ ५। ७। ४॥ भागधेयं जुह्वति परमा राष्ट्रं दधाति सप्त च ॥ ५। ७। ४॥
१७ यथा वै पुत्रो जातो म्रियत एवं वा एष म्रियते यस्याग्निरुख्य उद्वायति यन्निर्मन्थ्यं कुर्याद्वि च्छिन्द्याद्भ्रातृव्यमस्मै जनयेथ्स एव पुनः परीध्यः स्वादेवैनं योनेर्जनयति नास्मै भ्रातृव्यं जनयति तमो वा एतं गृह्णाति यस्याग्निरुख्य उद्वायति मृत्युस्तमः कृष्णं वासः कृष्णा धेनुर्दक्षिणा तमसै
१८ व तमो मृत्युमप हते हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिषैव तमोऽप हतेऽथो तेजो वै हिरण्यं तेज एवात्मन्धत्ते सुवर्न घर्मः स्वाहा सुवर्नार्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्न ज्योतिः स्वाहा सुवर्न सूर्यः स्वाहार्को वा एष यदग्निरसावादित्यो
१९ ऽश्वमेधो यदेता आहुतीर्जुहोत्यर्काश्वमेधयोरेव ज्योतीँषि सं दधात्येष ह त्वा अर्काश्वमेधी यस्यैतदग्नौ क्रियत आपो वा इदमग्रे सलिलमासीथ्स एतां प्रजापतिः प्रथमां चितिमपश्यत्तामुपाधत्त तदियमभवत्तं विश्वकर्माब्रवीदुप त्वायानीति नेह लोकोऽस्तीत्य
२० ब्रवीथ्स एतां द्वितीयां चितिमपश्यत्तामुपाधत्त तदन्तरिक्षमभवथ्स यज्ञः प्रजापतिमब्रवीदुप त्वायानीति नेह लोकोऽस्तीत्यब्रवीथ्स विश्वकर्माणमब्रवीदुप त्वायानीति केन मोपैष्यसीति दिश्याभिरित्यब्रवीत्तं दिश्याभिरुपैत्ता उपाधत्त ता दिशो
२१ ऽभवन्थ्स परमेष्ठी प्रजापतिमब्रवीदुप त्वायानीति नेह लोकोऽस्तीत्यब्रवीथ्स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामायानीति नेह लोकोऽस्तीत्यब्रूताँ स एतां तृतीयां चितिमपश्यत्तामुपाधत्त तदसावभवथ्स आदित्यः प्रजापतिमब्रवीदुप त्वा

२२ ऽयानीति नेह लोकोऽस्तीत्यब्रवीथ्स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामायानीति नेह लोकोऽस्तीत्यब्रूताꣳ स परमेष्ठिनमब्रवीदुप त्वायानीति केन मोपैष्यसीति लोकं पृणयेत्यब्रवीत्तं लोकं पृणयोपैत्तस्मादयातयाम्नी लोकं पृणाऽयातयामा ह्यसा
२३ वादित्यस्तानृषयोऽब्रुवन्नुप व आयामेति केन न उपैष्यथेति भूम्नेत्यब्रुवन्तान्द्वाभ्यां चितीभ्यामुपायन्थ्स पञ्चचितीकः समपद्यत य एवं विद्वानग्निं चिनुते भूयानेव भवत्यभीमा३ꣳल्लोकाञ्जयति विदुरेनं देवा अथो एतासामेव देवतानाꣳ सायुज्यं गच्छति ॥ ५। ७। ५॥ तमसाऽदित्योऽस्तीति दिश आदित्यः प्रजापतिमब्रवीदुप त्वासौ पञ्च चत्वारिꣳशच्च ॥ ५। ७। ५॥
२४ वयो वा अग्निर्यदग्निचित् पक्षिणोऽश्नीयात् तमेवाग्निमद्यादार्तिमार्च्छेथ्संवथ्सरं व्रतं चरेथ्संवथ्सरꣳ हि व्रतं नाति पशुर्वा एष यदग्निर्हिनस्ति खलु वै तं पशुर्य एनं पुरस्तात्प्रत्यञ्चमुप चरति तस्मात्पश्चात्प्राङुपचर्य आत्मनोऽहिꣳसायै तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ
२५ पृथिव्यै मा पाहि ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहि सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीत्याहैताभिर्वा इमे लोका विधृता यदेता उपदधात्येषां लोकानां विधृत्यै स्वयमातृण्णा उपधाय हिरण्येष्टका उप दधातीमे वै लोकाः स्वयमातृण्णा ज्योतिर्हिरण्यं यथ्स्वयमातृण्णा उपधाय
२६ हिरण्येष्टका उपदधातीमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो एताभिरेवास्मा इमे लोकाः प्र भान्ति यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः । ताभिः सर्वाभी रुचे जनाय नस्कृधि ॥ या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः । इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥ रुचं नो धेहि
२७ ब्राह्मणेषु रुचꣳ राजसु नस्कृधि । रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥ द्वेधा वा अग्निं चिक्यानस्य यश इंद्रियं गच्छत्यग्निं वा चितमीजानं वा यदेता आहुतीर्जुहोत्यात्मन्नेव यश इंद्रियं धत्त ईश्वरो वा एष आर्तिमार्तोर्योऽग्निं चिन्वन्नधि क्रामति तत्त्वा यामि ब्रह्मणा वन्दमान इति वारुण्यर्चा
२८ जुहुयाच्छान्तिरेवैषाग्नेर्गुप्तिरात्मनो हविष्कृतो वा एष योऽग्निं चिनुते यथा वै हविः स्कन्दत्येवं वा एष स्कन्दति योऽग्निं चित्वा स्त्रियमुपैति मैत्रावरुण्यामिक्षया यजेत मैत्रावरुणतामेवोपैत्यात्मनोऽस्कन्दाय यो वा अग्निमृतुस्थां वेदर्तुर्ऋतुरस्मै कल्पमान एति

प्रत्येव तिष्ठति संवथ्सरो वा अग्निर्
२९ ऋतुस्थास्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षाः पुच्छꣳ शरदुत्तरः पक्षो
हेमन्तो मध्यं पूर्वपक्षाश्चितयोऽपरपक्षाः पुरीषमहोरात्राणीष्टका एष वा अग्निर्ऋतुस्था य
एवं वेदर्तुर्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति प्रजापतिर्वा एतं ज्यैष्ठ्यकामो न्यधत्त
ततो वै स ज्यैष्ठ्यमगच्छद्य एवं विद्वानग्निं चिनुते ज्यैष्ठ्यमेव गच्छति ॥ ५। ७। ६॥
पृथिवीं यच्छ यथ्स्वयमातृण्णा उपधाय धेह्यृचाऽग्निश्चिनुते त्रीणि च ॥ ५। ७। ६॥
३० यदाकूताथ्समसुस्रोद्धृदो वा मनसो वा संभृतं चक्षुषो वा । तमनु प्रेहि सुकृतस्य
लोकं यत्रर्षयः प्रथमजा ये पुराणाः ॥ एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिं
जातवेदाः । अन्वागन्ता यज्ञपतिर्वो अत्र तꣳ स्म जानीत परमे व्योमन् ॥ जानीतादेनं
परमे व्योमन्देवाः सधस्था विद रूपमस्य । यदागच्छात्
३१ पथिभिर्देवयानैरिष्टापूर्ते कृणुतादाविरस्मै ॥ सं प्र च्यवध्वमनु सं प्र याताग्ने पथो
देवयानान् कृणुध्वम् । अस्मिन्थ्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥
प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा । ऋचेमं यज्ञं नो वह सुवर्देवेषु गन्तवे ॥
यदिष्टं यत्परादानं यद्दत्तं या च दक्षिणा । त
३२ दग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत् ॥ येना सहस्रं वहसि येनाग्ने सर्ववेदसम् ।
तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे ॥
येनाग्ने दक्षिणा युक्ता यज्ञं वहन्त्यृत्विजः । तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे ॥ येनाग्ने
सुकृतः पथा मधोर्धारा व्यानशुः । तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे ॥ यत्र धारा
अनपेता मधोर्घृतस्य च याः । तदग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत् ॥ ५। ७। ७॥
आगच्छात्तद्व्यानशुस्तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे चतुर्दश च ॥ ५। ७। ७॥
३३ यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः । ये ते अग्ने मेडयो
य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन् ॥
उथ्सन्नयज्ञो वा एष यदग्निः किं वाहैतस्य क्रियते किं वा न यद्वा
अध्वर्युरग्नेश्चिन्वन्नन्तरेत्यात्मनो वै तदन्तरेति यास्ते अग्ने समिधो यानि
३४ धामेत्याहैषा वा अग्नेः स्वयं चितिरग्निरेव तदग्निं चिनोति नाध्वर्युरात्मनोऽन्तरेति
चतस्र आशाः प्र चरन्त्वग्नय इमं नो यज्ञं नयतु प्रजानन् । घृतं पिन्वन्नजरꣳ सुवीरं
ब्रह्म समिद्भवत्याहुतीनाम् ॥ सुवर्गाय वा एष लोकायोप धीयते यत्कूर्मश्चतस्र आशाः

प्र चरन्त्वग्नय इत्याह
३५ दिश एवैतेन प्र जानातीमं नो यज्ञं नयतु प्रजानन्नित्याह सुवर्गस्य लोकस्याभिनीत्यै ब्रह्म समिद्धवत्याहुतीनामित्याह ब्रह्मणा वै देवाः सुवर्गं लोकमायन् यद्ब्रह्मण्वत्योपदधाति ब्रह्मणैव तद्यजमानः सुवर्गं लोकमेति प्रजापतिर्वा एष यदग्निस्तस्य प्रजाः पशवश्छन्दाꣳसि रूपꣳ सर्वान् वर्णानिष्टकानां कुर्याद्रूपेणैव प्रजां पशूञ्छन्दाग्स्यव रुंधेऽथो प्रजाभ्य एवैनं पशुभ्यश्छन्दोभ्योऽवरुध्य चिनुते ॥ ५। ७। ८॥ यान्यग्नय इत्याहेष्टकानाꣳ षोडश च ॥ ५। ७। ८॥
३६ मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । मयि प्रजां मयि वर्चो दधाम्यरिष्टाः स्याम तनुवा सुवीराः ॥
यो नो अग्निः पितरो हृथ्स्वन्तरमर्त्यो मर्त्याꣳ आ विवेश । तमात्मन्परि गृह्णीमहे वयं मा सो अस्माꣳ अवहाय परा गात् ॥
यदध्वर्युरात्मन्नग्निमगृहीत्वाग्निं चिनुयाद्योऽस्य स्वोऽग्निस्तमपि
३७ यजमानाय चिनुयादग्निं खलु वै पशवोऽनूप तिष्ठन्तेऽपक्रामुका अस्मात्पशवः स्युर्मयि गृह्णाम्यग्रे अग्निमित्याहात्मन्नेव स्वमग्निं दाधार नास्मात्पशवोऽप क्रामन्ति ब्रह्मवादिनो वदन्ति यन्मृच्चापश्चाग्नेरनाद्यमथ कस्मान्मृदा चाद्भिश्चाग्निश्चीयत इति यदद्भिः संयौ
३८ त्यापो वै सर्वा देवता देवताभिरेवैनꣳ सꣳ सृजति यन्मृदा चिनोतीयं वा अग्निर्वैश्वानरोऽग्निनैव तदग्निं चिनोति ब्रह्मवादिनो वदन्ति यन्मृदा चाद्भिश्चाग्निश्चीयतेथ कस्मादग्निरुच्यत इति यच्छन्दोभिश्चिनोत्यग्नयो वै छन्दाꣳसि तस्मादग्निरुच्यतेऽथो इयं वा अग्निर्वैश्वानरो यन्
३९ मृदा चिनोति तस्मादग्निरुच्यते हिरण्येष्टका उप दधाति ज्योतिर्वै हिरण्यं ज्योतिरेवास्मिन्दधात्यथो तेजो वै हिरण्यं तेज एवात्मन्धत्ते यो वा अग्निꣳ सर्वतोमुखं चिनुते सर्वा सु प्रजास्वन्नमत्ति सर्वा दिशोऽभि जयति गायत्रीं पुरस्तादुप दधाति त्रिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्य एष वा अग्निः सर्वतोमुखस्तं य एवं विद्वाग्श्चिनुते सर्वासु प्रजास्वन्नमत्ति सर्वा दिशोऽभि जयत्यथो दिश्येव दिशं प्र वयति तस्माद्दिशि दिक्प्रोता ॥
५। ७। ९॥ अपि संयौति वैश्वानरो यदेष वै पञ्चविꣳशतिश्च ॥ ५। ७। ९॥
४० प्रजापतिरग्निमसृजत सोऽस्माथ्सृष्टः प्राङ्प्राद्रवत्तस्मा अश्वं प्रत्यास्यथ्स दक्षिणावर्तत

तस्मै वृष्णिं प्रत्यास्यथ्स प्रत्यङ्ङावर्तत तस्मा ऋषभं प्रत्यास्यथ्स उदङ्ङावर्तत तस्मै बस्तं प्रत्यास्यथ्स ऊर्ध्वोऽद्रवत्तस्मै पुरुषं प्रत्यास्यद्यत्पशुशीर्षाण्युपदधाति सर्वत एवैन
४१ मवरुध्य चिनुत एता वै प्राणभृतश्चक्षुष्मतीरिष्टका यत्पशुशीर्षाणि यत्पशुशीर्षाण्युपदधाति ताभिरेव यजमानोऽमुष्मिꣳ३ꣳ ल्लोके प्राणित्यथो ताभिरेवास्मा इमे लोकाः प्र भान्ति मृदाभिलिप्योप दधाति मेध्यत्वाय पशुर्वा एष यदग्निरन्नं पशव एष खलु वा अग्निर्यत्पशुशीर्षाणि यं कामयेत कनीयोऽस्यान्नग्ग्
४२ स्यादिति संतरां तस्य पशुशीर्षाण्युप दध्यात्कनीय एवास्यान्नं भवति यं कामयेत समावदस्यान्नग्ग् स्यादिति मध्यतस्तस्योप दध्याथ्समावदेवास्यान्नं भवति यं कामयेत भूयोऽस्यान्नग्ग् स्यादित्यन्तेषु तस्य व्युदूह्योप दध्यादन्तत एवास्मा अन्नमव रुंधे भूयोऽस्यान्नं भवति ॥ ५। ७। १०॥ एवमस्याऽन्नं भूयोऽस्याऽन्नं भवति ॥
५। ७। १०॥
४३ स्तेगान्द२ꣳ ष्ट्राभ्यां मण्डूकाञ्जंभ्येभिरादकां खादेनोर्ज꣡ꣳ स꣡ꣳ सूदेनारण्यं जांबीलेन मृदं बर्स्वेभिः शर्कराभिरवकामवकाभिः शर्करामुथ्सादेन जिह्वामवक्रन्देन तालु ꣳ सरस्वतीं जिह्वाग्रेण ॥ ५। ७। ११॥ स्तेगान्द्वाविꣳशतिः ॥ ५। ७। ११॥
४४ वाज ꣳ हनूभ्यामप आस्येनादित्यां छ्मश्रुभिरुपयाममधरेणोष्ठेन सदुत्तरेणान्तरेणानूकाशं प्रकाशेन बाह्यग्ग् स्तनयित्नुं निर्बाधेन सूर्याग्नी चक्षुर्भ्यां विद्युतौ कनानकाभ्यामशनिं मस्तिष्केण बलं मज्जभिः ॥ ५। ७। १२॥ वाजं पञ्चविꣳशतिः ॥ ५। ७। १२॥
४५ कूर्माञ्छफैरच्छलाभिः कपिञ्जलान्थ्साम कुष्ठिकाभिर्जवं जङ्घाभिरगदं जानुभ्यां वीर्यं कुहाभ्यां भयं प्रचालाभ्यां गुहोपपक्षाभ्यामश्विनावꣳ साभ्यामदितिꣳ शीर्ष्णा निर्ऋतिं निर्जाल्मकेन शीर्ष्णा ॥ ५। ७। १३॥ कूर्मास्त्रयोविꣳशतिः ॥ ५। ७। १३॥
४६ योक्त्रं गृध्राभिर्युगमानतेन चित्तं मन्याभिः संक्रोशान्प्राणैः प्रकाशेन त्वचं पराकाशेनान्तरां मशकान्केशैरिन्द्रग्ग् स्वपसा वहेन बृहस्पतिꣳ शकुनिसादेन रथमुष्णिहाभिः ॥ ५। ७। १४॥
योक्त्रमेकविꣳशतिः ॥ ५। ७। १४॥
४७ मित्रावरुणौ श्रोणीभ्यामिन्द्राग्नी शिखण्डाभ्यामिन्द्राबृहस्पती ऊरुभ्यामिन्द्राविष्णू अष्ठीवद्भ्याꣳ सवितारं पुच्छेन गन्धर्वाञ्छेपेनाप्सरसो मुष्काभ्यां पवमानं पायुना पवित्रं पोत्राभ्यामाक्रमण२ꣳ स्थूराभ्यां प्रतिक्रमणं कुष्ठाभ्याम् ॥ ५। ७। १५॥
४८ इन्द्रस्य क्रोडोदित्यै पाजस्यं दिशां जत्रवो जीमूतान्हृदयौपशाभ्यामन्तरिक्षं पुरितता

नभं उदर्येणेन्द्राणीं प्लीह्ना वल्मीकान्क्लोम्ना गिरीन्प्लाशिभिः समुद्रमुदरेण वैश्वानरं भस्मना ॥ ५। ७। १६॥ मित्रावरुणाविंद्रस्य द्वाविꣳशतिर्द्वाविꣳशतिः ॥ ५। ७। १६॥

४९ पूष्णो वनिष्ठुरन्धाहेस्स्थूरगुदा सर्पान्गुदाभिर् ऋतून् पृष्टीभिर्दिवं पृष्ठेन वसूनां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृतीयांगिरसां चतुर्थी साध्यानां पञ्चमी विश्वेषां देवानाꣳ षष्ठी ॥ ५। ७। १७॥ पूष्णश्चतुर्विꣳशतिः ॥ ५। ७। १७॥

५० ओजो ग्रीवाभिर्निर्ऋतिमस्थभिरिन्द्रग्ग् स्वपसा वहेन रुद्रस्य विचलः स्कन्धोऽहोरात्रयोर्द्वितीयोऽर्धमासानां तृतीयो मासां चतुर्थ ऋतूनां पञ्चमः संवथ्सरस्य षष्ठः ॥ ५। ७। १८॥

ओजोविꣳशतिः ॥ ५। ७। १८॥

५१ आनन्दं नन्दथुना कामं प्रत्यासाभ्यां भयꣳ शितीमभ्यां प्रशिषं प्रशासाभ्याꣳ सूर्याचन्द्रमसौ वृक्याभ्याग् श्यामशबलौ मतस्नाभ्यां व्युष्टिꣳ रूपेण निम्रुक्तिमरूपेण ॥ ५। ७। १९॥ आनन्दꣳ षोडश ॥ ५। ७। १९॥

५२ अहर्माꣳसेन रात्रिं पीवसापो यूषेण घृतꣳ रसेन श्यां वसया दूषीकाभिर्ह्रादुनिमश्रुभिः पृष्वां दिवꣳ रूपेण नक्षत्राणि प्रतिरूपेण पृथिवीं चर्मणा छवीं छव्योपाकृताय स्वाहालब्धाय स्वाहा हुताय स्वाहा ॥ ५। ७। २०॥ अहरष्टा विꣳशतिः ॥

५। ७। २०॥

५३ अग्नेः पक्षतिः सरस्वत्यै निपक्षतिः सोमस्य तृतीयापां चतुर्थ्योषधीनां पञ्चमी संवथ्सरस्य षष्ठी मरुताꣳ सप्तमी बृहस्पतेरष्टमी मित्रस्य नवमी वरुणस्य दशमीन्द्रस्यैकादशी विश्वेषां देवानां द्वादशी द्यावापृथिव्योः पार्श्वं यमस्य पाटूरः ॥

५। ७। २१॥ अग्नेरेकान्न त्रिꣳशत् ॥ ५। ७। २१॥

५४ वायोः पक्षतिः सरस्वतो निपक्षतिश्चन्द्रमसस्तृतीया नक्षत्राणां चतुर्थी सवितुः पञ्चमी रुद्रस्य षष्ठी सर्पाणाꣳ सप्तम्यर्यम्णोऽष्टमी त्वष्टुर्नवमी धातुर्दशमीन्द्राण्या एकादश्यदित्यै द्वादशी द्यावापृथिव्योः पार्श्वं यम्यै पाटूरः ॥ ५। ७। २२॥ वायोरष्टा विꣳशतिः ॥ ५। ७। २२॥

५५ पन्थामनूवृग्भ्याꣳ संतति२ꣳ स्नावन्याभ्याꣳ शुकान्पित्तेन हरिमाणं यक्ना हलीक्ष्णान्पापवातेन कूश्माङ्कभिः शवर्तानूवध्येन शुनो विशसनेन सर्पा३ꣳल्लोहितगन्धेन

वयाꣳसि पक्कगन्धेन पिपीलिकाः प्रशादेन ॥ ५। ७। २३॥ पन्थां द्वाविꣳशतिः ॥ ५। ७। २३॥

५६ क्रमैरत्यक्रमीद्वाजी विश्वैर्देवैर्यज्ञियैः संविदानः । स नो नय सुकृतस्य लोकं तस्य ते वय२ꣳ स्वधया मदेम ॥ ५। ७। २४॥

क्रमैरष्टादश ॥ ५। ७। २४॥

५७ द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रो योनिः सूर्यस्ते चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं मासाश्चार्धमासाश्च पर्वाण्यृतवोऽङ्गानि संवथ्सरो महिमा ॥ ५। ७। २५॥ द्यौः पञ्च विꣳशतिः ॥ ५। ७। २५॥

५८ अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः स ते लोकस्तं जेष्यस्यथाव जिघ्र वायुः पशुरासीत्तेनाऽयजन्त स एतं लोकमजयद्यस्मिन्वायुः स ते लोकस्तस्मात्त्वान्तरेष्यामि यदि नावजिघ्रस्यादित्यः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नादित्यः स ते लोकस्तं जेष्यसि यद्यवजिघ्रसि ॥

५। ७। २६॥ यस्मिन्नष्टौ च ॥ ५। ७। २६॥

यो वा अयथा देवतं त्वामग्न इन्द्रस्य चित्तिं यथा वै वयो वै यदाकूताद्यास्ते अग्ने मयि गृह्णामि प्रजापतिः सोऽस्माथ् स्तेगान्, वाजं कूर्मान्, योक्रं मित्रावरुणाविन्द्रस्य पूष्ण ओज आनन्दमहरग्नेर्वायोः पन्थां क्रमैर्द्यौस्तेऽग्निः पशुरासीथ्षड्विꣳशतिः ॥

यो वा एवाहुतिमभवन्पथिभिरवरुद्ध्यानन्दमष्टौ पञ्चाशत् ॥

यो वा अयथा देवतं यद्यव जिघ्रसि ॥

इति पञ्चमं काण्डं संपूर्णम् ५॥

॥ तैत्तिरीय-संहिता ॥

# तैत्तिरीय-संहिता

## ॥ षष्ठं काण्डम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### षष्ठकाण्डे प्रथमः प्रश्नः १

१ प्राचीनवꣳशं करोति देवमनुष्या दिशो व्यभजन्त प्राचीं देवा दक्षिणा पितरः प्रतीचीं मनुष्या उदीचीꣳ रुद्रा यत्प्राचीनवꣳ शं करोति देवलोकमेव तद्यजमान उपावर्तते परि श्रयत्यन्तर्हितो हि देवलोको मनुष्यलोकान्नास्माल्लोकात्स्वेतव्यमिवेत्याहुः को हि तद्वेद यद्यमुष्मिꣳ३ꣳल्लोकेऽस्ति वा न वेति दिक्ष्वतीकाशान्करो

२ त्युभयोर्लोकयोरभिजित्यै केशश्मश्रु वपते नखानि नि कृन्तते मृता वा एषा त्वगमेध्या यत्केशश्मश्रु मृतामेव त्वचममेध्यामपहत्य यज्ञियो भूत्वा मेधमुपैत्यंगिरसः सुवर्गं लोकं यन्तोऽप्सु दीक्षातपसी प्रावेशयन्नप्सु स्नाति साक्षादेव दीक्षातपसी अव रुंधे तीर्थे स्नाति तीर्थे हि ते तां प्रावेशयन्तीर्थे स्नाति

३ तीर्थमेव समानानां भवत्यपोऽश्नात्यन्तरत एव मेध्यो भवति वाससा दीक्षयति सौम्यं वै क्षौमं देवतया सोममेष देवतामुपैति यो दीक्षते सोमस्य तनूरसि तनुवं मे पाहीत्याह स्वामेव देवतामुपैत्यथो आशिषमेवैतामा शास्तेऽग्नेस्तूषाधानं वायोर्वातपानं पितृणां नीविरोषधीनां प्रघात

४ आदित्यानां प्राचीनतानो विश्वेषां देवानामोतुर्नक्षत्राणामतीकाशास्तद्वा एतत्सर्वदेवत्यं यद्वासो यद्वाससा दीक्षयति सर्वाभिरेवैनं देवताभिर्दीक्षयति बहिःप्राणो वै मनुष्यस्तस्याशनं प्राणोऽश्नाति सप्राण एव दीक्षत आशितो भवति यावानेवास्य प्राणस्तेन सह मेधमुपैति घृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणां तद्वा

५ एतत्सर्वदेवत्यं यन्नवनीतं यन्नवनीतेनाभ्यङ्क्ते सर्वा एव देवताः प्रीणाति प्रच्युतो वा एषोऽस्माल्लोकादगतो देवलोकं यो दीक्षितोऽन्तरेव नवनीतं तस्मान्नवनीतेनाभ्यङ्क्तेऽनुलोमं यजुषा व्यावृत्त्या इन्द्रो वृत्रमहन्तस्य कनीनिका पराऽपतत्तदाञ्जनमभवद्यदाङ्क्ते चक्षुरेव

भ्रातृव्यस्य वृङ्क्ते दक्षिणं पूर्वमाऽङ्क्ते
६ सव्यꣳ हि पूर्वं मनुष्या आञ्जते न नि धावते नीव हि मनुष्या धावन्ते पञ्च कृत्व
आऽङ्क्ते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंधे परिमितमाऽङ्क्तेऽपरिमितꣳ हि मनुष्या
आञ्जते सतूलयाऽऽङ्क्तेऽपतूलया हि मनुष्या आञ्जते व्यावृत्त्यै यदपतूलयांजीत वज्र इव
स्याथ्सतूलयाङ्क्ते मित्रत्वाये
७ न्द्रो वृत्रमहन्थ्सोऽ२पोऽ२भ्यम्रियत तासां यन्मेध्यं यज्ञियꣳ सदेवमासीत्तदपोदक्रामत्ते
दर्भा अभवन् यद्दर्भ पुंजीलैः पवयति या एव मेध्या यज्ञियाः सदेवा आपस्ताभिरेवैनं
पवयति द्वाभ्यां पवयत्यहोरात्राभ्यामेवैनं पवयति त्रिभिः पवयति त्रय इमे लोका एभिरेवैनं
लोकैः पवयति पञ्चभिः
८ पवयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञायैवैनं पवयति षड्भिः पवयति षड्वा ऋतव
ऋतुभिरेवैनं पवयति सप्तभिः पवयति सप्त छन्दाꣳसि छन्दोभिरेवैनं पवयति नवभिः
पवयति नव वै पुरुषे प्राणाः सप्राणमेवैनं पवयत्येकविꣳशत्या पवयति दश हस्त्या
अङ्गुलयो दश पद्या आत्मैकविꣳशो यावानेव पुरुषस्तमपरिवर्गं
९ पवयति चित्पतिस्त्वा पुनात्वित्याह मनो वै चित्पतिर्मनसैवैनं पवयति वाक्पतिस्त्वा
पुनात्वित्याह वाचैवैनं पवयति देवस्त्वा सविता पुनात्वित्याह सवितृप्रसूत एवैनं पवयति
तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमित्याहाशिषमेवैतामा शास्ते ॥
६। १। १॥ अतीकाशान् करोत्यवेशयन्तीर्थे स्नाति प्रघातो मनुष्याणां तद्वा आङ्क्ते मित्रत्वाय
पंचभिरपरिवर्गमष्टा चत्वारिꣳशच्च ॥
६। १। १॥
१० यावन्तो वै देवा यज्ञायापुनत त एवाभवन् य एवं विद्वान्, यज्ञाय पुनीते भवत्येव
बहिः पवयित्वान्तः प्र पादयति मनुष्यलोक एवैनं पवयित्वा पूतं देवलोकं प्रणयत्यदीक्षित
एकयाहुत्येत्याहुः स्रुवेण चतस्रो जुहोति दीक्षितत्वाय स्रुचा पञ्चमीं पञ्चाक्षरा पङ्क्तिः पाङ्क्तो
यज्ञो यज्ञमेवाव रुंध आकूत्यै प्रयुजेऽग्नये
११ स्वाहेत्याहाकूत्या हि पुरुषो यज्ञमभि प्रयुङ्क्ते यजेयेति मेधायै मनसेऽग्नये स्वाहेत्याह
मेधया हि मनसा पुरुषो यज्ञमभिगच्छति सरस्वत्यै पूष्णेऽग्नये स्वाहेत्याह वाग्वै सरस्वती
पृथिवी पूषा वाचैव पृथिव्या यज्ञं प्र युङ्क्त आपो देवीर्बृहतीर्विश्वशंभुव इत्याह या वै
वर्ष्यास्ता
१२ आपो देवीर्बृहतीर्विश्वशंभुवो यदेतद्यजुर्न ब्रूयाद्दिव्या आपोऽशान्ता इमं लोकमा

गच्छेयुरापो देवीर्बृहतीर्विश्वशंभुव इत्याहास्मा एवैना लोकाय शमयति तस्माच्छान्ता इमं
लोकमा गच्छन्ति द्यावापृथिवी इत्याह द्यावापृथिव्योर्हि यज्ञ उर्वन्तरिक्षमित्याहान्तरिक्षे
हि यज्ञो बृहस्पतिर्नो हविषा वृधा
१३ त्वित्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै यज्ञमव रुंधे यद्ब्रूयाद्विधेरिति
यज्ञस्थाणुमृच्छेद्वृधात्वित्याह यज्ञस्थाणुमेव परि वृणक्ति प्रजापतिर्यज्ञमसृजत
सोऽस्माथ्सृष्टः पराङैथ्स प्र यजुरव्लीनात्प्र साम तमृगुदयच्छद्यदृगुदयच्छत् तदौद्
ग्रहणस्यौद् ग्रहणत्वमृचा
१४ जुहोति यज्ञस्योद्यत्या अनुष्टुप्छंदसामुदयच्छदित्याहुस्तस्मादनुष्टुभा जुहोति
यज्ञस्योद्यत्यै द्वादश वाथ्सबन्धान्युदयच्छन्नित्याहुस्तस्माद्द्वादशभिर्वाथ्सबन्धविदो दीक्षयन्ति
सा वा एषर्गनुष्टुग्वागनुष्टुग्यदेतयर्चा दीक्षयति वाचैवैन ँ सर्वया दीक्षयति विश्वे देवस्य
नेतुरित्याह सावित्र्येतेन मर्तो वृणीत सख्य
१५ मित्याह पितृदेवत्यैतेन विश्वे राय इषुध्यसीत्याह वैश्वदेव्येतेन द्युम्नं वृणीत
पुष्यस इत्याह पौष्ण्येतेन सा वा एषर्क्सर्वदेवत्या यदेतयर्चा दीक्षयति सर्वाभिरेवैनं
देवताभिर्दीक्षयति सप्ताक्षरं प्रथमं पदमष्टाक्षराणि त्रीणि यानि त्रीणि तान्यष्टावुपयन्ति
यानि चत्वारि तान्यष्टौ यदष्टाक्षरा तेन
१६ गायत्री यदेकादशाक्षरा तेन त्रिष्टुग्यद्द्वादशाक्षरा तेन जगती सा वा एषर्क्सर्वाणि
छन्दाँसि यदेतयर्चा दीक्षयति सर्वेभिरेवैनं छन्दोभिर्दीक्षयति सप्ताक्षरं प्रथमं पदँ
सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव रुंध एकस्मादक्षरादनाप्तं प्रथमं पदं
तस्माद्यद्वाचोऽनाप्तं तन्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः
प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजाना ँ सृष्ट्यै ॥
६। १। २॥ अग्नये ता वृधात्वृचा सख्यन्तेन जुहोति पञ्चदश च ॥ ६। १। २॥
१७ ऋक्सामे वै देवेभ्यो यज्ञायातिष्ठमाने कृष्णो रूपं कृत्वापक्रम्यातिष्ठतां
तेऽमन्यन्त यं वा इमे उपावथ्स्यर्तः स इदं भविष्यतीति ते उपामन्त्रयन्त ते
अहोरात्रयोर्महिमानमपनिधाय देवानुपावर्तेतामेष वा ऋचो वर्णो यच्छुक्लं कृष्णाजिनस्यैष
साम्नो यत्कृष्णमृक्सामयोः शिल्पे स्थ इत्याहर्क्सामे एवाव रुंध एष
१८ वा अह्नो वर्णो यच्छुक्लं कृष्णाजिनस्यैष रात्रिया यत्कृष्णं यदेवैनयोस्तत्र न्यक्तं तदेवाव
रुंधे कृष्णाजिनेन दीक्षयति ब्रह्मणो वा एतद्रूपं यत्कृष्णाजिनं ब्रह्मणैवैनं दीक्षयतीमां

धियꣳ शिक्षमाणस्य देवेत्याह यथायजुरेवैतद्गर्भो वा एष यद्दीक्षित उल्बं वासः प्रोर्णुते तस्माद्

१९ गर्भाः प्रावृता जायन्ते न पुरा सोमस्य क्रयादपोर्ण्वीत यत्पुरा सोमस्य क्रयादपोर्ण्वीत गर्भाः प्रजानां परापातुकाः स्युः क्रीते सोमेऽपोर्णुते जायत एव तदथो यथा वसीयाꣳसं प्रत्यपोर्णुते तादृगेव तदंगिरसः सुवर्गं लोकं यन्त ऊर्जं व्यभजन्त ततो यदत्यशिष्यत ते शरा अभवन्नूर्ग्वै शरा यच्छरमयी

२० मेखला भवत्यूर्जमेवाव रुंधे मध्यतः सं नह्यति मध्यत एवास्मा ऊर्जं दधाति तस्मान्मध्यत ऊर्जा भुंजत ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्यमवाचीनममेध्यं यन्मध्यतः संनह्यति मेध्यं चैवास्यामेध्यं च व्यावर्तयतीन्द्रो वृत्राय वज्रं प्राहरथ्स त्रेधा व्यभवथ्स्फ्यस्तृतीयꣳ रथस्तृतीयं यूपस्तृतीयं

२१ येऽन्तःशरा अशीर्यन्त ते शरा अभवन्तच्छराणाꣳशरत्वं वज्रो वै शराः, क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो यच्छरमयी मेखला भवति वज्रेणैव साक्षात्क्षुधं भ्रातृव्यं मध्यतोऽप हते त्रिवृद्भवति त्रिवृद्वै प्राणस्त्रिवृतमेव प्राणं मध्यतो यजमाने दधाति पृथ्वी भवति रज्जूनां व्यावृत्त्यै मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीं मिथुनत्वाय

२२ यज्ञो दक्षिणामभ्यध्यायत्ताꣳ समभवत्तदिन्द्रोऽचायथ्सोऽमन्यत यो वा इतो जनिष्यते स इदं भविष्यतीति तां प्राविशत्तस्या इन्द्र एवाजायत सोऽमन्यत यो वै मदितोऽपरो जनिष्यते स इदं भविष्यतीति तस्या अनुमृश्य योनिमाच्छिनथ्सा सूतवशाभवत्तथ्सूतवशायै जन्म

२३ ताꣳ हस्ते न्यवेष्टयत तां मृगेषु न्यदधाथ्सा कृष्णविषाणाभवदिन्द्रस्य योनिरसि मा मा हिꣳसीरिति कृष्णविषाणां प्र यच्छति सयोनिमेव यज्ञं करोति सयोनिं दक्षिणाꣳ सयोनिमिन्द्रꣳ सयोनित्वाय कृष्यै त्वा सुसस्याया इत्याह तस्मादकृष्टपच्या ओषधयः पच्यन्ते सुपिप्पलाभ्यस्त्वौषधीभ्य इत्याह तस्मादोषधयः फलं गृह्णन्ति यद्धस्तेन

२४ कण्डूयेत पामनं भावुकाः प्रजाः स्युर्यथ्स्मयेत नग्नं भावुकाः कृष्णविषाणया कण्डूयतेऽपिगृह्य स्मयते प्रजानां गोपीथाय न पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामव चृतेद्यत्पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामवचृतेद्योनिः प्रजानां परापातुका स्यान्नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति योनिर्वै यज्ञस्य चात्वालं योनिः कृष्णविषाणा योनावेव योनिं दधाति यज्ञस्य सयोनित्वाय ॥ ६। १। ३॥ रुन्ध एष तस्माच्छरमयी

यूपस्तृतीयं मिथुनत्वाय जन्म हस्तेनाऽष्टा चत्वारिꣳशच्च ॥ ६। १। ३॥
२५ वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना सा वनस्पतीन्प्राविशथ्सैषा वाग्वनस्पतिषु
वदति या दुन्दुभौ या तूणवे या वीणायां यद्दीक्षितदण्डं प्रयच्छति वाचमेवाव रुंध
औदुंबरो भवत्यूर्ग्वा उदुंबर ऊर्जमेवाव रुंधे मुखेन सं मितो भवति मुखत एवास्मा
ऊर्जं दधाति तस्मान्मुखत ऊर्जा भुञ्जते
२६ क्रीते सोमे मैत्रावरुणाय दण्डं प्र यच्छति मैत्रावरुणो हि पुरस्तादृत्विग्भ्यो वाचं
विभजति तामृत्विजो यजमाने प्रति ष्ठापयन्ति स्वाहा यज्ञं मनसेत्याह मनसा
हि पुरुषो यज्ञमभिगच्छति स्वाहा द्यावापृथिवीभ्यामित्याह द्यावापृथिव्योर्हि यज्ञः
स्वाहोरोरन्तरिक्षादित्याहान्तरिक्षे हि यज्ञः स्वाहा यज्ञं वातादारभ इत्याहायं
२७ वाव यः पवते स यज्ञस्तमेव साक्षादा रभते मुष्टी करोति वाचं यच्छति यज्ञस्य
धृत्या अदीक्षिष्टायं ब्राह्मण इति त्रिरुपाग्श्वाह देवेभ्य एवैनं प्राह त्रिरुच्चैरुभयेभ्य एवैनं
देवमनुष्येभ्यः प्राह न पुरा नक्षत्रेभ्यो वाचं वि सृजेद्यत्पुरा नक्षत्रेभ्यो वाचं विसृजेद्यज्ञं
विच्छिन्द्या
२८ दुदितेषु नक्षत्रेषु व्रतं कृणुतेति वाचं वि सृजति यज्ञव्रतो वै दीक्षितो यज्ञमेवाभि
वाचं वि सृजति यदि विसृजेद्वैष्णवीमृचमनु ब्रूयाद्यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ सं तनोति
दैवीं धियं मनामह इत्याह यज्ञमेव तन्म्रदयति सुपारा नो असद्वश इत्याह व्युष्टिमेवाव
रुंधे
२९ ब्रह्मवादिनो वदन्ति होतव्यं दीक्षितस्य गृहा३ इन होतव्या३मिति हविर्वै दीक्षितो
यज्जुहुयाद्यजमानस्यावदाय जुहुयाद्यन्न जुहुयाद्यज्ञपरुरन्तरियाद्ये देवा मनोजाता मनोयुज
इत्याह प्राणा वै देवा मनोजाता मनोयुजस्तेष्वेव परोऽक्षं जुहोति तन्नेव हुतं नेवाहुतग्ग्
स्वपन्तं वै दीक्षितꣳ रक्षाꣳसि जिघाꣳसन्त्यग्निः
३० खलु वै रक्षोहाग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहीत्याहाग्निमेवाधिपां कृत्वा
स्वपिति रक्षसामपहत्या अव्रत्यमिव वा एष करोति यो दीक्षितः स्वपिति त्वमग्ने व्रतपा
असीत्याहाग्निर्वै देवानां व्रतपतिः स एवैनं व्रतमा लंभयति देव आ मर्त्येष्वेत्याह देवो
३१ ह्येष सन्मर्त्येषु त्वं यज्ञेष्वीड्य इत्याहैतꣳ हि यज्ञेष्वीडतेऽप वै दीक्षिताथ्सुषुपुष
इंद्रियं देवताः क्रामन्ति विश्वे देवा अभि मामाऽववृत्रन्नित्याहेन्द्रियेणैवैनं देवताभिः सं
नयति यदेतद्यजुर्न ब्रूयाद्यावत एव पशूनभि दीक्षेत तावन्तोऽस्य पशवः स्यू रास्वेयथ्
३२ सोमा भूयो भरेत्याहापरिमितानेव पशूनव रुंधे चन्द्रमसि मम भोगाय भवेत्याह

यथादेवतमेवैनाः प्रति गृह्णाति वायवे त्वा वरुणाय त्वेति यदेवमेता नानुदिशेदयथादेवतं दक्षिणा गमयेदा देवताभ्यो वृश्च्येत यदेवमेता अनुदिशति यथादेवतमेव दक्षिणा गमयति न देवताभ्य आ
३३ वृश्च्यते देवीरापो अपां नपादित्याह यद्वो मेध्यं यज्ञियꣳ सदेवं तद्वो माव क्रमिषमिति वावैतदाहाच्छिन्नं तन्तुं पृथिव्या अनु गेषमित्याह सेतुमेव कृत्वात्येति ॥ ६। १। ४॥ भुञ्जतेऽयं छिन्द्याद्रुंधेऽग्निराह देव इयद्देवताभ्य आ त्रयस्त्रिꣳशच्च ॥ ६। १। ४॥
३४ देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्ते२ऽन्योऽन्यमुपाधावन्त्वया प्र जानाम त्वयेति तेऽदित्याꣳ समध्रियन्त त्वया प्र जानामेति साऽब्रवीद्वरं वृणै मत्प्रायणा एव वो यज्ञा मदुदयना असन्निति तस्मादादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयः पञ्च देवता यजति पञ्च दिशो दिशां प्रज्ञात्या
३५ अथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंधे पथ्याग् स्वस्तिमयजन्प्राचीमेव तया दिशं प्राजानन्नग्निना दक्षिणा सोमेन प्रतीचीꣳ सवित्रोदीचीमदित्योर्ध्वां पथ्याग् स्वस्तिं यजति प्राचीमेव तया दिशं प्रजानाति पथ्याग् स्वस्तिमिष्ट्वाग्नीषोमौ यजति चक्षुषी वा एते यज्ञस्य यदग्नीषोमौ ताभ्यामेवानु पश्य
३६ त्यग्नीषोमाविष्ट्वा सवितारं यजति सवितृप्रसूत एवानु पश्यति सवितारमिष्ट्वादितिं यजतीयं वा अदितिरस्यामेव प्रतिष्ठायानु पश्यत्यदितिमिष्ट्वा मारुतीमृचमन्वाह मरुतो वै देवानां विशो देवविशं खलु वै कल्पमानं मनुष्यविशमनु कल्पते यन्मारुतीमृचमन्वाह विशां क्लृप्त्यै ब्रह्मवादिनो वदन्ति प्रयाजवदननूयाजं प्रायणीयं कार्यमनूयाजव
३७ दप्रयाजमुदयनीयमितीमे वै प्रयाजा अमी अनूयाजाः सैव सा यज्ञस्य सन्ततिस्तत्तथा न कार्यमात्मा वै प्रयाजाः प्रजानूयाजा यत्प्रयाजानन्तरियादात्मानमन्तरियाद्यदनूयाजानन्तरियात्प्रज खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञः परा भवति यज्ञं पराभवन्तं यजमानोऽनु
३८ परा भवति प्रयाजवदेवानूयाजवत्प्रायणीयं कार्यं प्रयाजवदनूयाजवदुदयनीयं नात्मानमन्तरेति न प्रजां न यज्ञः पराभवति न यजमानः प्रायणीयस्य निष्कास उदयनीयमभि निर्वपति सैव सा यज्ञस्य सन्ततिर्याः प्रायणीयस्य याज्या यत्ता उदयनीयस्य याज्याः कुर्यात्पराङमुं लोकमा रोहेत्प्रमायुकः स्याद्याः प्रायणीयस्य पुरोऽनुवाक्यास्ता उदयनीयस्य याज्याः करोत्यस्मिन्नेव लोके प्रति तिष्ठति ॥ ६। १। ५॥ प्रज्ञात्यै पश्यत्यनूयाजवद्यजमानोऽनु पुरोनुवाक्यास्ता अष्टौ च ॥ ६। १। ५॥

३९ कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्धेताꣳ सा कद्रूः सुपर्णीमजयथ्साब्रवीत्तृतीयस्यामितो
दिवि सोमस्तमाहर तेनात्मानं निष्क्रीणीष्वेतीयं वै कद्रूरसौ सुपर्णी छन्दाꣳसि सौपर्णेयाः
साब्रवीदस्मै वै पितरौ पुत्रान्बिभृतस्तृतीयस्यामितो दिवि सोमस्तमाहर तेनात्मानं
निष्क्रीणीष्वे
४० ति मा कद्रूरवोचदिति जगत्युदपतच्चतुर्दशाक्षरा सती साप्राप्य न्यवर्तत तस्यै
द्वे अक्षरे अमीयेताꣳ सा पशुभिश्च दीक्षया चागच्छत्तस्माज्जगती छंदसां पशव्यतमा
तस्मात्पशुमन्तं दीक्षोप नमति त्रिष्टुगुदपतत्त्रयोदशाक्षरा सती साप्राप्य न्यवर्तत तस्यै द्वे
अक्षरे अमीयेताꣳ सा दक्षिणाभिश्च
४१ तपसा चागच्छत्तस्मात्त्रिष्टुभो लोके माध्यन्दिने सवने दक्षिणा नीयन्त एतत्खलु
वाव तप इत्याहुर्यः स्वं ददातीति गायत्र्युदपतच्चतुरक्षरा सत्यजया ज्योतिषा तमस्या
अजाभ्यरुंध तदजाया अजत्वꣳ सा सोमं चाहरच्चत्वारि चाक्षराणि साष्टाक्षरा समपद्यत
ब्रह्मवादिनो वदन्ति
४२ कस्माथ्सत्याद्गायत्री कनिष्ठा छंदसाꣳ सती यज्ञमुखं परीयायेति यदेवादः
सोममाहरत्तस्माद्यज्ञमुखं पर्यैत्तस्मात्तेजस्विनीतमा पद्भ्यां द्वे सवने समगृह्णान्मुखेनैकं
यन्मुखेन समगृह्णात्तदधयत्तस्माद् द्वे सवने शुक्रवती प्रातःसवनं च माध्यन्दिनं च
तस्मात्तृतीयसवन ऋजीषमभि षुण्वन्ति धीतमिव हि मन्यन्त
४३ आशिरमव नयति सशुक्रत्वायाथो सं भरत्येवैनत्तꣳ सोमममाह्रियमाणं गन्धर्वो
विश्वावसुः पर्यमुष्णाथ्स तिस्रो रात्रीः परिमुषितोऽवसत्तस्मात्तिस्रो रात्रीः क्रीतः सोमो
वसति ते देवा अब्रुवन्स्त्रीकामा वै गन्धर्वाः स्त्रिया निष्क्रीणामेति ते वाचग्ग्
स्त्रियमेकहायनीं कृत्वा तया निरक्रीणन्थ्सा रोहिद्रूपं कृत्वा गन्धर्वेभ्यो
४४ ऽपक्रम्यातिष्ठत्तद्रोहितो जन्म ते देवा अब्रुवन्नप युष्मदक्रमीन्नास्मानुपावर्तते वि
ह्वयामहा इति ब्रह्म गन्धर्वा अवदन्नगायन्देवाः सा देवान्गायत उपावर्तत तस्माद्गायन्तग्ग्
स्त्रियः कामयन्ते कामुका एनग्ग् स्त्रियो भवन्ति य एवं वेदाथो य एवं विद्वानपि जन्येषु
भवति तेभ्य एव ददत्युत यद्बहुतया
४५ भवन्त्येकहायन्या क्रीणाति वाचैवैनꣳ सर्वया क्रीणाति तस्मादेकहायना मनुष्या वाचं
वदन्त्यकूटया ऽकर्णया ऽकाणया ऽश्लोणया ऽसप्तशफया क्रीणाति सर्वयैवैनं क्रीणाति
यच्छ्वेतया क्रीणीयाद्दुश्चर्मा यजमानः स्याद्यत्कृष्णयानुस्तरणी स्यात्प्रमायुको यजमानः

स्याद्यद्विरूपया वार्त्रघ्नी स्याथ्स वान्यं जिनीयात्तं वान्यो जिनीयादरुणया पिङ्गाक्ष्या
क्रीणात्येतद्वै सोमस्य रूपग्ग् स्वयैवैनं देवतया क्रीणाति ॥ ६। १। ६॥ निष्क्रीणीष्व
दक्षिणाभिश्च वदन्ति मन्यन्ते गन्धर्वेभ्यो बहुतयाः पिंगाक्ष्या दश च ॥ ६। १। ६॥

४६ तद्धिरण्यमभवत्तस्मादद्भ्यो हिरण्यं पुनन्ति ब्रह्मवादिनो वदन्ति कस्माथ्सत्यादनस्थिकेन प्रजाः प्रवीयन्तेऽस्थन्वतीर्जायन्त इति यद्धिरण्यं घृतेऽवधाय जुहोति तस्मादनस्थिकेन प्रजाः प्र वीयन्तेऽस्थन्वतीर्जायन्त एतद्वा अग्नेः प्रियं धाम यद्घृतं तेजो हिरण्यमियं ते शुक्र तनूरिदं वर्च इत्याह सतेजसमेवैनꣳ सतनुं

४७ करोत्यथो सं भरत्येवैनं यदबद्धमवदध्याद्गर्भाः प्रजानां परापातुकाः स्युर्बद्धमव दधाति गर्भाणां धृत्यै निष्टर्क्यं बध्नाति प्रजानां प्रजननाय वाग्वा एषा यथ्सोमक्रयणी जूरसीत्याह यद्धि मनसा जवते तद्वाचा वदति धृता मनसेत्याह मनसा हि वाग्धृता जुष्टा विष्णव इत्याह

४८ यज्ञो वै विष्णुर्यज्ञायैवैनां जुष्टां करोति तस्यास्ते सत्यसवसः प्रसव इत्याह सवितृप्रसूतामेव वाचमव रुंधे काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्त्येष खलु वा अरक्षोहतः पन्था योऽग्नेश्च सूर्यस्य च सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः कनीनिकामित्याह य एवारक्षोहतः पन्थास्तꣳ समारोहति

४९ वाग्वा एषा यथ्सोमक्रयणी चिदसि मनासीत्याह शास्त्येवैनामेतत्तस्माच्छिष्टाः प्रजा जायन्ते चिदसीत्याह यद्धि मनसा चेतयते तद्वाचा वदति मनासीत्याह यद्धि मनसाभिगच्छति तत्करोति धीरसीत्याह यद्धि मनसा ध्यायति तद्वाचा

५० वदति दक्षिणासीत्याह दक्षिणा ह्येषा यज्ञियासीत्याह यज्ञियामेवैनां करोति क्षत्रियासीत्याह क्षत्रिया ह्येषा ऽदितिरस्युभयतः शीर्ष्णीत्याह यदेवादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयस्तस्मादेवमाह यदबद्धा स्यादयता स्याद्यत्पदिबद्धानुस्तरणी स्यात्प्रमायुको यजमानः स्याद्

५१ यत्कर्णगृहीता वार्त्रघ्नी स्याथ्स वान्यं जिनीयात्तं वान्यो जिनीयान्मित्रस्त्वा पदि बध्नात्वित्याह मित्रो वै शिवो देवानां तेनैवैनां पदि बध्नाति पूषाध्वनः पात्वित्याहेयं वै पूषेमामेवास्या अधिपामकः समष्ट्या इन्द्रायाध्यक्षायेत्याहेन्द्रमेवास्या अध्यक्षं करो

५२ त्यनु त्वा माता मन्यतामनु पितेत्याहानुमतयैवैनया क्रीणाति सा देवि देवमच्छेहीत्याह देवी ह्येषा देवः सोम इन्द्राय सोममित्याहेन्द्राय हि सोम आह्रियते यदेतद्यजुर्न

ब्रूयात्पराच्येव सोमक्रयणीयाद्रुद्रस्त्वाऽ वर्तयत्वित्याह रुद्रो वै क्रूरो
५३ देवानां तमेवास्यै परस्ताद्दधात्यावृत्त्यै क्रूरमिव वा एतत्करोति यद्रुद्रस्य कीर्तयति मित्रस्य पथेत्याह शान्त्यै वाचा वा एष वि क्रीणीते यः सोमक्रयण्या स्वस्ति सोमसखा पुनरेहि सह रय्येत्याह वाचैव विक्रीय पुनरात्मन्वाचं धत्तेऽनुपदासुकास्य वाग्भवति य एवं वेद ॥ ६। १। ७॥
सतनुं विष्णव इत्याह समारोहति ध्यायति तद्वाचा यजमानः स्यात्करोति क्रूरो वेद ॥ ६। १। ७॥
५४ षड्वदान्यनु नि क्रामति षडहं वाङ्नाति वदत्युत संवथ्सरस्यायने यावत्येव वाक्तामव रुंधे सप्तमे पदे जुहोति सप्तपदा शक्करी पशवः शक्करी पशूनेवाव रुंधे सप्त ग्राम्याः पशवः सप्तारण्याः सप्त छन्दाग्ंस्युभयस्यावरुद्धै वस्व्यसि रुद्रासीत्याह रूपमेवास्या एतन्महिमानं
५५ व्याचष्टे बृहस्पतिस्त्वा सुम्ने रण्वत्वित्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै पशूनव रुंधे रुद्रो वसुभिरा चिकेत्वित्याहावृत्त्यै पृथिव्यास्त्वा मूर्धन्ना जिघर्मि देवयजन इत्याह पृथिव्या ह्येष मूर्धा यद्देवयजनमिडायाः पद इत्याहेडायै ह्येतत्पदं यथ्सोमक्रयण्यै घृतवति स्वाहे
५६ त्याह यदेवास्यै पदाद्धृतमपीड्यत तस्मादेवमाह यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्या
५७ इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवानन्तरायं ग्रीवाः कृन्तति पशवो वै सोमक्रयण्यै पदं यावत्मूतꣳ सं वपति पशूनेवाव रुंधेऽस्मे राय इति सं वपत्यात्मानमेवाध्वर्युः
५८ पशुभ्यो नान्तरेति त्वे राय इति यजमानाय प्र यच्छति यजमान एव रयिं दधाति तोते राय इति पत्निया अर्धो वा एष आत्मनो यत्पत्नी यथा गृहेषु निधत्ते तादृगेव तत्त्वष्टीमती ते सपेयेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधात्यस्मै वै लोकाय गार्हपत्य आ धीयतेऽमुष्मा आहवनीयो यद्गार्हपत्य उपवपेदस्मि३ꣳल्लोके पशुमान्थ्स्याद्यदाहवनीयेऽमुष्मि३ꣳल्लोके पशुमान्थ्स्यादुभयोरुप वपत्युभयोरेवैनं लोकयोः पशुमन्तं करोति ॥ ६। १। ८॥ महिमानग्ग् स्वाहाऽपहत्या

अध्वर्युर्धीयते चतुर्विꣳशतिश्च ॥ ६। १। ८॥
५९ ब्रह्मवादिनो वदन्ति विचित्यः सोमा३ न विचित्या३ इति सोमो वा ओषधीनाꣳ राजा तस्मिन्, यदापन्नं ग्रसितमेवास्य तद्यद्विचिनुयाद्यथास्याद् ग्रसितं निष्खिदति तादृगेव तद्यन्न विचिनुयाद्यथाक्षन्नापन्नं विधावति तादृगेव तत्क्षोधुकोऽध्वर्युः स्यात्क्षोधुको यजमानः सोमविक्रयिन्थ्सोमꣳ शोधयेत्येव ब्रूयाद्यदीतरं
६० यदीतरमुभयेनैव सोमविक्रयिणमर्पयति तस्माथ्सोमविक्रयी क्षोधुकोऽरुणो ह स्माहौपवेशिः सोमक्रयण एवाहं तृतीयसवनमव रुंध इति पशूनां चर्मन्मिमीते पशूनेवाव रुंधे पशवो हि तृतीयꣳ सवनं यं कामयेतापशुः स्यादित्यृक्षतस्तस्य मिमीतर्क्षं वा अपशव्यमपशुरेव भवति यं कामयेत पशुमान्थ्स्या
६१ दिति लोमतस्तस्य मिमीतैतद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशूनव रुंधे पशुमानेव भवत्यपामन्ते क्रीणाति सरसमेवैनं क्रीणात्यमात्योऽसीत्याहामैवैनं कुरुते शुक्रस्ते ग्रह इत्याह शुक्रो ह्यस्य ग्रहोऽनसाच्छ याति महिमानमेवास्याच्छ यात्यनसा
६२ ऽच्छ याति तस्मादनोवाह्यꣳ समे जीवनं यत्र खलु वा एतꣳ शीर्ष्णा हरन्ति तस्माच्छीर्षहार्यं गिरौ जीवनमभित्यं देवꣳ सवितारमित्यतिच्छंदसर्चा मिमीतेऽतिच्छन्दा वै सर्वाणि छन्दाꣳसि सर्वेभिरेवैनं छन्दोभिर्मिमीते वर्ष्म वा एषा छंदसां यदतिच्छन्दा यदतिच्छंदसर्चा मिमीते वर्ष्मैवैनꣳ समानानां करोत्यकयैकयोथ्सर्गं
६३ मिमीतेऽयातयाम्नियायातयाम्नियैवैनं मिमीते तस्मान्नानावीर्या अङ्गुलयः सर्वास्वङ्गुष्ठमुप नि गृह्णाति तस्माथ्समावद्वीर्योऽन्याभिरङ्गुलिभिस्तस्माथ्सर्वा अनु सं चरति यथ्सह सर्वाभिर्मिमीत सꣳश्लिष्टा अङ्गुलयो जायेरन्नेकयैकयोथ्सर्गं मिमीते तस्माद्विभक्ता जायन्ते पञ्च कृत्वो यजुषा मिमीते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंधे पञ्च कृत्वस्तूष्णीं
६४ दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुंधे यद्यजुषा मिमीते भूतमेवाव रुंधे यत्तूष्णीं भविष्यद्यद्वै तावानेव सोमः स्याद्यावन्तं मिमीते यजमानस्यैव स्यान्नापि सदस्यानां प्रजाभ्यस्त्वेत्युप समूहति सदस्यानेवान्वाभजति वाससोप नह्यति सर्वदेवत्यं वै
६५ वासः सर्वाभिरेवैनं देवताभिः समर्धयति पशवो वै सोमः प्राणाय त्वेत्युप नह्यति प्राणमेव पशुषु दधाति व्यानाय त्वेत्यनु श्रृन्थति व्यानमेव पशुषु दधाति तस्माथ्स्वपन्तं

प्राणा न जहति ॥
६। १। ९॥ इतरं पशुमान्थ्स्याद्यात्यनसोथ्सर्गं तूष्णीँ सर्वदेवत्यं वै त्रयस्त्रिँशच्च ॥ ६। १। ९॥
६६ यत्कलया ते शफेन ते क्रीणानीति पणेतागो अर्घँ सोमं कुर्यादगो अर्घं यजमानमगो अर्घमध्वर्युं गोस्तु महिमानं नाव तिरेद्गवा ते क्रीणानीत्येव ब्रूयाद्गो अर्घमेव सोमं करोति गो अर्घं यजमानं गो अर्घमध्वर्युं न गोर्महिमानमव तिरत्यजया क्रीणाति सतपसमेवैनं क्रीणाति हिरण्येन क्रीणाति सशुक्रमेवै
६७ नं क्रीणाति धेन्वा क्रीणाति साशिरमेवैनं क्रीणात्यृषभेण क्रीणाति सेन्द्रमेवैनं क्रीणात्यनडुहा क्रीणाति वह्निर्वा अनड्वान्, वह्निनैव वह्नि यज्ञस्य क्रीणाति मिथुनाभ्यां क्रीणाति मिथुनस्यावरुद्ध्यै वाससा क्रीणाति सर्वदेवत्यं वै वासः सर्वाभ्य एवैनं देवताभ्यः क्रीणाति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुंधे
६८ तपसस्तनूरसि प्रजापतेर्वर्ण इत्याह पशुभ्य एव तदध्वर्युर्निह्नुत आत्मनोऽनाव्रस्काय गच्छति श्रियं प्र पशूनाप्नोति य एवं वेद शुक्रं ते शुक्रेण क्रीणामीत्याह यथायजुरेवैतद्देवा वै येन हिरण्येन सोममक्रीणन्तदभीषहा पुनराददत को हि तेजसा वि क्रेष्यत इति येन हिरण्येन
६९ सोमं क्रीणीयात्तदभीषहा पुनरा ददीत तेज एवात्मन्धत्तेऽस्मे ज्योतिः सोमविक्रयिणि तम इत्याह ज्योतिरेव यजमाने दधाति तमसा सोमविक्रयिणमर्पयति यदनुपग्रथ्य हन्याद्दन्दशूकास्ताँ समाँ सर्पाः स्युरिदमहँ सर्पाणां दन्दशूकानां ग्रीवा उप ग्रथ्नामीत्याहादन्दशूकास्ताँ समाँसर्पा भवन्ति तमसा सोमविक्रयिणं विध्यति स्वान
७० भ्राजेत्याहैते वा अमुष्मिं३ँल्लोके सोममरक्षन्तेभ्योऽधि सोममाहरन् यदेतेभ्यः सोमक्रयणान्नानुदिशेदक्रीतोऽस्य सोमः स्यान्नास्यैतेऽमुष्मिं३ँल्लोके सोमँरक्षेयुर्यदेतेभ्यः सोमक्रयणाननुदिशति क्रीतोऽस्य सोमो भवत्येतेऽस्यामुष्मिं३ँल्लोके सोमँ रक्षन्ति ॥
६। १। १०॥ सशुक्रमेव रुंध इति येन हिरण्येन स्वान चतुश्चत्वारिँशच्च ॥ ६। १। १०॥
७१ वारुणो वै क्रीतः सोम उपनद्धो मित्रो न एहि सुमित्रधा इत्याह शान्त्या इन्द्रस्योरुमा विश दक्षिणमित्याह देवा वै यँ सोममक्रीणन्तमिन्द्रस्योरौ दक्षिण आसादयन्नेष खलु वा एतर्हीन्द्रो यो यजते तस्मादेवमाहोदायुषा स्वायुषेत्याह देवता एवान्वारभ्योत्
७२ तिष्ठत्युर्वन्तरिक्षमन्विहीत्याहान्तरिक्षदेवत्यो २ ह्येतर्हि सोमोऽदित्याः सदोऽस्यदित्याः

सद आ सीदेत्याह यथायजुरेवैतद्वि वा एनमेतदर्धयति यद्वारुणꣳ सन्तं मैत्रं करोति वारुण्यर्चा सादयति स्वयैवैनं देवतया समर्धयति वाससा पर्यानह्यति सर्वदेवत्यं वै वासः सर्वाभिरेवै
७३ नं देवताभिः समर्धयत्यथो रक्षसामपहत्यै वनेषु व्यन्तरिक्षं ततानेत्याह वनेषु हि व्यन्तरिक्षं ततान वाजमर्वथ्स्वित्याह वाजग्ग् ह्यर्वथ्सु पयो अघ्नियास्वित्याह पयो ह्यघ्नियासु हृथ्सु क्रतुमित्याह हृथ्सु हि क्रतुं वरुणो विक्ष्वग्निमित्याह वरुणो हि विक्ष्वग्निं दिवि सूर्य
७४ मित्याह दिवि हि सूर्यꣳ सोममद्रावित्याह ग्रावाणो वा अद्रयस्तेषु वा एष सोमं दधाति यो यजते तस्मादेवमाहोदुत्यं जातवेदसमिति सौर्यर्चा कृष्णाजिनं प्रत्यानह्यति रक्षसामपहत्या उस्रावेतं धूर्षाहावित्याह यथायजुरेवैतत्प्र च्यवस्व भुवस्पत इत्याह भूतानाग् ह्ये
७५ ष पतिर्विश्वान्यभि धामानीत्याह विश्वानि ह्ये २ षोऽभि धामानि प्रच्यवते मा त्वा परिपरी विददित्याह यदेवादः सोममाह्रियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात्तस्मादेवमाहापरिमोषाय यजमानस्य स्वस्त्ययन्यसीत्याह यजमानस्यैवैष यज्ञस्यान्वारंभोऽनवच्छित्त्यै वरुणो वा एष यजमानमभ्यैति यत्
७६ क्रीतः सोम उपनद्धो नमो मित्रस्य वरुणस्य चक्षस इत्याह शान्त्या आ सोमं वहन्त्यग्निना प्रति तिष्ठते तौ संभवन्तौ यजमानमभि संभवतः पुरा खलु वावैष मेधायात्मानमारभ्य चरति यो दीक्षितो यदग्नीषोमीयं पशुमालभत आत्मनिष्क्रयण एवास्य स तस्मात्तस्य नाश्यं पुरुष निष्क्रयण इव ह्यथो खल्वाहुरग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्निति यदग्नीषोमीयं पशुमालभते वार्त्रघ्न एवास्य स तस्माद्वाश्यं वारुण्यर्चा परि चरति स्वयैवैनं देवतया परि चरति ॥ ६। १। ११॥ अन्वारभ्योथ्सर्वाभिरेव सूर्यं भूतानाग् ह्येति यदाहुः सप्तविꣳशतिश्च ॥ ६। १। ११॥

प्राचीनवꣳशं यावन्त ऋख्सामो वाग्वै देवेभ्यो देवा वै देवयजनं कद्रूश्च तद्धिरण्यꣳ षद्वदानि ब्रह्मवादिनो विचित्यो यत्कलया ते वारुणो वै क्रीतः सोम एकादश ॥

प्राचीनवꣳशग्ग् स्वाहेत्याह योन्तः शरा ह्येष सन्तपसा च यत्कर्णगृहीतेति लोमतो वारुणः षट्थ्सप्ततिः ॥

प्राचीनवꣳशं परि चरति ॥

# षष्ठकाण्डे द्वितीयः प्रश्नः २

१ यदुभौ विमुच्यातिथ्यं गृह्णीयाद्यज्ञं वि च्छिन्द्याद्यदुभाव विमुच्य यथानागतायातिथ्यं क्रियते तादृगेव तद्विमुक्तोऽन्योऽनड्वान् भवत्यविमुक्तोऽन्योऽथातिथ्यं गृह्णाति यज्ञस्य संतत्यै पत्न्यन्वारभते पत्नी हि पारीणह्यस्येशे पत्नियैवानुमतं निर्वपति यद्वै पत्नी यज्ञस्य करोति मिथुनं तदथो पत्निया एवै

२ ष यज्ञस्यान्वारंभोऽनवच्छित्त्यै यावद्भिर्वै राजानुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छन्दाꣳसि खलु वै सोमस्य राज्ञोऽनुचराण्यग्नेरातिथ्यमसि विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति सोमस्यातिथ्यमसि विष्णवे त्वेत्याह त्रिष्टुभ एवैतेन करोत्यतिथेरातिथ्यमसि विष्णवे त्वेत्याह जगत्या

३ एवैतेन करोत्यग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वेत्याहानुष्टुभ एवैतेन करोति श्येनाय त्वा सोमभृते विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति पञ्च कृत्वो गृह्णाति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंधे ब्रह्मवादिनो वदन्ति कस्मात्सत्याद्गायत्रिया उभयत आतिथ्यस्य क्रियत इति यदेवादः सोममा

४ ऽहरत्तस्माद्गायत्रिया उभयत आतिथ्यस्य क्रियते पुरस्ताच्चोपरिष्टाच्च शिरो वा एतद्यज्ञस्य यदातिथ्यं नवकपालः पुरोडाशो भवति तस्मान्नवधा शिरो विष्यूतं नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवृता स्तोमेन सं मितास्तेजस्त्रिवृत्तेज एव यज्ञस्य शीर्षन्दधाति नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवृता प्राणेन सं मितास्त्रिवृद्वै

५ प्राणस्त्रिवृतमेव प्राणमभिपूर्वं यज्ञस्य शीर्षन्दधाति प्रजापतेर्वा एतानि पक्ष्माणि यदश्ववाला ऐक्षवी तिरश्ची यदाश्ववालः प्रस्तरो भवत्यैक्षवी तिरश्ची प्रजापतेरेव तच्चक्षुः संभरति देवा वै या आहुतीरजुहवुस्ता असुरा निष्कावमादन्ते देवाः कार्ष्मर्यमपश्यन्कर्मण्यो वै कर्मैनेन कुर्वीतेति ते कार्ष्मर्यमयान्परिधीन्

६ कुर्वत तैर्वै ते रक्षाग्स्यपाघ्नत यत्कार्ष्मर्यमयाः परिधयो भवन्ति रक्षसामपहत्यै सग्ग् स्पर्शयति रक्षसामनन्ववचाराय न पुरस्तात्परि दधात्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षाग्स्यपहन्त्यूर्ध्वे समिधावा दधात्युपरिष्टादेव रक्षाग्स्यपहन्ति यजुषान्यां तूष्णीमन्यां मिथुनत्वाय द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मवादिनो वदन्त्य

७ ग्निश्च वा एतौ सोमश्च कथा सोमायातिथ्यं क्रियते नाग्नय इति यदग्नावग्निं मथित्वा

प्रहरति तेनैवाग्नय आतिथ्यं क्रियतेऽथो खल्वाहुरग्निः सर्वा देवता इति यद्धविरासाद्याग्निं मन्थति हव्यायैवासन्नाय सर्वा देवता जनयति ॥ ६। २। १॥ पत्निया एव जगत्या आ त्रिवृद्वै परिधीन्, वदन्त्येक चत्वारिꣳशच्च ॥ ६। २। १॥
८ देवासुराः संयत्ता आसन्ते देवा मिथो विप्रिया आसन्ते २ ऽन्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठमानाः पञ्चधा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैस्तेऽमन्यन्तासुरेभ्यो वा इदं भ्रातृव्येभ्यो रध्यामो यन्मिथो विप्रियाः स्मो यान इमाः प्रियास्तनुवस्ताः समवद्यामहै ताभ्यः स निर्ऋच्छाद्यो
९ नः प्रथमोऽ १ऽ न्योऽन्यस्मै द्रुह्यादिति तस्माद्यः सतानूनप्त्रिणां प्रथमो द्रुह्यति स आर्तिमार्च्छति यत्तानूनप्त्रꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य भ्रातृव्यो भवति पञ्च कृत्वोऽव द्यति पञ्चधा हि ते तथ्समवाद्यन्ताथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंध आपतये त्वा गृह्णामीत्याह प्राणो वा
१० आपतिः प्राणमेव प्रीणाति परिपतय इत्याह मनो वै परिपतिर्मन एव प्रीणाति तनूनप्त्र इत्याह तनुवो हि ते ताः समवाद्यन्त शाक्करायेत्याह शक्त्यै हि ते ताः समवाद्यन्त शक्मन्नोजिष्ठायेत्याहौजिष्ठꣳ हि ते तदात्मनः समवाद्यन्तानाधृष्टमस्यनाधृष्यमित्याहानाधृष्टग्ग् ह्येतदनाधृष्यं देवानामोज
११ इत्याह देवानाग् ह्येतदोजोऽभिशस्तिपा अनभिशस्तेन्यमित्याहाभिशस्तिपा ह्येतदनभिशस्तेन्यमनु मे दीक्षां दीक्षापतिर्मन्यतामित्याह यथा यजुरेवैतद्घृतं वै देवा वज्रं कृत्वा सोममघ्नन्नन्तिकमिव खलु वा अस्यैतच्चरन्ति यत्तानूनप्त्रेण प्रचरन्त्यꣳशुर꣡ꣳशुस्ते देव सोमाप्यायतामित्याह य
१२ देवास्याप्युवायते यन्मीयते तदेवास्यैतेनाप्या ययत्या तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेत्याहोभावेवेन्द्रं च सोमं चाप्याययत्या प्यायय सखीन्थ्सन्या मेधयेत्याहर्त्विजो वा अस्य सखायस्तानेवाप्याययति स्वस्ति ते देव सोम सुत्यामशीये
१३ त्याहाशिषमेवैतामा शास्ते प्र वा एतेऽस्माल्लोकाच्च्यवन्ते ये सोममाप्याययन्त्यन्तरिक्षदेवत्यो हि सोम आप्यायित एष्टा रायः प्रेषे भगायेत्याह द्यावापृथिवीभ्यामेव नमस्कृत्यास्मि३ꣳल्लोके प्रति तिष्ठन्ति देवासुराः संयत्ता आसन्ते देवा बिभ्यतोऽग्निं प्राविशन्तस्मादाहुरग्निः सर्वा देवता इति ते
१४ ऽग्निमेव वरूथं कृत्वासुरानभ्यभवन्नग्निमिव खलु वा एष प्र विशति

योऽवान्तरदीक्षामुपैति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य भ्रातृव्यो भवत्यात्मानमेव
दीक्षया पाति प्रजामवान्तरदीक्षया संतरां मेखलाꣳ समायच्छते प्रजा ह्यात्मनोऽन्तरतरा
तप्तव्रतो भवति मदन्तीभिर्मार्जयते निर्ह्यग्निः शीतेन वायति समिद्ध्यै या ते अग्ने रुद्रिया
तनूरित्याह स्वयैवैनद्देवतया व्रतयति सयोनित्वाय शान्त्यै ॥ ६। २। २॥ यो वा ओज
आह यदशीयेति तेग्न एकादश च ॥ ६। २। २॥
१५ तेषामसुराणां तिस्रः पुर आसन्नयस्मय्यवमाथ रजताथ हरिणी ता देवा जेतुं
नाशक्नुवन्ता उपसदैवाजिगीषन्तस्मादाहुर्यश्चैवं वेद यश्च नोपसदा वै महापुरं जयन्तीति
त इषुꣳ समस्कुर्वताग्निमनीकꣳ सोमꣳशल्यं विष्णुं तेजनं तेऽब्रुवन्क इमामसिष्यतीति
१६ रुद्र इत्यब्रुवन्रुद्रो वै क्रूरः सोऽस्यत्विति सोऽब्रवीद्वरं वृणा अहमेव
पशूनामधिपतिरसानीति तस्माद्रुद्रः पशूनामधिपतिस्ताꣳ रुद्रोऽवासृजथ्स तिस्रः पुरो
भित्त्वैभ्यो लोकेभ्योऽसुरान्प्राणुदत यदुपसद उपसद्यन्ते भ्रातृव्यपराणुत्त्यै नान्यामाहुतिं
पुरस्ताज्जुहुयाद्यदन्यामाहुतिं पुरस्ताज्जुहुया
१७ दन्यन्मुखं कुर्याथ्स्रुवेणाघारमा घारयति यज्ञस्य प्रज्ञात्यै पराङतिक्रम्य जुहोति
पराच एवैभ्यो लोकेभ्यो यजमानो भ्रातृव्यान् प्रणुदते पुनरत्याक्रम्योपसदं जुहोति
प्रणुद्यैवैभ्यो लोकेभ्यो भ्रातृव्यांजित्वा भ्रातृव्यलोकमभ्यारोहति देवा वै याः प्रातरुपसद
उपासीदन्नह्नस्ताभिरसुरान्प्राणुदन्त याः सायꣳ रात्रियै ताभिर्यथ्सायं प्रातरुपसद
१८ उपसद्यन्तेऽहोरात्राभ्यामेव तद्यजमानो भ्रातृव्यान् प्रणुदते याः प्रातर्याज्याः स्युस्ताः
सायं पुरोऽनुवाक्याः कुर्यादयातयामत्वाय तिस्र उपसद उपैति त्रय इमे लोका इमानेव
लोकान्प्रीणाति षट्थ्सं पद्यन्ते षड्वा ऋतव ऋतूनेव प्रीणाति द्वादशाहीने सोम उपैति
द्वादश मासाः संवथ्सरः संवथ्सरमेव प्रीणाति चतुर्विꣳशतिः सं
१९ पद्यन्ते चतुर्विꣳशतिरर्धमासा अर्धमासानेव प्रीणात्याराग्रामवान्तरदीक्षामुपेयाद्यः
कामयेतास्मिन्मे लोकेऽर्धुकग्ग् स्यादित्येकमग्रेऽथ द्वावथ त्रीनथ चतुर एषा वा
आराग्रावान्तरदीक्षास्मिन्नेवास्मै लोकेऽर्धुकं भवति परोवरीयसीमवान्तरदीक्षामुपेयाद्यः
कामयेतामुष्मिन्मे लोकेऽर्धुकग्ग् स्यादिति चतुरोऽग्रेऽथ त्रीनथ द्वावथैकमेषा वै
परोवरीयस्यवान्तरदीक्षामुष्मिन्नेवास्मै लोकेऽर्धुकं भवति ॥ ६। २। ३॥ असिष्यतीति
जुहुयाथ्सायं प्रातरुपसदश्चतुर्विꣳशतिः सञ्चतुरोऽग्रे षोडश च ॥ ६। २। ३॥
२० सुवर्गं वा एते लोकं यन्ति य उपसद उपयन्ति तेषां य उन्नयते हीयत एव स

नोदनेषीति सून्नीयमिव यो वै स्वार्थेतां यताग् श्रान्तो हीयत उत स निष्ठाय सह वसति
तस्माथ्सकृदुन्नीय नापरमुन्नयेत दध्नोन्नयेतैतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुंधे
२१ यज्ञो देवेभ्यो निलायत विष्णू रूपं कृत्वा स पृथिवीं प्राविशत्तं देवा
हस्तान्थ्सꣳरभ्यैच्छन्तमिन्द्र उपर्युपर्यत्यक्रामथ्सोऽब्रवीत्को मायमुपर्युपर्यत्यक्रमीदित्यहं
दुर्गे हन्तेत्यथ कस्त्वमित्यहं दुर्गादाहर्तेति सोऽब्रवीद्दुर्गेवै हन्तावोचथा वराहोऽयं वाममोषः
२२ सप्तानां गिरीणां परस्ताद्वित्तं वेद्यमसुराणां बिभर्ति तं जहि यदि दुर्गे हन्तासीति
स दर्भपुंजीलमुद्वृह्य सप्त गिरीन्भित्त्वा तमहन्थ्सोऽब्रवीद्दुर्गाद्वा आहर्तावोचथा एतमा हरेति
तमेभ्यो यज्ञ एव यज्ञमाहरद्यत्तद्वित्तं वेद्यमसुराणामविन्दन्त तदेकं वेद्यै वेदित्वमसुराणां
२३ वा इयमग्र आसीद्यावदासीनः परापश्यति तावद्देवानां ते देवा अब्रुवन्नस्त्वेव
नोऽस्यामपीति कियद्वो दास्याम इति यावदियꣳ सलावृकी त्रिः परिक्रामति तावन्नो
दत्तेति स इन्द्रः सलावृकी रूपं कृत्वेमां त्रिः सर्वतः पर्यक्रामत्तदिमामविन्दन्त
यदिमामविन्दन्त तद्वेद्यै वेदित्वꣳ
२४ सा वा इयꣳ सर्वैव वेदिरियति शक्ष्यामीति त्वा अवमाय यजन्ते त्रिꣳशत्पदानि
पश्चात्तिरश्ची भवति षट्त्रिꣳशत्प्राची चतुर्विꣳशतिः पुरस्तात्तिरश्ची दशदश सं पद्यन्ते
दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुंध उद्धन्ति यदेवास्या अमेध्यं तदप
हन्त्युद्धन्ति तस्मादोषधयः परा भवन्ति बर्हिः स्तृणाति तस्मादोषधयः पुनरा भवन्त्युत्तरं
बर्हिष उत्तरबर्हिः स्तृणाति प्रजा वै बर्हिर्यजमान उत्तरबर्हिर्यजमानमेवायजमानादुत्तरं
करोति तस्माद्यजमानोऽयजमानादुत्तरः ॥ ६। २। ४॥ रुन्धे वाममोषो वेदित्वमसुराणां
वेदित्वं भवन्ति पञ्चविꣳशतिश्च ॥ ६। २। ४॥
२५ यद्वा अनीशानो भारमादत्ते वि वै स लिशते यद्द्वादश साह्नस्योपसदः
स्युस्तिस्रोऽहीनस्य यज्ञस्य विलोम क्रियेत तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य
यज्ञस्य सवीर्यत्वायाथो सलोम क्रियते वथ्सस्यैकः स्तनो भागी हि सोऽथैकग्ग् स्तनं
व्रतमुपैत्यथ द्वावथ त्रीनथ चतुर एतद्वै
२६ क्षुरपवि नाम व्रतं येन प्र जातान्भ्रातृव्यान्नुदते प्रति जनिष्यमाणानथो कनीयसैव
भूय उपैति चतुरोऽग्रे स्तनान्व्रतमुपैत्यथ त्रीनथ द्वावथैकमेतद्वै सुजघनं नाम व्रतं तपस्यꣳ
सुवर्ग्यमथो प्रैव जायते प्रजया पशुभिर्यवागू राजन्यस्य व्रतं क्रूरेव वै यवागूः क्रूर इव
२७ राजन्यो वज्रस्य रूपꣳ समृद्ध्या आमिक्षा वैश्यस्य पाकयज्ञस्य रूपं पुष्ट्यै पयो

ब्राह्मणस्य तेजो वै ब्राह्मणस्तेजः पयस्तेजसैव तेजः पय आत्मन्धत्तेऽथो पयसा वै गर्भा
वर्धन्ते गर्भ इव खलु वा एष यद्दीक्षितो यदस्य पयो व्रतं भवत्यात्मानमेव तद्वर्धयति
त्रिव्रतो वै मनुरासीद्द्विव्रता असुरा एकव्रता
२८ देवाः प्रातर्मध्यंदिने सायं तन्मनोर्व्रतमासीत्पाकयज्ञस्य रूपं पुष्ट्यै प्रातश्च
सायं चासुराणां निर्मध्यं क्षुधो रूपं ततस्ते पराभवन्मध्यंदिने मध्यरात्रे देवानां
ततस्तेऽभवन्थ्सुवर्गं लोकमायन्, यदस्य मध्यंदिने मध्यरात्रे व्रतं भवति मध्यतो वा अन्नेन
भुञ्जते मध्यत एव तदूर्जं धत्ते भ्रातृव्याभिभूत्यै भवत्यात्मना
२९ परास्य भ्रातृव्यो भवति गर्भो वा एष यद्दीक्षितो योनिर्दीक्षित विमितं यद्दीक्षितो
दीक्षितविमितात्प्रवसेद्यथा योनेर्गर्भः स्कन्दति तादृगेव तन्न प्रवस्तव्यमात्मनो गोपीथायैष
वै व्याघ्रः कुलगोपो यदग्निस्तस्माद्यद्दीक्षितः प्रवसेथ्स एनमीश्वरोऽनूत्थाय हन्तोर्न
प्रवस्तव्यमात्मनो गुप्त्यै दक्षिणतः शय एतद्वै यजमानस्यायतनग्ग् स्व एवायतने
शयेऽग्निमभ्यावृत्य शये देवता एव यज्ञमभ्यावृत्य शये ॥ ६। २। ५॥ एतद्वै क्रूर
इवैकव्रता आत्मना यजमानस्य त्रयोदश च ॥ ६। २। ५॥
३० पुरोहविषि देवयजने याजयेद्यं कामयेतोपैनमुत्तरो यज्ञो नमेदभि सुवर्गं लोकं
जयेदित्येतद्वै पुरोहविर्देवयजनं यस्य होता प्रातरनुवाकमनुब्रुवन्नग्निमप आदित्यमभि
विपश्यत्युपैनमुत्तरो यज्ञो नमत्यभि सुवर्गं लोकं जयत्याप्ते देवयजने याजयेद्भ्रातृव्यवन्तं
पन्थां वाधिस्पर्शयेत्कर्तं वा यावन्नानसे यात वै
३१ न रथायैतद्वा आप्तं देवयजनमाप्नोत्येव भ्रातृव्यं नैनं भ्रातृव्य आप्नोत्येकोन्नते देव यजने
याजयेत्पशुकाममेकोन्नताद्वै देवयजनादंगिरसः पशूनसृजन्तान्तरा सदोहविर्धाने उन्नतग्ग्
स्यादेतद्वा एकोन्नतं देवयजनं पशुमानेव भवति त्र्युन्नते देवयजने याजयेथ्सुवर्गकामं
त्र्युन्नताद्वै देवयजनादंगिरसः सुवर्गं लोकमायन्नन्तराहवनीयं च हविर्धानं चो
३२ न्नतग्ग् स्यादन्तरा हविर्धानं च सदश्चान्तरा सदश्च गार्हपत्यं चैतद्वै त्र्युन्नतं
देवयजनꣳ सुवर्गमेव लोकमेति प्रतिष्ठिते देवयजने याजयेत्प्रतिष्ठाकाममेतद्वै प्रतिष्ठितं
देवयजनं यथ्सर्वतः समं प्रत्येव तिष्ठति यत्रान्या अन्या ओषधयो व्यतिषक्ताः
स्युस्तद्याजयेत्पशुकाममेतद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशू
३३ नव रुंधे पशुमानेव भवति निर्ऋतिगृहीते देवयजने याजयेद्यं कामयेत
निर्ऋत्यास्य यज्ञं ग्राहयेयमित्येतद्वै निर्ऋतिगृहीतं देवयजनं यथ्सदृश्यै सत्या ऋक्षं

निर्ऋत्यैवास्य यज्ञं ग्राहयति व्यावृत्ते देवयजने याजयेद्व्यावृत्कामं यं पात्रे वा तल्पे वा मीमाꣳसेरन्प्राचीनमाहवनीयात्प्रवणग्ग् स्यात्प्रतीचीनं गार्हपत्यादेतद्वै व्यावृत्तं देवयजनं वि पाप्मना भ्रातृव्येणा वर्तते नैनं पात्रे न तल्पे मीमाꣳसन्ते कार्ये देवयजने याजयेद्भूतिकामं कार्यो वै पुरुषो भवत्येव ॥ ६। २। ६॥ यातवै हविर्धानं च पशून्पाप्मनाष्टादश च ॥ ६। २। ६॥

३४ तेभ्य उत्तरवेदिः सिꣳही रूपं कृत्वोभयानन्तरापक्रम्यातिष्ठत्ते देवा अमन्यन्त यतरान्, वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति तामुपामन्त्रयन्त साब्रवीद्वरं वृणै सर्वान्मया कामान्व्यश्नवथ पूर्वां तु माग्नेराहुतिरश्नवता इति तस्मादुत्तरवेदिं पूर्वामग्नेर्व्याघारयन्ति वारेवृतग्ग् ह्यस्यै शम्यया परि मिमीते

३५ मात्रैवास्यै साथो युक्तेनैव युक्तमव रुंधे वित्तायनी मेऽसीत्याह वित्ता ह्येनानावत्तिक्तायनी मेऽसीत्याह तिक्तान् ह्येनानावदवतान्मा नाथितमित्याह नाथितान् ह्येनानावदवतान्मा व्यथितमित्याह व्यथितान् ह्येनानावद्विदेरग्निर्नभो नामा

३६ ऽग्ने अङ्गिर इति त्रिर्हरति य एवेषु लोकेष्वग्नयस्तानेवाव रुंधे तूष्णीं चतुर्थꣳ हरत्यनिरुक्तमेवाव रुंधे सिꣳ हीरसि महिषीरसीत्याह सिꣳहीर्ह्येषा रूपं कृत्वोभयानन्तरापक्रम्यातिष्ठदुरु प्रथस्वोरु ते यज्ञपतिः प्रथतामित्याह यजमानमेव प्रजया पशुभिः प्रथयति ध्रुवा

३७ ऽसीति सꣳ हन्ति धृत्यै देवेभ्यः शुन्धस्व देवेभ्यः शुंभस्वेत्यव चोक्षति प्र च किरति शुद्ध्यै इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पात्वित्याह दिग्भ्य एवैनां प्रोक्षति देवाग्श्चेदुत्तरवेदिरुपाववर्तीहैव वि जयामहा इत्यसुरा वज्रमुद्यत्य देवानभ्यायन्त तानिन्द्रघोषो वसुभिः पुरस्तादपा

३८ ऽनुदत मनोजवाः पितृभिर्दक्षिणतः प्रचेता रुद्रैः पश्चाद्विश्वकर्मादित्यैरुत्तरतो यदेवमुत्तरवेदिं प्रोक्षति दिग्भ्य एव तद्यजमानो भ्रातृव्यान्प्रणुदत इन्द्रो यतीन्थ्सालावृकेभ्यः प्रायच्छत्तान्दक्षिणत उत्तरवेद्या आदन् यत्प्रोक्षणीनामुच्छिष्येत तद्दक्षिणत उत्तरवेद्यै नि नयेद्यदेव तत्र क्रूरं तत्तेन शमयति यं द्विष्यात्तं ध्यायेच्छुचैवैनमर्पयति ॥ ६। २। ७॥ मिमीते नाम ध्रुवाप शुचा त्रीणि च ॥ ६। २। ७॥

३९ सोत्तरवेदिरब्रवीथ्सर्वान्मया कामान्व्यश्नवथेति ते देवा अकामयन्तासुरान्भ्रातृव्यानभि भवेमेति तेऽजुहवुः सिꣳहीरसि सपत्नसाही स्वाहेति तेऽसुरान्भ्रातृव्यानभ्यभवन्तेऽ

सुरान्भ्रातृव्यानभिभूया कामयन्त प्रजां विन्देमहीति तेऽजुहवुः सिꣳहीरसि सुप्रजावनिः स्वाहेति ते प्रजामविन्दन्त ते प्रजां वित्त्वा
४० ऽकामयन्त पशून्, विन्देमहीति तेऽजुहवुः सिꣳहीरसि रायस्पोषवनिः स्वाहेति ते पशूनविन्दन्त ते पशून्, वित्त्वाकामयन्त प्रतिष्ठां विन्देमहीति तेऽजुहवुः सिꣳहीरस्यादित्यवनिः स्वाहेति त इमां प्रतिष्ठामविन्दन्त त इमां प्रतिष्ठां वित्त्वाकामयन्त देवता आशिष उपेयामेति तेऽजुहवुः सिꣳहीरस्या वह देवान्देवयते
४१ यजमानाय स्वाहेति ते देवता आशिष उपायन्पञ्च कृत्वो व्याघारयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंधेऽक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै भूतेभ्यस्त्वेति स्रुचमुद्गृह्णाति य एव देवा भूतास्तेषां तद्भागधेयं तानेव तेन प्रीणाति पौतुद्रवान्परिधीन्परि दधात्येषां
४२ लोकानां विधृत्या अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन्ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थं वाव स्य आर्तिमारिष्यतीति स निलायत स यां वनस्पतिष्ववसत्तां पूतुद्रौ यामोषधीषु ताꣳ सुगन्धितेजने यां पशुषु तां पेत्वस्यान्तरा शृङ्गे तं देवताः प्रैषमैच्छन्तमन्वविन्दन्तमब्रुव
४३ न्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै यदेव गृहीतस्याहुतस्य बहिः परिधि स्कन्दात्तन्मे भ्रातृणां भागधेयमसदिति तस्माद्यद्गृहीतस्याहुतस्य बहिः परिधि स्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति सोऽमन्यतास्थन्वन्तो मे पूर्वे भ्रातरः प्रामेषतास्थानि शातया इति स यान्य
४४ स्थान्यशातयत तत्पूतुद्र्वभवद्यन्माꣳसमुपमृतं तद्गुल्गुलु यदेतान्थ्संभारान्थ्संभरत्यग्निमेव तथ्संभरत्यग्नेः पुरीषमसीत्याहाग्नेर्ह्येतत्पुरीषं यथ्संभारा अथो खल्वाहुरेते वावैनं ते भ्रातरः परि शेरे यत्पौतुद्रवाः परिधय इति ॥ ६। २। ८॥
वित्वा देवयत एषामब्रुवन् यानि चतुश्चत्वारिꣳशच्च ॥ ६। २। ८॥
४५ बद्धमव स्यति वरुणपाशादेवैने मुञ्चति प्रणेनेक्ति मेध्ये एवैने करोति सावित्रियर्चा हुत्वा हविर्धाने प्र वर्तयति सवितृप्रसूत एवैने प्र वर्तयति वरुणो वा एष दुर्वागुभयतो बद्धो यदक्षः स यदुथ्सर्जेद्यजमानस्य गृहानभ्युथ्सर्जेथ्सुवाग्देव दुर्याꣳ आ वदेत्याह गृहा वै दुर्याः शान्त्यै पत्न्यु
४६ पानक्ति पत्नी हि सर्वस्य मित्रं मित्रत्वाय यद्वै पत्नी यज्ञस्य करोति मिथुनं

तदथो पत्निया एवैष यज्ञस्यान्वारंभोनवच्छित्त्यै वर्त्मना वा अन्वित्य यज्ञꣳ रक्षाꣳसि
जिघाꣳसन्ति वैष्णवीभ्यामृग्भ्यां वर्त्मनोर्जुहोति यज्ञो वै विष्णुर्यज्ञादेव रक्षाग्स्यप हन्ति
यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्
४७ हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति
प्राची प्रेतमध्वरं कल्पयन्ती इत्याह सुवर्गमेवैनं लोकं गमयत्यत्र रमेथां वर्ष्मन्पृथिव्या
इत्याह वर्ष्म ह्येतत्पृथिव्या यद्देवयजनꣳ शिरो वा एतद्यज्ञस्य यद्धविर्धानं दिवो वा
विष्णवुत वा पृथिव्या
४८ इत्याशीर्पदयर्चा दक्षिणस्य हविर्धानस्य मेथीं नि हन्ति शीर्षत एव यज्ञस्य यजमान
आशिषोऽव रुंधे दण्डो वा औपरस्तृतीयस्य हविर्धानस्य वषट्कारेणाक्षमच्छिनद्यत्तृतीयं
छदिर्हविर्धानयोरुदाह्रियते तृतीयस्य हविर्धानस्यावरुद्ध्यै शिरो वा एतद्यज्ञस्य यद्धविर्धानं
विष्णो रराटमसि विष्णोः पृष्ठमसीत्याह तस्मादेतावद्धा शिरो विष्यूतं विष्णोः स्यूरसि
विष्णोर्ध्रुवमसीत्याह वैष्णवꣳ हि देवतया हविर्धानं यं प्रथमं ग्रन्थिं ग्रश्नीयाद्यत्तं न विस्रꣳ
सयेदमेहेनाध्वर्युः प्र मीयेत तस्मात्स विस्रस्यः ॥ ६। २। ९॥ पत्नी हन्युर्वा पृथिव्या
विष्यूतं विष्णोः षड्विꣳशतिश्च ॥ ६। २। ९॥
४९ देवस्य त्वा सवितुः प्रसव इत्यभ्रिमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि
देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै वज्र इव वा एषा यदभ्रिरभ्रिरसि
नारिरसीत्याह शान्त्यै काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति
परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्या
५० इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ
वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवानन्तरायं ग्रीवाः कृन्तति दिवे त्वान्तरिक्षाय
त्वा पृथिव्यै त्वेत्याहैभ्य एवैनां लोकेभ्यः प्रोक्षति परस्तादर्वाचीं प्रोक्षति तस्मात्
५१ परस्तादर्वाचीं मनुष्या ऊर्जमुप जीवन्ति क्रूरमिव वा एतत्करोति यत्खनत्यपोऽव
नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यव ऊर्गुदुंबर ऊर्जैवोर्जꣳ समर्धयति यजमानेन सं
मितौदुंबरी भवति यावानेव यजमानस्तावतीमेवास्मिन्नूर्जं दधाति पितृणाꣳ सदनमसीति
बर्हिरव स्तृणाति पितृदेवत्याऽ अग्ग्
५२ ह्येतद्यन्निखातं यद्बर्हिरनवस्तीर्य मिनुयात्पितृदेवत्या निखाता स्याद्बर्हिरवस्तीर्य
मिनोत्यस्यामेवैनां मिनोत्यथो स्वारुहमेवैनां करोत्युद्दिवग्ग् स्तभानान्तरिक्षं पृणेत्याहैषां

लोकानां विधृत्यै द्युतानस्त्वा मारुतो मिनोत्वित्याह द्युतानो ह स्म वै मारुतो देवानामौदुंबरीं मिनोति तेनैवै
५३ नां मिनोति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवै तद्धृतेन द्यावापृथिवी आ पृणेथामित्यौदुंबर्यां जुहोति द्यावापृथिवी एव रसेनानक्त्यान्तमन्ववस्रावयत्यान्तमेव यजमानं तेजसानक्त्यैन्द्रमसीति छदिरधि नि दधात्यैन्द्रꣳ हि देवतया सदो विश्वजनस्य छायेत्याह विश्वजनस्य ह्येषा छाया यथ्सदो नवछदि
५४ तेजस्कामस्य मिनुयात्त्रिवृता स्तोमेन सं मितं तेजस्त्रिवृत्तेजस्व्येव भवत्येकादश छदीन्द्रिय कामस्यैका दशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदश छदि भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्तदश छदि प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या एकविꣳशति छदि प्रतिष्ठाकामस्यैकविꣳशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या उदरं वै सद ऊर्गुदुंबरो मध्यत औदुंबरीं मिनोति मध्यत एव प्रजानामूर्जं दधाति तस्मा
५५ न्मध्यत ऊर्जा भुञ्जते यजमानलोके वै दक्षिणानि छदीꣳषि भ्रातृव्यलोक उत्तराणि दक्षिणान्युत्तराणि करोति यजमानमेवायजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरोऽन्तर्वर्तान्करोति व्यावृत्त्यै तस्मादरण्यं प्रजा उप जीवन्ति परि त्वा गिर्वणो गिर इत्याह यथायजुरेवैतदिन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमसीत्याहैन्द्रꣳ हि देवतया सदो यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत्तं न विस्रꣳसयेदमेहेनाध्वर्युः प्र मीयेत तस्माथ्स विस्रस्यः ॥ ६। २। १०॥ अपहत्यै तस्मात्पितृदेवत्यं तेनैव नवछदि तस्माथ्सदः पंचदश च ॥ ६। २। १०॥
५६ शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवा हविर्धाने खायन्ते तस्माच्छीर्षन्प्राणा अधस्तात्खायन्ते तस्मादधस्ताच्छीर्ष्णः प्राणा रक्षोहणो वलगहनो वैष्णवान्खनामीत्याह वैष्णवा हि देवतयोपरवा असुरा वै निर्यन्तो देवानां प्राणेषु वलगान्न्यखनन्तान्बाहुमात्रेऽन्वविन्दन्तस्माद्बाहुमात्राः खायन्त इदमहं तं वलगमुद्वपामि
५७ यं नः समानो यमसमानो निचखानेत्याह द्वौ वाव पुरुषौ यश्चैव समानो यश्चासमानो यमेवास्मै तौ वलगं निखनतस्तमेवोद्वपति सं तृणत्ति तस्माथ्संतृण्णा अन्तरतः प्राणा न संभिनत्ति तस्मादसंभिन्नाः प्राणा अपोऽव नयति तस्मादार्द्रा अन्तरतः प्राणा यवमतीरव नय
५८ त्यूर्ग्वै यवः प्राणा उपरवाः प्राणेष्वेवोर्जं दधाति बर्हिरव स्तृणाति तस्माल्लोमशा अन्तरतः प्राणा आज्येन व्याघारयति तेजो वा आज्यं प्राणा उपरवाः प्राणेष्वेव तेजो

दधाति हनू वा एते यज्ञस्य यदधिषवणे न सं तृणत्त्यसंतृण्णे हि हनू अथो खलु दीर्घसोमे संतृद्ये धृत्यै शिरो वा एतद्यज्ञस्य यद्धविर्धानं
५९ प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म ग्रावाणो दन्ता मुखमाहवनीयो नासिकोत्तरवेदिरुदरꣳ सदो यदा खलु वै जिह्वया दथ्स्वधि खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथोदरं गच्छति तस्माद्धविर्धाने चर्मन्नधि ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति यो वै विराजो यज्ञमुखे दोहं वेद दुह एवैनामियं वै विराट् तस्यै त्वक्चर्मोधोऽधिषवणे स्तना उपरवा ग्रावाणो वथ्सा ऋत्विजो दुहन्ति सोमः पयो य एवं वेद दुह एवैनाम् ॥ ६। २। ११॥ वपामि यवमतीरव नयति हविर्धानमेव त्रयोविꣳशतिश्च ॥ ६। २। ११॥
यदुभौ देवासुरा मिथस्तेषाꣳ सुवर्गं यद्वा अनीशानः पुरो हविषि तेभ्यः सोत्तरवेदिर्बद्धं देवस्याभ्रिꣳ वज्रः शिरो वा एकादश ॥
यदुभावित्याह देवानां यज्ञो देवेभ्यो न रथाय यजमानाय परस्तादर्वाचीं नव पंचाशत् ॥
यदुभौ दुह एवैनाम् ॥

## षष्ठकाण्डे तृतीयः प्रश्नः ३

१ चात्वालाद्धिष्णियानुप वपति योनिर्वै यज्ञस्य चात्वालं यज्ञस्य सयोनित्वाय देवा वै यज्ञं पराजयन्त तमाग्नीध्रात्पुनरपाजयन्नेतद्वै यज्ञस्यापराजितं यदाग्नीध्रं यदाग्नीध्राद्धिष्णियान्, विहरति यदेव यज्ञस्यापराजितं तत एवैनं पुनस्तनुते पराजित्येव खलु वा एते यन्ति ये बहिष्पवमानꣳ सर्पन्ति बहिष्पवमाने स्तुत
२ आहाग्नीदग्नीन्, विहर बर्हिः स्तृणाहि पुरोडाशाꣳ अलं कुर्विति यज्ञमेवापजित्य पुनस्तन्वाना यन्त्यङ्गारैर्द्वे सवने वि हरति शलाकाभिस्तृतीयꣳ सशुक्रत्वायाथो संभरत्येवैनद्धिष्णिया वा अमुष्मि३ꣳल्लोके सोममरक्षन्तेभ्योऽधि सोममाहरन्तमन्ववायन्तं पर्यविशन्, य एवं वेद विन्दते
३ परिवेष्टारं ते सोमपीथेन व्यार्ध्यन्त ते देवेषु सोमपीथमैच्छन्त तान्देवा अब्रुवन्द्वेद्वे नामनी कुरुध्वमथ प्र वाप्स्यथ न वेत्यग्नयो वा अथ धिष्णियास्तस्माद्द्विनामा ब्राह्मणोऽर्धुकस्तेषां ये नेदिष्ठं पर्यविशन्ते सोमपीथं प्राप्नुवन्नाहवनीय आग्नीध्रीयो होत्रीयो मार्जालीयस्तस्मात्तेषु जुह्वत्यतिहाय वषट् करोति वि ह्ये
४ ते सोमपीथेनार्ध्यन्त देवा वै याः प्राचीराहुतीरजुहवुर्ये पुरस्तादसुरा आसन्ताग्स्ताभिः

प्राणुदन्त याः प्रतीचीर्यै पश्चादसुरा आसन्ताग्स्ताभिरपानुदन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यङ्ङासीनो धिष्णियान्व्याघारयति पश्चाच्चैव पुरस्ताच्च यजमानो भ्रातृव्यान् प्रणुदते तस्मात्पराचीः प्रजाः प्र वीयन्ते प्रतीची

५ र्जायन्ते प्राणा वा एते यद्धिष्णिया यदध्वर्युः प्रत्यङ् धिष्णियानतिसर्पेत्प्राणान्थ्सं कर्षेत्प्रमायुकः स्यान्नाभिर्वा एषा यज्ञस्य यद्धोतोर्ध्वः खलु वै नाभ्यै प्राणोऽवाङ्पानो यदध्वर्युः प्रत्यङ् होतारमतिसर्पेदपाने प्राणं दध्यात्प्रमायुकः स्यान्नाध्वर्युरुप गायेद्वाग्वीर्यो वा अध्वर्युर्यदध्वर्युरुप गायेदुद्गात्रे

६ वाचꣳ सं प्र यच्छेदुपदासुकास्य वाक्स्याद्ब्रह्मवादिनो वदन्ति नासग्ग्स्थिते सोमेऽध्वर्युः प्रत्यङ्ख्सदोऽतीयादथ कथा दाक्षिणानि होतुमेति यामो हि स तेषां कस्मा अह देवा यामं वायामं वानु ज्ञास्यन्तीत्युत्तरेणाग्नीध्रं परीत्य जुहोति दाक्षिणानि न प्राणान्थ्सं कर्षति न्यन्ये धिष्णिया उप्यन्ते नान्ये यान्निवपति तेन तान्प्रीणाति यान्न निवपति यदनुदिशति तेन तान् ॥ ६। ३। १॥ स्तुते विन्दते हि वीयन्ते प्रतीचीरुद्गात्र उप्यन्ते चतुर्दश च ॥ ६। ३। १॥

७ सुवर्गाय वा एतानि लोकाय हूयन्ते यद्वैसर्जनानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवा क्रमत आहवनीये जुहोति सुवर्गमेवैनं लोकं गमयति देवान्, वै सुवर्गं लोकं यतो रक्षाग्स्यजिघाꣳसन्ते सोमेन राज्ञा रक्षाग्स्यपहत्याप्तुमात्मानं कृत्वा सुवर्गं लोकमायन्रक्षसामनुपलाभायात्तः सोमो भवत्यथ

८ वैसर्जनानि जुहोति रक्षसामपहत्यै त्वꣳ सोम तनूकृद्भ्य इत्याह तनूकृद्ध्येष द्वेषोभ्योऽन्यकृतेभ्य इत्याहान्यकृतानि हि रक्षाग्स्युरु यन्तासि वरूथमित्याहोरुणस्कृधीति वावैतदाह जुषाणो अप्तुराज्यस्य वेत्वित्याहाप्तुमेव यजमानं कृत्वा सुवर्गं लोकं गमयति रक्षसामनुपलाभाया सोमं ददत

९ आ ग्राव्ण आ वायव्यान्या द्रोणकलशमुत्पत्नीमा नयन्त्यन्वनाꣳसि प्र वर्तयन्ति यावदेवास्यास्ति तेन सह सुवर्गं लोकमेति नयवत्यर्चाग्नीध्रे जुहोति सुवर्गस्य लोकस्याभिनीत्यै ग्राव्णो वायव्यानि द्रोणकलशमाग्नीध्र उप वासयति वि ह्येनं तैर्गृह्णते यथ्सहोपवासयेदपुवायेत सौम्यर्चा प्र पादयति स्वयै

१० वैनं देवतया प्र पादयत्यदित्याः सदोऽस्यदित्याः सद आ सीदेत्याह

यथायजुरेवैतद्यजमानो वा एतस्य पुरा गोप्ता भवत्येष वो देव सवितः सोम इत्याह सवितृप्रसूत एवैनं देवताभ्यः सं प्र यच्छत्येतत्त्वꣳ सोम देवो देवानुपागा इत्याह देवो ह्येष स

११ न्देवानुपैतीदमहं मनुष्यो मनुष्यानित्याह मनुष्यो २ ह्येष सन्मनुष्यानुपैति यदेतद्यजुर्न ब्रूयादप्रजा अपशुर्यजमानः स्याथ्सह प्रजया सह रायस्पोषेणेत्याह प्रजयैव पशुभिः सहेमं लोकमुपावर्तते नमो देवेभ्य इत्याह नमस्कारो हि देवानाग् स्वधा पितृभ्य इत्याह स्वधाकारो हि

१२ पितृणामिदमहं निर्वरुणस्य पाशादित्याह वरुणपाशादेव निर्मुच्यतेऽग्ने व्रतपत आत्मनः पूर्वा तनूरादेयेत्याहुः को हि तद्वेद यद्वसीयान्थ्स्वे वशे भूते पुनर्वा ददाति न वेति ग्रावाणो वै सोमस्य राज्ञो मलिम्लुसेना य एवं विद्वान्ग्राव्ण आग्नीध्र उपवासयति नैनं मलिम्लुसेना विन्दति ॥ ६। ३। २॥ अथ ददते स्वया सन्थ्स्वधाकारो हि विन्दति ॥
६। ३। २॥

१३ वैष्णव्यर्चा हुत्वा यूपमच्छैति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतयाच्छैत्यत्यन्यानगां नान्यानुपागामित्याहाति ह्यन्यानेति नान्यानुपैत्यर्वाक्त्वा परैरविदं परोवरैरित्याहार्वाग्घ्येनं परैर्विन्दति परोवरैस्तं त्वा जुषे

१४ वैष्णवं देवयज्याया इत्याह देवयज्यायै ह्येनं जुषते देवस्त्वा सविता मध्वानक्त्वित्याह तेजसैवैनमनक्त्योषधे त्रायस्वैनग्ग् स्वधिते मैनꣳहिꣳसीरित्याह वज्रो वै स्वधितिः शान्त्यै स्वधितेर्वृक्षस्य बिभ्यतः प्रथमेन शकलेन सह तेजः परा पतति यः प्रथमः शकलः परापतेत्तमप्या हरेथ्सतेजस

१५ मेवैनमाहरतीमे वै लोका यूपात्प्रयतो बिभ्यति दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिꣳसीरित्याहैभ्य एवैनं लोकेभ्यः शमयति वनस्पते शतवल्शो वि रोहेत्याव्रश्चने जुहोति तस्मादाव्रश्चनाद्वृक्षाणां भूयाꣳस उत्तिष्ठन्ति सहस्रवल्शा वि वयꣳ रुहेमेत्याहाशिषमेवैतामा शास्तेऽनक्षसङ्गं

१६ वृश्चेद्यदक्षसङ्गं वृश्चेदध ईषं यजमानस्य प्रमायुकग्ग् स्याद्यं कामयेताप्रतिष्ठितः स्यादित्यारोहं तस्मै वृश्चेदेष वै वनस्पतीनामप्रतिष्ठितोप्रतिष्ठित एव भवति यं कामयेतापशुः स्यादित्यपर्णं तस्मै शुष्काग्रं वृश्चेदेष वै वनस्पतीनामपशव्योऽपशुरेव भवति यं कामयेत पशुमान्थ्स्यादिति बहुपर्णं तस्मै बहुशाखं वृश्चेदेष वै

१७ वनस्पतीनां पशव्यः पशुमानेव भवति प्रतिष्ठितं वृश्चेत्प्रतिष्ठाकामस्यैष वै वनस्पतीनां

प्रतिष्ठितो यः स मे भूम्यै स्वाद्योने रूढः प्रत्येव तिष्ठति यः प्रत्यङ्ङुपनतस्तं वृश्चेथ्स हि
मेधमभ्युपनतः पञ्चारत्निं तस्मै वृश्चेद्यं कामयेतोपैनमुत्तरो यज्ञो नमेदिति पञ्चाक्षरा पङ्क्तिः
पाङ्क्तो यज्ञ उपैनमुत्तरो यज्ञो
१८ नमति षडरत्निं प्रतिष्ठाकामस्य षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठति सप्तारत्निं
पशुकामस्य सप्तपदा शक्करी पशवः शक्करी पशूनेवाव रुंधे नवारत्निं तेजस्कामस्य
त्रिवृता स्तोमेन सं मितं तेजस्त्रिवृत्तेजस्व्येव भवत्येकादशारत्निमिन्द्रियकामस्यैकादशाक्षरा
त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदशारत्निं भ्रातृव्यवतः पञ्चदशो वज्रो
भ्रातृव्याभिभूत्यै सप्तदशारत्निं प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या
एकवि ँ शत्यरत्निं प्रतिष्ठाकामस्यैकवि ँ शः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या
अष्टाश्रिर्भवत्यष्टाक्षरा गायत्री तेजो गायत्री गायत्री यज्ञमुखं तेजसैव गायत्रिया
यज्ञमुखेन सं मितः ॥ ६। ३। ३॥ जुषे सतेजसमनक्षसंगं बहुशाखं वृश्चेदेष वै यज्ञ
उपैनमुत्तरो यज्ञ आप्त्या एकान्न वि ँ शतिश्च ॥ ६। ३। ३॥
१९ पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वेत्याहैभ्य एवैनं लोकेभ्यः प्रोक्षति पराञ्चं
प्रोक्षति पराङिव हि सुवर्गो लोकः क्रूरमिव वा एतत्करोति यत्खनत्यपोव
नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यवो यजमानेन यूपः सं मितो यावानेव
यजमानस्तावतीमेवास्मिन्नूर्जं दधाति
२० पितृणा ँ सदनमसीति बर्हिरव स्तृणाति पितृदेवत्या अग्ग् ह्येतद्यन्निखातं
यद्बर्हिरनवस्तीर्य मिनुयात्पितृदेवत्यो निखातः स्याद्बर्हिरवस्तीर्य मिनोत्यस्यामेवैनं
मिनोति यूपशकलमवास्यति सतेजसमेवैनं मिनोति देवस्त्वा सविता मध्वानक्त्वित्याह
तेजसैवैनमनक्ति सुपिप्पलाभ्यस्त्वौषधीभ्य इति चषालं प्रति
२१ मुञ्चति तस्माच्छीर्षत ओषधयः फलं गृह्णन्त्यनक्ति तेजो वा
आज्यं यजमानेनाग्निष्ठाश्रिः सं मिता यदग्निष्ठामश्रिमनक्ति यजमानमेव
तेजसानक्त्यान्तमनक्त्यान्तमेव यजमानं तेजसानक्ति सर्वतः परि मृशत्यपरिवर्गमेवास्मिन्तेजो
दधात्युद्दिवग्ग् स्तभानान्तरिक्षं पृणेत्याहैषां लोकानां विधृत्यै वैष्णव्यर्चा
२२ कल्पयति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतया कल्पयति द्वाभ्यां कल्पयति
द्विपाद्यजमानः प्रतिष्ठित्यै यं कामयेत तेजसैनं देवताभिरिन्द्रियेण व्यर्धयेयमित्यग्निष्ठां
तस्याश्रिमाहवनीयादित्थं वेत्थं वाति नावयेत्तेजसैवैनं देवताभिरिन्द्रियेण व्यर्धयति यं

कामयेत तेजस्सैनं देवताभिरिन्द्रियेण समर्धयेयमित्य
२३ ग्निष्ठां तस्याश्रिमाहवनीयेन सं मिनुयात्तेजस्सैवैनं देवताभिरिन्द्रियेण समर्धयति
ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवैतत्परि व्ययत्यूर्ग्वै रशना यजमानेन यूपः
सं मितो यजमानमेवोर्जा समर्धयति नाभिदघ्ने परि व्ययति नाभिदघ्न एवास्मा ऊर्जं
दधाति तस्मान्नाभिदघ्न ऊर्जा भुञ्जते यं कामयेतोर्जैनं
२४ व्यर्धयेयमित्यूर्ध्वां वा तस्यावाचीं वावोहेदूर्जैवैनं व्यर्धयति यदि कामयेत
वर्षुकः पर्जन्यः स्यादित्यवाचीमवोहेद्वृष्टिमेव नि यच्छति यदि कामयेतावर्षुकः
स्यादित्यूर्ध्वामुदूहेद्वृष्टिमेवोद्यच्छति पितृणां निखातं मनुष्याणामूर्ध्वं निखातादा रशनाया
ओषधीनाꣳ रशना विश्वेषां
२५ देवानामूर्ध्वꣳ रशनाया आ चषालादिन्द्रस्य चषालꣳ साध्यानामतिरिक्तꣳ स वा
एष सर्वदेवत्यो यद्यूपो यद्यूपं मिनोति सर्वा एव देवताः प्रीणाति यज्ञेन वै देवाः
सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति ते यूपेन योपयित्वा सुवर्गं
लोकमायन्तमृषयो यूपेनैवानु प्राजानन्तद्यूपस्य यूपत्वं
२६ यद्यूपं मिनोति सुवर्गस्य लोकस्य प्रज्ञात्यै पुरस्तान्मिनोति पुरस्ताद्धि यज्ञस्य
प्रज्ञायतेऽप्रज्ञातꣳ हि तद्यदतिपन्न आहुरिदं कार्यमासीदिति साध्या वै देवा
यज्ञमत्यमन्यन्त तान्, यज्ञो नास्पृशत् तान्, यद्यज्ञस्यातिरिक्तमासीत् तदस्पृशदतिरिक्तं
वा एतद्यज्ञस्य यदग्नावग्निं मथित्वा प्रहरत्यतिरिक्तमेत
२७ द्यूपस्य यदूर्ध्वं चषालात्तेषां तद्भागधेयं तानेव तेन प्रीणाति देवा वै स२ꣳस्थिते
सोमे प्र स्रुचोहरन्प्र यूपं तेऽमन्यन्त यज्ञवेशसं वा इदं कुर्म इति ते प्रस्तरग्ग्
स्रुचां निष्क्रयणमपश्यन्थ्स्वरुं यूपस्य स२ꣳस्थिते सोमे प्र प्रस्तरꣳ हरति जुहोति
स्वरुमयज्ञवेशसाय ॥ ६। ३। ४॥ दधाति प्रत्यृचा समर्धयेयमित्यूर्जैनं विश्वेषां
यूपत्वमतिरिक्तमेतद्विचत्वारिꣳशच्च ॥ ६। ३। ४॥
२८ साध्या वै देवा अस्मि३ꣳल्लोक आसन्नान्यत्किंचन मिषत्तेऽग्निमेवाग्नये मेधायालभन्त
न ह्यन्यदालंभ्यमविन्दन्ततो वा इमाः प्रजाः प्राजायन्त यदग्नावग्निं मथित्वा प्रहरति प्रजानां
प्रजननाय रुद्रो वा एष यदग्निर्यजमानः पशुर्यत्पशुमालभ्याग्निं मन्थेद्रुद्राय यजमान
२९ मपि दध्यात्प्रमायुकः स्यादथो खल्वाहुरग्निः सर्वा देवता हविरेतद्यत्पशुरिति
यत्पशुमालभ्याग्निं मन्थति हव्यायैवासन्नाय सर्वा देवता जनयत्युपाकृत्यैव

मन्थ्यस्तन्नेवालब्धं नेवाऽनालब्धमग्नेर्जनित्रमसीत्याहा ग्नेर्ह्येतज्जनित्रं वृषणौ स्थ इत्याह वृषणौ
३० ह्येतावुर्वश्यस्यायुरसीत्याह मिथुनत्वाय घृतेनाक्ते वृषणं दधाथामित्याह वृषणग्ग्
ह्येते दधाते ये अग्निं गायत्रं छन्दोऽनु प्र जायस्वेत्याह छन्दोभिरेवैनं प्र जनयत्यग्नये
मथ्यमानायानु ब्रूहीत्याह सावित्रीमृचमन्वाह सवितृप्रसूत एवैनं मन्थति जातायानु ब्रूहि
३१ प्रह्रियमाणायानु ब्रूहीत्याह काण्डेकाण्ड एवैनं क्रियमाणे समर्धयति गायत्रीः सर्वा
अन्वाह गायत्रछन्दा वा अग्निः स्वेनैवैनं छंदसा समर्धयत्यग्निः पुरा भवत्यग्निं मथित्वा
प्र हरति तौ संभवन्तौ यजमानमभि संभवतो भवतं नः समनसावित्याह शान्त्यै प्रहृत्य
जुहोति जातायैवास्मा अन्नमपि दधात्याज्येन जुहोत्येतद्वा अग्नेः प्रियं धाम यदाज्यं
प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा ॥ ६। ३। ५॥ यजमानमाह वृषणौ जातायानु
ब्रूह्यप्यष्टादश च ॥ ६। ३। ५॥
३२ इषे त्वेति बर्हिरा दत्त इच्छत इव ह्येष यो यजत उपवीरसीत्याहोप
ह्येनानाकरोत्युपो देवान्दैवीर्विशः प्रागुरित्याह दैवीर्ह्येता विशः सतीर्देवानुपयन्ति
वह्नीरुशिज इत्याहर्त्विजो वै वह्नय उशिजस्तस्मादेवमाह बृहस्पते धारया वसूनीत्या
३३ ह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै पशूनव रुंधे हव्या ते स्वदन्तामित्याह
स्वदयत्येवैनान्देव त्वष्टर्वसु रण्वेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु
दधाति रेवती रमध्वमित्याह पशवो वै रेवतीः पशूनेवास्मै रमयति देवस्य त्वा सवितुः
प्रसव इति
३४ रशनामा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो
हस्ताभ्यामित्याह यत्या ऋतस्य त्वा देवहविः पाशेनारभ इत्याह सत्यं वा ऋतꣳ
सत्येनैवैनमृतेना रभतेऽक्ष्णया परि हरति वध्यꣳ हि प्रत्यञ्चं प्रतिमुञ्चन्ति व्यावृत्त्यै धर्षा
मानुषानिति नि युनक्ति धृत्या अद्भ्य
३५ स्त्वौषधीभ्यः प्रोक्षामीत्याहाद्भ्यो ह्येष ओषधीभ्यः संभवति यत्पशुरपां पेरुरसीत्याहैष
ह्यपां पाता यो मेधायारभ्यते स्वात्तं चित्सदेवꣳ हव्यमापो देवीः स्वदतैनमित्याह
स्वदयत्येवैनमुपरिष्टात् प्रोक्षत्युपरिष्टादेवैनं मेध्यं करोति पाययत्यन्तरत एवैनं मेध्यं
करोत्यधस्तादुपोक्षति सर्वत एवैनं मेध्यं करोति ॥ ६। ३। ६॥ वसूनीति प्रसव
इत्यद्भ्योऽन्तरत एवैनं दश च ॥ ६। ३। ६॥

३६ अग्निना वै होत्रा देवा असुरानभ्यभवन्नग्नये समिध्यमानायानु ब्रूहीत्याह
भ्रातृव्याभिभूत्यै सप्तदश सामिधेनीरन्वाह सप्तदशः प्रजापतिः प्रजापतेराप्त्यै सप्तदशान्वाह
द्वादश मासाः पञ्चर्तवः स संवथ्सरः संवथ्सरं प्रजा अनु प्र जायन्ते प्रजानां प्रजननाय
देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्थ्स प्रजापतिस्तूष्णीमाघार
३७ माऽघारयत्ततो वै देवा यज्ञमन्वपश्यन्, यत्तूष्णीमाघारमाघारयति यज्ञस्यानुख्यात्या
असुरेषु वै यज्ञ आसीत्तं देवास्तूष्णीꣳ होमेनावृञ्जत यत्तूष्णीमाघारमाघारयति भ्रातृव्यस्यैव
तद्यज्ञं वृङ्क्ते परिधीन्थ्सं मार्ष्टि पुनात्येवैनान्त्रिस्त्रिः सं मार्ष्टि त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै
द्वादश सं पद्यन्ते द्वादश
३८ मासाः संवथ्सरः संवथ्सरमेव प्रीणात्यथो संवथ्सरमेवास्मा उप दधाति सुवर्गस्य
लोकस्य समष्ट्यै शिरो वा एतद्यज्ञस्य यदाघारोऽग्निः सर्वा देवता यदाघारमाघारयति
शीर्षत एव यज्ञस्य यजमानः सर्वा देवता अव रुंधे शिरो वा एतद्यज्ञस्य यदाघार
आत्मा पशुराघारमाघार्य पशुꣳ समनक्त्यात्मन्नेव यज्ञस्य
३९ शिरः प्रति दधाति सं ते प्राणो वायुना गच्छतामित्याह वायुदेवत्यो वै प्राणो
वायावेवास्य प्राणं जुहोति सं यजत्रैरङ्गानि सं यज्ञपतिराशिषेत्याह यज्ञपतिमेवास्याशिषं
गमयति विश्वरूपो वै त्वाष्ट्र उपरिष्टात् पशुमभ्यवमीत् तस्मादुपरिष्टात् पशोर्नाव द्यन्ति
यदुपरिष्टात्पशुꣳ समनक्तिमेध्यमेवै
४० नं करोत्यृत्विजो वृणीते छन्दाग्स्येव वृणीते सप्त वृणीते सप्त ग्राम्याः पशवः
सप्तारण्याः सप्त छन्दाग्स्युभयस्यावरुद्ध्या एकादश प्रयाजान्, यजति दश वै पशोः प्राणा
आत्मैकादशो यावानेव पशुस्तं प्र यजति वपामेकः परि शय आत्मैवात्मानं परि शये
वज्रो वै स्वधितिर्वज्रो यूपशकलो घृतं खलु वै देवा वज्रं कृत्वा सोममघ्नन्घृतेनाक्तौ पशुं
त्रायेथामित्याह वज्रेणैवैनं वशे कृत्वाऽलभते ॥ ६। ३। ७॥ आधारं पद्यन्ते द्वादशाऽत्मन्नेव
यज्ञस्य मेध्यमेव खलु वा अष्टादश च ॥ ६। ३। ७॥
४१ पर्यग्नि करोति सर्वहुतमेवैनं करोत्यस्कन्दायास्कन्नꣳ हि तद्यद्धुतस्य स्कन्दति त्रिः
पर्यग्नि करोति त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै ब्रह्मवादिनो वदन्त्यन्वारभ्यः पशू ३
र्नान्वारभ्या ३ इति मृत्यवे वा एष नीयते यत्पशुस्तं यदन्वारभेत प्रमायुको यजमानः
स्यादथो खल्वाहुः सुवर्गाय वा एष लोकाय नीयते यत्
४२ पशुरिति यन्नान्वारभेत सुवर्गाल्लोकाद्यजमानो हीयेत वपाश्रपणीभ्यामन्वारभते

तन्नेवान्वारब्धं नेवानन्वारब्धमुप प्रेष्य होतर्हव्या देवेभ्य इत्याहेषितꣳ हि कर्म क्रियते
रेवतीर्यज्ञपतिं प्रियधा विशतेत्याह यथायजुरेवैतदग्निना पुरस्तादेति रक्षसामपहत्यै
पृथिव्याः सं पृचः पाहीति बर्हि
४३ रुपास्यत्यस्कन्दायास्कन्नꣳ हि तद्यद्बर्हिषि स्कन्दत्यथो बर्हिषदमेवैनं करोति
पराङा वर्ततेऽध्वर्युः पशोः संज्ञप्यमानात्पशुभ्य एव तन्निह्नुत आत्मनोनाव्रस्काय गच्छति
श्रियं प्र पशूनाप्नोति य एवं वेद पश्चाल्लोका वा एषा प्राच्युदानीयते यत्पत्नी नमस्त
आतानेत्याहादित्यस्य वै रश्मय
४४ आतानास्तेभ्य एव नमस्करोत्यनर्वा प्रेहीत्याह भ्रातृव्यो वा अर्वा भ्रातृव्यापनुत्त्यै
घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेणेत्याहाशिषमेवैतामा शास्त आपो देवीः
शुद्धायुव इत्याह यथायजुरेवैतत् ॥ ६। ३। ८॥ लोकाय नीयते यद्बर्ही रश्मयः सप्त
त्रिꣳशच्च ॥ ६। ३। ८॥
४५ पशोर्वा आलब्धस्य प्राणाञ्छुगृच्छति वाक्त आ प्यायतां प्राणस्त आ प्यायतामित्याह
प्राणेभ्य एवास्य शुचꣳशमयति सा प्राणेभ्योऽधि पृथिवीꣳ शुक्प्र विशति शमहोभ्यामिति
नि नयत्यहोरात्राभ्यामेव पृथिव्यै शुचꣳ शमयत्योषधे त्रायस्वैनग्ग् स्वधिते मैनꣳ
हिꣳसीरित्याह वज्रो वै स्वधितिः
४६ शान्त्यै पार्श्वत आ च्छ्यति मध्यतो हि मनुष्या आच्छ्यन्ति तिरश्चीनमा
च्छ्यत्यनूचीनꣳ हि मनुष्या आच्छ्यन्ति व्यावृत्त्यै रक्षसां भागोऽसीति स्थविमतो
बर्हिरक्त्वापास्यत्यस्नैव रक्षाꣳसि निरवदयत इदमहꣳ रक्षोऽधमं तमो नयामि
योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव
४७ द्वेष्टि यश्चैनं द्वेष्टि तावुभावधमं तमो नयतीषे त्वेति वपामुत्खिदतीच्छत इव ह्येष यो
यजते यदुपतृन्द्याद्रुद्रोऽस्य पशून्घातुकः स्याद्यन्नोप तृन्द्यादयता स्यादन्ययोपतृणत्त्यन्यया
न धृत्यै घृतेन द्यावापृथिवी प्रोर्ण्वाथामित्याह द्यावापृथिवी एव रसेनानक्त्यच्छिन्नो
४८ रायः सुवीर इत्याह यथायजुरेवैतत्क्रूरमिव वा एतत्करोति यद्वपामुत्खिदत्युर्वन्तरिक्षमन्विहीत्या
शान्त्यै प्र वा एषोऽस्माल्लोकाच्च्यवते यः पशुं मृत्यवे नीयमानमन्वारभते वपाश्रपणी
पुनरन्वारभतेऽस्मिन्नेव लोके प्रति तिष्ठत्यग्निना पुरस्तादेति रक्षसामपहत्या अथो देवता
एव हव्येना
४९ ऽन्वेति नान्तममङ्गारमति हरेद्यदन्तममङ्गारमतिहरेद्देवता अति मन्येत वायो वीहि
स्तोकानामित्याह तस्माद्विभक्ताः स्तोका अव पद्यन्तेऽग्रं वा एतत्पशूनां यद्वपाग्रमोषधीनां

बर्हिरग्रेणैवाग्रꣳ समर्धयत्यथो ओषधीष्वेव पशून्प्रति ष्ठापयति स्वाहाकृतीभ्यः प्रेष्येत्याह
५० यज्ञस्य समिष्ट्यै प्राणापानौ वा एतौ पशूनां यत् पृषदाज्यमात्मा वपा पृषदाज्यमभिघार्य वपामभि घारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति स्वाहोर्ध्वनभसं मारुतं गच्छतमित्याहोर्ध्वनभा ह स्म वै मारुतो देवानां वपाश्रपणी प्र हरति तेनैवैने प्र हरति विषूची प्र हरति तस्माद्विष्वञ्चौ प्राणापानौ ॥ ६। ३। ९॥
स्वधितिश्चैवाऽच्छिन्नो हव्येनेष्येत्याह षट् चत्वारिꣳशच्च ॥ ६। ३। ९॥
५१ पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैनमा लभते वपया प्रचर्य पुरोडाशेन प्र चरत्यूर्ग्वै पुरोडाश ऊर्जमेव पशूनां मध्यतो दधात्यथो पशोरेव छिद्रमपि दधाति पृषदाज्यस्योपहत्य त्रिः पृच्छति शृतꣳ हवी ३ : शमितरिति त्रिषत्या हि देवा योऽशृतꣳ शृतमाह स एनसा प्राणापानौ वा एतौ पशूनां
५२ यत्पृषदाज्यं पशोः खलु वा आलब्धस्य हृदयमात्माभि समेति यत्पृषदाज्येन हृदयमभिघारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति पशुना वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति तस्य शिरश्छित्त्वा मेधं प्राक्षारयन्थ्स प्रक्षोऽभवत्तत्प्रक्षस्य प्रक्षत्वं यत्प्लक्षशाखोत्तरबर्हिर्भवति समेधस्यैव
५३ पशोरव द्यति पशुं वै ह्रियमाणꣳ रक्षाग्स्यनु सचन्तेऽन्तरा यूपं चाहवनीयं च हरति रक्षसामपहत्यै पशोर्वा आलब्धस्य मनोप क्रामति मनोतायै हविषोऽवदीयमानस्यानु ब्रूहीत्याह मन एवास्याव रुंध एकादशावदानान्यव द्यति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तस्याव
५४ द्यति हृदयस्याग्रेऽव द्यत्यथ जिह्वाया अथ वक्षसो यद्वै हृदयेनाभि गच्छति तज्जिह्वया वदति यज्जिह्वया वदति तदुरसोऽधि निर्वदत्येतद्वै पशोर्यथापूर्वं यस्यैवमवदाय यथाकाममुत्तरेषामवद्यति यथापूर्वमेवास्य पशोरवत्तं भवति मध्यतो गुदस्याव द्यति मध्यतो हि प्राण उत्तमस्याव द्यत्यु
५५ त्तमो हि प्राणो यदीतरं यदीतरमुभयमेवाजामि जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी तदवदानैरेवाव दयते तदवदानानामवदानत्वं देवासुराः संयत्ता आसन्ते देवा अग्निमब्रुवन्त्वया वीरेणासुरानभि भवामेति
५६ सोऽब्रवीद्वरं वृणै पशोरुद्धारमुद्धरा इति स एतमुद्धारमुदहरत दोः पूर्वार्धस्य

गुदं मध्यतः श्रोणिं जघनार्धस्य ततो देवा अभवन्परासुरा यत्र्यङ्गाणाꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना परास्य भ्रातृव्यो भवत्यक्ष्णयाव द्यति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै ॥ ६। ३। १०॥ एतौ पशूनाꣳ समेधस्यैव तस्याऽवोत्तमस्याव द्यतीति पंच चत्वारिꣳशच्च ॥ ६। ३। १०॥

५७ मेदसा स्रुचौ प्रोर्णोति मेदोरूपा वै पशवो रूपमेव पशुषु दधाति यूषन्नवधाय प्रोर्णोति रसो वा एष पशूनां यद्यू रसमेव पशुषु दधाति पार्श्वेन वसाहोमं प्र यौति मध्यं वा एतत्पशूनां यत्पार्श्वꣳ रस एष पशूनां यद्वसा यत्पार्श्वेन वसाहोमं प्रयौति मध्यत एव पशूनाꣳ रसं दधाति घ्नन्ति

५८ वा एतत्पशुं यथ्संज्ञपयन्त्यैन्द्रः खलु वै देवतया प्राण ऐन्द्रोऽपान ऐन्द्रः प्राणो अङ्गे अङ्गे नि देध्यदित्याह प्राणापानावेव पशुषु दधाति देव त्वष्टर्भूरि ते सꣳ समेत्वित्याह त्वाष्ट्रा हि देवतया पशवो विषुरूपा यथ्सलक्ष्माणो भवथेत्याह विषुरूपा ह्येते सन्तः सलक्ष्माण एतर्हि भवन्ति देवत्रा यन्त

५९ मवसे सखायोऽनु त्वा माता पितरो मदन्त्वित्याहानुमतमेवैनं मात्रा पित्रा सुवर्गं लोकं गमयत्यर्धर्चे वसाहोमं जुहोत्यसौ वा अर्धर्च इयमर्धच इमे एव रसेनानक्ति दिशो जुहोति दिश एव रसेनानक्त्यथो दिग्भ्य एवोर्जꣳ रसमव रुंधे प्राणापानौ वा एतौ पशूनां यत्पृषदाज्यं वानस्पत्याः खलु

६० वै देवतया पशवो यत्पृषदाज्यस्योपहत्याह वनस्पतयेऽनु ब्रूहि वनस्पतये प्रेष्येति प्राणापानावेव पशुषु दधात्यन्यस्यान्यस्य समवत्तꣳ समवद्यति तस्मान्नानारूपाः पशवो यूष्णोप सिञ्चति रसो वा एष पशूनां यद्यू रसमेव पशुषु दधातीडामुप ह्वयते पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते

६१ चतुष्पादो हि पशवो यं कामयेतापशुः स्यादित्यमेदस्कं तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवैनं पशुभ्यो निर्भजत्यपशुरेव भवति यं कामयेत पशुमान्थ्स्यादिति मेदस्वत्तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवास्मै पशूनव रुंधे पशुमानेव भवति प्रजापतिर्यज्ञमसृजत स आज्यं

६२ पुरस्तादसृजत पशुं मध्यतः पृषदाज्यं पश्चात्तस्मादाज्येन प्रयाजा इज्यन्ते पशुना मध्यतः पृषदाज्येनानूयाजास्तस्मादेतन्मिश्रमिव पश्चाथ्सृष्टग्ग् ह्येकादशानूयाजान्, यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तमनु यजति घ्नन्ति वा एतत्पशुं

यथ्संज्ञपयन्ति प्राणापानौ खलु वा एतौ पशूनां यत्पृषदाज्यं यत्पृषदाज्येनानूयाजान्,
यजति प्राणापानावेव पशुषु दधाति ॥ ६। ३। ११॥ घ्नन्ति यन्तं खलु चतुरुप ह्वयत
आज्यं यत्पृषदाज्येन षड्व ॥ ६। ३। ११॥
चात्वालाथ्सुवर्गाय यद्वैसर्जनानि वैष्णव्यर्चा पृथिव्यै साध्या इषे त्वेत्यग्निना पर्यग्नि पशोः
पशुमालभ्य मेदसा स्रुचावेकादश ॥
चात्वालाद्देवानुपैति मुंचति प्रह्नियमाणाय पर्यग्नि पशुमालभ्य चतुष्पादो द्विषष्टिः ॥
चात्वालात्पशुषु दधाति ॥

## षष्ठकाण्डे चतुर्थः प्रश्नः ४

१ यज्ञेन वै प्रजापतिः प्रजा असृजत ता उपयड्भिरेवासृजत यदुपयज उपयजति प्रजा
एव तद्यजमानः सृजते जघनार्धादव द्यति जघनार्धाद्धि प्रजाः प्रजायन्ते स्थविमतोऽव
द्यति स्थविमतो हि प्रजाः प्रजायन्तेऽसंभिन्दन्नव द्यति प्राणानामसंभेदाय न पर्यावर्तयति
यत्पर्यावर्तयेदुदावर्तः प्रजा ग्राहुकः स्याथ्समुद्रं गच्छ स्वाहेत्याह रेत
२ एव तद्दधात्यन्तरिक्षं गच्छ स्वाहेत्याहान्तरिक्षेणैवास्मै प्रजाः प्र जनयत्यन्तरिक्षग्ग्
ह्यनु प्रजाः प्रजायन्ते देवꣳ सवितारं गच्छ स्वाहेत्याह सवितृप्रसूत एवास्मै प्रजाः प्र
जनयत्यहोरात्रे गच्छ स्वाहेत्याहाहोरात्राभ्यामेवास्मै प्रजाः प्र जनयत्यहोरात्रे ह्यनु प्रजाः
प्रजायन्ते मित्रावरुणौ गच्छ स्वाहे
३ त्याह प्रजास्वेव प्रजातासु प्राणापानौ दधाति सोमं गच्छ स्वाहेत्याह सौम्या हि देवतया
प्रजा यज्ञं गच्छ स्वाहेत्याह प्रजा एव यज्ञियाः करोति छन्दाꣳसि गच्छ स्वाहेत्याह
पशवो वै छन्दाꣳसि पशूनेवाव रुंधे द्यावापृथिवी गच्छ स्वाहेत्याह प्रजा एव प्रजाता
द्यावापृथिवीभ्यामुभयतः परिगृह्णाति नभो
४ दिव्यं गच्छ स्वाहेत्याह प्रजाभ्य एव प्रजाताभ्यो वृष्टिं नि यच्छत्यग्निं वैश्वानरं गच्छ
स्वाहेत्याह प्रजा एव प्रजाता अस्यां प्रति ष्ठापयति प्राणानां वा एषोऽव द्यति योऽवद्यति
गुदस्य मनो मे हार्दि यच्छेत्याह प्राणानेव यथास्थानमुप ह्वयते पशोर्वा आलब्धस्य
हृदयꣳ शुगृच्छति सा हृदयशूल
५ मभि समेति यत्पृथिव्याꣳ हृदयशूलमुद्वासयेत्पृथिवीꣳ शुचार्पयेद्यदप्स्वपः
शुचार्पयेच्छुष्कस्य चार्द्रस्य च संधावुद्वासयत्युभयस्य शान्त्यै यं द्विष्यात्तं
ध्यायेच्छुचैवैनमर्पयति ॥ ६। ४। १॥ रेतो मित्रावरुणौ गच्छ स्वाहा नभो हृदयशूलं

द्वात्रि꣡ꣳशच्च ॥ ६। ४। १॥
६ देवा वै यज्ञमाग्नीध्रे व्यभजन्त ततो यदत्यशिष्यत तदब्रुवन्वसतु नु न इदमिति तद्वसतीवरीणां वसतीवरित्वं तस्मिन्प्रातर्न समशक्नुवन्तदप्सु प्रावेशयन्ता वसतीवरीरभवन्वसतीवरीर्गृह्णाति यज्ञो वै वसतीवरीर्यज्ञमेवारभ्य गृहीत्वोप वसति यस्यागृहीता अभि निम्रोचेदनारब्धोऽस्य यज्ञः स्याद्
७ यज्ञं वि च्छिन्द्याज्ज्योतिष्या वा गृह्णीयाद्धिरण्यं वावधाय सशुक्राणामेव गृह्णाति यो वा ब्राह्मणो बहुयाजी तस्य कुंभ्यानां गृह्णीयात्स हि गृहीतवसतीवरीको वसतीवरीर्गृह्णाति पशवो वै वसतीवरीः पशूनेवारभ्य गृहीत्वोप वसति यदन्वीपं तिष्ठन्गृह्णीयान्निर्मार्गुका अस्मात्पशवः स्युः प्रतीपं तिष्ठन्गृह्णाति प्रतिरुध्यैवास्मै पशून्गृह्णातीन्द्रो
८ वृत्रमहन्थ्सो २ ऽपो २ ऽभ्यम्रियत तासां यन्मेध्यं यज्ञिय꣡ꣳ सदेवमासीत्तदत्यमुच्यत ता वहन्तीरभवन्वहन्तीनां गृह्णाति या एव मेध्या यज्ञियाः सदेवा आपस्तासामेव गृह्णाति नान्तमा वहन्तीरतीयाद्यदन्तमा वहन्तीरतीयाद्यज्ञमति मन्येत न स्थावराणां गृह्णीयाद्वरुणगृहीता वै स्थावरा यथ्स्थावराणां गृह्णीयाद्
९ वरुणेनास्य यज्ञं ग्राहयेद्यद्वै दिवा भवत्यपो रात्रिः प्र विशति तस्मात्ताम्रा आपो दिवा ददृश्रे यन्नक्तं भवत्यपोऽहः प्र विशति तस्माच्चन्द्रा आपो नक्तं ददृश्रे छायायै चातपतश्च संधौ गृह्णात्यहोरात्रयोरेवास्मै वर्णं गृह्णाति हविष्मतीरिमा आप इत्याह हविष्कृतानामेव गृह्णाति हविष्मा꣡ꣳ अस्तु
१० सूर्य इत्याह सशुक्राणामेव गृह्णात्यनुष्टुभा गृह्णाति वाग्वा अनुष्टुग्वाचैवैनाः सर्वया गृह्णाति चतुष्पदयर्चा गृह्णाति त्रिः सादयति सप्त सं पद्यन्ते सप्तपदा शक्करी पशवः शक्करी पशूनेवाव रुंधेऽस्मै वै लोकाय गार्हपत्य आ धीयतेऽमुष्मा आहवनीयो यद्गार्हपत्य उपसादयेदस्मिंल्लोके पशुमान्थ्स्याद्यदाहवनीयेऽमुष्मिं
११ ल्लोके पशुमान्थ्स्यादुभयोरुप सादयत्युभयोरेवैनं लोकयोः पशुमन्तं करोति सर्वतः परि हरति रक्षसामपहत्या इन्द्राग्नियोर्भागधेयीः स्थेत्याह यथायजुरेवैतदाग्नीध्र उप वासयत्येतद्वै यज्ञस्यापराजितं यदाग्नीध्रं यदेव यज्ञस्यापराजितं तदेवैना उप वासयति यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञ꣡ꣳ रक्षाग्स्यव चरन्ति यद्वहन्तीनां गृह्णाति क्रियमाणमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय न ह्येता ईलयन्त्या तृतीयसवनात्परि शेरे यज्ञस्य संतत्यै ॥ ६। ४। २॥ स्यादिन्द्रो गृह्णीयादस्त्वमुष्मिन् क्रियते षड्वि꣡ꣳशतिश्च ॥ ६। ४। २॥

१२ ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यः सोममुपावहरन्थ्सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन करोति मनसे त्वेत्याह पितृभ्य एवैतेन करोति दिवे त्वा सूर्याय त्वेत्याह देवेभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्य उपावहरति पुरा वाचः

१३ प्रवदितोः प्रातरनुवाकमुपाकरोति यावत्येव वाक्तामव रुंधेऽपोऽग्रेऽभिव्याहरति यज्ञो वा आपो यज्ञमेवाभि वाचं वि सृजति सर्वाणि छन्दाग्स्यन्वाह पशवो वै छन्दाꣳसि पशूनेवाव रुंधे गायत्रिया तेजस्कामस्य परि दध्यात्त्रिष्टुभेन्द्रियकामस्य जगत्या पशुकामस्यानुष्टुभा प्रतिष्ठाकामस्य पङ्क्त्या यज्ञकामस्य विराजान्नकामस्य श्रृणोत्वग्निः समिधा हवं

१४ म इत्याह सवितृप्रसूत एव देवताभ्यो निवेद्यापोऽच्छैत्यप इष्य होतरित्याहेषितꣳ हि कर्म क्रियते मैत्रावरुणस्य चमसाध्वर्यवा द्रवेत्याह मित्रावरुणौ वा अपां नेतारौ ताभ्यामेवैना अच्छैति देवीरापो अपां नपादित्याहाहुत्यैवैना निष्क्रीय गृह्णात्यथो हविष्कृतानामेवाभिघृतानां गृह्णाति

१५ कार्षिरसीत्याह शमलमेवासामप प्लावयति समुद्रस्य वोक्षित्या उन्नय इत्याह तस्मादद्यमानाः पीयमाना आपो न क्षीयन्ते योनिर्वै यज्ञस्य चात्वालं यज्ञो वसतीवरीर्होतृचमसं च मैत्रावरुणचमसं च सग्ग्स्पर्श्य वसतीवरीर्व्यानयति यज्ञस्य सयोनित्वायाथो स्वादेवैना योनेः प्र जनयत्यध्वर्योऽवेरपा ३ इत्याहोतेमनन्नमुरुतेमाः पश्येति वावैतदाह यद्यग्निष्टोमो जुहोति यद्युक्थ्यः परिधौ नि मार्ष्टि यद्यतिरात्रो यजुर्वदन्प्र पद्यते यज्ञक्रतूनां व्यावृत्त्यै ॥ ६। ४। ३॥ वाचो हवमभि घृतानां गृह्णात्युत पंच विꣳशतिश्च ॥ ६। ४। ३॥

१६ देवस्य त्वा सवितुः प्रसव इति ग्रावाणमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै पशवो वै सोमो व्यान उपाꣳशुसवनो यदुपाꣳशुसवनमभि मिमीते व्यानमेव पशुषु दधातीन्द्राय त्वेन्द्राय त्वेति मिमीत इन्द्राय हि सोम आह्रियते पञ्च कृत्वो यजुषा मिमीते

१७ पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंधे पञ्च कृत्वस्तूष्णीं दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुंधे श्वात्राः स्थ वृत्रतुर इत्याहैष वा अपाꣳ सोमपीथो य एवं वेद नाप्स्वार्तिमार्च्छति यत्ते सोम दिवि ज्योतिरित्याहैभ्य एवैनं

१८ लोकेभ्यः संभरति सोमो वै राजा दिशोऽभ्यध्यायथ्स दिशोऽनु
प्राविशत्प्रागपागुदगधरागित्याह दिग्भ्य एवैनꣳ संभरत्यथो दिश एवास्मा अव
रुंधेऽब निष्वरेत्याह कामुका एनग्ग् स्त्रियो भवन्ति य एवं वेद यत्ते सोमादाभ्यं नाम
जागृवीत्या
१९ हैष वै सोमस्य सोमपीथो य एवं वेद न सौम्यामार्तिमार्च्छति घ्नन्ति वा एतथ्सोमं
यदभिषुण्वन्त्यꣳशूनप गृह्णाति त्रायत एवैनं प्राणा वा अꣳशवः पशवः सोमोऽꣳशून्
पुनरपि सृजति प्राणानेव पशुषु दधाति द्वौद्वावपि सृजति तस्माद्द्वौद्वौ प्राणाः ॥
६। ४। ४॥ यजुषा मिमीत एनं जागृवीति चतुश्चत्वारिꣳशच्च ॥ ६। ४। ४॥
२० प्राणो वा एष यदुपाꣳशुर्यदुपाग्श्वग्रा ग्रहा गृह्यन्ते प्राणमेवानु प्र यन्त्यरुणो ह
स्माहौपवेशिः प्रातःसवन एवा हं यज्ञꣳ सग्ग् स्थापयामि तेन ततः स२ꣳस्थितेन
चरामीत्यष्टौ कृत्वोऽग्रेऽभि षुणोत्यष्टाक्षरा गायत्री गायत्रं प्रातःसवनं प्रातःसवनमेव
तेनाप्नोत्येकादश कृत्वो द्वितीयमेकादशाक्षरा त्रिष्टुप्त्रैष्टुभं माध्यंदिनꣳ
२१ सवनं माध्यंदिनमेव सवनं तेनाप्नोति द्वादश कृत्वस्तृतीयं द्वादशाक्षरा
जगती जागतं तृतीयसवनं तृतीयसवनमेव तेनाप्नोत्येताꣳ ह वाव स यज्ञस्य
स२ꣳस्थितिमुवाचास्कन्दायास्कन्नꣳ हि तद्यद्यज्ञस्य स२ꣳस्थितस्य स्कन्दत्यथो
खल्वाहुर्गायत्री वाव प्रातःसवने नातिवाद इत्यनतिवादुक एनं भ्रातृव्यो भवति य एवं
वेद तस्मादष्टावष्टौ
२२ कृत्वोऽभिषुत्यं ब्रह्मवादिनो वदन्ति पवित्रवन्तोऽन्ये ग्रहा गृह्यन्ते किं पवित्र
उपाꣳशुरिति वाक्पवित्र इति ब्रूयाद्वाचस्पतये पवस्व वाजिन्नित्याह वाचैवैनं पवयति
वृष्णो अꣳशुभ्यामित्याह वृष्णो ह्येतावꣳशू यौ सोमस्य गभस्तिपूत इत्याह गभस्तिना
ह्येनं पवयति देवो देवानां पवित्रमसीत्याह देवो ह्येष
२३ सन्देवानां पवित्रं येषां भागोऽसि तेभ्यस्त्वेत्याह येषाग् ह्येष भागस्तेभ्य एनं
गृह्णाति स्वांकृतोऽसीत्याह प्राणमेव स्वमकृत मधुमतीर्न इषस्कृधीत्याह सर्वमेवास्मा
इदग्ग् स्वदयति विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इत्याहोभयेष्वेव देवमनुष्येषु
प्राणान्दधाति मनस्त्वा
२४ ऽष्ट्वित्याह मन एवाश्नुत उर्वन्तरिक्षमन्विहीत्याहान्तरिक्षदेवत्यो हि प्राणः स्वाहा
त्वा सुभवः सूर्यायेत्याह प्राणा वै स्वभवसो देवास्तेष्वेव परोऽक्षं जुहोति देवेभ्यस्त्वा

मरीचिपेभ्य इत्याहादित्यस्य वै रश्मयो देवा मरीचिपास्तेषां तद्भागधेयं तानेव तेन प्रीणाति यदि कामयेत वर्षुकः पर्जन्यः
२५ स्यादिति नीचा हस्तेन नि मृज्याद्वृष्टिमेव नि यच्छति यदि कामयेतावर्षुकः स्यादित्युत्तानेन नि मृज्याद्वृष्टिमेवोद्यच्छति यद्यभिचरेदमुं जह्यथ त्वा होष्यामीति ब्रूयादाहुतिमेवैनं प्रेप्सन् हन्ति यदि दूरे स्यादा तमितोस्तिष्ठेत् प्राणमेवास्यानुगत्य हन्ति यद्यभिचरेदमुष्य
२६ त्वा प्राणे सादयामीति सादयेदसन्नो वै प्राणः प्राणमेवास्य सादयति षड्भिरꣳशुभिः पवयति षड्वा ऋतव ऋतुभिरेवैनं पवयति त्रिः पवयति त्रय इमे लोका एभिरेवैनं लोकैः पवयति ब्रह्मवादिनो वदन्ति कस्मात्सत्यात्त्रयः पशूनाꣳ हस्तादाना इति यत्त्रिरुपाꣳशुꣳ हस्तेन विगृह्णाति तस्मात्त्रयः पशूनाꣳ हस्तादानाः पुरुषो हस्ती मर्कटः ॥ ६। ४। ५॥
माध्यन्दिनमष्टावष्टावेष मनस्त्वा पर्जन्योऽमुष्य पुरुषो द्वे च ॥ ६। ४। ५॥
२७ देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा उपाꣳशौ यज्ञꣳ सग्ग्स्थाप्यमपश्यन्तमुपाꣳशौ समस्थापयन्तेऽसुरा वज्रमुद्यत्य देवानभ्यायन्त ते देवा बिभ्यत इन्द्रमुपाधावन्तानिन्द्रोऽन्तर्यामेणान्तरधत्त तदन्तर्यामस्यान्तर्यामत्वं यदन्तर्यामो गृह्यते भ्रातृव्यानेव तद्यजमानोऽन्तर्धत्तेऽन्तस्ते
२८ दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षमित्याहैभिरेव लोकैर्यजमानो भ्रातृव्यानन्तर्धत्ते ते देवा अमन्यन्तेन्द्रो वा इदमभूद्यद्वयग्ग् स्म इति तेऽब्रुवन्मघवन्ननु न आ भजेति सजोषा देवैरवरैः परैश्चेत्यब्रवीद्ये चैव देवाः परे ये चावरे तानुभया
२९ नन्वाभजथ्सजोषा देवैरवरैः परैश्चेत्याह ये चैव देवाः परे ये चावरे तानुभयानन्वाभजत्यन्तर्यामे मघवन्मादयस्वेत्याह यज्ञादेव यजमानं नान्तरेत्युपयामगृहीतोऽसीत्याहापानस्य धृत्यै यदुभावपवित्रौ गृह्येयातां प्राणमपानोऽनु न्यृच्छेत्प्रमायुकः स्यात्पवित्रवानन्तर्यामो गृह्यते
३० प्राणापानयोर्विधृत्यै प्राणापानौ वा एतौ यदुपाग्श्वन्तर्यामौ व्यान उपाꣳशु सवनो यं कामयेत प्रमायुकः स्यादित्यसग्ग्स्पृष्टौ तस्य सादयेद्व्यानेनैवास्य प्राणापानौ वि च्छिनत्ति ताजक्प्र मीयते यं कामयेत सर्वमायुरियादिति सꣳस्पृष्टौ तस्य सादयेद्व्यानेनैवास्य प्राणापानौ सं तनोति सर्वमायुरेति ॥ ६। ४। ६॥ त उभयान्गृह्यते चतुश्चत्वारिꣳशच्च ॥ ६। ४। ६॥
३१ वाग्वा एषा यदैन्द्रवायवो यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवानु प्र यन्ति वायुं देवा

अब्रुवन्त्सोमꣳ राजानꣳ हनामेति सोऽब्रवीद्वरं वृणै मदग्रा एव वो ग्रहा गृह्यान्ता इति तस्मादैन्द्रवायवाग्रा ग्रहा गृह्यन्ते तमघ्नन्त्सोऽपूयत्तं देवा नोपाधृष्णुवन्ते वायुमब्रुवन्निमं नः स्वदये
३२ ति सोऽब्रवीद्वरं वृणै मद्देवत्यान्येव वः पात्राण्युच्यान्ता इति तस्मान्नाना देवत्यानि सन्ति वायव्यान्युच्यन्ते तमेभ्यो वायुरेवास्वदयत् तस्माद्यत्पूयति तत्प्रवाते विषजन्ति वायुर्हि तस्य पवयिता स्वदयिता तस्य विग्रहणं नाविन्दन्थ् सादितिरब्रवीद्वरं वृणा अथ मया वि गृह्णीध्वं मद्देवत्या एव वः सोमाः
३३ सन्ना असन्नित्युपयामगृहीतोऽसीत्याहादितिदेवत्यास्तेन यानि हि दारुमयाणि पात्राण्यस्यैतानि योनेः संभूतानि यानि मृन्मयानि साक्षात्तान्यस्यै तस्मादेवमाह वाग् वै पराच्यव्याकृतावदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते तस्मात्सकृदिन्द्राय मध्यतो गृह्यते द्विर्वायवे द्वौ हि स वराववृणीत ॥ ६। ४। ७॥ स्वदय सोमाः सहाऽष्टाविꣳशतिश्च ॥ ६। ४। ७॥
३४ मित्रं देवा अब्रुवन्त्सोमꣳ राजानꣳ हनामेति सोऽब्रवीन्नाहꣳ सर्वस्य वा अहं मित्रमस्मीति तमब्रुवन् हनामैवेति सोऽब्रवीद्वरं वृणै पयसैव मे सोमग्ग् श्रीणन्निति तस्मान्मैत्रावरुणं पयसा श्रीणन्ति तस्मात्पशवोऽपाक्रामन्मित्रः सन्क्रूरमकरिति क्रूरमिव खलु वा एष
३५ करोति यः सोमेन यजते तस्मात्पशवोऽप क्रामन्ति यन्मैत्रावरुणं पयसा श्रीणाति पशुभिरेव तन्मित्रꣳ समर्धयति पशुभिर्यजमानं पुरा खलु वावैवं मित्रोऽवेदपमत्क्रूरं चक्रुषः पशवः क्रमिष्यन्तीति तस्मादेवमवृणीत वरुणं देवा अब्रुवन्त्वयाꣳशभुवा सोमꣳ राजानꣳ हनामेति सोऽब्रवीद्वरं वृणै मह्यं चै
३६ वैष मित्राय च सह गृह्याता इति तस्मान्मैत्रावरुणः सह गृह्यते तस्माद्राज्ञा राजानमꣳशभुवा घ्नन्ति वैश्येन वैश्यꣳशूद्रेण शूद्रं न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा मित्रावरुणावब्रुवन्निदं नो वि वासयतमिति तावब्रूतां वरं वृणावहा एक एवावत्पूर्वो ग्रहो गृह्याता इति तस्मादैन्द्रवायवः पूर्वो मैत्रावरुणाद्गृह्यते प्राणापानौ ह्येतौ यदुपाग्श्वन्तर्यामौ मित्रोऽहरजनयद्वरुणो रात्रिं ततो वा इदं व्यौच्छद्यन्मैत्रावरुणो गृह्यते व्युष्ट्यै ॥ ६। ४। ८॥ एष चैन्द्रवायवो द्वाविꣳशतिश्च ॥ ६। ४। ८॥
३७ यज्ञस्य शिरोऽच्छिद्यत ते देवा अश्विनावब्रुवन्भिषजौ वै स्थ इदं यज्ञस्य

शिरः प्रति धत्तमिति तावब्रूतां वरं वृणावहै ग्रह एव नावत्रापि गृह्यतामिति ताभ्यामेतमाश्विनमगृह्णन्ततो वै तौ यज्ञस्य शिरः प्रत्यधत्तां यदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै तौ देवा अब्रुवन्नपूतौ वा इमौ मनुष्यचरौ
३८ भिषजाविति तस्माद्ब्राह्मणेन भेषजं न कार्यमपूतो ह्ये २ षोऽमेध्यो यो भिषक्तौ बहिष्पवमानेन पवयित्वा ताभ्यामेतमाश्विनमगृह्णन्तस्माद्बहिष्पवमाने स्तुत आश्विनो गृह्यते तस्मादेवं विदुषा बहिष्पवमान उपसद्यः पवित्रं वै बहिष्पवमान आत्मानमेव पवयते तयोस्त्रेधा भैषज्यं वि न्यदधुरग्नौ तृतीयमप्सु तृतीयं ब्राह्मणे तृतीयं तस्मादुदपात्र
३९ मुपनिधाय ब्राह्मणं दक्षिणतो निषाद्य भेषजं कुर्याद्यावदेव भेषजं तेन करोति समर्धुकमस्य कृतं भवति ब्रह्मवादिनो वदन्ति कस्मात्सत्यादेकपात्रा द्विदेवत्या गृह्यन्ते द्विपात्रा हूयन्त इति यदेकपात्रा गृह्यन्ते तस्मादेकोऽन्तरतः प्राणो द्विपात्रा हूयन्ते तस्माद्द्वौद्वौ बहिष्टात्प्राणाः प्राणा वा एते यद्द्विदेवत्याः पशव इडा यदिडां पूर्वां द्विदेवत्येभ्य उपह्वयेत
४० पशुभिः प्राणानन्तर्दधीत प्रमायुकः स्याद्द्विदेवत्यान्भक्षयित्वेडामुप ह्वयते प्राणानेवात्मन्धित्वा पशूनुप ह्वयते वाग्वा ऐन्द्रवायवश्चक्षुर्मैत्रावरुणः श्रोत्रमाश्विनः पुरस्तादैन्द्रवायवं भक्षयति तस्मात्पुरस्ताद्वाचा वदति पुरस्तान्मैत्रावरुणं तस्मात्पुरस्ताच्चक्षुषा पश्यति सर्वतः परिहारमाश्विनं तस्मात्सर्वतः श्रोत्रेण शृणोति प्राणा वा एते यद्द्विदेवत्या
४१ अरिक्तानि पात्राणि सादयति तस्मादरिक्ता अन्तरतः प्राणा यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञꣳ रक्षाꣳस्यव चरन्ति यदरिक्तानि पात्राणि सादयति क्रियमाणमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्याꣳ सादयति वाच्येव वाचं दधात्या तृतीयसवनात्परि शेरे यज्ञस्य संतत्यै ॥ ६। ४। ९॥ मनुष्य चरावुदपात्रमुपह्वयेत द्विदेवत्याः षट् चत्वारिꣳशच्च ॥ ६। ४। ९॥
४२ बृहस्पतिर्देवानां पुरोहित आसीच्छण्डामर्कावसुराणां ब्रह्मण्वन्तो देवा आसन्ब्रह्मण्वन्तोऽसुरास्ते २ ऽन्योऽन्यं नाशक्नुवन्नभि भवितुं ते देवाः शण्डामर्कावुपामन्त्रयन्त तावब्रूतां वरं वृणावहै ग्रहावेव नावत्रापि गृह्येतामिति ताभ्यामेतौ शुक्रामन्थिनावगृह्णन्ततो देवा अभवन्परासुरा यस्यैवं विदुषः शुक्रामन्थिनौ गृह्येते भवत्यात्मना परा

४३ ऽस्य भ्रातृव्यो भवति तौ देवा अपनुद्यात्मन इन्द्रायाजुहवुरपनुत्तौ शण्डामर्कौ सहामुनेति ब्रूयाद्यं द्विष्याद्यमेव द्वेष्टि तेनैनौ सहाप नुदते स प्रथमः संकृतिर्विश्वकर्मेत्येवैनावात्मन इन्द्रायाजुहवुरिन्द्रो ह्येतानि रूपाणि करिक्रदचरदसौ वा आदित्यः शुक्रश्चन्द्रमा मन्थ्यपिगृह्य प्राञ्चौ नि
४४ ष्क्रामतस्तस्मात्प्राञ्चौ यन्तौ न पश्यन्ति प्रत्यञ्चावावृत्य जुहुतस्मात्प्रत्यञ्चौ यन्तौ पश्यन्ति चक्षुषी वा एते यज्ञस्य यच्छुक्रामन्थिनौ नासिकोत्तरवेदिरभितः परिक्रम्य जुहुतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते सर्वतः परि क्रामतो रक्षसामपहत्यै देवा वै याः प्राचीराहुतीरजुहवुर्ये पुरस्तादसुरा आसन्ताग्स्ताभिः प्रा
४५ ऽणुदन्त याः प्रतीचीर्ये पश्चादसुरा आसन्ताग्स्ताभिरपानुदन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यञ्चौ शुक्रामन्थिनौ पश्चाच्चैव पुरस्ताच्च यजमानो भ्रातृव्यान्प्र णुदते तस्मात्पराचीः प्रजाः प्र वीयन्ते प्रतीचीर्जायन्ते शुक्रामन्थिनौ वा अनु प्रजाः प्र जायन्तेऽत्रीश्चाद्याश्च सुवीराः प्रजाः प्रजनयन्परीहि शुक्रः शुक्रशोचिषा
४६ सुप्रजाः प्रजाः प्रजनयन्परीहि मन्थी मन्थिशोचिषेत्याहैता वै सुवीरा या अत्रीरेताः सुप्रजा या आद्या य एवं वेदात्र्यस्य प्रजा जायते नाद्या प्रजापतेरक्ष्यश्वयत् तत् परापतत् तद्विकङ्कतं प्राविशत् तद्विकङ्कते नारमत तद्यवं प्राविशत्तद्यवेऽरमत तद्यवस्य
४७ यवत्वं यद्वैकङ्कतं मन्थिपात्रं भवति सक्तुभिः श्रीणाति प्रजापतेरेव तच्चक्षुः संभरति ब्रह्मवादिनो वदन्ति कस्माथ्सत्यान्मन्थिपात्रँ सदो नाश्नुत इत्यार्तपात्रँ हीति ब्रूयाद्यदश्नुवीतान्धोऽध्वर्युः स्यादार्तिमार्च्छेत्तस्मान्नाश्नुते ॥ ६। ४। १०॥ आत्मना परा निश्प्र शुक्रशोचिषा यवस्य सप्त त्रिँशच्च ॥
६। ४। १०॥
४८ देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा आग्रयणाग्रान्ग्रहानपश्यन्तानगृह्णत ततो वै तेऽग्रं पर्यायन् यस्यैवं विदुष आग्रयणाग्रा ग्रहा गृह्यन्तेऽग्रमेव समानानां पर्येति रुग्णवत्यर्चा भ्रातृव्यवतो गृह्णीयाद्भ्रातृव्यस्यैव रुक्त्वाग्रँ समानानां पर्येति ये देवा दिव्येकादश स्थेत्याहै
४९ तावतीर्वै देवतास्ताभ्य एवैनँ सर्वाभ्यो गृह्णात्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येष देवतया वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना ते देवा वाच्यपक्रान्तायां तूष्णीं ग्रहानगृह्णत सामन्यत वागन्तर्यन्ति वै मेति साग्रयणं प्रत्यागच्छत्तदाग्रयणस्याग्रयणत्वं

५० तस्मादाग्रयणे वाग्वि सृज्यते यत्तूष्णीं पूर्वे ग्रहा गृह्यन्ते यथा थ्सारीयति म आख्
इयति नाप राथ्स्यामीत्युपावसृजत्येवमेव तदध्वर्युराग्रयणं गृहीत्वा यज्ञमारभ्य वाचं वि
सृजते त्रिर्हिं करोत्युद्गातॄनेव तद्वृणीते प्रजापतिर्वा एष यदाग्रयणो यदाग्रयणं गृहीत्वा हिं
करोति प्रजापतिरेव
५१ तत्प्रजा अभि जिघ्रति तस्माद्वथ्सं जातं गौरभि जिघ्रत्यात्मा वा एष यज्ञस्य
यदाग्रयणः सवनेसवनेऽभि गृह्णात्यात्मन्नेव यज्ञꣳ सं तनोत्युपरिष्टादा नयति रेत एव
तद्दधात्यधस्तादुप गृह्णाति प्र जनयत्येव तद्ब्रह्मवादिनो वदन्ति कस्माथ्सत्याद्गायत्री कनिष्ठा
छंदसाꣳ सती सर्वाणि सवनानि वहतीत्येष वै गायत्रियै वथ्सो यदाग्रयणस्तमेव
तदभिनिवर्तꣳ सर्वाणि सवनानि वहति तस्माद्वथ्समपाकृतं गौरभि निवर्तते ॥ ६।
४। ११॥
आहाऽग्रयणत्वं प्रजापतिरेवेति विꣳशतिश्च ॥ ६। ४। ११॥
यज्ञेन ता उपयद्भिर्देवा वै यज्ञमाग्नीध्रे ब्रह्मवादिनः स त्वै देवस्य ग्रावाणं प्राणो वा
उपाग्श्वग्रा देवा वा उपाꣳशौ वाग्वै मित्रं यज्ञस्य बृहस्पतिर्देवा वा आग्रयणाग्रानेकादश
॥ यज्ञेन लोके पशुमान्थ्स्याथ्सवनं माध्यंदिनं वाग्वा अरिक्तानि तत्प्रजा एक पंचाशत्
॥ यज्ञेन नि वर्तते ॥

## षष्ठकाण्डे पञ्चमः प्रश्नः ५

१ इन्द्रो वृत्राय वज्रमुदयच्छथ्स वृत्रो वज्रादुद्यतादबिभेथ्सोऽब्रवीन्मा मे प्र हारस्ति वा इदं
मयि वीर्यं तत्ते प्र दास्यामीति तस्मा उक्थ्यं प्रायच्छत्तस्मै द्वितीयमुदयच्छथ्सोऽब्रवीन्मा
मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति
२ तस्मा उक्थ्यमेव प्रायच्छत्तस्मै तृतीयमुदयच्छत्तं विष्णुरन्वतिष्ठत जहीति सोऽब्रवीन्मा
मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति तस्मा उक्थ्यमेव प्रायच्छत्तं निर्मायं
भूतमहन्, यज्ञो हि तस्य मायासीद्यदुक्थ्यो गृह्यत इन्द्रियमेव
३ तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्त इन्द्राय त्वा बृहद्वते वयस्वत इत्याहेन्द्राय हि स तं
प्रायच्छत्तस्मै त्वा विष्णवे त्वेत्याह यदेव विष्णुरन्वतिष्ठत जहीति तस्माद्विष्णुमन्वाभजति
त्रिर्निर्गृह्णाति त्रिर्हि स तं तस्मै प्रायच्छदेष ते योनिः पुनर्हविरसीत्याह पुनः पुनर्
४ ह्यस्मान्निर्गृह्णाति चक्षुर्वा एतद्यज्ञस्य यदुक्थ्यस्तस्मादुक्थ्यꣳ हुतꣳ सोमा
अन्वायन्ति तस्मादात्मा चक्षुरन्वेति तस्मादेकं यन्तं बहवोऽनु यन्ति तस्मादेको

बहूनां भद्रो भवति तस्मादेको बह्वीर्जाया विन्दते यदि कामयेताध्वर्युरात्मानं यज्ञयशसेनार्पयेयमित्यन्तराहवनीयं च हविर्धानं च तिष्ठन्नव नये

५ दात्मानमेव यज्ञयशसेनार्पयति यदि कामयेत यजमानं यज्ञयशसेनार्पयेयमित्यन्तरा सदोहविर्धाने तिष्ठन्नव नयेद्यजमानमेव यज्ञयशसेनार्पयति यदि कामयेत सदस्यान् यज्ञयशसेनार्पयेयमिति सद आलभ्याव नयेथ्सदस्यानेव यज्ञयशसेनार्पयति ॥ ६। ५। १॥ इतीन्द्रियमेव पुनः पुनर्नयेत्त्रयस्त्रिꣳशच्च ॥ ६। ५। १॥

६ आयुर्वा एतद्यज्ञस्य यद्ध्रुव उत्तमो ग्रहाणां गृह्यते तस्मादायुः प्राणानामुत्तमं मूर्धानं दिवो अरतिं पृथिव्या इत्याह मूर्धानमेवैनꣳ समानानां करोति वैश्वानरमृताय जातमग्निमित्याह वैश्वानरꣳ हि देवतयायुरुभयतोवैश्वानरो गृह्यते तस्मादुभयतः प्राणा अधस्ताच्चोपरिष्टाच्चार्धिनोऽन्ये ग्रहा गृह्यन्तेऽर्धी ध्रुवस्तस्मा

७ दर्ध्य वाङ्प्राणोऽन्येषां प्राणानामुपोप्तेऽन्ये ग्रहाः साद्यन्तेऽनुपोप्ते ध्रुवस्तस्मादस्थ्नान्याः प्रजाः प्रतितिष्ठन्ति माꣳसेनान्या असुरा वा उत्तरतः पृथिवीं पर्याचिकीर्षन्तां देवा ध्रुवेणादृꣳहन्तद्ध्रुवस्य ध्रुवत्वं यद्ध्रुव उत्तरतः साद्यते धृत्या आयुर्वा एतद्यज्ञस्य यद्ध्रुव आत्मा होता यद्धोतृचमसे ध्रुवमवनयत्यात्मन्नेव यज्ञस्या

८ ऽयुर्दधाति पुरस्तादुक्थस्यावनीय इत्याहुः पुरस्ताद्ध्यायुषो भुङ्क्ते मध्यतोऽवनीय इत्याहुर्मध्यमेन ह्यायुषो भुङ्क्त उत्तरार्धेऽवनीय इत्याहुरुत्तमेन ह्यायुषो भुङ्क्ते वैश्वदेव्यामृचि शस्यमानायामव नयति वैश्वदेव्यो वै प्रजाः प्रजास्वेवायुर्दधाति ॥ ६। ५। २॥ ध्रुवस्तस्मादेव यज्ञस्यैकान्न चत्वारिꣳशच्च ॥ ६। ५। २॥

९ यज्ञेन वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति ते संवथ्सरेण योपयित्वा सुवर्गं लोकमायन्तमृषय ऋतुग्रहैरेवानु प्राजानन् यदृतुग्रहा गृह्यन्ते सुवर्गस्य लोकस्य प्रज्ञात्यै द्वादश गृह्यन्ते द्वादश मासाः संवथ्सरः संवथ्सरस्य प्रज्ञात्यै सह प्रथमौ गृह्येते सहोत्तमौ तस्माद्द्वौद्वावृतू उभयतो मुखमृतुपात्रंभवति को

१० हि तद्वेद यत ऋतूनां मुखमृतुना प्रेष्येति षट्कृत्व आह षड्वा ऋतव ऋतूनेव प्रीणात्यृतुभिरिति चतुश्चतुष्पद एव पशून्प्रीणाति द्विः पुनर्ऋतुनाह द्विपद एव प्रीणात्यृतुना प्रेष्येति षट्कृत्व आहर्तुभिरिति चतुस्तस्माच्चतुष्पादः पशव ऋतूनुप जीवन्ति द्विः

११ पुनर्ऋतुनाह तस्माद्द्विपादश्चतुष्पदः पशूनुप जीवन्त्यृतुना प्रेष्येति षट्कृत्व आहर्तुभिरिति चतुर्द्विः पुनर्ऋतुनाहाक्रमणमेव तथ्सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै

नान्यो॑ऽन्यमनु प्र प॑द्येत यदन्यो॑ऽन्यम॑नु प्र पद्ये॑तर्तुर्ऋ॒तुमनु प्र प॑द्येतर्त॒वो मोह॑ुकाः स्युः
१२ प्रसि॑द्धमेवाध्वर्युर्दक्षिणेन प्र प॑द्यते प्रसि॑द्धं प्रति प्रस्थातोत्त॑रेण तस्मा॑दादि॒त्यः षण्मासो
दक्षि॑णेनैति षडुत्त॑रेणोपयामगृहीतोऽसि स॒ꣳसर्पो॑ऽस्यꣳहस्पत्याय त्वेत्याहास्ति॑ त्रयोद॒शो
मास इत्या॑हुस्तमे॑व तत्प्रीणाति ॥ ६। ५। ३॥ को जी॑वन्ति द्विस्युश्चतु॑स्त्रिꣳशच्च ॥ ६।
५। ३॥
१३ सु॒वर्गा॑य वा ए॒ते लो॒काय॑ गृह्यन्ते यदृ॒तुग्र॒हा ज्योति॑रिन्द्रा॒ग्नी यदै॑न्द्राग्नमृतुपात्रे॑ण गृह्णाति
ज्योति॑रेवास्मा॑ उपरि॑ष्टाद्दधाति सु॒वर्ग॑स्य लो॒कस्या॑नुख्यात्या ओजो॒भृतौ वा ए॒तौ दे॒वानां॑
यदि॑न्द्रा॒ग्नी यदै॑न्द्राग्नो गृ॒ह्यत ओज॑ ए॒वाव॑ रुंधे वैश्वदेवꣳ शु॒क्रपात्रे॑ण गृह्णाति वैश्वदे॒व्यो॑
वै प्र॒जा अ॑सावा॑दि॒त्यः शु॒क्रो यद्वै॑श्वदे॒वꣳ शु॒क्रपात्रे॑ण गृ॒ह्णाति तस्मा॑द॒सावा॑दि॒त्यः
१४ सर्वा॑ः प्र॒जाः प्र॒त्यङ्ङु॑देति तस्मा॒थ्सर्व॑ ए॒व म॑न्यते मां प्र॒त्यु॑द॒गा॑दिति वैश्व॒देवꣳ
शु॑क्रपात्रे॑ण गृह्णाति वैश्वदे॒व्यो॑ वै प्र॒जास्ते॑जः शु॒क्रो यद्वै॑श्वदे॒वꣳ शु॑क्रपात्रे॑ण गृह्णाति
प्र॒जास्वे॒व तेजो॑ दधाति ॥ ६। ५। ४॥ तस्मा॑द॒सावा॑दि॒त्यस्त्रि॒ꣳशच्च॑ ॥ ६। ५। ४॥
१५ इन्द्रो॑ म॒रुद्भिः सांवि॑द्येन माध्यं॑दिने सव॑ने वृ॒त्रम॑हन् यन्माध्यं॑दिने सव॑ने मरुत्वतीया॑
गृह्य॑न्ते वार्त्र॑घ्ना ए॒व ते यज॑मानस्य गृह्य॑न्ते तस्य॑ वृ॒त्रं ज॑घ्नुष ऋ॒तवो॑ऽमुह्यन्थ्स ऋ॒तुपा॑त्रेण
मरुत्वतीया॑नगृह्णात्ततो॑ वै स ऋ॒तून्प्राजा॑नाद्यदृ॒तुपात्रे॑ण मरु॒त्वतीया॑ गृह्य॑न्त ऋ॒तूनां प्रज्ञा॑त्यै
वज्रं॑ वा ए॒तं यज॑मानो भ्रातृ॑व्याय प्र ह॑रति यन्म॑रुत्वतीया उदे॑व प्र॑थमे॑न
१६ यच्छ॑ति प्र ह॑रति द्वि॒तीये॑न स्तृणुते तृ॒तीये॑नायु॑धं वा ए॒तद्यज॑मानः सꣳस्कु॑रुते
यन्म॑रुत्वतीया धनु॑रेव प्र॑थमो ज्या द्वि॒तीय इषुस्तृ॑तीयः प्र॒त्ये॑व प्र॑थमे॑न धत्ते वि सृ॑जति
द्वि॒तीये॑न विध्य॑ति तृ॒तीये॑नेन्द्रो॑ वृ॒त्रꣳ ह॒त्वा परा॑ परा॒वत॑मगच्छ॒दपा॑राध॒मिति म॑न्यमा॑नः
स हरि॑तोऽभव॒थ्स ए॒तान्म॑रुत्वतीया॑नात्म॒स्पर॑णानपश्यत्ताम॑गृह्णीत
१७ प्रा॒णमे॒व प्र॑थमेना॑स्पृणुतापा॒नं द्वि॒तीये॑नात्मानं॑ तृ॒तीये॑नात्म॒स्पर॑णा वा ए॒ते यज॑मानस्य
गृह्य॑न्ते यन्म॑रुत्वतीया॑ः प्रा॒णमे॒व प्र॑थमे॑न स्पृणुतेऽपा॒नं द्वि॒तीये॑नात्मानं॑ तृ॒तीये॑नेन्द्रो॑
वृ॒त्रम॑हन्तं दे॒वा अ॑ब्रुवन्म॒हान्, वा अ॒यम॑भूद्यो वृ॒त्रमव॑धी॒दिति॒ तन्म॑हे॒न्द्रस्य॑ महेन्द्र॒त्वꣳ स
ए॒तं मा॑हे॒न्द्रमु॑द्धा॒रमु॑दहरत वृ॒त्रꣳ ह॒त्वान्यासु॑ दे॒वता॒स्वधि॑ यन्म॑हे॒न्द्रो गृ॒ह्यत॑ उद्धा॒रमे॒व तं
यज॑मान उद्ध॑रतेऽन्यासु॑ प्र॒जास्वधि॑ शु॒क्रपात्रे॑ण गृह्णाति यजमानदेव॒त्यो॑ वै मा॑हे॒न्द्रस्ते॑जः
शु॒क्रो यन्मा॑हे॒न्द्रꣳ शु॑क्रपात्रे॑ण गृ॒ह्णाति यज॑मान ए॒व तेजो॑ दधाति ॥ ६। ५। ५॥
प्र॒थमेना॑ऽगृह्णीत दे॒वता॒स्वष्टावि॑ꣳशतिश्च ॥ ६। ५। ५॥
१८ अदि॑तिः पु॒त्रका॑मा सा॒ध्येभ्यो॑ दे॒वेभ्यो॑ ब्रह्मौदनमप॑चत्तस्या॑ उच्छेषणमद॒दुस्तत्प्राश्ना॒थ्सा

रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपचथ्सामन्यतोच्छेषणान्म
इमेऽज्ञत यदग्रे प्राशिष्यामीतो मे वसीयाꣳसो जनिष्यन्त इति साग्रे प्राश्नाथ्सा रेतोऽधत्त
तस्यै व्यृद्धमाण्डमजायत सादित्येभ्य एव
१९ तृतीयमपचद्भोगाय म इदग्ग् श्रान्तमस्त्विति तेऽब्रुवन्वरं वृणामहै योऽतो जायाता
अस्माकꣳ स एकोऽसद्योऽस्य प्रजायामृध्याता अस्माकं भोगाय भवादिति ततो
विवस्वानादित्योऽजायत तस्य वा इयं प्रजा यन्मनुष्यास्तास्वेक एवर्धो यो यजते
स देवानां भोगाय भवति देवा वै यज्ञाद्
२० रुद्रमन्तरायन्थ्स आदित्यानन्वाक्रमत ते द्विदेवत्यान्प्रापद्यन्त तान्न प्रति
प्रायच्छन्तस्मादपि वध्यं प्रपन्नं न प्रति प्र यच्छन्ति तस्माद्द्विदेवत्येभ्य आदित्यो
निर्गृह्यते यदुच्छेषणादजायन्त तस्मादुच्छेषणाद्गृह्यते तिसृभिर्ऋग्भिर्गृह्णाति माता पिता
पुत्रस्तदेव तन्मिथुनमुल्बं गर्भो जरायु तदेव त
२१ न्मिथुनं पशवो वा एते यदादित्य ऊर्ग्दधि दध्ना मध्यतः श्रीणात्यूर्जमेव पशूनां मध्यतो
दधाति शृतातङ्क्येन मेध्यत्वाय तस्मादामा पक्वं दुहे पशवो वा एते यदादित्यः परिश्रित्य
गृह्णाति प्रतिरुध्यैवास्मै पशून्गृह्णाति पशवो वा एते यदादित्य एष रुद्रो यदग्निः परिश्रित्य
गृह्णाति रुद्रादेव पशूनन्तर्दधा
२२ त्येष वै विवस्वानादित्यो यदुपाꣳशुसवनः स एतमेव सोमपीथं परि शय आ
तृतीयसवनाद्विवस्व आदित्यैष ते सोमपीथ इत्याह विवस्वन्तमेवादित्यꣳ सोमपीथेन
समर्धयति या दिव्या वृष्टिस्तया त्वा श्रीणामीति वृष्टिकामस्य श्रीणीयाद्वृष्टिमेवाव रुंधे
यदि ताजक् प्र स्कन्देद्वर्षुकः पर्जन्यः स्याद्यदि चिरमवर्षुको न सादयत्यसन्नाद्धि प्रजाः
प्रजायन्ते नानु वषट्करोति यदनुवषट्कुर्याद्रुद्रं प्रजा अन्ववसृजेन्न हुत्वान्वीक्षेत यदन्वीक्षेत
चक्षुरस्य प्रमायुकग्ग् स्यात्तस्मान्नान्वीक्ष्यः ॥ ६। ५। ६॥
एव यज्ञाज्जरायु तदेव तदन्तर्दधाति न सप्तविꣳशतिश्च ॥ ६। ५। ६॥
२३ अन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति प्रजापतिर्वा एष यदाग्रयणः प्रजानां
प्रजननाय न सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट्करोति यदनुवषट्कुर्याद्रुद्रं
प्रजा अन्ववसृजेदेष वै गायत्रो देवानां यथ्सवितैष गायत्रियै लोके गृह्यते यदाग्रयणो
यदन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति स्वादेवैनं योनेर्निर्गृह्णाति विश्वे
२४ देवास्तृतीयꣳ सवनं नोदयच्छन्ते सवितारं प्रातःसवनभागꣳ सन्तं तृतीयसवनमभि

पर्यणयन्ततो वै ते तृतीयꣳ सवनमुदयच्छन्, यत्तृतीयसवने सावित्रो गृह्यते तृतीयस्य
सवनस्योद्यत्यै सवितृपात्रेण वैश्वदेवं कलशाद्गृह्णाति वैश्वदेव्यो वै प्रजा वैश्वदेवः कलशः
सविता प्रसवानामीशे यथ्सवितृपात्रेण वैश्वदेवं कलशाद्गृह्णाति सवितृप्रसूत एवास्मै प्रजाः
प्र
२५ जनयति सोमे सोमममभि गृह्णाति रेत एव तद्दधाति सुशर्मासि सुप्रतिष्ठान इत्याह
सोमे हि सोमममभिगृह्णाति प्रतिष्ठित्या एतस्मिन्वा अपि ग्रहे मनुष्येभ्यो देवेभ्यः पितृभ्यः
क्रियते सुशर्मासि सुप्रतिष्ठान इत्याह मनुष्येभ्य एवैतेन करोति बृहदित्याह देवेभ्य एवैतेन
करोति नम इत्याह पितृभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो
गृह्णात्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येषः ॥ ६। ५। ७॥ विश्वे प्र
पितृभ्य एवैतेन करोत्येकान्न विꣳशतिश्च ॥ ६। ५। ७॥
२६ प्राणो वा एष यदुपाꣳशुर्यदुपाꣳशुपात्रेण प्रथमश्चोत्तमश्च ग्रहौ गृह्येते प्राणमेवानु
प्रयन्ति प्राणमनूद्यन्ति प्रजापतिर्वा एष यदाग्रयणः प्राण उपाꣳशुः पत्नीः प्रजाः प्र
जनयन्ति यदुपाꣳशुपात्रेण पात्नीवतमाग्रयणाद्गृह्णाति प्रजानां प्रजननाय तस्मात्प्राणं
प्रजा अनु प्र जायन्ते देवा वा इत इतः पत्नीः सुवर्गं
२७ लोकमजिगाꣳसन्ते सुवर्गं लोकं न प्राजानन्त एतं पात्नीवतमपश्यन्तमगृह्णत ततो
वै ते सुवर्गं लोकं प्राजानन्, यत्पात्नीवतो गृह्यते सुवर्गस्य लोकस्य प्रज्ञात्यै स सोमो
नातिष्ठत स्त्रीभ्यो गृह्यमाणस्तं घृतं वज्रं कृत्वाघ्नन्तं निरिन्द्रियं भूतमगृह्णन्तस्मात्स्त्रियो
निरिन्द्रिया अदायादीरपि पापात्पुꣳस उपस्तितरं
२८ वदन्ति यद्धृतेन पात्नीवतग्ग् श्रीणाति वज्रेणैवैनं वशे कृत्वा गृह्णात्युपयामगृहीतोऽसीत्याहेयं
वा उपयामस्तस्मादिमां प्रजा अनु प्र जायन्ते बृहस्पतिसुतस्य त इत्याह ब्रह्म वै
देवानां बृहस्पतिर्ब्रह्मणैवास्मै प्रजाः प्र जनयतीन्दो इत्याह रेतो वा इन्दू रेत एव
तद्दधातीन्द्रियाव इ
२९ त्याह प्रजा वा इंद्रियं प्रजा एवास्मै प्र जनयत्यग्ना ३ इत्याहाग्निर्वै रेतोधाः पत्नीव
इत्याह मिथुनत्वाय सजूर्देवेन त्वष्ट्रा सोमं पिबेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ
रूपकृद्रूपमेव पशुषु दधाति देवा वै त्वष्टारमजिघाꣳसन्थ्स पत्नीः प्रापद्यत तं न प्रति
प्रायच्छन्तस्मादपि
३० वध्यं प्रपन्नं न प्रति प्र यच्छन्ति तस्मात्पात्नीवते त्वष्टेऽपि गृह्यते न
सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट्करोति यदनुवषट्कुर्याद्रुद्रं प्रजा अन्ववसृजेद्यन्नानु

वषट्कुर्यादशान्तमग्नीध्सोमं भक्षयेदुपाग्श्वनु वषट्करोति न रुद्रं प्रजा अन्ववसृजति शान्तमग्नीध्सोमं भक्षयत्यग्नीन्नेष्टुरुपस्थमा सीद

३१ नेष्टः पत्नीमुदानयेत्याहाग्नीदेव नेष्टरि रेतो दधाति नेष्टा पत्नियामुद्गात्रा सं ख्यापयति प्रजापतिर्वा एष यदुद्गाता प्रजानां प्रजननायाप उप प्र वर्तयति रेत एव तथ्सिश्चत्यूरुणोप प्र वर्तयत्यूरुणा हि रेतः सिच्यते नग्नं कृत्योरुमुप प्र वर्तयति यदा हि नग्न ऊरुर्भवत्यथ मिथुनी भवतोऽथ रेतः सिच्यतेऽथ प्रजाः प्र जायन्ते ॥ ६। ५। ८॥

पत्नीः सुवर्गमुपस्तितरमिन्द्रियाव इत्यपि सीद मिथुन्यष्टौ च ॥ ६। ५। ८॥

३२ इन्द्रो वृत्रमहन्तस्य शीर्षकपालमुदौब्जथ्स द्रोणकलशोऽभवत् तस्माथ्सोमः समस्रवथ्स हारियोजनोऽभवत्तं व्यचिकिथ्सञ्जुहवानी ३ मा हौषा ३ मिति सोऽमन्यत यद्धोष्याम्याम२ँ होष्यामि यन्न होष्यामि यज्ञवेशसं करिष्यामीति तमध्रियत होतु२ँ सोऽग्निरब्रवीन्न मय्याम२ँ होष्यसीति तं धानाभिरश्रीणात्

३३ त२ँ शृतं भूतमजुहोद्यद्धानाभिर् हारियोजनग्ग् श्रीणाति शृतत्वाय शृतमेवैनं भूतं जुहोति बह्वीभिः श्रीणात्येतावतीरेवास्यामुष्मि३२ँ ल्लोके कामदुघा भवन्त्यथो खल्वाहुरेता वा इन्द्रस्य पृश्नयः कामदुघा यद्धारियोजनीरिति तस्माद्बह्वीभिः श्रीणीयादृक्सामे वा इंद्रस्य हरी सोमपानौ तयोः परिधय आधानं यदप्रहृत्य परिधीञ्जुहुयादन्तराधानाभ्यां

३४ घासं प्र यच्छेत्प्रहृत्य परिधीञ्जुहोति निराधानाभ्यामेव घासं प्र यच्छत्युन्नेता जुहोति यातयामेव ह्येतर्ह्यध्वर्युः स्वगाकृतो यदध्वर्युर्जुहुयाद्यथा विमुक्तं पुनर्युनक्ति तादृगेव तच्छीर्षन्नधि निधाय जुहोति शीर्षतो हि स समभवद्विक्रम्य जुहोति विक्रम्य हीन्द्रो वृत्रमहन्थ्समृद्ध्यै पशवो वै हारियोजनीर्यथ्सं भिन्द्यादल्पा

३५ एनं पशवो भुञ्जन्त उप तिष्ठेरन्, यन्न संभिन्द्याद्बहव एनं पशवोऽभुञ्जन्त उप तिष्ठेरन्मनसा संबाधत उभयं करोति बहव एवैनं पशवो भुञ्जन्त उप तिष्ठन्त उन्नेतर्युपहवमिच्छन्ते य एव तत्र सोमपीथस्तमेवाव रुंधत उत्तरवेद्यां नि वपति पशवो वा उत्तरवेदिः पशवो हारियोजनीः पशुष्वेव पशून्प्रति ष्ठापयन्ति ॥

६। ५। ९॥ अश्रीणादन्तराधानाभ्यामल्पाः स्थापयन्ति ॥ ६। ५। ९॥

३६ ग्रहान्, वा अनु प्रजाः पशवः प्र जायन्त उपाग्श्वन्तर्यामावजावयः शुक्रामन्थिनौ पुरुषा ऋतुग्रहानेकशफा आदित्यग्रहं गाव आदित्यग्रहो भूयिष्ठाभिर्ऋग्भिर्गृह्यते तस्माद्गावः पशूनां भूयिष्ठा यत्त्रिरुपा२ँशु२ँ हस्तेन विगृह्णाति तस्माद्द्वौ त्रीनजा जनयत्यथावयो भूयसीः पिता

वा एष यदाग्रयणः पुत्रः कलशो यदाग्रयण उपदस्येत्कलशाद्गृह्णीयाद्यथा पिता
३७ पुत्रं क्षित उपधावति तादृगेव तद्यत्कलश उपदस्येदाग्रयणाद्गृह्णीयाद्यथा पुत्रः पितरं क्षित उपधावति तादृगेव तदात्मा वा एष यज्ञस्य यदाग्रयणो यद्ग्रहो वा कलशो वोपदस्येदाग्रयणाद्गृह्णीयादात्मन एवाधि यज्ञं निष्करोत्यविज्ञातो वा एष गृह्यते यदाग्रयणः स्थाल्या गृह्णाति वायव्येन जुहोति तस्माद्
३८ गर्भेणाविज्ञातेन ब्रह्महावभृथम वयन्ति परा स्थालीरस्यन्त्युद्वायव्यानि हरन्ति तस्माथ्स्त्रियं जातां परास्यन्त्युत्पुमाँसꣳ हरन्ति यत्पुरोरुचमाह यथा वस्यस आहरति तादृगेव तद्यद्ग्रहं गृह्णाति यथा वस्यस आहृत्य प्राह तादृगेव तद्यथ्सादयति यथा वस्यस उपनिधायापक्रामति तादृगेव तद्यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्यदृचा तद्दृढं पुरस्तादुपयामा यजुषा गृह्यन्त उपरिष्टादुपयामा ऋचा यज्ञस्य धृत्यै ॥ ६। ५। १०॥
यथा पिता तस्मादपक्रामति तादृगेव तद्यदष्टादश च ॥ ६। ५। १०॥
३९ प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्तेऽमुमेव तैर्लोकमभि जयति पराङिव ह्यसौ लोको यानि पुनः प्रयुज्यन्त इममेव तैर्लोकमभि जयति पुनःपुनरिव ह्ययं लोकः प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वोषधयः परा भवन्ति यानि पुनः
४० प्रयुज्यन्ते तान्यन्वोषधयः पुनरा भवन्ति प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वारण्याः पशवोऽरण्यमप यन्ति यानि पुनः प्रयुज्यन्ते तान्यनु ग्राम्याः पशवो ग्राममुपावयन्ति यो वै ग्रहाणां निदानं वेद निदानवान्भवत्याज्यमित्युक्थं तद्वै ग्रहाणां निदानं यदुपाꣳशु शꣳसति त
४१ दुपाग्श्वन्तर्यामयोर्यदुच्चैस्तदितरेषां ग्रहाणामेतद्वै ग्रहाणां निदानं य एवं वेद निदानवान्भवति यो वै ग्रहाणां मिथुनं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते स्थालीभिरन्ये ग्रहा गृह्यन्ते वायव्यैरन्य एतद्वै ग्रहाणां मिथुनं य एवं वेद प्र प्रजया पशुभिर्मिथुनैर्जायत इन्द्रस्त्वष्टुः सोममभीषहापिबथ्स विष्वङ्
४२ व्यार्च्छथ्स आत्मन्नारमणं नाविन्दथ्स एताननुसवनं पुरोडाशानपश्यत्तान्निरवपत्तैर्वै स आत्मन्नारमणमकुरुत तस्मादनुसवनं पुरोडाशा निरुप्यन्ते तस्मादनुसवनं पुरोडाशानां प्राश्नीयादात्मन्नेवारमणं कुरुते नैनꣳ सोमोऽति पवते ब्रह्मवादिनो वदन्ति नर्चा न यजुषा पङ्क्तिराप्यतेऽथ किं यज्ञस्य पाङ्क्तत्वमिति धानाः करंभः परिवापः पुरोडाशः पयस्या तेन

पङ्क्तिराप्यते तद्यज्ञस्य पाङ्क्तत्वम् ॥ ६। ५। ११॥ भवन्ति यानि पुनः शꣳसति तद्विष्वङ्किं चतुर्दश च ॥ ६। ५। ११॥
इन्द्रो वृत्रायायुर्वै यज्ञेन सुवर्गायेन्द्रो मरुद्भिरदितिरन्तर्याम पात्रेण प्राण उपाꣳशुपात्रेणेन्द्रो वृत्रमहन्तस्य ग्रहान्प्रान्यान्येकादश ॥
इन्द्रो वृत्राय पुनर् ऋतुनाह मिथुनं पशवो नेष्टः पत्नीमुपाग्श्वन्तर्यामयोर्द्वि चत्वारिꣳशत् ॥
इन्द्रो वृत्राय पाङ्क्तत्वम् ॥

## षष्ठकाण्डे षष्ठः प्रश्नः ६

१ सुवर्गाय वा एतानि लोकाय हूयन्ते यद्दाक्षिणानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवा क्रमते सदोऽभ्यैति सुवर्गमेवैनं लोकं गमयति सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोत्यमुमेवैनं लोकꣳ समारोहयति नयवत्यर्चाग्नीध्रे जुहोति सुवर्गस्य लोकस्याभिनीत्यै दिवं गच्छ सुवः पतेति हिरण्यꣳ
२ हुत्वोद्गृह्णाति सुवर्गमेवैनं लोकं गमयति रूपेण वो रूपमभ्यैमीत्याह रूपेण ह्यासाꣳ रूपमभ्यैति यद्धिरण्येन तुथो वो विश्ववेदा वि भजत्वित्याह तुथो ह स्म वै विश्ववेदा देवानां दक्षिणा वि भजति तेनैवैना वि भजत्येतत्ते अग्ने राध
३ ऐति सोमच्युतमित्याह सोमच्युतग्ग् ह्यस्य राध ऐति तन्मित्रस्य पथा नयेत्याह शान्त्या ऋतस्य पथा प्रेत चन्द्रदक्षिणा इत्याह सत्यं वा ऋतꣳ सत्येनैवैना ऋतेन वि भजति यज्ञस्य पथा सुविता नयन्तीरित्याह यज्ञस्य ह्येताः पथा यन्ति यद्दक्षिणा ब्राह्मणमद्य राध्यास
४ मृषिमार्षेयमित्याहैष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवान्तस्मादेवमाह वि सुवः पश्य व्यन्तरिक्षमित्याह सुवर्गमेवैनं लोकं गमयति यतस्व सदस्यैरित्याह मित्रत्वायास्मद्दात्रा देवत्रा गच्छत मधुमतीः प्र दातारमा विशतेत्याह वयमिह प्रदातारः स्मोऽस्मानमुत्र मधुमतीरा विशतेति
५ वावैतदाह हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिरेव पुरस्ताद्धत्ते सुवर्गस्य लोकस्यानुख्यात्या अग्नीधे ददात्यग्निमुखानेवर्तून्प्रीणाति ब्रह्मणे ददाति प्रसूत्यै होत्रे ददात्यात्मा वा एष यज्ञस्य यद्धोतात्मानमेव यज्ञस्य दक्षिणाभिः समर्धयति ॥
६। ६। १॥ हिरण्यꣳ राधो राध्यासममुत्र मधुमतीरा विशतेत्यष्टात्रिꣳशच्च ॥ ६। ६। १॥

६ समिष्टयजूꣳषि जुहोति यज्ञस्य समिष्ट्यै यद्वै यज्ञस्य क्रूरं यद्विलिष्टं यदत्येति यन्नात्येति यदतिकरोति यन्नापि करोति तदेव तैः प्रीणाति नव जुहोति नव वै पुरुषे प्राणाः पुरुषेण यज्ञः सं मितो यावानेव यज्ञस्तं प्रीणाति षड्ग्मियाणि जुहोति षड्वा ऋतव ऋतूनेव प्रीणाति त्रीणि यजूꣳषि
७ त्रय इमे लोका इमानेव लोकान्प्रीणाति यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छेत्याह यज्ञपतिमेवैनं गमयति स्वां योनिं गच्छेत्याह स्वामेवैनं योनिं गमयत्येष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीर इत्याह यजमान एव वीर्यं दधाति वासिष्ठो ह सात्यहव्यो देवभागं पप्रच्छ यथ्सृञ्जयान्बहुयाजिनोऽयीयजो यज्ञे
८ यज्ञं प्रत्यतिष्ठिपा ३ यज्ञपता ३ विति स होवाच यज्ञपताविति सत्याद्वै सृञ्जयाः परा बभूवुरिति होवाच यज्ञे वाव यज्ञः प्रतिष्ठाप्य आसीद्यजमानस्यापराभावायेति देवा गातुविदो गातुं वित्त्वा गातुमितेत्याह यज्ञ एव यज्ञं प्रति ष्ठापयति यजमानस्यापराभावाय ॥ ६। ६। २॥ यजूꣳषि यज्ञ एकचत्वारिꣳशच्च ॥ ६। ६। २॥
९ अवभृथयजूꣳषि जुहोति यदेवार्वाचीनमेकहायनादेनः करोति तदेव तैरव यजतेऽपोऽवभृथमवैत्यप्सु वै वरुणः साक्षादेव वरुणमव यजते वर्त्मना वा अन्वित्य यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति साम्ना प्रस्तोतान्ववैति साम वै रक्षोहा रक्षसामपहत्यै त्रिर्निधनमुपैति त्रय इमे लोका एभ्य एव लोकेभ्यो रक्षाग्
१० स्यप हन्ति पुरुषः पुरुषो निधनमुपैति पुरुषः पुरुषो हि रक्षस्वी रक्षसामपहत्या उरुꣳ हि राजा वरुणश्चकारेत्याह प्रतिष्ठित्यै शतं ते राजन्भिषजः सहस्रमित्याह भेषजमेवास्मै करोत्यभिष्ठितो वरुणस्य पाश इत्याह वरुणपाशमेवाभि तिष्ठति बर्हिरभि जुहोत्याहुतीनां प्रतिष्ठित्या अथो अग्निवत्येव जुहोत्यपबर्हिषः प्रयाजान्
११ यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चत्याज्यभागौ यजति यज्ञस्यैव चक्षुषी नान्तरेति वरुणं यजति वरुणपाशादेवैनं मुञ्चत्यग्नीवरुणौ यजति साक्षादेवैनं वरुणपाशान्मुञ्चत्यपबर्हिषावनूयाजौ यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चति चतुरः प्रयाजान्, यजति द्वावनूयाजौ षट्थ्सं पद्यन्ते षड्वा ऋतव
१२ ऋतुष्वेव प्रति तिष्ठत्यवभृथ निचङ्कुणेत्याह यथोदितमेव वरुणमव यजते समुद्रे ते हृदयमप्स्वन्तरित्याह समुद्रे ह्यन्तर्वरुणः सं त्वा विशन्त्वोषधीरुताप इत्याहाद्भिरेवैनमोषधीभिः सम्यञ्चं दधाति देवीराप एष वो गर्भ इत्याह

यथायजुरेवैतत्पशवो वै
१३ सोमो यद्भिन्दूनां भक्षयेत्पशुमान्थ्स्याद्वरुणस्त्वेनं गृह्णीयाद्यन्न भक्षयेदपशुः स्यान्नैनं वरुणो गृह्णीयादुपस्पृश्यमेव पशुमान्भवति नैनं वरुणो गृह्णाति प्रतियुतो वरुणस्य पाश इत्याह वरुणपाशादेव निर्मुच्यतेऽप्रतीक्षमा यन्ति वरुणस्यान्तर्हित्या एधोऽस्येधिषीमहीत्याह समिधैवाग्निं नमस्यन्त उपायन्ति तेजोऽसि तेजो मयि धेहीत्याह तेज एवात्मन्धत्ते ॥ ६। ६। ३॥ रक्षाꣳसि प्रयाजानृतवो वै नमस्यन्तो द्वादश च ॥ ६। ६। ३॥
१४ स्फ्येन वेदिमुद्धन्ति रथाक्षेण वि मिमीते यूपं मिनोति त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्यै यदन्तर्वेदि मिनुयाद्देवलोकमभि जयेद्यद्बहिर्वेदि मनुष्यलोकं वेद्यन्तस्य संधौ मिनोत्युभयोर्लोकयोरभिजित्या उपर सं मितां मिनुयात्पितृलोककामस्य रशन सं मितां मनुष्यलोककामस्य चषाल सं मितामिन्द्रियकामस्य सर्वान्थ्समान्प्रतिष्ठा कामस्य ये त्रयो मध्यमास्तान्थ्समान्पशुकामस्यैतान्, वा
१५ अनु पशव उप तिष्ठन्ते पशुमानेव भवति व्यतिषजेदितरान्प्रजयैवैनं पशुभिर्व्यतिषजति यं कामयेत प्रमायुकः स्यादिति गर्तमितं तस्य मिनुयादुत्तरार्ध्यं वर्षिष्ठमथ ह्रसीयाꣳसमेषा वै गर्तमिद्यस्यैवं मिनोति ताजक्प्र मीयते दक्षिणार्ध्यं वर्षिष्ठं मिनुयाथ्सुवर्गकामस्याथ ह्रसीयाꣳसमाक्रमणमेव तथ्सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै
१६ यदेकस्मिन्, यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते यन्नैकाꣳ रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दते यं कामयेत स्त्र्यस्य जायेतेत्युपान्ते तस्य व्यतिषजेथ्स्त्र्येवास्य जायते यं कामयेत पुमानस्य जायेतेत्यान्तं तस्य प्र वेष्टयेत्पुमानेवास्य
१७ जायतेऽसुरा वै देवान्दक्षिणत उपानयन्तान्देवा उपशयेनैवापानुदन्त तदुपशयस्योपशयत्वं यद्दक्षिणत उपशय उपशये भ्रातृव्यापनुत्त्यै सर्वे वा अन्ये यूपाः पशुमन्तोऽथोपशय एवापशुस्तस्य यजमानः पशुर्यन्न निर्दिशेदार्तिमार्च्छेद्यजमानोऽसौ ते पशुरिति निर्दिशेद्यं द्विष्याद्यमेव
१८ द्वेष्टि तमस्मै पशुं निर्दिशति यदि न द्विष्यादाखुस्ते पशुरिति ब्रूयान्न ग्राम्यान्पशून् हिनस्ति नारण्यान्प्रजापतिः प्रजा असृजत सोऽन्नाद्येन व्यार्ध्यत स एतामेकादशिनीमपश्यत्तया वै सोऽन्नाद्यमवारुंध यद्दश यूपा भवन्ति दशाक्षरा विराडन्नं

विराड्विराजैवान्नाद्यमव रुंधे
१९ य एकादशः स्तन एवास्यै स दुह एवैनां तेन वज्रो वा एषा सं मीयते यदेकादशिनी सेश्वरा पुरस्तात्प्रत्यञ्चं यज्ञꣳ सं मर्दितोर्यत्पात्नीवतं मिनोति यज्ञस्य प्रत्युत्तब्ध्यै सयत्वाय ॥ ६। ६। ४॥ वै समष्ट्यै पुमानेवास्य यमेव रुन्धे त्रिꣳशच्च ॥ ६। ६। ४॥
२० प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एतामेकादशिनीमपश्यत्तया वै स आयुरिंद्रियं वीर्यमात्मन्नधत्त प्रजा इव खलु वा एष सृजते यो यजते स एतर्हि रिरिचान इव यदेषैकादशिनी भवत्यायुरेव तयेंद्रियं वीर्यं यजमान आत्मन्धत्ते प्रैवाग्नेयेन वापयति मिथुनꣳ सारस्वत्या करोति रेतः
२१ सौम्येन दधाति प्र जनयति पौष्णेन बार्हस्पत्यो भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै प्रजाः प्र जनयति वैश्वदेवो भवति वैश्वदेव्यो वै प्रजाः प्रजा एवास्मै प्र जनयतीन्द्रियमेवैन्द्रेणाव रुंधे विशं मारुतेनौजो बलमैन्द्राग्नेन प्रसवाय सावित्रो निर्वरुणत्वाय वारुणो मध्यत ऐन्द्रमा लभते मध्यत एवेन्द्रियं यजमाने दधाति
२२ पुरस्तादैन्द्रस्य वैश्वदेवमा लभते वैश्वदेवं वा अन्नमन्नमेव पुरस्ताद्धत्ते तस्मात्पुरस्तादन्नमद्यत ऐन्द्रमालभ्य मारुतमा लभते विड्वै मरुतो विशमेवास्मा अनु बध्नाति यदि कामयेत योऽवगतः सोऽप रुध्यतां योऽपरुद्धः सोऽव गच्छत्वित्यैन्द्रस्य लोके वारुणमा लभेत वारुणस्य लोक ऐन्द्रं
२३ य एवावगतः सोऽप रुध्यते योऽपरुद्धः सोऽव गच्छति यदि कामयेत प्रजा मुह्येयुरिति पशून्व्यतिषजेत्प्रजा एव मोहयति यदभिवाहतोऽपां वारुणमालभेत प्रजा वरुणो गृह्णीयाद्दक्षिणत उदञ्चमा लभतेऽपवाहतोऽपां प्रजानामवरुणग्राहाय ॥ ६। ६। ५॥ रेतो यजमाने दधाति लोक ऐन्द्रꣳ सप्त त्रिꣳशच्च ॥ ६। ६। ५॥
२४ इन्द्रः पत्निया मनुमयाजयत्तां पर्यग्निकृतामुदसृजत्तया मनुरार्ध्नोद्यत्पर्यग्निकृतं पात्नीवतमुथ्सृजति यामेव मनुरृद्धिमार्ध्नोत्तामेव यजमान ऋध्नोति यज्ञस्य वा अप्रतिष्ठिताद्यज्ञः परा भवति यज्ञं पराभवन्तं यजमानोऽनु परा भवति यदाज्येन पात्नीवतꣳ सग्ग्स्थापयति यज्ञस्य प्रतिष्ठित्यै यज्ञं प्रतितिष्ठन्तं यजमानोऽनु प्रति तिष्ठतीष्टं वपया
२५ भवत्यनिष्टं वशयाथ पात्नीवतेन प्र चरति तीर्थ एव प्र चरत्यथो एतर्ह्येवास्य यामस्त्वाष्ट्रो भवति त्वष्टा वै रेतसः सिक्तस्य रूपाणि वि करोति तमेव वृषाणं पत्नीष्वपि

सृजति सोऽस्मै रूपाणि वि करोति ॥ ६। ६। ६॥ वपया षट् त्रिꣳशच्च ॥ ६। ६। ६॥
२६ घ्नन्ति वा एतथ्सोमं यदभिषुण्वन्ति यथ्सौम्यो भवति यथा मृतायानुस्तरणीं घ्नन्ति तादृगेव तद्यदुत्तरार्धे वा मध्ये वा जुहुयाद्देवताभ्यः समदं दध्याद्दक्षिणार्धे जुहोत्येषा वै पितृणां दिक्स्वायामेव दिशि पितृन्निरवदयत उद्गातृभ्यो हरन्ति सामदेवत्यो वै सौम्यो यदेव साम्नश्छंबद्कुर्वन्ति तस्यैव स शान्तिरवै
२७ क्षन्ते पवित्रं वै सौम्य आत्मानमेव पवयन्ते य आत्मानं न परिपश्येदितासुः स्यादभिदर्दिं कृत्वावेक्षेत तस्मिन्, ह्यात्मानं परिपश्यत्यथो आत्मानमेव पवयते यो गतमनाः स्याथ्सोऽवेक्षेत यन्मे मनः परागतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसीति मन एवात्मन्दाधार
२८ न गतमना भवत्यप वै तृतीयसवने यज्ञः क्रामतीजानादनीजानमभ्याग्नावैष्णव्यर्चा घृतस्य यजत्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं च दाधारोपाꣳशु यजति मिथुनत्वाय ब्रह्मवादिनो वदन्ति मित्रो यज्ञस्य स्विष्टं युवते वरुणो दुरिष्टं क्व तर्हि यज्ञः क्व यजमानो भवतीति यन्मैत्रावरुणीं वशामालभते मित्रेणैव
२९ यज्ञस्य स्विष्टꣳ शमयति वरुणेन दुरिष्टं नार्तिमार्च्छति यजमानो यथा वै लाङ्गलेनोर्वरां प्रभिन्दन्त्येवमृक्सामे यज्ञं प्र भिन्तो यन्मैत्रावरुणीं वशामालभते यज्ञायैव प्रभिन्नाय मत्यमन्ववास्यति शान्त्यै यातयामानि वा एतस्य छन्दाꣳसि य ईजानश्छंदसामेष रसो यद्वशा यन्मैत्रावरुणीं वशामालभते छन्दाग्स्येव पुनरा प्रीणात्ययातयामत्वायाथो छंदस्स्वेव रसं दधाति ॥
६। ६। ७॥ अव दाधार मित्रेणैव प्रीणाति षट् च ॥ ६। ६। ७॥
३० देवा वा इंद्रियं वीर्यं ऽअ व्यभजन्त ततो यदत्यशिष्यत तदति ग्राह्या अभवन्तदति ग्राह्याणामति ग्राह्यत्वं यदति ग्राह्या गृह्यन्त इन्द्रियमेव तद्वीर्यं यजमान आत्मन्धत्ते तेज आग्नेयेनेन्द्रियमैन्द्रेण ब्रह्मवर्चसꣳ सौर्येणोपस्तंभनं वा एतद्यज्ञस्य यदतिग्राह्याश्चक्रे पृष्ठानि यत्पृष्ठ्ये न गृह्णीयात्प्राञ्चं यज्ञं पृष्ठानि सꣳ श‍ृणीयुर्यदुक्थ्ये
३१ गृह्णीयात्प्रत्यञ्चं यज्ञमति ग्राह्याः सꣳ श‍ृणीयुर्विश्वजिति सर्वपृष्ठे ग्रहीतव्या यज्ञस्य सवीर्यत्वाय प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशथ्स प्रियास्तनूरप न्यधत्त तदतिग्राह्या अभवन्वितनुस्तस्य यज्ञ इत्याहुर्यस्यातिग्राह्या न गृह्यन्त इत्यप्यग्निष्टोमे ग्रहीतव्या यज्ञस्य सतनुत्वाय देवता वै सर्वाः सदृशीरासन्ता न व्यावृतमगच्छन्ते देवा

३२ एत एतान्ग्रहानपश्यन्तानगृह्णताग्नेयमग्निरैन्द्रमिन्द्रः सौर्यꣳ सूर्यस्ततो वै तेऽन्याभिर्देवताभिर्व्यावृतमगच्छन्, यस्यैवं विदुष एते ग्रहा गृह्यन्ते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छतीमे लोका ज्योतिष्मन्तः समावद्वीर्याः कार्या इत्याहुराग्नेयेनास्मि३ꣳल्लोके ज्योतिर्धत्त ऐन्द्रेणान्तरिक्ष इन्द्रवायू हि सयुजौ सौर्येणामुष्मि३ꣳल्लोके

३३ ज्योतिर्धत्ते ज्योतिष्मन्तोऽस्मा इमे लोका भवन्ति समावद्वीर्यानेनान्कुरुत एतान्, वै ग्रहान्बंबाविश्ववयसाववित्तां ताभ्यामिमे लोकाः पराञ्चश्चार्वाञ्चश्च प्राभुर्यस्यैवं विदुष एते ग्रहा गृह्यन्ते प्रास्मा इमे लोकाः पराञ्चश्चार्वाञ्चश्च भान्ति ॥ ६। ६। ८॥ उक्थ्ये देवा अमुष्मि३ꣳल्लोक एकान्न चत्वारिꣳशच्च ॥ ६। ६। ८॥

३४ देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा अदाभ्ये छन्दाꣳसि सवनानि समस्थापयन्ततो देवा अभवन्परासुरा यस्यैवं विदुषोऽदाभ्यो गृह्यते भवत्यात्मना परास्य भ्रातृव्यो भवति यद्वै देवा असुरानदाभ्येनादभ्नुवन्तददाभ्यस्यादाभ्यत्वं य एवं वेद दभ्नोत्येव भ्रातृव्यं नैनं भ्रातृव्यो दभ्नोत्ये

३५ षा वै प्रजापतेरति मोक्षिणी नाम तनूर्यददाभ्य उपनद्धस्य गृह्णात्यतिमुक्त्या अतिपाप्मानं भ्रातृव्यं मुच्यते य एवं वेद घ्नन्ति वा एतथ्सोमं यदभिषुण्वन्ति सोमे हन्यमाने यज्ञो हन्यते यज्ञे यजमानो ब्रह्मवादिनो वदन्ति किं तद्यज्ञे यजमानः कुरुते येन जीवन्थ्सुवर्गं लोकमेतीति जीवग्रहो वा एष यददाभ्योऽनभिषुतस्य गृह्णाति जीवन्तमेवैनꣳ सुवर्गं लोकं गमयति वि वा एतद्यज्ञं छिन्दन्ति यददाभ्ये स२ꣳस्थापयन्त्यꣳशूनपि सृजति यज्ञस्य संतत्यै ॥

६। ६। ९॥ दभ्नोत्यनभिषुतस्य गृह्णात्येकान्न विꣳशतिश्च ॥ ६। ६। ९॥

३६ देवा वै प्रबाहुग्ग्रहानगृह्णत स एतं प्रजापतिरꣳशुमपश्यत् तमगृह्णीत तेन वै स आर्ध्नोद्यस्यैवं विदुषोऽꣳशुर्गृह्यत ऋध्नोत्येव सकृदभिषुतस्य गृह्णाति सकृद्धि स तेनाऽर्ध्नोन्मनसा गृह्णाति मन इव हि प्रजापतिः प्रजापतेराप्त्या औदुंबरेण गृह्णात्यूर्ग्वा उदुंबर ऊर्जमेवाव रुंधे चतुः स्रक्ति भवति दिक्ष्वे

३७ व प्रति तिष्ठति यो वा अꣳशोरायतनं वेदायतनवान्भवति वामदेव्यमिति साम तद्वा अस्यायतनं मनसा गायमानो गृह्णात्यायतनवानेव भवति यदध्वर्युरꣳशुं गृह्णन्नार्धयेदुभाभ्यां नर्ध्येताध्वर्यवे च यजमानाय च यदर्धयेदुभाभ्यामृध्येतानवानं गृह्णाति सैवास्यर्द्धिर्हिरण्यमभि व्यनित्यमृतं वै हिरण्यमायुः प्राण आयुषैवामृतमभि धिनोति

शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति ॥ ६। ६। १०॥
दिक्ष्वनिति विꣳशतिश्च ॥ ६। ६। १०॥

३८ प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशथ्स रिरिचानोऽमन्यत स यज्ञानाꣳ षोडशधेंद्रियं वीर्यमात्मानमभि समक्खिदत् तत्षोडश्यभवन्न वै षोडशी नाम यज्ञोऽस्ति यद्वाव षोडशग्ग् स्तोत्रꣳ षोडशꣳ शस्त्रं तेन षोडशी तथ्षोडशिनः षोडशित्वं यथ्षोडशी गृह्यत इन्द्रियमेव तद्वीर्यं यजमान आत्मन्धत्ते देवेभ्यो वै सुवर्गो लोको

३९ न प्राभवत्त एतꣳ षोडशिनमपश्यन्तमगृह्णत ततो वै तेभ्यः सुवर्गो लोकः प्राभवद्यथ्षोडशी गृह्यते सुवर्गस्य लोकस्याभिजित्या इन्द्रो वै देवानामानुजावर आसीथ्स प्रजापतिमुपाधावत्तस्मा एतꣳ षोडशिनं प्रायच्छत्तमगृह्णीत ततो वै सोऽग्रं देवतानां पर्यैद्यस्यैवं विदुषः षोडशी गृह्यते

४० ऽग्रमेव समानानां पर्येति प्रातःसवने गृह्णाति वज्रो वै षोडशी वज्रः प्रातःसवनग्ग् स्वादेवैनं योनेर्निर्गृह्णाति सवनेसवनेऽभि गृह्णाति सवनाथ्सवनादेवैनं प्र जनयति तृतीयसवने पशुकामस्य गृह्णीयाद्वज्रो वै षोडशी पशवस्तृतीयसवनं वज्रेणैवास्मै तृतीयसवनात्पशूनव रुंधे नोक्थ्ये गृह्णीयात्प्रजा वै पशव उक्थानि यदुक्थ्ये

४१ गृह्णीयात्प्रजां पशूनस्य निर्दहेदतिरात्रे पशुकामस्य गृह्णीयाद्वज्रो वै षोडशी वज्रेणैवास्मै पशूनवरुध्य रात्रियोपरिष्टाच्छमयत्यप्यग्निष्टोमे राजन्यस्य गृह्णीयाद्व्यावृत्कामो हि राजन्यो यजते साह्न एवास्मै वज्रं गृह्णाति स एनं वज्रो भूत्या इन्धे निर्वा दहत्येकविꣳशग्ग् स्तोत्रं भवति प्रतिष्ठित्यै हरिवच्छस्यत इन्द्रस्य प्रियं धामो

४२ पाप्नोति कनीयाꣳसि वै देवेषु छन्दाग्स्यासञ्ज्यायाग्स्यसुरेषु ते देवाः कनीयसा छंदसा ज्यायश्छन्दोऽभि व्यशꣳसन्ततो वै तेऽसुराणां लोकमवृञ्जत यत्कनीयसा छंदसा ज्यायश्छन्दोऽभि विशꣳसति भ्रातृव्यस्यैव तल्लोकं वृङ्क्ते षडक्षराण्यति रेचयन्ति षड्वा ऋतव ऋतूनेव प्रीणाति चत्वारि पूर्वाण्यव कल्पयन्ति

४३ चतुष्पद एव पशूनव रुंधे द्वे उत्तरे द्विपद एवाव रुंधेऽनुष्टुभमभि सं पादयन्ति वाग्वा अनुष्टुप्तस्मात्प्राणानां वागुत्तमा समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोत्येतस्मिन्वै लोक इन्द्रो वृत्रमहन्थ्साक्षादेव वज्रं भ्रातृव्याय प्र हरत्यरुणपिशङ्गोऽश्वो दक्षिणैतद्वै वज्रस्य रूपꣳ समृद्ध्यै ॥ ६। ६। ११॥ लोको विदुषः षोडशी गृह्यते यदुक्थ्ये धाम कल्पयन्ति सप्तचत्वारिꣳशच्च ॥ ६। ६। ११॥

सु॒व॒र्गाय॒ यद्दा᳚क्षि॒णानि॑ समिष्ट य॒जूग्ष्य॑वभृथ य॒जूꣳषि॒ स्फ्येन॑ प्र॒जाप॑तिरेकाद॒शिनी॒मिन्द्रः॒ पत्नि॑या॒ घ्नन्ति॑ दे॒वा वा इ॑न्द्रि॒यं वी॒र्यन्दे॒वा वा अदा᳚भ्ये दे॒वा वै प्र॒बा॑हुक्प्र॒जाप॑तिर्दे॒वेभ्यः॒ स रि॑रिचा॒नः षो॑डश॒धैका॑दश ॥

सु॒व॒र्गाय॑ यजति प्र॒जाः सौ॒म्येन॑ गृह्णी॒यात्प्र॒त्यञ्चं॑गृह्णी॒यात्प्र॒जां प॒शून्त्रिच॑त्वारिꣳशत् ॥

सु॒व॒र्गाय॒ वज्र॑स्य रू॒पꣳ समृ॑ध्यै ॥

इति षष्ठं काण्डं संपूर्णम् ६॥

॥ तैत्तिरीय-संहिता ॥

# तैत्तिरीय-संहिता

## ॥ सप्तमं काण्डम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### सप्तमकाण्डे प्रथमः प्रश्नः १

१ प्रजननं ज्योतिरग्निर्देवतानां ज्योतिर्विराड्छंदसां ज्योतिर्विराड्वाचोऽग्नौ सं तिष्ठते
विराजमभि सं पद्यते तस्मात्तज्ज्योतिरुच्यते द्वौ स्तोमौ प्रातःसवनं वहतो यथा
प्राणश्चापानश्च द्वौ माध्यंदिनꣳ सवनं यथा चक्षुश्च श्रोत्रं च द्वौ तृतीयसवनं यथा
वाक् च प्रतिष्ठा च पुरुष संमितो वा एष यज्ञोऽस्थूरि
२ यं कामं कामयते तमेतेनाभ्यश्नुते सर्वग्ग् ह्यस्थूरिणाभ्यश्नुतेऽग्निष्टोमेन वै प्रजापतिः
प्रजा असृजत ता अग्निष्टोमेनैव पर्यगृह्णात्तासां परिगृहीतानामश्वतरोऽत्य प्रवत
तस्यानुहाय रेत आदत्त तद्गर्दभे न्यमार्ट् तस्माद्गर्दभो द्विरेता अथो आहुर्वडबायां
न्यमार्डिति तस्माद्वडबा द्विरेता अथो आहुरोषधीषु
३ न्यमार्डिति तस्मादोषधयोऽनभ्यक्ता रेभन्त्यथो आहुः प्रजासु न्यमार्डिति तस्माद्यमौ
जायेते तस्मादश्वतरो न प्र जायत आत्तरेता हि तस्माद्बर्हिष्यनवक्लृप्तः सर्ववेदसे वा
सहस्रे वावक्लृप्तोऽति ह्यप्रवत य एवं विद्वानग्निष्टोमेन यजते प्राजाताः प्रजा जनयति
परि प्रजाता गृह्णाति तस्मादाहुर्ज्येष्ठयज्ञ इति
४ प्रजापतिर्वाव ज्येष्ठः स ह्येतेनाग्रेऽयजत प्रजापतिरकामयत प्र जायेयेति स
मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवतान्वसृज्यत गायत्री छन्दो रथंतरꣳ साम ब्राह्मणो
मनुष्याणामजः पशूनां तस्मात्ते मुख्या मुखतो ह्यसृज्यन्तोरसो बाहुभ्यां पञ्चदशं
निरमिमीत तमिन्द्रो देवतान्वसृज्यत त्रिष्टुप्छन्दो बृहत्
५ साम राजन्यो मनुष्याणामविः पशूनां तस्मात्ते वीर्यावन्तो वीर्याद्ध्यसृज्यन्त मध्यतः
सप्तदशं निरमिमीत तं विश्वे देवा देवता अन्वसृज्यन्त जगती छन्दो वैरूपꣳ साम
वैश्यो मनुष्याणां गावः पशूनां तस्मात्त आद्या अन्नधानाद्ध्यसृज्यन्त तस्माद्भूयाꣳसोऽन्येभ्यो

भूयिष्ठा हि देवता अन्वसृज्यन्त पत्त एकविꣳशं निरमिमीत तमनुष्टुप्छन्दो
६ ऽन्वसृज्यत वैराजꣳ साम शूद्रो मनुष्याणामश्वः पशूनां तस्मात्तौ भूतसंक्रामिणावश्वश्च
शूद्रश्च तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो न हि देवता अन्वसृज्यत तस्मात्पादावुप जीवतः
पत्तो ह्यसृज्येतां प्राणा वै त्रिवृदर्धमासाः पञ्चदशः प्रजापतिः सप्तदशस्त्रय इमे लोका
असावादित्य एकविꣳश एतस्मिन्वा एते श्रिता एतस्मिन्प्रतिष्ठिता य एवं वेदैतस्मिन्नेव
श्रयत एतस्मिन्प्रति तिष्ठति ॥ ७। १। १॥ अस्थूरिरोषधीषु ज्येष्ठयज्ञ इति बृहदनुष्टुप्छंदः
प्रतिष्ठिता नव च ॥ ७। १। १॥
७ प्रातःसवने वै गायत्रेण छंदसा त्रिवृते स्तोमाय ज्योतिर्दधदेति त्रिवृता
ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर्दधदेति पञ्चदशेनौजसा वीर्येण सप्तदशाय ज्योतिर्दधदेति
सप्तदशेन प्राजापत्येन प्रजननेनैकविꣳशाय ज्योतिर्दधदेति स्तोम एव तथ्स्तोमाय
ज्योतिर्दधदेत्यथो स्तोम एव स्तोममभि प्रणयति यावन्तो वै स्तोमास्तावन्तः
कामास्तावन्तो लोकास्तावन्ति ज्योतीꣳष्येतावत एव स्तोमानेतावतः कामानेतावतो
लोकानेतावन्ति ज्योतीꣳष्यव रुंधे ॥
७। १। २॥ तावन्तो लोकास्त्रयोदश च ॥ ७। १। २॥
८ ब्रह्मवादिनो वदन्ति स त्वै यजेत योऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेतेति
यस्य त्रिवृतमन्तर्यन्ति प्राणाꣳस्तस्यान्तर्यन्ति प्राणेषु मेऽप्यसदिति खलु वै यज्ञेन
यजमानो यजते यस्य पञ्चदशमन्तर्यन्ति वीर्यं तस्यान्तर्यन्ति वीर्ये मेऽप्यसदिति खलु
वै यज्ञेन यजमानो यजते यस्य सप्तदशमन्तर्यन्ति
९ प्रजां तस्यान्तर्यन्ति प्रजायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते
यस्यैकविꣳशमन्तर्यन्ति प्रतिष्ठां तस्यान्तर्यन्ति प्रतिष्ठायां मेऽप्यसदिति खलु वै यज्ञेन
यजमानो यजते यस्य त्रिणवमन्तर्यन्त्यृतूꣳश्च तस्य नक्षत्रियां च विराजमन्तर्यन्त्यृतुषु
मेऽप्यसन्नक्षत्रियायां च विराजीति
१० खलु वै यज्ञेन यजमानो यजते यस्य त्रयस्त्रिꣳशमन्तर्यन्ति देवतास्तस्यान्तर्यन्ति
देवतासु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यो वै स्तोमानामवमं परमतां
गच्छन्तं वेद परमतामेव गच्छति त्रिवृद्वै स्तोमानामवमस्त्रिवृत्परमो य एवं वेद परमतामेव
गच्छति ॥ ७। १। ३॥ सप्तदशमन्तर्यन्ति विराजीति चतुश्चत्वारिꣳशच्च ॥ ७। १। ३॥
११ अंगिरसो वै सत्रमासत ते सुवर्गं लोकमायन्तेषाꣳ हविष्माꣳश्च हविष्कृच्चाहीयेतां

तावकामयेताꣳ सुवर्गं लोकमियावेति तावेतं द्विरात्रमपश्यतां तमाहरतां तेनायजेतां ततो वै तौ सुवर्गं लोकमैतां य एवं विद्वान्द्विरात्रेण यजते सुवर्गमेव लोकमेति तावैतां पूर्वेणाह्नागच्छतामुत्तरेणा
१२ ऽभिप्लवः पूर्वमहर्भवति गतिरुत्तरं ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति तेजस्तेनाव रुंधे सर्वस्तोमोऽतिरात्र उत्तरꣳ सर्वस्याप्त्यै सर्वस्यावरुद्धै गायत्रं पूर्वेहन्थ्साम भवति तेजो वै गायत्री गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमात्मन्धत्ते त्रैष्टुभमुत्तर ओजो वै वीर्यं त्रिष्टुगोज एव वीर्यमात्मन्धत्ते रथंतरं पूर्वे
१३ ऽहन्थ्साम भवतीयं वै रथंतरमस्यामेव प्रति तिष्ठति बृहदुत्तरेऽसौ वै बृहदमुष्यामेव प्रति तिष्ठति तदाहुः क्व जगती चानुष्टुप्चेति वैखानसं पूर्वेऽहन्थ्साम भवति तेन जगत्यै नैति षोडश्युत्तरे तेनानुष्टुभोऽथाहुर्यथ्समानेऽर्धमासे स्यातामन्यतरस्याह्नो वीर्यमनु पद्येतेत्यमावास्यायां पूर्वमहर्भवत्युत्तरस्मिन्नुत्तरं नानैवार्धमासयोर्भवतो नानावीर्ये भवतो हविष्मन्निधनं पूर्वमहर्भवति हविष्कृन्निधनमुत्तरं प्रतिष्ठित्यै ॥ ७। १। ४॥ उत्तरेण रथन्तरं पूर्वेऽन्वेक विꣳशतिश्च ॥ ७। १। ४॥
१४ आपो वा इदमग्रे सलिलमासीत्तस्मिन्प्रजापतिर्वायुर्भूत्वाचरथ्स इमामपश्यत्तां वराहो भूत्वाहरत्तां विश्वकर्मा भूत्वा व्यमार्ड्ढाप्रथत सा पृथिव्यभवत्तत्पृथिव्यै पृथिवित्वं तस्यामश्राम्यत्प्रजापतिः स देवानसृजत वसून्रुद्रानादित्यान्ते देवाः प्रजापतिमब्रुवन् प्र जायामहा इति सोऽब्रवीद्
१५ यथाहं युष्मांस्तपसासृक्ष्येवं तपसि प्रजननमिच्छध्वमिति तेभ्योऽग्निमायतनं प्रायच्छदेतेनायतनेन श्राम्यतेति तेऽग्निनायतनेनाश्राम्यन्ते संवथ्सर एकां गामसृजन्त तां वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्रायच्छन्नेताꣳ रक्षध्वमिति तां वसवो रुद्रा आदित्या अरक्षन्त सा वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राजायत त्रीणि च
१६ शतानि त्रयस्त्रिꣳशतं चाथ सैव सहस्रतम्यभवत्ते देवाः प्रजापतिमब्रुवन्थ्सहस्रेण नो याजयेति सोऽग्निष्टोमेन वसूनयाजयत्त इमं लोकमजयन्तच्चाददुः स उक्थ्येन रुद्रानयाजयन्तेऽन्तरिक्षमजयन्तच्चाददुः सोऽतिरात्रेणादित्यानयाजयत्तेऽमुं लोकमजयन्तच्चाददुस्तदन्तरिक्षं
१७ व्यवैर्यत तस्माद्रुद्रा घातुका अनायतना हि तस्मादाहुः शिथिलं वै मध्यममह्नस्त्रिरात्रस्य वि हि तदवैर्यतेति त्रैष्टुभं मध्यमस्याह्न आज्यं भवति संयानानि सूक्तानि शꣳसति

षोडशिनꣳ शꣳ सत्यह्नो धृत्या अशिथिलं भावाय तस्मात्त्रिरात्रस्याग्निष्टोम एव प्रथममहः स्यादथोक्थ्योऽथातिरात्र एषां लोकानां विधृत्यै त्रीणित्रीणि शतान्यनूचीनाहमव्यवच्छिन्नानि ददा
१८ त्येषां लोकानामनु संतत्यै दशतं न वि च्छिंन्द्याद्विराजं नेद्विच्छिनदानीत्यथ या सहस्रतम्यासीत्तस्यामिन्द्रश्च विष्णुश्च व्यायच्छेताꣳ स इन्द्रोऽमन्यतानया वा इदं विष्णुः सहस्रं वर्क्ष्यत इति तस्यामकल्पेतां द्विभाग इन्द्रस्तृतीये विष्णुस्तद्वा एषाभ्यनूच्यत उभा जिग्यथुरिति तां वा एतामच्छावाक
१९ एव शꣳसत्यथ या सहस्रतमी सा होत्रे देयेति होतारं वा अभ्यतिरिच्यते यदतिरिच्यते होतानाप्तस्यापयिताथाहुरुन्नेत्रे देयेत्यतिरिक्ता वा एषा सहस्रस्यातिरिक्त उन्नेतर्त्विजामथाहुः सर्वेभ्यः सदस्येभ्यो देयेत्यथाहुरुदाकृत्या सा वशं चरेदित्यथाहुर्ब्रह्मणे चाग्नीधे च देयेति
२० द्विभागं ब्रह्मणे तृतीयमग्नीध ऐन्द्रो वै ब्रह्मा वैष्णवोऽग्नीद्यथैव तावकल्पेतामित्यथाहुर्या कल्याणी बहुरूपा सा देयेत्यथाहुर्या द्विरूपोभयत एनी सा देयेति सहस्रस्य परिगृहीत्यै तद्वा एतथ्सहस्रस्यायनꣳ सहस्रग्ग्ं स्तोत्रीयाः सहस्रं दक्षिणाः सहस्र संमितः सुवर्गो लोकः सुवर्गस्य लोकस्याभिजित्यै ॥
७। १। ५॥ अब्रवीच्च तदन्तरिक्षन्ददात्यच्छावाकश्च देयेति सप्तचत्वारिꣳशच्च ॥ ७। १। ५॥
२१ सोमो वै सहस्रमविन्दत्तमिन्द्रोऽन्वविन्दत्तौ यमो न्यागच्छत्तावब्रवीदस्तु मेऽत्रापीत्यस्तु ही३ इत्यब्रूताꣳ स यम एकस्यां वीर्यं पर्यपश्यदियं वा अस्य सहस्रस्य वीर्यं बिभर्तीति तावब्रवीदियं ममास्त्वेतद्युवयोरिति तावब्रूताꣳ सर्वे वा एतदेतस्यां वीर्यं
२२ परि पश्यामोऽꣳशमा हरामहा इति तस्यामꣳशमाहरन्त तामप्सु प्रावेशयन्थ्सोमायोदेहीति सा रोहिणी पिङ्गलैकहायनी रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत्तस्माद्रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणीयाद्य एवं विद्वान् रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति त्रयस्त्रिꣳशता चैवास्य त्रिभिश्च
२३ शतैः सोमः क्रीतो भवति सुक्रीतेन यजते तामप्सु प्रावेशयन्निन्द्रायोदेहीति सा रोहिणी लक्ष्मणा पष्ठौही वार्त्रघ्नी रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत्तस्माद्रोहिणीं लक्ष्मणां पष्ठौहीं वार्त्रघ्नीं दद्याद्य एवं विद्वान्रोहिणीं लक्ष्मणां पष्ठौहीं वार्त्रघ्नीं ददाति त्रयस्त्रिꣳशच्चैवास्य त्रीणि च शतानि सा दत्ता
२४ भवति तामप्सु प्रावेशयन्, यमायोदेहीति सा जरती मूर्खा तज्जघन्या रूपं कृत्वा

त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत्तस्माज्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुर्वीत य एवं विद्वाञ्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुरुते त्रयस्त्रिꣳशच्चैवास्य त्रीणि च शतानि सामुष्मि३ꣳल्लोके भवति वागेव सहस्रतमी तस्माद्
२५ वरो देयः सा हि वरः सहस्रमस्य सा दत्ता भवति तस्माद्वरो न प्रतिगृह्यः सा हि वरः सहस्रमस्य प्रतिगृहीतं भवतीयं वर इति ब्रूयादथान्यां ब्रूयादियं ममेति तथास्य तथ्सहस्रमप्रतिगृहीतं भवत्युभयत एनी स्यात्तदाहुरन्यत एनी स्याथ्सहस्रं परस्तादेतमिति यैव वरः
२६ कल्याणी रूपसमृद्धा सा स्याथ्सा हि वरः समृद्ध्यै तामुत्तरेणाग्नीध्रं पर्याणीयाहवनीयस्यान्ते द्रोणकलशमव घ्रापयेदा जिघ्र कलशं मह्युरुधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः सा मा सहस्र आ भज प्रजया पशुभिः सह पुनर्माऽऽ विशताद्रयिरिति प्रजयैवैनं पशुभी रय्या स
२७ मर्धयति प्रजावान्पशुमान्रयिमान्भवति य एवं वेद तया सहाग्नीध्रं परेत्य पुरस्तात्प्रतीच्यां तिष्ठन्त्यां जुहुयादुभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः । इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामिति त्रेधाविभक्तं वै त्रिरात्रे सहस्रꣳसाहस्रीमेवैनां करोति सहस्रस्यैवैनां मात्रां
२८ करोति रूपाणि जुहोति रूपैरेवैनाꣳ समर्धयति तस्या उपोत्थाय कर्णमा जपेदिडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अघ्निये नामानि सुकृतं मा देवेषु ब्रूतादिति देवेभ्य एवैनमा वेदयत्यन्वेनं देवा बुध्यन्ते ॥ ७। १। ६॥ एतदेतस्यां वीर्यमस्य त्रिभिश्च दत्ता सहस्रतमी तस्मादेव वरः सं मात्रामेकान्न चत्वारिꣳशच्च ॥ ७। १। ६॥
२९ सहस्रतम्या वै यजमानः सुवर्गं लोकमेति सैनꣳसुवर्गं लोकं गमयति सा मा सुवर्गं लोकं गमयेत्याह सुवर्गमेवैनं लोकं गमयति सा मा ज्योतिष्मन्तं लोकं गमयेत्याह ज्योतिष्मन्तमेवैनं लोकं गमयति सा मा सर्वान्पुण्या३ꣳल्लोकान्गमयेत्याह सर्वानेवैनं पुण्या३ꣳ ल्लोकान्गमयति सा
३० मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्मा विशताद्रयिरिति प्रजयैवैनं पशुभी रय्यां प्रतिष्ठापयति प्रजावान्पशुमान्रयिमान्भवति य एवं वेद तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाध्वर्यवे वा दद्याथ्सहस्रमस्य सा दत्ता भवति सहस्रमस्य प्रतिगृहीतं भवति यस्तामविद्वान्
३१ प्रतिगृह्णाति तां प्रति गृह्णीयादेकासि न सहस्रमेकां त्वा भूतां प्रति गृह्णामि न

सहस्रमेका मा भूता विश मा सहस्रमित्येकामेवैनां भूतां प्रति गृह्णाति न सहस्रं य एवं
वेद स्योनासि सुषदा सुशेवा स्योना मा विश सुषदा मा विश सुशेवा मा विशे
३२ त्याह स्योनैवैनꣳ सुषदा सुशेवा भूताविशति नैनꣳ हिनस्ति ब्रह्मवादिनो वदन्ति
सहस्रꣳ सहस्रतम्यन्वेती ३ सहस्रतमीꣳ सहस्रा ३ मिति यत्प्राचीमुथ्सृजेथ्सहस्रꣳ
सहस्रतम्यन्वियात्तथ्सहस्रमप्रज्ञात्रꣳ सुवर्गं लोकं न प्र जानीयात्प्रतीचीमुथ्सृजति ताꣳ
सहस्रमनु पर्यावर्तते सा प्रजानती सुवर्गं लोकमेति यजमानमभ्युथ्सृजति क्षिप्रे सहस्रं
प्र जायत उत्तमा नीयते प्रथमा देवान्गच्छति ॥ ७। १। ७॥ लोकान्गमयति
साऽविद्वान्थ्सुशेवा माऽविश यजमानन्द्वादश च ॥ ७। १। ७॥
३३ अत्रिरददादौर्वाय प्रजां पुत्रकामाय स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा
स एतं चतूरात्रमपश्यत्तमाहरत्तेनायजत ततो वै तस्य चत्वारो वीरा आजायन्त सुहोता
सूद्गाता स्वध्वर्युः सुसभेयो य एवं विद्वाग्श्चतूरात्रेण यजत आस्य चत्वारो वीरा जायन्ते
सुहोता सूद्गाता स्वध्वर्युः सुसभेयो ये चतुर्विꣳशाः पवमाना ब्रह्मवर्चसं तद्
३४ य उद्यन्तः स्तोमाः श्रीः सात्रिग्ग् श्रद्धादेवं यजमानं चत्वारि वीर्याणि नोपानमन्तेज
इन्द्रियं ब्रह्मवर्चसमन्नाद्यꣳ स एताग्श्चतुरश्चतुष्टोमान्थ्सोमानपश्यत्तानाहरत्तैरयजत
तेज एव प्रथमेनावारुंधेंद्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन य एवं
विद्वाग्श्चतुरश्चतुष्टोमान्थ्सोमानाहरति तैर्यजते तेज एव प्रथमेनाव रुंध इंद्रियं द्वितीयेन
ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन यामेवात्रिरृद्धिमार्ध्नोत्तामेव यजमान ऋध्नोति ॥ ७।
१। ८॥ तत्तेज एवाष्टादश च ॥ ७। १। ८॥
३५ जमदग्निः पुष्टिकामश्चतूरात्रेणायजत स एतान्पोषाꣳअपुष्यत्तस्मात्पलितौ जामदग्नियौ
न सं जानाते एतानेव पोषान्पुष्यति य एवं विद्वाग्श्चतूरात्रेण यजते पुरोडाशिन्य
उपसदो भवन्ति पशवो वै पुरोडाशः पशूनेवाव रुंधेऽन्नं वै पुरोडाशोऽन्नमेवाव रुंधेऽन्नादः
पशुमान्भवति य एवं विद्वाग्श्चतूरात्रेण यजते ॥
७। १। ९॥ जमदग्निरष्टा चत्वारिꣳशत् ॥ ७। १। ९॥
३६ संवथ्सरो वा इदमेक आसीथ्सोऽकामयतर्तून्थ्सृजेयेति स एतं
पञ्चरात्रमपश्यत्तमाहरत्तेनायजत ततो वै स ऋतूनसृजत य एवं विद्वान्पञ्चरात्रेण यजते
प्रैव जायते त ऋतवः सृष्टा न व्यावर्तन्त त एतं पञ्चरात्रमपश्यन्तमाहरन्तेनायजन्त
ततो वै ते व्यावर्तन्त

३७ य एवं विद्वान्पञ्चरात्रेण यजते वि पाप्मना भ्रातृव्येणावर्तते सार्वसेनिः शौचेयोऽकामयत पशुमान्थ्स्यामिति स एतं पञ्चरात्रमाहरत्तेनायजत ततो वै स सहस्रं पशून्प्राप्नोद्य एवं विद्वान्पञ्चरात्रेण यजते प्र सहस्रं पशूनाप्नोति बबरः प्रावाहणिरकामयत वाचः प्रवदिता स्यामिति स एतं पञ्चरात्रमा
३८ ऽहरत्तेनायजत ततो वै स वाचः प्रवदिताभवद्य एवं विद्वान्पञ्चरात्रेण यजते प्रवदितैव वाचो भवत्यथो एनं वाचस्पतिरित्याहुरनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथ वा एष सं प्रति यज्ञो यत्पञ्चरात्रो य एवं विद्वान्पञ्चरात्रेण यजते सं प्रत्येव यज्ञेन यजते पञ्चरात्रो भवति पञ्च वा ऋतवः संवथ्सर
३९ ऋतुष्वेव संवथ्सरे प्रति तिष्ठत्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंधे त्रिवृदग्निष्टोमो भवति तेज एवाव रुंधे पञ्चदशो भवतीन्द्रियमेवाव रुंधे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजिथ्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै ॥ ७। १। १०॥ ते व्यावर्तन्त प्रवदिता स्यामिति स एतं पञ्चरात्रमा संवथ्सरोऽभिजित्यै ॥ ७। १। १०॥
४० देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददे इमामगृभ्णन्रशनामृतस्य पूर्व आयुषि विदथेषु कव्या । तया देवाः सुतमा बभूवुर्ऋतस्य सामन्थ्सरमारपन्ती ॥ अभिधा असि भुवनमसि यन्तासि धर्तासि सोऽग्निं वैश्वानरꣳ सप्रथ सं गच्छ स्वाहाकृतः पृथिव्यां यन्ता राड्यन्तासि यमनो धर्तासि धरुणः कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा सते त्वासते त्वाद्भ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः ॥
७। १। ११॥ धरुणः पञ्चविꣳशतिश्च ॥ ७। १। ११॥
४१ विभूर्मात्रा प्रभूः पित्राश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा असि ययुर्नामास्यादित्यानां पत्वान्विह्यग्नये स्वाहा स्वाहेन्द्राग्निभ्याग् स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्य इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यो देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं गोपायत ॥ ७। १। १२॥ रन्तिः स्वाहा द्वाविꣳशतिश्च ॥ ७। १। १२॥
४२ आयनाय स्वाहा प्रायणाय स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा

शूकृताय स्वाहा पलायिताय स्वाहापलायिताय स्वाहावल्गते स्वाहा परावल्गते स्वाहायते स्वाहा प्रयते स्वाहा सर्वस्मै स्वाहा ॥ ७। १। १३॥
आयनायोत्तरमापलायिताय षड्विꣳशतिः ॥ ७। १। १३॥
४३ अग्नये स्वाहा सोमाय स्वाहा वायवे स्वाहापां मोदाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा ॥ ७। १। १४॥ अग्नये वायवेऽपां मोदायेन्द्राय त्रयोविꣳशतिः ॥ ७। १। १४॥
४४ पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहा प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा दिग्भ्यः स्वाहावान्तरदिशाभ्यः स्वाहा समाभ्यः स्वाहा शरद्भ्यः स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा मासेभ्यः स्वाहर्तुभ्यः स्वाहा संवथ्सराय स्वाहा सर्वस्मै स्वाहा ॥ ७। १। १५॥ पृथिव्यै सूर्याय नक्षत्रेभ्यः प्राच्यै सप्त चत्वारिꣳशत् ॥ ७। १। १५॥
४५ अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहापां मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा ॥ ७। १। १६॥ अग्नये सवित्रे पूष्णेऽपां मोदाय वायवे त्रयोविꣳशतिः ॥ ७। १। १६॥
४६ पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहाग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहाह्ने स्वाहा रात्रियै स्वाहर्जवे स्वाहा साधवे स्वाहा सुक्षित्यै स्वाहा क्षुधे स्वाहाशितिम्ने स्वाहा रोगाय स्वाहा हिमाय स्वाहा शीताय स्वाहातपाय स्वाहारण्याय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥ ७। १। १७॥
पृथिव्या अग्नयेऽह्ने रात्रियै चतुश्चत्वारिꣳशत् ॥ ७। १। १७॥
४७ भुवो देवानां कर्मणापसर्तस्य पथ्यासि वसुभिर्देवेभिर्देवतया गायत्रेण त्वा छंदसा युनज्मि वसन्तेन त्वर्तुना हविषा दीक्षयामि रुद्रेभिर्देवेभिर्देवतया त्रैष्टुभेन त्वा छंदसा युनज्मि ग्रीष्मेण त्वर्तुना हविषा दीक्षयाम्यादित्येभिर्देवेभिर्देवतया जागतेन त्वा छंदसा युनज्मि वर्षाभिस्त्वर्तुना हविषा दीक्षयामि विश्वेभिर्देवेभिर्देवतयानुष्टुभेन त्वा छंदसा युनज्मि
४८ शरदा त्वर्तुना हविषा दीक्षयाम्यंगिरोभिर्देवेभिर्देवतया पाङ्क्तेन त्वा छंदसा युनज्मि हेमन्तशिशिराभ्यां त्वर्तुना हविषा दीक्षयाम्याहं दीक्षामरुहमृतस्य पत्नीं गायत्रेण छंदसा ब्रह्मणा चर्तꣳ सत्येऽधाꣳ सत्यमृतेऽधाम् ॥ मही मूषु सुत्रामाणमिह धृतिः स्वाहेह

विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा ॥ ७। १। १८॥ आनुष्टेभेन त्वा छन्दसा युनज्म्येकान्न पञ्चाशच्च ॥ ७। १। १८॥
४९ ईंकाराय स्वाहेंकृताय स्वाहा क्रन्दते स्वाहावक्रन्दते स्वाहा प्रोथते स्वाहा प्रप्रोथते स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा संदीयमानाय स्वाहा संदिताय स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा पलायिष्यमाणाय स्वाहा पलायिताय स्वाहोपर२ँस्य ते स्वाहोपरताय स्वाहा निवेक्ष्यते स्वाहा निविशमानाय स्वाहा निविष्टाय स्वाहा निषथ्स्य ते स्वाहा निषीदते स्वाहा निषण्णाय स्वाहा
५० ऽसिष्यते स्वाहासीनाय स्वाहासिताय स्वाहा निपथ्स्यते स्वाहा निपद्यमानाय स्वाहा निपन्नाय स्वाहा शयिष्यते स्वाहा शयानाय स्वाहा शयिताय स्वाहा सं मीलिष्यते स्वाहा सं मीलते स्वाहा सं मीलिताय स्वाहा स्वप्स्यते स्वाहा स्वपते स्वाहा सुप्ताय स्वाहा प्रभोथ्स्यते स्वाहा प्रबुध्यमानाय स्वाहा प्रबुद्धाय स्वाहा जागरिष्यते स्वाहा जाग्रते स्वाहा जागरिताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा
५१ वीक्षमाणाय स्वाहा वीक्षिताय स्वाहा स२ँहास्यते स्वाहा संजिहानाय स्वाहोज्झिहानाय स्वाहा विवर्थ्स्यते स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहोत्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा विधविष्यते स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहोत्क्र२ँस्यते स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा चंक्रमिष्यते स्वाहा चंक्रम्यमाणाय स्वाहा चंक्रमिताय स्वाहा कण्डूयिष्यते स्वाहा कण्डूयमानाय स्वाहा कण्डूयिताय स्वाहा निकषिष्यते स्वाहा निकषमाणाय स्वाहा निकषिताय स्वाहा यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मेहति तस्मै स्वाहा यच्छकृत्करोति तस्मै स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा सर्वस्मै स्वाहा ॥ ७। १। १९॥ निषण्णाय स्वाहा वीक्षिष्यते स्वाहा निकषमाणाय स्वाहा सप्तवि२ँशतिश्च ॥ ७। १। १९॥
५२ अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहर्तमस्यृतस्यर्तमसि सत्यमसि सत्यस्य सत्यमस्यृतस्य पन्था असि देवानां छायामृतस्य नाम तथ्सत्यं यत्त्वं प्रजापतिरस्यधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते दिवः सूर्येण विशोऽपो वृणानः पवते कव्यन्पशुं न गोपा इर्यः परिज्मा ॥ ७। १। २०॥ अग्नये वायवे सूर्यायाऽष्टा चत्वारि२ँशत् ॥

७। १। २०॥
प्रजननं प्रातस्सवने वै ब्रह्मवादिनः स त्वा अंगिरस आपो वै सोमो वै सहस्रतम्याऽत्रिर्जमदग्निः संवथ्सरो देवस्य विभूरायनायाग्नये पृथिव्या अग्नये पृथिव्यै भुव ईङ्काराया ऽग्नये वायवे सूर्याय विꣳशतिः ॥
प्रजननमंगिरसः सोमो वै प्रतिगृह्णाति वीभूर्वीक्षमाणाय द्वि पञ्चाशत् ॥
प्रजननं परिज्मा ॥

## सप्तमकाण्डे द्वितीयः प्रश्नः २

१ साध्या वै देवाः सुवर्गकामा एतꣳ षड्रात्रमपश्यन्तमाहरन्तेनायजन्त ततो वै ते सुवर्गं लोकमायन् य एवं विद्वाꣳसः षड्रात्रमासते सुवर्गमेव लोकं यन्ति देवसत्रं वै षड्रात्रः प्रत्यक्षग्ग् ह्येतानि पृष्ठानि य एवं विद्वाꣳसः षड्रात्रमासते साक्षादेव देवता अभ्यारोहन्ति षड्रात्रो भवति षड्वा ऋतवः षद्पृष्ठानि
२ पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवथ्सरं ते संवथ्सर एव प्रति तिष्ठन्ति बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येतेवै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति त्रिवृदग्निष्टोमो भवति तेज एवाव रुंधते पञ्चदशो भवतीन्द्रियमेवाव रुंधते सप्तदशो
३ भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवात्मन्दधते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै सदोहविर्धानिन एतेन षड्रात्रेण यजेरन्नाश्वत्थी हविर्धानं चाग्नीध्रं च भवतस्तद्धि सुवर्ग्यं चक्रीवती भवतः सुवर्गस्य लोकस्य समष्ट्या उलूखलबुध्नो यूपो भवति प्रतिष्ठित्यै प्राञ्चो यान्ति प्राङिव हि सुवर्गो
४ लोकः सरस्वत्या यान्त्येष वै देवयानः पन्थास्तमेवान्वारोहन्त्याक्रोशन्तो यान्त्यवर्तिमेवान्यस्मिन्प्रतिषज्य प्रतिष्ठां गच्छन्ति यदा दश शतं कुर्वन्त्यथैकमुत्थानꣳ शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति यदा शतꣳ सहस्रं कुर्वन्त्यथैकमुत्थानꣳ सहस्रसंमितो वा असौ लोकोऽमुमेव लोकमभि जयन्ति यदैषां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धि तीर्थम् ॥ ७। २। १॥ पृष्ठानि सप्तदशः सुवर्गो जयन्ति यदैकादश च ॥ ७। २। १॥
५ कुसुरुबिन्द औद्दालकिरकामयत पशुमान्थ्स्यामिति स एतꣳ सप्तरात्रमाहरत्तेनायजत

तेन वै स याव॑न्तो ग्राम्याः प॒शव॒स्तानवा॑रुंध य ए॒वं वि॒द्वान्थ्स॑प्तरा॒त्रेण॒ यज॑ते॒ याव॑न्त ए॒व ग्रा॒म्याः प॒शव॒स्तानेवाव॑ रुंधे सप्तरा॒त्रो भ॑वति स॒प्त ग्रा॒म्याः प॒शवः॑ स॒प्तार॒ण्याः स॒प्त छन्दा॑ग्स्यु॒भय॒स्याव॑रुद्ध्यै त्रि॒वृद॑ग्निष्टो॒मो भ॑वति॒ तेज॑

६ ए॒वाव॑ रुंधे पञ्चद॒शो भ॑वतीन्द्रि॒यमे॒वाव॑ रुंधे सप्तद॒शो भ॑वत्य॒न्नाद्य॒स्याव॑रुद्ध्या॒ अथो॒ प्रैव तेन॑ जायत एकवि॒ꣳशो भ॑वति॒ प्रति॑ष्ठित्या॒ अथो॒ रुच॑मे॒वात्मन्ध॑त्ते त्रि॒णवो॒ भ॑वति॒ विजि॑त्यै पञ्चवि॒ꣳशो॑ऽग्निष्टो॒मो भ॑वति प्र॒जाप॑तेरा॒प्त्यै म॒हाव्र॒तवा॑न॒न्नाद्य॒स्याव॑रुद्ध्यै वि॒श्वजि॒थ्सर्व॑पृष्ठोऽतिरा॒त्रो भ॑वति॒ सर्व॒स्याभिजि॑त्यै॒ यत्प्र॒त्यक्षं॒ पूर्वे॒ष्वह॑स्सु पृ॒ष्ठान्यु॑पे॒युः प्र॒त्यक्षं॑

७ वि॒श्वजि॑ति॒ यथा॑ दु॒ग्धामु॑प॒सीद॑त्ये॒वमु॑त्तम॒मह॑ः स्यान्नैक॑रा॒त्रश्च॒न स्या॑द्बृहद्रथन्त॒रे पूर्वे॒ष्वह॒स्सूप॑ यन्तीयं वाव र॑थंत॒रम॒सौ बृ॒हदा॒भ्यामे॒व न य॒न्त्यथो॑ अ॒नयो॑रेव प्रति॑ तिष्ठन्ति॒ यत्प्र॒त्यक्षं॑ वि॒श्वजि॑ति पृ॒ष्ठान्यु॑प॒यन्ति॒ यथा॒ प्रत्तां॑ दु॒हे ता॒दृगे॒व तत् ॥ ७। २। २॥ तेज॒ उपे॒युः प्र॒त्यक्षं॒ द्विच॑त्वारिꣳशच्च ॥ ७। २। २॥

८ बृह॒स्पति॑रकामयत ब्रह्मवर्च॒सी स्या॒मिति॒ स ए॒तम॑ष्टरा॒त्रम॑पश्यत् तमाह॑रत् तेना॑यजत॒ ततो॒ वै स ब्र॑ह्मवर्च॒स्य॑भव॒द्य ए॒वं वि॒द्वान॑ष्टरा॒त्रेण॒ यज॑ते ब्रह्मवर्च॒स्ये॑व भ॑वत्यष्टरा॒त्रो भ॑वत्य॒ष्टाक्ष॑रा गाय॒त्री गा॑य॒त्री ब्र॑ह्मवर्च॒सं गा॑यत्रि॒यैव ब्र॑ह्मवर्च॒सम॒व॑ रुंधेऽष्टरा॒त्रो भ॑वति॒ चत॑स्रो॒ वै दि॒शश्चत॑स्रोऽवान्तरदि॒शा दि॒ग्भ्य ए॒व ब्र॑ह्मवर्च॒सम॒व॑ रुंधे

९ त्रि॒वृद॑ग्निष्टो॒मो भ॑वति॒ तेज॑ ए॒वाव॑ रुंधे पञ्चद॒शो भ॑वतीन्द्रि॒यमे॒वाव॑ रुंधे सप्तद॒शो भ॑वत्य॒न्नाद्य॒स्याव॑रुद्ध्या॒ अथो॒ प्रैव तेन॑ जायत एकवि॒ꣳशो भ॑वति॒ प्रति॑ष्ठित्या॒ अथो॒ रुच॑मे॒वात्मन्ध॑त्ते त्रि॒णवो॒ भ॑वति॒ विजि॑त्यै त्रयस्त्रि॒ꣳशो भ॑वति॒ प्रति॑ष्ठित्यै पञ्चवि॒ꣳशो॑ऽग्निष्टो॒मो भ॑वति प्र॒जाप॑तेरा॒प्त्यै म॒हाव्र॒तवा॑न॒न्नाद्य॒स्याव॑रुद्ध्यै वि॒श्वजि॒थ्सर्व॑पृष्ठोऽतिरा॒त्रो भ॑वति॒ सर्व॒स्याभिजि॑त्यै ॥ ७। २। ३॥ दि॒ग्भ्य ए॒व ब्र॑ह्मवर्च॒सम॒व॑ रुन्धे॒ऽभिजि॑त्यै ॥ ७। २। ३॥

१० प्र॒जाप॑तिः प्र॒जा अ॑सृजत॒ ताः सृ॒ष्टाः, क्षुधं॑ न्या॑यन्थ्स ए॒तं न॑वरा॒त्रम॑पश्यत् तमाह॑रत् तेना॑यजत॒ ततो॒ वै प्र॒जाभ्यो॑ऽकल्पत॒ यर्हि॑ प्र॒जाः, क्षुधं॑ नि॒गच्छे॑यु॒स्तर्हि॑ नवरा॒त्रेण॑ यजेते॒मे हि वा ए॒तासां॑ लो॒का अक्लृ॑प्ता॒ अथै॒ताः, क्षुधं॒ नि गच्छ॑न्ती॒माने॒वाभ्यो॑ लो॒कान्क॑ल्पयति॒ तान्कल्प॑माना॒न्प्र॒जाभ्यो॒ऽनु॑ कल्पते॒ कल्प॑न्ते

११ ऽस्मा इ॒मे लो॒का ऊर्जं॑ प्र॒जासु॑ दधाति त्रिरा॒त्रेणै॒वेमं लो॒कं क॑ल्पयति त्रिरा॒त्रेणा॒न्तरि॑क्षं

त्रिरात्रेणामुं लोकं यथा गुणे गुणमन्वस्यत्येवमेव तल्लोके लोकमन्वस्यति धृत्या अशिथिलं
भावाय ज्योतिर्गौरायुरिति ज्ञाता स्तोमा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरेष्वेव
लोकेषु प्रति तिष्ठन्ति ज्ञात्रं प्रजानां
१२ गच्छति नवरात्रो भवत्यभिपूर्वमेवास्मिन्तेजो दधाति यो ज्योगामयावी स्यात्स
नवरात्रेण यजेत प्राणा हि वा एतस्याधृता अथैतस्य ज्योगामयति प्राणानेवास्मिन्दाधारोत
यदीतासुर्भवति जीवत्येव ॥ ७। २। ४॥ कल्पन्ते प्रजानात्रयस्त्रिꣳशच्च ॥ ७। २। ४॥
१३ प्रजापतिरकामयत प्र जायेयेति स एतं दशहोतारमपश्यत्तमजुहोत्तेन दशरात्रमसृजत
तेन दशरात्रेण प्राजायत दशरात्राय दीक्षिष्यमाणो दशहोतारं जुहुयाद्दशहोत्रैव दशरात्रꣳ
सृजते तेन दशरात्रेण प्र जायते वैराजो वा एष यज्ञो यद्दशरात्रो
१४ य एवं विद्वान्दशरात्रेण यजते विराजमेव गच्छति प्राजापत्यो वा एष यज्ञो
यद्दशरात्रो य एवं विद्वान्दशरात्रेण यजते प्रैव जायत इन्द्रो वै सदृङ्देवताभिरासीत्स
न व्यावृतमगच्छत्स प्रजापतिमुपाधावत्तस्मा एतं दशरात्रं प्रायच्छत्तमाहरत्तेनायजत ततो
वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वान्दशरात्रेण यजते व्यावृतमेव पाप्मना
भ्रातृव्येण गच्छति त्रिककुद्वा
१५ एष यज्ञो यद्दशरात्रः ककुत्पञ्चदशः ककुदेकविꣳशः ककुत्रयस्त्रिꣳशो य एवं
विद्वान्दशरात्रेण यजते त्रिककुदेव समानानां भवति यजमानः पञ्चदशो यजमान
एकविꣳशो यजमानस्त्रयस्त्रिꣳशः पुर इतरा अभिचर्यमाणो दशरात्रेण यजेत देवपुरा
एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्त्स्तृणुते देवासुराः संयत्ता
आसन्ते देवा एता
१६ देवपुरा अपश्यन्, यद्दशरात्रस्ताः पर्यौहन्त तेषां न कुतश्चनोपाव्याधोऽभवत्ततो
देवा अभवन्परासुरा यो भ्रातृव्यवान्त्स्यात्स दशरात्रेण यजेत देवपुरा एव पर्यूहते
तस्य न कुतश्चनोपाव्याधो भवति भवत्यात्मना परास्य भ्रातृव्यो भवति स्तोम
स्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोपस्तिं कुरुते जामि वा
१७ एतत्कुर्वन्ति यज्ज्यायाꣳसग्ग् स्तोममुपेत्य कनीयाꣳसमुपयन्ति यदग्निष्टोमसामान्यवस्ताच्च
परस्ताच्च भवन्त्यजामित्वाय त्रिवृदग्निष्टोमोऽग्निष्टुदाग्नेयीषु भवति तेज एवाव रुंधे
पञ्चदश उक्थ्य ऐन्द्रीष्विन्द्रियमेवाव रुंधे त्रिवृदग्निष्टोमो वैश्वदेवीषु पुष्टिमेवाव रुंधे
सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमोऽन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत

१८ एकविꣳश उक्थ्यः सौरीषु प्रतिष्ठित्या अथो रुचमेवात्मन्धत्ते सप्तदशोऽग्निष्टोमः प्राजापत्यासूपहव्य उपहवमेव गच्छति त्रिणवावग्निष्टोमावभित ऐन्द्रीषु विजित्यै त्रयस्त्रिꣳश उक्थ्यो वैश्वदेवीषु प्रतिष्ठित्यै विश्वजिथ्सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै ॥ ७। २। ५॥ विराजमेव गच्छति प्राजापत्यो वा एष यज्ञो यद्दशरात्रस्त्रिककुद्वा एता वै जायत एकत्रिꣳशच्च ॥ ७। २। ५॥

१९ ऋतवो वै प्रजाकामाः प्रजां नाविन्दन्त तेऽकामयन्त प्रजाꣳ सृजेमहि प्रजामव रुंधीमहि प्रजां विन्देमहि प्रजावन्तः स्यामेति त एतमेकादशरात्रमपश्यन्तमाहरन्तेनायजन्त ततो वै ते प्रजामसृजन्त प्रजामवारुंधत प्रजामविन्दन्त प्रजावन्तोऽभवन्त ऋतवोऽभवन्तदार्तवानामार्तवत्वमृतूनां वा एते पुत्रास्तस्मा

२० दार्तवा उच्यन्ते य एवं विद्वाꣳस एकादशरात्रमासते प्रजामेव सृजन्ते प्रजामव रुंधते प्रजां विन्दन्ते प्रजावन्तो भवन्ति ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवथ्सरं ते संवथ्सर एव प्रति तिष्ठन्ति चतुर्विꣳशो भवति चतुर्विꣳशत्यक्षरा गायत्री

२१ गायत्रं ब्रह्मवर्चसं गायत्रियामेव ब्रह्मवर्चसे प्रति तिष्ठन्ति चतुश्चत्वारिꣳशो भवति चतुश्चत्वारिꣳशदक्षरा त्रिष्टुगिंद्रियं त्रिष्टुप्त्रिष्टुभ्येवेन्द्रिये प्रति तिष्ठन्त्यष्टाचत्वारिꣳशो भवत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यामेव पशुषु प्रति तिष्ठन्त्येकादशरात्रो भवति पञ्च वा ऋतव आर्तवाः पञ्चर्तुष्वेवार्तवेषु संवथ्सरे प्रतिष्ठाय प्रजामव रुंधतेऽतिरात्रावभितो भवतः प्रजायै परिगृहीत्यै ॥ ७। २। ६॥
तस्माद्गायत्र्येकान्न पञ्चाशच्च ॥ ७। २। ६॥

२२ ऐन्द्रवायवाग्रान्गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति यज्ञस्य वै क्लृप्तिमनु प्रजाः कल्पन्ते यज्ञस्याक्लृप्तिमनु न कल्पन्ते यथापूर्वमेव प्रजाः कल्पयति न ज्यायाꣳसं कनीयानति क्रामत्यैन्द्रवायवाग्रान्गृह्णीयादामयाविनः प्राणेन वा एष व्यृध्यते यस्यामयति प्राण ऐन्द्रवायवः प्राणेनैवैनꣳ समर्धयति मैत्रावरुणाग्रान्गृह्णीरन् येषां दीक्षितानां प्रमीयेत

२३ प्राणापानाभ्यां वा एते व्यृध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ मित्रावरुणौ प्राणापानावेव मुखतः परि हरन्त आश्विनाग्रान्गृह्णीतानुजावरोश्विनौ वै देवानामानुजावरौ पश्चेवाग्रं पर्यैतामश्विनावेतस्य देवता य आनुजावरस्तावेवैनमग्रं परि णयतः

शुक्राग्रान्गृह्णीत गतश्रीः प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्र एषोऽन्तोऽन्तं मनुष्यः
२४ श्रियै गत्वा नि वर्ततेऽन्तादेवान्तमा रभते न ततः पापीयान्भवति मन्थ्यग्रान्गृह्णीताभिचरन्नार्तपात्रं वा एतद्यन्मन्थिपात्रं मृत्युनैवैनं ग्राहयति ताजगार्तिमार्च्छत्याग्रयणाग्रान्गृह्णीत यस्य पिता पितामहः पुण्यः स्यादथ तन्न प्राप्नुयाद्वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यो
२५ भवत्यथ तन्न प्राप्नोत्युर इवैतद्यज्ञस्य वागिव यदाग्रयणो वाचैवैनमिन्द्रियेण समर्धयति न ततः पापीयान्भवत्युऽक्थ्याग्रान्गृह्णीताभिचर्यमाणः सर्वेषां वा एतत्पात्राणामिंद्रियं यदुक्थ्यपात्रꣳ सर्वेणैवैनमिन्द्रियेणाति प्र युङ्क्ते सरस्वत्यभि नोनेषि वस्य इति पुरोरुचं कुर्याद्वाग्वै
२६ सरस्वती वाचैवैनमति प्र युङ्क्ते मा त्वत्क्षेत्राण्यरणानि गन्मेत्याह मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः, क्षेत्राणि न गच्छति पूर्णान्ग्रहान्गृह्णीयादामयाविनः प्राणान्, वा एतस्य शुगृच्छति यस्यामयति प्राणा ग्रहाः प्राणानेवास्य शुचो मुञ्चत्युत यदीतासुर्भवति जीवत्येव पूर्णान्ग्रहान्गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत्प्राणान्, वा एतर्हि प्रजाना ꣳ शुगृच्छति यर्हि पर्जन्यो न वर्षति प्राणा ग्रहाः प्राणानेव प्रजानाꣳ शुचो मुञ्चति ताजक्प्र वर्षति ॥ ७। २। ७॥ प्रमीयेत मनुष्य ऋध्यते यस्य पिता पितामहः पुण्यो वाग्वा एव पूर्णान्ग्रहान्पञ्चविꣳशतिश्च ॥ ७। २। ७॥
२७ गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीयमहस्तस्मात्प्रायणीयेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति त्रैष्टुभो वै शुक्रस्त्रैष्टुभं द्वितीयमहस्तस्माद्द्वितीयेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णाति जागतो वा आग्रयणो जागतं तृतीयमहस्तस्मात्तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै
२८ यज्ञमापद्यच्छन्दाग्स्याप्नोति यदाग्रयणः श्वो गृह्यते यत्रैव यज्ञमदृशन्ततं एवैनं पुनः प्र युङ्क्ते जगन्मुखो वै द्वितीयस्त्रिरात्रो जागत आग्रयणो यच्चतुर्थेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते राथंतरो वा ऐन्द्रवायवो राथंतरं पञ्चममहस्तस्मात् पञ्चमेऽह
२९ न्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति बार्हतो वै शुक्रो बार्हतꣳ षष्ठमहस्तस्मात्षष्ठेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्येतद्वै द्वितीयं यज्ञमापद्यच्छन्दाग्स्याप्नोति यच्छुक्रः श्वो गृह्यते यत्रैव यज्ञमदृशन्ततं एवैनं पुनः प्र युङ्क्ते

त्रिष्टुङ्मुखो वै तृतीयस्त्रिरात्रस्त्रैष्टुभः
३० शुक्रो यथ्सप्तमेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते वाग्वा आग्रयणो वागष्टममहस्तस्मादष्टमेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति प्राणो वा ऐन्द्रवायवः प्राणो नवममहस्तस्मान्नवमेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णात्येतद्
३१ वै तृतीयं यज्ञमापद्यच्छन्दाग्ंस्याप्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यज्ञमदृशन्तत एवैनं पुनः प्र युङ्क्तेऽथो स्वमेव छन्दोऽनु पर्यावर्तन्ते पथो वा एतेऽध्यपथेन यन्ति येऽन्येनैन्द्रवायवात्प्रतिपद्यन्तेऽन्तः खलु वा एष यज्ञस्य यद्दशममहर्दशमेऽहन्नैन्द्रवायवो गृह्यते यज्ञस्यै
३२ वान्तं गत्वापथात्पन्थामपि यन्त्यथो यथा वहीयसा प्रतिसारं वहन्ति तादृगेव तच्छन्दाग्ंस्यन्योऽन्यस्य लोकमभ्यध्यायन्तान्येतेनैव देवा व्यवाहयन्नैन्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहस्तस्मिन्नाग्रयणो गृह्यते तस्मादाग्रयणस्यायतने नवमेऽहन्नैन्द्रवायवो गृह्यते शुक्रस्य वा एतदायतनं यत्पञ्चम
३३ महस्तस्मिन्नैन्द्रवायवो गृह्यते तस्मादैन्द्रवायवस्यायतने सप्तमेऽहञ्छुक्रो गृह्यत आग्रयणस्य वा एतदायतनं यत्षष्ठमहस्तस्मिञ्छुक्रो गृह्यते तस्माच्छुक्रस्यायतनेऽष्टमेऽहन्नाग्रयणो गृह्यते छन्दाग्ंस्येव तद्वि वाहयति प्र वस्यसो विवाहमाप्नोति य एवं वेदाथो देवताभ्य एव यज्ञे संविदं दधाति तस्मादिदमन्योऽन्यस्मै ददाति ॥ ७। २। ८॥ एतद्वै पञ्चमेऽहत्रैष्टुभ एतद्गृह्यते यज्ञस्य पञ्चममन्यस्मा एकञ्च ॥ ७। २। ८॥ गायत्रस्त्रैष्टुभो जागतो जगन्मुखोऽथो स्वꣳ राथन्तरो बार्हत एतद्वै द्वितीयꣳ शुक्रस्त्रिष्टुङ्मुखोऽथो वाक्प्राण एतदथो पथश्चतुर्थं नवमे पंचमꣳ सप्तमे यथ्षष्ठमष्टमेऽहञ्छंदाꣳसि ॥
३४ प्रजापतिरकामयत प्र जायेयेति स एतं द्वादशरात्रमपश्यत्तमाहरत्तेनायजत ततो वै स प्राजायत यः कामयेत प्र जायेयेति स द्वादशरात्रेण यजेत प्रैव जायते ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यज्ञा अथ कस्मादतिरात्रः पूर्वः प्र युज्यत इति चक्षुषी वा एते यज्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमौ य
३५ दग्निष्टोमं पूर्वं प्रयुंजीरन्बहिर्धा कनीनिके दध्युस्तस्मादतिरात्रः पूर्वः प्र युज्यते चक्षुषी एव यज्ञे धित्वा मध्यतः कनीनिके प्रति दधति यो वै गायत्रीं ज्योतिःपक्षां वेद ज्योतिषा भासा सुवर्गं लोकमेति यावग्निष्टोमौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै गायत्री

ज्योतिःपक्षा य एवं वेद ज्योतिषा भासा सुवर्गं लोक
३६ मेति प्रजापतिर्वा एष द्वादशधा विहितो यद्द्वादशरात्रो यावतिरात्रौ तौ पक्षौ
येऽन्तरेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्थ्सद्ध वै सत्रेण स्पृणोति प्राणा वै
सत्प्राणानेव स्पृणोति सर्वासां वा एते प्रजानां प्राणैरासते ये सत्रमासते तस्मात्पृच्छन्ति
किमेते सत्रिण इति प्रियः प्रजानामुत्थितो भवति य एवं वेद ॥ ७। २। ९॥
अग्निष्टोमौ यथ्सुवर्ग३ꣳल्लोकं प्रियः प्रजानां पञ्च च ॥ ७। २। ९॥
३७ न वा एषोऽन्यतो वैश्वानरः सुवर्गाय लोकाय प्राभवदूर्ध्वो ह वा एष आतत
आसीत्ते देवा एतं वैश्वानरं पर्यौहन्थ्सुवर्गस्य लोकस्य प्र भूत्या ऋतवो वा एतेन
प्रजापतिमयाजयन्तेष्वार्ध्नोदधि तदृध्नोति ह वा ऋत्विक्षु य एवं विद्वान्द्वादशाहेन यजते
तेऽस्मिन्नैच्छन्त स रसमह वसन्ताय प्रायच्छद्
३८ यवं ग्रीष्मायौषधीर्वर्षाभ्यो व्रीहीञ्छरदे माषतिलौ हेमन्तशिशिराभ्यां तेनेन्द्रं
प्रजापतिरयाजयत्ततो वा इन्द्र इन्द्रोऽभवत्तस्मादाहुरानुजावरस्य यज्ञ इति स
ह्येतेनाग्रेऽयजतैष ह वै कुणपमत्ति यः सत्रे प्रतिगृह्णाति पुरुषकुणपमश्वकुणपं गौर्वा
अन्नं येन पात्रेणान्नं बिभ्रति यत्तन्न निर्णेनिजति ततोऽधि
३९ मलं जायत एक एव यजेतैको हि प्रजापतिरार्ध्नोद्द्वादश रात्रीर्दीक्षितः स्याद्द्वादश
मासाः संवथ्सरः संवथ्सरः प्रजापतिः प्रजापतिर्वावैष एष ह त्वै जायते यस्तपसोऽधि
जायते चतुर्धा वा एतास्तिस्रस्तिस्रो रात्रयो यद्द्वादशोऽपसदो याः प्रथमा यज्ञं ताभिः
संभरति या द्वितीया यज्ञं ताभिरा रभते
४० यास्तृतीयाः पात्राणि ताभिर्निर्णेनिक्ते याश्चतुर्थीरपि ताभिरात्मानमन्तरतः शुन्धते यो
वा अस्य पशुमत्ति माꣳसꣳ सोऽत्ति यः पुरोडाशं मस्तिष्कꣳ स यः परिवापं पुरीषꣳ
स य आज्यं मज्जानꣳ स यस्सोमग्ग् स्वेदꣳ सोऽपि ह वा अस्य शीर्षण्या निष्पदः
प्रति गृह्णाति यो द्वादशाहे प्रतिगृह्णाति तस्माद्द्वादशाहेन न याज्यं पाप्मनो व्यावृत्त्यै ॥
७। २। १०॥ अयच्छदधि रभते द्वादशाहेन चत्वारि च ॥ ७। २। १०॥
४१ एकस्मै स्वाहा द्वाभ्याग् स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा
षड्भ्यः स्वाहा सप्तभ्यः स्वाहाष्टाभ्यः स्वाहा नवभ्यः स्वाहा दशभ्यः स्वाहैकादशभ्यः
स्वाहा द्वादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा
षोडशभ्यः स्वाहा सप्तदशभ्यः स्वाहाष्टादशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै

स्वाहैकान्न चत्वारि ꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याग् स्वाहा सर्वस्मै स्वाहा ॥ ७। २। ११॥

नवचत्वारिꣳशते स्वाहैकान्नैकविꣳशतिश्च ॥ ७। २। ११॥

४२ एकस्मै स्वाहा त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारि ꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ ७। २। १२॥

एकस्मै त्रिभ्यः पञ्चाशत् ॥ ७। २। १२॥

४३ द्वाभ्याग् स्वाहा चतुर्भ्यः स्वाहा षड्भ्यः स्वाहाऽष्टाभ्यः स्वाहा दशभ्यः स्वाहा द्वादशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा षोडशभ्यः स्वाहाऽष्टादशभ्यः स्वाहा विꣳशत्यै स्वाहाऽष्टानवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ ७। २। १३॥ द्वाभ्यामष्टानवत्यै षड्विꣳशतिः ॥ ७। २। १३॥

४४ त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारि ꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ ७। २। १४॥ त्रिभ्योऽष्टा चत्वारि ꣳशत् ॥ ७। २। १४॥

४५ चतुर्भ्यः स्वाहाष्टाभ्यः स्वाहा द्वादशभ्यः स्वाहा षोडशभ्यः स्वाहा विꣳशत्यै स्वाहा षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ ७। २। १५॥ चतुर्भ्यः षण्णवत्यै षोडश ॥ ७। २। १५॥

४६ पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा विꣳशत्यै स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ ७। २। १६॥

पञ्चभ्यः पञ्चनवत्यै चतुर्दश ॥ ७। २। १६॥

४७ दशभ्यः स्वाहा विꣳशत्यै स्वाहा त्रि ꣳशते स्वाहा चत्वारि ꣳशते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा सप्तत्यै स्वाहाऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ ७। २। १७॥ दशभ्यो द्वाविꣳशतिः ॥ ७। २। १७॥

४८ विꣳशत्यै स्वाहा चत्वारिꣳशते स्वाहा षष्ट्यै स्वाहाशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ ७। २। १८॥ विꣳशत्यै द्वादश ॥ ७। २। १८॥

४९ पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याꣳशताभ्याग् स्वाहा त्रिभ्यः शतेभ्यः स्वाहा चतुर्भ्यः शतेभ्यः स्वाहा पञ्चभ्यः शतेभ्यः स्वाहा षड्भ्यः शतेभ्यः स्वाहा सप्तभ्यः शतेभ्यः स्वाहाष्टाभ्यः शतेभ्यः स्वाहा नवभ्यः शतेभ्यः स्वाहा सहस्राय स्वाहा सर्वस्मै स्वाहा ॥ ७। २। १९॥ पंचाशते द्वात्रिꣳशत् ॥ ७। २। १९॥

५० शताय स्वाहा सहस्राय स्वाहाऽयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहार्बुदाय स्वाहा न्यर्बुदाय स्वाहा समुद्राय स्वाहा मध्याय स्वाहान्ताय स्वाहा परार्धाय स्वाहोषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥ ७। २। २०॥ शतायाष्टात्रिꣳशत् ॥ ७। २। २०॥

साध्याः षड्रात्रं कुसुरुबिंदः सप्तरात्रं बृहस्पतिरष्टरात्रं प्रजापतिस्ताः, क्षुधन्नवरात्रं प्रजापतिरकामयत दशहोतारमृतवं ऐंद्रवायवाग्रान्गायत्रो वै प्रजापतिः स द्वादश रात्रं न वा एकस्मा एकस्मै द्वाभ्यात्रिभ्यश्चतुर्भ्यः पंचभ्यो दशभ्यो विꣳशत्यै पंचाशते शताय विꣳशतिः ॥

साध्या अस्मा इमे लोका गायत्रं वै तृतीयमेकस्मै पंचाशत् ॥

साध्याः सर्वस्मै स्वाहा ॥

## सप्तमकाण्डे तृतीयः प्रश्नः ३

१ प्रजवं वा एतेन यन्ति यद्दशममहः पापावहीयं वा एतेन भवन्ति यद्दशममहर्ज्यो वै प्रजवं यतामपथेन प्रतिपद्यते यः स्थाणुꣳ हन्ति यो भ्रेषं न्येति स हीयते स यो वै दशमेऽहन्नविवाक्य उपहन्यते स हीयते तस्मै य उपहताय व्याह तमेवान्वारभ्य समश्नुतेऽथ यो व्याह स

२ हीयते तस्माद्दशमेऽहन्नविवाक्य उपहताय न व्युच्यमथो खल्वाहुर्यज्ञस्य वै समृद्धेन देवाः सुवर्गं लोकमायन्, यज्ञस्य व्यृद्धेनासुरान्पराभावयन्निति यत्खलु वै यज्ञस्य समृद्धं तद्यजमानस्य यद्व्यृद्धं तद्भ्रातृव्यस्य स यो वै दशमेऽहन्नविवाक्य उपहन्यते स एवाति रेचयति ते ये बाह्या दृशीकवः

३ स्युस्ते वि ब्रूयुर्यदि तत्र न विन्देयुरन्तः सदसाद्व्युच्यं यदि तत्र न विन्देयुर्गृहपतिना व्युच्यं तद्व्युच्यमेवाथ वा एतथ्सर्पराज्ञिया ऋग्भिः स्तुवन्तीयं वै सर्पतो राज्ञी यद्वा अस्यां

किं चार्चन्ति यदानृचुस्तेनेयꣳ सर्पराज्ञी ते यदेव किंच वाचानृचुर्यदतोऽध्यर्चितार
४ स्तदुभयमाप्त्वावरुध्योत्तिष्ठामेति ताभिर्मनसा स्तुवते न वा इमामश्वरथो नाश्वतरीरथः
सद्यः पर्याप्तुमर्हति मनो वा इमाꣳ सद्यः पर्याप्तुमर्हति मनः परिभवितुमथ ब्रह्म वदन्ति
परिमिता वा ऋचः परिमितानि सामानि परिमितानि यजूग्ष्यथैतस्यैवान्तो नास्ति
यद्ब्रह्म तत्प्रतिगृणत आ चक्षीत स प्रतिगरः ॥ ७। ३। १॥ व्याह स दृशीकवोऽर्चितारः
स एकं च ॥ ७। ३। १॥
५ ब्रह्मवादिनो वदन्ति किं द्वादशाहस्य प्रथमेनाह्नर्त्विजां यजमानो वृङ्क्त इति तेज
इन्द्रियमिति किं द्वितीयेनेति प्राणानन्नाद्यमिति किं तृतीयेनेति त्रीनिमा३ꣳल्लोकानिति
किं चतुर्थेनेति चतुष्पदः पशूनिति किं पञ्चमेनेति पञ्चाक्षरां पङ्क्तिमिति किꣳ षष्ठेनेति
षडृतूनिति किꣳ सप्तमेनेति सप्तपदाꣳ शक्करीमिति
६ किमष्टमेनेत्यष्टाक्षरां गायत्रीमिति किं नवमेनेति त्रिवृतग्ं स्तोममिति किं
दशमेनेति दशाक्षरां विराजमिति किमेकादशेनेत्येकादशाक्षरां त्रिष्टुभमिति किं द्वादशेनेति
द्वादशाक्षरां जगतीमित्येतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषां वृङ्क्ते ॥ ७। ३। २॥
शक्करीमित्येकं चत्वारिꣳशच्च ॥ ७। ३। २॥
७ एष वा आप्तो द्वादशाहो यत्त्रयोदशरात्रः समान२ꣳ ह्येतदहर्यत्प्रायणीयश्चोदयनीयश्च
त्र्यतिरात्रो भवति त्रय इमे लोका एषां लोकानामाप्त्यै प्राणो वै प्रथमोऽतिरात्रो व्यानो
द्वितीयोऽपानस्तृतीयः प्राणापानोदानेष्वेवान्नाद्ये प्रति तिष्ठन्ति सर्वमायुर्यन्ति य एवं
विद्वाꣳसस्त्रयोदशरात्रमासते तदाहुर्वाग्वा एषा वितता
८ यद्द्वादशाहस्तां वि च्छिन्द्युर्यन्मध्येऽतिरात्रं कुर्युरुपदासुका गृहपतेर्वाक्स्यादुपरिष्टाच्छन्दोमानां
महाव्रतं कुर्वन्ति संततामेव वाचमव रुंधतेऽनुपदासुका गृहपतेर्वाग्भवति पशवो वै
छन्दोमा अन्नं महाव्रतं यदुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति पशुषु चैवान्नाद्ये च प्रति
तिष्ठन्ति ॥ ७। ३। ३॥ वितता त्रिचत्वारिꣳशच्च ॥
७। ३। ३॥
९ आदित्या अकामयन्तोभयोर्लोकयोर्ऋध्नुयामेति त एतं चतुर्दशरात्रमपश्यन्तमाहरन्तेनायजन्त
ततो वै त उभयोर्लोकयोरार्ध्नुवन्नस्मि२ꣳश्चामुष्मिग्ग्ंश्च य एवं विद्वाꣳसश्चतुर्दशरात्रमासत
उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मि२ꣳश्चामुष्मिग्ग्ंश्च चतुर्दशरात्रो भवति सप्त ग्राम्या
ओषधयः सप्तारण्या उभयीषामवरुद्ध्यै यत्पराचीनानि पृष्ठानि
१० भवन्त्यमुमेव तैर्लोकमभि जयन्ति यत्प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकमभि

जयन्ति त्रयस्त्रि ँ शौ मध्यत स्तोमौ भवतः साम्राज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानां भवन्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥ ७। ३। ४॥ पृष्ठानि चतुस्त्रि ँ शच्च ॥ ७। ३। ४॥
११ प्रजापतिः सुवर्गं लोकमैत्तं देवा अन्वायन्तानादित्याश्च पशवश्चान्वायन्ते देवा अब्रुवन् यान् पशूनुपाजीविष्म त इमेऽन्वाग्मन्निति तेभ्य एतं चतुर्दशरात्रं प्रत्यौहन्त आदित्याः पृष्ठैः सुवर्गं लोकमारोहन्त्र्यहाभ्यामस्मि३ ँ ल्लोके पशून्प्रत्यौहन्पृष्ठैरादित्या अमुष्मि३ ँ ल्लोक आर्ध्नुवन्त्र्यहाभ्यामस्मि३ ँ
१२ ल्लोके पशवो य एवं विद्वा ँ सश्चतुर्दशरात्रमासत उभयोरेव लोकयोरृध्नुवन्त्यस्मि२ ँ श्चामुष्मिग्ग्
पृष्ठैरेवामुष्मि३ ँ ल्लोक ऋध्नुवन्ति त्र्यहाभ्यामस्मि३ ँ ल्लोके ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवध२ ँ स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौ
१३ जो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्ङ्युहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोरृद्ध्वोत्तिष्ठन्ति चतुर्दशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुंधते याश्चतस्रश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥ ७। ३। ५॥ आर्ध्नुवन्त्र्यहाभ्यामस्मिन्थ्सविवधत्वाय प्रतिष्ठित्या एकत्रि ँ शच्च ॥ ७। ३। ५॥
१४ इन्द्रो वै सदृङ्देवताभिरासीथ्स न व्यावृतमगच्छथ्स प्रजापतिमुपाधावत्तस्मा एतं पञ्चदशरात्रं प्रायच्छत्तमाहरत्तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वा ँ सः पञ्चदशरात्रमासते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं
१५ गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्त्यसत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुंधते पशूञ्छन्दो मैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति पञ्चदशरात्रो भवति पञ्चदशो वज्रो वज्रमेव भ्रातृव्येभ्यः प्र हरन्त्यति रात्रावभितो भवत इन्द्रियस्य परिगृहीत्यै ॥ ७। ३। ६॥
अन्तरिक्षमिन्द्रियस्यैकं च ॥ ७। ३। ६॥

१६ इन्द्रो वै शिथिल इवाप्रतिष्ठित आसीथ्सोऽसुरेभ्योऽबिभेथ्स प्रजापतिमुपाधावत्तस्मा
एतं पञ्चदशरात्रं वज्रं प्रायच्छत्तेनासुरान्पराभाव्य विजित्य श्रियमगच्छदग्निष्टुता
पाप्मानं निरदहत पञ्चदशरात्रेणौजो बलमिंद्रियं वीर्यमात्मन्नधत्त य एवं विद्वाꣳसः
पञ्चदशरात्रमासते भ्रातृव्यानेव पराभाव्य विजित्य श्रियं गच्छन्त्यग्निष्टुता पाप्मानं नि
१७ दहन्ते पञ्चदशरात्रेणौजो बलमिंद्रियं वीर्यमात्मन्दधत एता एव पशव्याः पञ्चदश
वा अर्धमासस्य रात्रयोऽर्धमासशः संवथ्सर आप्यते संवथ्सरं पशवोऽनु प्र जायन्ते
तस्मात्पशव्या एता एव सुवर्ग्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवथ्सर
आप्यते संवथ्सरः सुवर्गो लोकस्तस्माथ्सुवर्ग्या ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव
ज्योतिरन्तरिक्षं
१८ गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवध२ꣳ स्यान्मध्ये
पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते
बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते
वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं
१९ यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति
प्रत्यङ्ङ्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोरृद्ध्वोत्तिष्ठन्ति
पञ्चदशैतास्तासां या दश दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुंधते याः
पञ्च पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्यतिरात्रावभितो भवत इन्द्रियस्य वीर्यस्य प्रजायै
पशूनां परिगृहीत्यै ॥ ७। ३। ७॥ गच्छन्त्यग्निष्टुता पाप्मानन्निरन्तरिक्षं लोकं प्रजायै द्वे
च ॥ ७। ३। ७॥
२० प्रजापतिरकामयतान्नादः स्यामिति स एतꣳ सप्तदशरात्रमपश्यत्तमाहरत्तेनायजत
ततो वै सोऽन्नादोऽभवद्य एवं विद्वाꣳसः सप्तदशरात्रमासतेऽन्नादा एव भवन्ति पञ्चाहो
भवति पञ्च वा ऋतवः संवथ्सर ऋतुष्वेव संवथ्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः
पाङ्क्तो यज्ञो यज्ञमेवाव रुंधतेऽसत्रं वा एतद्
२१ यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुंधते पशूञ्छन्दोमैरोजो
वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति सप्तदशरात्रो भवति
सप्तदशः प्रजापतिः प्रजापतेराप्त्या अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥ ७।
३। ८॥ एतथ्सप्त त्रिꣳशच्च ॥
७। ३। ८॥

२२ सा विराड्विक्रम्यातिष्ठद्ब्रह्मणा देवेष्वन्नेनासुरेषु ते देवा अकामयन्तोभय ँ सं वृञ्जीमहि ब्रह्म चान्नं चेति त एता वि ँशति ँ रात्रीरपश्यन्ततो वै त उभय ँ समवृञ्जत ब्रह्म चान्नं च ब्रह्मवर्चसिनोऽन्नादा अभवन् य एवं विद्वा ँ स एता आसत उभयमेव सं वृञ्जते ब्रह्म चान्नं च

२३ ब्रह्मवर्चसिनोऽन्नादा भवन्ति द्वे वा एते विराजौ तयोरेव नाना प्रति तिष्ठन्ति वि ँशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या यावानेव पुरुषस्तमाप्त्वोत्तिष्ठन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं

२४ लोकमभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवध२ ँ स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोक मभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्ङ्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्त्यतिरात्रावभितो भवतो ब्रह्मवर्चसस्यान्नाद्यस्य परिगृहीत्यै ॥ ७। ३। ९॥ वृंजते ब्रह्म चान्नंच सुवर्गमेते सुवर्गंत्रयो वि ँशतिश्च ॥ ७। ३। ९॥

२५ असावादित्योऽस्मि३ ँ ल्लोक आसीत्तं देवाः पृष्ठैः परिगृह्य सुवर्गं लोकमगमयन्परैरवस्तात्पर्यगृह्णन्दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन्परैः परस्तात्पर्यगृह्णन्पृष्ठैरुपावारोहन्त्स वा असावादित्योऽमुष्मि३ ँ ल्लोके परैरुभयतः परिगृहीतो यत्पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकं यजमाना यन्ति परैरवस्तात्परि गृह्णन्ति दिवाकीर्त्येन

२६ सुवर्गे लोके प्रति तिष्ठन्ति परैः परस्तात्परि गृह्णन्ति पृष्ठैरुपावरोहन्ति यत्परे परस्तान्न स्युः पराञ्चः सुवर्गाल्लोकान्निष्पद्येरन् यदवस्तान्न स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्यं परः सामानो भवन्ति सुवर्ग एवैना३ ँ ल्लोक उभयतः परि गृह्णन्ति यजमाना वै दिवाकीर्त्य ँ संवथ्सरः परः सामानोऽभितो दिवाकीर्त्यं परः सामानो भवन्ति संवथ्सर एवोभयतः

२७ प्रति तिष्ठन्ति पृष्ठं वै दिवाकीर्त्यं पार्श्वे परः सामानोऽभितो दिवाकीर्त्यं परः सामानो भवन्ति तस्मादभितः पृष्ठं पार्श्वे भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठ ँ शस्यते यज्ञस्यैव तन्मध्यतो ग्रन्थिं ग्रथ्नन्त्यविस्र ँ साय सप्त गृह्यन्ते सप्त वै शीर्षण्याः प्राणाः प्राणानेव

यजमानेषु दधति यत्पराचीनानि पृष्ठानि भवन्त्यमुमेव तैर्लोकमभ्यारोहन्ति यदिमं लोकं न
२८ प्रत्यवरोहेयुरुद्वा माद्येयुर्यजमानाः प्र वा मीयेरन् यत्प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकं प्रत्यवरोहन्त्यथो अस्मिन्नेव लोके प्रति तिष्ठन्त्यनुन्मादायेन्द्रो वा अप्रतिष्ठित आसीथ्स प्रजापतिमुपाधावत्तस्मा एतमेकवि२ँशतिरात्रं प्रायच्छत्तमाहरत्तेनायजत ततो वै स प्रत्यतिष्ठद्ये बहुयाजिनोऽप्रतिष्ठिताः
२९ स्युस्त एकवि२ँशतिरात्रमासीरन्द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकवि२ँश एतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठन्त्यसावादित्यो न व्यरोचत स प्रजापतिमुपाधावत्तस्मा एतमेकवि२ँशतिरात्रं प्रायच्छत्तमाहरत्तेनायजत ततो वै सोऽरोचत य एवं विद्वा२ँस एकवि२ँशतिरात्रमासते रोचन्त एवैकवि२ँशतिरात्रो भवति रुग्वा एकवि२ँशो रुचमेव गच्छन्त्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकवि२ँशोऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥
७। ३। १०॥ गृह्णन्ति दिवाकीर्त्यैनैवोभयतो नाप्रतिष्ठिता आसत एकवि२ँशतिश्च ॥ ७। ३। १०॥
३० अर्वाङ्यज्ञः सं क्रामत्वमुष्मादधि मामभि । ऋषीणां यः पुरोहितः ॥ निर्देवं निर्वीरं कृत्वा विष्कन्धं तस्मिन् हीयतां योऽस्मान्द्वेष्टि । शरीरं यज्ञशमलं कुसीदं तस्मिन्थ्सीदतु योऽस्मान्द्वेष्टि ॥ यज्ञ यज्ञस्य यत्तेजस्तेन सं क्राम मामभि । ब्राह्मणानृत्विजो देवान्, यज्ञस्य तपसा ते सवाहमा हुवे ॥ इष्टेन पक्वमुप
३१ ते हुवे सवाहम् । सं ते वृञ्जे सुकृत२ँ सं प्रजां पशून् ॥
प्रैषान्थ्सामिधेनीराघारावाज्यभागावाश्रुतं प्रत्याश्रुतमा शृणामि ते । प्रयाजानूयाजान्थ्स्विष्टकृतमिडाम आ वृञ्जे सुवः ॥ अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः । याज्यानुवाक्याभ्यामुप ते हुवे स वाहं यज्ञमा ददे ते वषट्कृतम् ॥
स्तुत२ँ शस्त्रं प्रतिगरं ग्रहमिडामाशिष
३२ आ वृञ्जे सुवः । पत्नीसंयाजानुप ते हुवे सवाह२ँ समिष्ट यजुरा ददे तव ॥ पशून्थ्सुतं पुरोडाशान्थ्सवनान्योत यज्ञम् । देवान्थ्सेन्द्रानुप ते हुवे सवाहमग्निमुखान्थ्सोमवतो ये च विश्वे ॥
७। ३। ११॥ उप ग्रहमिडामाशिषो द्वात्रि२ँशच्च ॥ ७। ३। ११॥
३३ भूतं भव्यं भविष्यद्वषट्थ्स्वाहा नम ऋक्साम यजुर्वषट्थ्स्वाहा नमो गायत्री

त्रिष्टुब्जगती वषट्थ्स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट्थ्स्वाहा नमोग्निर्वायुः सूर्यो वषट्थ्स्वाहा नमः प्राणो व्यानोऽपानो वषट्थ्स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट्थ्स्वाहा नमः पिता पुत्रः पौत्रो वषट्थ्स्वाहा नमो भूर्भुवः सुवर्वषट्थ्स्वाहा नमः ॥ ७। ३। १२॥ भुवश्चत्वारि च ॥ ७। ३। १२॥

३४ आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यावान् । आपो देवीर्यज्ञिया मा विशन्तु सहस्रस्य मा भूमा मा प्र हासीत् ॥ आ मे ग्रहो भवत्वा पुरोरुक्स्तुतशस्त्रे मा विशताꣳ समीची । आदित्या रुद्रा वसवो मे सदस्याः सहस्रस्य मा भूमा मा प्र हासीत् ॥ आ माग्निष्टोमो विशतूक्थ्यश्चातिरात्रो मा विशत्वापिशर्वरः । तिरो अह्निया मा सुहुता आ विशन्तु सहस्रस्य मा भूमा मा प्र हासीत् ॥ ७। ३। १३॥ अग्निष्टोमो विशत्वष्टादश च ॥ ७। ३। १३॥

३५ अग्निना तपोऽन्वभवद्वाचा ब्रह्म मणिना रूपाणीन्द्रेण देवान्, वातेन प्राणान्थ्सूर्येण द्यां चन्द्रमसा नक्षत्राणि यमेन पितॄन्राज्ञा मनुष्यान्फलेन नादेयानजगरेण सर्पान्व्याघ्रेणारण्यान्पशूञ्छ्येनेन पतत्रिणो वृष्णाश्वानृषभेण गाबस्तेनाजा वृष्णिनावीर्व्रीहिणान्नानि यवेनौषधीर्न्यग्रोधेन वनस्पतीनुदुंबरेणोर्जं गायत्रिया छन्दाꣳसि त्रिवृता स्तोमान्ब्राह्मणेन वाचम् ॥ ७। ३। १४॥ ब्राह्मणेनैकं च ॥ ७। ३। १४॥

३६ स्वाहाधिमाधीताय स्वाहा स्वाहाधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहादित्यै स्वाहादित्यै मह्यै स्वाहादित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरंधिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा सर्वस्मै स्वाहा ॥ ७। ३। १५॥ पुरुरूपाय स्वाहा दश च ॥ ७। ३। १५॥

३७ दद्भ्यः स्वाहा हनूभ्याग् स्वाहोष्ठाभ्याग् स्वाहा मुखाय स्वाहा नासिकाभ्याग् स्वाहाक्षीभ्याग् स्वाहा कर्णाभ्याग् स्वाहा पार इक्षवोऽवार्येभ्यः पक्ष्मभ्यः स्वाहावार इक्षवः पार्येभ्यः पक्ष्मभ्यः स्वाहा शीर्ष्णे स्वाहा भ्रूभ्याग् स्वाहा ललाटाय स्वाहा मूर्ध्ने स्वाहा मस्तिष्काय स्वाहा केशेभ्यः स्वाहा वहाय स्वाहा ग्रीवाभ्यः स्वाहा स्कन्धेभ्यः स्वाहा कीकसाभ्यः स्वाहा पृष्टीभ्यः स्वाहा पाजस्याय स्वाहा पार्श्वाभ्याग् स्वाहा

३८ ऽꣳसाभ्याग् स्वाहा दोषभ्याग् स्वाहा बाहुभ्याग् स्वाहा जङ्घाभ्याग् स्वाहा

श्रोणी॑भ्याग्ं स्वाहो॒रुभ्याग्ं स्वाहा॑ष्ठीवद्भ्याग्ं स्वाहा॒ जङ्घा॑भ्याग्ं स्वाहा॑ भ॒सदे॒ स्वाहा॑ शिख॒ण्डेभ्यः॒ स्वाहा॑ वाल॒धाना॑य॒ स्वाहा॒ण्डाभ्या॒ग्॒ं स्वाहा॒ शेपा॑य॒ स्वाहा॒ रेत॑से॒ स्वाहा॑ प्र॒जाभ्यः॒ स्वाहा॑ प्र॒जन॑नाय॒ स्वाहा॑ प॒द्भ्यः स्वाहा॑ श॒फेभ्यः॒ स्वाहा॒ लोम॑भ्यः॒ स्वाहा॑ त्व॒चे स्वाहा॒ लोहि॑ताय॒ स्वाहा॑ मा॒ꣳ॒साय॒ स्वाहा॒ स्नाव॑भ्यः॒ स्वाहा॒स्थभ्यः॒ स्वाहा॑ म॒ज्जभ्यः॒ स्वाहा॒ङ्गे॑भ्यः॒ स्वाहा॒त्मने॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑ ॥ ७। ३। १६॥ पा॒र्श्वाभ्या॒ग्ं स्वाहा॑ म॒ज्जभ्यः॒ स्वाहा॒ षट्च॑ ॥ ७। ३। १६॥

३९ अ॒ञ्ज्येता॑य॒ स्वाहा॑ञ्जिस॒क्थाय॒ स्वाहा॑ शिति॒प॒दे॒ स्वाहा॒ शिति॑ककु॒दे॒ स्वाहा॑ शिति॒रन्ध्रा॑य॒ स्वाहा॑ शिति॒पृ॒ष्ठाय॒ स्वाहा॑ शि॒त्यꣳ॒सा॑य॒ स्वाहा॑ पु॒ष्पक॒र्णा॑य॒ स्वाहा॑ शि॒त्यो॒ष्ठा॑य॒ स्वाहा॑ शिति॒भ्र॒वे॒ स्वाहा॒ शिति॑भसदे॒ स्वाहा॑ श्वे॒तानू॑काशाय॒ स्वाहा॒ञ्ज॒ये॒ स्वाहा॑ ल॒लामा॑य॒ स्वाहासि॑तज्ञवे॒ स्वाहा॑ कृ॒ष्णैता॑य॒ स्वाहा॑ रोहि॑तै॒ताय॒ स्वाहा॑रु॒णैता॑य॒ स्वाहे॒दृशा॑य॒ स्वाहा॑ की॒दृशा॑य॒ स्वाहा॑ ता॒दृशा॑य॒ स्वाहा॑ स॒दृशा॑य॒ स्वाहा॒ विस॑दृशाय॒ स्वाहा॒ सु॒स॑दृशाय॒ स्वाहा॑ रू॒पाय॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑ ॥ ७। ३। १७॥
रू॒पाय॒ स्वाहा॒ द्वे च॑ ॥ ७। ३। १७॥

४० कृ॒ष्णाय॒ स्वाहा॑ श्वे॒ताय॒ स्वाहा॑ पि॒शङ्गा॑य॒ स्वाहा॑ सा॒रङ्गा॑य॒ स्वाहा॑रु॒णाय॒ स्वाहा॑ गौ॒राय॒ स्वाहा॑ ब॒भ्रवे॒ स्वाहा॑ न॒कु॒लाय॒ स्वाहा॒ रोहि॑ताय॒ स्वाहा॒ शोणा॑य॒ स्वाहा॑ श्या॒वाय॒ स्वाहा॑ श्या॒माय॒ स्वाहा॑ पा॒क॒लाय॒ स्वाहा॑ सु॒रू॒पाय॒ स्वाहा॒नु॒रू॒पाय॒ स्वाहा॒ वि॒रू॑पाय॒ स्वाहा॒ स॒रू॑पाय॒ स्वाहा॒ प्रति॑रूपाय॒ स्वाहा॑ श॒बला॑य॒ स्वाहा॑ क॒म॒लाय॒ स्वाहा॒ पृश्न॑ये॒ स्वाहा॑ पृश्निस॒क्थाय॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑ ॥ ७। ३। १८॥ कृ॒ष्णाय॒ षट्च॑त्वारिꣳशत् ॥ ७। ३। १८॥

४१ ओष॑धीभ्यः॒ स्वाहा॒ मूले॑भ्यः॒ स्वाहा॒ तूले॑भ्यः॒ स्वाहा॒ काण्डे॑भ्यः॒ स्वाहा॒ वल्शे॑भ्यः॒ स्वाहा॒ पुष्पे॑भ्यः॒ स्वाहा॒ फले॑भ्यः॒ स्वाहा॑ गृ॒हीतेभ्यः॒ स्वाहाग्॑हीतेभ्यः॒ स्वाहाव॑पन्नेभ्यः॒ स्वाहा॒ शया॑नेभ्यः॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑ ॥ ७। ३। १९॥ ओष॑धीभ्यश्च॒तुर्विꣳ॑शतिः ॥ ७। ३। १९॥

४२ व॒न॒स्पति॑भ्यः॒ स्वाहा॒ मूले॑भ्यः॒ स्वाहा॒ तूले॑भ्यः॒ स्वाहा॒ स्कन्धो॑भ्यः॒ स्वाहा॒ शाखा॑भ्यः॒ स्वाहा॑ प॒र्णेभ्यः॒ स्वाहा॒ पुष्पे॑भ्यः॒ स्वाहा॒ फले॑भ्यः॒ स्वाहा॑ गृ॒हीतेभ्यः॒ स्वाहाग्॑हीतेभ्यः॒ स्वाहाव॑पन्नेभ्यः॒ स्वाहा॒ शया॑नेभ्यः॒ स्वाहा॑ शिष्टा॑य॒ स्वाहाति॑शिष्टाय॒ स्वाहा॒ परि॑शिष्टाय॒ स्वाहा॒ सꣳशि॑ष्टाय॒ स्वाहोच्छि॑ष्टाय॒ स्वाहा॑ रिक्ता॑य॒ स्वाहारि॑क्ताय॒ स्वाहा॒ प्ररि॑क्ताय॒ स्वाहा॒ सꣳरि॑क्ताय॒ स्वाहोद्रि॑क्ताय॒ स्वाहा॒ सर्व॑स्मै॒ स्वाहा॑ ॥ ७। ३। २०॥ व॒न॒स्पति॑भ्यः॒

स्कन्धोभ्यः शिष्टाय रिक्ताय षट् चत्वारिँशत् ॥ ७। ३। २०॥
प्रजवं ब्रह्मवादिनः किमेष वा आप्त आदित्या उभयोः प्रजापतिरन्वायन्निंद्रो वै सदृङ्ङिंद्रो वै शिथिलः प्रजापतिरकामयतान्नादः सा विराडसावादित्योऽर्वाङ् भूतमा मेऽग्निना स्वाहाऽधिन्दद्ध्योऽश्येताय कृष्णायौषधीभ्यो वनस्पतिभ्यो विँशतिः ॥
प्रजवं प्रजापतिर्यदछंदोमन्ते हुवे सवाहमोषधीभ्यो द्विचत्वारिँशत् ॥
प्रजवँ सर्वस्मै स्वाहा ॥

## सप्तमकाण्डे चतुर्थः प्रश्नः ४

१ बृहस्पतिरकामयत श्रन्मे देवा दधीरन्गच्छेयं पुरोधामिति स एतं चतुर्विँशतिरात्रमपश्यत्तमाहरत्तेनायजत ततो वै तस्मै श्रद्देवा अदधतागच्छत्पुरोधां य एवं विद्वाँसश्चतुर्विँशतिरात्रमासते श्रदेभ्यो मनुष्या दधते गच्छन्ति पुरोधां ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायु
२ रिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्त्यसत्त्रं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुंधते पशूङ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव
३ यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येतेवै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति चतुर्विँशतिरात्रो भवति चतुर्विँशतिरर्धमासाः संवथ्सरः संवथ्सरः सुवर्गो लोकः संवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विँशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुंधतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ ७। ४। १॥
असावायुराभ्यामेव पंच चत्वारिँशच्च ॥ ७। ४। १॥
४ यथा वै मनुष्या एवं देवा अग्र आसन्तेऽकामयन्तावर्तिं पाप्मानं मृत्युमपहत्य दैवीँ सँसदं गच्छेमेति त एतं चतुर्विँशतिरात्रमपश्यन्तमाहरन्तेनायजन्त ततो वै तेऽवर्तिं पाप्मानं मृत्युमपहत्य दैवीँ सँ सदमगच्छन्, य एवं विद्वाँसश्चतुर्विँशति रात्रमासतेऽवर्तिमेव पाप्मानमपहत्य श्रियं गच्छन्ति श्रीर्हि मनुष्यस्य
५ दैवी सँसञ्ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा ऋतवः संवथ्सरस्तं मासा अर्धमासा ऋतवः प्रविश्य दैवीँ सँसदमगच्छन् य

एवं विद्वाꣳसश्चतुर्विꣳशतिरात्रमासते संवथ्सरमेव प्रविश्य वस्यसीꣳ सꣳसदं गच्छन्ति
त्रयस्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिꣳशाः परस्तात्त्रयस्त्रिꣳशैरेवोभयतोऽवर्तिं
पाप्मानमपहत्य दैवीꣳसꣳसदं मध्यतो
६ गच्छन्ति पृष्ठानि हि दैवी सꣳसञ्ज्ञामि वा एतत्कुर्वन्ति यत्त्रयस्त्रयस्त्रिꣳशा अन्वञ्चो
मध्येऽनिरुक्तो भवति तेनाजाम्यूर्ध्वानि पृष्ठानि भवन्त्यूर्ध्वाश्छन्दोमा उभाभ्याꣳरूपाभ्याꣳ
सुवर्गं लोकं यन्त्यसत्त्रं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्त्रं देवता एव
पृष्ठैरव रुंधते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशव
७ श्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति त्रयस्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति
त्रयस्त्रयस्त्रिꣳशाः परस्तान्मध्ये पृष्ठान्युरो वै त्रयस्त्रिꣳशा आत्मा पृष्ठान्यात्मन एव
तद्यजमानाः शर्म नह्यन्तेऽनार्त्यै बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव
यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव
८ सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि
पृष्ठान्युपयन्ति प्रत्यङ्ख्षडहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्
ऋद्ध्वोत्तिष्ठन्ति त्रिवृतोऽधि त्रिवृतमुप यन्ति स्तोमानाꣳ संपत्त्यै प्रभवाय ज्योतिरग्निष्टोमो
भवत्ययं वाव स क्षयोऽस्मादेव तेन क्षयान्न यन्ति चतुर्विꣳशतिरात्रो भवति
चतुर्विꣳशतिरर्धमासाः संवथ्सरः संवथ्सरः सुवर्गो लोकः संवथ्सर एव सुवर्गे लोके
प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव
रुंधतेऽति रात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ ७। ४। २॥ मनुष्यस्य मध्यतः
पशवस्ताभ्यामेव संवथ्सरश्चतुर्विꣳशतिश्च ॥ ७। ४। २॥
९ ऋक्षा वा इयमलोमकासीथ्साकामयतौषधीभिर्वनस्पतिभिः प्र जायेयेति
सैतास्त्रिꣳशतꣳ रात्रीरपश्यत्ततो वा इयमोषधीभिर्वनस्पतिभिः प्राजायत ये प्रजाकामाः
पशुकामाः स्युस्त एता आसीरन्प्रैव जायन्ते प्रजया पशुभिरियं वा अक्षुध्यथ्सैतां
विराजमपश्यत् तामात्मन्धित्वान्नाद्यमवारुंधौषधी
१० र्वनस्पतीन्प्रजां पशून्तेनाऽवर्धत सा जेमानं महिमानमगच्छद्य एवं विद्वाꣳस एता
आसते विराजमेवात्मन्धित्वान्नाद्यमव रुंधते वर्धन्ते प्रजया पशुभिर्जेमानं महिमानं
गच्छन्ति ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड्वा
ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवथ्सरं ते संवथ्सर एव

११ प्रति तिष्ठन्ति त्रयस्त्रिꣳशात्त्रयस्त्रिꣳशमुप यन्ति यज्ञस्य संतत्या अथो प्रजापतिर्वै त्रयस्त्रिꣳशः प्रजापतिमेवारभन्ते प्रतिष्ठित्यै त्रिणवो भवति विजित्या एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवात्मन्दधते त्रिवृदग्निष्टुद्भवति पाप्मानमेव तेन निर्दहन्तेऽथो तेजो वै त्रिवृत्तेज एवात्मन्दधते पञ्चदश इन्द्रस्तोमो भवतीन्द्रियमेवाव

१२ रुंधते सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवात्मन्दधते चतुर्विꣳशो भवति चतुर्विꣳशतिरर्धमासाः संवथ्सरः संवथ्सरः सुवर्गो लोकः संवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै विषूवान्, विषूवन्तो भवन्ति य एवं विद्वाꣳस एता आसते चतुर्विꣳशात्पृष्ठान्युप यन्ति संवथ्सर एव प्रतिष्ठाय

१३ देवता अभ्यारोहन्ति त्रयस्त्रिꣳशात्त्रयस्त्रिꣳशमुप यन्ति त्रयस्त्रिꣳशद्वै देवता देवतास्वेव प्रति तिष्ठन्ति त्रिणवो भवतीमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठन्ति द्वावेकविꣳशौ भवतः प्रतिष्ठित्या अथो रुचमेवात्मन्दधते बहवः षोडशिनो भवन्ति तस्माद्बहवः प्रजासु वृषाणो यदेते स्तोमा व्यतिषक्ता भवन्ति तस्मादियमोषधीभिर्वनस्पतिभिर्व्यतिषक्ता

१४ व्यतिषज्यन्ते प्रजया पशुभिर्य एवं विद्वाꣳस एता आसतेऽक्लृप्ता वा एते सुवर्गं लोकं यन्त्युच्चावचान् हि स्तोमानुपयन्ति यदेत ऊर्ध्वाः क्लृप्ताः स्तोमा भवन्ति क्लृप्ता एव सुवर्गं लोकं यन्त्युभयोरेभ्यो लोकयोः कल्पते त्रिꣳशदेतास्त्रिꣳशदक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुंधतेऽतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥ ७। ४। ३॥ ओषधीः संवथ्सर एवाव प्रतिष्ठाय व्यतिषक्तैकान्न पंचाशच्च ॥ ७। ४। ३॥

१५ प्रजापतिः सुवर्गं लोकमैत्तं देवा येन येन छंदसानु प्रायुञ्जत तेन नाप्नुवन्त एता द्वात्रिꣳशतꣳ रात्रीरपश्यन्द्वात्रिꣳशदक्षरानुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छंदसा प्रजापतिमाप्त्वाभ्यारुह्य सुवर्गं लोकमायन् य एवं विद्वाꣳस एता आसते द्वात्रिꣳशदेता द्वात्रिꣳशदक्षरानुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छंदसा प्रजापतिमाप्त्वा श्रियं गच्छन्ति

१६ श्रीर्हि मनुष्यस्य सुवर्गो लोको द्वात्रिꣳशदेता द्वात्रिꣳशदक्षरानुष्टुग्वागनुष्टुप्सर्वामेव वाचमाप्नुवन्ति सर्वे वाचो वदितारो भवन्ति सर्वे हि श्रियं गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्ति बृहद्रथंतराभ्यां यन्ती

१७ यं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचस्त्र्यहानुपयन्ति प्रत्यङ्त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर् ऋद्ध्वोत्तिष्ठन्ति द्वात्रिꣳशदेतास्तासां यास्त्रिꣳशत्त्रिꣳशदक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुंधते ये द्वे अहोरात्रे एव ते उभाभ्याꣳ रूपाभ्याꣳ सुवर्गं लोकं यन्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥ ७। ४। ४॥ गच्छन्ति यन्ति त्रिꣳशदक्षरा द्वाविꣳशतिश्च ॥ ७। ४। ४॥

१८ द्वे वाव देवसत्रे द्वादशाहश्चैव त्रयस्त्रिꣳशदहश्च य एवं विद्वाꣳ संवत्सरं त्रयस्त्रिꣳशदहमासते साक्षादेव देवता अभ्यारोहन्ति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान्भवति यदि नावविध्यति सदृङ्ङ् एवं विद्वाꣳ संवत्सरं त्रयस्त्रिꣳशदहमासते वि पाप्मना भ्रातृव्येणा वर्तन्तेऽहर्भाजो वा एता देवा अग्र आहर

१९ न्नहरेकोऽभजताहरेकस्ताभिर्वै ते प्रबाहुगार्ध्नुवन् य एवं विद्वाꣳ संवत्सरं त्रयस्त्रिꣳशदहमासते सर्व एव प्रबाहुगृध्नुवन्ति सर्वे ग्रामणीयं प्राप्नुवन्ति पञ्चाहा भवन्ति पञ्च वा ऋतवः संवथ्सर ऋतुष्वेव संवथ्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुंधते त्रीण्याश्विनानि भवन्ति त्रय इमे लोका ए

२० ष्वेव लोकेषु प्रति तिष्ठन्त्यथो त्रीणि वै यज्ञस्येन्द्रियाणि तान्येवाव रुंधते विश्वजिद्भवत्यन्नाद्यस्यावरुद्ध्यै सर्वपृष्ठो भवति सर्वस्याभिजित्यै वाग्वै द्वादशाहो यत्पुरस्ताद्द्वादशाहमुपेयुरनाप्तां वाचमुपेयुरुपदासुकैषां वाक्स्यादुपरिष्टाद्द्वादशाहमुप यन्त्याप्तामेव वाचमुप यन्ति तस्मादुपरिष्टाद्वाचा वदामोऽवान्तरं

२१ वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताꣳ ह वा उदङ्कः शौल्बायनः सत्रस्यर्द्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्द्ध्या अथो यदेव पूर्वेष्वहस्सु विलोम क्रियते तस्यैवैषा शान्तिर्द्व्यनीका वा एता रात्रयो यजमाना विश्वजिथ्सहातिरात्रेण पूर्वाः षोडश सहातिरात्रेणोत्तराः षोडश य एवं विद्वाꣳ संवत्सरं त्रयस्त्रिꣳशदहमासत ऐषां द्व्यनीका प्रजा जायतेऽतिरात्रावभितो भवतः परिगृहीत्यै ॥ ७। ४। ५॥

अहरन्नेष्ववान्तरꣳ षोडश सह सप्तदश च ॥ ७। ४। ५॥

२२ आदित्या अकामयन्त सुवर्गं लोकमियामेति ते सुवर्गं लोकं न प्राजानन्न सुवर्गं

लोकमायन्त एतꣳ षड्विꣳशद्रात्रमपश्यन्तमाहरन्तेनायजन्त ततो वै ते सुवर्गं लोकं प्राजानन्थ्सुवर्गं लोकमायन्, य एवं विद्वाꣳसः षड्विꣳशद्रात्रमासते सुवर्गमेव लोकं प्र जानन्ति सुवर्गं लोकं यन्ति ज्योतिरतिरात्रो
२३ भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै षडहा भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति चत्वारो भवन्ति चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्यसत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुंधते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव
२४ वीर्ये पशुषु प्रति तिष्ठन्ति षड्विꣳशद्रात्रो भवति षड्विꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैव पशूनव रुंधते बृहती छंदसाग् स्वाराज्यमाश्नुताश्नुवते स्वाराज्यं य एवं विद्वाꣳसः षड्विꣳशद्रात्रमासते सुवर्गमेव लोकं यन्त्यतिरात्रावभितो भवतः सुवर्गस्य लोकस्य परिगृहीत्यै ॥ ७। ४। ६॥ अतिरात्र ओजस्येव षट् त्रिꣳशच्च ॥ ७। ४। ६॥
२५ वसिष्ठो हतपुत्रोऽकामयत विन्देय प्रजामभि सौदासान्भवेयमिति स एतमेकस्मान्न पञ्चाशमपश्यत्तमाहरत्तेनायजत ततो वै सोऽविन्दत प्रजामभि सौदासानभवद्य एवं विद्वाꣳस एकस्मान्न पञ्चाशमासते विन्दन्ते प्रजामभि भ्रातृव्यान्भवन्ति त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव मुखꣳ सꣳश्यन्ति दश पञ्चदशा भवन्ति पञ्चदशो वज्रो
२६ वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति षोडशिमद्दशममहर्भवति वज्र एव वीर्यं दधति द्वादश सप्तदशा भवन्त्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तैर्जायन्ते पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट्पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवथ्सरं ते संवथ्सर एव प्रति तिष्ठन्ति द्वादशैकविꣳशा भवन्ति प्रतिष्ठित्या अथो रुचमेवात्म
२७ न्दधते बहवः षोडशिनो भवन्ति विजित्यै षडाश्विनानि भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्यूनातिरिक्ता वा एता रात्रय ऊनास्तद्यदेकस्यै न पञ्चाशदतिरिक्तास्तद्यद्भूयसीरष्टा चत्वारिꣳशत ऊनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन्प्रैव जायन्ते प्रजया पशुभिर्वैराजो वा एष यज्ञो यदेकस्मान्नपञ्चाशो य एवं विद्वाꣳस एकस्मान्नपञ्चाशमासते विराजमेव गच्छन्त्यन्नादा भवन्त्यतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥ ७। ४। ७॥ वज्र आत्मन्प्रजया द्वाविꣳशतिश्च ॥ ७। ४। ७॥
२८ संवथ्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै संवथ्सरस्य पत्नी

यदेकाष्टकैतस्यां वा एष एता१ँ रात्रिं वसति साक्षादेव संवथ्सरमारभ्य दीक्षन्त आर्तं वा एते संवथ्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतो व्यस्तं वा एते संवथ्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः फल्गुनीपूर्णमासे दीक्षेरन्मुखं वा एतथ्

२९ संवथ्सरस्य यत्फल्गुनीपूर्णमासो मुखत एव संवथ्सरमारभ्य दीक्षन्ते तस्यैकैव निर्या यथ्सां मेघ्ये विषूवान्थ्सं पद्यते चित्रापूर्णमासे दीक्षेरन्मुखं वा एतथ्संवथ्सरस्य यच्चित्रापूर्णमासो मुखत एव संवथ्सरमारभ्य दीक्षन्ते तस्य न काचन निर्या भवति चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्तेषामेकाष्टकायां क्रयः सं पद्यते तेनैकाष्टकां न छंबट्कुर्वन्ति तेषां

३० पूर्वपक्षे सुत्या सं पद्यते पूर्वपक्षं मासा अभि सं पद्यन्ते ते पूर्वपक्ष उत्तिष्ठन्ति तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत्तिष्ठन्ति तान्कल्याणी कीर्तिरनूत्तिष्ठत्यराथ्सुरिमे यजमाना इति तदनु सर्वे राध्नुवन्ति ॥ ७। ४। ८॥ एतच्छंबट्कुर्वन्ति तेषां चतुस्त्रि१ँशच्च ॥ ७। ४। ८॥

३१ सुवर्गं वा एते लोकं यन्ति ये सत्रमुपयन्त्यभीन्धत एव दीक्षाभिरात्मानग्ग्ं श्रपयन्त उपसद्भिर्द्वाभ्यां लोमाव द्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृद्भ्यां मा१ँसं द्वाभ्यामस्थि द्वाभ्यां मज्ञानमात्मदक्षिणं वै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं लोकं यन्ति शिखामनु प्र वपन्त ऋद्ध्या अथो रघीया१ँसः सुवर्गं लोकमयामेति ॥ ७। ४। ९॥ सुवर्गं पंचाशत् ॥ ७। ४। ९॥

३२ ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात्तं प्रथममुप यन्तीत्येतद्वा अग्निष्टोमं प्रथममुप यन्त्यथोक्थ्यमथ षोडशिनमथातिरात्रमनुपूर्वमेवैतद्यज्ञ क्रतूनुपेत्य तानालभ्य परिगृह्य सोममेवैतत्पिबन्त आसते ज्योतिष्टोमं प्रथममुप यन्ति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव स्तोमान् प्र युञ्जते ते

३३ स२१ँस्तुता विराजमभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयायुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्विराट्थ्सुवर्गमेव तेन लोकं यन्ति रथंतरं दिवा भवति रथंतरं नक्तमित्याहुर्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने ब्रह्मसामं बृहत्तन्मध्यतो दधति विधृत्यै तेनाजामि ॥ ७। ४। १०॥ त एकान्न पंचाशच्च ॥ ७। ४। १०॥

३४ ज्योतिष्टोमं प्रथममुप यन्त्यस्मिन्नेव तेन लोके प्रति तिष्ठन्ति गोष्टोमं द्वितीयमुप यन्त्यन्तरिक्ष एव तेन प्रति तिष्ठन्त्यायुष्टोमं तृतीयमुप यन्त्यमुष्मिन्नेव तेन लोके प्रति

तिष्ठन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुर्यदेतान्थ्स्तोमानुपयन्त्येष्वेव तल्लोकेषु सत्रिणः प्रतितिष्ठन्तो यन्ति ते स२ँ स्तुता विराज
३५ मभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयायुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्विराडूर्जमेवाव रुंधते ते न क्षुधार्तिमार्च्छन्त्यक्षोधुका भवन्ति क्षुथ्संबाधा इव हि सत्रिणोऽग्निष्टोमावभितः प्रधीतावुक्थ्या मध्ये नभ्यं तत्तदेतत्परियद्देवचक्रं यदेतेन
३६ षडहेन यन्ति देवचक्रमेव समारोहन्त्यरिष्ट्यै ते स्वस्ति समश्नुवते षडहेन यन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्युभयतो ज्योतिषा यन्त्युभयत एव सुवर्गे लोके प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि द्वादशाहानि सं पद्यन्ते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ
३७ तत्पुरुषमनु पर्यावर्तन्ते त्रयः षडहा भवन्ति तान्यष्टादशाहानि सं पद्यन्ते नवान्यानि नवान्यानि नव वै पुरुषे प्राणास्तत्प्राणाननु पर्यावर्तन्ते चत्वारः षडहा भवन्ति तानि चतुर्वि२ँ शतिरहानि सं पद्यन्ते चतुर्वि२ँ शतिरर्धमासाः संवथ्सरस्तथ्संवथ्सरमनु पर्यावर्तन्तेऽप्रतिष्ठितः संवथ्सर इति खलु वा आहुर्वर्षीयान्प्रतिष्ठाया इत्येतावद्वै संवथ्सरस्य ब्राह्मणं यावन्मासो मासिमास्येव प्रतितिष्ठन्तो यन्ति ॥ ७। ४। ११॥
विराजमेतेन द्वादशावेतावद्वा अष्टौ च ॥ ७। ४। ११॥
३८ मेषस्त्वा पचतैरवतु लोहितग्रीवश्छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमसैरुदुंबर ऊर्जा गायत्री छन्दोभिस्त्रिवृथ्स्तोमैरवन्तीः स्थावन्तीस्त्वावन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाप्यानां निधीनां त्वा निधिपति२ँ हवामहे वसो मम ॥ ७। ४। १२॥
मेषः षट् त्रि२ँशत् ॥ ७। ४। १२॥
३९ कूप्याभ्यः स्वाहा कूल्याभ्यः स्वाहा विकर्याभ्यः स्वाहाऽवट्याभ्यः स्वाहा खन्याभ्यः स्वाहा ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा सरस्याभ्यः स्वाहा वैशन्तीभ्यः स्वाहा पल्वल्याभ्यः स्वाहा वर्ष्याभ्यः स्वाहाऽवर्ष्याभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा पृष्वाभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा स्थावराभ्यः स्वाहा नादेयीभ्यः स्वाहा सैन्धवीभ्यः स्वाहा समुद्रियाभ्यः स्वाहा सर्वाभ्यः स्वाहा ॥ ७। ४। १३॥
कूप्याभ्यश्चत्वारि२ँशत् ॥ ७। ४। १३॥
४० अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवहन्तीभ्यः स्वाहा समन्तं वहन्तीभ्यः स्वाहा शीघ्रं वहन्तीभ्यः स्वाहा शीभं वहन्तीभ्यः स्वाहोग्रं वहन्तीभ्यः स्वाहा भीमं वहन्तीभ्यः

स्वाहाऽभोभ्यः स्वाहा नभोभ्यः स्वाहा महोभ्यः स्वाहा सर्वस्मै स्वाहा ॥ ७। ४। १४॥
अद्भ्य एकान्न त्रिꣳशत् ॥ ७। ४। १४॥
४१ यो अर्वन्तं जिघाꣳसति तमभ्यमीति वरुणः । परो मर्तः परः श्वा ॥ अहं च त्वं च
वृत्रहन्थ्सं बभूव सनिभ्य आ । अरातीवा चिदद्रिवोऽनु नौ शूर मꣳसतै भद्रा इन्द्रस्य
रातयः ॥ अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानꣳ रजाꣳसि । स्वेना हि वृत्रꣳ
शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते ॥ ७। ४। १५॥ विविद द्वे च ॥ ७। ४।
१५॥
४२ नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये नमोऽधिपतयेऽधिपतिरस्यधिपतिं
मा कुर्वधिपतिरहं प्रजानां भूयासं मां धेहि मयि धेह्युपाकृताय स्वाहालब्धाय स्वाहा
हुताय स्वाहा ॥ ७। ४। १६॥ नम एकान्न त्रिꣳशत् ॥ ७। ४। १६॥
४३ मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् । पीवस्वतीर्जीवधन्याः
पिबन्त्ववसाय पद्वते रुद्र मृड ॥ याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि
वेद । या अंगिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ॥ या देवेषु तनुवमैरयन्त
यासाꣳ सोमो विश्वा रूपाणि वेद । ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र
४४ गोष्ठे रिरीहि ॥ प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः । शिवाः
सतीरुप नो गोष्ठमाकस्तासां वयं प्रजया सꣳ सदेम ॥ इह धृतिः स्वाहेह विधृतिः
स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा मही मूषु सुत्रामाणम् ॥ ७। ४। १७॥ इन्द्राष्टा
त्रिꣳशच्च ॥ ७। ४। १७॥
४५ कि२ꣳ स्विदासीत्पूर्वचित्तिः कि२ꣳ स्विदासीद्बृहद्वयः । कि२ꣳ स्विदासीत्पिशंगिला
कि२ꣳ स्विदासीत्पिलिप्पिला ॥ द्यौरासीत्पूर्वचित्तिरश्व आसीद्बृहद्वयः ।
रात्रिरासीत्पिशंगिलाविरासीत्पिलिप्पिला ॥ कः स्विदेकाकी चरति क उ स्विज्जायते
पुनः । कि२ꣳ स्विद्धिमस्य भेषजं कि२ꣳ स्विदावपनं महत् ॥ सूर्य एकाकी चरति
४६ चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम् । पृच्छामि त्वा वृष्णो
अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य
नाभिम् । सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम ॥ ७। ४। १८॥ सूर्य
एकाकी चरति षट् चत्वारिꣳशच्च ॥ ७। ४। १८॥
४७ अम्बे अंबाल्यंबिके न मा नयति कश्चन । स सस्त्यश्वकः ॥

सुभगे कांपीलवासिनि सुवर्गे लोके सं प्रोर्ण्वाथाम् । आहमंजानि गर्भधमा त्वमंजासि गर्भधम् । तौ सह चतुरः पदः सं प्र सारयावहै । वृषा वाँ रेतोधा रेतो दधातूथ्सक्थ्योर्गृदं धेह्यंजिमुदंजिमन्वंज । यः स्त्रीणां जीवभोजनो य आसां
४८ बिलधावनः । प्रियः स्त्रीणामपीच्यः । य आसां कृष्णे लक्ष्मणि सर्दिगृदिं परावधीत् ॥ अम्बे अंबाल्यंबिके न मा यभति कश्चन । ससस्त्यश्वकः ॥ ऊर्ध्वामेनामुच्छ्रयताद्वेणुभारं गिराविव । अथास्या मध्यमेधताँ शीते वाते पुनन्निव ॥ अम्बे अंबाल्यंबिके न मा यभति कश्चन । ससस्त्यश्वकः ॥ यद्धरिणी यवमत्ति न
४९ पुष्टं पशु मन्यते । शूद्रा यदर्यजारा न पोषाय धनायति ॥ अम्बे अंबाल्यंबिके न मा यभति कश्चन । ससस्त्यश्वकः ॥ इयं यका शकुन्तिकाहलमिति सर्पति । आहतं गभे पसो नि जल्गुलीति धाणिका ॥
अम्बे अंबाल्यंबिके न मा यभति कश्चन । ससस्त्यश्वकः ॥ माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः ।
५० प्र सुलामीति ते पिता गभे मुष्टिमतँसयत् ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत्प्रण आयूँषि तारिषत् ॥ आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
७। ४। १९॥ आसामत्ति न रोहतो जिन्वथ चत्वारि च ॥ ७। ४। १९॥
५१ भूर्भुवःसुवर्वसवस्त्वाऽञ्जन्तु गायत्रेण छंदसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छंदसादित्यास्त्वाञ्जन्तु जागतेन छंदसा यद्वातो अपो अगमदिन्द्रस्य तनुवं प्रियाम् । एतर२ँ स्तोतरेतेन पथा पुनरश्वमा वर्तयासि नः ॥ लाजी ३ ञ्छाची ३ न्, यशो ममा ४ म् । यव्यायै गव्याया एतद्देवा अन्नमत्तैतदन्नमद्धि प्रजापते ॥ युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥
७। ४। २०॥ ब्रध्नं पंच विँशतिश्च ॥ ७। ४। २०॥
५२ प्राणाय स्वाहा व्यानाय स्वाहापानाय स्वाहा स्नावभ्यः स्वाहा संतानेभ्यः स्वाहा

परिसंतानेभ्यः स्वाहा पर्वभ्यः स्वाहा संधानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥ ७। ४। २१॥
प्राणायाष्टाविꣳशतिः ॥
७। ४। २१॥
५३ सिताय स्वाहासिताय स्वाहाभिहिताय स्वाहानभिहिताय स्वाहा युक्ताय स्वाहायुक्ताय स्वाहा सुयुक्ताय स्वाहोद्युक्ताय स्वाहा विमुक्ताय स्वाहा प्रमुक्ताय स्वाहा वञ्चते स्वाहा परिवञ्चते स्वाहा संवञ्चते स्वाहानुवञ्चते स्वाहोद्वञ्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहा सर्वस्मै स्वाहा ॥ ७। ४। २२॥ सितायाष्टा त्रिꣳशत् ॥ ७। ४। २२॥
बृहस्पतिः श्रद्यथा वा ऋक्षा वै प्रजापतिर्येन येन द्वे वावादित्या वसिष्ठः संवथ्सराय सुवर्गं ब्रह्मवादिनो ज्योतिष्टोमं मेषः कूप्याभ्योऽद्भ्यो यो नमो मयोभूः किग्ग् स्विदंबे भूः प्राणाय सिताय द्वाविꣳशतिः ॥
बृहस्पतिः प्रति तिष्ठन्ति वै दशरात्रेण सुवर्गं यो अर्वन्तं भूस्त्रिपंचाशत् ॥
बृहस्पतिः सर्वस्मै स्वाहा ॥

## सप्तमकाण्डे पञ्चमः प्रश्नः ५

१ गावो वा एतथ्सत्रमासताशृङ्गाः सतीः शृङ्गाणि नो जायन्ता इति कामेन तासां दश मासा निषण्णा आसन्नथ शृङ्गान्यजायन्त ता उदतिष्ठन्नराथ्स्मेत्यथ यासां नाजायन्त ताः संवथ्सरमाप्त्वोदतिष्ठन्नराथ्स्मेति यासां चाजायन्त यासां च न ता उभयीरुदतिष्ठन्नराथ्स्मेति गोसत्रं वै
२ संवथ्सरो य एवं विद्वाꣳसः संवथ्सरमुपयन्त्यृध्नुवन्त्येव तस्मात्तूपरा वार्षिकौ मासौ पर्त्वा चरति सत्राभिजितग्ग् ह्यस्यै तस्माथ्संवथ्सरसदो यत्किंच गृहे क्रियते तदाप्तमवरुद्धमभिजितं क्रियते समुद्रं वा एते प्र प्लवन्ते ये संवथ्सरमुपयन्ति यो वै समुद्रस्य पारं न पश्यति न वै स तत उदेति संवथ्सरो
३ वै समुद्रस्तस्यैतत्पारं यदतिरात्रौ य एवं विद्वाꣳसः संवथ्सरमुपयन्त्यनार्ता एवोदृचं गच्छन्तीयं वै पू?र्वोऽतिरात्रोऽसावुत्तरो मनः पूर्वो वागुत्तरः प्राणः पूर्वोऽपान उत्तरः प्ररोधनं पूर्व उदयनमुत्तरो ज्योतिष्टोमो वैश्वानरोऽतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै चतुर्विꣳशः प्रायणीयो भवति चतुर्विꣳशतिरर्धमासाः
४ संवथ्सरः प्रयन्त एव संवथ्सरे प्रति तिष्ठन्ति तस्य त्रीणि च शतानि षष्टिश्च

स्तोत्रीयास्तावतीः संवथ्सरस्य रात्रय उभे एव संवथ्सरस्य रूपे आप्नुवन्ति ते
स२ँ स्थित्या अरिष्ट्या उत्तरैरहोभिश्चरन्ति षडहा भवन्ति षड्वा ऋतवः संवथ्सर ऋतुष्वेव
संवथ्सरे प्रति तिष्ठन्ति गौश्चायुश्च मध्यतः स्तोमौ भवतः संवथ्सरस्यैव तन्मिथुनं मध्यतो
५ दधति प्रजननाय ज्योतिरभितो भवति विमोचनमेव तच्छन्दाग्स्येव तद्विमोकं यन्त्यथो
उभयतो ज्योतिषैव षडहेन सुवर्गं लोकं यन्ति ब्रह्मवादिनो वदन्त्यासते केन यन्तीति
देवयानेन पथेति ब्रूयाच्छन्दाँसि वै देवयानः पन्था गायत्री त्रिष्टुब्जगती ज्योतिर्वै गायत्री
गौस्त्रिष्टुगा?युर्जगती यदेते स्तोमा भवन्ति देवयानेनैव
६ तत्पथा यन्ति समानँ साम भवति देवलोको वै साम देवलोकादेव न
यन्त्यन्या अन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेवान्यमन्यं
देवलोकमभ्यारोहन्तो यन्त्यभिवर्तो ब्रह्मसामं भवति सुवर्गस्य लोकस्याभिवृत्त्या
अभिजिद्भवति सुवर्गस्य लोकस्याभिजित्यै विश्वजिद्भवति विश्वस्य जित्यै मासिमासि
पृष्ठान्युप यन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमास्येव वीर्यं दधति मासां प्रतिष्ठित्या
उपरिष्टान्मासां पृष्ठान्युप यन्ति तस्मादुपरिष्टादोषधयः फलं गृह्णन्ति ॥ ७। ५। १॥
गोसत्रं वा एति संवथ्सरोऽर्धमासा मिथुनं मध्यतो देवयानेनैव वीर्यं त्रयोदश च ॥ ७। ५। १॥
७ गावो वा एतथ्सत्रमासताशृङ्गाः सतीः शृङ्गाणि सिषासन्तीस्तासां दश मासा निषण्णा
आसन्नथ शृङ्गाण्यजायन्त ता अब्रुवन्नराथ्स्मोत्तिष्ठामाव तं काममरुथ्स्महि येन कामेन
न्यषदामेति तासामु त्वा अब्रुवन्नर्धा वा यावतीर्वासामहा एवेमौ द्वादशौ मासौ संवथ्सरँ
सं पाद्योत्तिष्ठामेति तासां
८ द्वादशे मासि शृङ्गाणि प्रावर्तन्त श्रद्धया वाऽश्रद्धया वा ता इमा यास्तूपरा उभय्यो
वाव ता आर्ध्नुवन्, याश्च शृङ्गाण्यसन्वन् याश्चोर्जमवारुंधतर्ध्नोति दशसु मासूत्तिष्ठन्नृध्नोति
द्वादशसु य एवं वेद पदेन खलु वा एते यन्ति विन्दति खलु वै पदेन यन्तद्वा एतदृद्धमयनं
तस्मादेतद्गोसनि ॥ ७। ५। २॥
तिष्ठामेति तासां तस्माद्वे च ॥ ७। ५। २॥
९ प्रथमे मासि पृष्ठान्युप यन्ति मध्यम उप यन्त्युत्तम उप यन्ति तदाहुर्यां वै त्रिरेकस्याह्न
उपसीदन्ति दह्नं वै सापराभ्यां दोहाभ्यां दुहेऽथ कुतः सा धोक्ष्यते यां द्वादश कृत्व
उपसीदन्तीति संवथ्सरँ सं पाद्योत्तमे मासि सकृत्पृष्ठान्युपेयुस्तद्यजमाना यज्ञं पशूनव
रुंधते समुद्रं वा

१० एतेऽनवारमपारं प्र प्लवन्ते ये संवथ्सरमुपयन्ति यद्बृहद्रथंतरे अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक्तदनुथ्सर्गं बृहद्रथंतराभ्यामित्वा प्रतिष्ठां गच्छन्ति सर्वेभ्यो वै कामेभ्यः संधिर्दुहे तद्यजमानाः सर्वान्कामानव रुंधते ॥ ७। ५। ३॥ समुद्रं वै चतुस्त्रिꣳशच्च ॥ ७। ५। ३॥

११ समान्य ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न यन्त्यन्यदन्यथ्साम भवति देवलोको वै साम देवलोकादेवान्यमन्यं मनुष्यलोकं प्रत्यवरोहन्तो यन्ति जगतीमग्र उप यन्ति जगतीं वै छन्दाꣳसि प्रत्यवरोहन्त्याग्रयणं ग्रहा बृहत्पृष्ठानि त्रयस्त्रिꣳश२ꣳ स्तोमास्तस्माज्ज्यायाꣳसं कनीयान्प्रत्यवरोहति वैश्वकर्मणो गृह्यते विश्वान्येव तेन कर्माणि यजमाना अव रुंधत आदित्यो

१२ गृह्यत इयं वा अदितिरस्यामेव प्रति तिष्ठन्त्यन्योऽन्यो गृह्येते मिथुनत्वाय प्रजात्या अवान्तरं वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताꣳ ह वा उदङ्कः शौल्बायनः सत्रस्यर्द्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहस्सु विलोम क्रियते तस्यैवैषा शान्तिः ॥ ७। ५। ४॥ आदित्यस्तस्यैव द्वे च ॥ ७। ५। ४॥

१३ यदि सोमौ सꣳसुतौ स्यातां महति रात्रियै प्रातरनुवाकमुपाकुर्यात्पूर्वो वाचं पूर्वो देवताः पूर्वश्छन्दाꣳसि वृङ्क्ते वृषण्वतीं प्रतिपदं कुर्यात्प्रातः सवनादेवैषामिन्द्रं वृङ्क्तेऽथो खल्वाहुः सवनमुखे सवनमुखे कार्येति सवनमुखाथ्सवनमुखादेवैषामिन्द्रं वृङ्क्ते संवेशायोपवेशाय गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः पङ्क्त्या अभिभूत्यै स्वाहा छन्दाꣳसि वै संवेश उपवेशश्छन्दोभिरेवैषां

१४ छन्दाꣳसि वृङ्क्ते सजनीयꣳ शस्यं विहव्यꣳ शस्यमगस्त्यस्य कयाशुभीयꣳ शस्यमेतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषां वृङ्क्ते यदि प्रातः सवने कलशो दीर्येत वैष्णवीषु शिपिविष्टवतीषु स्तुवीरन्, यद्वै यज्ञस्यातिरिच्यते विष्णुं तच्छिपिविष्टमभ्यति रिच्यते तद्विष्णुः शिपिविष्टोऽतिरिक्त एवातिरिक्तं दधात्यथो अतिरिक्तेनैवातिरिक्तमाप्त्वाव रुंधते यदि मध्यंदिने दीर्येत वषट्कारनिधनꣳ साम कुर्युर्वषट्कारो वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनद्गमयन्ति यदि तृतीयसवन एतदेव ॥ ७। ५। ५॥ छन्दोभिरेवैषामवैकान्न विꣳशतिश्च ॥ ७। ५। ५॥

१५ षडहैर्मासान्थ्सं पाद्याहरुथ्सृजन्ति षडहैर्हि मासान्थ्सं पश्यन्त्यर्धमासैर्मासान्थ्सं

पाद्याऽहरुथ्सृजन्त्यर्धमासैर्हि मासान्थ्सं पश्यन्त्यमावास्यया मासान्थ्सं पाद्याहरुथ्सृजन्त्यमावास्यया
हि मासान्थ्सं पश्यन्ति पौर्णमास्या मासान्थ्सं पाद्याहरुथ्सृजन्ति पौर्णमास्या हि मासान्थ्सं
पश्यन्ति यो वै पूर्ण आसिञ्चति परा स सिञ्चति यः पूर्णादुदचति
१६ प्राणमस्मिन्थ्स दधाति यत्पौर्णमास्या मासान्थ्सं पाद्याहरुथ्सृजन्ति संवथ्सरायैव
तत्प्राणं दधति तदनु सत्रिणः प्राणन्ति यदहर्नोथ्सृजेयुर्यथा दृतिरुपनद्धो विपतत्येवꣳ
संवथ्सरो वि पतेदार्तिमार्च्छेयुर्यत्पौर्णमास्या मासान्थ्सं पाद्याहरुथ्सृजन्ति संवथ्सरायैव
तदुदानं दधति तदनु सत्रिण उ
१७ दनन्ति नार्तिमार्च्छन्ति पूर्णमासे वै देवानाꣳ सुतो यत्पौर्णमास्या मासान्थ्सं
पाद्याहरुथ्सृजन्ति देवानामेव तद्यज्ञेन यज्ञं प्रत्यवरोहन्ति वि वा एतद्यज्ञं छिन्दन्ति
यत्षडह संततꣳ सन्तमथाहरुथ्सृजन्ति प्राजापत्यं पशुमालभन्ते प्रजापतिः सर्वा देवता
देवताभिरेव यज्ञꣳ सं तन्वन्ति यन्ति वा एते सवनाद्येऽह
१८ रुथ्सृजन्ति तुरीयं खलु वा एतथ्सवनं यथ्सान्नाय्यं यथ्सान्नाय्यं भवति तेनैव
सवनान्नयन्ति समुपहूय भक्षयन्त्येतथ्सोमपीथा ह्येतर्हि यथायतनं वा एतेषाꣳ
सवनभाजो देवता गच्छन्ति येऽहरुथ्सृजन्त्यनुसवनं पुरोडाशान्निर्वपन्ति यथायतनादेव
सवनभाजो देवता अव रुंधतेऽष्टाकपालान् प्रातः सवन एकादशकपालान्माध्यंदिने
सवने द्वादशकपालाग्स्तृतीयसवने छन्दाग्स्येवास्वाव रुंधते वैश्वदेवं चरुं तृतीयसवने
निर्वपन्ति वैश्वदेवं वै तृतीयसवनं तेनैव तृतीयसवनान्न यन्ति ॥ ७। ५। ६॥
उदचत्युद्येऽहराप्त्वा पंचदश च ॥ ७। ५। ६॥
१९ उथ्सृज्यां३ नोथ्सृज्या३ मिति मीमाꣳसन्ते ब्रह्मवादिनस्तद्वाहुरु?थ्सृज्यमेवेत्यमावास्यायां
च पौर्णमास्यां चोथ्सृज्यमित्याहुरेते हि यज्ञं वहत इति ते त्वाव नोथ्सृज्ये इत्याहुर्ये
अवान्तरं यज्ञं भेजाते इति या प्रथमा व्यष्टका तस्यामुथ्सृज्यमित्याहुरेष वै मासो विशर
इति नादिष्ट
२० मुथ्सृजेयुर्यदादिष्टमुथ्सृजेयुर्यादृशे पुनः पर्याप्लावे मध्ये षडहस्य सं पद्येत
षडहैर्मासान्थ्सं पाद्य यथ्सप्तममहस्तस्मिन्नुथ्सृजेयुस्तदग्नये वसुमते पुरोडाशमष्टाकपालं
निर्वपेयुरैन्द्रं दधीन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वैश्वदेवं द्वादशकपालमग्नेर्वै
वसुमतः प्रातःसवनं यदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपन्ति देवतामेव तद्भागिनीं
कुर्वन्ति

२१ सवनमष्टाभिरुप यन्ति यदैन्द्रं दधि भवतीन्द्रमेव तद्भागधेयान्न च्यावयन्तीन्द्रस्य
वै मरुत्वतो माध्यंदिनꣳ सवनं यदिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्ति
देवतामेव तद्भागिनीं कुर्वन्ति सवनमेकादशभिरुप यन्ति विश्वेषां वै देवानामृभुमतां
तृतीयसवनं यद्वैश्वदेवं द्वादशकपालं निर्वपन्ति देवता एव तद्भागिनीः कुर्वन्ति सवनं
द्वादशभि
२२ रुप यन्ति प्राजापत्यं पशुमा लभन्ते यज्ञो वै प्रजापतिर्यज्ञस्याननुसर्गायाभिवर्त इतः
षण्मासो ब्रह्मसामं भवति ब्रह्म वा अभिवर्तो ब्रह्मणैव तथ्सुवर्गं लोकमभिवर्तयन्तो यन्ति
प्रतिकूलमिव हीतः सुवर्गो लोक इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा । शिक्षा
नो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहीत्यमुत आयताꣳ षण्मासो ब्रह्मसामं
भवत्ययं वै लोको ज्योतिः प्रजा ज्योतिरिममेव तल्लोकं पश्यन्तोऽभिवदन्त आ यन्ति ॥
७। ५। ७॥ नादिष्टं कुर्वन्ति द्वादशभिरिति विꣳशतिश्च ॥ ७। ५। ७॥
२३ देवानां वा अन्तं जग्मुषामिंद्रियं वीर्यमपाक्रामत्तत्क्रोशेनावारुंधत तत्क्रोशस्य
क्रोशत्वं यत्क्रोशेन चात्वालस्यान्ते स्तुवन्ति यज्ञस्यैवान्तं गत्वेंद्रियं वीर्यमव रुंधते
सत्रस्यर्ध्याहवनीयस्यान्ते स्तुवन्त्यग्निमेवोपद्रष्टारं कृत्वर्द्धिमुप यन्ति प्रजापतेर् हृदयेन
हविर्धानेऽन्तः स्तुवन्ति प्रेमाणमेवास्य गच्छन्ति श्लोकेन पुरस्ताथ्सदसः
२४ स्तुवन्त्यनुश्लोकेन पश्चाद्यज्ञस्यैवान्तं गत्वा श्लोकभाजो भवन्ति नवभिरध्वर्युरुद्गायति
नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेंद्रियं
दधत्यप्रतिहृताभिरुद्गायति तस्मात्पुरुषः सर्वाण्यन्यानि शीर्ष्णोऽङ्गानि प्रत्यचति शिर एव
न पञ्चदशꣳ रथंतरं भवतीन्द्रियमेवाव रुंधते सप्तदशं
२५ बृहदन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशं भद्रं द्विपदासु प्रतिष्ठित्यै
पत्नय उप गायन्ति मिथुनत्वाय प्रजात्यै प्रजापतिः प्रजा असृजत सोऽकामयतासामहꣳ
राज्यं परीयामिति तासाꣳ राजनेनैव राज्यं पर्यैत्तद्राजनस्य राजनत्वं यद्राजनं भवति
प्रजानामेव तद्यजमाना राज्यं परि यन्ति पञ्चविꣳशं भवति प्रजापते
२६ राप्त्यै पञ्चभिस्तिष्ठन्तः स्तुवन्ति देवलोकमेवाभि जयन्ति पञ्चभिरासीना
मनुष्यलोकमेवाभि जयन्ति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव
रुंधते पञ्चधा विनिषद्य स्तुवन्ति पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्येकैकयास्तुतया
समायन्ति दिग्भ्य एवान्नाद्यꣳ संभरन्ति ताभिरुद्गातोद्गायति दिग्भ्य एवान्नाद्यꣳ

२७ संभृत्य तेज आत्मन्दधते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवत्यथो
यथा सुपर्ण उत्पतिष्यञ्छिर उत्तमं कुरुत एवमेव तद्यजमानाः प्रजानामुत्तमा
भवन्त्यासन्दीमुद्गाताऽरोहति साम्राज्यमेव गच्छन्ति प्रेङ्खꣳ होता नाकस्यैव पृष्ठꣳ
रोहन्ति कूर्चावध्वर्युर्ब्रध्नस्यैव विष्टपं गच्छन्त्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति
तिष्ठन्त्यथो आक्रमणमेव तथ्सेतुं यजमानाः कुर्वते सुवर्गस्य लोकस्य समष्ट्यै ॥ ७।
५। ८॥ सदसः सप्तदशं प्रजापतेर्गायति दिग्भ्य एवान्नाद्यं प्रत्येकादश च ॥ ७। ५। ८॥
२८ अर्क्येण वै सहस्रशः प्रजापतिः प्रजा असृजत ताभ्य इलान्देनेरां लूतामवारुंध
यदर्क्यं भवति प्रजा एव तद्यजमानाः सृजन्त इलान्दं भवति प्रजाभ्य एव सृष्टाभ्य इरां
लूतामव रुंधते तस्माद्याꣳ समाꣳ सत्रꣳ समृद्धं क्षोधुकास्ताꣳ समां प्रजा इषग्ग्
ह्यासामूर्जमाददते याꣳ समां व्यृद्धमक्षोधुकास्ताꣳ समां प्रजा
२९ न ह्यासामिषमूर्जमाददत उत्क्रोदं कुर्वते यथा बन्धान्मुमुचाना उत्क्रोदं कुर्वत एवमेव
तद्यजमाना देवबन्धान्मुमुचाना उत्क्रोदं कुर्वत इषमूर्जमात्मन्दधाना वाणः शततन्तुर्भवति
शतायुः पुरुषः शतेंद्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्त्याजिं धावन्त्यनभिजितस्याभिजित्यै
दुन्दुभीन्थ्समाघ्नन्ति परमा वा एषा वाग्या दुन्दुभौ परमामेव
३० वाचमव रुंधते भूमिदुन्दुभिमा घ्नन्ति यैवेमां वाक्प्रविष्टा तामेवाव रुंधतेऽथो
इमामेव जयन्ति सर्वा वाचो वदन्ति सर्वासां वाचामवरुद्ध्या आर्द्रे चर्मन्व्यायच्छेते
इन्द्रियस्यावरुद्ध्या आन्यः क्रोशति प्रान्यः शꣳसति य आक्रोशति पुनात्येवैनान्थ्स यः
प्रशꣳसति पूतेष्वेवान्नाद्यं दधात्यृषिकृतं च
३१ वा एते देवकृतं च पूर्वैर्मासैरव रुंधते यद्भूतेच्छदाꣳ सामानि भवन्त्युभयस्यावरुद्ध्यै
यन्ति वा एते मिथुनाद्ये संवथ्सरमुपयन्त्यन्तर्वेदि मिथुनौ संभवतस्तेनैव मिथुनान्न यन्ति
॥ ७। ५। ९॥ व्यृद्धमक्षोधुकास्ताꣳ समां प्रजाः परमामेव च त्रिꣳशच्च ॥ ७। ५। ९॥
३२ चर्माव भिन्दन्ति पाप्मानमेवैषामव भिन्दन्ति माप राथ्सीर्माति व्याथ्सीरित्याह सं
प्रत्येवैषां पाप्मानमव भिन्दन्त्युदकुंभानधिनिधाय दास्यो मार्जालीयं परि नृत्यन्ति पदो
निघ्नतीरिदं मधुं गायन्त्यो मधु वै देवानां परममन्नाद्यं परममेवान्नाद्यमव रुंधते पदो नि
घ्नन्ति महीयामेवैषु दधति ॥ ७। ५। १०॥ चर्मैकान्न पंचाशत् ॥ ७। ५। १०॥
३३ पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सं प्लोष्यते स्वाहा सं प्लवमानाय स्वाहा
सं प्लुताय स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा

नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै स्वाहा विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा सं विद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोग्र२ँ स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहाभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते

३४ स्वाहानुवर्षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहोद्ग्रहीष्यते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहातप्स्यते स्वाहाऽतपते स्वाहोग्रमातपते स्वाहर्ग्भ्यः स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाहांगिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराश२ँसीभ्यः स्वाहा रैभीभ्यः स्वाहा सर्वस्मै स्वाहा ॥ ७। ५। ११॥ संवर्षते रैभीभ्यः स्वाहा द्वे च ॥ ७। ५। ११॥

३५ दत्वते स्वाहादन्तकाय स्वाहा प्राणिने स्वाहाप्राणाय स्वाहा मुखवते स्वाहामुखाय स्वाहा नासिकवते स्वाहानासिकाय स्वाहाक्षण्वते स्वाहानक्षिकाय स्वाहा कर्णिने स्वाहाऽकर्णकाय स्वाहा शीर्षण्वते स्वाहाशीर्षकाय स्वाहा पद्वते स्वाहापादकाय स्वाहा प्राणते स्वाहाप्राणते स्वाहा वदते स्वाहावदते स्वाहा पश्यते स्वाहापश्यते स्वाहा शृण्वते स्वाहाश्रृण्वते स्वाहा मनस्विने स्वाहा

३६ ऽमनसे स्वाहा रेतस्विने स्वाहारेतस्काय स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा लोमवते स्वाहालोमकाय स्वाहा त्वचे स्वाहात्वक्काय स्वाहा चर्मण्वते स्वाहाचर्मकाय स्वाहा लोहितवते स्वाहालोहिताय स्वाहा मा२ँसन्वते स्वाहामा२ँसकाय स्वाहा स्नावभ्यः स्वाहास्नावकाय स्वाहास्थन्वते स्वाहानस्थिकाय स्वाहा मज्जन्वते स्वाहामज्जकाय स्वाहाङ्गिने स्वाहानङ्गाय स्वाहात्मने स्वाहानात्मने स्वाहा सर्वस्मै स्वाहा ॥ ७। ५। १२॥ मनस्विने स्वाहाऽनात्मने स्वाहा द्वे च ॥ ७। ५। १२॥

३७ कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्द्ध्यै मह्य२ँ संनत्या अमुष्मै कामायायुषे त्वा प्राणाय त्वापानाय त्वा व्यानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा घोषाय त्वा पोषाय त्वाराद्घोषाय त्वा प्रच्युत्यै त्वा ॥ ७। ५। १३॥ कस्त्वाऽष्टा त्रि२ँशत् ॥ ७। ५। १३॥

३८ अग्नये गायत्राय त्रिवृते राथंतराय वासन्तायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्मायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो

वार्षिकेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यां वैराजाभ्याꣳ
शारदाभ्यां पयस्या बृहस्पतये पाङ्क्ता?य त्रिणवाय शाक्वराय हैमन्तिकाय चरुः सवित्र
आतिच्छंदसाय त्रयस्त्रिꣳशाय रैवताय शैशिराय द्वादशकपालोऽदित्यै विष्णुपत्न्यै
चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्यै चरुः काय एककपालः ॥ ७। ५। १४॥
अग्नयेऽदित्या अनुमत्यै सप्तचत्वारिꣳशत् ॥ ७। ५। १४॥
३९ यो वा अग्नावग्निः प्रह्रियते यश्च सोमो राजा तयोरेष आतिथ्यं यदग्नीषोमीयोऽथैष रुद्रो
यश्चीयते यथ्संचितेऽग्नावेतानि हवीꣳषि न निर्वपेदेष एव रुद्रोऽशान्त उपोत्थाय प्रजां
पशून्, यजमानस्याभि मन्येत यथ्संचितेऽग्नावेतानि हवीꣳषि निर्वपति भागधेयेनैवैनꣳ
शमयति नास्य रुद्रोऽशान्त
४० उपोत्थाय प्रजां पशूनभि मन्यते दश हवीꣳषि भवन्ति नव वै पुरुषे प्राणा
नाभिर्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये
प्रति तिष्ठत्यृतुभिर्वा एष छन्दोभिः स्तोमैः पृष्ठैश्चेतव्य इत्याहुर्यदेतानि हवीꣳषि
निर्वपत्यृतुभिरेवैनं छन्दोभिः स्तोमैः पृष्ठैश्चिनुते दिशः सुषुवाणेना
४१ ऽभिजित्या इत्याहुर्यदेतानि हवीꣳषि निर्वपति दिशामभिजित्या एतया वा इन्द्रं
देवा अयाजयन्तस्मादिन्द्रसव एतया मनुं मनुष्यास्तस्मान्मनुसवो यथेन्द्रो देवानां यथा
मनुर्मनुष्याणामेवं भवति य एवं विद्वानेतयेष्ट्या यजते दिग्वतीः पुरोऽनुवाक्या भवन्ति
सर्वासां दिशामभिजित्यै ॥ ७। ५। १५॥ अशान्तः सुषुवाणेनैक चत्वारिꣳशच्च ॥ ७।
५। १५॥
४२ यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पदः
कस्मै देवाय हविषा विधेम ॥ उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य
ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥ ७।
५। १६॥ यः प्राणतो द्यौरादित्योऽष्टा त्रिꣳशत् ॥ ७। ५। १६॥
४३ य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य छायामृतं यस्य
मृत्युः कस्मै देवाय हविषा विधेम ॥ उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि
तस्य ते पृथिवी महिमौषधयो वनस्पतयो रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये
स्वाहा ॥ ७। ५। १७॥ य आत्मदाः पृथिव्यग्निरेकान्न चत्वारिꣳशत् ॥ ७। ५। १७॥
४४ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामास्मिन्राष्ट्रे राजन्य इषव्यः शूरो महारथो
जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य

यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ ७। ५। १८॥ आ ब्रह्मन्नेक चत्वारिꣳशत् ॥ ७। ५। १८॥

४५ आक्रान्, वाजी पृथिवीमग्निं युजमकृत वाज्यर्वाक्रान्, वाज्यन्तरिक्षं वायुं युजमकृत वाज्यर्वा द्यां वाज्याक्रग्ग्स्त सूर्यं युजमकृत वाज्यर्वाग्निस्ते वाजिन्, युङ्ङ्नु त्वारभे स्वस्ति मा सं पारय वायुस्ते वाजिन्, युङ्ङ्नु त्वारभे स्वस्ति मा सं

४६ पारयादित्यस्ते वाजिन्, युङ्ङ्नु त्वारभे स्वस्ति मा सं पारय प्राणधृगसि प्राणं मे दृꣳह व्यानधृगसि व्यानं मे दृꣳहापानधृगस्यपानं मे दृꣳह चक्षुरसि चक्षुर्मयि धेहि श्रोत्रमसि श्रोत्रं मयि धेह्यायुरस्यायुर्मयि धेहि ॥ ७। ५। १९॥ वायुस्ते वाजिन्, युङ्ङ्नु त्वाऽरभे स्वस्ति मा सन्निचत्वारिꣳशच्च ॥ ७। ५। १९॥

४७ जज्ञि बीजं वर्ष्टा पर्जन्यः पक्ता सस्यꣳ सुपिप्पला ओषधयः स्वधिचरणेयꣳ सूपसदनोऽग्निः स्वध्यक्षमन्तरिक्षꣳ सुपावः पवमानः सूपस्थाना द्यौः शिवमसौ तपन्, यथापूर्वमहोरात्रे पञ्चदशिनोर्धमासास्त्रिꣳशिनो मासाः क्लृप्ता ऋतवः शान्तः संवथ्सरः ॥ ७। ५। २०॥ जज्ञि बीजमेकत्रिꣳशत् ॥ ७। ५। २०॥

४८ आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरू रौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि नागच्छेदग्नयेऽꣳहोमुचेऽष्टाकपालः सौर्यं पयो वायव्य आज्यभागः ॥ ७। ५। २१॥ आग्नेयश्चतुर्विꣳशतिः ॥ ७। ५। २१॥

४९ अग्नयेऽꣳहोमुचेऽष्टाकपाल इन्द्रायाꣳहोमुच एकादशकपालो मित्रावरुणाभ्यामागोमुग्भ्यां पयस्या वायोसावित्र आगोमुग्भ्यां चरुरश्विभ्यामागोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालोऽनुमत्यै चरुरग्नये वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्यामꣳहोमुग्भ्यां द्विकपालः ॥

७। ५। २२॥ अग्नयेऽꣳहोमुचेऽनुमत्यै द्यावापृथिवीभ्यां त्रिꣳशत् ॥ ७। ५। २२॥

५० अग्नये समनमत्पृथिव्यै समनमद्यथाग्निः पृथिव्या समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु वायवे समनमदन्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण सूर्याय समनमद्दिवे समनमद्यथा सूर्यो दिवा चन्द्रमसे समनमन्नक्षत्रेभ्यः समनमद्यथा चन्द्रमा नक्षत्रैर्वरुणाय समनमदद्भ्यः समनमद्यथा

५१ वरुणोऽद्भिः साम्ने समनमदृचे समनमद्यथा सामर्चा ब्रह्मणे समनमत्क्षत्राय समनमद्यथा ब्रह्म क्षत्रेण राज्ञे समनमद्विशे समनमद्यथा राजा विशा रथाय

समनमदश्वेभ्यः समनमद्यथा रथोऽश्वैः प्रजापतये समनमद्भूतेभ्यः समनमद्यथा प्रजापतिर्भूतैः समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु ॥
७। ५। २३॥ अद्भ्यः समनमद्यथा मह्यं चत्वारि च ॥ ७। ५। २३॥
५२ ये ते पन्थानः सवितः पूर्व्यासोऽरेणवो वितता अन्तरिक्षे । तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहि ॥
नमोऽग्नये पृथिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि ॥ ७। ५। २४॥ ये ते चतुश्चत्वारिँ॒शत् ॥ ७। ५। २४॥
५३ यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्षण्वान्मेध्यो भवत्युषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं दिशः पादा अवान्तरदिशाः पर्शवोऽहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः संधानान्यृतवोऽङ्गानि संवथ्सर आत्मा रश्मयः केशा नक्षत्राणि रूपं तारका अस्थानि नभो माँ॒सान्योषधयो लोमानि वनस्पतयो वाला अग्निर्मुखं वैश्वानरो व्यात्तँ॒
५४ समुद्र उदरमन्तरिक्षं पायुर्द्यावापृथिवी आण्डौ ग्रावा शेपः सोमो रेतो यज्ञञ्जम्भ्यते तद्वि द्योतते यद्विधूनुते तथ्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमानावश्वमभितः सं बभूवतुर्हयो देवानवहदर्वासुरान्, वाजी गन्धर्वानश्वो मनुष्यान्थ्समुद्रो वा अश्वस्य योनिः समुद्रः (समुद्रो बन्धुः - संप्रदायदल्लि हेळुवुदिल्ल) ॥
७। ५। २५॥ व्यात्तमवहद्द्वादश च ॥ ७। ५। २५॥
गावो गावः सिषासन्तीः प्रथमे मासि समान्यो यदि सोमौ षड्हैरुथ्सृज्या (३) देवानामर्क्येण चर्मावं पृथिव्यै दत्वते कस्त्वाग्नये यो वै यः प्राणतो य आत्मदा आ ब्रह्मन्नाक्राञ्ज्ञि बीजमाग्नेयोऽष्टा कपालोऽ ग्नयेँ॒होमुचेऽष्टा कपालोऽग्नये समनमद्ये ते पन्थानो यो वा अश्वस्य मेध्यस्य शिरः पंच विँ॒शतिः ॥
गावः समान्यः सवनमष्टाभिर्वा एते देवकृतं चाऽभिजित्या इत्याहुर्वरुणोद्भिः साम्ने चतुः पंचाशत् ॥
गावो योनिस्समुद्रः (समुद्रो बन्धुः - संप्रदायदल्लि हेळुवुदिल्ल) ॥
इति सप्तमं काण्डं संपूर्णम् ७॥
इति तैत्तिरीय-संहिता ॥

आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम ॥
ब्रह्म प्रावादिष्म तन्नो मा हासीत् ॥
ओं शान्तिः शान्तिः शान्तिः ॥
॥ हरिः ओ(३)म् ॥
॥ श्री कृष्णार्पणमस्तु ॥
॥ तैत्तिरीय-ब्राह्मणम् ॥

# तैत्तिरीय-संहिता

## ॥ प्रथमं अष्टकम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### प्रथमाष्टके प्रथमः प्रपाठकः १

१ ब्रह्म संधत्तं तन्मे जिन्वतम् । क्षत्रꣳ संधत्तं तन्मे जिन्वतम् । इषꣳ संधत्तं तां मे जिन्वतम् । ऊर्जꣳ संधत्तं तां मे जिन्वतम् । रयिꣳ संधत्तं तां मे जिन्वतम् । पुष्टिꣳ संधत्तं तां मे जिन्वतम् । प्रजाꣳ संधत्तं तां मे जिन्वतम् । पशून्थ्संधत्तं तान्मे जिन्वतम् । स्तुतोसि जनधाः । देवास्त्वा शुक्रपाः प्रणयन्तु ॥ १। १। १। १॥

२ सुवीराः प्रजाः प्रजनयन्परीहि । शुक्रः शुक्रशोचिषा । स्तुतोसि जनधाः । देवास्त्वा मन्थिपाः प्रणयन्तु । सुप्रजाः प्रजाः प्रजनयन्परीहि । मन्थी मन्थिशोचिषा । संजग्मानौ दिव आ पृथिव्याऽऽयुः । संधत्तं तन्मे जिन्वतम् । प्राणꣳ संधत्तं तं मे जिन्वतम् । अपानꣳ संधत्तं तं मे जिन्वतम् ॥ १। १। १। २॥

३ व्यानꣳ संधत्तं तं मे जिन्वतम् । चक्षुः संधत्तं तन्मे जिन्वतम् । श्रोत्रꣳ संधत्तं तन्मे जिन्वतम् । मनः संधत्तं तन्मे जिन्वतम् । वाचꣳ संधत्तं तां मे जिन्वतम् । आयुः स्थ आयुर्मे धत्तम् । आयुर्यज्ञाय धत्तम् । आयुर्यज्ञपतये धत्तम् । प्राणः स्थः प्राणं मे धत्तम् । प्राणं यज्ञाय धत्तम् ॥ १। १। १। ३॥

४ प्राणं यज्ञपतये धत्तम् । चक्षुः स्थश्चक्षुर्मे धत्तम् । चक्षुर्यज्ञाय धत्तम् । चक्षुर्यज्ञपतये धत्तम् । श्रोत्रग्ग् स्थः श्रोत्रं मे धत्तम् । श्रोत्रं यज्ञाय धत्तम् । श्रोत्रं यज्ञपतये धत्तम् । तौ देवौ शुक्रामन्थिनौ । कल्पयतं दैवीर्विशः । कल्पयतं मानुषीः ॥ १। १। १। ४॥

५ इषमूर्जमस्मासु धत्तम् । प्राणान्पशुषु । प्रजां मयि च यजमाने च । निरस्तः शण्डः । निरस्तो मर्कः । अपनुत्तौ शण्डामर्कौ सहामुना । शुक्रस्य समिदसि । मन्थिनः समिदसि । स प्रथमः संकृतिर्विश्वकर्मा । स प्रथमो मित्रो वरुणो अग्निः । स प्रथमो बृहस्पतिश्चिकित्वान् । तस्मा इन्द्राय सुतमाजुहोमि ॥ १। १। १। ५॥ नयन्त्वपानꣳ

संधत्तं तं मे जिन्वतं प्राणं यज्ञाय धत्तं मानुषीरग्निर्द्वे च ॥ १॥ ब्रह्म क्षत्रं तदिषमूर्जꣳ रयिं पुष्टिं प्रजां तां पशून्तान् ॥ संधत्तं तत्प्राणमपानं व्यानं तं चक्षुः श्रोत्रं मनस्तद्वाचं ताम् । इषादि पञ्चके वाचं तां मे । पशून्थ्सन्धत्तं तान्मे प्राणादि त्रितये तं मे । अन्यत्र तन्मे ॥

६ कृत्तिकास्वग्निमादधीत । एतद्वा अग्नेर्नक्षत्रम् । यत्कृत्तिकाः । स्वायामेवैनं देवतायामाधाय । ब्रह्मवर्चसी भवति । मुखं वा एतन्नक्षत्राणाम् । यत्कृत्तिकाः । यः कृत्तिकास्वग्निमाधत्ते । मुख्य एव भवति । अथो खलु ॥ १। १। २। १॥

७ अग्निनक्षत्रमित्यपचायन्ति । गृहान् ह दाहुको भवति । प्रजापती रोहिण्यामग्निमसृजत । तं देवा रोहिण्यामादधत । ततो वै ते सर्वान्रोहानरोहन् । तद्रोहिण्यै रोहिणित्वम् । यो रोहिण्यामग्निमाधत्ते । ऋध्नोत्येव । सर्वान्रोहान्रोहति । देवा वै भद्राः सन्तोऽग्निमाधित्सन्त ॥

१। १। २। २॥

८ तेषामनाहितोऽग्निरासीत् । अथैभ्यो वामं वस्वपाक्रामत् । ते पुनर्वस्वोरादधत । ततो वै तान्, वामं वसूपावर्तत । यः पुरा भद्रः सन्पापीयान्थ्स्यात् । स पुनर्वस्वोरग्निमादधीत । पुनरेवैनं वामं वसूपावर्तते । भद्रो भवति । यः कामयेत दानकामा मे प्रजाः स्युरिति । स पूर्वयोः फल्गुन्योरग्निमादधीत ॥ १। १। २। ३॥

९ अर्यम्णो वा एतन्नक्षत्रम् । यत्पूर्वे फल्गुनी । अर्यमेति तमाहुर्यो ददाति । दानकामा अस्मै प्रजा भवन्ति । यः कामयेत भगी स्यामिति । स उत्तरयोः फल्गुन्योरग्निमादधीत । भगस्य वा एतन्नक्षत्रम् । यदुत्तरे फल्गुनी । भग्येव भवति । कालकञ्जा वै नामासुरा आसन् ॥ १। १। २। ४॥

१० ते सुवर्गाय लोकायाग्निमचिन्वत । पुरुष इष्टकामुपादधात्पुरुष इष्टकाम् । स इन्द्रो ब्राह्मणो ब्रुवाण इष्टकामुपाधत्त । एषा मे चित्रा नामेति । ते सुवर्गं लोकमाप्रारोहन् । स इन्द्र इष्टकामावृहत् । तेऽवाकीर्यन्त । येऽवाकीर्यन्त । त ऊर्णावभयोऽभवन् । द्वावुदपतताम् ॥ १। १। २। ५॥

११ तौ दिव्यौ श्वानावभवताम् । यो भ्रातृव्यवान्थ्स्यात् । स चित्रायामग्निमादधीत । अवकीर्यैव भ्रातृव्यान् । ओजो बलमिन्द्रियं वीर्यमात्मन्धत्ते । वसन्ता ब्राह्मणोऽग्निमादधीत । वसन्तो वै ब्राह्मणस्यर्तुः । स्व एवैनमृतावाधाय । ब्रह्मवर्चसी भवति । मुखं वा एतदृतूनाम् ॥ १। १। २। ६॥

१२ यद्वसन्तः । यो वसन्ताऽग्निमाधत्ते । मुख्य एव भवति । अथो योनिमन्तमेवैनं प्रजातमाधत्ते । ग्रीष्मे राजन्य आदधीत । ग्रीष्मो वै राजन्यस्यर्तुः । स्व एवैनमृतावाधाय । इन्द्रियावी भवति । शरदि वैश्य आदधीत । शरद्वै वैश्यस्यर्तुः ॥ १। १। २। ७॥
१३ स्व एवेनमृतावाधाय । पशुमान्भवति । न पूर्वयोः फल्गुन्योरग्निमादधीत । एषा वै जघन्या रात्रिः संवथ्सरस्य । यत्पूर्वे फल्गुनी । पृष्टित एव संवथ्सरस्याग्निमाधाय । पापीयान्भवति । उत्तरयोरादधीत । एषा वै प्रथमा रात्रिः संवथ्सरस्य । यदुत्तरे फल्गुनी । मुखत एव संवथ्सरस्याग्निमाधाय । वसीयान्भवति । अथो खलु । यदैवैनं यज्ञ उपनमेत् । अथादधीत । सैवास्यर्द्धिः ॥ १। १। २। ८॥ खल्वाधिथ्सन्त फल्गुन्योरग्निमादधीतासन्नपततामृतूनां वैश्यस्यर्तुरुत्तरे फल्गुनी षट्च ॥ २॥
१४ उद्धन्ति । यदेवास्या अमेध्यम् । तदप हन्ति । अपोऽवोक्षति शान्त्यै । सिकता निवपति । एतद्वा अग्नेर्वैश्वानरस्य रूपम् । रूपेणैव वैश्वानरमवरुन्धे । ऊषान्निवपति । पुष्टिर्वा एषा प्रजननम् । यदूषाः ॥ १। १। ३। १॥
१५ पुष्ट्यामेव प्रजननेऽग्निमाधत्ते । अथो संज्ञान एव । संज्ञानग्ग् ह्येतत्पशूनाम् । यदूषाः । द्यावापृथिवी सहास्ताम् । ते वियती अब्रूताम् । अस्त्वेव नौ सह यज्ञियमिति । यदमुष्या यज्ञियमासीत् । तदस्यामदधात् । त ऊषा अभवन् ॥ १। १। ३। २॥
१६ यदस्या यज्ञियमासीत् । तदमुष्यामदधात् । तददश्चन्द्रमसि कृष्णम् । ऊषान्निवपन्नदो ध्यायेत् । द्यावापृथिव्योरेव यज्ञियेऽग्निमाधत्ते । अग्निर्देवेभ्यो निलायत । आखू रूपं कृत्वा । स पृथिवीं प्राविशत् । स ऊतीः कुर्वाणः पृथिवीमनु समचरत् । तदाखुकरीषमभवत् ॥ १। १। ३। ३॥
१७ यदाखुकरीषꣳ संभारो भवति । यदेवास्य तत्र न्यक्तम् । तदेवावरुन्धे । ऊर्जं वा एतꣳ रसं पृथिव्या उपदीका उद्दिहन्ति । यद्वल्मीकम् । यद्वल्मीकवपा संभारो भवति । ऊर्जमेव रसं पृथिव्या अवरुन्धे । अथो श्रोत्रमेव । श्रोत्रग्ग् ह्येतत्पृथिव्याः । यद्वल्मीकः ॥ १। १। ३। ४॥
१८ अबधिरो भवति । य एवं वेद । प्रजापतिः प्रजा असृजत । तासामन्नमुपाक्षीयत । ताभ्यः सूदमुप प्राभिनत् । ततो वै तासामन्नं नाक्षीयत । यस्य सूदः संभारो भवति । नास्य गृहेऽन्नं क्षीयते । आपो वा इदमग्रे सलिलमासीत् । तेन प्रजापतिरश्राम्यत् ॥ १। १। ३। ५॥
१९ कथमिद२ꣳ स्यादिति । सोऽपश्यत्पुष्करपर्णं तिष्ठत् । सोऽमन्यत । अस्ति वै तत्

। यस्मिन्निदमधितिष्ठतीति । स वराहो रूपं कृत्वोप न्यमज्जत् । स पृथिवीमध आर्च्छत्
। तस्या उपहत्योदमज्जत् । तत्पुष्करपर्णेऽप्रथयत् । यदप्रथयत् ॥ १। १। ३। ६॥
२० तत्पृथिव्यै पृथिवित्वम् । अभूद्वा इदमिति । तद्भूम्यै भूमित्वम् । तां दिशोऽनु वातः
समवहत् । ताꣳ शर्कराभिरदृꣳहत् । शं वै नोऽभूदिति । तच्छर्कराणाꣳ शर्करत्वम् ।
यद्वराहविहतꣳ संभारो भवति । अस्यामेवाछम्बट्कारमग्निमाधत्ते । शर्करा भवन्ति धृत्यै
॥ १। १। ३। ७॥
२१ अथो शंत्वाय । सरेता अग्निराधेय इत्याहुः । आपो वरुणस्य पत्नय आसन् ।
ता अग्निरभ्यध्यायत् । ताः समभवत् । तस्य रेतः पराऽपतत् । तद्धिरण्यमभवत् ।
यद्धिरण्यमुपास्यति । सरेतसमेवाग्निमाधत्ते । पुरुष इन्वै स्वाद्रेतसो बीभथ्सत इत्याहुः
॥ १। १। ३। ८॥
२२ उत्तरत उपास्यत्यबीभथ्सायै । अति प्रयच्छति । आर्तिमेवातिप्रयच्छति । अग्निर्देवेभ्यो
निलायत । अश्वो रूपं कृत्वा । सोऽश्वत्थे संवथ्सरमतिष्ठत् । तदश्वत्थस्याश्वत्थत्वम् ।
यदाश्वत्थः संभारो भवति । यदेवास्य तत्र न्यक्तम् । तदेवावरुन्धे ॥
१। १। ३। ९॥
२३ देवा वा ऊर्जं व्यभजन्त । तत उदुम्बर उदतिष्ठत् । ऊर्ग्वा उदुम्बरः । यदौदुम्बरः
संभारो भवति । ऊर्जमेवावरुन्धे । तृतीयस्यामितो दिवि सोम आसीत् । तं गायत्र्याहरत्
। तस्य पर्णमच्छिद्यत । तत्पर्णोऽभवत् । तत्पर्णस्य पर्णत्वम् ॥ १। १। ३। १०॥
२४ यस्य पर्णमयः संभारो भवति । सोमपीथमेवावरुन्धे । देवा वै ब्रह्मन्नवदन्त । तत्पर्ण
उपाश्रृणोत् । सुश्रवा वै नाम । यत्पर्णमयः संभारो भवति । ब्रह्मवर्चसमेवावरुन्धे ।
प्रजापतिरग्निमसृजत । सोऽबिभेत्प्र मा धक्ष्यतीति । तꣳ शम्याऽशमयत् ॥ १। १। ३।
११॥
२५ तच्छम्यै शमित्वम् । यच्छमीमयः संभारो भवति । शान्त्या अप्रदाहाय । अग्नेः
सृष्टस्य यतः । विकङ्कतं भा आर्च्छत् । यद्वैकङ्कतः संभारो भवति । भा एवावरुन्धे ।
सहृदयोऽग्निराधेय इत्याहुः । मरुतोऽद्भिरग्निमतमयन् । तस्य तान्तस्य हृदयमाच्छिन्दन्
। साऽशनिरभवत् । यदशनिहतस्य वृक्षस्य संभारो भवति । सहृदयमेवाग्निमाधत्ते ॥
१। १। ३। १२॥ ऊषा अभवन्नभवद्वल्मीकोऽश्राम्यदप्रथयद्धृत्यै बीभथ्सथ इत्याहू रुन्धे
पर्णत्वमशमयदच्छिन्दग्ग्स्त्रीणि च ॥ ३॥
२६ द्वादशसु विक्रामेष्वग्निमादधीत । द्वादश मासाः संवथ्सरः । संवथ्सरादेवैनमवरुध्याधत्ते

। यद्द्वादशसु विक्रामेष्वादधीत । परिमितमवरुन्धीत । चक्षुर्निमित आदधीत । इयद्द्वादशविक्रामा३ इति । परिमितं चैवापरिमितं चावरुन्धे । अनृतं वै वाचा वदति । अनृतं मनसा ध्यायति ॥ १। १। ४। १॥
२७ चक्षुर्वै सत्यम् । अद्रा३गित्याह । अदर्शमिति । तथ्सत्यम् । यश्चक्षुर्निमितेऽग्निमाधत्ते । सत्य एवैनमाधत्ते । तस्मादाहिताग्निर्नानृतं वदेत् । नास्य ब्राह्मणोऽनाश्वान्गृहे वसेत् । सत्ये ह्यस्याग्निराहितः । आग्नेयी वै रात्रिः ॥ १। १। ४। २॥
२८ आग्नेयाः पशवः । ऐन्द्रमहः । नक्तं गार्हपत्यमादधाति । पशूनेवावरुन्धे । दिवाऽऽहवनीयम् । इन्द्रियमेवावरुन्धे । अर्धोदिते सूर्य आहवनीयमादधाति । एतस्मिन्वै लोके प्रजापतिः प्रजा असृजत । प्रजा एव तद्यजमानः सृजते । अथो भूतं चैव भविष्यच्चावरुन्धे ॥
१। १। ४। ३॥
२९ इडा वै मानवी यज्ञानूकाशिन्यासीत् । साऽशृणोत् । असुरा अग्निमादधत इति । तदगच्छत् । त आहवनीयमग्र आदधत । अथ गार्हपत्यम् । अथान्वाहार्यपचनम् । साऽब्रवीत् । प्रतीच्येषाग् श्रीरगात् । भद्रा भूत्वा पराभविष्यन्तीति ॥ १। १। ४। ४॥
३० यस्यैवमग्निराधीयते । प्रतीच्यस्य श्रीरेति । भद्रो भूत्वा पराभवति । साऽशृणोत् । देवा अग्निमादधत इति । तदगच्छत् । तेऽन्वाहार्यपचनमग्र आदधत । अथ गार्हपत्यम् । अथाहवनीयम् । साऽब्रवीत् ॥ १। १। ४। ५॥
३१ प्राच्येषाग् श्रीरगात् । भद्रा भूत्वा सुवर्गं लोकमेष्यन्ति । प्रजां तु न वेथ्स्यन्त इति । यस्यैवमग्निराधीयते । प्राच्यस्य श्रीरेति । भद्रो भूत्वा सुवर्गं लोकमेति । प्रजां तु न विन्दते । साऽब्रवीदिडा मनुम् । तथा वा अहं तवाग्निमाधास्यामि । यथा प्र प्रजया पशुभिर्मिथुनैर्जनिष्यसे ॥ १। १। ४। ६॥
३२ प्रत्यस्मिन्लोके स्थास्यसि । अभि सुवर्गं लोकं जेष्यसीति । गार्हपत्यमग्र आदधात् । गार्हपत्यं वा अनु प्रजाः पशवः प्रजायन्ते । गार्हपत्येनैवास्मै प्रजां पशून्प्राजनयत् । अथान्वाहार्यपचनम् । तिर्यङ्ङिव वा अयं लोकः । अस्मिन्नेव तेन लोके प्रत्यतिष्ठत् । अथाहवनीयम् । तेनैव सुवर्गं लोकमभ्यजयत् ॥ १। १। ४। ७॥
३३ यस्यैवमग्निराधीयते । प्र प्रजया पशुभिर्मिथुनैर्जायते । प्रत्यस्मिन्लोके तिष्ठति । अभि सुवर्गं लोकं जयति । यस्य वा अयथादेवतमग्निराधीयते । आ देवताभ्यो वृश्च्यते । पापीयान्भवति । यस्य यथादेवतम् । न देवताभ्य आ वृश्च्यते । वसीयान्भवति ॥ १।

१। ४। ८॥
३४ भृगूणां त्वाऽंगिरसां व्रतपते व्रतेनादधामीति भृग्वंगिरसामादध्यात् । आदित्यानां त्वा देवानां व्रतपते व्रतेनादधामीत्यन्यासां ब्राह्मणीनां प्रजानाम् । वरुणस्य त्वा राज्ञो व्रतपते व्रतेनादधामीति राज्ञः । इन्द्रस्य त्वेन्द्रियेण व्रतपते व्रतेनादधामीति राजन्यस्य । मनोस्त्वा ग्रामण्यो व्रतपते व्रतेनादधामीति वैश्यस्य । ऋभूणां त्वा देवानां व्रतपते व्रतेनादधामीति रथकारस्य । यथादेवतमग्निराधीयते । न देवताभ्य आ वृश्च्यते । वसीयान्भवति ॥ १। १। ४। ९॥ ध्यायति वै रात्रिश्चावरुन्धे भविष्यन्तीत्यब्रवीञ्जनिष्यसेऽजयद् वसीयान् भवति नव च ॥ ४॥
३५ प्रजापतिर्वाचः सत्यमपश्यत् । तेनाग्निमाधत्त । तेन वै स आर्ध्नोत् । भूर्भुवः सुवरित्याह । एतद्वै वाचः सत्यम् । य एतेनाग्निमाधत्ते । ऋध्नोत्येव । अथो सत्यप्राशूरेव भवति । अथो य एवं विद्वानभिचरति । स्तृणुत एवैनम् ॥ १। १। ५। १॥
३६ भूरित्याह । प्रजा एव तद्यजमानः सृजते । भुव इत्याह । अस्मिन्नेव लोके प्रतितिष्ठति । सुवरित्याह । सुवर्ग एव लोके प्रतितिष्ठति । त्रिभिरक्षरैर्गार्हपत्यमादधाति । त्रय इमे लोकाः । एष्वेवैनं लोकेषु प्रतिष्ठितमाधत्ते । सर्वैः पञ्चभिराहवनीयम् ॥ १। १। ५। २॥
३७ सुवर्गाय वा एष लोकायाधीयते । यदाहवनीयः । सुवर्ग एवास्मै लोके वाचः सत्यꣳ सर्वमाप्नोति । त्रिभिर्गार्हपत्यमादधाति । पञ्चभिराहवनीयम् । अष्टौ संपद्यन्ते । अष्टाक्षरा गायत्री । गायत्रोऽग्निः । यावानेवाग्निः । तमाधत्ते ॥ १। १। ५। ३॥
३८ प्रजापतिः प्रजा असृजत । ता अस्मात्सृष्टाः पराचीरायन् । ताभ्यो ज्योतिरुदगृह्णात् । तं ज्योतिः पश्यन्तीः प्रजा अभिसमावर्तन्त । उपरीवाग्निमुद्गृह्णीयादुद्धरन् । ज्योतिरेव पश्यन्तीः प्रजा यजमानमभिसमावर्तन्ते । प्रजापतेरक्ष्यश्वयत् । तत्पराऽपतत् । तदश्वोऽभवत् । तदश्वस्याश्वत्वम् ॥ १। १। ५। ४॥
३९ एष वै प्रजापतिः । यदग्निः । प्राजापत्योऽश्वः । यदश्वं पुरस्तान्नयति । स्वमेव चक्षुः पश्यन्प्रजापतिरनूदेति । वज्री वा एषः । यदश्वः । यदश्वं पुरस्तान्नयति । जातानेव भ्रातृव्यान्प्रणुदते । पुनरावर्तयति ॥ १। १। ५। ५॥
४० जनिष्यमाणानेव प्रतिनुदते । न्याहवनीयो गार्हपत्यमकामयत । नि गार्हपत्य आहवनीयम् । तौ विभाजं नाशक्नोत् । सोऽश्वः पूर्ववाड्भूत्वा । प्राञ्चं पूर्वमुदवहत् । तत्पूर्ववाहः पूर्ववाट्त्वम् । यदश्वं पुरस्तान्नयति । विभक्तिरेवैनयोः सा । अथो

नानावीर्याविवैनौ कुरुते ॥
१। १। ५। ६॥
४१ यदुपर्युपरि शिरो हरेत् । प्राणान्, विच्छिन्द्यात् । अधोऽधः शिरो हरति । प्राणानां गोपीथाय । इयत्यग्रे हरति । अथेयत्यथेयति । त्रय इमे लोकाः । एष्वेवैनं लोकेषु प्रतिष्ठितमाधत्ते । प्रजापतिरग्निमसृजत । सोऽबिभेत्प्र मा धक्ष्यतीति ॥ १। १। ५। ७॥
४२ तस्य त्रेधा महिमानं व्यौहत् । शान्त्या अप्रदाहाय । यत्रेधाऽग्निराधीयते । महिमानमेवास्य तद्व्यूहति । शान्त्या अप्रदाहाय । पुनरावर्तयति । महिमानमेवास्य संदधाति । पशुर्वा एषः । यदश्वः । एष रुद्रः ॥ १। १। ५। ८॥
४३ यदग्निः । यदश्वस्य पदेऽग्निमादध्यात् । रुद्राय पशूनपिदध्यात् । अपशुर्यजमानः स्यात् । यन्नाक्रमयेत् । अनवरुद्धा अस्य पशवः स्युः । पार्श्वत आक्रमयेत् । यथाऽऽहितस्याग्नेरङ्गारा अभ्यववर्तेरन्न् । अवरुद्धा अस्य पशवो भवन्ति । न रुद्रायापिदधाति ॥ १। १। ५। ९॥
४४ त्रीणि हवीꣳषि निर्वपति । विराज एव विक्रान्तं यजमानोऽनु विक्रमते । अग्नये पवमानाय । अग्नये पावकाय । अग्नये शुचये । यदग्नये पवमानाय निर्वपति । पुनात्येवैनम् । यदग्नये पावकाय । पूत एवास्मिन्नन्नाद्यं दधाति । यदग्नये शुचये । ब्रह्मवर्चसमेवास्मिन्नुपरिष्टाद्दधाति ॥ १। १। ५। १०॥
एनमाहवनीयं धत्तेऽश्वत्वं वर्तयति कुरुत इति रुद्रो दधाति यदग्नये शुचय एकं च ॥ ५॥
४५ देवासुराः संयत्ता आसन्न् । ते देवा विजयमुपयन्तः । अग्नौ वामं वसु संन्यदधत । इदमु नो भविष्यति । यदि नो जेष्यन्तीति । तदग्निर्नोथ्सहमशक्नोत् । तत्रेधा विन्यदधात् । पशुषु तृतीयम् । अप्सु तृतीयम् । आदित्ये तृतीयम् ॥ १। १। ६। १॥
४६ तद्देवा विजित्य । पुनरवारुरुथ्सन्त । तेऽग्नये पवमानाय पुरोडाशमष्टाकपालं निरवपन् । पशवो वा अग्निः पवमानः । यदेव पशुष्वासीत् । तत्तेनावारुन्धत । तेऽग्नये पावकाय । आपो वा अग्निः पावकः । यदेवाप्स्वासीत् । तत्तेनावारुन्धत ॥ १। १। ६। २॥
४७ तेऽग्नये शुचये । असौ वा आदित्योऽग्निः शुचिः । यदेवादित्य आसीत् । तत्तेनावारुन्धत । ब्रह्मवादिनो वदन्ति । तनुवो वावैता अग्न्याधेयस्य । आग्नेयो वा अष्टाकपालोऽग्न्याधेयमिति । यत्तं निर्वपेत् । नैतानि । यथाऽऽत्मा स्यात् ॥ १। १। ६।

३॥
४८ नाङ्गानि । तादृगेव तत् । यदेतानि निर्वपेत् । न तम् । यथाऽङ्गानि स्युः । नात्मा । तादृगेव तत् । उभयानि सह निरुप्याणि । यज्ञस्य सात्मत्वाय । उभयं वा एतस्यैन्द्रियं वीर्यमाप्यते ॥ १। १। ६। ४॥
४९ योऽग्निमाधत्ते । ऐन्द्राग्नमेकादशकपालमनुनिर्वपेत् । आदित्यं चरुम् । इन्द्राग्नी वै देवानामयातयामानौ । ये एव देवते अयातयाम्नी । ताभ्यामेवास्मा इन्द्रियं वीर्यमवरुन्धे । आदित्यो भवति । इयं वा अदितिः । अस्यामेव प्रतितिष्ठति । धेन्वै वा एतद्रेतः ॥ १। १। ६। ५॥
५० यदाज्यम् । अनडुहस्तण्डुलाः । मिथुनमेवावरुन्धे । घृते भवति । यज्ञस्यालूक्षान्तत्वाय । चत्वार आर्षेयाः प्राश्ञन्ति । दिशामेव ज्योतिषि जुहोति । पशवो वा एतानि हवीꣳषि । एष रुद्रः । यदग्निः ॥ १। १। ६। ६॥
५१ यथ्सद्य एतानि हवीꣳषि निर्वपेत् । रुद्राय पशूनपि दध्यात् । अपशुर्यजमानः स्यात् । यन्नानुनिर्वपेत् । अनवरुद्धा अस्य पशवः स्युः । द्वादशसु रात्रीष्वनु निर्वपेत् । संवथ्सरप्रतिमा वै द्वादश रात्रयः । संवथ्सरेणैवास्मै रुद्रꣳ शमयित्वा । पशूनवरुन्धे । यदेकमेकमेतानि हवीꣳषि निर्वपेत् ॥ १। १। ६। ७॥
५२ यथा त्रीण्यावपनानि पूरयेत् । तादृक्तत् । न प्रजननमुच्छिꣳषेत् । एकं निरुप्य । उत्तरे समस्येत् । तृतीयमेवास्मै लोकमुच्छिꣳषति प्रजननाय । तं प्रजया पशुभिरनु प्रजायते । अथो यज्ञस्यैवैषाऽभिक्रान्तिः । रथचक्रं प्रवर्तयति । मनुष्यरथेनैव देवरथं प्रत्यवरोहति ॥ १। १। ६। ८॥
५३ ब्रह्मवादिनो वदन्ति । होतव्यमग्निहोत्रां ३ न होतव्या ३ मिति । यद्यजुषा जुहुयात् । अयथापूर्वमाहुती जुहुयात् । यन्न जुहुयात् । अग्निः पराभवेत् । तूष्णीमेव होतव्यम् । यथापूर्वमाहुती जुहोति । नाग्निः पराभवति । अग्नीधे ददाति ॥ १। १। ६। ९॥
५४ अग्निमुखानेवर्तून्प्रीणाति । उपबर्हणं ददाति । रूपाणामवरुद्ध्यै । अश्वं ब्रह्मणे । इन्द्रियमेवावरुन्धे । धेनुꣳ होत्रे । आशिष एवावरुन्धे । अनड्वाहमध्वर्यवे । वह्निर्वा अनड्वान् । वह्निरध्वर्युः ॥ १। १। ६। १०॥
५५ वह्निनैव वह्नि यज्ञस्यावरुन्धे । मिथुनौ गावौ ददाति । मिथुनस्यावरुद्ध्यै । वासो ददाति । सर्व देवत्यं वै वासः । सर्वा एव देवताः प्रीणाति । आ द्वादशभ्यो ददाति । द्वादश मासाः संवथ्सरः । संवथ्सर एव प्रतितिष्ठति । काममूर्ध्वं देयम्

। अपरिमितस्यावरुद्ध्यै ॥ १। १। ६। ११॥ आदित्ये तृतीयमप्स्वासीत्तत्तेनावारुन्धत स्यादाप्यते रेतोऽग्निरेकमेकमेतानि हवीꣳषि निर्वपेत्प्रत्यवरोहति ददात्यध्वर्युर्देयमेकं च ॥ ६॥

५६ घर्मः शिरस्तदयमग्निः । संप्रियः पशुभिर्भुवत् । छर्दिस्तोकाय तनयाय यच्छ । वातः प्राणस्तदयमग्निः । संप्रियः पशुभिर्भुवत् । स्वदितं तोकाय तनयाय पितुं पच । प्राचीमनु प्रदिशं प्रेहि विद्वान् । अग्नेरग्ने पुरो अग्निर्भवेह । विश्वा आशा दीद्यानो विभाहि । ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ १। १। ७। १॥

५७ अर्कश्चक्षुस्तदसौ सूर्यस्तदयमग्निः । संप्रियः पशुभिर्भुवत् । यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः । शुक्रं ज्योतिरजस्रम् । तेन मे दीदिहि तेन त्वाऽऽदधे । अग्निनाऽग्ने ब्रह्मणा । आनशे व्यानशे सर्वमायुर्व्यानशे । ये ते अग्ने शिवे तनुवौ । विराट्च स्वराट्च । ते मा विशतां ते मा जिन्वताम् ॥ १। १। ७। २॥

५८ ये ते अग्ने शिवे तनुवौ । सम्राट्चाभिभूश्च । ते मा विशतां ते मा जिन्वताम् । ये ते अग्ने शिवे तनुवौ । विभूश्च परिभूश्च । ते मा विशतां ते मा जिन्वताम् । ये ते अग्ने शिवे तनुवौ । प्रभ्वी च प्रभूतिश्च । ते मा विशतां ते मा जिन्वताम् । यास्ते अग्ने शिवास्तनुवः । ताभिस्त्वाऽऽदधे । यास्ते अग्ने घोरास्तनुवः । ताभिरमुं गच्छ ॥ १। १। ७। ३॥ चतुष्पदे जिन्वतां तनुवस्त्रीणि च ॥ ७॥

५९ इमे वा एते लोका अग्नयः । ते यदव्यावृत्ता आधीयेरन्न् । शोचयेयुर्यजमानम् । घर्मः शिर इति गार्हपत्यमादधाति । वातः प्राण इत्यन्वाहार्यपचनम् । अर्कश्चक्षुरित्याहवनीयम् । तेनैवैनान्व्यावर्तयति । तथा न शोचयन्ति यजमानम् । रथन्तरमभिगायते गार्हपत्य आधीयमाने । राथन्तरो वा अयं लोकः ॥ १। १। ८। १॥

६० अस्मिन्नेवैनं लोके प्रतिष्ठितमाधत्ते । वामदेव्यमभिगायत उद्ध्रियमाणे । अन्तरिक्षं वै वामदेव्यम् । अन्तरिक्ष एवैनं प्रतिष्ठितमाधत्ते । अथो शान्तिर्वै वामदेव्यम् । शान्तमेवैनं पशव्यमुद्धरते । बृहदभिगायत आहवनीय आधीयमाने । बार्हतो वा असौ लोकः । अमुष्मिन्नेवैनं लोके प्रतिष्ठितमाधत्ते । प्रजापतिरग्निमसृजत ॥ १। १। ८। २॥

६१ सोऽश्वो वारो भूत्वा पराङैत् । तं वारवन्तीयेनावारयत । तद्वारवन्तीयस्य वारवन्तीयत्वम् । श्यैतेन श्येती अकुरुत । तच्छ्यैतस्य श्यैतत्वम् । यद्वारवन्तीयमभिगायते । वारयित्वैवैनं प्रतिष्ठितमाधत्ते । श्यैतेन श्येती कुरुते । घर्मः शिर इति गार्हपत्यमादधाति । सशीर्षाणमेवैनमाधत्ते ॥ १। १। ८। ३॥

६२ उपैनमुत्तरो यज्ञो नमति । रुद्रो वा एषः । यदग्निः । स आधीयमान ईश्वरो यजमानस्य पशून् हिꣳसितोः । संप्रियः पशुभिर्भुवदित्याह । पशुभिरेवैनꣳ संप्रियं करोति । पशूनामहिꣳसायै । छर्दिस्तोकाय तनयाय यच्छेत्याह । आशिषमेवैतामाशास्ते । वातः प्राण इत्यन्वाहार्यपचनम् ॥ १। १। ८। ४॥

६३ सप्राणमेवैनमाधत्ते । स्वदितं तोकाय तनयाय पितुं पचेत्याह । अन्नमेवास्मै स्वदयति । प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह । विभक्तिरेवैनयोः सा । अथो नानावीर्यावेवैनौ कुरुते । ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याह । आशिषमेवैतामाशास्ते । अर्कश्चक्षुरित्याहवनीयम् । अर्को वै देवानामन्नम् ॥ १। १। ८। ५॥

६४ अन्नमेवावरुन्धे । तेन मे दीदिहीत्याह । समिन्ध एवैनम् । आनशे व्यानश इति त्रिरुदिङ्गयति । त्रय इमे लोकाः । एष्वेवैनं लोकेषु प्रतिष्ठितमाधत्ते । तत्तथा न कार्यम् । वींगितमप्रतिष्ठितमादधीत । उद्धृत्यैवाधायाभिमन्त्रियः । अवींङ्गितमेवैनं प्रतिष्ठितमाधत्ते । विराड्व स्वराड्व यास्ते अग्ने शिवास्तनुवस्ताभिस्त्वाऽऽदध इत्याह । एता वा अग्नेः शिवास्तनुवः । ताभिरेवैनꣳ समर्धयति । यास्ते अग्ने घोरास्तनुवस्ताभिरमुं गच्छेति ब्रूयाद्यं द्विष्यात् । ताभिरेवैनं पराभावयति ॥ १। १। ८। ६॥ लोकोऽसृजतैनमाधत्तेऽन्वाहार्यपचनं देवानामन्नमेनं प्रतिष्ठितमाधत्ते पञ्च च ॥ ८॥

६५ शमीगर्भादग्निं मन्थति । एषा वा अग्नेर्यज्ञिया तनूः । तामेवास्मै जनयति । अदितिः पुत्रकामा । साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत् । तस्या उच्छेषणमददुः । तत्प्राश्ञात् । सा रेतोऽधत्त । तस्यै धाता चार्यमा चाजायेताम् । सा द्वितीयमपचत् ॥ १। १। ९। १॥

६६ तस्या उच्छेषणमददुः । तत्प्राश्ञात् । सा रेतोऽधत्त । तस्यै मित्रश्च वरुणश्चाजायेताम् । सा तृतीयमपचत् । तस्या उच्छेषणमददुः । तत्प्राश्ञात् । सा रेतोऽधत्त । तस्या अꣳशश्च भगश्चाजायेताम् । सा चतुर्थमपचत् ॥ १। १। ९। २॥

६७ तस्या उच्छेषणमददुः । तत्प्राश्ञात् । सा रेतोऽधत्त । तस्या इन्द्रश्च विवस्वाꣳश्चाजायेताम् । ब्रह्मौदनं पचति । रेत एव तद्दधाति । प्राश्ञन्ति ब्राह्मणा ओदनम् । यदाज्यमुच्छिष्यते । तेन समिधोऽभ्यज्यादधाति । उच्छेषणाद्धा अदिती रेतोऽधत्त ॥ १। १। ९। ३॥

६८ उच्छेषणादेव तद्रेतो धत्ते । अस्थि वा एतत् । यथ्समिधः । एतद्रेतः । यदाज्यम् । यदाज्येन समिधोऽभ्यज्यादधाति । अस्थ्येव तद्रेतसि दधाति । तिस्र आदधाति

मिथुनत्वाय । इयतीर्भवन्ति । प्रजापतिना यज्ञमुखेन संमिताः ॥ १। १। ९। ४॥

६९ इयतीर्भवन्ति । यज्ञपरुषा संमिताः । इयतीर्भवन्ति । एतावद्वै पुरुषे वीर्यम् । वीर्यसंमिताः । आर्द्रा भवन्ति । आर्द्रमिव हि रेतः सिच्यते । चित्रियस्याश्वत्थस्यादधाति । चित्रमेव भवति । घृतवतीभिरादधाति ॥ १। १। ९। ५॥

७० एतद्वा अग्नेः प्रियं धाम । यद्घृतम् । प्रियेणैवैनं धाम्ना समर्धयति । अथो तेजसा । गायत्रीभिर्ब्राह्मणस्यादध्यात् । गायत्रछन्दा वै ब्राह्मणः । स्वस्य छन्दसः प्रत्ययनस्त्वाय । त्रिष्टुग्भी राजन्यस्य । त्रिष्टुप्छन्दा वै राजन्यः । स्वस्य छन्दसः प्रत्ययनस्त्वाय ॥ १। १। ९। ६॥

७१ जगतीभिर्वैश्यस्य । जगतीछन्दा वै वैश्यः । स्वस्य छन्दसः प्रत्ययनस्त्वाय । तꣳ संवथ्सरं गोपायेत् । संवथ्सरꣳ हि रेतो हितं वर्धते । यद्येनꣳ संवथ्सरे नोपनमेत् । समिधः पुनरादध्यात् । रेत एव तद्धितं वर्धमानमेति । न माꣳसमश्नीयात् । न स्त्रियमुपेयात् ॥ १। १। ९। ७॥

७२ यन्माꣳसमश्नीयात् । यथ्स्त्रियमुपेयात् । निर्वीर्यः स्यात् । नैनमग्निरुपनमेत् । श्व आधास्यमानो ब्रह्मौदनं पचति । आदित्या वा इत उत्तमाः सुवर्गं लोकमायन्न् । ते वा इतो यन्तं प्रतिनुदन्ते । एते खलु वावादित्याः । यद्ब्राह्मणाः । तैरेव सन्त्वं गच्छति ॥ १। १। ९। ८॥

७३ नैनं प्रतिनुदन्ते । ब्रह्मवादिनो वदन्ति । क्व सः । अग्निः कार्यः । योऽस्मै प्रजां पशून्प्रजनयतीति । शल्कैस्ताꣳ रात्रिमग्निमिन्धीत । तस्मिन्नुपव्युषमरणी निष्टपेत् । यथर्षभाय वाशिता न्याविच्छायति । तादृगेव तत् । अपोदूह्य भस्माग्निं मन्थति ॥ १। १। ९। ९॥

७४ सैव साऽग्नेः सन्ततिः । तं मथित्वा प्राञ्चमुद्धरति । संवथ्सरमेव तद्रेतो हितं प्रजनयति । अनाहितस्तस्याग्निरित्याहुः । यः समिधोऽनाधायाग्निमाधत्त इति । ताः संवथ्सरे पुरस्तादादध्यात् । संवथ्सरादेवैनमवरुध्याधत्ते । यदि संवथ्सरे नादध्यात् । द्वादश्यां पुरस्तादादध्यात् । संवथ्सरप्रतिमा वै द्वादश रात्रयः । संवथ्सरमेवास्याहिता भवन्ति । यदि द्वादश्यां नादध्यात् । त्र्यहे पुरस्तादादध्यात् । आहिता एवास्य भवन्ति ॥ १। १। ९। १०॥ द्वितीयमपचच्चतुर्थमपचददिती रेतोऽधत्त संमिता घृतवतीभिरादधाति राजन्यः स्वस्य छन्दसः प्रत्ययनस्त्वायेयाद्गच्छति मन्थति रात्रयश्चत्वारि च ॥ ९॥

७५ प्रजापतिः प्रजा असृजत । स रिरिचानोऽमन्यत । स तपोऽतप्यत । स

आत्मन्वीर्यमपश्यत् । तदवर्धत । तदस्माथ्सहसोर्ध्वमसृज्यत । सा विराडभवत् । तां देवासुरा व्यगृह्णत । सोऽब्रवीत्प्रजापतिः । मम वा एषा ॥ १। १। १०। १॥
७६ दोहा एव युष्माकमिति । सा ततः प्राच्युदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् । अथर्व पितुं मे गोपायेति । सा द्वितीयमुदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् । नर्य प्रजां मे गोपायेति । सा तृतीयमुदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् । श२ँस्य पशून्मे गोपायेति ॥ १। १। १०। २॥
७७ सा चतुर्थमुदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् । सप्रथ सभां मे गोपायेति । सा पञ्चममुदक्रामत् । तत्प्रजापतिः पर्यगृह्णात् । अहे बुध्निय मन्त्रं मे गोपायेति । अग्नीन्, वाव सा तान्व्यक्रमत । तान्प्रजापतिः पर्यगृह्णात् । अथो पङ्क्तिमेव । पङ्क्तिर्वा एषा ब्राह्मणे प्रविष्टा ॥ १। १। १०। ३॥
७८ तामात्मनोऽधि निर्मिमीते । यदग्निराधीयते । तस्मादेतावन्तोऽग्नय आधीयन्ते । पाङ्क्तं वा इद२ँ सर्वम् । पाङ्क्तेनैव पाङ्क्तग्ग्ं स्पृणोति । अथर्व पितुं मे गोपायेत्याह । अन्नमेवैतेन स्पृणोति । नर्य प्रजां मे गोपायेत्याह । प्रजामेवैतेन स्पृणोति । श२ँस्य पशून्मे गोपायेत्याह ॥ १। १। १०। ४॥
७९ पशूनेवैतेन स्पृणोति । सप्रथ सभां मे गोपायेत्याह । सभामेवैतेनेन्द्रिय२ँ स्पृणोति । अहे बुध्निय मन्त्रं मे गोपायेत्याह । मन्त्रमेवैतेन श्रियग्ग्ं स्पृणोति । यदन्वाहार्यपचनेऽन्वाहार्यं पचन्ति । तेन सोऽस्याभीष्टः प्रीतः । यद्गार्हपत्य आज्यमधिश्रयन्ति संपत्नीर्याजयन्ति । तेन सोऽस्याभीष्टः प्रीतः । यदाहवनीये जुह्वति ॥ १। १। १०। ५॥
८० तेन सोऽस्याभीष्टः प्रीतः । यथ्सभायां विजयन्ते । तेन सोऽस्याभीष्टः प्रीतः । यदावसथेऽन्न२ँ हरन्ति । तेन सोऽस्याभीष्टः प्रीतः । तथाऽस्य सर्वे प्रीता अभीष्टा आधीयन्ते । प्रवसथमेष्यन्नेवमुपतिष्ठेतैकमेकम् । यथा ब्राह्मणाय गृहेवासिने परिदाय गृहानेति । तादृगेव तत् । पुनरागत्योपतिष्ठते । साऽभागेयमेवैषां तत् । सा तत ऊर्ध्वारोहत् । सा रोहिण्यभवत् । तद्रोहिण्यै रोहिणित्वम् । रोहिण्यामग्निमादधीत । स्व एवैनं योनौ प्रतिष्ठितमाधत्ते । ऋध्नोत्येनेन ॥ १। १। १०। ६॥
एषा पशून्मे गोपायेति प्रविष्टा पशून्मे गोपायेत्याह जुह्वति तिष्ठते सप्त च ॥ १०॥
ब्रह्म संधत्तं कृत्तिकासूद्धन्ति द्वादशसु प्रजापतिर्वाचो देवासुरास्तदग्निर्नोद्धर्मः शिर इमे वै शमीगर्भात्प्रजापतिः स रिरिचानः सतपः स आत्मन्वीर्यं दश ॥ १०॥

ब्रह्म संधत्तं तौ दिव्यावथो शंत्वाय प्राच्येषां यदुपर्युपरि यथ्सद्यः सोऽश्वोऽवारो भूत्वा जगतीभिरशीतिः ॥ ८०॥
ब्रह्म संधत्तमृध्नोत्येनेन ॥

## प्रथमाष्टके द्वितीयः प्रपाठकः २

१ उद्धन्यमानमस्या अमेध्यम् । अप पाप्मानं यजमानस्य हन्तु । शिवा नः सन्तु प्रदिशश्चतस्रः । शं नो माता पृथिवी तोकसाता । शं नो देवीरभिष्टये । आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः । वैश्वानरस्य रूपम् । पृथिव्यां परिस्रसा । स्योनमाविशन्तु नः ॥
१। २। १। १॥
२ यदिदं दिवो यददः पृथिव्याः । संजज्ञाने रोदसी संबभूवतुः । ऊषान्कृष्णमवतु कृष्णमूषाः । इहोभयोर्यज्ञियमागमिष्ठाः । ऊतीः कुर्वाणो यत्पृथिवीमचरः । गुहाकारमाखुरूपं प्रतीत्य । तत्ते न्यक्तमिह संभरन्तः । शतं जीवेम शरदः सवीराः । ऊर्जं पृथिव्या रसमाभरन्तः । शतं जीवेम शरदः पुरूचीः ॥ १। २। १। २॥
३ वम्रीभिरनुवित्तं गुहासु । श्रोत्रं त उर्व्यबधिरा भवामः । प्रजापतिसृष्टानां प्रजानाम् । क्षुधोपहत्यै सुवितं नो अस्तु । उपप्रभिन्नमिषमूर्जं प्रजाभ्यः । सूदं गृहेभ्यो रसमाभरामि । यस्य रूपं बिभ्रदिमामविन्दत् । गुहा प्रविष्टाँ सरिरस्य मध्ये । तस्येदं विहतमाभरन्तः । अछम्बट्कारमस्यां विधेम ॥ १। २। १। ३॥
४ यत्पर्यपश्यथ्सरिरस्य मध्ये । उर्वीमपश्यञ्जगतः प्रतिष्ठाम् । तत्पुष्करस्यायतनाद्धि जातम् । पर्णं पृथिव्याः प्रथनँ हरामि । याभिरदृँहञ्जगतः प्रतिष्ठाम् । उर्वीमिमां विश्वजनस्य भर्त्रीम् । ता नः शिवाः शर्कराः सन्तु सर्वाः । अग्ने रेतश्चन्द्रँ हिरण्यम् । अद्भ्यः संभूतममृतं प्रजासु । तथ्संभरन्नुत्तरतो निधाय ॥
१। २। १। ४॥
५ अति प्रयच्छं दुरितिं तरेयम् । अश्वो रूपं कृत्वा यदश्वत्थेऽतिष्ठः । संवथ्सरं देवेभ्यो निलाय । तत्ते न्यक्तमिह संभरन्तः । शतं जीवेम शरदः सवीराः । ऊर्जः पृथिव्या अध्युत्थितोऽसि । वनस्पते शतवल्शो विरोह । त्वया वयमिषमूर्जं मदन्तः । रायस्पोषेण समिषा मदेम । गायत्रिया ह्रियमाणस्य यत्ते ॥ १। २। १। ५॥
६ पर्णमपतत्तृतीयस्यै दिवोऽधि । सोऽयं पर्णः सोमपर्णाद्धि जातः । ततो हरामि सोमपीथस्यावरुद्धै । देवानां ब्रह्मवादं वदतां यत् । उपाश्रृणोः सुश्रवा वै श्रुतोऽसि ।

ततो मामाविशतु ब्रह्मवर्चसम् । तथ्संभरग्ग्स्तदवरुन्धीय साक्षात् । यया ते सृष्टस्याग्नेः
। हेतिमशमयत्प्रजापतिः । तामिमामप्रदाहाय ॥ १। २। १। ६॥
७ शमीꣳ शान्त्यै हराम्यहम् । यत्ते सृष्टस्य यतः । विकङ्कतं भा आर्छज्ञातवेदः ।
तया भासा संमितः । उरुं नो लोकमनु प्रभाहि । यत्ते तान्तस्य हृदयमाच्छिन्दज्ञातवेदः
। मरुतोऽद्भिस्तमयित्वा । एतत्ते तदशनेः संभरामि । सात्मा अग्ने सहृदयो भवेह ।
चित्रियादश्वत्थाथ्संभृता बृहत्यः ॥ १। २। १। ७॥
८ शरीरमभि स२ꣳस्कृताः स्थ । प्रजापतिना यज्ञमुखेन संमिताः । तिस्रस्त्रिवृद्धिर्मिथुनाः
प्रजात्यै । अश्वत्थाद्धव्यवाहाद्धि जाताम् । अग्नेस्तनूं यज्ञियाꣳ संभरामि । शान्तयोनिꣳ
शमीगर्भम् । अग्नये प्रजनयितवै । यो अश्वत्थः शमीगर्भः । आरुरोह त्वे सचा । तं ते
हरामि ब्रह्मणा ॥ १। २। १। ८॥
९ यज्ञियैः केतुभिः सह । यं त्वा समभरञ्जातवेदः । यथा शरीरं भूतेषु न्यक्तम् । स
संभृतः सीद शिवः प्रजाभ्यः । उरुं नो लोकमनुनेषि विद्वान् । प्रवेधसे कवये मेध्याय
। वचो वन्दारु वृषभाय वृष्णे । यतो भयमभयं तन्नो अस्तु । अव देवान्, यजे हेड्यान्
। समिधाऽग्निं दुवस्यत ॥ १। २। १। ९॥
१० घृतैर्बोधयतातिथिम् । आऽस्मिन् हव्या जुहोतन । उप त्वाऽग्ने हविष्मतीः ।
घृताचीर्यन्तु हर्यत । जुषस्व समिधो मम । तं त्वा समिद्भिरङ्गिरः । घृतेन वर्धयामसि
। बृहच्छोचा यविष्ठ्य । समिध्यमानः प्रथमो नु धर्मः । समक्तुभिरज्यते विश्ववारः ॥ १।
२। १। १०॥
११ शोचिष्केशो घृतनिर्णिक्पावकः । सुयज्ञो अग्निर्यजथाय देवान् । घृतप्रतीको
घृतयोनिरग्निः । घृतैः समिद्धो घृतमस्यान्नम् । घृतप्रुषस्त्वा सरितो वहन्ति । घृतं
पिबन्थ्सुयजा यक्षि देवान् । आयुर्दा अग्ने हविषो जुषाणः । घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारु गव्यम् । पितेव पुत्रमभि रक्षतादिमम् ॥ १। २। १। ११॥
१२ त्वामग्ने समिधानं यविष्ठ । देवा दूतं चक्रिरे हव्यवाहम् । उरुज्रयसं घृतयोनिमाहुतम्
। त्वेषं चक्षुर्दधिरे चोदयन्वति । त्वामग्ने प्रदिव आहुतं घृतेन । सुम्नायवः सुषमिधा
समीधिरे । स वावृधान ओषधीभिरुक्षितः । उरुज्रयाꣳसि पार्थिवा वितिष्ठसे । घृतप्रतीकं
व ऋतस्य धूर्षदम् । अग्निं मित्रं न समिधान ऋञ्जते ॥ १। २। १। १२॥
१३ इन्धानो अक्रो विदथेषु दीद्यत् । शुक्रवर्णामुदु नो यꣳसते धियम् । प्रजा अग्ने
संवासय । आशाश्च पशुभिः सह । राष्ट्राण्यस्मा आधेहि । यान्यासन्थ्सवितुः सवे । मही

विश्पत्नी सदने ऋतस्य । अर्वाची एतं धरुणे रयीणाम् । अन्तर्वत्नी जन्यं जातवेदसम् । अध्वराणां जनयथः पुरोगाम् ॥ १। २। १। १३॥
१४ आरोहतं दशतꣳ शक्वरीर्मम । ऋतेनाग्न आयुषा वर्चसा सह । ज्योग्जीवन्त उत्तरामुत्तराꣳ समाम् । दर्शमहं पूर्णमासं यज्ञं यथा यजै । ऋत्वियवती स्थो अग्निरेतसौ । गर्भं दधाथां ते वामहं ददे । तथ्सत्यं यद्वीरं बिभृथः । वीरं जनयिष्यथः । ते मत्प्रातः प्रजनिष्येथे । ते मा प्रजाते प्रजनयिष्यथः ॥ १। २। १। १४॥
१५ प्रजया पशुभिर्ब्रह्मवर्चसेन सुवर्गे लोके । अनृताथ्सत्यमुपैमि । मानुषाद्दैव्यमुपैमि । दैवीं वाचं यच्छामि । शल्कैरग्निमिन्धानः । उभौ लोकौ सनेमहम् । उभयोर्लोकयोर्‌ऋद्ध्वा । अति मृत्युं तराम्यहम् । जातवेदो भुवनस्य रेतः । इह सिञ्च तपसो यज्जनिष्यते ॥ १। २। १। १५॥
१६ अग्निमश्वत्थादधि हव्यवाहम् । शमीगर्भाज्जनयन्, यो मयोभूः । अयं ते योनिर्‌ऋत्वियः । यतो जातो अरोचथाः । तं जानन्नग्न आरोह । अथा नो वर्धया रयिम् । अपेत वीत वि च सर्पतातः । येऽत्र स्थ पुराणा ये च नूतनाः । अदादिदं यमोऽवसानं पृथिव्याः । अक्रन्निमं पितरो लोकमस्मै ॥ १। २। १। १६॥
१७ अग्नेर्भस्मास्यग्नेः पुरीषमसि । संज्ञानमसि कामधरणम् । मयि ते कामधरणं भूयात् । सं वः सृजामि हृदयानि । सꣳसृष्टं मनो अस्तु वः । सꣳसृष्टः प्राणो अस्तु वः । सं या वः प्रियास्तनुवः । संप्रिया हृदयानि वः । आत्मा वो अस्तु संप्रियः । संप्रियास्तनुवो मम ॥ १। २। १। १७॥
१८ कल्पेतां द्यावापृथिवी । कल्पन्तामाप ओषधीः । कल्पन्तामग्नयः पृथक् । मम ज्यैष्ठ्याय सव्रताः । येऽग्नयः समनसः । अन्तरा द्यावापृथिवी । वासन्तिकावृतू अभि कल्पमानाः । इन्द्रमिव देवा अभि संविशन्तु । दिवस्त्वा वीर्येण । पृथिव्यै महिम्ना ॥ १। २। १। १८॥
१९ अन्तरिक्षस्य पोषेण । सर्वपशुमादधे । अजीजनन्नमृतं मर्त्यासः । अस्रेमाणं तरणिं वीडुजम्भम् । दश स्वसारो अग्रुवः समीचीः । पुमाꣳसं जातमभि सꣳरभन्ताम् । प्रजापतेस्त्वा प्राणेनाभि प्राणिमि । पूष्णः पोषेण मह्यम् । दीर्घायुत्वाय शतशारदाय । शतꣳ शरद्भ्य आयुषे वर्चसे ॥ १। २। १। १९॥
२० जीवात्वै पुण्याय । अहं त्वदस्मि मदसि त्वमेतत् । ममासि योनिस्तव योनिरस्मि । ममैव सन्वह हव्यान्यग्ने । पुत्रः पित्रे लोककृज्जातवेदः । प्राणे त्वाऽमृतमादधामि

। अन्नादमन्नाद्याय । गोप्तारं गुप्त्यै । सुगार्हपत्यो विदहन्नरातीः । उषसः श्रेयसीः श्रेयसीर्दधत् ॥
१। २। १। २०॥
२१ अग्ने सपत्नाँ अप बाधमानः । रायस्पोषमिषमूर्जमस्मासु धेहि । इमा उ मामुप तिष्ठन्तु रायः । आभिः प्रजाभिरिह संवसेय । इहो इडा तिष्ठतु विश्वरूपी । मध्ये वसोर्दीदिहि जातवेदः । ओजसे बलाय त्वोद्यच्छे । वृषणे शुष्मायायुषे वर्चसे । सपत्नतूरसि वृत्रतूः । यस्ते देवेषु महिमा सुवर्गः ॥ १। २। १। २१॥
२२ यस्त आत्मा पशुषु प्रविष्टः । पुष्टिर्या ते मनुष्येषु पप्रथे । तया नो अग्ने जुषमाण एहि । दिवः पृथिव्याः पर्यन्तरिक्षात् । वातात्पशुभ्यो अध्योषधीभ्यः । यत्र यत्र जातवेदः संबभूथ । ततो नो अग्ने जुषमाण एहि । प्राचीमनु प्रदिशं प्रेहि विद्वान् । अग्नेरग्ने पुरो अग्निर्भवेह । विश्वा आशा दीद्यानो विभाहि ॥ १। २। १। २२॥
२३ ऊर्जं नो धेहि द्विपदे चतुष्पदे । अन्वग्निरुषसामग्रमख्यत् । अन्वहानि प्रथमो जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीन् । अनु द्यावापृथिवी आततान । विक्रमस्व महाँ असि । वेदिषन्मानुषेभ्यः । त्रिषु लोकेषु जागृहि । यदिदं दिवो यददः पृथिव्याः । संविदाने रोदसी संबभूवतुः ॥ १। २। १। २३॥
२४ तयोः पृष्ठे सीदतु जातवेदाः । शंभूः प्रजाभ्यस्तनुवे स्योनः । प्राणं त्वाऽमृत आदधामि । अन्नादमन्नाद्याय । गोप्तारं गुप्त्यै । यत्ते शुक्र शुक्रं वर्चः शुक्रा तनूः । शुक्रं ज्योतिरजस्रम् । तेन मे दीदिहि तेन त्वाऽऽदधे । अग्निनाऽग्ने ब्रह्मणा । आनशे व्यानशे सर्वमायुर्व्यानशे ॥ १। २। १। २४॥
२५ नर्य प्रजां मे गोपाय । अमृतत्वाय जीवसे । जातां जनिष्यमाणां च । अमृते सत्ये प्रतिष्ठिताम् । अथर्व पितुं मे गोपाय । रसमन्नमिहायुषे । अदब्धायोऽशीततनो । अविषं नः पितुं कृणु । शꣳस्य पशून्मे गोपाय । द्विपादो ये चतुष्पदः ॥ १। २। १। २५॥
२६ अष्टाशफाश्च य इहाग्ने । ये चैकशफा आशुगाः । सप्रथ सभां मे गोपाय । ये च सभ्याः सभासदः । तानिन्द्रियावतः कुरु । सर्वमायुरुपासताम् । अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रैविदा विदुः । ऋचः सामानि यजूꣳषि । सा हि श्रीरमृता सताम् ॥ १। २। १। २६॥
२७ चतुःशिखण्डा युवतिः सुपेशाः । घृतप्रतीका भुवनस्य मध्ये । मर्मृज्यमाना महते

सौभगाय । मह्यं धुक्ष्व यजमानाय कामान् । इहैव सन्तत्र सतो वो अग्नयः । प्राणेन
वाचा मनसा बिभर्मि । तिरो मा सन्तमायुर्मा प्रहासीत् । ज्योतिषा वो वैश्वानरेणोपतिष्ठे
। पञ्चधाऽग्नीन्व्यक्रामत् । विराट्थ्सृष्टा प्रजापतेः । ऊर्ध्वाऽऽरोहद्रोहिणी । योनिरग्नेः
प्रतिष्ठितिः ॥ १। २। १। २७॥ विशन्तु नः पुरूचीर्विधेम निधाय यत्तेऽप्रदाहाय बृहत्यो
ब्रह्मणा दुवस्यत विश्ववार इममृञ्जते पुरोगां प्रजनयिष्यथो जनिष्यतेऽस्मै मम महिम्ना
वर्चसे दधथ्सुवर्गो भाहि संबभूवतुरायुर्व्यानशे चतुष्पदः सतां प्रजापतेर्द्वे च ॥ १॥
२८ नवैतान्यहानि भवन्ति । नव वै सुवर्गा लोकाः । यदेतान्यहान्युपयन्ति । नवस्वेव
तथ्सुवर्गेषु लोकेषु सत्रिणः प्रतितिष्ठन्तो यन्ति । अग्निष्टोमाः परः सामानः कार्या इत्याहुः
। अग्निष्टोमसंमितः सुवर्गो लोक इति । द्वादशाग्निष्टोमस्य स्तोत्राणि । द्वादश मासाः
संवथ्सरः । तत्तन्न सूक्ष्यम् । उक्थ्या एव सप्तदशाः परः सामानः कार्याः ॥ १। २। २।
१॥
२९ पशवो वा उक्थानि । पशूनामवरुध्यै । विश्वजिदभिजितावग्निष्टोमौ । उक्थ्याः
सप्तदशाः परः सामानः । ते स२ँस्तुता विराजमभि संपद्यन्ते । द्वे चर्चावति रिच्येते
। एकया गौरतिरिक्तः । एकयाऽऽयुरूनः । सुवर्गो वै लोको ज्योतिः । ऊर्ग्विराट् ॥
१। २। २। २॥
३० सुवर्गमेव तेन लोकमभि जयन्ति । यत्पर२ँ राथन्तरम् । तत्प्रथमेऽहन्कार्यम् ।
बृहद्द्वितीये । वैरूपं तृतीये । वैराजं चतुर्थे । शाक्करं पञ्चमे । रैवत२ँ षष्ठे । तदु पृष्ठेभ्यो
नयन्ति । संतनय एते ग्रहा गृह्यन्ते ॥ १। २। २। ३॥
३१ अतिग्राह्याः परः सामसु । इमानेवैतैर्लोकान्थ्सं तन्वन्ति । मिथुना एते ग्रहा गृह्यन्ते
। अतिग्राह्याः परः सामसु । मिथुनमेव तैर्यजमाना अवरुन्धते । बृहत्पृष्ठं भवति । बृहद्वै
सुवर्गो लोकः । बृहतैव सुवर्गं लोकं यन्ति । त्रयस्त्रि२ँशि नाम साम । माध्यन्दिने
पवमाने भवति ॥ १। २। २। ४॥
३२ त्रयस्त्रि२ँशद्वै देवताः । देवता एवावरुन्धते । ये वा इतः पराञ्च२ँ संवथ्सरमुप यन्ति
। न हैनं ते स्वस्ति समश्नुवते । अथ येऽमुतोऽर्वाञ्चमुप यन्ति । ते हैन२ँ स्वस्ति
समश्नुवते । एतद्वा अमुतोऽर्वाञ्चमुप यन्ति । यदेवम् । यो ह खलु वाव प्रजापतिः
। स उ वेवेन्द्रः । तदु देवेभ्यो नयन्ति ॥ १। २। २। ५॥ कार्या विराड्गृह्यन्ते पवमाने
भवतीन्द्र एकं च ॥ २॥
३३ संततिर्वा एते ग्रहाः । यत्परः सामानः । विषूवान्दिवाकीर्त्यम् । यथा शालायै

पक्षसी । एवꣳ संवथ्सरस्य पक्षसी । यदेतेन गृह्येरन् । विषूची संवथ्सरस्य पक्षसी व्यवस्रꣳसेयाताम् । आर्तिमार्छेयुः । यदेते गृह्यन्ते । यथा शालायै पक्षसी मध्यमं वꣳशमभि समायच्छति ॥ १। २। ३। १॥

३४ एवꣳ संवथ्सरस्य पक्षसी दिवाकीर्त्यमभि संतन्वन्ति । नाऽऽर्तिमार्छन्ति । एकविꣳशमहर्भवति । शुक्राग्रा ग्रहा गृह्यन्ते । प्रत्युत्तब्ध्यै सयत्वाय । सौर्य एतदहः पशुरालभ्यते । सौऱ्योऽतिग्राह्यो गृह्यते । अहरेव रूपेण समर्धयन्ति । अथो अह्न एवैष बलिर्ह्रियते । सप्तैतदहरतिग्राह्या गृह्यन्ते ॥ १। २। ३। २॥

३५ सप्त वै शीर्षण्याः प्राणाः । असावादित्यः शिरः प्रजानाम् । शीर्षन्नेव प्रजानां प्राणान्दधाति । तस्माथ्सप्त शीर्षन्प्राणाः । इन्द्रो वृत्रꣳ हत्वा । असुरान्पराभाव्य । स इमान् लोकानभ्यजयत् । तस्यासौ लोकोऽनभिजित आसीत् । तं विश्वकर्मा भूत्वाऽभ्यजयत् । यद्वैश्वकर्मणो गृह्यते ॥ १। २। ३। ३॥

३६ सुवर्गस्य लोकस्याभिजित्यै । प्र वा एतेऽस्माल्लोकाच्च्यवन्ते । ये वैश्वकर्मणं गृह्णते । आदित्यः श्वो गृह्यते । इयं वा अदितिः । अस्यामेव प्रतितिष्ठन्ति । अन्योन्यो गृह्येते । विश्वान्येवान्येन कर्माणि कुर्वाणा यन्ति । अस्यामन्येन प्रतितिष्ठन्ति । तावापरार्धाथ्संवथ्सरस्यान्योन्यो गृह्येते । तावुभौ सह महाव्रते गृह्येते । यज्ञस्यैवान्तं गत्वा । उभयोर्लोकयोः प्रतितिष्ठन्ति । अर्क्यमुक्थं भवति । अन्नाद्यस्यावरुध्यै ॥ १। २। ३। ४॥

समायच्छत्यतिग्राह्या गृह्यन्ते गृह्यते संवथ्सरस्यान्योन्यो गृह्येते पञ्च च ॥ ३॥

३७ एकविꣳश एष भवति । एतेन वै देवा एकविꣳशेन । आदित्यमित उत्तमꣳ सुवर्गं लोकमारोहयन्न् । स वा एष इत एकविꣳशः । तस्य दशावस्तादहानि । दश परस्तात् । स वा एष विराज्युभयतः प्रतिष्ठितः । विराजि हि वा एष उभयतः प्रतिष्ठितः । तस्मादन्तरेमौ लोकौ यन् । सर्वेषु सुवर्गेषु लोकेष्वभितपन्नेति ॥
१। २। ४। १॥

३८ देवा वा आदित्यस्य सुवर्गस्य लोकस्य । पराचोऽतिपादादबिभयुः । तं छन्दोभिरदृꣳहन्धृत्यै । देवा वा आदित्यस्य सुवर्गस्य लोकस्य । अवाचोऽवपादादबिभयुः । तं पञ्चभी रश्मिभिरुदवयन्न् । तस्मादेकविꣳशेऽहन्पञ्च दिवाकीर्त्यानि क्रियन्ते । रश्मयो वै दिवाकीर्त्यानि । ये गायत्रे । ते गायत्रीषूत्तरयोः पवमानयोः ॥ १। २। ४। २॥

३९ महादिवाकीर्त्यꣳ होतुः पृष्ठम् । विकर्णं ब्रह्मसामम् । भासोऽग्निष्टोमः । अथैतानि

पराणि । परैर्वै देवा आदित्यꣳ सुवर्गं लोकमपारयन्न् । यदपारयन्न् । तत्पराणां परत्वम् । पारयन्त्येनं पराणि । य एवं वेद । अथैतानि स्पराणि । स्परैर्वै देवा आदित्यꣳ सुवर्गं लोकमस्पारयन्न् । यदस्पारयन्न् । तथ्स्पराणाग् स्परत्वम् । स्पारयन्त्येनग्ग् स्पराणि । य एवं वेद ॥ १। २। ४। ३॥ एति पवमानयोः स्पराणि पञ्च च ॥ ४॥

४० अप्रतिष्ठां वा एते गच्छन्ति । येषाꣳसंवथ्सरेऽनाप्तेऽथ । एकादशिन्याप्यते । वैष्णवं वामनमालभन्ते । यज्ञो वै विष्णुः । यज्ञमेवालभन्ते प्रतिष्ठित्यै । ऐन्द्राग्नमालभन्ते । इन्द्राग्नी वै देवानामयातयामानौ । ये एव देवते अयातयाम्नी । ते एवालभन्ते ॥ १। २। ५। १॥

४१ वैश्वदेवमालभन्ते । देवता एवावरुन्धते । द्यावापृथिव्यां धेनुमालभन्ते । द्यावापृथिव्योरेव प्रतितिष्ठन्ति । वायव्यं वथ्समालभन्ते । वायुरेवैभ्यो यथाऽऽयतनाद्देवता अवरुन्धे । आदित्यामविं वशामालभन्ते । इयं वा अदितिः । अस्यामेव प्रतितिष्ठन्ति । मैत्रावरुणीमालभन्ते ॥ १। २। ५। २॥

४२ मित्रेणैव यज्ञस्य स्विष्टꣳ शमयन्ति । वरुणेन दुरिष्टम् । प्राजापत्यं तूपरं महाव्रत आलभन्ते । प्राजापत्योऽतिग्राह्यो गृह्यते । अहरेव रूपेण समर्धयन्ति । अथो अह्न एवैष बलिर्ह्रियते । आग्नेयमालभन्ते प्रति प्रज्ञात्यै । अजपेत्वान्, वा एते पूर्वैर्मासैरवरुन्धते । यदेते गव्याः पशव आलभ्यन्ते । उभयेषां पशूनामवरुध्यै ॥ १। २। ५। ३॥

४३ यदतिरिक्तामेकादशिनीमालभेरन् । अप्रियं भ्रातृव्यमभ्यतिरिच्येत । यद्वौ द्वौ पशू समस्येयुः । कनीय आयुः कुर्वीरन् । यदेते ब्राह्मणवन्तः पशव आलभ्यन्ते । नाप्रियं भ्रातृव्यमभ्यतिरिच्यते । न कनीय आयुः कुर्वते ॥ १। २। ५। ४॥ ते एवालभन्ते मैत्रावरुणीमालभन्तेऽवरुध्यै सप्त च ॥ ५॥

४४ प्रजापतिः प्रजाः सृष्ट्वा वृत्तोऽशयत् । तं देवा भूतानाꣳ रसं तेजः संभृत्य । तेनैनमभिषज्यन् । महानववर्तीति । तन्महाव्रतस्य महाव्रतत्वम् । महद्व्रतमिति । तन्महाव्रतस्य महाव्रतत्वम् । महतो व्रतमिति । तन्महाव्रतस्य महाव्रतत्वम् । पञ्चविꣳशः स्तोमो भवति ॥ १। २। ६। १॥

४५ चतुर्विꣳशत्यर्धमासः संवथ्सरः । यद्वा एतस्मिन्थ्संवथ्सरेऽधि प्राजायत । तदन्नं पञ्चविꣳशमभवत् । मध्यतः क्रियते । मध्यतो ह्यन्नमशितं धिनोति । अथो मध्यत एव प्रजानामूर्ग्धीयते । अथ यद्वा इदमन्ततः क्रियते । तस्मादुदन्ते प्रजाः समेधन्ते । अन्ततः क्रियते प्रजननायैव । त्रिवृच्छिरो भवति ॥ १। २। ६। २॥

४६ त्रेधा विहितꣳ हि शिरः । लोम छवीरस्थि । पराचा स्तुवन्ति । तस्मात्तथ्सदृगेव । न मेद्यतोऽनुमेद्यति । न कृश्यतोऽनु कृश्यति । पञ्चदशोऽन्यः पक्षो भवति । सप्तदशोऽन्यः । तस्माद्वयाग्स्यन्यतरमर्धमभि पर्यावर्तन्ते । अन्यतरतो हि तद्गरीयः क्रियते ॥ १। २। ६। ३॥

४७ पञ्चविꣳश आत्मा भवति । तस्मान्मध्यतः पशवो वरिष्ठाः । एकविꣳशं पुच्छम् । द्विपदासु स्तुवन्ति प्रतिष्ठित्यै । सर्वेण सह स्तुवन्ति । सर्वेण ह्यात्मनाऽऽत्मन्वी । सहोत्पतन्ति । एकैकामुच्छिꣳषन्ति । आत्मन्न् ह्यङ्गानि बद्धानि । न वा एतेन सर्वः पुरुषः ॥ १। २। ६। ४॥

४८ यदित इतो लोमानि दतो नखान् । परिमादः क्रियन्ते । तान्येव तेन प्रत्युप्यन्ते । औदुम्बरस्तल्पो भवति । ऊर्ग्वा अन्नमुदुम्बरः । ऊर्ज एवान्नाद्यस्यावरुध्यै । यस्य तल्पसद्यमनभिजितग्ग् स्यात् । स देवानाꣳ साम्यक्षे । तल्पसद्यमभिजयानीति तल्पमारुह्योद्गायेत् । तल्पसद्यमेवाभिजयति ॥ १। २। ६। ५॥

४९ यस्य तल्पसद्यमभिजितग्ग् स्यात् । स देवानाꣳ साम्यक्षे । तल्पसद्यं मा पराजेषीति तल्पमारुह्योद्गायेत् । न तल्पसद्यं पराजयते । प्रेङ्खे शꣳसति । महो वै प्रेङ्खः । महस एवान्नाद्यस्यावरुद्धै । देवासुराः संयत्ता आसन् । त आदित्ये व्यायच्छन्त । तं देवाः समजयन् ॥ १। २। ६। ६॥

५० ब्राह्मणश्च शूद्रश्च चर्मकर्ते व्यायच्छेते । दैव्यो वै वर्णो ब्राह्मणः । असुर्यः शूद्रः । इमेऽराथ्सुरिमे सुभूतमक्रन्नित्यन्यतरो ब्रूयात् । इम उद्वासीकारिण इमे दुर्भूतमक्रन्नित्यन्यतरः । यदेवैषाꣳ सुकृतं या राद्धिः । तदन्यतरोऽभिश्रीणाति । यदेवैषां दुष्कृतं याऽराद्धिः । तदन्यतरोऽपहन्ति । ब्राह्मणः संजयति । अमुमेवादित्यं भ्रातृव्यस्य सं विन्दन्ते ॥ १। २। ६। ७॥ भवति भवति क्रियते पुरुषो जयत्यजयञ्जयत्येकं च ॥ ६॥

उद्धन्यमानं नवैतानि सन्ततिरेकविꣳश एषोऽप्रतिष्ठां प्रजापतिर्वृत्तष्षट् ॥ ६॥

उद्धन्यमानꣳ शोचिष्केशोऽग्ने सपत्नानतिग्राह्या वैश्वदेवमालभन्ते पञ्चाशत् ॥ ५०॥

उद्धन्यमानꣳ संविंदन्ते ॥

## प्रथमाष्टके तृतीयः प्रपाठकः ३

१ देवासुराः संयत्ता आसन् । ते देवा विजयमुपयन्तः । अग्नीषोमयोस्तेजस्विनीस्तनूः संन्यदधत । इदमु नो भविष्यति । यदि नो जेष्यन्तीति । तेनाग्नीषोमावपाक्रामताम्

। ते देवा विजित्य । अग्नीषोमावन्वैच्छन् । तेऽग्निमन्वविन्दन्नृतुषूथ्संन्नम् । तस्य विभक्तीभिस्तेजस्विनीस्तनूरवारुन्धत ॥ १। ३। १। १॥
२ ते सोममन्वविन्दन् । तमघ्नन् । तस्य यथाऽभिज्ञायं तनूर्व्यगृह्णत । ते ग्रहा अभवन् । तद्ग्रहाणां ग्रहत्वम् । यस्यैवं विदुषो ग्रहा गृह्यन्ते । तस्य त्वेव गृहीताः । नानाग्नेयं पुनराधेये कुर्यात् । यदनाग्नेयं पुनराधेये कुर्यात् । व्यृद्धमेव तत् ॥ १। ३। १। २॥
३ अनाग्नेयं वा एतत्क्रियते । यथ्समिधस्तनूनपातमिडो बर्हिर्यजति । उभावाग्नेयावाज्यभागौ स्याताम् । अनाज्यभागौ भवत इत्याहुः । यदुभावाग्नेयावन्वञ्चाविति । अग्नये पवमानायोत्तरः स्यात् । यत्पवमानाय । तेनाज्यभागः । तेन सौम्यः । बुधन्वत्याग्नेयस्याज्यभागस्य पुरोऽनुवाक्या भवति ॥ १। ३। १। ३॥
४ यथा सुप्तं बोधयति । तादृगेव तत् । अग्निन्यक्ताः पत्नीसंयाजानामृचः स्युः । तेनाग्नेयꣳ सर्वं भवति । एकधा तेजस्विनीं देवतामुपैतीत्याहुः । सैनमीश्वरा प्रदह इति । नेति ब्रूयात् । प्रजननं वा अग्निः । प्रजननमेवोपैतीति । कृतयजुः संभृतसंभार इत्याहुः ॥ १। ३। १। ४॥
५ न संभृत्याः संभाराः । न यजुः कार्यमिति । अथो खलु । संभृत्या एव संभाराः । कार्यं यजुः । पुनराधेयस्य समृद्ध्यै । तेनोपाꣳशु प्रचरति । एष्य इव वा एषः । यत्पुनराधेयः । यथोपाꣳशु नष्टमिच्छति ॥ १। ३। १। ५॥
६ तादृगेव तत् । उच्चैः स्विष्टकृतमुथ्सृजति । यथा नष्टं वित्त्वा प्राहायमिति । तादृगेव तत् । एकधा तेजस्विनीं देवतामुपैतीत्याहुः । सैनमीश्वरा प्रदह इति । तत्तथा नोपैति । प्रयाजानूयाजेष्वेव विभक्तीः कुर्यात् । यथापूर्वमाज्यभागौ स्याताम् । एवं पत्नीसंयाजाः ॥
१। ३। १। ६॥
७ तद्वैश्वानरवत्प्रजननवत्तरमुपैतीति । तदाहुः । व्यृद्धं वा एतत् । अनाग्नेयं वा एतत्क्रियत इति । नेति ब्रूयात् । अग्निं प्रथमं विभक्तीनां यजति । अग्निमुत्तमं पत्नीसंयाजानाम् । तेनाग्नेयम् । तेन समृद्धं क्रियत इति ॥ १। ३। १। ७॥ अरुन्धतैव तद्भवति संभृतसंभार इत्याहुरिच्छति पत्नीसंयाजा नव च ॥ १॥
८ देवा वै यथादर्शं यज्ञानाहरन्त । योऽग्निष्टोमम् । य उक्थ्यम् । योऽतिरात्रम् । ते सहैव सर्वे वाजपेयमपश्यन् । ते । अन्योन्यस्मै नातिष्ठन्त । अहमनेन यजा इति । तेऽब्रुवन् । आजिमस्य धावामेति ॥ १। ३। २। १॥

९ तस्मिन्नाजिमधावन् । तं बृहस्पतिरुदजयत् । तेनायजत । स स्वाराज्यमगच्छत् । तमिन्द्रोऽब्रवीत् । मामनेन याजयेति । तेनेन्द्रमयाजयत् । सोऽग्रं देवतानां पर्यैत् । अगच्छथ्स्वाराज्यम् । अतिष्ठन्तास्मै ज्यैष्ठ्याय ॥ १। ३। २। २॥

१० य एवं विद्वान्, वाजपेयेन यजते । गच्छति स्वाराज्यम् । अग्रꣳ समानानां पर्येति । तिष्ठन्तेऽस्मै ज्यैष्ठ्याय । स वा एष ब्राह्मणस्य चैव राजन्यस्य च यज्ञः । तं वा एतं वाजपेय इत्याहुः । वाजाप्यो वा एषः । वाजग्ग् ह्येतेन देवा ऐप्सन्न् । सोमो वै वाजपेयः । यो वै सोमं वाजपेयं वेद ॥ १। ३। २। ३॥

११ वाज्येवैनं पीत्वा भवति । आऽस्य वाजी जायते । अन्नं वै वाजपेयः । य एवं वेद । अत्त्यन्नम् । आऽस्यान्नादो जायते । ब्रह्म वै वाजपेयः । य एवं वेद । अत्ति ब्रह्मणाऽन्नम् । आऽस्य ब्रह्मा जायते ॥ १। ३। २। ४॥

१२ वाग्वै वाजस्य प्रसवः । य एवं वेद । करोति वाचा वीर्यम् । ऐनं वाचा गच्छति । अपिवतीं वाचं वदति । प्रजापतिर्देवेभ्यो यज्ञान्व्यादिशत् । स आत्मन्वाजपेयमधत्त । तं देवा अब्रुवन् । एष वाव यज्ञः । यद्वाजपेयः ॥ १। ३। २। ५॥

१३ अप्येव नोऽत्रास्त्विति । तेभ्य एता उज्जितीः प्रायच्छत् । ता वा एता उज्जितयो व्याख्यायन्ते । यज्ञस्य सर्वत्वाय । देवतानामनिर्भागाय । देवा वै ब्रह्मणश्चान्नस्य च शमलमपाघ्नन् । यद्ब्रह्मणः शमलमासीत् । सा गाथा नाराशग्ग्स्यभवत् । यदन्नस्य । सा सुरा ॥ १। ३। २। ६॥

१४ तस्माद्गायतश्च मत्तस्य च न प्रतिगृह्यम् । यत्प्रतिगृह्णीयात् । शमलं प्रतिगृह्णीयात् । सर्वा वा एतस्य वाचोऽवरुद्धाः । यो वाजपेययाजी । या पृथिव्यां याऽग्नौ या रथन्तरे । याऽन्तरिक्षे या वायौ या वामदेव्ये । या दिवि याऽऽदित्ये या बृहति । याऽप्सु यौषधीषु या वनस्पतिषु । तस्माद्वाजपेययाज्यार्त्विजीनः । सर्वा ह्यस्य वाचोऽवरुद्धाः ॥ १। ३। २। ७॥

धावामेति ज्यैष्ठ्याय वेद ब्रह्मा जायते वाजपेयः सुराऽऽर्त्विजीन एकं च ॥ २॥

१५ देवा वै यदन्यैर्ग्रहैर्यज्ञस्य नावारुन्धत । तदतिग्राह्यैरतिगृह्यावारुन्धत । तदतिग्राह्याणामतिग्राह्यत्वम् । यदतिग्राह्या गृह्यन्ते । यदेवान्यैर्ग्रहैर्यज्ञस्य नावरुन्धे । तदेव तैरतिगृह्यावरुन्धे । पञ्च गृह्यन्ते । पाङ्क्तो यज्ञः । यावानेव यज्ञः । तमाप्त्वाऽवरुन्धे ॥ १। ३। ३। १॥

१६ सर्वे ऐन्द्रा भवन्ति । एकधैव यजमान इन्द्रियं दधति । सप्तदश प्राजापत्या ग्रहा

गृह्यन्ते । सप्तदशः प्रजापतिः । प्रजापतेराप्त्यै । एकयर्चा गृह्णाति । एकधैव यजमाने वीर्यं दधाति । सोमग्रहाग्श्च सुराग्रहाग्श्च गृह्णाति । एतद्वै देवानां परममन्नम् । यथ्सोमः ॥ १। ३। ३। २॥
१७ एतन्मनुष्याणाम् । यथ्सुरा । परमेणैवास्मा अन्नाद्येनावरमन्नाद्यमवरुन्धे । सोमग्रहान्गृह्णाति । ब्रह्मणो वा एतत्तेजः । यथ्सोमः । ब्रह्मण एव तेजसा तेजो यजमाने दधाति । सुराग्रहान्गृह्णाति । अन्नस्य वा एतच्छमलम् । यथ्सुरा ॥ १। ३। ३। ३॥
१८ अन्नस्यैव शमलेन शमलं यजमानादपहन्ति । सोमग्रहाग्श्च सुराग्रहाग्श्च गृह्णाति । पुमान् वै सोमः । स्त्री सुरा । तन्मिथुनम् । मिथुनमेवास्य तद्यज्ञे करोति प्रजननाय । आत्मानमेव सोमग्रहैः स्पृणोति । जायाꣳ सुराग्रहैः । तस्माद्वाजपेययाज्यमुष्मिं ल्लोके स्त्रियꣳ संभवति । वाजपेयाभिजितग्ग् ह्यस्य ॥ १। ३। ३। ४॥
१९ पूर्वे सोमग्रहा गृह्यन्ते । अपरे सुराग्रहाः । पुरोक्षꣳ सोमग्रहान्थ्सादयति । पश्चादक्षꣳ सुराग्रहान् । पापवस्यसस्य विधृत्यै । एष वै यजमानः । यथ्सोमः । अन्नꣳ सुरा । सोमग्रहाग्श्च सुराग्रहाग्श्च व्यतिषजति । अन्नाद्येनैवैनं व्यतिषजति ॥ १। ३। ३। ५॥
२० संपृचः स्थ सं मा भद्रेण पृङ्क्तेत्याह । अन्नं वै भद्रम् । अन्नाद्येनैवैनꣳ सꣳसृजति । अन्नस्य वा एतच्छमलम् । यथ्सुरा । पाप्मेव खलु वै शमलम् । पाप्मना वा एनमेतच्छमलेन व्यतिषजति । यथ्सोमग्रहाग्श्च सुराग्रहाग्श्च व्यतिषजति । विपृचः स्थ वि मा पाप्मना पृङ्क्तेत्याह । पाप्मनैवैनꣳ शमलेन व्यावर्तयति ॥
१। ३। ३। ६॥
२१ तस्माद्वाजपेययाजी पूतो मेध्यो दक्षिण्यः । प्राङुद्रवति सोमग्रहैः । अमुमेव तैर्लोकमभिजयति । प्रत्यङ्ख्सुराग्रहैः । इममेव तैर्लोकमभिजयति । प्रतिष्ठन्ति सोमग्रहैः । यावदेव सत्यम् । तेन सूयते । वाजसृद्भ्यः सुराग्रहान् हरन्ति । अनृतेनैव विशꣳ सꣳसृजति । हिरण्यपात्रं मधोः पूर्णं ददाति । मधव्योऽसानीति । एकधा ब्रह्मण उपहरति । एकधैव यजमान आयुस्तेजो दधाति ॥ १। ३। ३। ७॥ आप्त्वाऽवरुन्धे सोमः शमलं यथ्सुरा ह्यस्यैनं व्यतिषजति व्यावर्तयति सृजति चत्वारि च ॥ ३॥
२२ ब्रह्मवादिनो वदन्ति । नाग्निष्टोमो नोक्थ्यः । न षोडशी नातिरात्रः । अथ कस्माद्वाजपेये सर्वे यज्ञक्रतवोऽवरुध्यन्त इति । पशुभिरिति ब्रूयात् । आग्नेयं पशुमालभते । अग्निष्टोममेव तेनावरुन्धे । ऐन्द्राग्नेनोक्थ्यम् । ऐन्द्रेण षोडशिनः स्तोत्रम्

। सारस्वत्याऽतिरात्रम् ॥ १। ३। ४। १॥
२३ मारुत्या बृहतः स्तोत्रम् । एतावन्तो वै यज्ञक्रतवः । तान्पशुभिरेवावरुन्धे । आत्मानमेव स्पृणोत्यग्निष्टोमेन । प्राणापानावुक्थ्येन । वीर्यँ षोडशिनः स्तोत्रेण । वाचमतिरात्रेण । प्रजां बृहतः स्तोत्रेण । इममेव लोकमभि जयत्यग्निष्टोमेन । अन्तरिक्षमुक्थ्येन ॥ १। ३। ४। २॥
२४ सुवर्गं लोकँ षोडशिनः स्तोत्रेण । देवयानानेव पथ आरोहत्यतिरात्रेण । नाकँ रोहति बृहतः स्तोत्रेण । तेज एवाऽऽत्मन्धत्त आग्नेयेन पशुना । ओजो बलमैन्द्राग्नेन । इन्द्रियमैन्द्रेण । वाचँ सारस्वत्या । उभावेव देवलोकं च मनुष्यलोकं चाभिजयति मारुत्या वशया । सप्तदश प्राजापत्यान्पशूनालभते । सप्तदशः प्रजापतिः ॥ १। ३। ४। ३॥
२५ प्रजापतेराप्त्यै । श्यामा एकरूपा भवन्ति । एवमिव हि प्रजापतिः समृद्ध्यै । तान्पर्यग्निकृतानुथ्सृजति । मरुतो यज्ञमजिघाँसन्प्रजापतेः । तेभ्य एतां मारुतीं वशामालभत । तयैवैनानशमयत् । मारुत्या प्रचर्य । एतान्थ्संज्ञपयेत् । मरुत एव शमयित्वा ॥ १। ३। ४। ४॥
२६ एतैः प्रचरति । यज्ञस्याघाताय । एकधा वपा जुहोति । एकदेवत्या हि । एते । अथो एकधैव यजमाने वीर्यं दधाति । नैवारेण सप्तदशशरावेणैतर्हि प्रचरति । एतत्पुरोडाशा ह्येते । अथो पशूनामेव छिद्रमपिदधाति । सारस्वत्योत्तमया प्रचरति । वाग्वै सरस्वती । तस्मात्प्राणानां वागुत्तमा । अथो प्रजापतावेव यज्ञं प्रतिष्ठापयति । प्रजापतिर्हि वाक् । अपन्नदती भवति । तस्मान्मनुष्याः सर्वां वाचं वदन्ति॥ १। ३। ४। ५॥ अतिरात्रमन्तरिक्षमुक्थ्येन प्रजापतिः शमयित्वोत्तमया प्रचरति षट्च ॥ ४॥
२७ सावित्रं जुहोति कर्मणःकर्मणः पुरस्तात् । कस्तद्वेदेत्याहुः । यद्वाजपेयस्य पूर्वं यदपरमिति । सवितृप्रसूत एव यथापूर्वं कर्माणि करोति । सवने सवने जुहोति । आक्रमणमेव तथ्सेतुं यजमानः कुरुते । सुवर्गस्य लोकस्य समष्ट्यै । वाचस्पतिर्वाचमद्य स्वदाति न इत्याह । वाग्वै देवानां पुराऽन्नमासीत् । वाचमेवास्मा अन्नग्ग् स्वदयति ॥ १। ३। ५। १॥
२८ इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति रथमुपावहरति विजित्यै । वाजस्य नु प्रसवे मातरं महीमित्याह । यच्चैवेयम् । यच्चास्यामधि । तदेवावरुन्धे । अथो तस्मिन्नेवोभयेऽभिषिच्यते । अप्स्वन्तरमृतमप्सु भेषजमित्यश्वान्पल्पूलयति । अप्सु वा अश्वस्य तृतीयं प्रविष्टम् ।

तदनुवेनन्ववप्लवते । यदप्सु पल्पूलयति ॥
१। ३। ५। २॥
२९ यदेवास्याप्सु प्रविष्टम् । तदेवावरुन्धे । बहु वा अश्वोऽमेध्यमुपगच्छति । यदप्सु पल्पूलयति । मेध्यानेवैनान्करोति । वायुर्वा त्वा मनुर्वा त्वेत्याह । एता वा एतं देवता अग्रे अश्वमयुञ्जन् । ताभिरेवैनान् युनक्ति । सवस्योज्जित्यै । यजुषा युनक्ति व्यावृत्त्यै ॥
१। ३। ५। ३॥
३० अपां न पादाशुहेमन्निति संमार्ष्टि । मेध्यानेवैनान्करोति । अथो स्तौत्येवैनानाजिँ संरिष्यतः । विष्णुक्रमान्क्रमते । विष्णुरेव भूत्वेमान् लोकानभिजयति । वैश्वदेवो वै रथः । अङ्कौ न्यङ्कावभितो रथं यावित्याह । या एव देवता रथे प्रविष्टाः । ताभ्य एव नमस्करोति । आत्मनोऽनार्त्यै । अशमरथं भावुकोऽस्य रथो भवति । य एवं वेद ॥
१। ३। ५। ४॥ स्वदयति पल्पूलयति व्यावृत्त्या अनार्त्यै द्वे च ॥ ५॥
३१ देवस्याहँ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषमित्याह । सवितृप्रसूत एव ब्रह्मणा वाजमुज्जयति । देवस्याहँ सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकँरुहेयमित्याह । सवितृप्रसूत एव ब्रह्मणा वर्षिष्ठं नाकँरोहति । चात्वाले रथचक्रं निमितँ रोहति । अतो वा अंगिरस उत्तमाः सुवर्गं लोकमायन् । साक्षादेव यजमानः सुवर्गं लोकमेति । आवेष्टयति । वज्रो वै रथः । वज्रेणैव दिशोऽभि जयति ॥ १। ३। ६। १॥
३२ वाजिनाँ साम गायते । अन्नं वै वाजः । अन्नमेवावरुन्धे । वाचो वर्ष्म देवेभ्योऽपाक्रामत् । तद्वनस्पतीन्प्राविशत् । सैषा वाग्वनस्पतिषु वदति । या दुन्दुभौ । तस्माद्दुन्दुभिः सर्वा वाचोऽतिवदति । दुन्दुभीन्थ्समाघ्नन्ति । परमा वा एषा वाक् ॥ १। ३। ६। २॥
३३ या दुन्दुभौ । परमयैव वाचाऽवरां वाचमवरुन्धे । अथो वाच एव वर्ष्म यजमानोऽवरुन्धे । इन्द्राय वाचं वदतेन्द्रं वाजं जापयतेन्द्रो वाजमजयिदित्याह । एष वा एतर्हीन्द्रः । यो यजते । यजमान एव वाजमुज्जयति । सप्तदश प्रव्याधानाजिं धावन्ति । सप्तदश२ँ स्तोत्रं भवति । सप्तदश सप्तदश दीयन्ते ॥ १। ३। ६। ३॥
३४ सप्तदशः प्रजापतिः । प्रजापतेराप्त्यै । अर्वाऽसि सप्तिरसि वाज्यसीत्याह । अग्निर्वा अर्वा । वायुः सप्तिः । आदित्यो वाजी । एताभिरेवास्मै देवताभिर्देवरथं युनक्ति । प्रष्टिवाहिनं युनक्ति । प्रष्टिवाही वै देवरथः । देवरथमेवास्मै युनक्ति ॥ १। ३। ६। ४॥

३५ वाजिनो वाजं धावत काष्ठां गच्छतेत्याह । सुवर्गो वै लोकः काष्ठा । सुवर्गमेव
लोकं यन्ति । सुवर्गं वा एते लोकं यन्ति । य आजिं धावन्ति । प्राञ्चो धावन्ति । प्राङिव
हि सुवर्गो लोकः । चतसृभिरनु मन्त्रयते । चत्वारि छन्दाꣳसि । छन्दोभिरेवैनान्थ्सुवर्गं
लोकं गमयति ॥ १। ३। ६। ५॥

३६ प्र वा एतेऽस्माल्लोकाच्च्यवन्ते । य आजिं धावन्ति । उदञ्च आवर्तन्ते । अस्मादेव
तेन लोकान्नयन्ति । रथविमोचनीयं जुहोति प्रतिष्ठित्यै । आमा वाजस्य प्रसवो
जगम्यादित्याह । अन्नं वै वाजः । अन्नमेवावरुन्धे । यथालोकं वा एत उज्जयन्ति
। य आजिं धावन्ति ॥ १। ३। ६। ६॥

३७ कृष्णलं कृष्णलं वाजसृद्भ्यः प्रयच्छति । यमेव ते वाजं लोकमुज्जयन्ति । तं
परिक्रीयावरुन्धे । एकधा ब्रह्मण उपहरति । एकधैव यजमाने वीर्यं दधाति । देवा
वा ओषधीष्वाजिमयुः । ता बृहस्पतिरुदजयत् । स नीवारान्निरवृणीत । तन्नीवाराणां
नीवारत्वम् । नैवारश्चरुर्भवति ॥ १। ३। ६। ७॥

३८ एतद्वै देवानां परममन्नम् । यन्नीवाराः । परमेणैवास्मा अन्नाद्येनावरमन्नाद्यमवरुन्धे
। सप्तदशशरावो भवति । सप्तदशः प्रजापतिः । प्रजापतेराप्त्यै । क्षीरे भवति ।
रुचमेवास्मिन्दधाति । सर्पिष्वान्भवति मेध्यत्वाय । बार्हस्पत्यो वा एष देवतया ॥
१। ३। ६। ८॥

३९ यो वाजपेयेन यजते । बार्हस्पत्य एष चरुः । अश्वान्थ्सरिष्यतः सस्रुषश्चाव घ्रापयति
। यमेव ते वाजं लोकमुज्जयन्ति । तमेवावरुन्धे । अजीजिपत वनस्पतय इन्द्रं वाजं
विमुच्यध्वमिति दुन्दुभीन्, विमुञ्चति । यमेव ते वाजं लोकमिन्द्रियं दुन्दुभय उज्जयन्ति ।
तमेवावरुन्धे ॥ १। ३। ६। ९॥ अभिजयति वा एषा वाग्दीयन्तेऽस्मै युनक्ति गमयति
य आजिं धावन्ति भवति देवतयाऽष्टौ च ॥ ६॥

४० तार्प्यं यजमानं परिधापयति । यज्ञो वै तार्प्यम् । यज्ञेनैवैनꣳ समर्धयति । दर्भमयं
परिधापयति । पवित्रं वै दर्भाः । पुनात्येवैनम् । वाजं वा एषोऽवरुरुथ्सते । यो
वाजपेयेन यजते । ओषधयः खलु वै वाजः । यद्दर्भमयं परिधापयति ॥ १। ३। ७।
१॥

४१ वाजस्यावरुद्ध्यै । जाय एहि सुवो रोहावेत्याह । पत्निया एवैष
यज्ञस्यान्वारम्भोऽनवच्छित्त्यै । सप्तदशारत्निर्यूपो भवति । सप्तदशः प्रजापतिः ।
प्रजापतेराप्त्यै । तूपरश्चतुरश्रिर्भवति । गौधूमं चषालम् । न वा एते व्रीहयो न यवाः ।

यद्वोधूमाः ॥ १। ३। ७। २॥
४२ एवमिव हि प्रजापतिः समृद्ध्यै । अथो अमुमेवास्मै लोकमन्नवन्तं करोति । वासोभिर्वेष्टयति । एष वै यजमानः । यद्यूपः । सर्वदेवत्यं वासः । सर्वाभिरेवैनं देवताभिः समर्धयति । अथो आक्रमणमेव तथ्सेतुं यजमानः कुरुते । सुवर्गस्य लोकस्य समष्ट्यै । द्वादश वाजप्रसवीयानि जुहोति ॥ १। ३। ७। ३॥
४३ द्वादश मासाः संवथ्सरः । संवथ्सरमेव प्रीणाति । अथो संवथ्सरमेवास्मा उपदधाति । सुवर्गस्य लोकस्य समष्ट्यै । दशभिः कल्पै रोहति । नव वै पुरुषे प्राणाः । नाभिर्दशमी । प्राणानेव यथास्थानं कल्पयित्वा । सुवर्गं लोकमेति । एतावद्वै पुरुषस्य स्वम् ॥ १। ३। ७। ४॥
४४ यावत्प्राणाः । यावदेवास्यास्ति । तेन सह सुवर्गं लोकमेति । सुवर्देवाँ अगन्मेत्याह । सुवर्गमेव लोकमेति । अमृता अभूमेत्याह । अमृतमिव हि सुवर्गो लोकः । प्रजापतेः प्रजा अभूमेत्याह । प्राजापत्यो वा अयं लोकः । अस्मादेव तेन लोकान्नैति ॥ १। ३। ७। ५॥
४५ समहं प्रजया सं मया प्रजेत्याह । आशिषमेवैतामाशास्ते । आसपुटैर्घ्नन्ति । अन्नं वा इयम् । अन्नाद्येनैवैनँ समर्धयन्ति । ऊषैर्घ्नन्ति । एते हि साक्षादन्नम् । यदूषाः । साक्षादेवैनमन्नाद्येन समर्धयन्ति । पुरस्तात्प्रत्यञ्चं घ्नन्ति ॥ १। ३। ७। ६॥
४६ पुरस्ताद्धि प्रतीचीनमन्नमद्यते । शीर्षतो घ्नन्ति । शीर्षतो ह्यन्नमद्यते । दिग्भ्यो घ्नन्ति । दिग्भ्य एवास्मा अन्नाद्यमवरुन्धते । ईश्वरो वा एष पराङ्ङ्दघः । यो यूपँ रोहति । हिरण्यमध्यवरोहति । अमृतं वै हिरण्यम् । अमृतँ सुवर्गो लोकः ।
४७ अमृत एव सुवर्गे लोके प्रतितिष्ठति । शतमानं भवति । शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति । पुष्ट्यै वा एतद्रूपम् । यदजा । त्रिः संवथ्सरस्यान्यान्पशून्परि प्रजायते । बस्ताजिनमध्यव रोहति । पुष्ट्यामेव प्रजनने प्रतितिष्ठति ॥ १। ३। ७। ७॥
परिधापयति गोधूमा जुहोति स्वं नैति प्रत्यञ्चं घ्नन्ति लोको नव च ॥ ७॥
४८ सप्तान्नहोमाञ्जुहोति । सप्त वा अन्नानि । यावन्त्येवान्नानि । तान्येवावरुन्धे । सप्त ग्राम्या ओषधयः । सप्तारण्याः । उभयीषामवरुद्ध्यै । अन्नस्यान्नस्य जुहोति । अन्नस्यान्नस्यावरुद्ध्यै । यद्वाजपेययाज्यनव रुद्धस्याश्नीयात् ॥ १। ३। ८। १॥
४९ अवरुद्धेन व्यृद्ध्येत । सर्वस्य समवदाय जुहोति । अनवरुद्धस्यावरुद्ध्यै । औदुम्बरेण स्रुवेण जुहोति । ऊर्ग्वा अन्नमुदुम्बरः । ऊर्ज एवान्नाद्यस्यावरुद्ध्यै । देवस्य त्वा सवितुः

प्रसव इत्याह । सवितृ प्रसूत एवैनं ब्रह्मणा देवताभिरभिषिञ्चति । अन्नस्यान्नस्याभिषिञ्चति । अन्नस्यान्नस्यावरुद्ध्यै ॥ १। ३। ८। २॥
५० पुरस्तात् प्रत्यञ्चमभिषिञ्चति । पुरस्ताद्धि प्रतीचीनमन्नमद्यते । शीर्षतोऽभिषिञ्चति । शीर्षतो ह्यन्नमद्यते । आ मुखादन्ववस्रावयति । मुखत एवास्मा अन्नाद्यं दधाति । अग्नेस्त्वा साम्राज्येनाभिषिञ्चामीत्याह । एष वा अग्नेः सवः । तेनैवैनमभिषिञ्चति । इन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामीत्याह ॥
१। ३। ८। ३॥
५१ इन्द्रियमेवास्मिन्नेतेन दधाति । बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीत्याह । ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणैवैनमभिषिञ्चति । सोमग्रहाग्श्चावदानीयानि चर्त्विग्भ्य उप हरन्ति । अमुमेव तैर्लोकमन्नवन्तं करोति । सुराग्रहाग्श्चानवदानीयानि च वाजसृद्भ्यः । इममेव तैर्लोकमन्नवन्तं करोति । अथो उभयोष्वेवाभिषिच्यते । विमाथं कुर्वते वाजसृतः ॥ १। ३। ८। ४॥
५२ इन्द्रियस्यावरुद्ध्यै । अनिरुक्ताभिः प्रातःसवने स्तुवते । अनिरुक्तः प्रजापतिः । प्रजापतेराप्त्यै । वाजवतीभिर्माध्यन्दिने । अन्नं वै वाजः । अन्नमेवावरुन्धे । शिपिविष्टवतीभिस्तृतीयसवने । यज्ञो वै विष्णुः । पशवः शिपिः । यज्ञ एव पशुषु प्रतितिष्ठति । बृहदन्त्यं भवति । अन्तमेवैनग्ग् श्रियै गमयति ॥ १। ३। ८। ५॥
अश्नीयादन्नस्यान्नस्यावरुद्ध्या इन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामीत्याह वाजसृतः शिपिस्त्रीणि च ॥ ८॥
५३ नृषदं त्वेत्याह । प्रजा वै नृन् । प्रजानामेवैतेन सूयते । द्रुषदमित्याह । वनस्पतयो वै द्रु । वनस्पतीनामेवैतेन सूयते । भुवनसदमित्याह । यदा वै वसीयान्भवति । भुवनमगन्निति वै तमाहुः । भुवनमेवैतेन गच्छति ॥ १। ३। ९। १॥
५४ अप्सुषदं त्वा घृतसदमित्याह । अपामेवैतेन घृतस्य सूयते । व्योमसदमित्याह । यदा वै वसीयान्भवति । व्योमागन्निति वै तमाहुः । व्योमैवैतेन गच्छति । पृथिविषदं त्वाऽन्तरिक्षसदमित्याह । एषामेवैतेन लोकानाꣳसूयते । तस्माद्वाजपेययाजी न कं चन प्रत्यवरोहति । अपीव हि देवतानाꣳ सूयते ॥ १। ३। ९। २॥
५५ नाकसदमित्याह । यदा वै वसीयान्भवति । नाकमगन्निति वै तमाहुः । नाकमेवैतेन गच्छति । ये ग्रहाः पञ्चजनीना इत्याह । पञ्चजनानामेवैतेन सूयते । अपाꣳ रसमुद्वयसमित्याह । अपामेवैतेन रसस्य सूयते । सूर्यरश्मिꣳ समाभृतमित्याह

सशुक्रत्वाय ॥ १। ३। ९। ३॥ गच्छति सूयते नव च ॥ ९॥
५६ इन्द्रो वृत्रꣳ हत्वा । असुरान्पराभाव्य । सोऽमावास्यां प्रत्यागच्छत् । ते पितरः पूर्वेद्युरागच्छन् । पितॄन्, यज्ञोऽगच्छत् । तं देवाः पुनरयाचन्त । तमेभ्यो न पुनरददुः । तेऽब्रुवन्वरं वृणामहै । अथ वः पुनर्दास्यामः । अस्मभ्यमेव पूर्वेद्युः क्रियाता इति ॥ १। ३। १०। १॥
५७ तमेभ्यः पुनरददुः । तस्मात्पितृभ्यः पूर्वेद्युः क्रियते । यत्पितृभ्यः पूर्वेद्युः करोति । पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानः प्रतनुते । सोमाय पितृपीताय स्वधा नम इत्याह । पितुरेवाधि सोमपीथमवरुन्धे । न हि पिता प्रमीयमाण आहैष सोमपीथ इति । इन्द्रियं वै सोमपीथः । इन्द्रियमेव सोमपीथमवरुन्धे । तेनेन्द्रियेण द्वितीयां जायामभ्यश्नुते ॥ १। ३। १०। २॥
५८ एतद्वै ब्राह्मणं पुरा वाजश्रवसा विदामक्रन् । तस्मात्ते द्वेद्वे जाये अभ्याक्षत । य एवं वेद । अभि द्वितीयां जायामश्नुते । अग्नये कव्यवाहनाय स्वधा नम इत्याह । य एव पितृणामग्निः । तं प्रीणाति । तिस्र आहुतीर्जुहोति । त्रिर्निदधाति । षट्थ् संपद्यन्ते ॥ १। ३। १०। ३॥
५९ षड्वा ऋतवः । ऋतूनेव प्रीणाति । तूष्णीं मेक्षणमादधाति । अस्ति वा हि षष्ठ ऋतुर्न वा । देवान्, वै पितॄन्प्रीतान् । मनुष्याः पितरोऽनु प्रपिपते । तिस्र आहुतीर्जुहोति । त्रिर्निदधाति । षट्थ् संपद्यन्ते । षड्वा ऋतवः ॥ १। ३। १०। ४॥
६० ऋतवः खलु वै देवाः पितरः । ऋतूनेव देवान्पितॄन्प्रीणाति । तान्प्रीतान् । मनुष्याः पितरोऽनु प्रपिपते । सकृदाच्छिन्नं बर्हिर्भवति । सकृदिव हि पितरः । त्रिर्निदधाति । तृतीये वा इतो लोके पितरः । तानेव प्रीणाति । पराङावर्तते ॥ १। ३। १०। ५॥
६१ ह्नीका हि पितरः । ओष्मणो व्यावृत उपास्ते । ऊष्मभागा हि पितरः । ब्रह्मवादिनो वदन्ति । प्राश्यां ३ न प्राश्या ३ मिति । यत्प्राश्नीयात् । जन्यमन्नमद्यात् । प्रमायुकः स्यात् । यन्न प्राश्नीयात् । अहविः स्यात् ॥ १। ३। १०। ६॥
६२ पितृभ्य आवृश्च्येत । अवघ्रेयमेव । तन्नेव प्राशितं नेवाप्राशितम् । वीरं वा वै पितरः प्रयन्तो हरन्ति । वीरं वा ददति । दशां छिनत्ति । हरणभागा हि पितरः । पितॄनेव निरवदयते । उत्तर आयुषि लोम छिन्दीत । पितृणाग् ह्येतर्हि नेदीयः ॥ १। ३। १०। ७॥
६३ नमस्करोति । नमस्कारो हि पितृणाम् । नमो वः पितरो रसाय । नमो वः पितरः

शुष्माय । नमो वः पितरो जीवाय । नमो वः पितरः स्वधायै । नमो वः पितरो मन्यवे । नमो वः पितरो घोराय । पितरो नमो वः । य एतस्मिं लोके स्थ ॥ १। ३। १०। ८॥
६४ युष्माग् स्तेऽनु । येऽस्मिं लोके । मां तेऽनु । य एतस्मिं लोके स्थ । यूयं तेषां वसिष्ठा भूयास्त । येऽस्मिं लोके । अहं तेषां वसिष्ठो भूयासमित्याह । वसिष्ठः समानानां भवति । य एवं विद्वान्पितृभ्यः करोति । एष वै मनुष्याणां यज्ञः ॥ १। ३। १०। ९॥
६५ देवानां वा इतरे यज्ञाः । तेन वा एतत्पितृलोके चरति । यत्पितृभ्यः करोति । स ईश्वरः प्रमेतोः । प्राजापत्ययर्चा पुनरैति । यज्ञो वै प्रजापतिः । यज्ञेनैव सह पुनरैति । न प्रमायुको भवति । पितृलोके वा एतद्यजमानश्चरति । यत्पितृभ्यः करोति । स ईश्वर आर्तिमार्तोः । प्रजापतिस्त्वावैनं तत उन्नेतुमर्हतीत्याहुः । यत्प्राजापत्ययर्चा पुनरैति । प्रजापतिरेवैनं तत उन्नयति । नार्तिमार्छति यजमानः ॥ १। ३। १०। १०॥ इत्यश्नुते पद्यन्ते पद्यन्ते षड्वा ऋतवो वर्ततेऽहविः स्यान्नेदीयः स्थ यज्ञो यजमानश्चरति यत्पितृभ्यः करोति पञ्च च ॥ १०॥
देवासुरा अग्नीषोमयोर्देवा वै यथा दर्शं देवा वै यदन्यैर्ग्रहैर्ब्रह्मवादिनो नाग्निष्टोमो न सावित्रं देवस्याहं तार्प्यँ सप्तान्नहोमान्नृषदं त्वेन्द्रो वृत्रँ हत्वा दश ॥ १०॥
देवासुरा वाज्येवैनं तस्माद्वाजपेययाजी देवस्याहं वाजस्यावरुद्ध्या इन्द्रियमेवास्मिन् ह्लीका हि पितरः पञ्चषष्टिः ॥ ६५॥
देवासुरा यजमानः ॥

## प्रथमाष्टके चतुर्थः प्रपाठकः ४

१ उभये वा एते प्रजापतेरध्यसृज्यन्त । देवाश्चासुराश्च । तान्न व्यजानात् । इमेऽन्य इमेऽन्य इति । स देवान्ँ शूनकरोत् । तानभ्यषुणोत् । तान्पवित्रेणापुनात् । तान्परस्तात्पवित्रस्य व्यगृह्णात् । ते ग्रहा अभवन् । तद्ग्रहाणां ग्रहत्वम् ॥ १। ४। १। १॥
२ देवता वा एता यजमानस्य गृहे गृह्यन्ते । यद्ग्रहाः । विदुरेनं देवाः । यस्यैवं विदुष एते ग्रहा गृह्यन्ते । एषा वै सोमस्याहुतिः । यदुपाँशुः । सोमेन देवाग्स्तर्पयाणीति खलु वै सोमेन यजते । यदुपाँशुं जुहोति । सोमेनैव तद्देवाग्स्तर्पयति । यद्ग्रहाञ्जुहोति ॥ १। ४। १। २॥
३ देवा एव तद्देवान्गच्छन्ति । यच्चमसाञ्जुहोति । तेनैवानुरूपेण यजमानः सुवर्गं लोकमेति

। किं न्वेतदग्र आसीदित्याहुः । यत्पात्राणीति । इयं वा एतदग्र आसीत् । मृन्मयानि वा एतान्यासन् । तैर्देवा न व्यावृतमगच्छन् । त एतानि दारुमयाणि पात्राण्यपश्यन् । तान्यकुर्वत ॥
१। ४। १। ३॥
४ तैर्वै ते व्यावृतमगच्छन् । यद्दारुमयाणि पात्राणि भवन्ति । व्यावृतमेव तैर्यजमानो गच्छति । यानि दारुमयाणि पात्राणि भवन्ति । अमुमेव तैर्लोकमभिजयति । यानि मृन्मयानि । इममेव तैर्लोकमभिजयति । ब्रह्मवादिनो वदन्ति । काश्चतस्रः स्थालीर्वायव्याः सोमग्रहणीरिति । देवा वै पृश्निमदुह्रन् ॥ १। ४। १। ४॥
५ तस्या एते स्तना आसन् । इयं वै पृश्निः । तामादित्या आदित्यस्थाल्या चतुष्पदः पशूनदुह्रन् । यदादित्यस्थाली भवति । चतुष्पद एव तया पशून्, यजमान इमां दुहे । तामिन्द्र उक्थ्यस्थाल्येन्द्रियमदुहत् । यदुक्थ्यस्थाली भवति । इन्द्रियमेव तया यजमान इमां दुहे । तां विश्वे देवा आग्रयणस्थाल्योर्जमदुह्रन् । यदाग्रयणस्थाली भवति ॥ १। ४। १। ५॥
६ ऊर्जमेव तया यजमान इमां दुहे । तां मनुष्या ध्रुवस्थाल्याऽऽयुरदुह्रन् । यद्ध्रुवस्थाली भवति । आयुरेव तया यजमान इमां दुहे । स्थाल्या गृह्णाति । वायव्येन जुहोति । तस्मादन्येन पात्रेण पशून्दुहन्ति । अन्येन प्रतिगृह्णन्ति । अथो व्यावृतमेव तद्यजमानो गच्छति ॥ १। ४। १। ६॥ ग्रहत्वं ग्रहाञ्जुहोत्यकुर्वतादुह्रन्नाग्रयणस्थाली भवति नव च ॥ १॥
७ युवꣳ सुराममश्विना । नमुचावाऽसुरे सचा । विपिपाना शुभस्पती । इन्द्रं कर्मस्वावतम् । पुत्रमिव पितरावश्विनोभा । इन्द्रावतं कर्मणा दꣳसनाभिः । यथ्सुरामं व्यपिबः शचीभिः । सरस्वती त्वा मघवन्नभीष्णात् । अहाव्यग्ने हविरास्ये ते । स्रुचीव घृतं चमू इव सोमः ॥ १। ४। २। १॥
८ वाजसनिꣳरयिमस्मे सुवीरम् । प्रशस्तं धेहि यशसं बृहन्तम् । यस्मिन्नश्वास ऋषभास उक्षणः । वशा मेषा अवसृष्टास आहुताः । कीलालपे सोमपृष्ठाय वेधसे । हृदा मतिं जनय चारुमग्नये । नाना हि वां देवहितꣳ सदो मितम् । मा सꣳसृक्षाथां परमे व्योमन् । सुरा त्वमसि शुष्मिणी सोम एषः । मा मा हिꣳसीः स्वां योनिमाविशन् ॥ १। ४। २। २॥
९ यदत्र शिष्टꣳ रसिनः सुतस्य । यदिन्द्रो अपिबच्छचीभिः । अहं तदस्य मनसा

शिवेन । सोमꣳ राजानमिह भक्षयामि । द्वे स्रुती अशृणवं पितृणाम् । अहं देवानामुत मर्त्यानाम् । ताभ्यामिदं विश्वं भुवनꣳ समेति । अन्तरा पूर्वमपरं च केतुम् । यस्ते देव वरुण गायत्रछन्दाः पाशः । तं त एतेनावयजे ॥ १। ४। २। ३॥

१० यस्ते देव वरुण त्रिष्टुप्छन्दाः पाशः । तं त एतेनावयजे । यस्ते देव वरुण जगतीछन्दाः पाशः । तं त एतेनावयजे । सोमो वा एतस्य राज्यमादत्ते । यो राजा सन्राज्यो वा सोमेन यजते । देवसुवामेतानि हवीꣳषि भवन्ति । एतावन्तो वै देवानाꣳ सवाः । त एवास्मै सवान्प्रयच्छन्ति । त एनं पुनः सुवन्ते राज्याय । देवसू राजा भवति ॥

१। ४। २। ४॥ सोम आविशन्, यजे राज्यायैकं च ॥ २॥

११ उदस्थाद्देव्यदितिर्विश्वरूपी । आयुर्यज्ञपतावधात् । इन्द्राय कृण्वती भागम् । मित्राय वरुणाय च । इयं वा अग्निहोत्री । इयं वा एतस्य निषीदति । यस्याग्निहोत्री निषीदति । तामुत्थापयेत् । उदस्थाद्देव्यदितिरिति । इयं वै देव्यदितिः ॥ १। ४। ३। १॥

१२ इमामेवास्मा उत्थापयति । आयुर्यज्ञपतावधादित्याह । आयुरेवास्मिन्दधाति । इन्द्राय कृण्वती भागं मित्राय वरुणाय चेत्याह । यथा यजुरेवैतत् । अवर्तिं वा एषैतस्य पाप्मानं प्रतिख्याय निषीदति । यस्याग्निहोत्र्युपसृष्टा निषीदति । तां दुग्ध्वा ब्राह्मणाय दद्यात् । यस्यान्नं नाद्यात् । अवर्तिमेवास्मिन्पाप्मानं प्रतिमुञ्चति ॥ १। ४। ३। २॥

१३ दुग्ध्वा ददाति । न ह्यदृष्टा दक्षिणा दीयते । पृथिवीं वा एतस्य पयः प्रविशति । यस्याग्निहोत्रं दुह्यमानग्ग् स्कन्दति । यदद्य दुग्धं पृथिवीमसक्त । यदोषधीरप्यसरद्यदापः । पयो गृहेषु पयो अघ्नियासु । पयो वथ्सेषु पयो अस्तु तन्मयीत्याह । पय एवात्मन्गृहेषु पशुषु धत्ते । अप उपसृजति ॥ १। ४। ३। ३॥

१४ अद्भिरेवैनदाप्नोति । यो वै यज्ञस्यार्तेनानार्तꣳ सꣳसृजति । उभे वै ते तर्ह्यार्छतः । आर्छति खलु वा एतदग्निहोत्रम् । यद्दुह्यमानग्ग् स्कन्दति । यदभिदुह्यात् । आर्तेनानार्तं यज्ञस्य सꣳसृजेत् । तदेव यादृक्कीदृक्क होतव्यम् । अथान्यां दुग्ध्वा पुनर् होतव्यम् । अनार्तेनैवार्तं यज्ञस्य निष्करोति ॥ १। ४। ३। ४॥

१५ यद्युद्द्रुतस्य स्कन्देत् । यत्ततोऽहुत्वा पुनरेयात् । यज्ञं विच्छिन्द्यात् । यत्र स्कन्देत् । तन्निषद्य पुनर्गृह्णीयात् । यत्रैव स्कन्दति । तत एवैनत्पुनर्गृह्णाति । तदेव यादृक्कीदृक्क होतव्यम् । अथान्यां दुग्ध्वा पुनर् होतव्यम् । अनार्तेनैवार्तं यज्ञस्य निष्करोति ॥ १। ४। ३। ५॥

१६ वि वा एतस्य यज्ञश्छिद्यते । यस्याग्निहोत्रेऽधिश्रिते श्वाऽन्तरा धावति । रुद्रः खलु वा एषः । यदग्निः । यद्वामन्वत्यावर्तयेत् । रुद्राय पशूनपिदध्यात् । अपशुर्यजमानः स्यात् । यदपोऽन्वतिषिञ्चेत् । अनाद्यमग्नेरापः । अनाद्यमाभ्यामपि दध्यात् । गार्हपत्याद्भस्मादाय । इदं विष्णुर्विचक्रम इति वैष्णव्यर्चाऽहवनीयाद्धꣳसयन्नुद्द्रवेत् । यज्ञो वै विष्णुः । यज्ञेनैव यज्ञꣳ संतनोति । भस्मना पदमपि वपति शान्त्यै ॥ १। ४। ३। ६॥ वै देव्यदितिर्मुञ्चति सृजति करोति करोत्याभ्यामपि दध्यात्पञ्च च ॥ ३॥

१७ नि वा एतस्याहवनीयो गार्हपत्यं कामयते । नि गार्हपत्य आहवनीयम् । यस्याग्निमनुद्धृतꣳ सूर्योऽभिनिम्रोचति । दर्भेण हिरण्यं प्रबध्य पुरस्ताद्धरेत् । अथाग्निम् । अथाग्निहोत्रम् । यद्धिरण्यं पुरस्ताद्धरति । ज्योतिर्वै हिरण्यम् । ज्योतिरेवैनं पश्यन्नुद्धरति । यदग्निं पूर्वꣳ हरत्यथाग्निहोत्रम् ॥ १। ४। ४। १॥

१८ भागधेयेनैवैनं प्रणयति । ब्राह्मण आर्षेय उद्धरेत् । ब्राह्मणो वै सर्वा देवताः । सर्वाभिरेवैनं देवताभिरुद्धरति । अग्निहोत्रमुपसाद्यातमितोरासीत । व्रतमेव हतमनु म्रियते । अन्तं वा एष आत्मनो गच्छति । यस्ताम्यति । अन्तमेष यज्ञस्य गच्छति । यस्याग्निमनुद्धृतꣳ सूर्योऽभिनिम्रोचति ॥ १। ४। ४। २॥

१९ पुनः समन्य जुहोति । अन्तेनैवान्तं यज्ञस्य निष्करोति । वरुणो वा एतस्य यज्ञं गृह्णाति । यस्याग्निमनुद्धृतꣳ सूर्योऽभिनिम्रोचति । वारुणं चरुं निर्वपेत् । तेनैव यज्ञं निष्क्रीणीते । नि वा एतस्याहवनीयो गार्हपत्यं कामयते । नि गार्हपत्य आहवनीयम् । यस्याग्निमनुद्धृतꣳ सूर्योऽभ्युदेति । चतुर्गृहीतमाज्यं पुरस्ताद्धरेत् ॥ १। ४। ४। ३॥

२० अथाग्निम् । अथाग्निहोत्रम् । यदाज्यं पुरस्ताद्धरति । एतद्वा अग्नेः प्रियं धाम । यदाज्यम् । प्रियेणैवैनं धाम्ना समर्धयति । यदग्निं पूर्वꣳ हरत्यथाग्निहोत्रम् । भागधेयेनैवैनं प्रणयति । ब्राह्मण आर्षेय उद्धरेत् । ब्राह्मणो वै सर्वा देवताः ॥ १। ४। ४। ४॥

२१ सर्वाभिरेवैनं देवताभिरुद्धरति । पराची वा एतस्मै व्युच्छन्ती व्युच्छति । यस्याग्निमनुद्धृतꣳ सूर्योऽभ्युदेति । उषाः केतुना जुषताम् । यज्ञं देवेभिरिन्वितम् । देवेभ्यो मधुमत्तमग्ग् स्वाहेति प्रत्यङ्ङ् निषद्याज्येन जुहुयात् । प्रतीचीमेवास्मै विवासयति । अग्निहोत्रमुपसाद्यातमितोरासीत । व्रतमेव हतमनु म्रियते । अन्तं वा एष आत्मनो गच्छति ॥ १। ४। ४। ५॥

२२ यस्ताम्यति । अन्तमेष यज्ञस्य गच्छति । यस्याग्निमनुद्धृतꣳ सूर्योऽभ्युदेति । पुनः समन्य जुहोति । अन्तेनैवान्तं यज्ञस्य निष्करोति । मित्रो वा एतस्य यज्ञं गृह्णाति

। यस्याग्निमनुद्धृतꣳ सूर्योऽभ्युदेति । मैत्रं चरुं निर्वपेत् । तेनैव यज्ञं निष्क्रीणीते । यस्याहवनीयेऽनुद्वाते गार्हपत्य उद्वायेत् ॥ १। ४। ४। ६॥
२३ यदाहवनीयमनुद्वाप्य गार्हपत्यं मन्थेत् । विच्छिन्द्यात् । भ्रातृव्यमस्मै जनयेत् । यद्वै यज्ञस्य वास्तव्यं क्रियते । तदनु रुद्रोऽवचरति । यत्पूर्वमन्ववस्येत् । वास्तव्यमग्निमुपासीत । रुद्रोऽस्य पशून्घातुकः स्यात् । आहवनीयमुद्वाप्य । गार्हपत्यं मन्थेत् ॥ १। ४। ४। ७॥
२४ इतः प्रथमं जज्ञे अग्निः । स्वाद्योनेरधि जातवेदाः । स गायत्रिया त्रिष्टुभा जगत्या । देवेभ्यो हव्यं वहतु प्रजानन्निति । छन्दोभिरेवैनग्ग् स्वाद्योनेः प्रजनयति । गार्हपत्यं मन्थति । गार्हपत्यं वा अन्वाहिताग्नेः पशव उपतिष्ठन्ते । स यदुद्वायति । तदनु पशवोऽप क्रामन्ति । इषे रय्यै रमस्व ॥ १। ४। ४। ८॥
२५ सहसे द्युम्नाय । ऊर्जे पत्यायेत्याह । पशवो वै रयिः । पशूनेवास्मै रमयति । सारस्वतौ त्वोथ्सौ समिन्धातामित्याह । ऋख्सामे वै सारस्वतावुथ्सौ । ऋख्सामाभ्यामेवैनꣳ समिन्धे । सम्राडसि विराडसीत्याह । रथन्तरं वै सम्राट् । बृहद्विराट् ॥ १। ४। ४। ९॥
२६ ताभ्यामेवैनꣳ समिन्धे । वज्रो वै चक्रम् । वज्रो वा एतस्य यज्ञं विच्छिनत्ति । यस्यानो वा रथो वाऽन्तराऽग्नी याति । आहवनीयमुद्वाप्य । गार्हपत्यादुद्धरेत् । यदग्ने पूर्वं प्रभृतं पदꣳ हि ते । सूर्यस्य रश्मीनन्वाततान । तत्र रयिष्ठामनु संभरैतम् । सं नः सृज सुमत्या वाजवत्येति ॥ १। ४। ४। १०॥
२७ पूर्वेणैवास्य यज्ञेन यज्ञमनु सं तनोति । त्वमग्ने सप्रथा असीत्याह । अग्निः सर्वा देवताः । देवताभिरेव यज्ञꣳ सं तनोति । अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् । अग्निमेव पथिकृतग्ग् स्वेन भागधेयेनोप धावति । स एवैनं यज्ञियं पन्थामपि नयति । अनड्वान्दक्षिणा । वही ह्येष समृद्ध्यै ॥ १। ४। ४। ११॥
हरत्यथाग्निहोत्रं निम्रोचति हरेद्देवता गच्छत्युद्वायेन्मन्थेद्रमस्व बृहद्विराडिति नव च ॥ ४॥ नि वै पूर्वं त्रीणि निम्रोचति दर्भेण यद्धिरण्यमग्निहोत्रं पुनर्वरुणो वारुणं नि वा एतस्याभ्युदेति चतुर्गृहीतमाज्यं यदाज्यं पराच्युषाः पुनर्मित्रो मैत्रं यस्याहवनीयेऽनुद्वाते गार्हपत्ये यद्वै ॥
२८ यस्य प्रातःसवने सोमोऽतिरिच्यते । माध्यन्दिनꣳ सवनं कामयमानोऽभ्यतिरिच्यते । गौर्धयति मरुतामिति धयद्वतीषु कुर्वन्ति । हिनस्ति वै सन्ध्यधीतम् । सन्धीव खलु

वा एतत् । यथ्सवनस्यातिरिच्यते । यद्धयद्वतीषु कुर्वन्ति । सन्धेः शान्त्यै । गायत्रꣳ साम भवति पञ्चदशः स्तोमः । तेनैव प्रातःसवनान्न यन्ति ॥ १। ४। ५। १॥

२९ मरुत्वतीषु कुर्वन्ति । तेनैव माध्यन्दिनाथ्सवनान्न यन्ति । होतुश्चमसमनून्नयन्ते । होताऽनुशꣳसति । मध्यत एव यज्ञꣳ समादधाति । यस्य माध्यन्दिने सवने सोमोऽतिरिच्यते । आदित्यं तृतीयसवनं कामयमानोऽभ्यतिरिच्यते । गौरिवीतꣳ साम भवति । अतिरिक्तं वै गौरिवीतम् । अतिरिक्तं यथ्सवनस्यातिरिच्यते ॥ १। ४। ५। २॥

३० अतिरिक्तस्य शान्त्यै । बण्महाꣳ असि सूर्येति कुर्वन्ति । यस्यैवादित्यस्य सवनस्य कामेनातिरिच्यते । तेनैवैनं कामेन समर्धयन्ति । गौरिवीतꣳ साम भवति । तेनैव माध्यन्दिनाथ्सवनान्न यन्ति । सप्तदशः स्तोमः । तेनैव तृतीयसवनान्न यन्ति । होतुश्चमसमनून्नयन्ते । होताऽनुशꣳसति ॥ १। ४। ५। ३॥

३१ मध्यत एव यज्ञꣳ समादधाति । यस्य तृतीयसवने सोमोऽतिरिच्येत । उक्थ्यं कुर्वीत । यस्योक्थ्येऽतिरिच्येत । अतिरात्रं कुर्वीत । यस्यातिरात्रेऽतिरिच्यते । तत्त्वै दुष्प्रज्ञानम् । यजमानं वा एतत्पशव आसाद्य यन्ति । बृहथ्साम भवति । बृहद्वा इमान् लोकान्दाधार । बार्हताः पशवः । बृहतैवास्मै पशून्दाधार । शिपिविष्टवतीषु कुर्वन्ति । शिपिविष्टो वै देवानां पुष्टम् । पुष्ट्यैवैनꣳ समर्धयन्ति । होतुश्चमसमनून्नयन्ते । होताऽनुशꣳसति । मध्यत एव यज्ञꣳ समादधाति ॥ १। ४। ५। ४॥

यन्ति सवनस्यातिरिच्यते शꣳसति दाधाराष्टौ च ॥ ५॥

३२ एकैको वै जनतायामिन्द्रः । एकं वा एताविन्द्रमभि सꣳसुनुतः । यौ द्वौ सꣳसुनुतः । प्रजापतिर्वा एष वितायते । यद्यज्ञः । तस्य ग्रावाणो दन्ताः । अन्यतरं वा एते सꣳसुन्वतोर्निर्बप्सति । पूर्वेणोपसृत्या देवता इत्याहुः । पूर्वोपसृतस्य वै श्रेयान्भवति । एतिवन्त्याज्यानि भवन्त्यभिजित्यै ॥ १। ४। ६। १॥

३३ मरुत्वतीः प्रतिपदः । मरुतो वै देवानामपराजितमायतनम् । देवानामेवापराजित आयतने यतते । उभे बृहद्रथन्तरे भवतः । इयं वाव रथन्तरम् । असौ बृहत् । आभ्यामेवैनमन्तरेति । वाचश्च मनसश्च । प्राणाच्चापानाच्च । दिवश्च पृथिव्याश्च ॥ १। ४। ६। २॥

३४ सर्वस्माद्वित्ताद्वेद्यात् । अभिवर्तो ब्रह्मसामं भवति । सुवर्गस्य लोकस्याभिवृत्त्यै । अभिजिद्भवति । सुवर्गस्य लोकस्याभिजित्यै । विश्वजिद्भवति । विश्वस्य जित्यै । यस्य भूयाꣳसो यज्ञक्रतव इत्याहुः । स देवता वृङ्क्त इति । यद्यग्निष्टोमः सोमः परस्ताथ्स्यात्

॥
१। ४। ६। ३॥
३५ उक्थ्यं कुर्वीत । यद्युक्थ्यः स्यात् । अतिरात्रं कुर्वीत । यज्ञक्रतुभिरेवास्य देवता वृङ्क्ते । यो वै छन्दोभिरभिभवति । स स सुन्वतोरभिभवति । संवेशाय त्वोपवेशाय त्वेत्याह । छन्दाꣳसि वै संवेश उपवेशः । छन्दोभिरेवास्य छन्दाग्ग्स्यभिभवति । इष्टर्गो वा ऋत्विजामध्वर्युः ॥ १। ४। ६। ४॥
३६ इष्टर्गः खलु वै पूर्वोऽर्ष्टुः, क्षीयते । प्राणापानौ मृत्योर्मा पातमित्याह । प्राणापानयोरेव श्रयते । प्राणापानौ मा मा हासिष्टमित्याह । नैनं पुराऽऽयुषः प्राणापानौ जहितः । आर्तिं वा एते नियन्ति । येषां दीक्षितानां प्रमीयते । तं यदववर्जेयुः । क्रूरकृतामिवैषां लोकः स्यात् । आहर दहेति ब्रूयात् ॥ १। ४। ६। ५॥
३७ तं दक्षिणतो वेद्यै निधाय । सर्पराज्ञिया ऋग्भिः स्तुयुः । इयं वै सर्पतो राज्ञी । अस्या एवैनं परिददति । व्यृद्धं तदित्याहुः । यथ्स्तुतमननुशस्तमिति । होता प्रथमः प्राचीनावीती मार्जालीयं परीयात् । यामीरनुब्रुवन् । सर्पराज्ञीनां कीर्तयेत् । उभयोरेवैनं लोकयोः परिददति ॥ १। ४। ६। ६॥
३८ अथो धुवन्त्येवैनम् । अथो न्येवास्मै ह्नुवते । त्रिः परियन्ति । त्रय इमे लोकाः । एभ्य एवैनं लोकेभ्यो धुवते । त्रिः पुनः परियन्ति । षड्व् संपद्यन्ते । षड्वा ऋतवः । ऋतुभिरेवैनं धुवते । अग्न आयूꣳषि पवस इति प्रतिपदं कुर्वीरन् । रथन्तरसामैषाꣳ सोमः स्यात् । आयुरेवात्मन्दधते । अथो पाप्मानमेव विजहतो यन्ति ॥ १। ४। ६। ७॥ अभिजित्यै पृथिव्याश्च स्यादध्वर्युर्ब्रूयाल्लोकयोः परिददति कुर्वीरग्ग् स्त्रीणि च ॥ ६॥
३९ असुर्यं वा एतस्माद्वर्णं कृत्वा । पशवो वीर्यमपक्रामन्ति । यस्य यूपो विरोहति । त्वाष्ट्रं बहुरूपमालभेत । त्वष्टा वै रूपाणामीशे । य एव रूपाणामीशे । सोऽस्मिन्पशून्, वीर्यं यच्छति । नास्मात्पशवो वीर्यमप क्रामन्ति । आर्तिं वा एते नियन्ति । येषां दीक्षितानामग्निरुद्वायति ॥ १। ४। ७। १॥
४० यदाहवनीय उद्वायेत् । यत्तं मन्थेत् । विच्छिन्द्यात् । भ्रातृव्यमस्मै जनयेत् । यदाहवनीय उद्वायेत् । आग्नीध्राद्धुद्धरेत् । यदाग्नीध्र उद्वायेत् । गार्हपत्यादुद्धरेत् । यद्गार्हपत्य उद्वायेत् । अत एव पुनर्मन्थेत् ॥ १। ४। ७। २॥
४१ अत्र वाव स निलयते । यत्र खलु वै निलीनमुत्तमं पश्यन्ति । तदेनमिच्छन्ति । यस्माद्दारोरुद्वायेत् । तस्यारणी कुर्यात् । क्रुमुकमपि कुर्यात् । एषा वा अग्नेः प्रिया तनूः

। यत्क्रुमुकः । प्रिययैवैनं तनुवा समर्धयति । गार्हपत्यं मन्थति ॥ १। ४। ७। ३॥
४२ गार्हपत्यो वा अग्नेर्योनिः । स्वादेवैनं योनेर्जनयति । नास्मै भ्रातृव्यं जनयति । यस्य सोम उपदस्येत् । सुवर्णꣳ हिरण्यं द्वेधा विच्छिद्य । ऋजीषेऽन्यदा धूनुयात् । जुहुयादन्यत् । सोममेवाभिषुणोति । सोमं जुहोति । सोमस्य वा अभिषूयमाणस्य प्रिया तनूरुदक्रामत् ॥ १। ४। ७। ४॥
४३ तथ्सुवर्णꣳ हिरण्यमभवत् । यथ्सुवर्णꣳ हिरण्यं कुर्वन्ति । प्रिययैवैनं तनुवा समर्धयन्ति । यस्याक्रीतꣳ सोममपहरेयुः । क्रीणीयादेव । सैव ततः प्रायश्चित्तिः । यस्य क्रीतमपहरेयुः । आदाराग्श्च फाल्गुनानि चाभिषुणुयात् । गायत्री यꣳ सोममाहरत् । तस्य योऽꣳशुः पराऽपतत् ॥ १। ४। ७। ५॥
४४ त आदारा अभवन् । इन्द्रो वृत्रमहन् । तस्य वल्कः पराऽपतत् । तानि फाल्गुनान्यभवन् । पशवो वै फाल्गुनानि । पशवः सोमो राजा । यदादाराग्श्च फाल्गुनानि चाभिषुणोति । सोममेव राजानमभिषुणोति । शृतेन प्रातःसवने श्रीणीयात् । दध्ना मध्यन्दिने ॥ १। ४। ७। ६॥
४५ नीतमिश्रेण तृतीयसवने । अग्निष्टोमः सोमः स्याद्रथन्तरसामा । य एवर्त्विजो वृताः स्युः । त एनं याजयेयुः । एकां गां दक्षिणां दद्यात्तेभ्य एव । पुनः सोमं क्रीणीयात् । यज्ञेनैव तद्यज्ञमिच्छति । सैव ततः प्रायश्चित्तिः । सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानमागुरते । यः सत्रायागुरते । एतावान्खलु वै पुरुषः । यावदस्य वित्तम् । सर्ववेदसेन यजेत । सर्वपृष्ठोऽस्य सोमः स्यात् । सर्वाभ्य एव देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं निष्क्रीणीते ॥ १। ४। ७। ७॥
उद्वायति मन्थेन्मन्थत्यक्रामत्पराऽपतन्मध्यन्दिन आगुरते पञ्च च ॥ ७॥
४६ पवमानः सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा । पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः । जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूꣳरनु ॥ १। ४। ८। १॥
४७ यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा । ब्रह्म तेन पुनीमहे । उभाभ्यां देव सवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे । वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठाः । तया मदन्तः सध माद्येषु । वय२ꣳ स्याम पतयो रयीणाम् ॥ १। ४। ८। २॥
४८ वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो मयोभूः । द्यावापृथिवी पयसा

पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् । बृहद्भिः सवितस्तृभिः । वर्षिष्ठैर्देव मन्मभिः । अग्ने दक्षैः पुनाहि मा । येन देवा अपुनत । येनापो दिव्यं कशः । तेन दिव्येन ब्रह्मणा ॥ १। ४। ८। ३॥
४९ इदं ब्रह्म पुनीमहे । यः पावमानीरध्येति । ऋषिभिः संभृतꣳ रसम् । सर्वꣳ स पूतमश्नाति । स्वदितं मातरिश्वना । पावमानीर्यो अध्येति । ऋषिभिः संभृतꣳ रसम् । तस्मै सरस्वती दुहे । क्षीरꣳ सर्पिर्मधूदकम् । पावमानीः स्वस्त्ययनीः ॥ १। ४। ८। ४॥
५० सुदुघा हि पयस्वतीः । ऋषिभिः संभृतो रसः । ब्राह्मणेष्वमृतꣳ हितम् । पावमानीर्दिशन्तु नः । इमं लोकमथो अमुम् । कामान्थ्समर्धयन्तु नः । देवीर्देवैः समाभृताः । पावमानीः स्वस्त्ययनीः । सुदुघा हि घृतश्चुतः । ऋषिभिः संभृतो रसः ॥ १। ४। ८। ५॥
५१ ब्राह्मणेष्वमृतꣳहितम् । येन देवाः पवित्रेण । आत्मानं पुनते सदा । तेन सहस्रधारेण । पावमान्यः पुनन्तु मा । प्राजापत्यं पवित्रम् । शतोद्यामꣳ हिरण्मयम् । तेन ब्रह्मविदो वयम् । पूतं ब्रह्म पुनीमहे । इन्द्रः सुनीती सह मा पुनातु । सोमः स्वस्त्या वरुणः समीच्या । यमो राजा प्रमृणाभिः पुनातु मा । जातवेदा मोर्जयन्त्या पुनातु ॥ १। ४। ८। ६॥ अनु रयीणां ब्रह्मणा स्वस्त्ययनीः सुदुघा हि घृतश्चुत ऋषिभिः संभृतो रसः पुनातु त्रीणि च ॥ ८॥
५२ प्रजा वै सत्रमासत तपस्तप्यमाना अजुह्वतीः । देवा अपश्यञ्चमसं घृतस्य पूर्ण२ꣳ स्वधाम् । तमुपोदतिष्ठन्तमजुहवुः । तेनार्धमास ऊर्जमवारुन्धत । तस्मादर्धमासे देवा इज्यन्ते । पितरोऽपश्यञ्चमसं घृतस्य पूर्ण२ꣳ स्वधाम् । तमुपोदतिष्ठन्तमजुहवुः । तेन मास्यूर्जमवारुन्धत । तस्मान्मासि पितृभ्यः क्रियते । मनुष्या अपश्यञ्चमसं घृतस्य पूर्णग्ग् स्वधाम् ॥ १। ४। ९। १॥
५३ तमुपोदतिष्ठन्तमजुहवुः । तेन द्वयीमूर्जमवारुन्धत । तस्माद्द्विरह्नो मनुष्येभ्य उप ह्रियते । प्रातश्च सायं च । पशवोऽपश्यञ्चमसं घृतस्य पूर्ण२ꣳ स्वधाम् । तमुपोदतिष्ठन्तमजुहवुः । तेन त्रयीमूर्जमवारुन्धत । तस्मात्रिरह्नः पशवः प्रेरते । प्रातः सङ्गवे सायम् । असुरा अपश्यञ्चमसं घृतस्य पूर्ण२ꣳ स्वधाम् ॥ १। ४। ९। २॥
५४ तमुपोदतिष्ठन्तमजुहवुः । तेन संवथ्सर ऊर्जमवारुन्धत । ते देवा अमन्यन्त । अमी वा इदमभूवन् । यद्वय२ꣳस्म इति । त एतानि चातुर्मास्यान्यपश्यन् । तानि निरवपन्

। तैरेवैषां तामूर्जमवृञ्जत । ततो देवा अभवन् । पराऽसुराः ॥ १। ४। ९। ३॥
५५ यद्यजते । यामेव देवा ऊर्जमवारुन्धत । तां तेनावरुन्धे । यत्पितृभ्यः करोति । यामेव पितर ऊर्जमवारुन्धत । तां तेनावरुन्धे । यदावसथेऽन्नꣳ हरन्ति । यामेव मनुष्या ऊर्जमवारुन्धत । तां तेनावरुन्धे । यद्दक्षिणां ददाति ॥ १। ४। ९। ४॥
५६ यामेव पशव ऊर्जमवारुन्धत । तां तेनावरुन्धे । यच्चातुर्मास्यैर्यजते । यामेवासुरा ऊर्जमवारुन्धत । तां तेनावरुन्धे । भवत्यात्मना । पराऽस्य भ्रातृव्यो भवति । विराजो वा एषा विक्रान्तिः । यच्चातुर्मास्यानि । वैश्वदेवेनास्मिं लोके प्रत्यतिष्ठत् । वरुणप्रघासैरन्तरिक्षे । साकमेधैरमुष्मिं लोके । एष ह त्वावै तथ्सर्वं भवति । य एवं विद्वाग्श्चातुर्मास्यैर्यजते ॥ १। ४। ९। ५॥ मनुष्या अपश्यञ्चमसं घृतस्य पूर्णꣳ स्वधामसुरा अपश्यञ्चमसं घृतस्य पूर्णꣳ स्वधामसुरा ददात्यतिष्ठच्चत्वारि च ॥ ९॥
५७ अग्निर्वाव संवथ्सरः । आदित्यः परिवथ्सरः । चन्द्रमा इदावथ्सरः । वायुरनुवथ्सरः । यद्वैश्वदेवेन यजते । अग्निमेव तथ्संवथ्सरमाप्नोति । तस्माद्वैश्वदेवेन यजमानः । संवथ्सरीणाग् स्वस्तिमाशास्त इत्याशासीत । यद्वरुणप्रघासैर्यजते । आदित्यमेव तत्परिवथ्सरमाप्नोति ॥ १। ४। १०। १॥
५८ तस्माद्वरुणप्रघासैर्यजमानः । परिवथ्सरीणाग् स्वस्तिमाशास्त इत्याशासीत । यथ्साकमेधैर्यजते । चन्द्रमसमेव तदिदावथ्सरमाप्नोति । तस्माथ्साकमेधैर्यजमानः । इदावथ्सरीणाग् स्वस्तिमाशास्त इत्याशासीत । यत्पितृयज्ञेन यजते । देवानेव तदन्ववस्यति । अथ वा अस्य वायुश्चानुवथ्सरश्चाप्रीतावुच्छिष्येते । यच्छुनासीरीयेण यजते ॥
१। ४। १०। २॥
५९ वायुमेव तदनुवथ्सरमाप्नोति । तस्माच्छुनासीरीयेण यजमानः । अनुवथ्सरीणाग् स्वस्तिमाशास्त इत्याशासीत । संवथ्सरं वा एष ईप्सतीत्याहुः । यश्चातुर्मास्यैर्यजत इति । एष ह त्वै संवथ्सरमाप्नोति । य एवं विद्वाग्श्चातुर्मास्यैर्यजते । विश्वे देवाः समयजन्त । तेऽग्निमेवायजन्त । त एतं लोकमजयन् ॥ १। ४। १०। ३॥
६० यस्मिन्नग्निः । यद्वैश्वदेवेन यजते । एतमेव लोकं जयति । यस्मिन्नग्निः । अग्नेरेव सायुज्यमुपैति । यदा वैश्वदेवेन यजते । अथ संवथ्सरस्य गृहपतिमाप्नोति । यदा संवथ्सरस्य गृहपतिमाप्नोति । अथ सहस्रयाजिनमाप्नोति । यदा सहस्रयाजिनमाप्नोति ॥ १। ४। १०। ४॥

६१ अथ गृहमेधिनमाप्नोति । यदा गृहमेधिनमाप्नोति । अथाग्निर्भवति । यदाऽग्निर्भवति । अथ गौर्भवति । एषा वै वैश्वदेवस्य मात्रा । एतद्वा एतेषामवमम् । अतोऽतो वा उत्तराणि श्रेया ँसि भवन्ति । यद्विश्वे देवाः समयजन्त । तद्वैश्वदेवस्य वैश्वदेवत्वम् ॥ १। ४। १०। ५॥
६२ अथादित्यो वरुण ँ राजानं वरुणप्रघासैरयजत । स एतं लोकमजयत् । यस्मिन्नादित्यः । यद्वरुणप्रघासैर्यजते । एतमेव लोकं जयति । यस्मिन्नादित्यः । आदित्यस्यैव सायुज्यमुपैति । यदादित्यो वरुण ँ राजानं वरुणप्रघासैरयजत । तद्वरुणप्रघासानां वरुणप्रघासत्वम् । अथ सोमो राजा छन्दा ँसि साकमेधैरयजत ॥ १। ४। १०। ६॥
६३ स एतं लोकमजयत् । यस्मिग्ग्‌श्चन्द्रमा विभाति । यथ्साकमेधैर्यजते । एतमेव लोकं जयति । यस्मिग्ग्‌श्चन्द्रमा विभाति । चन्द्रमस एव सायुज्यमुपैति । सोमो वै चन्द्रमाः । एष ह त्वै साक्षाथ्सोमं भक्षयति । य एवं विद्वान्थ्साकमेधैर्यजते । यथ्सोमश्च राजा छन्दा ँसि च समैधन्त ॥ १। ४। १०। ७॥
६४ तथ्साकमेधाना ँ साकमेधत्वम् । अथर्तवः पितरः प्रजापतिं पितरं पितृयज्ञेनायजन्त । त एतं लोकमजयन् । यस्मिन्नृतवः । यत्पितृयज्ञेन यजते । एतमेव लोकं जयति । यस्मिन्नृतवः । ऋतूनामेव सायुज्यमुपैति । यदृतवः पितरः प्रजापतिं पितरं पितृयज्ञेनायजन्त । तत्पितृयज्ञस्य पितृयज्ञत्वम् ॥ १। ४। १०। ८॥
६५ अथौषधय इमं देवं त्र्यम्बकैरयजन्त प्रथेमहीति । ततो वै ता अप्रथन्त । य एवं विद्वाग्स्त्र्यम्बकैर्यजते । प्रथते प्रजया पशुभिः । अथ वायुः परमेष्ठिन ँ शुनासीरीयेणायजत । स एतं लोकमजयत् । यस्मिन्वायुः । यच्छुनासीरीयेण यजते । एतमेव लोकं जयति । यस्मिन्वायुः ॥ १। ४। १०। ९॥
६६ वायोरेव सायुज्यमुपैति । ब्रह्मवादिनो वदन्ति । प्र चातुर्मास्ययाजी मीयता ३ न प्रमीयता ३ इति । जीवन्वा एष ऋतूनप्येति । यदि वसन्ता प्रमीयते । वसन्तो भवति । यदि ग्रीष्मे ग्रीष्मः । यदि वर्षासु वर्षाः । यदि शरदि शरत् । यदि हेमन् हेमन्तः । ऋतुर्भूत्वा संवथ्सरमप्येति । संवथ्सरः प्रजापतिः । प्रजापतिर्वावैषः ॥ १। ४। १०। १०॥
परिवथ्सरमाप्नोति शुनासीरीयेण यजतेऽजयन्थ्सहस्रयाजिनमाप्नोति वैश्वदेवत्व ँ साकमेधैरयजत समैधन्त पितृयज्ञत्वं जयति यस्मिन्वायुर्हेमन्तस्त्रीणि च ॥ १०॥

उभये युवꣳ सुराममुदस्थान्नि वै यस्य प्रातःसवन एकैकोऽसुर्यं पवमानः प्रजा वै सत्रमासताग्निर्वाव संवथ्सरो दश ॥ १०॥
उभये वा उदस्थाथ्सर्वाभिर्मध्यतोऽत्र वाव ब्राह्मणेष्वथ गृहमेधिनꣳ षद्व षष्टिः ॥ ६६॥
उभये वा वैषः ॥

## प्रथमाष्टके पञ्चमः प्रपाठकः ५

१ अग्नेः कृत्तिकाः । शुक्रं परस्ताज्ज्योतिरवस्तात् । प्रजापते रोहिणी । आपः परस्तादोषधयोऽवस्तात् । सोमस्येन्वका विततानि । परस्ताद्वयन्तोऽवस्तात् । रुद्रस्य बाहू । मृगयवः परस्ताद्विक्षारोऽवस्तात् । अदित्यै पुनर्वसू । वातः परस्तादार्द्रमवस्तात् ॥ १। ५। १। १॥
२ बृहस्पतेस्तिष्यः । जुह्वतः परस्ताद्यजमाना अवस्तात् । सर्पाणामाश्रेषाः । अभ्यागच्छन्तः परस्तादभ्यानृत्यन्तोऽवस्तात् । पितृणां मघाः । रुदन्तः परस्तादपभ्रꣳशोऽवस्तात् । अर्यम्णः पूर्वे फल्गुनी । जाया परस्तादृषभोऽवस्तात् । भगस्योत्तरे । वहतवः परस्ताद्वहमाना अवस्तात् ॥ १। ५। १। २॥
३ देवस्य सवितुर्हस्तः । प्रसवः परस्ताथ्सनिरवस्तात् । इन्द्रस्य चित्रा । ऋतं परस्ताथ्सत्यमवस्तात् । वायोर्निष्ट्या व्रततिः । परस्तादसिद्धिरवस्तात् । इन्द्राग्नियोर्विशाखे । युगानि परस्तात्कृषमाणा अवस्तात् । मित्रस्यानूराधाः । अभ्यारोहत्परस्तादभ्यारूढमवस्तात् ॥ १। ५। १। ३॥
४ इन्द्रस्य रोहिणी । शृणत्परस्तात्प्रतिशृणदवस्तात् । निर्ऋत्यै मूलवर्हणी । प्रतिभञ्जन्तः परस्तात्प्रतिशृणन्तोऽवस्तात् । अपां पूर्वा अषाढाः । वर्चः परस्ताथ्समितिरवस्तात् । विश्वेषां देवानामुत्तराः । अभिजयत्परस्तादभिजितमवस्तात् । विष्णोः श्रोणा पृच्छमानाः । परस्तात्पन्था अवस्तात् ॥ १। ५। १। ४॥
५ वसूनाग् श्रविष्ठाः । भूतं परस्ताद्भूतिरवस्तात् । इन्द्रस्य शतभिषक् । विश्वव्यचाः परस्ताद्विश्वक्षितिरवस्तात् । अजस्यैकपदः पूर्वे प्रोष्ठपदाः । वैश्वानरं परस्ताद्वैश्वावसवमवस्तात् । अहेर्बुध्नियस्योत्तरे । अभिषिञ्चन्तः परस्तादभिषुण्वन्तोऽवस्तात् । पूष्णो रेवती । गावः परस्ताद्वथ्सा अवस्तात् । अश्विनोरश्वयुजौ । ग्रामः परस्ताथ्सेनाऽवस्तात् । यमस्यापभरणीः । अपकर्षन्तः परस्तादपवहन्तोऽवस्तात् । पूर्णा पश्चाद्यत्ते देवा अदधुः ॥ १। ५। १। ५॥
आर्द्रमवस्ताद्वहमाना अवस्तादभ्यारूढमवस्तात्पन्था अवस्ताद्वथ्सा अवस्तात्पञ्च च

॥ १॥
६ यत्पुण्यं नक्षत्रम् । तद्बट् कुर्वीतोपव्युषम् । यदा वै सूर्य उदेति । अथ नक्षत्रं नैति । यावति तत्र सूर्यो गच्छेत् । यत्र जघन्यं पश्येत् । तावति कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते । एवꣳ ह वै यज्ञेषुं च शतद्युम्नं च माथ्स्यो निरवसाययाञ्चकार ॥ १। ५। २। १॥
७ यो वै नक्षत्रियं प्रजापतिं वेद । उभयोरेनं लोकयोर्विदुः । हस्त एवास्य हस्तः । चित्रा शिरः । निष्ट्या हृदयम् । ऊरू विशाखे । प्रतिष्ठाऽनूराधाः । एष वै नक्षत्रियः प्रजापतिः । य एवं वेद । उभयोरेनं लोकयोर्विदुः ॥ १। ५। २। २॥
८ अस्मि२ꣳश्चामुष्मिग्ग्ंश्च । यां कामयेत दुहितरं प्रिया स्यादिति । तां निष्ट्यायां दद्यात् । प्रियैव भवति । नैव तु पुनरागच्छति । अभिजिन्नाम नक्षत्रम् । उपरिष्टादषाढानाम् । अवस्ताच्छ्रोणायै । देवासुराः संयत्ता आसन् । ते देवास्तस्मिन्नक्षत्रेऽभ्यजयन् ॥ १। ५। २। ३॥
९ यदभ्यजयन् । तदभिजितोऽभिजित्त्वम् । यं कामयेतानपजय्यं जयेदिति । तमेतस्मिन्नक्षत्रे यातयेत् । अनपजय्यमेव जयति । पापपराजितमिव तु । प्रजापतिः पशूनसृजत । ते नक्षत्रं नक्षत्रमुपातिष्ठन्त । ते समावन्त एवाभवन् । ते रेवतीमुपातिष्ठन्त ॥
१। ५। २। ४॥
१० ते रेवत्यां प्राभवन् । तस्माद्रेवत्यां पशूनां कुर्वीत । यत्किं चार्वाचीनꣳ सोमात् । प्रैव भवन्ति । सलिलं वा इदमन्तरासीत् । यदतरन् । तत्तारकाणां तारकत्वम् । यो वा इह यजते । अमुꣳ सलोकं नक्षते । तन्नक्षत्राणां नक्षत्रत्वम् ॥ १। ५। २। ५॥
११ देवगृहा वै नक्षत्राणि । य एवं वेद । गृह्येव भवति । यानि वा इमानि पृथिव्याश्चित्राणि । तानि नक्षत्राणि । तस्मादश्लीलनाम२ꣳश्चित्रे । नावस्येन्न यजेत । यथा पापाहे कुरुते । तादृगेव तत् । देवनक्षत्राणि वा अन्यानि ॥ १। ५। २। ६॥
१२ यमनक्षत्राण्यन्यानि । कृत्तिकाः प्रथमम् । विशाखे उत्तमम् । तानि देवनक्षत्राणि । अनूराधाः प्रथमम् । अपभरणीरुत्तमम् । तानि यमनक्षत्राणि । यानि देवनक्षत्राणि । तानि दक्षिणेन परियन्ति । यानि यमनक्षत्राणि ॥ १। ५। २। ७॥
१३ तान्युत्तरेण । अन्वेषामराथ्स्मेति । तदनूराधाः । ज्येष्ठमेषामवधिष्मेति । तज्ज्येष्ठघ्नी । मूलमेषामवृक्षामेति । तन्मूलवर्हणी । यन्नासहन्त । तदषाढाः । यदश्लोणत् ॥ १। ५। २। ८॥

१४ तच्छ्रोणा । यदशृणोत् । तच्छ्रविष्ठाः । यच्छतमभिषज्यन् । तच्छतभिषक् । प्रोष्ठपदेषूदयच्छन्त । रेवत्यामरवन्त । अश्वयुजोरयुञ्जत । अपभरणीष्वपावहन् । तानि वा एतानि यमनक्षत्राणि । यान्येव देवनक्षत्राणि । तेषु कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते ॥ १। ५। २। ९॥ चकारैवं वेदोभयोरेनं लोकयोर्विदुरजयन्रेवतीमुपातिष्ठन्त नक्षत्रत्वमन्यानि यानि यमनक्षत्राण्यश्लोणद्यमनक्षत्राणि त्रीणि च ॥ २॥

१५ देवस्य सवितुः प्रातः प्रसवः प्राणः । वरुणस्य सायमासवोऽपानः । यत्प्रतीचीनं प्रातस्तनात् । प्राचीनꣳसंगवात् । ततो देवा अग्निष्टोमं निरमिमत । तत्तदात्तवीर्यं निर्मार्गः । मित्रस्य संगवः । तत्पुण्यं तेजस्व्यहः । तस्मात्तर्हि पशवः समायन्ति । यत्प्रतीचीनꣳ संगवात् ॥ १। ५। ३। १॥

१६ प्राचीनं मध्यन्दिनात् । ततो देवा उक्थ्यं निरमिमत । तत्तदात्तवीर्यं निर्मार्गः । बृहस्पतेर्मध्यन्दिनः । तत्पुण्यं तेजस्व्यहः । तस्मात्तर्हि तेक्ष्णिष्ठं तपति । यत्प्रतीचीनं मध्यन्दिनात् । प्राचीनमपराह्णात् । ततो देवाः षोडशिनं निरमिमत । तत्तदात्तवीर्यं निर्मार्गः ॥ १। ५। ३। २॥

१७ भगस्यापराह्णः । तत्पुण्यं तेजस्व्यहः । तस्मादपराह्णे कुमार्यो भगमिच्छमानाश्चरन्ति । यत्प्रतीचीनमपराह्णात् । प्राचीनꣳसायात् । ततो देवा अतिरात्रं निरमिमत । तत्तदात्तवीर्यं निर्मार्गः । वरुणस्य सायम् । तत्पुण्यं तेजस्व्यहः । तस्मात्तर्हि नानृतं वदेत् ॥ १। ५। ३। ३॥

१८ ब्राह्मणो वा अष्टाविꣳशो नक्षत्राणाम् । समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि । चत्वार्यश्लीलानि । तानि नव । यच्च परस्तान्नक्षत्राणां यच्चावस्तात् । तान्येकादश । ब्राह्मणो द्वादशः । य एवं विद्वान्थ्संवथ्सरं व्रतं चरति । संवथ्सरेणैवास्य व्रतं गुप्तं भवति । समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि । चत्वार्यश्लीलानि । तानि नव । आग्नेयी रात्रिः । ऐन्द्रमहः । तान्येकादश । आदित्यो द्वादशः । य एवं विद्वान्थ्संवथ्सरं व्रतं चरति । संवथ्सरेणैवास्य व्रतं गुप्तं भवति ॥ १। ५। ३। ४॥
संगवात्षोडशिनं निरमिमत तत्तदात्तवीर्यं निर्मार्गो वदेद्भवति समानस्याह्नः पञ्च पुण्यानि नक्षत्राण्यष्टौ च ॥ ३॥

१९ ब्रह्मवादिनो वदन्ति । कति पात्राणि यज्ञं वहन्तीति । त्रयोदशेति ब्रूयात् । स यद्ब्रूयात् । कस्तानि निरमिमीतेति । प्रजापतिरिति ब्रूयात् । स यद्ब्रूयात् । कुतस्तानि निरमिमीतेति । आत्मन इति । प्राणापानाभ्यामेवोपाग्श्वन्तर्यामौ निरमिमीत ॥ १। ५।

४। १॥
२० व्यानादुपाꣳशुसवनम् । वाच ऐन्द्रवायवम् । दक्षक्रतुभ्यां मैत्रावरुणम् । श्रोत्रादाश्विनम् । चक्षुषः शुक्रामन्थिनौ । आत्मन आग्रयणम् । अङ्गेभ्य उक्थ्यम् । आयुषो ध्रुवम् । प्रतिष्ठाया ऋतुपात्रे । यज्ञं वाव तं प्रजापतिर्निरमिमीत । स निर्मितो नाध्रियत समम्व्लीयत । स एतान्प्रजापतिरपिवापानपश्यत् । तान्निरवपत् । तैर्वै स यज्ञमप्यवपत् । यदपिवापा भवन्ति । यज्ञस्य धृत्या असंव्लयाय ॥ १। ५। ४। २॥
उपाग्श्वन्तर्यामौ निरमिमीतामिमीत षट् च ॥ ४॥
२१ ऋतमेव परमेष्ठि । ऋतं नात्येति किं चन । ऋते समुद्र आहितः । ऋते भूमिरियꣳ श्रिता । अग्निस्तिग्मेन शोचिषा । तप आक्रान्तमुष्णिहा । शिरस्तपस्याहितम् । वैश्वानरस्य तेजसा । ऋतेनास्य निवर्तये । सत्येन परिवर्तये ॥ १। ५। ५। १॥
२२ तपसाऽस्यानुवर्तये । शिवेनास्योपवर्तये । शग्मेनास्याभिवर्तये । तदृतं तथ्सत्यम् । तद्व्रतं तच्छकेयम् । तेन शकेयं तेन राध्यासम् । यद्धर्मः पर्यवर्तयत् । अन्तान्पृथिव्या दिवः । अग्निरीशान ओजसा । वरुणो धीतिभिः सह ॥ १। ५। ५। २॥
२३ इन्द्रो मरुद्भिः सखिभिः सह । अग्निस्तिग्मेन शोचिषा । तप आक्रान्तमुष्णिहा । शिरस्तपस्याहितम् । वैश्वानरस्य तेजसा । ऋतेनास्य निवर्तये । सत्येन परिवर्तये । तपसाऽस्यानुवर्तये । शिवेनास्योपवर्तये । शग्मेनास्याभिवर्तये ॥ १। ५। ५। ३॥
२४ तदृतं तथ्सत्यम् । तद्व्रतं तच्छकेयम् । तेन शकेयं तेन राध्यासम् । यो अस्याः पृथिव्यास्त्वचि । निवर्तयत्योषधीः । अग्निरीशान ओजसा । वरुणो धीतिभिः सह । इन्द्रो मरुद्भिः सखिभिः सह । अग्निस्तिग्मेन शोचिषा । तप आक्रान्तमुष्णिहा ॥ १। ५। ५। ४॥
२५ शिरस्तपस्याहितम् । वैश्वानरस्य तेजसा । ऋतेनास्य निवर्तये । सत्येन परिवर्तये । तपसाऽस्यानुवर्तये । शिवेनास्योपवर्तये । शग्मेनास्याभिवर्तये । तदृतं तथ्सत्यम् । तद्व्रतं तच्छकेयम् । तेन शकेयं तेन राध्यासम् ॥ १। ५। ५। ५॥
२६ एकं मासमुदसृजत् । परमेष्ठी प्रजाभ्यः । तेनाभ्यो मह आवहत् । अमृतं मर्त्याभ्यः । प्रजामनु प्रजायसे । तदु ते मर्त्यामृतम् । येन मासा अर्धमासाः । ऋतवः परिवथ्सराः । येन ते ते प्रजापते । ईजानस्य न्यवर्तयन् ॥ १। ५। ५। ६॥
२७ तेनाहमस्य ब्रह्मणा । निवर्तयामि जीवसे । अग्निस्तिग्मेन शोचिषा । तप आक्रान्तमुष्णिहा । शिरस्तपस्याहितम् । वैश्वानरस्य तेजसा । ऋतेनास्य निवर्तये

। सत्येन परिवर्तये । तपसाऽस्यानुवर्तये । शिवेनास्योपवर्तये । शग्मेनास्याभिवर्तये । तदृतं तथ्सत्यम् । तद्व्रतं तच्छकेयम् । तेन शकेयं तेन राध्यासम् ॥ १। ५। ५। ७॥ परिवर्तये सहाभिवर्तय उष्णिहा राध्यासं न्यवर्तयन्नुपवर्तये चत्वारि च ॥ ५॥

२८ देवा वै यद्यज्ञेऽकुर्वत । तदसुरा अकुर्वत । तेऽसुरा ऊर्ध्वं पृष्ठेभ्यो नापश्यन् । ते केशानग्रेऽवपन्त । अथ श्मश्रूणि । अथोपपक्षौ । ततस्तेऽवाञ्च आयन् । पराऽभवन् । यस्यैवं वपन्ति । अवाङेति ॥ १। ५। ६। १॥

२९ अथो परैव भवति । अथ देवा ऊर्ध्वं पृष्ठेभ्योऽपश्यन् । त उपपक्षावग्रेऽवपन्त । अथ श्मश्रूणि । अथ केशान् । ततस्तेऽभवन् । सुवर्गं लोकमायन् । यस्यैवं वपन्ति । भवत्यात्मना । अथो सुवर्गं लोकमेति ॥ १। ५। ६। २॥

३० अथैतन्मनुर्वप्त्रे मिथुनमपश्यत् । स श्मश्रूण्यग्रेऽवपत । अथोपपक्षौ । अथ केशान् । ततो वै स प्राजायत प्रजया पशुभिः । यस्यैवं वपन्ति । प्र प्रजया पशुभिर्मिथुनैर्जायते । देवासुराः संयत्ता आसन् । ते संवथ्सरे व्यायच्छन्त । तान्देवाश्चातुर्मास्यैरेवाभि प्रायुञ्जत ॥ १। ५। ६। ३॥

३१ वैश्वदेवेन चतुरो मासोऽवृञ्जतेन्द्र राजानः । तान् छीर्षन्नि चावर्तयन्त परि च । वरुणप्रघासैश्चतुरो मासोऽवृञ्जत वरुणराजानः । तान् छीर्षन्नि चावर्तयन्त परि च । साकमेधैश्चतुरो मासोऽवृञ्जत सोमराजानः । तान् छीर्षन्नि चावर्तयन्त परि च । या संवथ्सर उपजीवाऽऽसीत् । तामेषामवृञ्जत । ततो देवा अभवन् । पराऽसुराः ॥ १। ५। ६। ४॥

३२ य एवं विद्वाग्श्चातुर्मास्यैर्यजते । भ्रातृव्यस्यैव मासो वृक्त्वा । शीर्षन्नि च वर्तयते परि च । यैषा संवथ्सर उपजीवा । वृङ्क्ते तां भ्रातृव्यस्य । क्षुधाऽस्य भ्रातृव्यः पराभवति । लोहितायसेन निवर्तयते । यद्वा इमामग्निर्ऋतावागते निवर्तयति । एतदेवैनाꣳ रूपं कृत्वा निवर्तयति । सा ततः श्वः श्वो भूयसी भवन्त्येति ॥ १। ५। ६। ५॥

३३ प्रजायते । य एवं विद्वां ल्लोहितायसेन निवर्तयते । एतदेव रूपं कृत्वा निवर्तयते । स ततः श्वः श्वो भूयान्भवन्नेति । प्रैव जायते । त्रेण्या शलल्या निवर्तयेत । त्रीणित्रीणि वै देवानामृद्धानि । त्रीणि छन्दाꣳसि । त्रीणि सवनानि । त्रय इमे लोकाः ॥ १। ५। ६। ६॥

३४ ऋद्ध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति । यच्चातुर्मास्ययाज्यात्मनो नावद्येत् । देवेभ्य आवृश्च्येत । चतृषु चतृषु मासेषु निवर्तयेत । परोक्षमेव तद्देवेभ्य

आत्मनोऽवद्यत्यनाव्रस्काय । देवानां वा एष आनीतः । यश्चातुर्मास्ययाजी । य एवं विद्वान्नि च वर्तयते परि च । देवता एवाप्येति । नास्य रुद्रः प्रजां पशूनभि मन्यते ॥ १। ५। ६। ७॥ एत्येत्ययुञ्जतासुरा एति लोका मन्यते ॥ ६॥

३५ (मे२एल्लगीएहेळबेकु) आयुषः प्राणꣳ संतनु । प्राणादपानꣳ संतनु । अपानाद्व्यानꣳ संतनु । व्यानाच्चक्षुः संतनु । चक्षुषः श्रोत्रꣳ संतनु । श्रोत्रान्मनः संतनु । मनसो वाचꣳ संतनु । वाच आत्मानꣳ संतनु । आत्मनः पृथिवीꣳ संतनु । पृथिव्या अन्तरिक्षꣳ संतनु । अन्तरिक्षाद्दिवꣳ संतनु । दिवः सुवः संतनु ॥ १। ५। ७। १॥ अन्तरिक्षꣳ संतनु द्वे च ॥ ७॥

(इल्लियवरे२एगीएमे२एल्लगीएहेळबेकु)

३६ इन्द्रो दधीचो अस्थभिः । वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव । इच्छन्नश्वस्य यच्छिरः । पर्वतेष्वपश्रितम् । तद्विदच्छर्यणावति । अत्राह गोरमन्वत । नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे । इन्द्रमिद्गाथिनो बृहत् ॥ १। ५। ८। १॥

३७ इन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत । इन्द्र इद्धर्योः सचा । संमिश्ल आवचो युजा । इन्द्रो वज्री हिरण्ययः । इन्द्रो दीर्घाय चक्षसे । आ सूर्यꣳ रोहयद्दिवि । वि गोभिरद्रिमैरयत् । इन्द्र वाजेषु नो अव । सहस्रप्रधनेषु च ॥ १। ५। ८। २॥

३८ उग्र उग्राभिरूतिभिः । तमिन्द्रं वाजयामसि । महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् । इन्द्रः स दामने कृतः । ओजिष्ठः स बले हितः । द्युम्नी श्लोकी स सौम्यः । गिरा वज्रो न संभृतः । सबलो अनपच्युतः । ववक्षुरुग्रो अस्तृतः ॥ १। ५। ८। ३॥ बृहच्चास्तृतः ॥ ८॥

३९ देवासुराः संयत्ता आसन् । स प्रजापतिरिन्द्रं ज्येष्ठं पुत्रमप न्यधत्त । नेदेनमसुरा बलीयाꣳसो ऽहनन्निति । प्रह्लादो ह वै कायाधवः । विरोचनग्ग् स्वं पुत्रमप न्यधत्त । नेदेनं देवा अहनन्निति । ते देवाः प्रजापतिमुपसमेत्योचुः । नाराजकस्य युद्धमस्ति । इन्द्रमन्विच्छामेति । तं यज्ञक्रतुभिरन्वैच्छन् ॥ १। ५। ९। १॥

४० तं यज्ञक्रतुभिर्नान्वविन्दन् । तमिष्टिभिरन्वैच्छन् । तमिष्टिभिरन्वविन्दन् । तदिष्टीनामिष्टित्वम् । एष्टयो ह वै नाम । ता इष्टय इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः । तस्मा एतमाग्नावैष्णवमेकादशकपालं दीक्षणीयं निरवपन् । तदपद्रुत्यातन्वत । ताम्पत्नीसंयाजान्त उपानयन् ॥ १। ५। ९। २॥

४१ ते तदन्तमेव कृत्वोदद्रवन् । ते प्रायणीयमभि समारोहन् । तदपद्रुत्यातन्वत ।

ताञ्छंय्वन्त उपानयन् । ते तदन्तमेव कृत्वोदद्रवन् । त आतिथ्यमभि समारोहन् । तदपद्रुत्यातन्वत । तानिडान्त उपानयन् । ते तदन्तमेव कृत्वोदद्रवन् । तस्मादेता एतदन्ता इष्टयः संतिष्ठन्ते ॥ १। ५। ९। ३॥

४२ एवꣳ हि देवा अकुर्वत । इति देवा अकुर्वत । इत्यु वै मनुष्याः कुर्वते । ते देवा ऊचुः । यद्वा इदमुच्चैर्यज्ञेन चराम । तन्नोऽसुराः पाप्माऽनुविन्दन्ति । उपाꣳशूपसदा चराम । तथा नोऽसुराः पाप्मा नानुवेथ्स्यन्तीति । त उपाꣳशूपसदमतन्वत । तिस्र एव सामिधेनीरनूच्य ॥ १। ५। ९। ४॥

४३ स्रुवेणाघारमाघार्य । तिस्रः पराचीराहुतीर्हुत्वा । स्रुवेणोपसदं जुहवाञ्चक्रुः । उग्रं वचो अपावधीं त्वेषं वचो अपावधीग् स्वाहेति । अशनयापिपासे ह वा उग्रं वचः । एनश्च वैरहत्यं च त्वेषं वचः । एतꣳ ह वाव तच्चतुर्धा विहितं पाप्मानं देवा अपजघ्निरे । तथो एवैतदेवं विद्यजमानः । तिस्र एव सामिधेनीरनूच्य । स्रुवेणाघारमाघार्य ॥ १। ५। ९। ५॥

४४ तिस्रः पराचीराहुतीर्हुत्वा । स्रुवेणोपसदं जुहोति । उग्रं वचो अपावधीं त्वेषं वचो अपावधीग् स्वाहेति । अशनयापिपासे ह वा उग्रं वचः । एनश्च वैरहत्यं च त्वेषं वचः । एतमेव तच्चतुर्धा विहितं पाप्मानं यजमानोऽपहते । तेऽभिनीयैवाहः पशुमाऽलभन्त । अह्न एव तद्देवा अवर्तिं पाप्मानं मृत्युमपजघ्निरे । तेनाभिनीयेव रात्रेः प्राचरन् । रात्रिया एव तद्देवा अवर्तिं पाप्मानं मृत्युमपजघ्निरे ॥ १। ५। ९। ६॥

४५ तस्मादभिनीयैवाहः पशुमालभेत । अह्न एव तद्यजमानोऽवर्तिं पाप्मानं भ्रातृव्यानपनुदते । तेनाभिनीयेव रात्रेः प्रचरेत् । रात्रिया एव तद्यजमानोऽवर्तिं पाप्मानं भ्रातृव्यानपनुदते । स एष उपवसथीयेऽहन्द्विदेवत्यः पशुरालभ्यते । द्वयं वा अस्मिं ल्लोके यजमानः । अस्थि च माꣳसं च । अस्थि चैव तेन माꣳसं च यजमानः स२ꣳस्कुरुते । ता वा एताः पञ्च देवताः । अग्नीषोमावग्निर्मित्रावरुणौ ॥ १। ५। ९। ७॥

४६ पञ्चपञ्ची वै यजमानः । त्वङ्माꣳ स२ꣳ स्नावाऽस्थि मज्जा । एतमेव तत्पञ्चधा विहितमात्मानं वरुणपाशान्मुञ्चति । भेषजतायै निर्वरुणत्वाय । तꣳ सप्तभिश्छन्दोभिः प्रातरह्वयन् । तस्माथ्सप्त चतुरुत्तराणि छन्दाꣳसि प्रातरनुवाकेऽनूच्यन्ते । तमेतयोपसमेत्योपासीदन् । उपास्मै गायता नर इति । तस्मादेतया बहिष्पवमान उपसद्यः ॥ १। ५। ९। ८॥

ऐच्छन्ननयग्ग्स्तिष्ठन्तेऽनूच्यानूच्य स्रुवेणाघारमाघार्य रात्रिया एव तद्देवा अवर्तिं पाप्मानं मृत्युमपजघ्निरे मित्रावरुणौ नव च ॥ ९॥ देवा यजमानो देवा देवा यजमानो यजमानोऽलभन्त प्राचरंल्लभेत प्रचरेतालभन्तालभेत मृत्युमपजघ्निरे भ्रातृव्यान् ॥

४७ स समुद्र उत्तरतः प्राज्वलद्भूम्यन्तेन । एष वाव स समुद्रः । यच्चात्वालः । एष उ वेव स भूम्यन्तः । यद्वेद्यन्तः । तदेतत्त्रिशलं त्रिपूरुषम् । तस्मात्तं त्रिवितस्तं खनन्ति । स सुवर्णरजताभ्यां कुशीभ्यां परिगृहीत आसीत् । तं यदस्या अध्यजनयन् । तस्मादादित्यः ॥ १। ५। १०। १॥

४८ अथ यथ्सुवर्णरजताभ्यां कुशीभ्यां परिगृहीत आसीत् । साऽस्य कौशिकता । तं त्रिवृताऽभि प्रास्तुवत । तं त्रिवृताऽऽददत । तं त्रिवृताऽऽहरन् । यावती त्रिवृतो मात्रा । तं पञ्चदशेनाभि प्रास्तुवत । तं पञ्चदशेनाददत । तं पञ्चदशेनाहरन् । यावती पञ्चदशस्य मात्रा ॥ १। ५। १०। २॥

४९ तꣳ सप्तदशेनाभि प्रास्तुवत । तꣳ सप्तदशेनाददत । तꣳ सप्तदशेनाहरन् । यावती सप्तदशस्य मात्रा । तस्य सप्तदशेन ह्रियमाणस्य तेजो हरोऽपतत् । तमेकविꣳशेनाभि प्रास्तुवत । तमेकविꣳशेनाददत । तमेकविꣳशेनाहरन् । यावत्येकविꣳशस्य मात्रा । ते यत्त्रिवृता स्तुवते ॥ १। ५। १०। ३॥

५० त्रिवृतैव तद्यजमानमाददते । तं त्रिवृतैव हरन्ति । यावती त्रिवृतो मात्रा । अग्निर्वै त्रिवृत् । यावद्वा अग्नेर्दहतो धूम उदेत्यानु व्येति । तावती त्रिवृतो मात्रा । अग्नेरेवैनं तत् । मात्राꣳ सायुज्यꣳ सलोकतां गमयन्ति । अथ यत्पञ्चदशेन स्तुवते । पञ्चदशेनैव तद्यजमानमाददते ॥ १। ५। १०। ४॥

५१ तं पञ्चदशेनैव हरन्ति । यावती पञ्चदशस्य मात्रा । चन्द्रमा वै पञ्चदशः । एष हि पञ्चदश्यामपक्षीयते । पञ्चदश्यामापूर्यते । चन्द्रमस एवैनं तत् । मात्राꣳ सायुज्यꣳ सलोकतां गमयन्ति । अथ यथ्सप्तदशेन स्तुवते । सप्तदशेनैव तद्यजमानमाददते । तꣳ सप्तदशेनैव हरन्ति ॥
१। ५। १०। ५॥

५२ यावती सप्तदशस्य मात्रा । प्रजापतिर्वै सप्तदशः । प्रजापतेरेवैनं तत् । मात्राꣳ सायुज्यꣳ सलोकतां गमयन्ति । अथ यदेकविꣳशेन स्तुवते । एकविꣳशेनैव तद्यजमानमाददते । तमेकविꣳशेनैव हरन्ति । यावत्येकविꣳशस्य मात्रा । असौ वा आदित्य एकविꣳशः । आदित्यस्यैवैनं तत् ॥ १। ५। १०। ६॥

५३ मात्रा ँ सायुज्य ँ सलोकतां गमयन्ति । ते कुश्यौ । व्यघ्नन् । ते अहोरात्रे अभवताम् । अहरेव सुवर्णाऽभवत् । रजता रात्रिः । स यदादित्य उदेति । एतामेव तथ्सुवर्णां कुशीमनु समेति । अथ यदस्तमेति । एतामेव तद्रजतां कुशीमनु संविशति । प्रह्लादो ह वै कायाधवः । विरोचनग्ग् स्वं पुत्रमुदास्यत् । स प्रदरोऽभवत् । तस्मात्प्रदरादुदकं नाचामेत् ॥ १। ५। १०। ७॥ आदित्यः पञ्चदशस्य मात्रां स्तुवते पञ्चदशेनैव तद्यजमानमाददते सप्तदशेनैव हरन्त्यादित्यस्यैवैनं तद्विंशति चत्वारि च ॥ १०॥

५४ ये वै चत्वारः स्तोमाः । कृतं तत् । अथ ये पञ्च । कलिः सः । तस्माच्चतुष्टोमः । तच्चतुष्टोमस्य चतुष्टोमत्वम् । तदाहुः । कतमानि तानि ज्योतीꣳषि । य एतस्य स्तोमा इति । त्रिवृत्पञ्चदशः सप्तदश एकवि ँ शः ॥ १। ५। ११। १॥

५५ एतानि वाव तानि ज्योतीꣳषि । य एतस्य स्तोमाः । सोऽब्रवीत् । सप्तदशेन ह्रियमाणो व्यलेशिषि । भिषज्यतमेति । तमश्विनौ धानाभिरभिषज्यताम् । पूषा करम्भेण । भारती परिवापेण । मित्रावरुणौ पयस्यया । तदाहुः ॥ १। ५। ११। २॥

५६ यदश्विभ्यां धानाः । पूष्णः करम्भः । भारत्यै परिवापः । मित्रावरुणयोः पयस्याऽथ । कस्मादेतेषा ँ हविषामिन्द्रमेव यजन्तीति । एता ह्येनं देवता इति ब्रूयात् । एतैर्हविर्भिरभिषज्यग्ग्स्तस्मादिति । तं वसवोऽष्टाकपालेन प्रातःसवनेऽभिषज्यन् । रुद्रा एकादशकपालेन माध्यन्दिने सवने । विश्वे देवा द्वादशकपालेन तृतीयसवने ॥ १। ५। ११। ३॥

५७ स यदष्टाकपालान्प्रातःसवने कुर्यात् । एकादश कपालान्माध्यन्दिने सवने । द्वादशकपालाग्स्तृतीयसवने । विलोम तद्यज्ञस्य क्रियेत । एकादशकपालानेव प्रातःसवने कुर्यात् । एकादशकपालान्माध्यन्दिने सवने । एकादशकपालाग्स्तृतीयसवने । यज्ञस्य सलोमत्वाय । तदाहुः । यद्वसूनां प्रातःसवनम् । रुद्राणां माध्यन्दिन ँ सवनम् । विश्वेषां देवानां तृतीयसवनम् । अथ कस्मादेतेषा ँ हविषामिन्द्रमेव यजन्तीति । एता ह्येनं देवता इति ब्रूयात् । एतैर्हविर्भिरभिषज्यग्ग्स्तस्मादिति ॥ १। ५। ११। ४॥ एकवि ँ श आहुस्तृतीयसवने प्रातः सवनं पञ्च च ॥ ११॥

५८ तस्या वाचोऽवपादादबिभयुः । तमेतेषु सप्तसु छन्दःस्वश्रयन् । यदश्रयन् । तच्छ्रायन्तीयस्य श्रायन्तीयत्वम् । यदवारयन् । तद्वारवन्तीयस्य वारवन्तीयत्वम् । तस्या वाच एवावपादादबिभयुः । तस्मा एतानि सप्त चतुरुत्तराणि छन्दाग्स्युपादधुः । तेषामति

त्रीण्यरिच्यन्त । न त्रीण्युदभवन् ॥ १। ५। १२। १॥
५९ स बृहतीमेवास्पृशत् । द्वाभ्यामक्षराभ्याम् । अहोरात्राभ्यामेव । तदाहुः । कतमा सा देवाक्षरा बृहती । यस्यां तत्प्रत्यतिष्ठत् । द्वादश पौर्णमास्यः । द्वादशाष्टकाः । द्वादशामावास्याः । एषा वाव सा देवाक्षरा बृहती ॥ १। ५। १२। २॥
६० यस्यां तत्प्रत्यतिष्ठदिति । यानि च छन्दाग्ंस्यत्यरिच्यन्त । यानि च नोदभवन् । तानि निर्वीर्याणि हीनान्यमन्यन्त । साऽब्रवीद्बृहती । मामेव भूत्वा । मामुप स२ँश्रयतेति । चतुर्भिरक्षरैरनुष्टुग्बृहतीं नोदभवत् । चतुर्भिरक्षरैः पङ्क्तिर्बृहतीमत्यरिच्यत । तस्यामेतानि चत्वार्यक्षराण्यपच्छिद्याधात् ॥ १। ५। १२। ३॥
६१ ते बृहती एव भूत्वा । बृहतीमुप समश्रयताम् । अष्टाभिरक्षरैरुष्णिग्बृहतीं नोदभवत् । अष्टाभिरक्षरैस्त्रिष्टुग् बृहतीमत्यरिच्यत । तस्यामेतान्यष्टावक्षराण्यपच्छिद्याधात् । ते बृहती एव भूत्वा । बृहतीमुप समश्रयताम् । द्वादशभिरक्षरैर्गायत्री बृहतीं नोदभवत् । द्वादशभिरक्षरैर्जगती बृहतीमत्यरिच्यत । तस्यामेतानि द्वादशाक्षराण्यपच्छिद्याधात् ॥ १। ५। १२। ४॥
६२ ते बृहती एव भूत्वा । बृहतीमुप समश्रयताम् । सोऽब्रवीत्प्रजापतिः । छन्दाꣳसि रथो मे भवत । युष्माभिरहमेतमध्वानमनु संचराणीति । तस्य गायत्री च जगती च पक्षावभवताम् । उष्णिक्क त्रिष्टुप्च प्रष्टौ । अनुष्टुप्च पङ्क्तिश्च धुर्यौ । बृहत्येवोद्धिरभवत् । स एतं छन्दोरथमास्थाय । एतमध्वानमनु समचरत् । एतꣳ ह वै छन्दोरथमास्थाय । एतमध्वानमनु संचरति । येनैष एतथ्संचरति । य एवं विद्वान्थ्सोमेन यजते । य उ चैनमेवं वेद ॥ १। ५। १२। ५॥ अभवन्वाव सा देवाक्षरा बृहत्यदधाद् द्वादशाक्षराण्यप च्छिद्याधादा स्थाय षट्च ॥ १२॥
अग्नेः कृत्तिका यत्पुण्यं देवस्य सवितुर्ब्रह्मवादिनः कत्यृतमेव देवा वा आयुषः प्राणमिन्द्रो दधीचो देवासुराः स प्रजापतिः स समुद्रो ये वै चत्वारस्तस्यावाचो द्वादश ॥ १२॥
अग्नेः कृत्तिका देवगृहा ऋतमेव वैश्वदेवेन ते तदन्तं तं पञ्चदशेन ते बृहती एव द्विषष्टिः ॥ ६२॥
अग्नेः कृत्तिका य उचैनमेवं वेद ॥

## प्रथमाष्टके षष्ठः प्रपाठकः ६

१ अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति । ये प्रत्यञ्चः शम्याया अवशीयन्ते । तन्नैरृतमेककपालम् । इयं वा अनुमतिः । इयं निरृतिः । नैरृतेन पूर्वेण प्रचरति ।

पाप्मानमेव निर्ऋतिं पूर्वां निरवदयते । एककपालो भवति । एकधैव निर्ऋतिं निरवदयते । यदहुत्वा गार्हपत्य ईयुः ॥ १। ६। १। १॥

२ रुद्रो भूत्वाऽग्निरनूत्थाय । अध्वर्युं च यजमानं च हन्यात् । वीहि स्वाहाऽऽहुतिं जुषाण इत्याह । आहुत्यैवैनꣳ शमयति । नार्तिमार्च्छत्यध्वर्युर्न यजमानः । एकोल्मुकेन यन्ति । तद्धि निर्ऋत्यै भागधेयम् । इमां दिशं यन्ति । एषा वै निर्ऋत्यै दिक् । स्वायामेव दिशि निर्ऋतिं निरवदयते ॥ १। ६। १। २॥

३ स्वकृत इरिणे जुहोति प्रदरे वा । एतद्वै निर्ऋत्या आयतनम् । स्व एवायतने निर्ऋतिं निरवदयते । एष ते निर्ऋते भाग इत्याह । निर्दिशत्येवैनाम् । भूते हविष्मत्यसीत्याह । भूतिमेवोपावर्तते । मुञ्चेममꣳहस इत्याह । अꣳहस एवैनं मुञ्चति । अङ्गुष्ठाभ्यां जुहोति ॥ १। ६। १। ३॥

४ अन्तत एव निर्ऋतिं निरवदयते । कृष्णं वासः कृष्णतूषं दक्षिणा । एतद्वै निर्ऋत्यै रूपम् । रूपेणैव निर्ऋतिं निरवदयते । अप्रतीक्षमायन्ति । निर्ऋत्या अन्तर्हित्यै । स्वाहा नमो य इदं चकारेति पुनरेत्य गार्हपत्ये जुहोति । आहुत्यैव नमस्यन्तो गार्हपत्यमुपावर्तन्ते । आनुमतेन प्रचरति । इयं वा अनुमतिः ॥ १। ६। १। ४॥

५ इयमेवास्मै राज्यमनु मन्यते । धेनुर्दक्षिणा । इमामेव धेनुं कुरुते । आदित्यं चरुं निर्वपति । उभयीष्वेव प्रजास्वभिषिच्यते । दैवीषु च मानुषीषु च । वरो दक्षिणा । वरो हि राज्यꣳ समृद्ध्यै । आग्नावैष्णवमेकादशकपालं निर्वपति । अग्निः सर्वा देवताः ॥ १। ६। १। ५॥

६ विष्णुर्यज्ञः । देवताश्चैव यज्ञं चावरुन्धे । वामनो वही दक्षिणा । यद्वही । तेनाग्नेयः । यद्वामनः । तेन वैष्णवः समृद्ध्यै । अग्नीषोमीयमेकादशकपालं निर्वपति । अग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्निति । यदग्नीषोमीयमेकादशकपालं निर्वपति ॥ १। ६। १। ६॥

७ वार्त्रघ्नमेव विजित्यै । हिरण्यं दक्षिणा समृद्ध्यै । इन्द्रो वृत्रꣳ हत्वा । देवताभिश्चेन्द्रियेण च व्यार्ध्यत । स एतमैन्द्राग्नमेकादशकपालमपश्यत् । तन्निरवपत् । तेन वै स देवताश्चेन्द्रियं चावारुन्ध । यदैन्द्राग्नमेकादशकपालं निर्वपति । देवताश्चैव तेनेन्द्रियं च यजमानोऽवरुन्धे । ऋषभो वही दक्षिणा ॥ १। ६। १। ७॥

८ यद्वही । तेनाग्नेयः । यदृषभः । तेनैन्द्रः समृद्ध्यै । आग्नेयमष्टाकपालं निर्वपति । ऐन्द्रं दधि । यदाग्नेयो भवति । अग्निर्वै यज्ञमुखम् । यज्ञमुखमेवर्द्धिं पुरस्ताद्धत्ते । यदैन्द्रं दधि ॥ १। ६। १। ८॥

९ इन्द्रियमेवावरुन्धे । ऋषभो वही दक्षिणा । यद्वही । तेनाग्नेयः । यदृषभः । तेनैन्द्रः समृद्ध्यै । यावतीर्वै प्रजा ओषधीनामहुतानामाश्नन् । ताः पराऽभवन् । आग्रयणं भवति हुताद्याय । यजमानस्यापराभावाय ॥ १। ६। १। ९॥
१० देवा वा ओषधीष्वाजिमयुः । ता इन्द्राग्नी उदजयताम् । तावेतमैन्द्राग्नं द्वादशकपालं निरवृणाताम् । यदैन्द्राग्नो भवत्युज्जित्यै । द्वादशकपालो भवति । द्वादश मासाः संवथ्सरः । संवथ्सरेणैवास्मा अन्नमवरुन्धे । वैश्वदेवश्चरुर्भवति । वैश्वदेवं वा अन्नम् । अन्नमेवास्मै स्वदयति ॥ १। ६। १। १०॥
११ प्रथमजो वथ्सो दक्षिणा समृद्ध्यै । सौम्य२ँ श्यामाकं चरुं निर्वपति । सोमो वा अकृष्टपच्यस्य राजा । अकृष्टपच्यमेवास्मै स्वदयति । वासो दक्षिणा । सौम्यँ हि देवतया वासः समृद्ध्यै । सरस्वत्यै चरुं निर्वपति । सरस्वते चरुम् । मिथुनमेवावरुन्धे । मिथुनौ गावौ दक्षिणा समृद्ध्यै । एति वा एष यज्ञमुखादृद्ध्याः । योऽग्नेर्देवताया एति । अष्टावेतानि हवीँषि भवन्ति । अष्टाक्षरा गायत्री । गायत्रोऽग्निः । तेनैव यज्ञमुखादृद्ध्या अग्नेर्देवतायै नैति ॥ १। ६। १। ११॥ ईयुर्निरवदयतेऽङ्गुष्ठाभ्यां जुहोत्यनुमतिर्देवता निर्वपति वही दक्षिणा यदैन्द्रं दध्यपराभावाय स्वदयति गावौ दक्षिणा समृद्ध्यै षट्च ॥ १॥
१२ वैश्वदेवेन वै प्रजापतिः प्रजा असृजत । ताः सृष्टा न प्राजायन्त । सोऽग्निरकामयत । अहमिमाः प्रजनयेयमिति । स प्रजापतये शुचमदधात् । सोऽशोचत्प्रजामिच्छमानः । तस्माद्यं च प्रजा भुनक्ति यं च न । तावुभौ शोचतः प्रजामिच्छमानौ । तास्वग्निमप्यसृजत् । ता अग्निरध्यैत् ॥ १। ६। २। १२॥
१३ सोमो रेतोऽदधात् । सविता प्राजनयत् । सरस्वती वाचमदधात् । पूषाऽपोषयत् । ते वा एते त्रिः संवथ्सरस्य प्रयुज्यन्ते । ये देवाः पुष्टिपतयः । संवथ्सरो वै प्रजापतिः । संवथ्सरेणैवास्मै प्रजाः प्राजनयत् । ताः प्रजा जाता मरुतोऽघ्नन् । अस्मानपि न प्रायुक्षतेति ॥
१। ६। २। १३॥
१४ स एतं प्रजापतिर्मारुतँ सप्तकपालमपश्यत् । तं निरवपत् । ततो वै प्रजाभ्योऽकल्पत । यन्मारुतो निरुप्यते । यज्ञस्य क्लृप्त्यै । प्रजानामघाताय । सप्तकपालो भवति । सप्त गणा वै मरुतः । गणश एवास्मै विशं कल्पयति । स प्रजापतिरशोचत् ॥ १। ६। २। १४॥

१५ याः पूर्वाः प्रजा असृक्षि । मरुतस्ता अवधिषुः । कथमपराः सृजेयेति । तस्य शुष्म
आण्डं भूतं निरवर्तत । तद्व्युदहरत् । तदपोषयत् । तत्प्राजायत । आण्डस्य वा एतद्रूपम्
। यदामिक्षा । यद्व्युद्धरति ॥ १। ६। २। १५॥
१६ प्रजा एव तद्यजमानः पोषयति । वैश्वदेव्यामिक्षा भवति । वैश्वदेव्यो वै प्रजाः । प्रजा
एवास्मै प्रजनयति । वाजिनमानयति । प्रजास्वेव प्रजातासु रेतो दधाति । द्यावापृथिव्य
एककपालो भवति । प्रजा एव प्रजाता द्यावापृथिवीभ्यामुभयतः परिगृह्णाति । देवासुराः
संयत्ता आसन् । सोऽग्निरब्रवीत् ॥ १। ६। २। १६॥
१७ मामग्ने यजत । मया मुखेनासुराञ्जेष्यथेति । मां द्वितीयमिति सोमोऽब्रवीत् । मया
राज्ञा जेष्यथेति । मां तृतीयमिति सविता । मया प्रसूता जेष्यथेति । मां चतुर्थीमिति
सरस्वती । इन्द्रियं वोऽहं धास्यामीति । मां पञ्चममिति पूषा । मया प्रतिष्ठया जेष्यथेति
॥ १। ६। २। १७॥
१८ तेऽग्निना मुखेनासुरानजयन् । सोमेन राज्ञा । सवित्रा प्रसूताः । सरस्वतीन्द्रियमदधात्
। पूषा प्रतिष्ठाऽऽसीत् । ततो वै देवा व्यजयन्त । यदेतानि हवी ँ षि निरुप्यन्ते विजित्यै
। नोत्तरवेदिमुपवपति । पशवो वा उत्तरवेदिः । अजाता इव ह्येतर्हि पशवः ॥ १। ६।
२। १८॥
ऐदित्यशोचद्व्युद्धरत्यब्रवीत्प्रतिष्ठाया जेष्यथेत्येतर्हि पशवः ॥ २॥
१९ त्रिवृद्बर्हिर्भवति । माता पिता पुत्रः । तदेव तन्मिथुनम् । उल्बं गर्भो जरायु । तदेव
तन्मिथुनम् । त्रेधा बर्हिः संनद्धं भवति । त्रय इमे लोकाः । एष्वेव लोकेषु प्रतितिष्ठति
। एकधा पुनः संनद्धं भवति । एक इव ह्ययं लोकः ॥ १। ६। ३। १९॥
२० अस्मिन्नेव तेन लोके प्रतितिष्ठति । प्रसुवो भवन्ति । प्रथमजामेव पुष्टिमवरुन्धे
। प्रथमजो वथ्सो दक्षिणा समृद्ध्यै । पृषदाज्यं गृह्णाति । पशवो वै पृषदाज्यम् ।
पशूनेवावरुन्धे । पञ्चगृहीतं भवति । पाङ्क्ता हि पशवः । बहुरूपं भवति ॥
१। ६। ३। २०॥
२१ बहुरूपा हि पशवः समृद्ध्यै । अग्निं मन्थन्ति । अग्निमुखा वै प्रजापतिः प्रजा
असृजत । यदग्निं मन्थन्ति । अग्निमुखा एव तत्प्रजा यजमानः सृजते । नव प्रयाजा
इज्यन्ते । नवानूयाजाः । अष्टौ हवी ँ षि । द्वावाघारौ । द्वावाज्यभागौ ॥ १। ६। ३।
२१॥
२२ त्रि ँ शथ्संपद्यन्ते । त्रि ँ शदक्षरा विराट् । अन्नं विराट् । विराजैवान्नाद्यमवरुन्धे ।

यजमानो वा एककपालः । तेज आज्यम् । यदेककपाल आज्यमानयति । यजमानमेव तेजसा समर्धयति । यजमानो वा एककपालः । पशव आज्यम् ॥ १। ६। ३। २२॥
२३ यदेककपाल आज्यमानयति । यजमानमेव पशुभिः समर्धयति । यदल्पमानयेत् । अल्पा एनं पशवो भुञ्जन्त उपतिष्ठेरन् । यद्बह्वानयेत् । बहव एनं पशवोऽभुञ्जन्त उपतिष्ठेरन् । बह्वानीयाविः पृष्ठं कुर्यात् । बहव एवैनं पशवो भुञ्जन्त उपतिष्ठन्ते । यजमानो वा एककपालः । यदेककपालस्यावद्येत् ॥ १। ६। ३। २३॥
२४ यजमानस्यावद्येत् । उद्वा माद्येद्यजमानः । प्र वा मीयेत । सकृदेव होतव्यः । सकृदिव हि सुवर्गो लोकः । हुत्वाऽभि जुहोति । यजमानमेव सुवर्गं लोकं गमयित्वा । तेजसा समर्धयति । यजमानो वा एककपालः । सुवर्गो लोक आहवनीयः ॥ १। ६। ३। २४॥
२५ यदेककपालमाहवनीये जुहोति । यजमानमेव सुवर्गं लोकं गमयति । यद्धस्तेन जुहुयात् । सुवर्गाल्लोकाद्यजमानमवविध्येत् । स्रुचा जुहोति । सुवर्गस्य लोकस्य समष्ट्यै । यत्प्राङ्घ्येत । देवलोकमभि जयेत् । यद्दक्षिणा पितृलोकम् । यत्प्रत्यक् ॥ १। ६। ३। २५॥
२६ रक्षाꣳसि यज्ञꣳ हन्युः । यदुदङ्ङ् । मनुष्यलोकमभिजयेत् । प्रतिष्ठितो होतव्यः । एककपालं वै प्रतितिष्ठन्तं द्यावापृथिवी अनु प्रतितिष्ठतः । द्यावापृथिवी ऋतवः । ऋतून्, यज्ञः । यज्ञं यजमानः । यजमानं प्रजाः । तस्मात्प्रतिष्ठितो होतव्यः ॥ १। ६। ३। २६॥
२७ वाजिनो यजति । अग्निर्वायुः सूर्यः । ते वै वाजिनः । तानेव तद्यजति । अथो खल्वाहुः । छन्दाꣳसि वै वाजिन इति । तान्येव तद्यजति । ऋख्सामे वा इन्द्रस्य हरी सोमपानौ । तयोः परिधय आधानम् । वाजिनं भागधेयम् ॥ १। ६। ३। २७॥
२८ यदप्रहृत्य परिधीञ्जुहुयात् । अन्तराधानाभ्यां घासं प्रयच्छेत् । प्रहृत्य परिधीञ्जुहोति । निराधानाभ्यामेव घासं प्रयच्छति । बर्हिषि विषिञ्चन्वाजिनमानयति । प्रजा वै बर्हिः । रेतो वाजिनम् । प्रजास्वेव रेतो दधाति । समुपहूय भक्षयन्ति । एतथ्सोमपीथा ह्येते । अथो आत्मन्नेव रेतो दधते । यजमान उत्तमो भक्षयति । पशवो वै वाजिनम् । यजमान एव पशून्प्रतिष्ठापयन्ति ॥ १। ६। ३। २८॥
लोको बहुरूपं भवत्याज्यभागौ पशव आज्यमवद्येदाहवनीयः प्रत्यक्तस्मात्प्रतिष्ठितो होतव्यो भागधेयमेते चत्वारि च ॥ ३॥
२९ प्रजापतिः सविता भूत्वा प्रजा असृजत । ता एनमत्यमन्यन्त । ता अस्मादपाक्रामन्

। ता वरुणो भूत्वा प्रजा वरुणेनाग्राहयत् । ताः प्रजा वरुणगृहीताः । प्रजापतिं पुनरुपाधावन्नाथमिच्छमानाः । स एतान्प्रजापतिर्वरुणप्रघासानपश्यत् । तान्निरवपत् । तैर्वै स प्रजा वरुणपाशादमुञ्चत् । यद्वरुणप्रघासा निरुप्यन्ते ॥ १। ६। ४। २९॥

३० प्रजानामवरुणग्राहाय । तासां दक्षिणो बाहुर्न्यक्न आसीत् । सव्यः प्रसृतः । स एतां द्वितीयां दक्षिणतो वेदिमुदहन् । ततो वै स प्रजानां दक्षिणं बाहुं प्रासारयत् । यद्द्वितीयां दक्षिणतो वेदिमुद्धन्ति । प्रजानामेव तद्यजमानो दक्षिणं बाहुं प्रसारयति । तस्माच्चातुर्मास्ययाज्यमुष्मिं ल्लोक उभयाबाहुः । यज्ञाभिजितग्ग् ह्यस्य । पृथमात्राद्वेदी असंभिन्ने भवतः ॥ १। ६। ४। ३०॥

३१ तस्मात्पृथमात्रं व्यꣳसौ । उत्तरस्यां वेद्यामुत्तरवेदिमुप वपति । पशवो वा उत्तरवेदिः । पशूनेवावरुन्धे । अथो यज्ञपरुषोऽनन्तरित्यै । एतद्ब्राह्मणान्येव पञ्च हवीꣳषि । अथैष ऐन्द्राग्नो भवति । प्राणापानौ वा एतौ देवानाम् । यदिन्द्राग्नी । यदैन्द्राग्नो भवति ॥ १। ६। ४। ३१॥

३२ प्राणापानावेवावरुन्धे । ओजो बलं वा एतौ देवानाम् । यदिन्द्राग्नी । यदैन्द्राग्नो भवति । ओजो बलमेवावरुन्धे । मारुत्यामिक्षा भवति । वारुण्यामिक्षा । मेषी च मेषश्च भवतः । मिथुना एव प्रजा वरुणपाशान्मुञ्चति । लोमशौ भवतो मेध्यत्वाय ॥ १। ६। ४। ३२॥

३३ शमीपर्णान्युप वपति । घासमेवाभ्यामपि यच्छति । प्रजापतिमन्नाद्यं नोपानमत् । स एतेन शतेध्मेन हविषाऽन्नाद्यमवारुन्ध । यत्परः शतानि शमीपर्णानि भवन्ति । अन्नाद्यस्यावरुद्ध्यै । सौम्यानि वै करीराणि । सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति । यत्करीराणि भवन्ति । सौम्ययैवाहुत्या दिवो वृष्टिमवरुन्धे । काय एककपालो भवति । प्रजानां कन्त्वाय । प्रतिपूरुषं करम्भपात्राणि भवन्ति । जाता एव प्रजा वरुणपाशान्मुञ्चति । एकमतिरिक्तम् । जनिष्यमाणा एव प्रजा वरुणपाशान्मुञ्चति ॥ १। ६। ४। ३३॥
निरुप्यन्ते भवतो भवति मेध्यत्वाय रुन्धे षट्च ॥ ४॥

३४ उत्तरस्यां वेद्यामन्यानि हवीꣳषि सादयति । दक्षिणायां मारुतीम् । अपधुरमेवैना युनक्ति । अथो ओज एवासामव हरति । तस्माद्ब्रह्मणश्च क्षत्राच्च विशोऽन्यतोपक्रमिणीः । मारुत्या पूर्वया प्रचरति । अनृतमेवाव यजते । वारुण्योत्तरया । अन्तत एव वरुणमव यजते । यदेवाध्वर्युः करोति ॥ १। ६। ५। ३४॥

३५ तत्प्रतिप्रस्थाता करोति । तस्माद्यच्छ्रेयान्करोति । तत्पापीयान्करोति । पत्नीं वाचयति

। मेध्यामेवैनां करोति । अथो तप एवैनामुप नयति । यज्जारꣳ सन्तं न प्रब्रूयात् । प्रियं ज्ञातिꣳ रुन्ध्यात् । असौ मे जार इति निर्दिशेत् । निर्दिश्यैवैनं वरुणपाशेन ग्राहयति ॥ १। ६। ५। ३५॥
३६ प्रघास्यान् हवामह इति पत्नीमुदानयति । अह्वतैवैनाम् । यत्पत्नी पुरोनुवाक्यामनु ब्रूयात् । निर्वीर्या यजमानः स्यात् । यजमानोऽन्वाह । आत्मन्नेव वीर्यं धत्ते । उभौ याज्याꣳ सवीर्यत्वाय । यद्ग्रामे यदरण्य इत्याह । यथोदितमेव वरुणमव यजते । यजमानदेवत्यो वा आहवनीयः ॥ १। ६। ५। ३६॥
३७ भ्रातृव्यदेवत्यो दक्षिणः । यदाहवनीये जुहुयात् । यजमानं वरुणपाशेन ग्राहयेत् । दक्षिणेऽग्नौ जुहोति । भ्रातृव्यमेव वरुणपाशेन ग्राहयति । शूर्पेण जुहोति । अन्नमेव वरुणमवयजते । शीर्षन्नधि निधाय जुहोति । शीर्षत एव वरुणमवयजते । प्रत्यङ्तिष्ठञ्जुहोति ॥ १। ६। ५। ३७॥
३८ प्रत्यङ्ङेव वरुणपाशान्निर्मुच्यते । अक्रन्कर्म कर्मकृत इत्याह । देवानृणं निरवदाय । अनृणा गृहानुपप्रेतेति वावैतदाह । वरुणगृहीतं वा एतद्यज्ञस्य । यद्यजुषा गृहीतस्यातिरिच्यते । तुषाश्च निष्कासश्च । तुषैश्च निष्कासेन चावभृथमवैति । वरुणगृहीतेनैव वरुणमवयजते । अपोऽवभृथमवैति ॥ १। ६। ५। ३८॥
३९ अप्सु वै वरुणः । साक्षादेव वरुणमव यजते । प्रतियुतो वरुणस्य पाश इत्याह । वरुणपाशादेव निर्मुच्यते । अप्रतीक्षमायन्ति । वरुणस्यान्तर्हित्यै । एधोऽस्येधिषीमहीत्याह । समिधैवाग्निं नमस्यन्त उपायन्ति । तेजोऽसि तेजो मयि धेहीत्याह । तेज एवात्मन्धत्ते ॥ १। ६। ५। ३९॥
करोति ग्राहयत्याहवनीयस्तिष्ठञ्जुहोत्यपोऽवभृथमवैति धत्ते ॥ ५॥
४० देवासुराः संयत्ता आसन् । सोऽग्निरब्रवीत् । ममेयमनीकवती तनूः । तां प्रीणीत । अथासुरानभि भविष्यथेति । ते देवा अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निरवपन् । सोऽग्निरनीकवान्थ्स्वेन भागधेयेन प्रीतः । चतुर्धाऽनीकान्यजनयत । ततो देवा अभवन् । पराऽसुराः ॥ १। ६। ६। १॥
४१ यदग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति । अग्निमेवानीकवन्तग्ग् स्वेन भागधेयेन प्रीणाति । सोऽग्निरनीकवान्थ्स्वेन भागधेयेन प्रीतः । चतुर्धाऽनीकानि जनयते । असौ वा आदित्योऽग्निरनीकवान् । तस्य रश्मयोऽनीकानि । साकꣳ सूर्येणोद्यता निर्वपति । साक्षादेवास्मा अनीकानि जनयति । तेऽसुराः पराजिता यन्तः । द्यावापृथिवी

उपाश्रयन् ॥ १। ६। ६। २॥
४२ ते देवा मरुद्भ्यः सांतपनेभ्यश्चरुं निरवपन् । तान्द्यावापृथिवीभ्यामेवोभयतः समतपन् । यन्मरुद्भ्यः सान्तपनेभ्यश्चरुं निर्वपति । द्यावापृथिवीभ्यामेव तदुभयतो यजमानो भ्रातृव्यान्थ्संतपति । मध्यन्दिने निर्वपति । तर्हि हि तेऽक्ष्णिष्ठं तपति । चरुर्भवति । सर्वत एवैनान्थ्संतपति । ते देवाः श्वोविजयिनः सन्तः । सर्वासां दुग्धे गृहमेधीयं चरुं निरवपन् ॥ १। ६। ६। ३॥
४३ आशिता एवाद्योपवसाम । कस्य वाऽहेदम् । कस्य वा श्वो भवितेति । स श‍ृतोऽभवत् । तस्याहुतस्य नाश्नन् । न हि देवा अहुतस्याश्नन्ति । तेऽब्रुवन् । कस्मा इमꣳ होष्याम इति । मरुद्भ्यो गृहमेधिभ्य इत्यब्रुवन् । तं मरुद्भ्यो गृहमेधिभ्योऽजुहवुः ॥ १। ६। ६। ४॥
४४ ततो देवा अभवन् । पराऽसुराः । यस्यैवं विदुषो मरुद्भ्यो गृहमेधिभ्यो गृहे जुह्वति । भवत्यात्मना । पराऽस्य भ्रातृव्यो भवति । यद्वै यज्ञस्य पाकत्रा क्रियते । पशव्यं तत् । पाकत्रा वा एतत्क्रियते । यन्नेध्मा बर्हिर्भवति । न सामिधेनीरन्वाह ॥ १। ६। ६। ५॥
४५ न प्रयाजा इज्यन्ते । नानूयाजाः । य एवं वेद । पशुमान्भवति । आज्यभागौ यजति । यज्ञस्यैव चक्षुषी नान्तरेति । मरुतो गृहमेधिनो यजति । भागधेयेनैवैनान्थ्समर्धयति । अग्निꣳ स्विष्टकृतं यजति प्रतिष्ठित्यै । इडान्तो भवति । पशवो वा इडा । पशुष्वेवोपरिष्टात्प्रतितिष्ठति ॥ १। ६। ६। ६॥ असुरा अश्रयन्गृहमेधीयं चरुं निरवपन्नजुहवुरन्वाहेडान्तो भवति द्वे च ॥ ६॥
४६ यत्पत्नी गृहमेधीयस्याश्नीयात् । गृहमेध्येव स्यात् । वि त्वस्य यज्ञ ऋध्येत । यन्नाश्नीयात् । अगृहमेधी स्यात् । नास्य यज्ञो व्यृध्येत । प्रतिवेशं पचेयुः । तस्याश्नीयात् । गृहमेध्येव भवति । नास्य यज्ञो व्यृध्यते ॥ १। ६। ७। १॥
४७ ते देवा गृहमेधीयेनेष्ट्वा । आशिता अभवन् । आञ्जताभ्यञ्जत । अनुवथ्सानवासयन् । तेभ्योऽसुराः, क्षुधं प्राहिण्वन् । सा देवेषु लोकमवित्त्वा । असुरान्पुनरगच्छत् । गृहमेधीयेनेष्ट्वा । आशिता भवन्ति । आञ्जतेऽभ्यञ्जते ॥ १। ६। ७। २॥
४८ अनुवथ्सान्, वासयन्ति । भ्रातृव्यायैव तद्यजमानः, क्षुधं प्रहिणोति । ते देवा गृहमेधीयेनेष्ट्वा । इन्द्राय निष्कासं न्यदधुः । अस्मानेव श्व इन्द्रो निहितभाग उपावर्तितेति । तानिन्द्रो निहितभाग उपावर्तत । गृहमेधीयेनेष्ट्वा । इन्द्राय निष्कासं निदध्यात् । इन्द्र

एवैनं निहितभाग उपावर्तते । गार्हपत्ये जुहोति ॥ १। ६। ७। ३॥
४९ भागधेयेनैवैन१ँ समर्धयति । ऋषभमाह्वयति । वषट्कार एवास्य सः । अथो इन्द्रियमेव तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते । इन्द्रो वृत्र१ँ हत्वा । परां परावतमगच्छत् । अपाराधमिति मन्यमानः । सोऽब्रवीत् । क इदं वेदिष्यतीति । तेऽब्रुवन्मरुतो वरं वृणामहै ॥ १। ६। ७। ४॥
५० अथ वयं वेदाम । अस्मभ्यमेव प्रथम१ँ हविर्निरुप्याता इति । त एनमध्यक्रीडन् । तत्क्रीडिनां क्रीडित्वम् । यन्मरुद्भ्यः क्रीडिभ्यः प्रथम१ँ हविर्निरुप्यते विजित्यै । साक१ँ सूर्येणोद्यता निर्वपति । एतस्मिन्वै लोक इन्द्रो वृत्रमहन्थ्समृद्ध्यै । एतद्ब्राह्मणान्येव पञ्च हवी१ँषि । एतद्ब्राह्मण ऐन्द्राग्नः । अथैष ऐन्द्रश्चरुर्भवति ।
५१ उद्धारं वा एतमिन्द्र उदहरत । वृत्र१ँ हत्वा । अन्यासु देवतास्वधि । यदेष ऐन्द्रश्चरुर्भवति । उद्धारमेव तं यजमान उद्धरते । अन्यासु प्रजास्वधि । वैश्वकर्मण एककपालो भवति । विश्वान्येव तेन कर्माणि यजमानोऽवरुन्धे ॥ १। ६। ७। ५॥
ऋध्यतेऽभ्यञ्जते जुहोति वृणामहै भवत्यष्टौ च ॥ ७॥
५२ वैश्वदेवेन वै प्रजापतिः प्रजा असृजत । ता वरुणप्रघासैर्वरुणपाशादमुञ्चत् । साकमेधैः प्रत्यस्थापयत् । त्र्यम्बकै रुद्रं निरवादयत । पितृयज्ञेन सुवर्गं लोकमगमयत् । यद्वैश्वदेवेन यजते । प्रजा एव तद्यजमानः सृजते । ता वरुणप्रघासैर्वरुणपाशान्मुञ्चति । साकमेधैः प्रतिष्ठापयति । त्र्यम्बकै रुद्रं निरवदयते ॥ १। ६। ८। १॥
५३ पितृयज्ञेन सुवर्गं लोकं गमयति । दक्षिणतः प्राचीनावीती निर्वपति । दक्षिणावृद्धि पितृणाम् । अनादृत्य तत् । उत्तरत एवोपवीय निर्वपेत् । उभये हि देवाश्च पितरश्चेज्यन्ते । अथो यदेव दक्षिणार्धेऽधि श्रयति । तेन दक्षिणावृत् । सोमाय पितृमते पुरोडाश१ँ षट्कपालं निर्वपति । संवथ्सरो वै सोमः पितृमान् ॥
१। ६। ८। २॥
५४ संवथ्सरमेव प्रीणाति । पितृभ्यो बर्हिषद्भ्यो धानाः । मासा वै पितरो बर्हिषदः । मासानेव प्रीणाति । यस्मिन्वा ऋतौ पुरुषः प्रमीयते । सोऽस्यामुष्मिं लोके भवति । बहुरूपा धाना भवन्ति । अहोरात्राणामभिजित्यै । पितृभ्योऽग्निष्वात्तेभ्यो मन्थम् । अर्धमासा वै पितरोऽग्निष्वात्ताः ॥ १। ६। ८। ३॥
५५ अर्धमासानेव प्रीणाति । अभिवान्यायै दुग्धे भवति । सा हि पितृदेवत्यं दुहे । यत्पूर्णम् । तन्मनुष्याणाम् । उपर्यर्धो देवानाम् । अर्धः पितृणाम् । अर्ध उपमन्थति ।

अर्धो हि पितृणाम् । एकयोपमन्थति ॥ १। ६। ८। ४॥
५६ एका हि पितृणाम् । दक्षिणोपमन्थति । दक्षिणावृद्धि पितृणाम् । अनारभ्योपमन्थति । तद्धि पितृन्गच्छति । इमां दिशं वेदिमुद्धन्ति । उभये हि देवाश्च पितरश्चेज्यन्ते । चतुःस्रक्तिर्भवति । सर्वा ह्यनु दिशः पितरः । अखाता भवति ॥
५७ खाता हि देवानाम् । मध्यतोऽग्निराधीयते । अन्ततो हि देवानामाधीयते । वर्षीयानिध्म इध्माद्भवति व्यावृत्त्यै । परि श्रयति । अन्तर्हितो हि पितृलोको मनुष्यलोकात् । यत्परुषि दिनम् । तद्देवानाम् । यदन्तरा । तन्मनुष्याणाम् ॥ १। ६। ८। ६॥
५८ यथ्समूलम् । तत्पितृणाम् । समूलं बर्हिर्भवति व्यावृत्त्यै । दक्षिणा स्तृणाति । दक्षिणावृद्धि पितृणाम् । त्रिः पर्येति । तृतीये वा इतो लोके पितरः । तानेव प्रीणाति । त्रिः पुनः पर्येति । षट्थ्संपद्यन्ते ॥ १। ६। ८। ७॥
५९ षड्वा ऋतवः । ऋतूनेव प्रीणाति । यत्प्रस्तरं यजुषा गृह्णीयात् । प्रमायुको यजमानः स्यात् । यन्न गृह्णीयात् । अनायतनः स्यात् । तूष्णीमेव न्यस्येत् । न प्रमायुको भवति । नानायतनः । यत्रीन्परिधीन्परिदध्यात् ॥ १। ६। ८। ८॥
६० मृत्युना यजमानं परिगृह्णीयात् । यन्न परिदध्यात् । रक्षाꣳसि यज्ञꣳ हन्युः । द्वौ परिधी परिदधाति । रक्षसामपहत्यै । अथो मृत्योरेव यजमानमुथ्सृजति । यत्रीणि त्रीणि हवीꣳष्युदाहरेयुः । त्रयस्त्रय एषाꣳ साकं प्रमीयेरन् । एकैकमनूचीनान्युदाहरन्ति । एकैक एवैषामन्वञ्चः प्रमीयते । कशिपु कशिपव्याय । उपबर्हणमुपबर्हण्याय । आञ्जनमाञ्जन्याय । अभ्यञ्जनमभ्यञ्जन्याय । यथाभागमेवैनान्प्रीणाति ॥ १। ६। ८। ९॥ निरवदयते पितृमानग्निष्वात्ता एकयोप मन्थत्यखाता भवति मनुष्याणां पद्यन्ते परिदध्यान्मीयते पञ्च च ॥ ८॥
६१ अग्नये देवेभ्यः पितृभ्यः समिध्यमानायानु ब्रूहीत्याह । उभये हि देवाश्च पितरश्चेज्यन्ते । एकामन्वाह । एका हि पितृणाम् । त्रिरन्वाह । त्रिर्हि देवानाम् । आघारावाघारयति । यज्ञपरुषोरनन्तरित्यै । नार्षेयं वृणीते । न होतारम् ॥ १। ६। ९। १॥
६२ यदार्षेयं वृणीत । यद्धोतारम् । प्रमायुको यजमानः स्यात् । प्रमायुको होता । तस्मान्न वृणीते । यजमानस्य होतुर्गोपीथाय । अप बर्हिषः प्रयाजान् यजति । प्रजा वै बर्हिः । प्रजा एव मृत्योरुथ्सृजति । आज्यभागौ यजति ॥ १। ६। ९। २॥
६३ यज्ञस्यैव चक्षुषी नान्तरेति । प्राचीनावीती सोमं यजति । पितृदेवत्या हि ।

एषाऽऽहुतिः । पञ्चकृत्वोऽवद्यति । पञ्च ह्येता देवताः । द्वे पुरोऽनुवाक्ये । याज्या देवता वषट्कारः । ता एव प्रीणाति । सन्ततमवद्यति ॥ १। ६। ९। ३॥

६४ ऋतूनाꣳ संतत्यै । प्रैवैभ्यः पूर्वया पुरोऽनुवाक्ययाऽऽह । प्रणयति द्वितीयया । गमयति याज्यया । तृतीये वा इतो लोके पितरः । अह्न एवैनान् पूर्वया पुरोऽनुवाक्ययाऽत्यानयति । रात्रियै द्वितीयया । ऐवैनान् याज्यया गमयति । दक्षिणतोऽवदाय । उदङ्ङतिक्रामति व्यावृत्त्यै ॥ १। ६। ९। ४॥

६५ आस्वधेत्याश्रावयति । अस्तु स्वधेति प्रत्याश्रावयति । स्वधा नम इति वषट्करोति । स्वधाकारो हि पितृणाम् । सोममग्रे यजति । सोमप्रयाजा हि पितरः । सोमं पितृमन्तं यजति । संवथ्सरो वै सोमः पितृमान् । संवथ्सरमेव तद्यजति । पितॄन्बर्हिषदो यजति ॥ १। ६। ९। ५॥

६६ ये वै यज्वानः । ते पितरो बर्हिषदः । तानेव तद्यजति । पितॄनग्निष्वात्तान्, यजति । ये वा अयज्वानो गृहमेधिनः । ते पितरोऽग्निष्वात्ताः । तानेव तद्यजति । अग्निं कव्यवाहनं यजति । य एव पितृणामग्निः । तमेव तद्यजति ॥ १। ६। ९। ६॥

६७ अथो यथाऽग्नि२ꣳ स्विष्टकृतं यजति । तादृगेव तत् । एतत्ते तत ये च त्वामन्विति तिसृषु स्रक्तीषु निदधाति । तस्मादा तृतीयात्पुरुषान्नाम न गृह्णन्ति । एतावन्तो हीज्यन्ते । अत्र पितरो यथाभागं मन्दध्वमित्याह । ह्रीका हि पितरः । उदञ्चो निष्क्रामन्ति । एषा वै मनुष्याणां दिक् । स्वामेव तद्दिशमनु निष्क्रामन्ति ॥ १। ६। ९। ७॥

६८ आहवनीयमुपतिष्ठन्ते । न्येवास्मै तह्नुवते । यथ्सत्याहवनीये । अथान्यत्र चरन्ति । आतमितोरुपतिष्ठन्ते । अग्निमेवोपद्रष्टारं कृत्वा । पितॄन्निरवदयन्ते । अन्तं वा एते प्राणानां गच्छन्ति । य आतमितोरुप तिष्ठन्ते । सुसंदृशं त्वा वयमित्याह ॥ १। ६। ९। ८॥

६९ प्राणो वै सुसंदृक् । प्राणमेवात्मन्दधते । योजान्विन्द्र ते हरी इत्याह । प्राणमेव पुनरयुक्त । अक्षन्नमीमदन्त हीति गार्हपत्यमुपतिष्ठन्ते । अक्षन्नमीमदन्ताथ त्वोपतिष्ठामह इति वावैतदाह । अमीमदन्त पितरः सोम्या इत्यभि प्रपद्यन्ते । अमीमदन्त पितरोऽथ त्वाऽभि प्रपद्यामह इति वावैतदाह । अपः परिषिञ्चति । मार्जयत्येवैनान् ॥ १। ६। ९। ९॥

७० अथो तर्पयत्येव । तृप्यति प्रजया पशुभिः । य एवं वेद । अप बर्हिषावनूयाजौ यजति । प्रजा वै बर्हिः । प्रजा एव मृत्योरुथ्सृजति । चतुरः प्रयाजान्, यजति ।

द्वावनूयाजौ । षट्थ्संपद्यन्ते । षड्वा ऋतवः ॥ १। ६। ९। १०॥

७१ ऋतूनेव प्रीणाति । न पत्न्यन्वास्ते । न संयाजयन्ति । यत्पत्न्यन्वासीत । यथ्संयाजयेयुः । प्रमायुका स्यात् । तस्मान्नान्वास्ते । न संयाजयन्ति । पत्नियै गोपीथाय ॥ १। ६। ९। ११॥ होतारमाज्यभागौ यजति संततमव द्यति व्यावृत्त्यै बर्हिषदो यजति तमेव तद्यजत्यनु निष्क्रामन्त्याहैनानृतवो नव च ॥ ९॥

७२ प्रतिपूरुषमेककपालान्निर्वपति । जाता एव प्रजा रुद्रान्निरवदयते । एकमतिरिक्तम् । जनिष्यमाणा एव प्रजा रुद्रान्निरवदयते । एककपाला भवन्ति । एकधैव रुद्रं निरवदयते । नाभिघारयति । यदभिघारयेत् । अन्तरवचारिणꣳ रुद्रं कुर्यात् । एकोल्मुकेन यन्ति ॥ १। ६। १०। १॥

७३ तद्धि रुद्रस्य भागधेयम् । इमां दिशं यन्ति । एषा वै रुद्रस्य दिक् । स्वायामेव दिशि रुद्रं निरवदयते । रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत । असौ ते पशुरिति निर्दिशेद्यं द्विष्यात् । यमेव द्वेष्टि । तमस्मै पशुं निर्दिशति । यदि न द्विष्यात् । आखुस्ते पशुरिति ब्रूयात् ॥
१। ६। १०। २॥

७४ न ग्राम्यान्पशून् हिनस्ति । नारण्यान् । चतुष्पथे जुहोति । एष वा अग्नीनां पड्बीशो नाम । अग्निवत्येव जुहोति । मध्यमेन पर्णेन जुहोति । स्रुग्घ्येषा । अथो खलु । अन्तमेनैव होतव्यम् । अन्तत एव रुद्रं निरवदयते ॥ १। ६। १०। ३॥

७५ एष ते रुद्र भागः सह स्वस्राऽम्बिकयेत्याह । शरद्वा अस्याम्बिका स्वसा । तया वा एष हिनस्ति । यꣳ हिनस्ति । तयैवैनꣳ सह शमयति । भेषजं गव इत्याह । यावन्त एव ग्राम्याः पशवः । तेभ्यो भेषजं करोति । अवाम्ब रुद्रमदिमहीत्याह । आशिषमेवैतामाशास्ते ॥
१। ६। १०। ४॥

७६ त्र्यम्बकं यजामह इत्याह । मृत्योर्मुक्षीय माऽमृतादिति वावैतदाह । उत्किरन्ति । भगस्य लीप्सन्ते । मूते कृत्वाऽऽसजन्ति । यथा जनं यतेऽवसं करोति । तादृगेव तत् । एष ते रुद्र भाग इत्याह निरवत्त्यै । अप्रतीक्षमायन्ति । अपः परिषिञ्चति । रुद्रस्यान्तर्हित्यै । प्र वा एतेऽस्माल्लोकाच्च्यवन्ते । ये त्र्यम्बकैश्चरन्ति । आदित्यं चरुं पुनरेत्य निर्वपति । इयं वा अदितिः । अस्यामेव प्रतितिष्ठन्ति ॥ १। ६। १०। ५॥
यन्ति ब्रूयान्निरवदयते शास्ते सिञ्चति षड्च ॥ १०॥

अनुमत्यै वैश्वदेवेन ताः सृष्टास्त्रिवृत्प्रजापतिः सवितोत्तरस्यां देवासुराः सोऽग्निर्यत्पत्नी वैश्वदेवेन ता वरुणप्रघासैरग्नये देवेभ्यः प्रतिपूरुषं दश ॥ १०॥

अनुमत्यै प्रथमजो वथ्सो बहुरूपा हि पशवस्तस्मात्पृथमात्रं यदग्नयेऽनीकवत उद्धारं वा अग्नये देवेभ्य ऋतूनेव षट्थ्सप्ततिः ॥ ७६॥

अनुमत्यै प्रतितिष्ठंति ॥

## प्रथमाष्टके सप्तमः प्रपाठकः ७

१ एतद्ब्राह्मणान्येव पञ्च हवीꣳषि । अथेन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं निर्वपति । संवथ्सरो वा इन्द्रा शुनासीरः । संवथ्सरेणैवास्मा अन्नमवरुन्धे । वायव्यं पयो भवति । वायुर्वै वृष्ट्यै प्रदापयिता । स एवास्मै वृष्टिं प्रदापयति । सौर्य एककपालो भवति । सूर्येण वा अमुष्मिं ल्लोके वृष्टिर्धृता । स एवास्मै वृष्टिं नियच्छति ॥ १। ७। १। १॥

२ द्वादशगवꣳ सीरं दक्षिणा समृद्ध्यै । देवासुराः संयत्ता आसन् । ते देवा अग्निमब्रुवन् । त्वया वीरेणासुरानभिभवामेति । सोऽब्रवीत् । त्रेधाऽहमात्मानं विकरिष्य इति । स त्रेधाऽऽत्मानं व्यकुरुत । अग्निं तृतीयम् । रुद्रं तृतीयम् । वरुणं तृतीयम् ॥ १। ७। १। २॥

३ सोऽब्रवीत् । क इदं तुरीयमिति । अहमितीन्द्रोऽब्रवीत् । सं तु सृजावहा इति । तौ समसृजेताम् । स इन्द्रस्तुरीयमभवत् । यदिन्द्रस्तुरीयमभवत् । तदिन्द्रतुरीयस्यैन्द्रतुरीयत्वम् । ततो वै देवा व्यजयन्त । यदिन्द्रतुरीयं निरुप्यते विजित्यै ॥ १। ७। १। ३॥

४ वहिनी धेनुर्दक्षिणा । यद्वहिनी । तेनाऽऽग्नेयी । यद्गौः । तेन रौद्री । यद्धेनुः । तेनैन्द्री । यथ्स्त्री सती दान्ता । तेन वारुणी समृद्ध्यै । प्रजापतिर्यज्ञमसृजत ॥ १। ७। १। ४॥

५ तꣳ सृष्टꣳ रक्षाग्स्यजिघाꣳसन् । स एताः प्रजापतिरात्मनो देवता निरमिमीत । ताभिर्वै स दिग्भ्यो रक्षाꣳसि प्राणुदत । यत्पञ्चावत्तीयं जुहोति । दिग्भ्य एव तद्यजमानो रक्षाꣳसि प्रणुदते । समूढꣳ रक्षः संदग्धꣳ रक्ष इत्याह । रक्षाग्स्येव संदहति । अग्नये रक्षोघ्ने स्वाहेत्याह । देवताभ्य एव विजिग्यानाभ्यो भागधेयं करोति । प्रष्टिवाही रथो दक्षिणा समृद्ध्यै ॥ १। ७। १। ५॥

६ इन्द्रो वृत्रꣳ हत्वा । असुरान्पराभाव्य । नमुचिमासुरं नालभत । तꣳ शच्याऽगृह्णात् । तौ समलभेताम् । सोऽस्मादभिशुनतरोऽभवत् । सोऽब्रवीत् । संधाꣳ संदधावहै । अथ त्वाऽव स्रक्ष्यामि । न मा शुष्केण नार्द्रेण हनः ॥ १। ७। १। ६॥

७ न दिवा न नक्तमिति । स एतमपां फेनमसिञ्चत् । न वा एष शुष्को नार्द्रो
व्युष्टाऽऽसीत् । अनुदितः सूर्यः । न वा एतद्दिवा न नक्तम् । तस्यैतस्मि३ꣳल्लोके ।
अपां फेनेन शिर उदवर्तयत् । तदेनमन्ववर्तत । मित्रद्रुगिति ॥ १। ७। १। ७॥
८ स एतानपामार्गानजनयत् । तानजुहोत् । तैर्वै स रक्षाग्स्यपाहत । यदपामार्गहोमो
भवति । रक्षसामपहत्यै । एकोल्मुकेन यन्ति । तद्धि रक्षसां भागधेयम् । इमां दिशं
यन्ति । एषा वै रक्षसां दिक् । स्वायामेव दिशि रक्षाꣳसि हन्ति ॥ १। ७। १। ८॥
९ स्वकृत इरिणे जुहोति प्रदरे वा । एतद्वै रक्षसामायतनम् । स्व एवायतने रक्षाꣳसि
हन्ति । पर्णमयेन स्रुवेण जुहोति । ब्रह्म वै पर्णः । ब्रह्मणैव रक्षाꣳसि हन्ति । देवस्य
त्वा सवितुः प्रसव इत्याह । सवितृप्रसूत एव रक्षाꣳसि हन्ति । हतꣳ रक्षोऽवधिष्म
रक्ष इत्याह । रक्षसाग् स्तृत्यै । यद्वस्ते तद्दक्षिणा निरवत्त्यै । अप्रतीक्षमायन्ति ।
रक्षसामन्तर्हित्यै ॥ १। ७। १। ९॥ यच्छति वरुणं तृतीयं विजित्या असृजत समृद्ध्यै
हनो मित्रद्रुगिति हन्ति स्तृत्यै त्रीणि च ॥ १॥
१० धात्रे पुरोडाशं द्वादशकपालं निर्वपति । संवथ्सरो वै धाता । संवथ्सरेणैवास्मै
प्रजाः प्रजनयति । अन्वेवास्मा अनुमतिर्मन्यते । राते राका । प्र सिनीवाली जनयति
। प्रजास्वेव प्रजातासु कुह्वा वाचं दधाति । मिथुनौ गावौ दक्षिणा समृद्ध्यै ।
आग्नावैष्णवमेकादशकपालं निर्वपति । ऐन्द्रावैष्णवमेकादशकपालम् ॥ १। ७। २। १॥
११ वैष्णवं त्रिकपालम् । वीर्यं वा अग्निः । वीर्यमिन्द्रः । वीर्यं विष्णुः । प्रजा एव
प्रजाता वीर्ये प्रतिष्ठापयति । तस्मात्प्रजा वीर्यावतीः । वामन ऋषभो वही दक्षिणा ।
यद्वही । तेनाग्नेयः । यदृषभः ॥
१। ७। २। २॥
१२ तेनैन्द्रः । यद्वामनः । तेन वैष्णवः समृद्ध्यै । अग्नीषोमीयमेकादशकपालं निर्वपति
। इन्द्रासोमीयमेकादशकपालम् । सौम्यं चरुम् । सोमो वै रेतोधाः । अग्निः प्रजानां
प्रजनयिता । वृद्धानामिन्द्रः प्रदापयिता । सोम एवास्मै रेतो दधाति ॥ १। ७। २। ३॥
१३ अग्निः प्रजां प्रजनयति । वृद्धामिन्द्रः प्रयच्छति । बभ्रुर्दक्षिणा समृद्ध्यै । सोमापौष्णं
चरुं निर्वपति । ऐन्द्रापौष्णं चरुम् । सोमो वै रेतोधाः । पूषा पशूनां प्रजनयिता ।
वृद्धानामिन्द्रः प्रदापयिता । सोम एवास्मै रेतो दधाति । पूषा पशून्प्रजनयति ॥
१४ वृद्धानिन्द्रः प्रयच्छति । पौष्णश्चरुर्भवति । इयं वै पूषा । अस्यामेव प्रतितिष्ठति
। श्यामो दक्षिणा समृद्ध्यै । बहु वै पुरुषो मेध्यमुपगच्छति । वैश्वानरं द्वादशकपालं

निर्वपति । संवथ्सरो वा अग्निर्वैश्वानरः । संवथ्सरेणैवैनग्ग् स्वदयति । हिरण्यं दक्षिणा ॥ १। ७। २। ५॥

१५ पवित्रं वै हिरण्यम् । पुनात्येवैनम् । बहु वै राजन्योऽनृतं करोति । उपजाम्यै हरते । जिनाति ब्राह्मणम् । वदत्यनृतम् । अनृते खलु वै क्रियमाणे वरुणो गृह्णाति । वारुणं यवमयं चरुं निर्वपति । वरुणपाशादेवैनं मुञ्चति । अश्वो दक्षिणा । वारुणो हि देवतयाऽश्वः समृद्ध्यै ॥ १। ७। २। ६॥ ऐन्द्रावैष्णवमेकादशकपालं यदृषभो दधाति पूषा पशून्प्रजनयति हिरण्यं दक्षिणा दक्षिणैकं च ॥ २॥

१६ रत्निनामेतानि हवीꣳषि भवन्ति । एते वै राष्ट्रस्य प्रदातारः । एतेऽपादातारः । य एव राष्ट्रस्य प्रदातारः । येऽपादातारः । त एवास्मै राष्ट्रं प्रयच्छन्ति । राष्ट्रमेव भवति । यथ्समाहृत्य निर्वपेत् । अरत्निनः स्युः । यथायथं निर्वपति रत्नित्वाय ॥ १। ७। ३। १॥

१७ यथ्सद्यो निर्वपेत् । यावतीमेकेन हविषाऽऽशिषमव रुन्धे । तावतीमवरुन्धीत । अन्वहं निर्वपति । भूयसीमेवाशिषमवरुन्धे । भूयसो यज्ञक्रतूनुपैति । बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे । मुखत एवास्मै ब्रह्म स२ꣳश्यति । अथो ब्रह्मन्नेव क्षत्रमन्वारम्भयति । शितिपृष्ठो दक्षिणा समृद्ध्यै ॥ १। ७। ३। २॥

१८ ऐन्द्रमेकादशकपालꣳ राजन्यस्य गृहे । इन्द्रियमेवावरुन्धे । ऋषभो दक्षिणा समृद्ध्यै । आदित्यं चरुं महिष्यै गृहे । इयं वा अदितिः । अस्यामेव प्रतितिष्ठति । धेनुर्दक्षिणा समृद्ध्यै । भगाय चरुं वावातायै गृहे । भगमेवास्मिन्दधाति । विचित्तगर्भा पष्ठौही दक्षिणा समृद्ध्यै ॥ १। ७। ३। ३॥

१९ नैरृतं चरुं परिवृत्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नम् । पाप्मानमेव निरृतिं निरवदयते । कृष्णा कूटा दक्षिणा समृद्ध्यै । आग्नेयमष्टाकपालꣳ सेनान्यो गृहे । सेनामेवास्य स२ꣳश्यति । हिरण्यं दक्षिणा समृद्ध्यै । वारुणं दशकपालꣳ सूतस्य गृहे । वरुणसवमेवावरुन्धे । महानिरष्टो दक्षिणा समृद्ध्यै । मारुतꣳ सप्तकपालं ग्रामण्यो गृहे ॥ १। ७। ३। ४॥

२० अन्नं वै मरुतः । अन्नमेवावरुन्धे । पृश्निर्दक्षिणा समृद्ध्यै । सावित्रं द्वादशकपालं क्षत्तुर्गृहे प्रसूत्यै । उपध्वस्तो दक्षिणा समृद्ध्यै । आश्विनं द्विकपालꣳ संग्रहीतुर्गृहे । अश्विनौ वै देवानां भिषजौ । ताभ्यामेवास्मै भेषजं करोति । सवात्यौ दक्षिणा समृद्ध्यै । पौष्णं चरुं भागदुघस्य गृहे ॥ १। ७। ३। ५॥

२१ अन्नं वै पूषा । अन्नमेवावरुन्धे । श्यामो दक्षिणा समृद्ध्यै । रौद्रं गावीधुकं

चरुमक्षावापस्य गृहे । अन्तत एव रुद्रं निरवदयते । शबल उद्वारो दक्षिणा समृद्ध्यै । द्वादशैतानि हवीꣳषि भवन्ति । द्वादश मासाः संवथ्सरः । संवथ्सरेणैवास्मै राष्ट्रमवरुन्धे । राष्ट्रमेव भवति ॥ १। ७। ३। ६॥
२२ यन्न प्रतिनिर्वपेत् । रत्निन आशिषोऽवरुन्धीरन्न् । प्रतिनिर्वपति । इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालम् । इन्द्रायाꣳहोमुचे । आशिष एवावरुन्धे । अयन्नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्याह । आशिषमेवैतामाशास्ते । मैत्राबार्हस्पत्यं भवति । श्वेतायै श्वेतवथ्सायै दुग्धे ॥ १। ७। ३। ७॥
२३ बार्हस्पत्ये मैत्रमपि दधाति । ब्रह्म चैवास्मै क्षत्रं च समीची दधाति । अथो ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति । बार्हस्पत्येन पूर्वेण प्रचरति । मुखत एवास्मै ब्रह्म सꣳश्यति । अथो ब्रह्मन्नेव क्षत्रमन्वारम्भयति । स्वयंकृता वेदिर्भवति । स्वयंदिनं बर्हिः । स्वयंकृत इध्मः । अनभिजितस्याभिजित्यै । तस्माद्राज्ञामरण्यमभिजितम् । सैव श्वेता श्वेतवथ्सा दक्षिणा समृद्ध्यै ॥ १। ७। ३। ८॥ रत्नित्वाय समृद्ध्यै पष्ठौही दक्षिणा समृद्ध्यै ग्रामण्यो गृहे भागदुघस्य गृहे भवति दुग्धेऽभिजित्यै द्वे च ॥ ३॥
२४ देवसुवामेतानि हवीꣳषि भवन्ति । एतावन्तो वै देवानाꣳसवाः । त एवास्मै सवान्प्रयच्छन्ति । त एनꣳ सुवन्ते । अग्निरेवैनं गृहपतीनाꣳ सुवते । सोमो वनस्पतीनाम् । रुद्रः पशूनाम् । बृहस्पतिर्वाचाम् । इन्द्रो ज्येष्ठानाम् । मित्रः सत्यानाम् ॥ १। ७। ४। १॥
२५ वरुणो धर्मपतीनाम् । एतदेव सर्वं भवति । सविता त्वा प्रसवानाꣳसुवतामिति हस्तं गृह्णाति प्रसूत्यै । ये देवा देवसुवः स्थेत्याह । यथा यजुरेवैतत् । महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्याह । आशिषमेवैतामाशास्ते । एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेत्याह । तस्माथ्सोमराजानो ब्राह्मणाः । प्रतित्यन्नाम राज्यमधायीत्याह ॥ १। ७। ४। २॥
२६ राज्यमेवास्मिन् प्रतिदधाति । स्वां तनुवं वरुणो अशिश्रेदित्याह । वरुणसवमेवावरुन्धे । शुचेर्मित्रस्य व्रत्या अभूमेत्याह । शुचिमेवैनं व्रत्यं करोति । अमन्महि महत ऋतस्य नामेत्याह । मनुत एवैनम् । सर्वे व्राता वरुणस्याभूवन्नित्याह । सर्वव्रातमेवैनं करोति । वि मित्र एवैररातिमतारीदित्याह ॥ १। ७। ४। ३॥
२७ अरातिमेवैनं तारयति । असूषुदन्त यज्ञिया ऋतेनेत्याह । स्वदयत्येवैनम् । व्युत्रितो जरिमाणं न आनडित्याह । आयुरेवास्मिन्दधाति । द्वाभ्यां विमृष्टे । द्विपाद्यजमानः

प्रतिष्ठित्यै । अग्नीषोमीयस्य चैकादशकपालस्य देवसुवां च हविषामग्नये स्विष्टकृते समवद्यति । देवताभिरेवैनमुभयतः परिगृह्णाति । विष्णुक्रमान्क्रमते । विष्णुरेव भूत्वेमान् लोकानभिजयति ॥ १। ७। ४। ४॥ सत्यानामधायीत्याहातारीदित्याह क्रमत एकं च ॥ ४॥

२८ अर्थेतः स्थेति जुहोति । आहुत्यैवैना निष्क्रीय गृह्णाति । अथो हविष्कृतानामेवाभिघृतानां गृह्णाति । वहन्तीनां गृह्णाति । एता वा अपाꣳ राष्ट्रम् । राष्ट्रमेवास्मै गृह्णाति । अथो श्रियमेवैनमभिवहन्ति । अपां पतिरसीत्याह । मिथुनमेवाकः । वृषाऽस्यूर्मिरित्याह ॥ १। ७। ५। १॥

२९ ऊर्मिमन्तमेवैनं करोति । वृषसेनोऽसीत्याह । सेनामेवास्य सꣳश्यति । व्रजक्षितः स्थेत्याह । एता वा अपां विशः । विशमेवास्मै पर्यूहति । मरुतामोजः स्थेत्याह । अन्नं वै मरुतः । अन्नमेवावरुन्धे । सूर्यवर्चसः स्थेत्याह ॥ १। ७। ५। २॥

३० राष्ट्रमेव वर्चस्व्यकः । सूर्यत्वचसः स्थेत्याह । सत्यं वा एतत् । यद्वर्षति । अनृतं यदा तपति वर्षति । सत्यानृते एवावरुन्धे । नैनꣳ सत्यानृते उदिते हिꣳस्तः । य एवं वेद । मान्दाः स्थेत्याह । राष्ट्रमेव ब्रह्मवर्चस्यकः ॥ १। ७। ५। ३॥

३१ वाशाः स्थेत्याह । राष्ट्रमेव वश्यकः । शक्करीः स्थेत्याह । पशवो वै शक्करीः । पशूनेवावरुन्धे । विश्वभृतः स्थेत्याह । राष्ट्रमेव पयस्व्यकः । जनभृतः स्थेत्याह । राष्ट्रमेवेन्द्रियाव्यकः । अग्नेस्तेजस्याः स्थेत्याह ॥ १। ७। ५। ४॥

३२ राष्ट्रमेव तेजस्व्यकः । अपामोषधीनाꣳ रसः स्थेत्याह । राष्ट्रमेव मधव्यमकः । सारस्वतं ग्रहं गृह्णाति । एषा वा अपां पृष्ठम् । यत्सरस्वती । पृष्ठमेवैनꣳ समानानां करोति । षोडशभिर्गृह्णाति । षोडशकलो वै पुरुषः । यावानेव पुरुषः । तस्मिन्वीर्यं दधाति । षोडशभिर्जुहोति षोडशभिर्गृह्णाति । द्वात्रिꣳशथ्संपद्यन्ते । द्वात्रिꣳशदक्षराऽनुष्टुक् । वागनुष्टुप् सर्वाणि छन्दाꣳसि । वाचैवैनꣳ सर्वेभिश्छन्दोभिरभिषिञ्चति ॥ १। ७। ५। ५॥ ऊर्मिरित्याह सूर्यवर्चसः स्थेत्याह ब्रह्मवर्चस्यकस्तेजस्याः स्थेत्याहैव पुरुषः षट्च ॥ ५॥

३३ देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वमित्याह । ब्रह्मणैवैनाः सꣳसृजति । अनाधृष्टाः सीदतेत्याह । ब्रह्मणैवैनाः सादयति । अन्तरा होतुश्च धिष्णियं ब्राह्मणाच्छꣳसिनश्च सादयति । आग्नेयो वै होता । ऐन्द्रो ब्राह्मणाच्छꣳसी । तेजसा चैवेन्द्रियेण चोभयतो राष्ट्रं परिगृह्णाति । हिरण्येनोत्पुनाति । आहुत्यै हि

पवित्राभ्यामुत्पुनन्ति व्यावृत्त्यै ॥ १। ७। ६। १॥
३४ शतमानं भवति । शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति । अनिभृष्टमसीत्याह । अनिभृष्टग्ग् ह्येतत् । वाचो बन्धुरित्याह । वाचो ह्येष बन्धुः । तपोजा इत्याह । तपोजा ह्येतत् । सोमस्य दात्रमसीत्याह ॥ १। ७। ६। २॥
३५ सोमस्य ह्येतद्दात्रम् । शुक्रा वः शुक्रेणोत्पुनामीत्याह । शुक्रा ह्यापः । शुक्रँ हिरण्यम् । चन्द्राश्चन्द्रेणेत्याह । चन्द्रा ह्यापः । चन्द्रँ हिरण्यम् । अमृता अमृतेनेत्याह । अमृता ह्यापः । अमृतँ हिरण्यम् ॥ १। ७। ६। ३॥
३६ स्वाहा राजसूयायेत्याह । राजसूयाय ह्येना उत्पुनाति । सधमादो द्युम्निनीरूर्ज एता इति वारुण्यर्चा गृह्णाति । वरुणसवमेवावरुन्धे । एकया गृह्णाति । एकधैव यजमाने वीर्यं दधाति । क्षत्रस्योल्बमसि क्षत्रस्य योनिरसीति तार्प्यं चोष्णीषं च प्रयच्छति सयोनित्वाय । एकशतेन दर्भपुंजीलैः पवयति । शतायुर्वै पुरुषः शतवीर्यः । आत्मैकशतः ॥ १। ७। ६। ४॥
३७ यावानेव पुरुषः । तस्मिन्वीर्यं दधाति । दध्याशयति । इन्द्रियमेवावरुन्धे । उदुम्बरमाशयति । अन्नाद्यस्यावरुद्ध्यै । शष्पाण्याशयति । सुराबलिमेवैनं करोति । आविद एता भवन्ति । आविदमेवैनं गमयन्ति ॥ १। ७। ६। ५॥
३८ अग्निरेवैनं गार्हपत्येनावति । इन्द्र इन्द्रियेण । पूषा पशुभिः । मित्रावरुणौ प्राणापानाभ्याम् । इन्द्रो वृत्राय वज्रमुदयच्छत् । स दिवमलिखत् । सोऽर्यम्णः पन्था अभवत् । स आविन्ने द्यावापृथिवी धृतव्रते इति द्यावापृथिवी उपाधावत् । स आभ्यामेव प्रसूत इन्द्रो वृत्राय वज्रं प्राहरत् । आविन्ने द्यावापृथिवी धृतव्रते इति यदाह ॥ १। ७। ६। ६॥
३९ आभ्यामेव प्रसूतो यजमानो वज्रं भ्रातृव्याय प्रहरति । आविन्ना देव्यदितिर्विश्वरूपीत्याह । इयं वै देव्यदितिर्विश्वरूपी । अस्यामेव प्रतितिष्ठति । आविन्नोऽयमसावामुष्यायणोऽस्यां विश्यस्मिन्राष्ट्र इत्याह । विशैवैनँ राष्ट्रेण समर्धयति । महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्याह । आशिषमेवैतामाशास्ते । एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाँ राजेत्याह । तस्माथ्सोमराजानो ब्राह्मणाः ॥ १। ७। ६। ७॥
४० इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति धनुः प्रयच्छति विजित्यै । शत्रुबाधनाः स्थेतीषून् । शत्रूनेवास्य बाधन्ते । पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पातेत्याह । तिस्रो

वै शरव्याः । प्रतीची तिरश्च्यनूची । ताभ्य एवैनं पान्ति । दिग्भ्यो मा पातेत्याह । दिग्भ्य एवैनं पान्ति । विश्वाभ्यो मा नाष्ट्राभ्यः पातेत्याह । अपरिमितादेवैनं पान्ति । हिरण्यवर्णावुषसां विरोक इति त्रिष्टुभा बाहू उद्गृह्णाति । इन्द्रियं वै वीर्यं त्रिष्टुक् । इन्द्रियमेव वीर्यमुपरिष्टादात्मन्धत्ते ॥ १। ७। ६। ८॥ व्यावृत्त्यै दात्रमसीत्याहामृतꣳ हिरण्यमेकशतो गमयन्त्याह ब्राह्मणा नाष्ट्राभ्यः पातेत्याह चत्वारि च ॥ ६॥

४१ दिशो व्यास्थापयति । दिशामभिजित्यै । यदनुप्रक्रामेत् । अभि दिशो जयेत् । उत्तु माद्येत् । मनसाऽनु प्रक्रामति । अभि दिशो जयति । नोन्माद्यति । समिधमा तिष्ठेत्याह । तेज एवावरुन्धे ॥ १। ७। ७। १॥

४२ उग्रा मा तिष्ठेत्याह । इन्द्रियमेवावरुन्धे । विराज मा तिष्ठेत्याह । अन्नाद्यमेवावरुन्धे । उदीची मा तिष्ठेत्याह । पशूनेवावरुन्धे । ऊर्ध्वा मा तिष्ठेत्याह । सुवर्गमेव लोकमभिजयति । अनूज्जिहीते । सुवर्गस्य लोकस्य समष्ट्यै ॥ १। ७। ७। २॥

४३ मारुत एष भवति । अन्नं वै मरुतः । अन्नमेवावरुन्धे । एकविꣳशतिकपालो भवति प्रतिष्ठित्यै । योऽरण्येऽनुवाक्यो गणः । तं मध्यत उपदधाति । ग्राम्यैरेव पशुभिरारण्यान् पशून् परिगृह्णाति । तस्माद्ग्राम्यैः पशुभिरारण्याः पशवः परिगृहीताः । पृथिवैन्यः । अभ्यषिच्यत ॥ १। ७। ७। ३॥

४४ स राष्ट्रं नाभवत् । स एतानि पार्थान्यपश्यत् । तान्यजुहोत् । तैर्वै स राष्ट्रमभवत् । यत्पार्थानि जुहोति । राष्ट्रमेव भवति । बार्हस्पत्यं पूर्वेषामुत्तमं भवति । ऐन्द्रमुत्तरेषां प्रथमम् । ब्रह्म चैवास्मै क्षत्रं च समीची दधाति । अथो ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति ॥ १। ७। ७। ४॥

४५ षट्पुरस्तादभिषेकस्य जुहोति । षडुपरिष्टात् । द्वादश संपद्यन्ते । द्वादश मासाः संवथ्सरः । संवथ्सरः खलु वै देवानां पूः । देवानामेव पुरं मध्यतो व्यवसर्पति । तस्य न कुतश्चनोपाव्याधो भवति । भूतानामवेष्टीर्जुहोति । अत्रात्र वै मृत्युर्जायते । यत्र यत्रैव मृत्युर्जायते । तत एवैनमवयजते । तस्माद्राजसूयेनेजानः सर्वमायुरेति । सर्वे ह्यस्य मृत्यवोऽवेष्टाः । तस्माद्राजसूयेनेजानो नाभिचरितवै । प्रत्यगेनमभिचारः स्तृणुते ॥ १। ७। ७। ५॥ रुन्धे समष्ट्या असिच्यत स्थापयति जायते पञ्च च ॥ ७॥

४६ सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादिति शार्दूलचर्मोपस्तृणाति । यैव सोमे त्विषिः । या शार्दूले । तामेवावरुन्धे । मृत्योर्वा एष वर्णः । यच्छार्दूलः । अमृतꣳ हिरण्यम् । अमृतमसि मृत्योर्मा पाहीति हिरण्यमुपास्यति । अमृतमेव मृत्योरन्तर्धत्ते ।

शतमानं भवति ॥
१। ७। ८। १॥
४७ शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति । दिद्योन्मा पाहीत्युपरिष्टादधि निदधाति । उभयत एवास्मै शर्म दधाति । अवेष्टा दन्दशूका इति क्लीबꣳ सीसेन विध्यति । दन्दशूकानेवावयजते । तस्मात्क्लीबं दन्दशूका दꣳ शुकाः । निरस्तं नमुचेः शिर इति लोहितायसं निरस्यति । पाप्मानमेव नमुचिं निरवदयते । प्राणा आत्मनः पूर्वेऽभिषिच्या इत्याहुः ॥ १। ७। ८। २॥
४८ सोमो राजा वरुणः । देवा धर्मसुवश्च ये । ते ते वाचꣳ सुवन्तां ते ते प्राणꣳ सुवन्तामित्याह । प्राणानेवात्मनः पूर्वानभिषिञ्चति । यद्ब्रूयात् । अग्नेस्त्वा तेजसाऽभिषिञ्चामीति । तेजस्व्येव स्यात् । दुश्चर्मा तु भवेत् । सोमस्य त्वा द्युम्नेनाभिषिञ्चामीत्याह । सौम्यो वै देवतया पुरुषः ॥ १। ७। ८। ३॥
४९ स्वयैवैनं देवतयाऽभिषिञ्चति । अग्नेस्तेजसेत्याह । तेज एवास्मिन्दधाति । सूर्यस्य वर्चसेत्याह । वर्च एवास्मिन्दधाति । इन्द्रस्येन्द्रियेणेत्याह । इन्द्रियमेवास्मिन्दधाति । मित्रावरुणयोर्वीर्येणेत्याह । वीर्यमेवास्मिन्दधाति । मरुतामोजसेत्याह ॥ १। ७। ८। ४॥
५० ओज एवास्मिन्दधाति । क्षत्राणां क्षत्रपतिरसीत्याह । क्षत्राणामेवैनं क्षत्रपतिं करोति । अतिदिवस्पाहीत्याह । अत्यन्यान्पाहीति वावैतदाह । समाववृत्रन्नधरागुदीचीरित्याह । राष्ट्रमेवास्मिन्ध्रुवमकः । उच्छेषणेन जुहोति । उच्छेषणभागो वै रुद्रः । भागधेयेनैव रुद्रं निरवदयते ॥ १। ७। ८। ५॥
५१ उदङ्ङेत्याग्नीध्रे जुहोति । एषा वै रुद्रस्य दिक् । स्वायामेव दिशि रुद्रं निरवदयते । रुद्र यत्ते क्रयीपरं नामेत्याह । यद्वा अस्य क्रयीपरं नाम । तेन वा एष हिनस्ति । यꣳ हिनस्ति । तेनैवैनꣳ सह शमयति । तस्मै हुतमसि यमेष्टमसीत्याह । यमादेवास्य मृत्युमवयजते ॥ १। ७। ८। ६॥
५२ प्रजापते न त्वदेतान्यन्य इति तस्यै गृहे जुहुयात् । यां कामयेत राष्ट्रमस्यै प्रजा स्यादिति । राष्ट्रमेवास्यै प्रजा भवति । पर्णमयेनाध्वर्युरभिषिञ्चति । ब्रह्मवर्चसमेवास्मिन्त्विषिं दधाति । औदुम्बरेण राजन्यः । ऊर्जमेवास्मिन्नन्नाद्यं दधाति । आश्वत्थेन वैश्यः । विशमेवास्मिन्पुष्टिं दधाति । नैयग्रोधेन जन्यः । मित्राण्येवास्मै कल्पयति । अथो प्रतिष्ठित्यै ॥ १। ७। ८। ७॥ भवत्याहुः पुरुष ओजसेत्याह निरवदयते यजते जन्यो द्वे च ॥ ८॥

५३ इन्द्रस्य वज्रोसि वार्त्रघ्न इति रथमुपावहरति विजित्यै । मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मीत्याह । ब्रह्मणैवैनं देवताभ्यां युनक्ति । प्रष्टिवाहिनं युनक्ति । प्रष्टिवाही वै देवरथः । देवरथमेवास्मै युनक्ति । त्रयोऽश्वा भवन्ति । रथश्चतुर्थः । द्वौ सव्येष्ठसारथी । षट्थ्संपद्यन्ते ॥ १। ७। ९। १॥
५४ षड्वा ऋतवः । ऋतुभिरेवैनं युनक्ति । विष्णुक्रमान्क्रमते । विष्णुरेव भूत्वेमान् लोकानभिजयति । यः, क्षत्रियः प्रतिहितः । सोऽन्वारभते । राष्ट्रमेव भवति । त्रिष्टुभाऽन्वारभते । इन्द्रियं वै त्रिष्टुक् । इन्द्रियमेव यजमाने दधाति ॥ १। ७। ९। २॥
५५ मरुतां प्रसवे जेषमित्याह । मरुद्भिरेव प्रसूत उज्जयति । आप्तं मन इत्याह । यदेव मनसैप्सीत् । तदापत् । राजन्यं जिनाति । अनाक्रान्त एवाक्रमते । वि वा एष इन्द्रियेण वीर्येणर्ध्यते । यो राजन्यं जिनाति । समहमिन्द्रियेण वीर्येणेत्याह ॥ १। ७। ९। ३॥
५६ इन्द्रियमेव वीर्यमात्मन्धत्ते । पशूनां मन्युरसि तवेव मे मन्युर्भूयादिति वाराही उपानहावुपमुञ्चते । पशूनां वा एष मन्युः । यद्वराहः । तेनैव पशूनां मन्युमात्मन्धत्ते । अभि वा इयँ सुषुवाणं कामयते । तस्येश्वरेन्द्रियं वीर्यमादातोः । वाराही उपानहावुपमुञ्चते । अस्या एवान्तर्धत्ते । इन्द्रियस्य वीर्यस्यानात्यै ॥
१। ७। ९। ४॥
५७ नमो मात्रे पृथिव्या इत्याहाहिँसायै । इयदस्यायुरस्यायुर्मे धेहीत्याह । आयुरेवात्मन्धत्ते । ऊर्गस्यूर्जं मे धेहीत्याह । ऊर्जमेवात्मन्धत्ते । युङ्ङसि वर्चोऽसि वर्चो मयि धेहीत्याह । वर्च एवात्मन्धत्ते । एकधा ब्रह्मण उपहरति । एकधैव यजमान आयुरूर्जं वर्चो दधाति । रथविमोचनीया जुहोति प्रतिष्ठित्यै ॥ १। ७। ९। ५॥
५८ त्रयोऽश्वा भवन्ति । रथश्चतुर्थः । तस्माच्चतुर्जुहोति । यदुभौ सहावतिष्ठेताम् । समानं लोकमियाताम् । सह संग्रहीत्रा रथवाहने रथमादधाति । सुवर्गादेवैनं लोकादन्तर्दधाति । हँसः शुचिषदित्यादधाति । ब्रह्मणैवैनमुपावहरति । ब्रह्मणाऽऽदधाति । अतिच्छन्दसाऽऽदधाति । अतिच्छन्दा वै सर्वाणि छन्दाँसि । सर्वेभिरेवैनं छन्दोभिरादधाति । वर्ष्म वा एषा छन्दसाम् । यदतिच्छन्दाः । यदतिच्छन्दसा दधाति । वर्ष्मैवैनँ समानानां करोति ॥ १। ७। ९। ६॥ पद्यन्ते दधाति वीर्येणेत्याहानात्यै प्रतिष्ठित्यै ब्रह्मणाऽऽदधाति सप्त च ॥ ९॥
५९ मित्रोऽसि वरुणोऽसीत्याह । मैत्रं वा अहः । वारुणी रात्रिः ।

अहोरात्राभ्यामेवैनमुपावहरति । मित्रोऽसि वरुणोऽसीत्याह । मैत्रो वै दक्षिणः । वारुणः सव्यः । वैश्वदेव्यामिक्षा । स्वमेवैनौ भागधेयमुपावहरति । समहं विश्वैर्देवैरित्याह ॥ १। ७। १०। १॥
६० वैश्वदेव्यो वै प्रजाः । ता एवाद्याः कुरुते । क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसीत्यधीवासमास्तृणाति सयोनित्वाय । स्योना मासीद सुषदा मासीदेत्याह । यथा यजुरेवैतत् । मा त्वा हिꣳसीन्मा मा हिꣳसीदित्याहाहिꣳसायै । निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुरित्याह । साम्राज्यमेवैनꣳसुक्रतुं करोति । ब्रह्मा ३ न्त्वꣳ राजन्ब्रह्माऽसि सविताऽसि सत्यसव इत्याह । सवितारमेवैनꣳसत्यसवं करोति ॥ १। ७। १०। २॥
६१ ब्रह्मा ३ न्त्वꣳ राजन्ब्रह्माऽसीन्द्रोऽसि सत्यौजा इत्याह । इन्द्रमेवैनꣳसत्यौजसं करोति । ब्रह्मा ३ न्त्वꣳ राजन् ब्रह्माऽसि मित्रोऽसि सुशेव इत्याह । मित्रमेवैनꣳसुशेवं करोति । ब्रह्मा ३ न्त्वꣳ राजन् ब्रह्माऽसि वरुणोऽसि सत्यधर्मेत्याह । वरुणमेवैनꣳ सत्यधर्माणं करोति । सविताऽसि सत्यसव इत्याह । गायत्रीमेवैतेनाभिव्याहरति । इन्द्रोऽसि सत्यौजा इत्याह । त्रिष्टुभमेवैतेनाभिव्याहरति ॥ १। ७। १०। ३॥
६२ मित्रोऽसि सुशेव इत्याह । जगतीमेवैतेनाभिव्याहरति । सत्यमेता देवताः । सत्यमेतानि छन्दाꣳसि । सत्यमेवावरुन्धे । वरुणोऽसि सत्यधर्मेत्याह । अनुष्टुभमेवैतेनाभिव्याहरति । सत्यानृते वा अनुष्टुप् । सत्यानृते वरुणः । सत्यानृते एवावरुन्धे ॥ १। ७। १०। ४॥
६३ नैनꣳसत्यानृते उदिते हिꣳस्तः । य एवं वेद । इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति स्फ्यं प्रयच्छति । वज्रो वै स्फ्यः । वज्रेणैवास्मा अवरपरꣳ रन्धयति । एवꣳ हि तच्छ्रेयः । यदस्मा एते रध्येयुः । दिशोऽभ्ययꣳ राजाऽभूदिति पञ्चाक्षान्प्रयच्छति । एते वै सर्वेऽयाः । अपराजायिनमेवैनं करोति ॥ १। ७। १०। ५॥
६४ ओदनमुद्ब्रुवते । परमेष्ठी वा एषः । यदोदनः । परमामेवैनग्ग् श्रियं गमयति । सुश्लोका ४ सुमङ्गला ४ सत्यराजा ३ नित्याह । आशिषमेवैतामाशास्ते । शौनःशेपमाख्यापयते । वरुणपाशादेवैनं मुञ्चति । परःशतं भवति । शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति । मारुतस्य चैकविꣳशतिकपालस्य वैश्वदेव्यै चामिक्षाया अग्नये स्विष्टकृते समवद्यति । देवताभिरेवैनमुभयतः परिगृह्णाति । अपांनप्त्रे स्वाहोर्जोनप्त्रे स्वाहाऽग्नये गृहपतये स्वाहेति तिस्र आहुतीर्जुहोति । त्रय इमे लोकाः । एष्वेव लोकेषु प्रतितिष्ठति

॥ १। ७। १०। ६॥ देवैरित्याह सत्यसवं करोति त्रिष्टुभमेवैतेनाभि व्याहरति सत्यानृते एवावरुन्धे करोति शतेन्द्रियः षट्च ॥ १०॥
एतद्ब्राह्मणानि धात्रे रत्निनां देवसुवामर्थेऽतो देवीर्दिशः सोमस्येन्द्रस्य मित्रो दश ॥ १०॥
एतद्ब्राह्मणानि वैष्णवं त्रिकपालमन्नं वै पूषा वाशाः स्थेत्याह दिशो व्यास्थापयत्युदङ्ङेत्य ब्रह्मा ३ न्त्वꣳ राजश्चतुः षष्टिः ॥ ६४॥
एतद्ब्राह्मणानि प्रतितिष्ठति ॥

## प्रथमाष्टके अष्टमः प्रपाठकः ८

१ वरुणस्य सुषुवाणस्य दशधेन्द्रियं वीर्यं पराऽपतत् । तथ्सꣳसृद्भिरनुसमसर्पत् । तथ्सꣳसृपाꣳसꣳसृत्त्वम् । अग्निना देवेन प्रथमेऽहं ननु प्रायुङ्क्त । सरस्वत्या वाचा द्वितीये । सवित्रा प्रसवेन तृतीये । पूष्णा पशुभिश्चतुर्थे । बृहस्पतिना ब्रह्मणा पञ्चमे । इन्द्रेण देवेन षष्ठे । वरुणेन स्वया देवतया सप्तमे ॥ १। ८। १। १॥
२ सोमेन राज्ञाऽष्टमे । त्वष्ट्रा रूपेण नवमे । विष्णुना यज्ञेनाप्नोत् । यथ्सꣳसृपो भवन्ति । इन्द्रियमेव तद्वीर्यं यजमान आप्नोति । पूर्वा पूर्वा वेदिर्भवति । इन्द्रियस्य वीर्यस्यावरुद्ध्यै । पुरस्तादुपसदाꣳसौम्येन प्रचरति । सोमो वै रेतोधाः । रेत एव तद्दधाति । अन्तरा त्वाष्ट्रेण । रेत एव हितं त्वष्टा रूपाणि विकरोति । उपरिष्टाद्वैष्णवेन । यज्ञो वै विष्णुः । यज्ञ एवान्ततः प्रतितिष्ठति ॥ १। ८। १। २॥ सप्तमे दधाति पञ्च च ॥ १॥
३ जामि वा एतत्कुर्वन्ति । यथ्सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति । पुण्डरिस्रजां प्रयच्छत्यजामित्वाय । अंगिरसः सुवर्गं लोकं यन्तः । अप्सु दीक्षातपसी प्रावेशयन् । तत्पुण्डरीकमभवत् । यत्पुण्डरिस्रजां प्रयच्छति । साक्षादेव दीक्षातपसी अवरुन्धे । दशभिर्वथ्सतरैः सोमं क्रीणाति । दशाक्षरा विराट् ॥ १। ८। २। १॥
४ अन्नं विराट् । विराजैवान्नाद्यमवरुन्धे । मुष्करा भवन्ति सेन्द्रत्वाय । दशपेयो भवति । अन्नाद्यस्यावरुद्ध्यै । शतं ब्राह्मणाः पिबन्ति । शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति । सप्तदश२ꣳ स्तोत्रं भवति । सप्तदशः प्रजापतिः ॥ १। ८। २। २॥
५ प्रजापतेराप्त्यै । प्राकाशावध्वर्यवे ददाति । प्रकाशमेवैनं गमयति । स्रजमुद्गात्रे । व्येवास्मै वासयति । रुक्मꣳ होत्रे । आदित्यमेवास्मा उन्नयति । अश्वं प्रस्तोतृप्रतिहर्तृभ्याम् । प्राजापत्यो वा अश्वः । प्रजापतेराप्त्यै ॥ १। ८। २। ३॥
६ द्वादश पष्ठौहीर्ब्रह्मणे । आयुरेवावरुन्धे । वशां मैत्रावरुणाय । राष्ट्रमेव वश्यकः । ऋषभं

ब्राह्मणाच्छꣳसिने । राष्ट्रमेवेन्द्रियाव्यकः । वाससी नेष्टापोतृभ्याम् । पवित्रे एवास्यैते । स्थूरि यवाचितमच्छावाकाय । अन्तत एव वरुणमवयजते ॥ १। ८। २। ४॥

७ अनड्वाहमग्नीधे । वह्निर्वा अनड्वान् । वह्निरग्नीत् । वह्निनैव वह्नि यज्ञस्यावरुन्धे । इन्द्रस्य सुषुवाणस्य त्रेधेन्द्रियं वीर्यं पराऽपतत् । भृगुस्तृतीयमभवत् । श्रायन्तीयं तृतीयम् । सरस्वती तृतीयम् । भार्गवो होता भवति । श्रायन्तीयं ब्रह्मसामं भवति । वारवन्तीयमग्निष्टोमसामम् । सारस्वतीरपो गृह्णाति । इन्द्रियस्य वीर्यस्यावरुद्ध्यै । श्रायन्तीयं ब्रह्मसामं भवति । इन्द्रियमेवास्मिन्वीर्यꣳ श्रयति । वारवन्तीयमग्निष्टोमसामम् । इन्द्रियमेवास्मिन्वीर्यं वारयति ॥ १। ८। २। ५॥ विराड्विजापतिरश्वः प्रजापतेराप्त्यै यजते ब्रह्मसामं भवति सप्त च ॥ २॥

८ ईश्वरो वा एष दिशोऽनून्मदितोः । यं दिशोऽनु व्यास्थापयन्ति । दिशामवेष्टयो भवन्ति । दिक्ष्वेव प्रति तिष्ठत्यनुन्मादाय । पञ्च देवता यजति । पञ्च दिशः । दिक्ष्वेव प्रतितिष्ठति । हविषो हविष इष्ट्वा बार्हस्पत्यमभिघारयति । यजमानदेवत्यो वै बृहस्पतिः । यजमानमेव तेजसा समर्धयति ॥ १। ८। ३। १॥

९ आदित्यां मल्हां गर्भिणीमालभते । मारुतीं पृश्निं पष्ठौहीम् । विशं चैवास्मै राष्ट्रं च समीची दधाति । आदित्यया पूर्वया प्रचरति । मारुत्योत्तरया । राष्ट्र एव विशमनुबध्नाति । उच्चैरादित्याया आश्रावयति । उपाꣳशु मारुत्यै । तस्माद्राष्ट्रं विशमतिवदति । गर्भिण्यादित्या भवति ॥ १। ८। ३। २॥

१० इन्द्रियं वै गर्भः । राष्ट्रमेवेन्द्रियाव्यकः । अगर्भा मारुती । विड्वै मरुतः । विशमेव निरिन्द्रियामकः । देवासुराः संयत्ता आसन् । ते देवा अश्विनोः पूषन्वाचः सत्यꣳ संनिधाय । अनृतेनासुरानभ्यभवन् । तेऽश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निरवपन्न् । ततो वै ते वाचः सत्यमवारुन्धत ॥ १। ८। ३। ३॥

११ यदश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति । अनृतेनैव भ्रातृव्यानभिभूय । वाचः सत्यमवरुन्धे । सरस्वते सत्यवाचे चरुम् । पूर्वमेवोदितम् । उत्तरेणाभि गृणाति । सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालं प्रसूत्यै । दूतान्प्रहिणोति । आविद एता भवन्ति । आविदमेवैनं गमयन्ति । अथो दूतेभ्य एव न छिद्यते । तिसृधन्वꣳ शुष्कदृतिर्दक्षिणा समृद्ध्यै ॥ १। ८। ३। ४॥ अर्धयति भवत्यरुन्धत गमयन्ति द्वे च ॥ ३॥

१२ आग्नेयमष्टाकपालं निर्वपति । तस्माच्छिशिरे कुरुपञ्चालाः प्राञ्चो यान्ति । सौम्यं

चरुम् । तस्माद्वसन्तं व्यवसायादयन्ति । सावित्रं द्वादशकपालम् । तस्मात्पुरस्ताद्यवानाँ सवित्रा विरुन्धते । बार्हस्पत्यं चरुम् । सवित्रैव विरुध्य । ब्रह्मणा यवानादधते । त्वाष्ट्रमष्टाकपालम् ॥ १। ८। ४। १॥
१३ रूपाण्येव तेन कुर्वते । वैश्वानरं द्वादशकपालम् । तस्माज्जघन्ये नैदाघे प्रत्यञ्चः कुरुपञ्चाला यान्ति । सारस्वतं चरुं निर्वपति । तस्मात्प्रावृषि सर्वा वाचो वदन्ति । पौष्णेन व्यवस्यन्ति । मैत्रेण कृषन्ते । वारुणेन विधृता आसते । क्षैत्रपत्येन पाचयन्ते । आदित्येनादधते ॥ १। ८। ४। २॥
१४ मासि मास्येतानि हवीँषि निरुप्याणीत्याहुः । तेनैवर्तून्प्रयुङ्क्त इति । अथो खल्वाहुः । कः संवथ्सरं जीविष्यतीति । षडेव पूर्वेद्युर्निरुप्याणि । षडुत्तरेद्युः । तेनैवर्तून्प्रयुङ्क्ते । दक्षिणो रथवाहनवाहः पूर्वेषां दक्षिणा । उत्तर उत्तरेषाम् । संवथ्सरस्यैवान्तौ युनक्ति । सुवर्गस्य लोकस्य समष्ट्यै ॥ १। ८। ४। ३॥ त्वाष्ट्रमष्टाकपालं दधते युनक्त्येकं च ॥ ४॥
१५ इन्द्रस्य सुषुवाणस्य दशधेन्द्रियं वीर्यं पराऽपतत् । स यत्प्रथमं निरष्ठीवत् । तत्कलमभवत् । यद्द्वितीयम् । तद्बदरम् । यत्तृतीयम् । तत्कर्कन्धु । यन्नस्तः । स सिँहः । यदक्ष्योः ॥ १। ८। ५। १॥
१६ स शार्दूलः । यत्कर्णयोः । स वृकः । य ऊर्ध्वः । स सोमः । याऽवाची । सा सुरा । त्रयाः सक्तवो भवन्ति । इन्द्रियस्यावरुद्ध्यै । त्रयाणि लोमानि ॥
१। ८। ५। २॥
१७ त्विषिमेवावरुन्धे । त्रयो ग्रहाः । वीर्यमेवावरुन्धे । नाम्ना दशमी । नव वै पुरुषे प्राणाः । नाभिर्दशमी । प्राणा इन्द्रियं वीर्यम् । प्राणानेवेन्द्रियं वीर्यं यजमान आत्मन्धत्ते । सीसेन क्लीबाच्छष्पाणि क्रीणाति । न वा एतदयो न हिरण्यम् ॥ १। ८। ५। ३॥
१८ यथ्सीसम् । न स्त्री न पुमान् । यत्क्लीबः । न सोमो न सुरा । यथ्सौत्रामणी समृद्ध्यै । स्वाद्वीं त्वा स्वादुनेत्याह । सोममेवैनां करोति । सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेत्याह । एताभ्यो ह्येषा देवताभ्यः पच्यते । तिस्रः सँसृष्टा वसति ॥ १। ८। ५। ४॥
१९ तिस्रो हि रात्रीः क्रीतः सोमो वसति । पुनातु ते परिस्रुतमिति यजुषा पुनाति व्यावृत्त्यै । पवित्रेण पुनाति । पवित्रेण हि सोमं पुनन्ति । वारेण शश्वता तनेत्याह । वारेण हि सोमं पुनन्ति । वायुः पूतः पवित्रेणेति नैतया पुनीयात् । व्यृद्धा ह्येषा ।

अतिपवितस्यैतया पुनीयात् । कुविदङ्गेत्यनिरुक्तया प्राजापत्यया गृह्णाति ॥ १। ८। ५। ५॥
२० अनिरुक्तः प्रजापतिः । प्रजापतेराप्त्यै । एकयर्चा गृह्णाति । एकधैव यजमाने वीर्यं दधाति । आश्विनं धूम्रमालभते । अश्विनौ वै देवानां भिषजौ । ताभ्यामेवास्मै भेषजं करोति । सारस्वतं मेषम् । वाग्वै सरस्वती । वाचैवैनं भिषज्यति । ऐन्द्रमृषभꣳ सैन्द्रत्वाय ॥ १। ८। ५। ६॥ अक्ष्योर्लोमानि हिरण्यं वसति गृह्णाति भिषज्यत्येकं च ॥ ५॥
२१ यत्रिषु यूपेष्वालभेत । बहिर्धाऽस्मादिन्द्रियं वीर्यं दध्यात् । भ्रातृव्यमस्मै जनयेत् । एकयूप आलभते । एकधैवास्मिन्निन्द्रियं वीर्यं दधाति । नास्मै भ्रातृव्यं जनयति । नैतेषां पशूनां पुरोडाशा भवन्ति । ग्रहपुरोडाशा ह्येते । युवꣳ सुराममश्विनेति सर्वदेवत्ये याज्यानुवाक्ये भवतः । सर्वा एव देवताः प्रीणाति ॥ १। ८। ६। १॥
२२ ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारम् । ब्राह्मणो ह्याहुत्या उच्छेषणस्य पाता । यदि ब्राह्मणं न विन्देत् । वल्मीकवपायामवनयेत् । सैव ततः प्रायश्चित्तिः । यद्वै सौत्रामण्यै व्यृद्धम् । तदस्यै समृद्धम् । नानादेवत्याः पशवश्च पुरोडाशाश्च भवन्ति समृद्ध्यै । ऐन्द्रः पशूनामुत्तमो भवति । ऐन्द्रः पुरोडाशानां प्रथमः ॥ १। ८। ६। २॥
२३ इन्द्रिये एवास्मै समीची दधाति । पुरस्तादनूयाजानां पुरोडाशैः प्रचरति । पशवो वै पुरोडाशाः । पशूनेवावरुन्धे । ऐन्द्रमेकादशकपालं निर्वपति । इन्द्रियमेवावरुन्धे । सावित्रं द्वादशकपालं प्रसूत्यै । वारुणं दशकपालम् । अन्तत एव वरुणमवयजते । वडबा दक्षिणा ॥ १। ८। ६। ३॥
२४ उत वा एषाऽश्वꣳसूते । उताश्वतरम् । उत सोम उत सुरा । यत्सौत्रामणी समृद्ध्यै । बार्हस्पत्यं पशुं चतुर्थमतिपवितस्यालभते । ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणैव यज्ञस्य व्यृद्धमपिवपति । पुरोडाशवानेष पशुर्भवति । न ह्येतस्य ग्रहं गृह्णन्ति । सोमप्रतीकाः पितरस्तृप्णुतेति शतातृण्णायाꣳसमवनयति ॥ १। ८। ६। ४॥
२५ शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति । दक्षिणेऽग्नौ जुहोति । पापवस्यसस्य व्यावृत्त्यै । हिरण्यमन्तरा धारयति । पूतामेवैनां जुहोति । शतमानं भवति । शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति । यत्रैव शतातृण्णां धारयति ॥ १। ८। ६। ५॥
२६ तन्निदधाति प्रतिष्ठित्यै । पितॄन्, वा एतस्येन्द्रियं वीर्यं गच्छति । यꣳ सोमोऽतिपवते ।

पितृणां याज्यानुवाक्याभिरुपतिष्ठते । यदेवास्य पितृनिन्द्रियं वीर्यं गच्छति । तदेवावरुन्धे । तिसृभिरुपतिष्ठते । तृतीये वा इतो लोके पितरः । तानेव प्रीणाति । अथो त्रीणि वै यज्ञस्येन्द्रियाणि । अध्वर्युर्होता ब्रह्मा । त उपतिष्ठन्ते । यान्येव यज्ञस्येन्द्रियाणि । तैरेवास्मै भेषजं करोति ॥ १। ८। ६। ६॥

प्रीणाति प्रथमो दक्षिणा समवनयति धारयतीन्द्रियाणि चत्वारि च ॥ ६॥

२७ अग्निष्टोममग्र आहरति । यज्ञमुखं वा अग्निष्टोमः । यज्ञमुखमेवारभ्य सवमाक्रमते । अथैषोऽभिषेचनीयश्चतुस्त्रिꣳश पवमानो भवति । त्रयस्त्रिꣳशद्वै देवताः । ता एवाप्नोति । प्रजापतिश्चतुस्त्रिꣳशः । तमेवाप्नोति । सꣳशर एष स्तोमानामयथापूर्वम् । यद्विषमाः स्तोमाः ॥ १। ८। ७। १॥

२८ एतावान् वै यज्ञः । यावान्पवमानाः । अन्तःश्लेषणं त्वा अन्यत् । यथ्समाः पवमानाः । तेनासꣳशरः । तेन यथापूर्वम् । आत्मनैवाग्निष्टोमेनर्ध्नोति । आत्मना पुण्यो भवति । प्रजा वा उक्थानि । पशव उक्थानि । यदुक्थ्यो भवत्यनु संतत्यै ॥ १। ८। ७। २॥

स्तोमाः पशव उक्थान्येकं च ॥ ७॥

२९ उप त्वा जामयो गिर इति प्रतिपद्भवति । वाग्वै वायुः । वाच एवैषोऽभिषेकः । सर्वासामेव प्रजानाꣳ सूयते । सर्वा एनं प्रजा राजेति वदन्ति । एतमुत्यं दशक्षिप इत्याह । आदित्या वै प्रजाः । प्रजानामेवैतेन सूयते । यन्ति वा एते यज्ञमुखात् । ये सम्भार्या अक्रन्न् ॥ १। ८। ८। १॥

३० यदाह पवस्व वाचो अग्रिय इति । तेनैव यज्ञमुखान्नयन्ति । अनुष्टुक्प्रथमा भवति । अनुष्टुगुत्तमा । वाग्वा अनुष्टुक् । वाचैव प्रयन्ति । वाचोद्यन्ति । उद्वतीर्भवन्ति । उद्वद्वा अनुष्टुभो रूपम् । आनुष्टुभो राजन्यः ॥ १। ८। ८। २॥

३१ तस्मादुद्वतीर्भवन्ति । सौर्यनुष्टुगुत्तमा भवति । सुवर्गस्य लोकस्य संतत्यै । यो वै सवादेति । नैनꣳ सव उपनमति । यः सामभ्य एति । पापीयान्थ्सुषुवाणो भवति । एतानि खलु वै सामानि । यत्पृष्ठानि । यत्पृष्ठानि भवन्ति ॥ १। ८। ८। ३॥

३२ तैरेव सवान्नैति । यानि देवराजानाꣳ सामानि । तैरमुष्मिं ल्लोक ऋध्नोति । यानि मनुष्यराजानाꣳ सामानि । तैरस्मिं ल्लोक ऋध्नोति । उभयोरेव लोकयोर्ऋध्नोति । देवलोके च मनुष्यलोके च । एकविꣳशोऽभिषेचनीयस्योत्तमो भवति । एकविꣳशः केशवपनीयस्य प्रथमः । सप्तदशो दशपेयः ॥ १। ८। ८। ४॥

३३ विङ्वा एकविꣳशः । राष्ट्रꣳ सप्तदशः । विश एवैतन्मध्यतोऽभिषिच्यते । तस्माद्वा एष विशां प्रियः । विशो हि मध्यतोऽभिषिच्यते । यद्वा एनमदो दिशोऽनु व्यास्थापयन्ति । तथ्सुवर्गं लोकमभ्यारोहति । यदिमं लोकं न प्रत्यवरोहेत् । अतिजनं वेयात् । उद्वा माद्येत् । यदेष प्रतीचीनः स्तोमो भवति । इममेव तेन लोकं प्रत्यवरोहति । अथो अस्मिन्नेव लोके प्रतितिष्ठत्यनुन्मादाय ॥ १। ८। ८। ५॥ अक्रन्राजन्यो भवन्ति दशपेयो माद्येत्त्रीणि च ॥ ८॥

३४ इयं वै रजता । असौ हरिणी । यद्रुक्मौ भवतः । आभ्यामेवैनमुभयतः परिगृह्णाति । वरुणस्य वा अभिषिच्यमानस्यापः । इन्द्रियं वीर्यं निरघ्नन् । तथ्सुवर्णꣳ हिरण्यमभवत् । यद्रुक्ममन्तर्दधाति । इन्द्रियस्य वीर्यस्यानिर्घाताय । शतमानो भवति शतक्षरः । शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति । आयुर्वै हिरण्यम् । आयुष्या एवैनमभ्यति क्षरन्ति । तेजो वै हिरण्यम् । तेजस्या एवैनमभ्यति क्षरन्ति । वर्चो वै हिरण्यम् । वर्चस्या एवैनमभ्यति क्षरन्ति ॥ १। ८। ९। १॥ शतक्षरोऽष्टौ च ॥ ९॥

३५ अप्रतिष्ठितो वा एष इत्याहुः । यो राजसूयेन यजत इति । यदा वा एष एतेन द्विरात्रेण यजते । अथ प्रतिष्ठा । अथ संवथ्सरमाप्नोति । यावन्ति संवथ्सरस्याहोरात्राणि । तावतीरेतस्य स्तोत्रीयाः । अहोरात्रेष्वेव प्रतितिष्ठति । अग्निष्टोमः पूर्वमहर्भवति । अतिरात्र उत्तरम् ॥ १। ८। १०। १॥

३६ नानैवाहोरात्रयोः प्रतितिष्ठति । पौर्णमास्यां पूर्वमहर्भवति । व्यष्टकायामुत्तरम् । नानैवार्धमासयोः प्रतितिष्ठति । अमावास्यायां पूर्वमहर्भवति । उद्दृष्ट उत्तरम् । नानैव मासयोः प्रतितिष्ठति । अथो खलु । ये एव समानपक्षे पुण्याहे स्याताम् । तयोः कार्यं प्रतिष्ठित्यै ॥ १। ८। १०। २॥

३७ अपशव्यो द्विरात्र इत्याहुः । द्वे ह्येते छन्दसी । गायत्रं च त्रैष्टुभं च । जगतीमन्तर्यन्ति । न तेन जगती कृतेत्याहुः । यदेनां तृतीयसवने कुर्वन्तीति । यदा वा एषाऽहीनस्याहर्भजते । साह्नस्य वा सवनम् । अथैव जगती कृता । अथ पशव्यः । व्युष्टिर्वा एष द्विरात्रः । य एवं विद्वान्द्विरात्रेण यजते । व्येवास्मा उच्छति । अथो तम एवापहते । अग्निष्टोममन्तत आहरति । अग्निः सर्वा देवताः । देवतास्वेव प्रतितिष्ठति ॥ १। ८। १०। ३॥ उत्तरं प्रतिष्ठित्यै पशव्यः सप्त च ॥ १०॥ वरुणस्य जामीश्वर आग्नेयमिन्द्रस्य यत्त्रिष्वग्निष्टोममुप त्वेयं वै रजताऽप्रतिष्ठितो दश ॥ १०॥

वरुणस्य यद्श्विभ्यां यत्रिषु तस्माद्द्वतीः सप्तत्रिꣳशत् ॥ ३७॥
वरुणस्य प्रतितिष्ठति ॥
इति प्रथमं अष्टकं संपूर्णम् ॥
॥ तैत्तिरीय-ब्राह्मणम् ॥

# तैत्तिरीय-संहिता

## ॥ द्वितीयं अष्टकम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### द्वितीयाष्टके प्रथमः प्रपाठकः १

१ अंगिरसो वै सत्रमासत । तेषां पृश्निर्घर्मधुगासीत् । सर्जीषेणाजीवत् । तेंऽब्रुवन् । कस्मै नु सत्रमास्महे । येंऽस्या ओषधीर्न जनयाम इति । ते दिवोवृष्टिमसृजन्त । यावन्तः स्तोका अवापद्यन्त । तावतीरोषधयोऽजायन्त । ता जाताः पितरो विषेणालिम्पन् ॥ २। १। १। १॥

२ तासां जग्ध्वा रुप्यन्त्यैत् । तेंऽब्रुवन् । क इदमित्थमकरिति । वयं भागधेयमिच्छमाना इति पितरोंऽब्रुवन् । किं वो भागधेयमिति । अग्निहोत्र एव नोऽप्यस्त्वित्यब्रुवन् । तेभ्य एतद्भागधेयं प्रायच्छन् । यद्धुत्वा निमार्ष्टि । ततो वै त ओषधीरस्वदयन् । य एवं वेद ॥ २। १। १। २॥

३ स्वदन्तेऽस्मा ओषधयः । ते वथ्समुपावासृजन् । इदं नो हव्यं प्रदापयेति । सोंऽब्रवीद्वरं वृणै । दश मा रात्रीर्जातं न दोहन् । आसङ्गवं मात्रा सह चराणीति । तस्माद्वथ्सं जातं दश रात्रीर्न दुहन्ति । आसङ्गवं मात्रा सह चरति । वारे वृतग्ग् ह्यस्य । तस्माद्वथ्सँ स सृष्टधयँ रुद्रो घातुकः । अति हि सन्धां धयति ॥ २। १। १। ३॥ अलिम्पन्वेद घातुक एकं च ॥ १॥

४ प्रजापतिरग्निमसृजत । तं प्रजा अन्वसृज्यन्त । तमभाग उपास्त । सोंऽस्य प्रजाभिरपाक्रामत् । तमवरुरुथ्समानोऽन्वैत् । तमवरुधन्नाशक्नोत् । स तपोऽतप्यत । सोऽग्निरुपारमतातापि वै स्य प्रजापतिरिति । स रराटादुदमृष्ट ॥ २। १। २। १॥

५ तद्घृतमभवत् । तस्माद्यस्य दक्षिणतः केशा उन्मृष्टाः । तां ज्येष्ठलक्ष्मी प्राजापत्येत्याहुः । यद्रराटादुदमृष्ट । तस्माद्रराटे केशा न सन्ति । तदग्नौ प्रागृह्णात् । तद्व्यचिकिथ्सत् । जुहवानी ३ मा हौषा ३ मिति । तद्विचिकिथ्सायै जन्म । य एवं विद्वान्विचिकिथ्सति

॥ २। १। २। २॥
६ वसीय एव चेतयते । तं वागभ्यवदज्जुहुधीति । सोऽब्रवीत् । कस्त्वमसीति । स्वैव ते वागित्यब्रवीत् । सोऽजुहोथ्स्वाहेति । तथ्स्वाहाकारस्य जन्म । य एव२ँ स्वाहाकारस्य जन्म वेद । करोति स्वाहाकारेण वीर्यम् । यस्यैवं विदुषः स्वाहाकारेण जुह्वति ॥ २। १। २। ३॥
७ भोगायैवास्य हुतं भवति । तस्या आहुत्यै पुरुषमसृजत । द्वितीयमजुहोत् । सोऽश्वमसृजत । तृतीयमजुहोत् । स गामसृजत । चतुर्थमजुहोत् । सोऽविमसृजत । पञ्चममजुहोत् । सोऽजामसृजत ॥
२। १। २। ४॥
८ सोऽग्निरबिभेत् । आहुतीभिर्वै माऽऽप्नोतीति । स प्रजापतिं पुनः प्राविशत् । तं प्रजापतिरब्रवीत् । जायस्वेति । सोऽब्रवीत् । किं भागधेयमभिजनिष्य इति । तुभ्यमेवेद२ँ हूयाता इत्यब्रवीत् । स एतद्भागधेयमभ्यजायत । यदग्निहोत्रम् ॥ २। १। २। ५॥
९ तस्मादग्निहोत्रमुच्यते । तद्धूयमानमादित्योऽब्रवीत् । मा हौषीः । उभयोर्वै नावेतदिति । सोऽग्निरब्रवीत् । कथं नौ होष्यन्तीति । सायमेव तुभ्यं जुहवन् । प्रातर्मह्यमित्यब्रवीत् । तस्मादग्नये साय२ँ हूयते । सूर्याय प्रातः ॥ २। १। २। ६॥
१० आग्नेयी वै रात्रिः । ऐन्द्रमहः । यदनुदिते सूर्ये प्रातर्जुहुयात् । उभयमेवाग्नेय२ँ स्यात् । उदिते सूर्ये प्रातर्जुहोति । तथाऽग्नये साय२ँ हूयते । सूर्याय प्रातः । रात्रिं वा अनु प्रजाः प्रजायन्ते । अह्ना प्रतितिष्ठन्ति । यथ्सायं जुहोति ॥
११ प्रैव तेन जायते । उदिते सूर्ये प्रातर्जुहोति । प्रत्येव तेन तिष्ठति । प्रजापतिरकामयत प्रजायेयेति । स एतदग्निहोत्रं मिथुनमपश्यत् । तदुदिते सूर्येऽजुहोत् । यजुषाऽन्यत् । तूष्णीमन्यत् । ततो वै स प्राजायत । यस्यैवं विदुष उदिते सूर्येऽग्निहोत्रं जुह्वति ॥ २। १। २। ८॥
१२ प्रैव जायते । अथो यथा दिवा प्रजानन्नेति । तादृगेव तत् । अथो खल्वाहुः । यस्य वै द्वौ पुण्यौ गृहे वसतः । यस्तयोरन्य२ँ राधयत्यन्यं न । उभौ वाव स तावृच्छतीति । अग्निं वावादित्यः सायं प्रविशति । तस्मादग्निर्दूरान्नक्तं ददृशे । उभे हि तेजसी संपद्येते ॥
२। १। २। ९॥
१३ उद्यन्तं वावादित्यमग्निरनुसमारोहति । तस्माद्धूम एवाग्नेर्दिवा ददृशे । यदग्नये

सायं जुहुयात् । आ सूर्याय वृश्च्येत । यथ्सूर्याय प्रातर्जुहुयात् । आऽग्नये वृश्च्येत । देवताभ्यः समदं दध्यात् । अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेत्येव सायꣳ होतव्यम् । सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रातः । तथोभाभ्याꣳ सायꣳ हूयते ॥ २। १। २। १०॥

१४ उभाभ्यां प्रातः । न देवताभ्यः समदं दधाति । अग्निर्ज्योतिरित्याह । अग्निर्वै रेतोधाः । प्रजा ज्योतिरित्याह । प्रजा एवास्मै प्रजनयति । सूर्यो ज्योतिरित्याह । प्रजास्वेव प्रजातासु रेतो दधाति । ज्योतिरग्निः स्वाहेत्याह । प्रजा एव प्रजाता अस्यां प्रतिष्ठापयति ॥ २। १। २। ११॥

१५ तूष्णीमुत्तरामाहुतिं जुहोति । मिथुनत्वाय प्रजात्यै । यदुदिते सूर्ये प्रातर्जुहुयात् । यथाऽतिथये प्रद्रुताय शून्यायावसथायाहार्यꣳ हरन्ति । तादृगेव तत् । क्वाह ततस्तद्भवतीत्याहुः । यथ्स न वेद । यस्मै तद्धरन्तीति । तस्माद्यदौषसं जुहोति । तदेव संप्रति । अथो यथा प्रार्थमौषसं परिवेवेष्टि । तादृगेव तत् ॥ २। १। २। १२॥

अमृष्ट विचिकिथ्सति जुह्वत्यजामसृजताग्निहोत्रꣳ सूर्याय प्रातर्जुहोति जुह्वति संपद्येते हूयते स्थापयति संप्रति द्वे च ॥ २॥

१६ रुद्रो वा एषः । यदग्निः । पत्नी स्थाली । यन्मध्येऽग्नेरधिश्रयेत् । रुद्राय पत्नीमपि दध्यात् । प्रमायुका स्यात् । उदीचोऽङ्गारान्निरूह्याधिश्रयति । पत्नियै गोपीथाय । व्यन्तान्करोति । तथा पत्यप्रमायुका भवति ॥ २। १। ३। १॥

१७ घर्मो वा एषोऽशान्तः । अहरहः प्रवृज्यते । यदग्निहोत्रम् । प्रतिषिञ्चेत् पशुकामस्य । शान्तमिव हि पशव्यम् । न प्रतिषिञ्चेद् ब्रह्मवर्चसकामस्य । समिद्धमिव हि ब्रह्मवर्चसम् । अथो खलु । प्रतिषिच्यमेव । यत्प्रतिषिञ्चति ॥ २। १। ३। २॥

१८ तत्पशव्यम् । यज्जुहोति । तद्ब्रह्मवर्चसि । उभयमेवाकः । प्रच्युतं वा एतदस्माल्लोकात् । अगतं देवलोकम् । यच्छृतꣳ हविरनभिघारितम् । अभिद्योतयति । अभ्येवैनद्धारयति । अथो देवत्रैवैनद्गमयति ॥ २। १। ३। ३॥

१९ पर्यग्नि करोति । रक्षसामपहत्यै । त्रिः पर्यग्नि करोति । त्र्यावृद्धि यज्ञः । अथो मेध्यत्वाय । यत्प्राचीनमुद्वासयेत् । यजमानꣳ शुचाऽर्पयेत् । यद्दक्षिणा । पितृदेवत्यग्ग् स्यात् । यत्प्रत्यक् ॥ २। १। ३। ४॥

२० पत्नीꣳ शुचाऽर्पयेत् । उदीचीनमुद्वासयति । एषा वै देवमनुष्याणाꣳ शान्ता दिक् । तामेवैनदनूद्वासयति शान्त्यै । वर्त्म करोति । यज्ञस्य संतत्यै । निष्टपति । उपैव

तथ्स्तृणाति । चतुरुन्नयति । चतुष्पादः पशवः ॥ २। १। ३। ५॥
२१ पशूनेवावरुन्धे । सर्वान्पूर्णानुन्नयति । सर्वे हि पुण्या राद्धाः । अनूच उन्नयति । प्रजाया अनूचीनत्वाय । अनूच्येवास्य प्रजाऽर्धुका भवति ॥
संमृशति व्यावृत्त्यै । नाहोष्यन्नुपसादयेत् । यदहोष्यन्नुपसादयेत् । यथाऽन्यस्मा उपनिधाय ॥ २। १। ३। ६॥
२२ अन्यस्मै प्रयच्छति । तादृगेव तत् । आऽस्मै वृश्च्येत । यदेव गार्हपत्येऽधिश्रयति । तेन गार्हपत्यं प्रीणाति । अग्निरबिभेत् । आहुतयो माऽत्येष्यन्तीति । स एताꣳ समिधमपश्यत् । तामाऽधत्त । ततो वा अग्नावाहुतयोऽध्रियन्त ॥ २। १। ३। ७॥
२३ यदेनꣳ समयच्छत् । तथ्समिधः समित्त्वम् । समिधमादधाति । समेवैनं यच्छति । आहुतीनां धृत्यै । अथो अग्निहोत्रमेवेध्मवत्करोति । आहुतीनां प्रतिष्ठित्यै । ब्रह्मवादिनो वदन्ति । यदेकाꣳसमिधमाधाय द्वे आहुती जुहोति । अथ कस्याꣳसमिधि द्वितीयामाहुतिं जुहोतीति ॥ २। १। ३। ८॥
२४ यद्वे समिधावादध्यात् । भ्रातृव्यमस्मै जनयेत् । एकाꣳ समिधमाधाय । यजुषाऽन्यामाहुतिं जुहोति । उभे एव समिद्वती आहुती जुहोति । नास्मै भ्रातृव्यं जनयति । आदीप्तायां जुहोति । समिद्धमिव हि ब्रह्मवर्चसम् । अथो यथाऽतिथिं ज्योतिष्कृत्वा परिवेवेष्टि । तादृगेव तत् । चतुरुन्नयति । द्विर्जुहोति । तस्माद्द्विपाच्चतुष्पादमत्ति । अथो द्विपद्येव चतुष्पदः प्रतिष्ठापयति ॥ २। १। ३। ९॥ भवति प्रतिषिञ्चति गमयति प्रत्यक्पशव उपनिधायाध्रियन्तेति तच्चत्वारि च ॥ ३॥
२५ उत्तरावतीं वै देवा आहुतिमजुहवुः । अवाचीमसुराः । ततो देवा अभवन् । पराऽसुराः । यं कामयेत वसीयान्थ्स्यादिति । कनीयस्तस्य पूर्वꣳहुत्वा । उत्तरं भूयो जुहुयात् । एषा वा उत्तरावत्याहुतिः । तां देवा अजुहवुः । ततस्तेऽभवन् ॥ २। १। ४। १॥
२६ यस्यैवं जुह्वति । भवत्येव । यं कामयेत पापीयान्थ्स्यादिति । भूयस्तस्य पूर्वꣳ हुत्वा । उत्तरं कनीयो जुहुयात् । एषा वा अवाच्याहुतिः । तामसुरा अजुहवुः । ततस्ते पराऽभवन् । यस्यैवं जुह्वति । परैव भवति ॥
२। १। ४। २॥
२७ हुत्वोपसादयत्यजामित्वाय । अथो व्यावृत्त्यै । गार्हपत्यं प्रतीक्षते । अननुध्यायिनमेवैनं करोति । अग्निहोत्रस्य वै स्थाणुरस्ति । तं य ऋच्छेत् । यज्ञस्थाणुमृच्छेत् । एष वा अग्निहोत्रस्य स्थाणुः । यत्पूर्वाऽऽहुतिः । तां

यदुत्तरयाऽभिजुहुयात् ॥ २। १। ४। ३॥
२८ यज्ञस्थाणुमृच्छेत् । अतिहाय पूर्वामाहुतिं जुहोति । यज्ञस्थाणुमेव परिवृणक्ति । अथो भ्रातृव्यमेवाप्त्वाऽतिक्रामति । अवाचीनꣳसायमुपमार्ष्टि । रेत एव तद्दधाति । ऊर्ध्वं प्रातः । प्रजनयत्येव तत् । ब्रह्मवादिनो वदन्ति । चतुरुन्नयति ॥ २। १। ४। ४॥
२९ द्विर्जुहोति । अथ क्व द्वे आहुती भवत इति । अग्नौ वैश्वानर इति ब्रूयात् । एष वा अग्निर्वैश्वानरः । यद्ब्राह्मणः । हुत्वा द्विः प्राश्नाति । अग्नावेव वैश्वानरे द्वे आहुती जुहोति । द्विर्जुहोति । द्विर्निमार्ष्टि । द्विः प्राश्नाति ॥ २। १। ४। ५॥
३० षट्थ्संपद्यन्ते । षड्वा ऋतवः । ऋतूनेव प्रीणाति ॥
ब्रह्मवादिनो वदन्ति । किंदेवत्यमग्निहोत्रमिति । वैश्वदेवमिति ब्रूयात् । यद्यजुषा जुहोति । तदैन्द्राग्नम् । यत्तूष्णीम् । तत्प्राजापत्यम् ॥
२। १। ४। ६॥
३१ यन्निमार्ष्टि । तदोषधीनाम् । यद्द्वितीयम् । तत्पितृणाम् । यत्प्राश्नाति । तद्गर्भाणाम् । तस्माद्गर्भा अनश्नन्तो वर्धन्ते । यदाचामति । तन्मनुष्याणाम् । उदङ्ङ्पर्यावृत्याचामति ॥
२। १। ४। ७॥
३२ आत्मनो गोपीथाय । निर्णेनेक्ति शुद्ध्यै । निष्टपति स्वगाकृत्यै । उद्दिशति । सप्तर्षीनेव प्रीणाति । दक्षिणा पर्यावर्तते । स्वमेव वीर्यमनुपर्यावर्तते । तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरः । अथो आदित्यस्यैवावृतमनुपर्यावर्तते । हुत्वोपसमिन्धे ॥ २। १। ४। ८॥
३३ ब्रह्मवर्चसस्य समिद्ध्यै । न बर्हिरनुप्रहरेत् । असग्ग्स्थितो वा एष यज्ञः । यदग्निहोत्रम् । यदनुप्रहरेत् । यज्ञं विच्छिन्द्यात् । तस्मान्नानुप्रहृत्यम् । यज्ञस्य संतत्यै । अपो निनयति । अवभृथस्यैव रूपमकः ॥ २। १। ४। ९॥ अभवन्भवति जुहुयान्नयति मार्ष्टि द्विः प्राश्नाति प्राजापत्यमाचामतीन्धेऽकः ॥ ४॥
३४ ब्रह्मवादिनो वदन्ति । अग्निहोत्रप्रायणा यज्ञाः । किं प्रायणमग्निहोत्रमिति । वथ्सो वा अग्निहोत्रस्य प्रायणम् । अग्निहोत्रं यज्ञानाम् । तस्य पृथिवी सदः । अन्तरिक्षमाग्नीध्रम् । द्यौर्हविर्धानम् । दिव्या आपः प्रोक्षणयः । ओषधयो बर्हिः ॥ २। १। ५। १॥
३५ वनस्पतय इध्मः । दिशः परिधयः । आदित्यो यूपः । यजमानः पशुः । समुद्रोऽवभृथः । संवथ्सरः स्वगाकारः । तस्मादाहिताग्नेः सर्वमेव बर्हिष्यं दत्तं भवति । यथ्सायं जुहोति । रात्रिमेव तेन दक्षिण्यां कुरुते । यत्प्रातः ॥ २। १। ५। २॥

३६ अहरेव तेन दक्षिण्यं कुरुते । यत्ततो ददाति । सा दक्षिणा । यावन्तो वै देवा अहुतमादन् । ते पराऽभवन् । त एतदग्निहोत्रꣳ सर्वस्यैव समवदायाजुहवुः । तस्मादाहुः । अग्निहोत्रं वै देवा गृहाणां निष्कृतिमपश्यन्निति । यथ्सायं जुहोति । रात्रिया एव तद्धुताद्याय ॥
२। १। ५। ३॥

३७ यजमानस्यापराभावाय । यत्प्रातः । अह्न एव तद्धुताद्याय । यजमानस्यापराभावाय । यत्ततोऽश्नाति । हुतमेव तत् । द्वयोः पयसा जुहुयात्पशुकामस्य । एतद्वा अग्निहोत्रं मिथुनम् । य एवं वेद । प्र प्रजया पशुभिर्मिथुनैर्जायते ॥ २। १। ५। ४॥

३८ इमामेव पूर्वया दुहे । अमूमुत्तरया । अधिश्रित्योत्तरमानयति । योनावेव तद्रेतः सिञ्चति प्रजनने । आज्येन जुहुयात्तेजस्कामस्य । तेजो वा आज्यम् । तेजस्व्येव भवति । पयसा पशुकामस्य । एतद्वै पशूनाꣳ रूपम् । रूपेणैवास्मै पशूनवरुन्धे ॥ २। १। ५। ५॥

३९ पशुमानेव भवति । दध्नेन्द्रियकामस्य । इन्द्रियं वै दधि । इन्द्रियाव्येव भवति । यवाग्वा ग्रामकामस्यौषधा वै मनुष्याः । भागधेयेनैवास्मै सजातानवरुन्धे । ग्राम्येव भवति । अयज्ञो वा एषः । योऽसामा ॥ २। १। ५। ६॥

४० चतुरुन्नयति । चतुरक्षरꣳ रथन्तरम् । रथन्तरस्यैष वर्णः । उपरीव हरति । अन्तरिक्षं वामदेव्यम् । वामदेव्यस्यैष वर्णः । द्विर्जुहोति । द्व्यक्षरं बृहत् । बृहत एष वर्णः । अग्निहोत्रमेव तथ्सामन्वत्करोति ॥ २। १। ५। ७॥

४१ यो वा अग्निहोत्रस्योपसदो वेद । उपैनमुपसदो नमन्ति । विन्दत उपसत्तारम् । उन्नीयोपसादयति । पृथिवीमेव प्रीणाति । होष्यन्नुपसादयति । अन्तरिक्षमेव प्रीणाति । हुत्वोपसादयति । दिवमेव प्रीणाति । एता वा अग्निहोत्रस्योपसदः ॥ २। १। ५। ८॥

४२ य एवं वेद । उपैनमुपसदो नमन्ति । विन्दत उपसत्तारम् । यो वा अग्निहोत्रस्याश्रावितं प्रत्याश्रावितꣳ होतारं ब्रह्माणं वषट्कारं वेद । तस्य त्वेव हुतम् । प्राणो वा अग्निहोत्रस्याश्रावितम् । अपानः प्रत्याश्रावितम् । मनो होता । चक्षुर्ब्रह्मा । निमेषो वषट्कारः ॥ २। १। ५। ९॥

४३ य एवं वेद । तस्य त्वेव हुतम् । सायंयावानश्च वै देवाः प्रातर्यावाणश्चाग्निहोत्रिणो गृहमागच्छन्ति । तान्, यन्न तर्पयेत् । प्रजयाऽस्य पशुभिर्वितिष्ठेरन् । यत्तर्पयेत् । तृप्ता एनं प्रजया पशुभिस्तर्पयेयुः । सजूर्देवैः सायं यावभिरिति सायꣳ संमृशति । सजूर्देवैः

प्रातर्यावभिरिति प्रातः । ये चैव देवाः सायं यावानो ये च प्रातर्यावाणः ॥ २। १। ५। १०॥
४४ तानेवोभयाग्ँस्तर्पयति । त एनं तृप्ताः प्रजया पशुभिस्तर्पयन्ति । अरुणो ह स्माहौपवेशिः । अग्निहोत्र एवाहꣳ सायं प्रातर्वज्रं भ्रातृव्येभ्यः प्रहरामि । तस्मान्मत्पापीयाꣳसो भ्रातृव्या इति । चतुरुन्नयति । द्विर्जुहोति । समिथ्सप्तमी । सप्तपदा शक्करी । शाक्करो वज्रः । अग्निहोत्र एव तथ्सायं प्रातर्वज्रं यजमानो भ्रातृव्याय प्रहरति । भवत्यात्मना । पराऽस्य भ्रातृव्यो भवति ॥ २। १। ५। ११॥ बर्हिः प्रातर्हुताद्याय जायते रुन्धेऽसामा करोत्येता वा अग्निहोत्रस्योपसदो वषट्कारश्च प्रातर्यावाणो वज्रस्त्रीणि च ॥ ५॥
४५ प्रजापतिरकामयतात्मन्वन्मे जायेतेति । सोऽजुहोत् । तस्यात्मन्वदजायत । अग्निर्वायुरादित्यः । तेऽब्रुवन् । प्रजापतिरहौषीदात्मन्वन्मे जायेतेति । तस्य वयमजनिष्महि । जायतां न आत्मन्वदिति तेऽजुहवुः । प्राणानामग्निः । तनुवै वायुः ॥ २। १। ६। १॥
४६ चक्षुष आदित्यः । तेषाꣳ हुतादजायत गौरेव । तस्यै पयसि व्यायच्छन्त । मम हुतादजनि ममेति । ते प्रजापतिं प्रश्नमायन् । स आदित्योऽग्निमब्रवीत् । यतरो नौ जयात् । तन्नौ सहासदिति । कस्यैकोऽहौषीदिति प्रजापतिरब्रवीत्कस्यै क इति । प्राणानामहमित्यग्निः ॥ २। १। ६। २॥
४७ तनुवा अहमिति वायुः । चक्षुषोऽहमित्यादित्यः । य एव प्राणानामहौषीत् । तस्य हुतादजनीति । अग्नेर्हुतादजनीति । तदग्निहोत्रस्याग्निहोत्रत्वम् । गौर्वा अग्निहोत्रम् । य एवं वेद गौरग्निहोत्रमिति । प्राणापानाभ्यामेवाग्निꣳ समर्धयति । अव्यर्धुकः प्राणापानाभ्यां भवति ॥ २। १। ६। ३॥
४८ य एवं वेद । तौ वायुरब्रवीत् । अनु मा भजतमिति । यदेव गार्हपत्येऽधिश्रित्याहवनीयमभ्युद्द्रवान् । तेन त्वां प्रीणानित्यब्रूताम् । तस्माद्यद्गार्हपत्येऽधिश्रित्याहवनीयमभ्युद्द्रवति । वायुमेव तेन प्रीणाति । प्रजापतिर्देवताः सृजमानः । अग्निमेव देवतानां प्रथममसृजत । सोऽन्यदालम्भ्यमवित्त्वा ॥ २। १। ६। ४॥
४९ प्रजापतिमभिपर्यावर्तत । स मृत्योरबिभेत् । सोऽमुमादित्यमात्मनो निरमिमीत । तꣳ हुत्वा पराङ् पर्यावर्तत । ततो वै स मृत्युमपाजयत् । अपमृत्युं जयति । य एवं वेद । तस्माद्यस्यैवं विदुषः । उतैकाहमुत द्व्यहं न जुह्वति । हुतमेवास्य भवति । असौ

ह्यादित्योऽग्निहोत्रम् ॥ २। १। ६। ५॥ तनुवै वायुरग्निर्भवत्यवित्त्वा भवत्येकं च ॥ ६॥
५० रौद्रं गवि । वायव्यमुपसृष्टम् । आश्विनं दुह्यमानम् । सौम्यं दुग्धम् । वारुणमधिश्रितम् । वैश्वदेवा भिन्दवः । पौष्णमुदन्तम् । सारस्वतं विष्यन्दमानम् । मैत्रँ शरः । धातुरुद्वासितम् । बृहस्पतेरुन्नीतम् । सवितुः प्रक्रान्तम् । द्यावापृथिव्यग्ग् ह्नियमाणम् । ऐन्द्राग्नमुपसन्नम् । अग्नेः पूर्वाऽऽहुतिः । प्रजापतेरुत्तरा । ऐन्द्रँ हुतम् ॥ २। १। ७। १॥ उद्वासितँ सप्त च ॥ ७॥
५१ दक्षिणत उपसृजति । पितृलोकमेव तेन जयति । प्राचीमावर्तयति । देवलोकमेव तेन जयति । उदीचीमावृत्य दोग्धि । मनुष्यलोकमेव तेन जयति । पूर्वौ दुह्याज्ज्येष्ठस्य ज्यैष्ठिनेयस्य । यो वा गतश्रीः स्यात् । अपरौ दुह्यात्कनिष्ठस्य कानिष्ठिनेयस्य । यो वा बुभूषेत् ॥ २। १। ८। १॥
५२ न संमृशति । पापवस्यसस्य व्यावृत्त्यै । वायव्यं वा एतदुपसृष्टम् । आश्विनं दुह्यमानम् । मैत्रं दुग्धम् । अर्यम्ण उद्वास्यमानम् । त्वाष्ट्रमुन्नीयमानम् । बृहस्पतेरुन्नीतम् । सवितुः प्रक्रान्तम् । द्यावापृथिव्यग्ग् ह्नियमाणम् ॥ २। १। ८। २॥
५३ ऐन्द्राग्नमुपसादितम् । सर्वाभ्यो वा एष देवताभ्यो जुहोति । योऽग्निहोत्रं जुहोति । यथा खलु वै धेनुं तीर्थे तर्पयति । एवमग्निहोत्री यजमानं तर्पयति । तृप्यति प्रजया पशुभिः । प्र सुवर्गं लोकं जानाति । पश्यति पुत्रम् । पश्यति पौत्रम् । प्र प्रजया पशुभिर्मिथुनैर्जायते । यस्यैवं विदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद ॥ २। १। ८। ३॥ बुभूषेद्ध्रियमाणं जायते द्वे च ॥ ८॥
५४ त्रयो वै प्रैयमेधा आसन् । तेषां त्रिरेकोऽग्निहोत्रमजुहोत् । द्विरेकः । सकृदेकः । तेषां यस्त्रिरजुहोत् । स ऋचाऽजुहोत् । यो द्विः । स यजुषा । यः सकृत् । स तूष्णीम् ॥ २। १। ९। १॥
५५ यश्च यजुषाऽजुहोद्यश्च तूष्णीम् । तावुभावार्ध्नुताम् । तस्माद्यजुषाऽऽहुतिः पूर्वा होतव्या । तूष्णीमुत्तरा । उभे एवर्द्धी अवरुन्धे । अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति । रेत एव तद्दधाति । सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः । रेत एव हितं प्रजनयति । रेतो वा एतस्य हितं न प्रजायते ॥ २। १। ९। २॥
५६ यस्याग्निहोत्रमहुतँ सूर्योऽभ्युदेति । यद्यन्ते स्यात् । उन्नीय प्राङुदाद्रवेत् । स उपसाद्यातमितोरासीत । स यदा ताम्येत् । अथ भूः स्वाहेति जुहुयात् । प्रजापतिर्वै भूतः । तमेवोपासरत् । स एवैनं तत उन्नयति । नार्तिमार्च्छति यजमानः ॥ २। १। ९।

३॥ तूष्णीं जायते यजमानः ॥ ९॥
५७ यदग्निमुद्धरति । वसवस्तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति । वसुष्वेवास्याग्निहोत्रꣳ हुतं भवति । निहितो धूपायञ्छेते । रुद्रास्तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति । रुद्रेष्वेवास्याग्निहोत्रꣳ हुतं भवति । प्रथममिध्ममर्चिरालभते । आदित्यास्तर्ह्यग्निः ॥ २। १। १०। १॥
५८ तस्मिन् यस्य तथाविधे जुह्वति । आदित्येष्वेवास्याग्निहोत्रꣳ हुतं भवति । सर्व एव सर्वश इध्म आदीप्तो भवति । विश्वे देवास्तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति । विश्वेष्वेवास्य देवेष्वग्निहोत्रꣳ हुतं भवति । नितरामर्चिरुपावैति लोहिनीकेव भवति । इन्द्रस्तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति । इन्द्र एवास्याग्निहोत्रꣳ हुतं भवति ॥ २। १। १०। २॥
५९ अङ्गारा भवन्ति । तेभ्योऽङ्गारेभ्योऽर्चिरुदेति । प्रजापतिस्तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति । प्रजापतावेवास्याग्निहोत्रꣳ हुतं भवति । शरोऽङ्गारा अध्यूहन्ते । ब्रह्म तर्ह्यग्निः । तस्मिन् यस्य तथाविधे जुह्वति । ब्रह्मन्नेवास्याग्निहोत्रꣳ हुतं भवति । वसुषु रुद्रेष्वादित्येषु विश्वेषु देवेषु । इन्द्रे प्रजापतौ ब्रह्मन् । अपरिवर्गमेवास्यैतासु देवतासु हुतं भवति । यस्यैवं विदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद ॥ २। १। १०। ३॥
आदित्यास्तर्ह्यग्निरिन्द्र एवास्याग्निहोत्रꣳ हुतं भवति देवेषु चत्वारि च ॥ १०॥ यदग्निं निहितः प्रथमꣳ सर्व एव नितरामङ्गाराः शरोऽङ्गारा ब्रह्म वसुष्वष्टौ ॥
६० ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चति । सत्यं त्वर्तेन परिषिञ्चामीति प्रातः । अग्निर्वा ऋतम् । असावादित्यः सत्यम् । अग्निमेव तदादित्येन सायं परिषिञ्चति । अग्निनाऽऽदित्यं प्रातः सः । यावदहोरात्रे भवतः । तावदस्य लोकस्य । नार्तिर्न रिष्टिः । नान्तो न पर्यन्तोऽस्ति । यस्यैवं विदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद ॥ २। १। ११। १॥ अस्ति द्वे च ॥ ११॥
अंगिरसः प्रजापतिरग्निꣳ रुद्र उत्तरावतीं ब्रह्मवादिनोऽग्निहोत्रप्रायणा यज्ञाः प्रजापतिरकामयतात्मन्वद्रौद्रं गवि दक्षिणतस्त्रयो वै यदग्निमृतं त्वा सत्येनैकादश ॥ ११॥
अंगिरसः प्रैव तेन पशूनेव यन्निमार्ष्टि यो वा अग्निहोत्रस्योपसदो दक्षिणतष्षष्टिः ॥ ६०॥
अंगिरसो य उचैनदेवं वेद ॥

## द्वितीयाष्टके द्वितीयः प्रपाठकः २

१ प्रजापतिरकामयत प्रजाः सृजेयेति । स एतं दशहोतारमपश्यत् । तं मनसाऽनुद्रुत्य दर्भस्तम्बेऽजुहोत् । ततो वै स प्रजा असृजत । ता अस्माथ्सृष्टा अपाक्रामन् । ता ग्रहेणागृह्णात् । तद्ग्रहस्य ग्रहत्वम् । यः कामयेत प्रजायेयेति । स दशहोतारं मनसाऽनुद्रुत्य दर्भस्तम्बे जुहुयात् । प्रजापतिर्वै दशहोता ॥ २। २। १। १॥

२ प्रजापतिरेव भूत्वा प्रजायते । मनसा जुहोति । मन इव हि प्रजापतिः । प्रजापतेराप्त्यै । पूर्णया जुहोति । पूर्ण इव हि प्रजापतिः । प्रजापतेराप्त्यै । न्यूनया जुहोति । न्यूनाद्धि प्रजापतिः प्रजा असृजत । प्रजानाꣳ सृष्ट्यै ॥ २। २। १। २॥

३ दर्भस्तम्बे जुहोति । एतस्माद्वै योनेः प्रजापतिः प्रजा असृजत । यस्मादेव योनेः प्रजापतिः प्रजा असृजत । तस्मादेव योनेः प्रजायते । ब्राह्मणो दक्षिणत उपास्ते । ब्राह्मणो वै प्रजानामुपद्रष्टा । उपद्रष्टुमत्येव प्रजायते । ग्रहो भवति । प्रजानाꣳ सृष्टानां धृत्यै । यं ब्राह्मणं विद्यां विद्वाꣳसं यशो नर्च्छेत् ॥ २। २। १। ३॥

४ सोऽरण्यं परेत्य । दर्भस्तम्बमुद्ग्रथ्य । ब्राह्मणं दक्षिणतो निषाद्य । चतुर्होतॄन्व्याचक्षीत । एतद्वै देवानां परमं गुह्यं ब्रह्म । यच्चतुर्होतारः । तदेव प्रकाशं गमयति । तदेनं प्रकाशं गतम् । प्रकाशं प्रजानां गमयति । दर्भस्तम्बमुद्ग्रथ्य व्याचष्टे ॥ २। २। १। ४॥

५ अग्निवान्, वै दर्भस्तम्बः । अग्निवत्येव व्याचष्टे । ब्राह्मणो दक्षिणत उपास्ते । ब्राह्मणो वै प्रजानामुपद्रष्टा । उपद्रष्टुमत्येवैनं यश ऋच्छति । ईश्वरं तं यशोऽर्तोरित्याहुः । यस्यान्ते व्याचष्ट इति । वरस्तस्मै देयः । यदेवैनं तत्रोपनमति । तदेवावरुन्धे ॥ २। २। १। ५॥

६ अग्निमादधानो दशहोत्राऽरणिमवदध्यात् । प्रजातमेवैनमाधत्ते । तेनैवोद्धृत्याग्निहोत्रं जुहुयात् । प्रजातमेवैनञ्जुहोति । हविर्निर्वप्स्यन्दशहोतारं व्याचक्षीत । प्रजातमेवैनं निर्वपति । सामिधेनीरनुवक्ष्यन्दशहोतारं व्याचक्षीत । सामिधेनीरेव सृष्ट्वाऽऽरभ्य प्रतनुते । अथो यज्ञो वै दशहोता । यज्ञमेव तनुते ॥ २। २। १। ६॥

७ अभिचरन्दशहोतारं जुहुयात् । नव वै पुरुषे प्राणाः । नाभिर्दशमी । सप्राणमेवैनमभिचरति । एतावद्वै पुरुषस्य स्वम् । यावत्प्राणाः । यावदेवास्यास्ति । तदभिचरति । स्वकृत इरिणे जुहोति प्रदरे वा । एतद्वा अस्यै निर्ऋतिगृहीतम् । निर्ऋतिगृहीत एवैनं निर्ऋत्या ग्राहयति । यद्वाचः क्रूरम् । तेन वषट्करोति । वाच एवैनं क्रूरेण प्रवृश्चति । ताजगार्तिमार्च्छति ॥ २। २। १। ७॥ दशहोता सृष्ट्या ऋच्छेद्व्याचष्टे

रुन्ध एव तनुते निर्ऋतिगृहीतं पञ्च च ॥ १॥
८ प्रजापतिरकामयत दर्शपूर्णमासौ सृजेयेति । स एतं चतुर्होतारमपश्यत् । तं मनसाऽनुद्रुत्याहवनीयेऽजुहोत् । ततो वै स दर्शपूर्णमासावसृजत । तावस्माथ्सृष्टावपाक्रामताम् । तौ ग्रहेणागृह्णात् । तद्ग्रहस्य ग्रहत्वम् । दर्‍शपूर्णमासावालभमानः । चतुर्होतारं मनसाऽनुद्रुत्याहवनीये जुहुयात् । दर्‍शपूर्णमासावेव सृष्ट्वाऽऽरभ्य प्रतनुते ॥ २। २। २। १॥
९ ग्रहो भवति । दर्‍शपूर्णमासयोः सृष्टयोर्धृत्यै । सोऽकामयत चातुर्मास्यानि सृजेयेति । स एतं पञ्चहोतारमपश्यत् । तं मनसाऽनुद्रुत्याहवनीयेऽजुहोत् । ततो वै स चातुर्मास्यान्यसृजत । तान्यस्माथ्सृष्टान्यपाक्रामन् । तानि ग्रहेणागृह्णात् । तद्ग्रहस्य ग्रहत्वम् । चातुर्मास्यान्यालभमानः ॥ २। २। २। २॥
१० पञ्चहोतारं मनसाऽनुद्रुत्याहवनीये जुहुयात् । चातुर्मास्यान्येव सृष्ट्वाऽऽरभ्य प्रतनुते । ग्रहो भवति । चातुर्मास्यानाꣳ सृष्टानां धृत्यै । सोऽकामयत पशुबन्धꣳ सृजेयेति । स एतꣳ षड्ढोतारमपश्यत् । तं मनसाऽनुद्रुत्याहवनीयेऽजुहोत् । ततो वै स पशुबन्धमसृजत । सोऽस्माथ्सृष्टोऽपाक्रामत् । तं ग्रहेणागृह्णात् ॥
२। २। २। ३॥
११ तद्ग्रहस्य ग्रहत्वम् । पशुबन्धेन यक्ष्यमाणः । षड्ढोतारं मनसाऽनुद्रुत्याहवनीये जुहुयात् । पशुबन्धमेव सृष्ट्वाऽऽरभ्य प्रतनुते । ग्रहो भवति । पशुबन्धस्य सृष्टस्य धृत्यै । सोऽकामयत सौम्यमध्वरꣳ सृजेयेति । स एतꣳ सप्तहोतारमपश्यत् । तं मनसाऽनुद्रुत्याहवनीयेऽजुहोत् । ततो वै स सौम्यमध्वरमसृजत ॥ २। २। २। ४॥
१२ सोऽस्माथ्सृष्टोऽपाक्रामत् । तं ग्रहेणागृह्णात् । तद्ग्रहस्य ग्रहत्वम् । दीक्षिष्यमाणः । सप्तहोतारं मनसाऽनुद्रुत्याहवनीये जुहुयात् । सौम्यमेवाध्वरꣳ सृष्ट्वाऽऽरभ्य प्रतनुते । ग्रहो भवति । सौम्यस्याध्वरस्य सृष्टस्य धृत्यै । देवेभ्यो वै यज्ञो न प्राभवत् । तमेतावच्छः समभरन् ॥ २। २। २। ५॥
१३ यथ्संभाराः । ततो वै तेभ्यो यज्ञः प्राभवत् । यथ्संभारा भवन्ति । यज्ञस्य प्रभूत्यै । आतिथ्यमासाद्य व्याचष्टे । यज्ञमुखं वा आतिथ्यम् । मुखत एव यज्ञꣳ संभृत्य प्रतनुते । अयज्ञो वा एषः । योऽपत्नीकः । न प्रजाः प्रजायेरन् । पत्नीर्व्याचष्टे । यज्ञमेवाकः । प्रजानां प्रजननाय । उपसथ्सु व्याचष्टे । एतद्वै पत्नीनामायतनम् । स्व एवैना आयतनेऽवकल्पयति ॥ २। २। २। ६॥ तनुत आलभमानोऽगृह्णादसृजताभरञ्जायेरन्षड्च

॥ २॥

१४ प्रजापतिरकामयत प्रजायेयेति । स तपोऽतप्यत । स त्रिवृतग्ग् स्तोममसृजत । तं पञ्चदशस्तोमो मध्यत उदतृणत् । तौ पूर्वपक्षश्चापरपक्षश्चाभवताम् । पूर्वपक्षं देवा अन्वसृज्यन्त । अपरपक्षमन्वसुराः । ततो देवा अभवन् । पराऽसुराः । यं कामयेत वसीयान्थ्स्यादिति ॥ २। २। ३। १॥

१५ तं पूर्वपक्षे याजयेत् । वसीयानेव भवति । यं कामयेत पापीयान्थ्स्यादिति । तमपरपक्षे याजयेत् । पापीयानेव भवति । तस्मात् पूर्वपक्षोऽपरपक्षात् करुण्यतरः । प्रजापतिर्वै दशहोता । चतुर्होता पञ्चहोता । षड्ढोता सप्तहोता । ऋतवः संवथ्सरः ॥ २। २। ३। २॥

१६ प्रजाः पशव इमे लोकाः । य एवं प्रजापतिं बहोर्भूयाꣳसं वेद । बहोरेव भूयान्भवति ॥

प्रजापतिर्देवासुरानसृजत । स इन्द्रमपि नासृजत । तं देवा अब्रुवन् । इन्द्रं नो जनयेति । सोऽब्रवीत् । यथाऽहं युष्माग्स्तपसाऽसृक्षि । एवमिन्द्रं जनयध्वमिति ॥ २। २। ३। ३॥

१७ ते तपोऽतप्यन्त । त आत्मन्निन्द्रमपश्यन् । तमब्रुवन् । जायस्वेति । सोऽब्रवीत् । किं भागधेयमभि जनिष्य इति । ऋतून्थ्संवथ्सरम् । प्रजाः पशून् । इमान् लोकानित्यब्रुवन् । तं वै माऽऽहुत्या प्रजनयतेत्यब्रवीत् ॥ २। २। ३। ४॥

१८ तं चतुर्होत्रा प्राजनयन् । यः कामयेत वीरो म आजायेतेति । स चतुर्होतारं जुहुयात् । प्रजापतिर्वै चतुर्होता । प्रजापतिरेव भूत्वा प्रजायते । जजनदिन्द्रमिन्द्रियाय स्वाहेति ग्रहेण जुहोति । आऽस्य वीरो जायते । वीरꣲ हि देवा एतयाऽऽहुत्या प्राजनयन् । आदित्याश्चांगिरसश्च सुवर्गे लोकेऽस्पर्धन्त । वयं पूर्वे सुवर्गं लोकमियाम वयं पूर्व इति ॥ २। २। ३। ५॥

१९ त आदित्या एतं पञ्चहोतारमपश्यन् । तं पुरा प्रातरनुवाकादाग्नीध्रेऽजुहवुः । ततो वै ते पूर्वे सुवर्गं लोकमायन् । यः सुवर्गकामः स्यात् । स पञ्चहोतारं पुरा प्रातरनुवाकादाग्नीध्रे जुहुयात् । संवथ्सरो वै पञ्चहोता । संवथ्सरः सुवर्गो लोकः । संवथ्सर एवर्तुषु प्रतिष्ठाय । सुवर्गं लोकमेति । तेऽब्रुवन्नंगिरस आदित्यान् ॥ २। २। ३। ६॥

२० क्व स्थ । क्व वः सद्भ्यो हव्यं वक्ष्याम इति । छन्दःस्वित्यब्रुवन् । गायत्रियां त्रिष्टुभि जगत्यामिति । तस्माच्छन्दःसु सद्भ्य आदित्येभ्यः । आंगीरसीः प्रजा हव्यं वहन्ति । वहन्त्यस्मै प्रजा बलिम् । ऐनमप्रतिख्यातं गच्छति । य एवं वेद । द्वादश मासाः

पञ्चर्तवः । त्रय इमे लोकाः । असावादित्य एकविꣳशः । एतस्मिन्वा एष श्रितः । एतस्मिन्प्रतिष्ठितः । य एवमेतꣳ२ श्रितं प्रतिष्ठितं वेद । प्रत्येव तिष्ठति ॥ २। २। ३। ७॥ स्यादिति संवथ्सरो जनयध्वमितीत्यब्रवीत्पूर्व इत्यादित्यानृतवष्षट्च ॥ ३॥

२१ प्रजापतिरकामयत प्रजायेयेति । स एतं दशहोतारमपश्यत् । तेन दशधाऽऽत्मानं विधाय । दशहोत्राऽतप्यत । तस्य चित्तिः स्रुगासीत् । चित्तमाज्यम् । तस्यैतावत्येव वागासीत् । एतावान् यज्ञक्रतुः । स चतुर्होतारमसृजत । सोऽनन्दत् ॥ २। २। ४। १॥

२२ असृक्षि वा इममिति । तस्य सोमो हविरासीत् । स चतुर्होत्राऽतप्यत । सोऽताम्यत् । स भूरिति व्याहरत् । स भूमिमसृजत । अग्निहोत्रं दर्शपूर्णमासौ यजूꣳषि । स द्वितीयमतप्यत । सोऽताम्यत् । स भुव इति व्याहरत् ॥ २। २। ४। २॥

२३ सोऽन्तरिक्षमसृजत । चातुर्मास्यानि सामानि । स तृतीयमतप्यत । सोऽताम्यत् । स सुवरिति व्याहरत् । स दिवमसृजत । अग्निष्टोममुक्थ्यमतिरात्रमृचः । एता वै व्याहृतय इमे लोकाः । इमान्खलु वै लोकाननु प्रजाः पशवश्छन्दाꣳसि प्राजायन्त । य एवमेताः प्रजापतेः प्रथमा व्याहृतीः प्रजाता वेद ॥ २। २। ४। ३॥

२४ प्र प्रजया पशुभिर्मिथुनैर्जायते । स पञ्चहोतारमसृजत । स हविर्नाविन्दत । तस्मै सोमस्तनुवं प्रायच्छत् । एतत्ते हविरिति । स पञ्चहोत्राऽतप्यत । सोऽताम्यत् । स प्रत्यङ्ङबाधत । सोऽसुरानसृजत । तदस्याप्रियमासीत् ॥ २। २। ४। ४॥

२५ तद्दुर्वर्णꣳ हिरण्यमभवत् । तद्दुर्वर्णस्य हिरण्यस्य जन्म । स द्वितीयमतप्यत । सोऽताम्यत् । स प्राङबाधत । स देवानसृजत । तदस्य प्रियमासीत् । तथ्सुवर्णꣳ हिरण्यमभवत् । तथ्सुवर्णस्य हिरण्यस्य जन्म । य एवꣳ सुवर्णस्य हिरण्यस्य जन्म वेद ॥ २। २। ४। ५॥

२६ सुवर्ण आत्मना भवति । दुर्वर्णोऽस्य भ्रातृव्यः । तस्माथ्सुवर्णꣳ हिरण्यं भार्यम् । सुवर्ण एव भवति । ऐनं प्रियं गच्छति नाप्रियम् । स सप्तहोतारमसृजत । स सप्तहोत्रैव सुवर्गं लोकमैत् । त्रिणवेन स्तोमेनैभ्यो लोकेभ्योऽसुरान्प्राणुदत । त्रयस्त्रिꣳशेन प्रत्यतिष्ठत् । एकविꣳशेन रुचमधत्त ॥
२। २। ४। ६॥

२७ सप्तदशेन प्राजायत । य एवं विद्वान्थ्सोमेन यजते । सप्तहोत्रैव सुवर्गं लोकमेति । त्रिणवेन स्तोमेनैभ्यो लोकेभ्यो भ्रातृव्यान्प्रणुदते । त्रयस्त्रिꣳशेन प्रतितिष्ठति । एकविꣳशेन रुचं धत्ते । सप्तदशेन प्रजायते । तस्माथ्सप्तदशः स्तोमो न निर्हृत्यः ।

प्रजापतिर्वै सप्तदशः । प्रजापतिमेव मध्यतो धत्ते प्रजात्यै ॥ २। २। ४। ७॥ अनन्दद्भुव इति व्याहरद्वेदासीद्वेदाधत्त प्रजात्यै ॥ ४॥

२८ देवा वै वरुणमयाजयन् । स यस्यै यस्यै देवतायै दक्षिणामनयत् । तामव्लीनात् । तेऽब्रुवन् । व्यावृत्य प्रतिगृह्णाम । तथा नो दक्षिणा न व्लेष्यतीति । ते व्यावृत्य प्रत्यगृह्णन् । ततो वै तान्दक्षिणां नाव्लीनात् । य एवं विद्वान्व्यावृत्य दक्षिणां प्रतिगृह्णाति । नैनं दक्षिणा व्लीनाति ॥ २। २। ५। १॥

२९ राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यमित्याह । आग्नेयं वै हिरण्यम् । स्वयैवैनद्देवतया प्रतिगृह्णाति । सोमाय वास इत्याह । सौम्यं वै वासः । स्वयैवैनद्देवतया प्रतिगृह्णाति । रुद्राय गामित्याह । रौद्री वै गौः । स्वयैवैनां देवतया प्रतिगृह्णाति । वरुणायाश्वमित्याह ॥ २। २। ५। २॥

३० वारुणो वा अश्वः । स्वयैवैनं देवतया प्रतिगृह्णाति । प्राजापतये पुरुषमित्याह । प्राजापत्यो वै पुरुषः । स्वयैवैनं देवतया प्रतिगृह्णाति । मनवे तल्पमित्याह । मानवो वै तल्पः । स्वयैवैनं देवतया प्रतिगृह्णाति । उत्तानायाङ्गीरसायान इत्याह । इयं वा उत्तान आङ्गीरसः ॥ २। २। ५। ३॥

३१ अनयैवैनत्प्रति गृह्णाति । वैश्वानर्यर्चा रथं प्रतिगृह्णाति । वैश्वानरो वै देवतया रथः । स्वयैवैनं देवतया प्रतिगृह्णाति । तेनामृतत्वमश्यामित्याह । अमृतमेवाऽऽत्मन्धत्ते । वयो दात्र इत्याह । वय एवैनं कृत्वा । सुवर्गं लोकं गमयति । मयो मह्यमस्तु प्रतिग्रहीत्र इत्याह ॥ २। २। ५। ४॥

३२ यद्वै शिवम् । तन्मयः । आत्मन एवैषा परीत्तिः । क इदं कस्मा अदादित्याह । प्रजापतिर्वै कः । स प्रजापतये ददाति । कामः कामायेत्याह । कामेन हि ददाति । कामेन प्रतिगृह्णाति । कामो दाता कामः प्रतिग्रहीतेत्याह ॥ २। २। ५। ५॥

३३ कामो हि दाता । कामः प्रतिग्रहीता । कामꣳ समुद्रमाविशेत्याह । समुद्र इव हि कामः । नेव हि कामस्यान्तोऽस्ति । न समुद्रस्य । कामेन त्वा प्रतिगृह्णामीत्याह । येन कामेन प्रतिगृह्णाति । स एवैनममुष्मिं ल्लोके काम आगच्छति । कामैतत्त एषा ते काम दक्षिणेत्याह । काम एव तद्यजमानोऽमुष्मिं ल्लोके दक्षिणामिच्छति । न प्रतिग्रहीतरि । य एवं विद्वान्दक्षिणां प्रतिगृह्णाति । अनृणामेवैनां प्रतिगृह्णाति ॥ २। २। ५। ६॥

व्लीनात्यश्वमित्याहाङ्गीरसः प्रतिग्रहीत्र इत्याह प्रतिग्रहीतेत्याह दक्षिणेत्याह चत्वारि च ॥ ५॥

३४ अन्तो वा एष यज्ञस्य । यद्दशममहः । दशमेऽहन्थ्सर्पराज्ञिया ऋग्भिः स्तुवन्ति । यज्ञस्यैवान्तं गत्वा । अन्नाद्यमवरुन्धते । तिसृभिः स्तुवन्ति । त्रय इमे लोकाः । एभ्य एव लोकेभ्योऽन्नाद्यमवरुन्धते । पृश्निवतीर्भवन्ति । अन्नं वै पृश्नि ॥ २। २। ६। १॥
३५ अन्नमेवावरुन्धते । मनसा प्रस्तौति । मनसोद्गायति । मनसा प्रतिहरति । मन इव हि प्रजापतिः । प्रजापतेराप्त्यै । देवा वै सर्पाः । तेषामियँ राज्ञी । यथ्सर्पराज्ञिया ऋग्भिः स्तुवन्ति । अस्यामेव प्रतितिष्ठन्ति ॥ २। २। ६। २॥
३६ चतुर्होतॄन् होता व्याचष्टे । स्तुतमनुशँसति शान्त्यै । अन्तो वा एष यज्ञस्य । यद्दशममहः । एतत्खलु वै देवानां परमं गुह्यं ब्रह्म । यच्चतुर्होतारः । दशमेऽहग्ग्श्चतुर्होतॄन्व्याचष्टे । यज्ञस्यैवान्तं गत्वा । परमं देवानां गुह्यं ब्रह्मावरुन्धे । तदेव प्रकाशं गमयति ॥ २। २। ६। ३॥
३७ तदेनं प्रकाशं गतम् । प्रकाशं प्रजानां गमयति । वाचं यच्छति । यज्ञस्य धृत्यै । यजमानदेवत्यं वा अहः । भ्रातृव्यदेवत्या रात्रिः । अह्ना रात्रिं ध्यायेत् । भ्रातृव्यस्यैव तल्लोकं वृङ्क्ते । यद्दिवा वाचं विसृजेत् । अहर्भ्रातृव्यायोच्छिँषेत् । यन्नक्तं विसृजेत् । रात्रिं भ्रातृव्यायोच्छिँषेत् । अधिवृक्षसूर्ये वाचं विसृजति । एतावन्तमेवास्मै लोकमुच्छिँषति । यावदादित्योऽस्तमेति ॥ २। २। ६। ४॥ पृश्नि तिष्ठन्ति गमयति शिँषेत्पञ्च च ॥ ६॥
३८ प्रजापतिः प्रजा असृजत । ताः सृष्टाः समश्लिष्यन् । ता रूपेणानुप्राविशत् । तस्मादाहुः । रूपं वै प्रजापतिरिति । ता नाम्नाऽनुप्राविशत् । तस्मादाहुः । नाम वै प्रजापतिरिति । तस्मादप्याऽमित्रौ संगत्य । नाम्ना चेद्ध्वयेते ॥ २। २। ७। १॥
३९ मित्रमेव भवतः । प्रजापतिर्देवासुरानसृजत । स इन्द्रमपि नासृजत । तं देवा अब्रुवन् । इन्द्रं नो जनयेति । स आत्मन्निन्द्रमपश्यत् । तमसृजत । तं त्रिष्टुग्वीर्यं भूत्वाऽनुप्राविशत् । तस्य वज्रः पञ्चदशो हस्त आपद्यत । तेनोदय्यासुरानभ्यभवत् ॥ २। २। ७। २॥
४० य एवं वेद । अभि भ्रातृव्यान्भवति । ते देवा असुरैर्विजित्य । सुवर्गं लोकमायन् । तेऽमुष्मिं ल्लोके व्यक्षुध्यन् । तेऽब्रुवन् । अमुतः प्रदानं वा उपजिजीविमेति । ते सप्तहोतारं यज्ञं विधायायास्यम् । आंगीरसं प्राहिण्वन् । एतेनामुत्र कल्पयेति ॥ २। २। ७। ३॥
४१ तस्य वा इयं क्लृप्तिः । यदिदं किंच । य एवं वेद । कल्पतेऽस्मै । स वा

अयं मनुष्येषु यज्ञः सप्तहोता । अमुत्र सद्यो देवेभ्यो हव्यं वहति । य एवं वेद । उपैनं यज्ञो नमति । सोऽमन्यत । अभि वा इमेऽस्मां ल्लोकादमुं लोकं कमिष्यन्त इति । स वाचस्पते हृदिति व्याहरत् । तस्मात्पुत्रो हृदयम् । तस्मादस्माल्लोकादमुं लोकं नाभिकामयन्ते । पुत्रो हि हृदयम् ॥ २। २। ७। ४॥ ह्वयेते अभवत्कल्पयेतीति चत्वारि च ॥ ७॥

४२ देवा वै चतुर्होतृभिर्यज्ञमतन्वत । ते वि पाप्मना भ्रातृव्येणाजयन्त । अभि सुवर्गं लोकमजयन् । य एवं विद्वाग्श्चतुर्होतृभिर्यज्ञं तनुते । वि पाप्मना भ्रातृव्येण जयते । अभि सुवर्गं लोकं जयति । षड्ढोत्रा प्रायणीयमा सादयति । अमुष्मै वै लोकाय षड्ढोता । घ्नन्ति खलु वा एतथ्सोमम् । यदभिषुण्वन्ति ॥ २। २। ८। १॥

४३ ऋजुधैवैनममुं लोकं गमयति । चतुर्होत्राऽऽतिथ्यम् । यशो वै चतुर्होता । यश एवात्मन्धत्ते । पञ्चहोत्रा पशुमुपसादयति । सुवर्ग्यो वै पञ्चहोता । यजमानः पशुः । यजमानमेव सुवर्गं लोकं गमयति । ग्रहान्गृहीत्वा सप्तहोतारं जुहोति । इन्द्रियं वै सप्तहोता ॥ २। २। ८। २॥

४४ इन्द्रियमेवात्मन्धत्ते । यो वै चतुर्होतॄननुसवनं तर्पयति । तृप्यति प्रजया पशुभिः । उपैनꣳ सोमपीथो नमति । बहिष्पवमाने दशहोतारं व्याचक्षीत । माध्यंदिने पवमाने चतुर्होतारम् । आर्भवे पवमाने पञ्चहोतारम् । पितृयज्ञे षड्ढोतारम् । यज्ञायज्ञियस्य स्तोत्रे सप्तहोतारम् । अनुसवनमेवैनाग्स्तर्पयति ॥ २। २। ८। ३॥

४५ तृप्यति प्रजया पशुभिः । उपैनꣳ सोमपीथो नमति । देवा वै चतुर्होतृभिः सत्रमासत । ऋद्धिपरिमितं यशस्कामाः । तेऽब्रुवन् । यन्नः प्रथमं यश ऋच्छात् । सर्वेषां नस्तथ्सहासदिति । सोमश्चतुर्होत्रा । अग्निः पञ्चहोत्रा । धाता षड्ढोत्रा ॥ २। २। ८। ४॥

४६ इन्द्रः सप्तहोत्रा । प्रजापतिर्दशहोत्रा । तेषाꣳ सोमꣳ राजानं यश आर्च्छत् । तन्न्यकामयत । तेनापाक्रामत् । तेन प्रलायमचरत् । तं देवाः प्रैषैः प्रैषमैच्छन् । तत्प्रैषाणां प्रैषत्वम् । निविद्भिर्न्यवेदयन् । तन्निविदां निवित्त्वम् ॥ २। २। ८। ५॥

४७ आप्रीभिराप्नुवन् । तदाप्रीणामाप्रित्वम् । तमघ्नन् । तस्य यशो व्यगृह्णत । ते ग्रहा अभवन् । तद्ग्रहाणां ग्रहत्वम् । यस्यैवं विदुषो ग्रहा गृह्यन्ते । तस्य त्वेव गृहीताः । तेऽब्रुवन् । यो वै नः श्रेष्ठोऽभूत् ॥ २। २। ८। ६॥

४८ तमवधिष्म । पुनरिमꣳ सुवामहा इति । तं छन्दोभिरसुवन्त । तच्छन्दसां छन्दस्त्वम्

। साम्ना समानयन् । तथ्साम्नः सामत्वम् । उक्थैरुदस्थापयन् । तदुक्थानामुक्थत्वम् । य एवं वेद । प्रत्येव तिष्ठति ॥ २। २। ८। ७॥
४९ सर्वमायुरेति । सोमो वै यशः । य एवं विद्वान्थ्सोममागच्छति । यश एवैनमृच्छति । तस्मादाहुः । यश्चैवं वेद यश्च न । तावुभौ सोममागच्छतः । सोमो हि यशः । तं त्वाव यश ऋच्छतीत्याहुः । यः सोमे सोमं प्राहेति । तस्माथ्सोमे सोमः प्रोच्यः । यश एवैनमृच्छति ॥ २। २। ८। ८॥ अभिषुण्वन्ति सप्तहोता तर्पयति षड्ढोत्रा निविक्त्वमभूत्तिष्ठति प्राहेति द्वे च ॥ ८॥
५० इदं वा अग्रे नैव किंचनासीत् । न द्यौरासीत् । न पृथिवी । नान्तरिक्षम् । तदसदेव सन्मनोऽकुरुत स्यामिति । तदतप्यत । तस्मात्तेपानाद्धूमोऽजायत । तद्भूयोऽतप्यत । तस्मात्तेपानादग्निरजायत । तद्भूयोऽतप्यत ॥ २। २। ९। १॥
५१ तस्मात्तेपानाज्ज्योतिरजायत । तद्भूयोऽतप्यत । तस्मात्तेपानादर्चिरजायत । तद्भूयोऽतप्यत । तस्मात्तेपानान्मरीचयोऽजायन्त । तद्भूयोऽतप्यत । तस्मात्तेपानादुदारा अजायन्त । तद्भूयोऽतप्यत । तदभ्रमिव समहन्यत । तद्वस्तिमभिनत् ॥ २। २। ९। २॥
५२ स समुद्रोऽभवत् । तस्माथ्समुद्रस्य न पिबन्ति । प्रजननमिव हि मन्यन्ते । तस्मात्पशोर्जायमानादापः पुरस्ताद्यन्ति । तद्दशहोताऽन्वसृज्यत । प्रजापतिर्वै दशहोता । य एवं तपसो वीर्यं विद्वाग्स्तप्यते । भवत्येव । तद्वा इदमापः सलिलमासीत् । सोऽरोदीत्प्रजापतिः ॥ २। २। ९। ३॥
५३ स कस्मा अज्ञि । यद्यस्या अप्रतिष्ठाया इति । यदप्स्ववापद्यत । सा पृथिव्यभवत् । यद्व्यमृष्ट । तदन्तरिक्षमभवत् । यदूर्ध्वमुदमृष्ट । सा द्यौरभवत् । यदरोदीत् । तदनयो रोदस्त्वम् ॥
२। २। ९। ४॥
५४ य एवं वेद । नास्य गृहे रुदन्ति । एतद्वा एषां लोकानां जन्म । य एवमेषां लोकानां जन्म वेद । नैषु लोकेष्वार्तिमार्च्छति । स इमां प्रतिष्ठामविन्दत । स इमां प्रतिष्ठां वित्त्वाऽकामयत प्रजायेयेति । स तपोऽतप्यत । सोऽन्तर्वानभवत् । स जघनादसुरानसृजत ॥ २। २। ९। ५॥
५५ तेभ्यो मृन्मये पात्रेऽन्नमदुहत् । याऽस्य सा तनूरासीत् । तामपाहत । सा तमिस्राऽभवत् । सोऽकामयत प्रजायेयेति । स तपोऽतप्यत । सोऽन्तर्वानभवत् । स प्रजननादेव प्रजा असृजत । तस्मादिमा भूयिष्ठाः । प्रजननाद्ध्येना असृजत ॥ २।

२। १। ६॥
५६ ताभ्यो दारुमये पात्रे पयोऽदुहत् । याऽस्य सा तनूरासीत् । तामपाहत । सा ज्योथ्स्नाऽभवत् । सोऽकामयत प्रजायेयेति । स तपोऽतप्यत । सोऽन्तर्वानभवत् । स उपपक्षाभ्यामेवर्तूनसृजत । तेभ्यो रजते पात्रे घृतमदुहत् । याऽस्य सा तनूरासीत् ।
५७ तामपाहत । सोऽहोरात्रयोः सन्धिरभवत् । सोऽकामयत प्रजायेयेति । स तपोऽतप्यत । सोऽन्तर्वानभवत् । स मुखाद्देवानसृजत । तेभ्यो हरिते पात्रे सोममदुहत् । याऽस्य सा तनूरासीत् । तामपाहत । तदहरभवत् ॥ २। २। ९। ८॥
५८ एते वै प्रजापतेर्दोहाः । य एवं वेद । दुह एव प्रजाः । दिवा वै नोऽभूदिति । तद्देवानां देवत्वम् । य एवं देवानां देवत्वं वेद । देववानेव भवति । एतद्वा अहोरात्राणां जन्म । य एवमहोरात्राणां जन्म वेद । नाहोरात्रेष्वार्तिमार्च्छति ॥ २। २। ९। ९॥
५९ असतोऽधि मनोऽसृज्यत । मनः प्रजापतिमसृजत । प्रजापतिः प्रजा असृजत । तद्वा इदं मनस्येव परमं प्रतिष्ठितम् । यदिदं किंच । तदेतच्छ्वोवस्यसं नाम ब्रह्म । व्युच्छन्ती व्युच्छन्त्यस्मै वस्यसी वस्यसी व्युच्छति । प्रजायते प्रजया पशुभिः । प्र परमेष्ठिनो मात्रामाप्नोति । य एवं वेद ॥ २। २। ९। १०॥
अग्निरजायत तद्भूयोऽतप्यताभिनदरोदीत्प्रजापती रोदस्त्वमसृजतासृजत घृतमदुहद्याऽस्य सा तनूरासीदहरभवद्व्युच्छति वेद ॥ ९॥ इदं धूमोऽग्निर्ज्योतिरर्चिर्मरीचय उदारास्तदभ्रꣳ स जघनाथ्सा तमिस्रा सप्रजननाथ्सा जोथ्स्ना स उपपक्षाभ्याꣳ सोऽहोरात्रयोः सन्धिः स मुखात्तदहर्देववान्मृन्मये दारुमये रजते हरिते तेभ्यस्ताभ्यो द्वे तेऽन्नं पयो घृतꣳ सोमम् ॥
६० प्रजापतिरिन्द्रमसृजताऽऽनुजावरं देवानाम् । तं प्राहिणोत् । परेहि । एतेषां देवानामधिपतिरेधीति । तं देवा अब्रुवन् । कस्त्वमसि । वयं वै त्वच्छ्रेयाꣳसः स्म इति । सोऽब्रवीत् । कस्त्वमसि वयं वै त्वच्छ्रेयाꣳसः स्म इति मा देवा अवोचन्निति । अथ वा इदं तर्हि प्रजापतौ हर आसीत् ॥ २। २। १०। १॥
६१ यदस्मिन्नादित्ये । तदेनमब्रवीत् । एतन्मे प्रयच्छ । अथाहमेतेषां देवानामधिपतिर्भविष्यामीति । कोऽह२ꣳ स्यामित्यब्रवीत् । एतत्प्रदायेति । एतथ्स्या इत्यब्रवीत् । यदेतद्ब्रवीषीति । को ह वै नाम प्रजापतिः । य एवं वेद ॥ २। २। १०। २॥
६२ विदुरेनं नाम्ना । तदस्मै रुक्मं कृत्वा प्रत्यमुञ्चत् । ततो वा इन्द्रो देवानामधिपतिरभवत्

। य एवं वेद । अधिपतिरेव समानानां भवति । सोऽमन्यत । किं किं वा अकरमिति । स चन्द्रं म आहरेति प्रालपत् । तच्चन्द्रमसश्चन्द्रमस्त्वम् । य एवं वेद ॥ २। २। १०। ३॥
६३ चन्द्रवानेव भवति । तं देवा अब्रुवन् । सुवीऱ्यो मर्या यथा गोपायत इति । तथ्सूर्यस्य सूर्यत्वम् । य एवं वेद । नैनं दभ्नोति । कश्चनास्मिन्वा इदमिन्द्रियं प्रत्यस्थादिति । तदिन्द्रस्येन्द्रत्वम् । य एवं वेद । इन्द्रियाव्येव भवति ॥ २। २। १०। ४॥
६४ अयं वा इदं परमोऽभूदिति । तत्परमेष्ठिनः परमेष्ठित्वम् । य एवं वेद । परमामेव काष्ठां गच्छति । तं देवाः समन्तं पर्यविशन् । वसवः पुरस्तात् । रुद्रा दक्षिणतः । आदित्याः पश्चात् । विश्वे देवा उत्तरतः । अंगिरसः प्रत्यञ्चम् ॥ २। २। १०। ५॥
६५ साध्याः पराञ्चम् । य एवं वेद । उपैनꣳ समानाः संविशन्ति । स प्रजापतिरेव भूत्वा प्रजा आवयत् । ता अस्मै नातिष्ठन्तान्नाद्याय । ता मुखं पुरस्तात्पश्यन्तीः । दक्षिणतः पर्यायन् । स दक्षिणतः पर्यवर्तयत । ता मुखं पुरस्तात्पश्यन्तीः । मुखं दक्षिणतः ॥ २। २। १०। ६॥
६६ पश्चात्पर्यायन् । स पश्चात्पर्यवर्तयत । ता मुखं पुरस्तात्पश्यन्तीः । मुखं दक्षिणतः । मुखं पश्चात् । उत्तरतः पर्यायन् । स उत्तरतः पर्यवर्तयत । ता मुखं पुरस्तात्पश्यन्तीः । मुखं दक्षिणतः । मुखं पश्चात् ।
६७ मुखमुत्तरतः । ऊर्ध्वा उदायन् । स उपरिष्टान्न्यवर्तयत । ताः सर्वतोमुखो भूत्वाऽऽवयत् । ततो वै तस्मै प्रजा अतिष्ठन्तान्नाद्याय । य एवं विद्वान्परि च वर्तयते नि च । प्रजापतिरेव भूत्वा प्रजा अत्ति । तिष्ठन्तेऽस्मै प्रजा अन्नाद्याय । अन्नाद एव भवति ॥ २। २। १०। ७॥ आसीद्वेद चन्द्रमस्त्वं य एवं वेदेन्द्रियाव्येव भवति प्रत्यञ्चं मुखं दक्षिणतो मुखं पश्चान्नव च ॥ १०॥
६८ प्रजापतिरकामयत बहोर्भूयान्थ्स्यामिति । स एतं दशहोतारमपश्यत् । तं प्रायुङ्क्त । तस्य प्रयुक्ति बहोर्भूयानभवत् । यः कामयेत बहोर्भूयान्थ्स्यामिति । स दशहोतारं प्रयुञ्जीत । बहोरेव भूयान्भवति । सोऽकामयत वीरो म आजायेतेति । स दशहोतुश्चतुर्होतारं निरमिमीत । तं प्रायुङ्क्त ॥
६९ तस्य प्रयुक्तीन्द्रोऽजायत । यः कामयेत वीरो म आजायेतेति । स चतुर्होतारं प्रयुञ्जीत । आऽस्य वीरो जायते । सोऽकामयत पशुमान्थ्स्यामिति । स चतुर्होतुः पञ्चहोतारं निरमिमीत । तं प्रायुङ्क्त । तस्य प्रयुक्ति पशुमानभवत् । यः कामयेत पशुमान्थ्स्यामिति

। स पञ्चहोतारं प्रयुञ्जीत ॥ २। २। ११। २॥
७० पशुमानेव भवति । सोऽकामयतर्तवो मे कल्पेरन्निति । स पञ्चहोतुः षड्ढोतारं निरमिमीत । तं प्रायुङ्क्त । तस्य प्रयुक्त्यृतवोऽस्मा अकल्पन्त । यः कामयेतर्तवो मे कल्पेरन्निति । स षड्ढोतारं प्रयुञ्जीत । कल्पन्तेऽस्मा ऋतवः । सोऽकामयत सोमपः सोमयाजी स्याम् । आ मे सोमपः सोमयाजी जायेतेति ॥ २। २। ११। ३॥
७१ स षड्ढोतुः सप्तहोतारं निरमिमीत । तं प्रायुङ्क्त । तस्य प्रयुक्ति सोमपः सोमयाज्यभवत् । आऽस्य सोमपः सोमयाज्यजायत । यः कामयेत सोमपः सोमयाजी स्याम् । आ मे सोमपः सोमयाजी जायेतेति । स सप्तहोतारं प्रयुञ्जीत । सोमप एव सोमयाजी भवति । आऽस्य सोमपः सोमयाजी जायते । स वा एष पशुः पञ्चधा प्रतितिष्ठति ॥ २। २। ११। ४॥
७२ पद्भिर्मुखेन । ते देवाः पशून्, वित्त्वा । सुवर्गं लोकमायन् । तेऽमुष्मिं ल्लोके व्यक्षुध्यन् । तेऽब्रुवन् । अमुतः प्रदानं वा उपजिजीविमेति । ते सप्तहोतारं यज्ञं विधायायास्यम् । आंगीरसं प्राहिण्वन् । एतेनामुत्र कल्पयेति । तस्य वा इयं क्लृप्तिः ॥ २। २। ११। ५॥
७३ यदिदं किंच । य एवं वेद । कल्पतेऽस्मै । स वा अयं मनुष्येषु यज्ञः सप्तहोता । अमुत्र सद्भ्यो देवेभ्यो हव्यं वहति । य एवं वेद । उपैनं यज्ञो नमति । यो वै चतुर्होतृणां निदानं वेद । निदानवान्भवति । अग्निहोत्रं वै दशहोतुर्निदानम् । दर्शपूर्णमासौ चतुर्होतुः । चातुर्मास्यानि पञ्चहोतुः । पशुबन्धः षड्ढोतुः । सौम्योऽध्वरः सप्तहोतुः । एतद्वै चतुर्होतृणां निदानम् । य एवं वेद । निदानवान्भवति ॥ २। २। ११। ६॥ अमिमीत तं प्रायुङ्क्त पञ्चहोतारं प्रयुञ्जीत जायेतेति तिष्ठति क्लृप्तिर्दशहोतुर्निदानꣳ सप्त च ॥ ११॥
प्रजापतिरकामयत प्रजाः सृजेयेति प्रजापतिरकामयत दर्शपूर्णमासौ सृजेयेति प्रजापतिरकामयत प्रजायेयेति स तपः स त्रिवृतं प्रजापतिरकामयत दशहोतारं तेन दशधाऽऽत्मानं देवा वै वरुणमन्तो वै प्रजापतिस्ताः सृष्टाः समश्लिष्यन्देवा वै चतुर्होतृभिरिदं वा अग्रे प्रजापतिरिन्द्रं प्रजापतिरकामयत बहोर्भूयानेकादश ॥ ११॥
प्रजापतिस्तद्ग्रहस्य ग्रहत्वं प्रजापतिरकामयतानयैवैनत्तस्य वा इयं क्लृप्तिस्तस्मात्तेपानाज्ज्योतिर्यदस्मि
स षड्ढोतुः सप्तहोतारं त्रिसप्ततिः ॥ ७३॥
प्रजापतिरकामयत निदानवान्भवति ॥

## द्वितीयाष्टके तृतीयः प्रपाठकः ३

१ ब्रह्मवादिनो वदन्ति । किं चतुर्होतृणां चतुर्होतृत्वमिति । यदेवैषु चतुर्धा होतारः । तेन चतुर्होतारः । तस्माच्चतुर्होतार उच्यन्ते । तच्चतुर्होतृणां चतुर्होतृत्वम् । सोमो वै चतुर्होता । अग्निः पञ्चहोता । धाता षड्ढोता । इन्द्रः सप्तहोता ॥ २। ३। १। १॥
२ प्रजापतिर्दशहोता । य एवं चतुर्होतृणामृद्धिं वेद । ऋध्नोत्येव । य एषामेवं बन्धुतां वेद । बन्धुमान्भवति । य एषामेवं क्लृप्तिं वेद । कल्पतेऽस्मै । य एषामेवमायतनं वेद । आयतनवान्भवति । य एषामेवं प्रतिष्ठां वेद ॥ २। ३। १। २॥
३ प्रत्येव तिष्ठति । ब्रह्मवादिनो वदन्ति । दशहोता चतुर्होता । पञ्चहोता षड्ढोता सप्तहोता । अथ कस्माच्चतुर्होतार उच्यन्त इति । इन्द्रो वै चतुर्होता । इन्द्रः खलु वै श्रेष्ठो देवतानामुपदेशनात् । य एवमिन्द्रग्ग् श्रेष्ठं देवतानामुपदेशनाद्वेद । वसिष्ठः समानानां भवति । तस्माच्छ्रेष्ठमायन्तं प्रथमेनैवानुबुध्यन्ते । अयमागन् । अयमवासादिति । कीर्तिरस्य पूर्वाऽऽगच्छति जनतामायतः । अथो एनं प्रथमेनैवानु बुध्यन्ते । अयमागन् । अयमवासादिति ॥ २। ३। १। ३॥
सप्तहोता प्रतिष्ठां वेद बुध्यन्ते षट्च ॥ १॥
४ दक्षिणां प्रतिग्रहीष्यन्थ्सप्तदशकृत्वोऽपान्यात् । आत्मानमेव समिन्धे । तेजसे वीर्याय । अथो प्रजापतिरेवैनां भूत्वा प्रतिगृह्णाति । आत्मनोऽनार्त्यै । यद्येनमार्त्विज्याद्वृतꣳ सन्तं निरहरेरन् । आग्नीध्रे जुहुयाद्दशहोतारम् । चतुर्गृहीतेनाज्येन । पुरस्तात्प्रत्यङ्तिष्ठन् । प्रतिलोमं विग्राहम् ॥ २। ३। २। १॥
५ प्राणानेवास्योपदासयति । यद्येनं पुनरुपशिक्षेयुः । आग्नीध्र एव जुहुयाद्दशहोतारम् । चतुर्गृहीतेनाज्येन । पश्चात्प्राङासीनः । अनुलोममविग्राहम् । प्राणानेवास्मै कल्पयति । प्रायश्चित्ती वाग्घोतेत्यृतुमुख ऋतुमुखे जुहोति । ऋतूनेवास्मै कल्पयति । कल्पन्तेऽस्मा ऋतवः ॥ २। ३। २। २॥
६ क्लृप्ता अस्मा ऋतव आयन्ति । षड्ढोता वै भूत्वा प्रजापतिरिदꣳ सर्वमसृजत । स मनोऽसृजत । मनसोऽधि गायत्रीमसृजत । तद्गायत्रीं यश आर्च्छत् । तामाऽलभत । गायत्रिया अधि छन्दाग्स्यसृजत । छन्दोभ्योऽधि साम । तथ्साम यश आर्च्छत् । तदाऽलभत ॥ २। ३। २। ३॥
७ साम्नोऽधि यजूग्ंष्यसृजत । यजुर्भ्योऽधि विष्णुम् । तद्विष्णुं यश आर्च्छत् ।

तमाऽलभत । विष्णोरध्योषधीरसृजत । ओषधीभ्योऽधि सोमम् । तथ्सोमं यश आर्च्छत् । तमाऽलभत । सोमादधि पशूनसृजत । पशुभ्योऽधीन्द्रम् ॥ २। ३। २। ४॥
८ तदिन्द्रं यश आर्च्छत् । तदेनं नातिप्राच्यवत । इन्द्र इव यशस्वी भवति । य एवं वेद । नैनं यशोऽति प्रच्यवते । यद्वा इदं किंच । तथ्सर्वमुत्तान एवांगीरसः प्रत्यगृह्णात् । तदेनं प्रतिगृहीतं नाहिनत् । यत्किंच प्रतिगृह्णीयात् । तथ्सर्वमुत्तानस्त्वाऽऽङ्गीरसः प्रतिगृह्णात्वित्येव प्रतिगृह्णीयात् । इयं वा उत्तान आङ्गीरसः । अनयैवैनत्प्रतिगृह्णाति । नैनꣳ हिनस्ति । बर्हिषा प्रतीयाद्गां वाऽश्वं वा । एतद्वै पशूनां प्रियं धाम । प्रियेणैवैनं धाम्ना प्रत्येति ॥ २। ३। २। ५॥ विग्राहमृतवस्तदाऽलभतेन्द्रं गृह्णीयात्षट्च ॥ २॥
९ यो वा अविद्वान्निवर्तयते । विशीर्षा स पाप्माऽमुष्मिं ल्लोके भवति । अथ यो विद्वान्निवर्तयते । सशीर्षा विपाप्माऽमुष्मिं ल्लोके भवति । देवता वै सप्त पुष्टिकामा न्यवर्तयन्त । अग्निश्च पृथिवी च । वायुश्चान्तरिक्षं च । आदित्यश्च द्यौश्च चन्द्रमाः । अग्निर्न्यवर्तयत । स साहस्रमपुष्यत् ॥ २। ३। ३। १॥
१० पृथिवी न्यवर्तयत । सौषधीभिर्वनस्पतिभिरपुष्यत् । वायुर्न्यवर्तयत । स मरीचीभिरपुष्यत् । अन्तरिक्षं न्यवर्तयत । तद्वयोभिरपुष्यत् । आदित्यो न्यवर्तयत । स रश्मिभिरपुष्यत् । द्यौर्न्यवर्तयत । सा नक्षत्रैरपुष्यत् । चन्द्रमा न्यवर्तयत । सोऽहोरात्रैरर्धमासैर्मासैर्ऋतुभिः संवथ्सरेणापुष्यत् । तान्पोषान्पुष्यति । याग्स्तेऽपुष्यन् । य एवं विद्वान्नि च वर्तयते परि च ॥ २। ३। ३। २॥ अपुष्यन्नक्षत्रैरपुष्यत्पञ्च च ॥ ३॥
११ तस्य वा अग्नेर्हिरण्यं प्रतिजग्रहुषः । अर्धमिन्द्रियस्यापाक्रामत् । तदेतेनैव प्रत्यगृह्णात् । तेन वै सोऽर्धमिन्द्रियस्यात्मन्नुपाधत्त । अर्धमिन्द्रियस्यात्मन्नुपा धत्ते । य एवं विद्वान् हिरण्यं प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । अर्धमस्येन्द्रियस्यापक्रामति । तस्य वै सोमस्य वासः प्रतिजग्रहुषः । तृतीयमिन्द्रियस्यापाक्रामत् ॥ २। ३। ४। १॥
१२ तदेतेनैव प्रत्यगृह्णात् । तेन वै स तृतीयमिन्द्रियस्यात्मन्नुपाधत्त । तृतीयमिन्द्रियस्यात्मन्नुपा धत्ते । य एवं विद्वान्, वासः प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । तृतीयमस्येन्द्रियस्यापक्रामति । तस्य वै रुद्रस्य गां प्रतिजग्रहुषः । चतुर्थमिन्द्रियस्यापाक्रामत् । तामेतेनैव प्रत्यगृह्णात् । तेन वै स चतुर्थमिन्द्रियस्यात्मन्नुपाधत्त ॥ २। ३। ४। २॥
१३ चतुर्थमिन्द्रियस्यात्मन्नुपाधत्ते । य एवं विद्वान्गां प्रतिगृह्णाति । अथ

योऽविद्वान्प्रतिगृह्णाति । चतुर्थमस्येन्द्रियस्यापक्रामति । तस्य वै वरुणस्याश्वं प्रतिजग्रहुषः । पञ्चममिन्द्रियस्यापाक्रामत् । तमेतेनैव प्रत्यगृह्णात् । तेन वै स पञ्चममिन्द्रियस्यात्मन्नुपाधत्त । पञ्चममिन्द्रियस्यात्मन्नुपाधत्ते । य एवं विद्वानश्वं प्रतिगृह्णाति ॥ २। ३। ४। ३॥

१४ अथ योऽविद्वान्प्रतिगृह्णाति । पञ्चममस्येन्द्रियस्याप क्रामति । तस्य वै प्रजापतेः पुरुषं प्रतिजग्रहुषः । षष्ठमिन्द्रियस्यापाक्रामत् । तमेतेनैव प्रत्यगृह्णात् । तेन वै स षष्ठमिन्द्रियस्यात्मन्नुपाधत्त । षष्ठमिन्द्रियस्यात्मन्नुपाधत्ते । य एवं विद्वान्पुरुषं प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । षष्ठमस्येन्द्रियस्यापक्रामति ॥ २। ३। ४। ४॥

१५ तस्य वै मनोस्तल्पं प्रतिजग्रहुषः । सप्तममिन्द्रियस्यापाक्रामत् । तमेतेनैव प्रत्यगृह्णात् । तेन वै स सप्तममिन्द्रियस्यात्मन्नुपाधत्त । सप्तममिन्द्रियस्यात्मन्नुपा धत्ते । य एवं विद्वाग्स्तल्पं प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । सप्तममस्येन्द्रियस्यापक्रामति । तस्य वा उत्तानस्याङ्गीरसस्याप्राणत् प्रतिजग्रहुषः । अष्टममिन्द्रियस्यापाक्रामत् ॥ २। ३। ४। ५॥

१६ तदेतेनैव प्रत्यगृह्णात् । तेन वै सोऽष्टम मिन्द्रियस्यात्मन्नुपाधत्त । अष्टममिन्द्रियस्यात्मन्नुपाधत्ते । य एवं विद्वानप्राणत्प्रतिगृह्णाति । अथ योऽविद्वान्प्रतिगृह्णाति । अष्टममस्येन्द्रियस्यापक्रामति । यद्वा इदं किंच । तथ्सर्वमुत्तान एवांगीरसः प्रत्यगृह्णात् । तदेनं प्रतिगृहीतं नाहिनत् । यत्किंच प्रतिगृह्णीयात् । तथ्सर्वमुत्तानस्त्वाऽऽङ्गीरसः प्रतिगृह्णात्वित्येव प्रतिगृह्णीयात् । इयं वा उत्तान आङ्गीरसः । अनयैवैनत्प्रतिगृह्णाति । नैनँ हिनस्ति ॥ २। ३। ४। ६॥

तृतीयमिन्द्रियस्यापाक्रामच्चतुर्थमिन्द्रियस्यात्म न्नुपाधत्ताश्वं प्रतिगृह्णाति षष्ठमस्येन्द्रियस्याप क्रामत्यष्टममिन्द्रियस्यापाक्रामत् प्रतिगृह्णीयाच्चत्वारि च ॥ ४॥ तस्य वा अग्नेर् हिरण्यँ सोमस्य वासस्तदेतेन रुद्रस्य गां तामेतेन वरुणस्याश्वं प्रजापतेः पुरुषं मनोस्तल्पं तमेतेनोत्तानस्य तदेतेनाप्राणद्यद्वै । अर्धं तृतीयमष्टमं तच्चतुर्थं तां पञ्चमँ षष्ठँ सप्तमं तम् । तदेतेन द्वे तामेतेनैकं तमेतेन त्रीणि तदेतेनैकम् ॥

१७ ब्रह्मवादिनो वदन्ति । यद्दशहोतारः सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् । केन प्रजा असृजन्तेति । प्रजापतिना वै ते गृहपतिनाऽऽर्ध्नुवन् । तेन प्रजा असृजन्त । यच्चतुर्होतारः सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् । केनौषधीरसृजन्तेति । सोमेन वै ते गृहपतिनाऽऽर्ध्नुवन् ॥ २। ३। ५। १॥

१८ तेनौषधीरसृजन्त । यत्पञ्चहोतारः सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् । केनैभ्यो लोकेभ्योऽसुरान्प्राणुदन्त । केनैषां पशूनवृञ्जतेति । अग्निना वै ते गृहपतिनाऽऽर्ध्नुवन् । तेनैभ्यो लोकेभ्योऽसुरान्प्राणुदन्त । तेनैषां पशूनवृञ्जत । यत्षड्ढोतारः सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् ॥ २। ३। ५। २॥

१९ केनर्तूनकल्पयन्तेति । धात्रा वै ते गृहपतिनाऽऽर्ध्नुवन् । तेनर्तूनकल्पयन्त । यथ्सप्तहोतारः सत्रमासत । केन ते गृहपतिनाऽऽर्ध्नुवन् । केन सुवरायन् । केनेमान् लोकान्थ्समतन्वन्निति । अर्यम्णा वै ते गृहपतिनाऽऽर्ध्नुवन् । तेन सुवरायन् । तेनेमान् लोकान्थ्समतन्वन्निति ॥ २। ३। ५। ३॥

२० एते वै देवा गृहपतयः । तान्, य एवं विद्वान् । अप्यन्यस्य गार्हपते दीक्षते । अवान्तरमेव सत्रिणामृध्नोति ॥

यो वा अर्यमणं वेद । दानकामा अस्मै प्रजा भवन्ति । यज्ञो वा अर्यमा । आर्या वसतिरिति वै तमाहुर्यं प्रशꣳसन्ति । आर्यावसतिर्भवति । य एवं वेद ॥

२१ यद्वा इदं किंच । तथ्सर्वं चतुर्होतारः । चतुर्होतृभ्योऽधि यज्ञो निर्मितः । स य एवं विद्वान्, विवदेत । अहमेव भूयो वेद । यश्चतुर्होतृन् वेदेति । स ह्येव भूयो वेद । यश्चतुर्होतृन् वेद । यो वै चतुर्होतृणाꣳ होतृन् वेद । सर्वासु प्रजास्वन्नमत्ति ॥ २। ३। ५। ५॥

२२ सर्वा दिशोऽभिजयति । प्रजापतिर्वै दशहोतृणाꣳ होता । सोमश्चतुर्होतृणाꣳ होता । अग्निः पञ्चहोतृणाꣳ होता । धाता षड्ढोतृणाꣳ होता । अर्यमा सप्तहोतृणाꣳ होता । एते वै चतुर्होतृणाꣳ होतारः । तान्, य एवं वेद । सर्वासु प्रजास्वन्नमत्ति । सर्वा दिशोऽभिजयति ॥ २। ३। ५। ६॥ आर्ध्नुवन्नार्ध्नुवन्नित्येवं वेदात्ति सर्वा दिशोभि जयति ॥ ५॥ वै तेन सत्रं केन ॥

२३ प्रजापतिः प्रजाः सृष्ट्वा व्यस्रꣳसत । स हृदयं भूतोऽशयत् । आत्मन् हा ३ इत्यह्वयत् । आपः प्रत्यशृण्वन् । ता अग्निहोत्रेणैव यज्ञक्रतुनोपपर्यावर्तन्त । ताः कुसिन्धमुपौहन् । तस्मादग्निहोत्रस्य यज्ञक्रतोः । एक ऋत्विक् । चतुष्कृत्वोऽह्वयत् । अग्निर्वायुरादित्यश्चन्द्रमाः ॥ २। ३। ६। १॥

२४ ते प्रत्यशृण्वन् । ते दर्शपूर्णमासाभ्यामेव यज्ञक्रतुनोपपर्यावर्तन्त । त उपौह२ꣳश्चत्वार्यङ्गानि । तस्माद्दर्शपूर्णमासयोर्यज्ञक्रतोः । चत्वार ऋत्विजः । पञ्चकृत्वोऽह्वयत् । पशवः प्रत्यशृण्वन् । ते चातुर्मास्यैरेव यज्ञक्रतुनोपपर्यावर्तन्त

। त उपौहं ल्लोम छवीं माᳪ समस्थि मज्ज्ञानम् । तस्माच्चातुर्मास्यानां यज्ञक्रतोः ॥ २। ३। ६। २॥
२५ पञ्चर्त्विजः । षट्कृत्वोऽह्वयत् । ऋतवः प्रत्यश्रृण्वन् । ते पशुबन्धेनैव यज्ञक्रतुनोप पर्यावर्तन्त । त उपौहन्थ्स्तनावाण्डौ शिश्नमवाञ्चं प्राणम् । तस्मात्पशुबन्धस्य यज्ञक्रतोः । षड्डृत्विजः । सप्तकृत्वोऽह्वयत् । होत्राः प्रत्यश्रृण्वन् । ताः सौम्येनैवाध्वरेण यज्ञक्रतुनोपपर्यावर्तन्त ॥ २। ३। ६। ३॥
२६ ता उपौहन्थ्सप्तशीर्षण्यान्प्राणान् । तस्माथ्सौम्यस्याध्वरस्य यज्ञक्रतोः । सप्त होत्राः प्राचीर्वषट्कुर्वन्ति । दशकृत्वोऽह्वयत् । तपः प्रत्यश्रृणोत् । तत्कर्मणैव संवथ्सरेण सर्वैर्यज्ञक्रतुभिरुप पर्यावर्तत । तथ्सर्वमात्मानमपरिवर्गमुपौहत् । तस्माथ्संवथ्सरे सर्वे यज्ञक्रतवोऽवरुध्यन्ते । तस्माद्दशहोता चतुर्होता । पञ्चहोता षड्ढोता सप्तहोता । एकहोत्रे बलिᳪ हरन्ति । हरन्त्यस्मै प्रजा बलिम् । ऐनमप्रतिख्यातं गच्छति । य एवं वेद ॥ २। ३। ६। ४॥ चन्द्रमाश्चातुर्मास्यानां यज्ञक्रतोरध्वरेण यज्ञक्रतुनोप पर्यावर्तन्त सप्तहोता चत्वारि च ॥ ६॥
२७ प्रजापतिः पुरुषमसृजत । सोऽग्निरब्रवीत् । ममायमन्नमस्त्विति । सोऽबिभेत् । सर्वं वै माऽयं प्रधक्ष्यतीति । स एताग्श्चतुर्होतृनात्मस्परणानपश्यत् । तानजुहोत् । तैर्वै स आत्मानमस्पृणोत् । यदग्निहोत्रं जुहोति । एकहोतारमेव तद्यज्ञक्रतुमाप्नोत्यग्निहोत्रम् ॥
१॥
२८ कुसिन्धं चाऽऽत्मनः स्पृणोति । आदित्यस्य च सायुज्यं गच्छति । चतुरुन्नयति । चतुर्होतारमेव तद्यज्ञक्रतुमाप्नोति दर्शपूर्णमासौ । चत्वारि चात्मनोऽङ्गानि स्पृणोति । आदित्यस्य च सायुज्यं गच्छति । चतुरुन्नयति । समित्पञ्चमी । पञ्चहोतारमेव तद्यज्ञक्रतुमाप्नोति चातुर्मास्यानि । लोम छवीं माᳪ समस्थि मज्ज्ञानम् ॥ २। ३। ७। २॥
२९ तानि चात्मनः स्पृणोति । आदित्यस्य च सायुज्यं गच्छति । चतुरुन्नयति । द्विर्जुहोति । षड्ढोतारमेव तद्यज्ञक्रतुमाप्नोति पशुबन्धम् । स्तनावाण्डौ शिश्नमवाञ्चं प्राणम् । तानि चात्मनः स्पृणोति । आदित्यस्य च सायुज्यं गच्छति । चतुरुन्नयति । द्विर्जुहोति ॥ २। ३। ७। ३॥
३० समिथ्सप्तमी । सप्तहोतारमेव तद्यज्ञक्रतुमाप्नोति सौम्यमध्वरम् । सप्त चात्मनः

शीर्षण्यान्प्राणान्थ्स्पृणोति । आदित्यस्य च सायुज्यं गच्छति । चतुरुन्नयति । द्विर्जुहोति । द्विर्निमार्ष्टि । द्विः प्राश्नाति । दशहोतारमेव तद्यज्ञक्रतुमाप्नोति संवथ्सरम् । सर्वं चात्मानमपरिवर्ग२ँ स्पृणोति । आदित्यस्य च सायुज्यं गच्छति ॥
२। ३। ७। ४॥ अग्निहोत्रं मज्ञानं द्विर्जुहोत्यपरिवर्ग२ँ स्पृणोत्येकं च ॥ ७॥
३१ प्रजापतिरकामयत प्रजायेयेति । स तपोऽतप्यत । सोऽन्तर्वानभवत् । स हरितः श्यावोऽभवत् । तस्माथ्स्त्र्यन्तर्वत्नी । हरिणी सती श्यावा भवति । स विजायमानो गर्भेणाताम्यत् । स तान्तः कृष्णः श्यावोऽभवत् । तस्मात्तान्तः कृष्णः श्यावो भवति । तस्यासुरेवाजीवत् ॥ २। ३। ८। १॥
३२ तेनासुनाऽसुरानसृजत । तदसुराणामसुरत्वम् । य एवमसुराणामसुरत्वं वेद । असुमानेव भवति । नैनमसुर्जहाति । सोऽसुरान्थ्सृष्ट्वा पितेवामन्यत । तदनु पितॄनसृजत । तत्पितृणां पितृत्वम् । य एवं पितृणां पितृत्वं वेद । पितेवैव स्वानां भवति ॥ २। ३। ८। २॥
३३ यन्त्यस्य पितरो हवम् । स पितॄन्थ्सृष्ट्वाऽमनस्यत् । तदनु मनुष्यानसृजत । तन्मनुष्याणां मनुष्यत्वम् । य एवं मनुष्याणां मनुष्यत्वं वेद । मनस्व्येव भवति । नैनं मनुर्जहाति । तस्मै मनुष्यान्थ्ससृजानाय । दिवा देवत्राऽभवत् । तदनु देवानसृजत । तद्देवानां देवत्वम् । य एवं देवानां देवत्वं वेद । दिवा हैवास्य देवत्रा भवति । तानि वा एतानि चत्वार्यम्भाꣳसि । देवा मनुष्याः पितरोऽसुराः । तेषु सर्वेष्वम्भो नभ इव भवति । य एवं वेद ॥ २। ३। ८। ३॥ अजीवथ्स्वानां भवति देवानसृजत सप्त च ॥ ८॥
३४ ब्रह्मवादिनो वदन्ति । यो वा इमं विद्यात् । यतोऽयं पवते । यदभि पवते । यदभि संपवते । सर्वमायुरियात् । न पुराऽऽयुषः प्रमीयेत । पशुमान्थ्स्यात् । विन्देत प्रजाम् । यो वा इमं वेद ॥ २। ३। ९। १॥
३५ यतोऽयं पवते । यदभिपवते । यदभिसंपवते । सर्वमायुरेति । न पुराऽऽयुषः प्रमीयते । पशुमान्भवति । विन्दते प्रजाम् । अद्भ्यः पवते । अपोऽभि पवते । अपोऽभि संपवते ॥ २। ३। ९। २॥
३६ अस्याः पवते । इमामभि पवते । इमामभि संपवते । अग्नेः पवते । अग्निमभि पवते । अग्निमभि संपवते । अन्तरिक्षात्पवते । अन्तरिक्षमभि पवते । अन्तरिक्षमभि संपवते । आदित्यात्पवते ॥ २। ३। ९। ३॥
३७ आदित्यमभि पवते । आदित्यमभि संपवते । द्योः पवते । दिवमभि पवते । दिवमभि

संपवते । दिग्भ्यः पवते । दिशोऽभि पवते । दिशोऽभि संपवते । स यत्पुरस्ताद्वाति । प्राण एव भूत्वा पुरस्ताद्वाति ॥ २। ३। ९। ४॥

३८ तस्मात्पुरस्ताद्वान्तम् । सर्वाः प्रजाः प्रतिनन्दन्ति । प्राणो हि प्रियः प्रजानाम् । प्राण इव प्रियः प्रजानां भवति । य एवं वेद । स वा एष प्राण एव । अथ यद्दक्षिणतो वाति । मातरिश्वैव भूत्वा दक्षिणतो वाति । तस्माद्दक्षिणतो वान्तं विद्यात् । सर्वा दिश आवाति ॥ २। ३। ९। ५॥

३९ सर्वा दिशोऽनुविवाति । सर्वा दिशोऽनु संवातीति । स वा एष मातरिश्वैव । अथ यत्पश्चाद्वाति । पवमान एव भूत्वा पश्चाद्वाति । पूतमस्मा आहरन्ति । पूतमुपहरन्ति । पूतमश्नाति । य एवं वेद । स वा एष पवमान एव ॥ २। ३। ९। ६॥

४० अथ यदुत्तरतो वाति । सवितैव भूत्वोत्तरतो वाति । सवितेव स्वानां भवति । य एवं वेद । स वा एष सवितैव । ते य एनं पुरस्तादायन्तमुपवदन्ति । य एवास्य पुरस्तात्पाप्मानः । ताग्स्तेऽपघ्नन्ति । पुरस्तादितरान्पाप्मनः सचन्ते । अथ य एनं दक्षिणत आयन्तमुपवदन्ति ॥ २। ३। ९। ७॥

४१ य एवास्य दक्षिणतः पाप्मानः । ताग्स्तेऽपघ्नन्ति । दक्षिणत इतरान्पाप्मनः सचन्ते । अथ य एनं पश्चादायन्तमुप वदन्ति । य एवास्य पश्चात्पाप्मानः । ताग्स्तेऽपघ्नन्ति । पश्चादितरान्पाप्मनः सचन्ते । अथ य एनमुत्तरत आयन्तमुप वदन्ति । य एवास्योत्तरतः पाप्मानः । ताग्स्तेऽपघ्नन्ति ॥ २। ३। ९। ८॥

४२ उत्तरत इतरान्पाप्मनः सचन्ते । तस्मादेवं विद्वान् । वीव नृत्येत् । प्रेव चलेत् । व्यस्येवाक्ष्यौ भाषेत । मण्टयेदिव । क्राथयेदिव । शृङ्गायेतेव । उत मोप वदेयुः । उत मे पाप्मानमपहन्युरिति । स यां दिशꣳसनिमेष्यन्थ्स्यात् । यदा तां दिशं वातो वायात् । अथ प्रवेयात् । प्र वा धावयेत् । सातमेव रदितं व्यूढं गन्धमभि प्रच्यवते । आऽस्य तं जनपदं पूर्वा कीर्तिर्गच्छति । दानकामा अस्मै प्रजा भवन्ति । य एवं वेद ॥ २। ३। ९। ९॥ वेद संपवत आदित्यात्पवते वात्या वात्येष पवमान एव दक्षिणत आयन्तमुप वदन्त्युत्तरतः पाप्मानस्ताग्स्तेऽपघ्नन्तीत्यष्टौ च ॥ ९॥

४३ प्रजापतिः सोमꣳ राजानमसृजत । तं त्रयो वेदा अन्वसृज्यन्त । तान् हस्तेऽकुरुत । अथ ह सीता सावित्री । सोमꣳ राजानं चकमे । श्रद्धामु स चकमे । सा ह पितरं प्रजापतिमुपससार । तꣳ होवाच । नमस्ते अस्तु भगवः । उप त्वाऽयानि ॥ २। ३। १०। १॥

४४ प्र त्वा पद्ये । सोमं वै राजानं कामये । श्रद्धामु स कामयत इति । तस्या उ ह स्थागरमलङ्कारं कल्पयित्वा । दशहोतारं पुरस्ताद्व्याख्याय । चतुर्होतारं दक्षिणतः । पञ्चहोतारं पश्चात् । षड्ढोतारमुत्तरतः । सप्तहोतारमुपरिष्टात् । संभारैश्च पत्निभिश्च मुखेऽलंकृत्य ॥ २। ३। १०। २॥
४५ आऽस्यार्धं वव्राज । ता२ँ होदीक्ष्योवाच । उप माऽऽवर्तस्वेति । त२ँ होवाच । भोगं तु म आचक्ष्व । एतन्म आचक्ष्व । यत्ते पाणाविति । तस्या उ ह त्रीन्, वेदान्प्रददौ । तस्मादु ह स्त्रियो भोगमैव हारयन्ते । स यः कामयेत प्रियः स्यामिति ॥ २। ३। १०। ३॥
४६ यं वा कामयेत प्रियः स्यादिति । तस्मा एत२ँ स्थागरमलंकारं कल्पयित्वा । दशहोतारं पुरस्ताद्व्याख्याय । चतुर्होतारं दक्षिणतः । पञ्चहोतारं पश्चात् । षड्ढोतारमुत्तरतः । सप्तहोतारमुपरिष्टात् । संभारैश्च पत्निभिश्च मुखेऽलंकृत्य । आऽस्यार्धं व्रजेत् । प्रियो हैव भवति ॥ २। ३। १०। ४॥ अयान्यलंकृत्य स्यामिति भवति ॥ १०॥
४७ ब्रह्मात्मन्वदसृजत । तदकामयत । समात्मना पद्येयेति । आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै दशम२ँ हूतः प्रत्यश्रृणोत् । स दशहूतोऽभवत् । दशहूतो ह वै नामैषः । तं वा एतं दशहूत२ँ सन्तम् । दशहोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥ २। ३। ११। १॥
४८ आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै सप्तम२ँ हूतः प्रत्यश्रृणोत् । स सप्तहूतोऽभवत् । सप्तहूतो ह वै नामैषः । तं वा एत२ँ सप्तहूत२ँ सन्तम् । सप्तहोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः । आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै षष्ठ२ँ हूतः प्रत्यश्रृणोत् । स षड्ढूतोऽभवत् ।
४९ षड्ढूतो ह वै नामैषः । तं वा एत२ँ षड्ढूत२ँ सन्तम् । षड्ढोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः । आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै पञ्चम२ँ हूतः प्रत्यश्रृणोत् । स पञ्चहूतोऽभवत् । पञ्चहूतो ह वै नामैषः । तं वा एतं पञ्चहूत२ँ सन्तम् । पञ्चहोतेत्याचक्षते परोक्षेण ॥ २। ३। ११। ३॥
५० परोक्षप्रिया इव हि देवाः । आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै चतुर्थ२ँ हूतः प्रत्यश्रृणोत् । स चतुर्हूतोऽभवत् । चतुर्हूतो ह वै नामैषः । तं वा एतं चतुर्हूत२ँ सन्तम् । चतुर्होतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः । तमब्रवीत् । त्वं वै मे नेदिष्ठ२ँ हूतः प्रत्यश्रौषीः । त्वयैनानाख्यातार इति । तस्मान्नु हैनाग्श्चतुर्होतार

इत्याचक्षते । तस्माच्छुश्रूषुः पुत्राणाꣳ हृद्यतमः । नेदिष्ठो हृद्यतमः । नेदिष्ठो ब्रह्मणो भवति । य एवं वेद ॥ २। ३। ११। ४॥ देवाः षड्ढूतोऽभवत्पञ्चहोतेत्याचक्षते परोक्षेणाश्रौषीः षद्व ॥ ११॥

ब्रह्मवादिनः किं दक्षिणां यो वा अविद्वान्तस्य वै ब्रह्मवादिनो यद्दशहोतारः प्रजापतिर्व्यस्त्रं प्रजापतिः पुरुषं प्रजापतिरकामयत स तपः सोऽन्तर्वान्ब्रह्मवादिनो यो वा इमं विद्यात्प्रजापतिः सोमꣳ राजानं ब्रह्मात्मन्वदेकादश ॥ ११॥

ब्रह्मवादिनस्तस्य वा अग्नेर्यद्वा इदं किंच प्रजापतिरकामयत य एवास्य दक्षिणतः पञ्चाशत् ॥ ५०॥

ब्रह्मवादिनो य एवं वेद ॥

## द्वितीयाष्टके चतुर्थः प्रपाठकः ४

१ जुष्टो दमूना अतिथिर्दुरोणे । इमं नो यज्ञमुपयाहि विद्वान् । विश्वा अग्नेऽभियुजो विहत्य । शत्रूयतामाभरा भोजनानि । अग्ने शर्ध महते सौभगाय । तव द्युम्नान्युत्तमानि सन्तु । सं जास्पत्यꣳ सुयममाकृणुष्व । शत्रूयतामभितिष्ठा महाꣳसि । अग्ने यो नोऽभितो जनः । वृको वारो जिघाꣳसति ॥ २। ४। १। १॥

२ ताग्स्त्वं वृत्रहञ्जहि । वस्वस्मभ्यमाभर । अग्ने यो नोऽभिदासति । समानो यश्च निष्ट्यः । इध्मस्येव प्रक्षायतः । मा तस्योच्छेषि किञ्चन । त्वमिन्द्राभिभूरसि । देवो विज्ञातवीर्यः । वृत्रहा पुरुचेतनः । अप प्राच इन्द्र विश्वाꣳ अमित्रान् ॥ २। ४। १। २॥

३ अपापाचो अभिभूते नुदस्व । अपोदीचो अपशूराधराच ऊरौ । यथा तव शर्मन्मदेम । तमिन्द्रं वाजयामसि । महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् । युजे रथं गवेषणꣳ हरिभ्याम् । उप ब्रह्माणि जुजुषाणमस्थुः । विबाधिष्टास्य रोदसी महित्वा । इन्द्रो वृत्राण्यप्रती जघन्वान् ॥ २। ४। १। ३॥

४ हव्यवाहमभिमातिषाहम् । रक्षोहणं पृतनासु जिष्णुम् । ज्योतिष्मन्तं दीद्यतं पुरन्धिम् । अग्निꣳ स्विष्टकृतमाहुवेम । स्विष्टमग्ने अभि तत्पृणाहि । विश्वा देव पृतना अभिष्य । उरुं नः पन्थां प्रदिशन्विभाहि । ज्योतिष्मद्धेह्यजरं न आयुः । त्वामग्ने हविष्मन्तः । देवं मर्तास ईडते ॥ २। ४। १। ४॥

५ मन्ये त्वा जातवेदसम् । स हव्या वक्ष्यानुषक् । विश्वानि नो दुर्गहा जातवेदः । सिन्धुं न नावा दुरिताऽति पर्षि । अग्ने अत्रिवन्मनसा गृणानः । अस्माकं बोध्यविता

तनूनाम् । पूषा गा अन्वेतु नः । पूषा रक्षत्वर्वतः । पूषा वाजꣳ सनोतु नः । पूषेमा आशा अनुवेद सर्वाः ॥ २। ४। १। ५॥

६ सो अस्माꣳ अभयतमेन नेषत् । स्वस्तिदा अघृणिः सर्ववीरः । अप्रयुच्छन्पुर एतु प्रजानन् । त्वमग्ने सप्रथा असि । जुष्टो होता वरेण्यः । त्वया यज्ञं वितन्वते । अग्नी रक्षाꣳसि सेधति । शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्यः । अग्ने रक्षा णो अꣳहसः ॥ २। ४। १। ६॥

७ प्रतिष्म देव रीषतः । तपिष्ठैरजरो दह । अग्ने हꣳसि न्यत्रिणम् । दीद्यन्मर्त्येष्वा । स्वे क्षये शुचिव्रत । आ वात वाहि भेषजम् । वि वात वाहि यद्रपः । त्वꣳ हि विश्वभेषजः । देवानां दूत ईयसे । द्वाविमौ वातौ वातः ॥ २। ४। १। ७॥

८ आ सिन्धोरा परावतः । दक्षं मे अन्य आवातु । पराऽन्यो वातु यद्रपः । यददो वात ते गृहे । अमृतस्य निधिर्हितः । ततो नो देहि जीवसे । ततो नो धेहि भेषजम् । ततो नो मह आवह । वात आवातु भेषजम् । शम्भूर्मयोभूर्नो हृदे ॥ २। ४। १। ८॥

९ प्र ण आयूꣳषि तारिषत् । त्वमग्ने अयाऽसि । अया सन्मनसा हितः । अया सन् हव्यमूहिषे । अया नो धेहि भेषजम् । इष्टो अग्निराहुतः । स्वाहाकृतः पिपर्तु नः । स्वगा देवेभ्य इदं नमः । कामो भूतस्य भव्यस्य । सम्राडेको विराजति ॥ २। ४। १। ९॥

१० स इदं प्रतिपप्रथे । ऋतूनुथ्सृजते वशी । कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं यदासीत् । सतो बन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषा । त्वया मन्यो सरथमारुजन्तः । हर्षमाणासो धृषता मरुत्वः । तिग्मेषव आयुधा सꣳशिशानाः । उपप्रयन्ति नरो अग्निरूपाः ॥ २। ४। १। १०॥

११ मन्युर्भगो मन्युरेवास देवः । मन्युर्होता वरुणो विश्ववेदाः । मन्युं विश ईडते देवयन्तीः । पाहि नो मन्यो तपसा श्रमेण । त्वमग्ने व्रतभृच्छुचिः । देवाꣳ आसादया इह । अग्ने हव्याय वोढवे । व्रता नु बिभ्रद्व्रतपा अदाभ्यः । यजानो देवाꣳ अजरः सुवीरः । दधद्रत्नानि सुविदानो अग्ने । गोपाय नो जीवसे जातवेदः ॥ २। ४। १। ११॥

जिघाꣳसत्यमित्राञ्घन्वानीडते सर्वा अꣳहसो वातो हृदे राजत्यग्निरूपाः सुविदानो अग्न एकं च ॥ १॥

१२ चक्षुषो हेते मनसो हेते । वाचो हेते ब्रह्मणो हेते । यो माऽघायुरभिदासति । तमग्ने मेन्याऽमेनिं कृणु । यो मा चक्षुषा यो मनसा । यो वाचा ब्रह्मणाऽघायुरभिदासति ।

तयाऽग्ने त्वं मेन्या । अमुममेनिं कृणु । यत्किंचासौ मनसा यच्च वाचा । यज्ञैर्जुहोति यजुषा हविर्भिः ॥ २। ४। २। १॥
१३ तन्मृत्युर्निर्ऋत्या संविदानः । पुरा दिष्टादाहुतीरस्य हन्तु । यातुधाना निर्ऋतिराद् रक्षः । ते अस्य घ्नन्त्वनृतेन सत्यम् । इन्द्रेषिता आज्यमस्य मथ्नन्तु । मा तथ्समृद्धि यदसौ करोति । हन्मि तेऽहं कृतꣳ हविः । यो मे घोरमचीकृतः । अपाञ्चौ त उभौ बाहू । अपनह्याम्यास्यम् ॥ २। ४। २। २॥
१४ अपनह्यामि ते बाहू । अपनह्याम्यास्यम् । अग्नेर्देवस्य ब्रह्मणा । सर्वं तेऽवधिषं कृतम् । पुराऽमुष्य वषट्कारात् । यज्ञं देवेषु नस्कृधि । स्विष्टमस्माकं भूयात् । माऽस्मान्प्रापन्नरातयः । अन्ति दूरे सतो अग्ने । भ्रातृव्यस्याभिदासतः ॥ २। ४। २। ३॥
१५ वषट्कारेण वज्रेण । कृत्याꣳ हन्मि कृतामहम् । यो मा नक्तं दिवा सायम् । प्रातश्चाह्नो निपीयति । अद्या तमिन्द्र वज्रेण । भ्रातृव्यं पादयामसि । इन्द्रस्य गृहोऽसि तं त्वा । प्रपद्ये सगुः साश्वः । सह यन्मे अस्ति तेन । ईडे अग्निं विपश्चितम् ॥ २। ४। २। ४॥
१६ गिरा यज्ञस्य साधनम् । श्रुष्टीवानं धितावानम् । अग्ने शकेम ते वयम् । यमं देवस्य वाजिनः । अति द्वेषाꣳसि तरेम । अवतं मा समनसौ समोकसौ । सचेतसौ सरेतसौ । उभौ मामवतं जातवेदसौ । शिवौ भवतमद्य नः । स्वयं कृण्वानः सुगमप्रयावम् ॥ २। ४। २। ५॥
१७ तिग्मशृङ्गो वृषभः शोशुचानः । प्रत्नꣳ सधस्थमनुपश्यमानः । आ तन्तुमग्निर्दिव्यं ततान । त्वं नस्तन्तुरुत सेतुरग्ने । त्वं पन्था भवसि देवयानः । त्वयाऽग्ने पृष्ठं वयमारुहेम । अथा देवैः सधमादं मदेम । उदुत्तमं मुमुग्धि नः । वि पाशं मध्यमं चृत । अवाधमानि जीवसे ॥
१८ वयꣳ सोम व्रते तव । मनस्तनूषु बिभ्रतः । प्रजावन्तो अशीमहि । इन्द्राणी देवी सुभगा सुपत्नी । उदꣳशेन पतिविद्ये जिगाय । त्रिꣳशदस्या जघनं योजनानि । उपस्थ इन्द्रग्ग् स्थविरं बिभर्ति । सेना ह नाम पृथिवी धनञ्जया । विश्वव्यचा अदितिः सूर्यत्वक् । इन्द्राणी देवी प्रासहा ददाना ॥ २। ४। २। ७॥
१९ सा नो देवी सुहवा शर्म यच्छतु । आ त्वाऽहार्षमन्तरभूः । ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु । मा त्वद्राष्ट्रमधिभ्रशत् । ध्रुवा द्यौर्ध्रुवा पृथिवी । ध्रुवं विश्वमिदं जगत् । ध्रुवा ह पर्वता इमे । ध्रुवो राजा विशामयम् । इहैवैधि मा व्यथिष्ठाः ॥ २।

४। २। ८॥
२० पर्वत इवाविचाचलिः । इन्द्र इवेह ध्रुवस्तिष्ठ । इह राष्ट्रमु धारय । अभितिष्ठ पृतन्यतः । अधरे सन्तु शत्रवः । इन्द्र इव वृत्रहा तिष्ठ । अपः, क्षेत्राणि संजयन् । इन्द्र एणमदीधरत् । ध्रुवं ध्रुवेण हविषा । तस्मै देवा अधिब्रवन् । अयं च ब्रह्मणस्पतिः ॥ हविर्भिरास्यमभि दासतो विपश्चितमप्रयावं जीवसे ददाना व्यथिष्ठा ब्रवन्नेकं च ॥ २।
४। २। २॥
२१ जुष्टी नरो ब्रह्मणा वः पितृणाम् । अक्षमव्ययं न किला रिषाथ । यच्छक्करीषु बृहता रवेण । इन्द्रे शुष्ममदधाथा वसिष्ठाः । पावका नः सरस्वती । वाजेभिर्वाजिनीवती । यज्ञं वष्टु धिया वसुः । सरस्वत्यभि नो नेषि वस्यः । मा पस्फरीः पयसा मा न आधक् । जुषस्व नः सख्या वेश्या च ॥ २। ४। ३। १॥
२२ मा त्वत्क्षेत्राण्यरणानि गन्म । वृञ्जे हविर्नमसा बर्हिरग्नौ । अयामि स्रुग्घृतवती सुवृक्तिः । अम्यक्षि सद्म सदने पृथिव्याः । अश्रायि यज्ञः सूर्ये न चक्षुः । इहार्वाञ्चमतिह्वये । इन्द्रं जैत्राय जेतवे । अस्माकमस्तु केवलः । अर्वाञ्चमिन्द्रममुतो हवामहे । यो गोजिद्धनजिदश्वजिद्यः ॥ २। ४। ३। २॥
२३ इमं नो यज्ञं विहवे जुषस्व । अस्य कुर्मो हरिवो मेदिनं त्वा । असंमृष्टो जायसे मातृवोः शुचिः । मन्द्रः कविरुदतिष्ठो विवस्वतः । घृतेन त्वाऽवर्धयन्नग्न आहुत । धूमस्ते केतुरभवद्दिवि श्रितः । अग्निरग्रे प्रथमो देवतानाम् । संयातानामुत्तमो विष्णुरासीत् । यजमानाय परिगृह्य देवान् । दीक्षयेदꣳ हविरागच्छतं नः ॥ २। ४। ३। ३॥
२४ अग्निश्च विष्णो तप उत्तमं महः । दीक्षापालेभ्यो वनतꣳ हि शक्रा । विश्वैर्देवैर्यज्ञियैः संविदानौ । दीक्षामस्मै यजमानाय धत्तम् । प्र तद्विष्णुः स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा । नू मर्तो दयते सनिष्यन्, यः । विष्णव उरुगायाय दाशत् ॥ २। ४। ३। ४॥
२५ प्र यः सत्राचा मनसा यजातै । एतावन्तं नर्यमाविवासात् । विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । उरुक्षितिꣳ सुजनिमाचकार । त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्र विष्णुरस्तु तवसस्तवीयान् । त्वेष२ꣳ ह्यस्य स्थविरस्य नाम ॥ २। ४। ३। ५॥
२६ होतारं चित्ररथमध्वरस्य । यज्ञस्य यज्ञस्य केतुꣳ रुशन्तम् । प्रत्यर्धिं देवस्य देवस्य मह्ना । श्रिया त्वग्निमतिथिं जनानाम् । आ नो विश्वाभिरूतिभिः सजोषाः । ब्रह्म

जुषाणो हर्यश्व याहि । वरीवृजत्स्थविरेभिः सुशिप्र । अस्मे दधद्वृषणꣳ शुष्ममिन्द्र ।
इन्द्रः सुवर्षा जनयन्नहानि । जिगायोशिग्भिः पृतना अभिश्रीः ॥ २। ४। ३। ६॥
२७ प्रारोचयन्मनवे केतुमह्नाम् । अविन्दज्ज्योतिर्बृहते रणाय । अश्विनाववसे निह्वये वाम्
। आ नूनं यातꣳ सुकृताय विप्रा । प्रातर्युक्तेन सुवृता रथेन । उपागच्छतमवसाऽऽगतं
नः । अविष्टं धीष्वश्विना न आसु । प्रजावद्रेतो अह्वयं नो अस्तु । आवां तोके तनये
तूतुजानाः । सुरत्नासो देववीतिं गमेम ॥ २। ४। ३। ७॥
२८ त्वꣳ सोम क्रतुभिः सुक्रतुर्भूः । त्वं दक्षैः सुदक्षो विश्ववेदाः । त्वं वृषा
वृषत्वेभिर्महित्वा । द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः । अषाढं युत्सु पृतनासु पप्रिम् ।
सुवर्षामप्स्वां वृजनस्य गोपाम् । भरेषुजाꣳ सुक्षितिꣳ सुश्रवसम् । जयन्तं त्वामनु
मदेम सोम । भवा मित्रो न शेव्यो घृतासुतिः । विभूतद्युम्न एवया उ सप्रथाः ॥
२। ४। ३। ८॥
२९ अधा ते विष्णो विदुषाचिदृध्यः । स्तोमो यज्ञस्य राध्यो हविष्मतः । यः पूर्व्याय
वेधसे नवीयसे । सुमज्जानये विष्णवे ददाशति । यो जातमस्य महतो महि ब्रवात् ।
सेदु श्रवोभिर्युज्यंचिदभ्यसत् । तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य । गर्भꣳ हविषा
पिपर्तन । आऽस्य जानन्तो नाम चिद्विवक्तन । बृहत्ते विष्णो सुमतिं भजामहे ॥ २।
४। ३। ९॥
३० इमा धाना घृतस्नुवः । हरी इहोपवक्षतः । इन्द्रꣳ सुखतमे रथे । एष ब्रह्मा प्र ते
महे । विदथे शꣳसिषꣳ हरी । य ऋत्वियः प्र ते वन्वे । वनुषो हर्यतं मदम् । इन्द्रो
नाम घृतं न यः । हरिभिश्चारु सेचते । श्रुतो गण आ त्वा विशन्तु ॥ २। ४। ३। १०॥
३१ हरिवर्पसं गिरः । आ चर्षणिप्रा वृषभो जनानाम् । राजा कृष्टीनां पुरुहूत इन्द्रः
। स्तुतः श्रवस्यन्नवसोपमद्रिक् । युक्त्वा हरी वृषणाऽऽयाह्यर्वाङ् । प्र यथ्सिन्धवः प्रसवं
यदायन् । आपः समुद्रꣳ रथ्येव जग्मुः । अतश्चिदिन्द्रः सदसो वरीयान् । यदीꣳ
सोमः पृणति दुग्धो अꣳशुः । ह्वयामसि त्वेन्द्र याह्यर्वाङ् ॥ २। ४। ३। ११॥
३२ अरं ते सोमस्तनुवे भवाति । शतक्रतो मादयस्वा सुतेषु । प्रास्माꣳ अव पृतनासु प्र
युथ्सु । इन्द्राय सोमाः प्रदिवो विदानाः । ऋभुर्येभिर्वृषपर्वा विहायाः । प्रयम्यमाणान्प्रति
षू गृभाय । इन्द्र पिब वृषधूतस्य वृष्णः । अहेडमान उपयाहि यज्ञम् । तुभ्यं पवन्त
इन्दवः सुतासः । गावो न वज्रिन्थ्स्वमोको अच्छ ॥ २। ४। ३। १२॥
३३ इन्द्रागहि प्रथमो यज्ञियानाम् । या ते काकुथ्सुकृता या वरिष्ठा । यया शश्वत्पिबसि

मध्व ऊर्मिम् । तया पाहि प्र ते अध्वर्युरस्थात् । सं ते वज्रो वर्ततामिन्द्र गव्युः ।
प्रातर्युजा विबोधय । अश्विना वेह गच्छतम् । अस्य सोमस्य पीतये । प्रातर्यावाणा
प्रथमा यजध्वम् । पुरा गृध्रादररुषः पिबाथः । प्रातर्हि यज्ञमश्विना दधाते । प्रशꣳसन्ति
कवयः पूर्वभाजः । प्रातर्यजध्वमश्विना हिनोत । न सायमस्ति देवया अजुष्टम् । उतान्यो
अस्मद्यजते विचायः । पूर्वः पूर्वो यजमानो वनीयान् ॥
२। ४। ३। १३॥ चाश्वजिद्यो गच्छतं नो दाशन्नामाभिश्रीर्गमेम सप्रथा भजामहे विशन्तु
याह्यर्वाङ्च्छ पिबाथः षट्च ॥ ३॥
३४ नक्तं जाताऽस्योषधे । रामे कृष्णे असिक्नि च । इदꣳ रजनि रजय । किलासं
पलितं च यत् । किलासं च पलितं च । निरितो नाशया पृषत् । आ नः स्वो अश्नुतां
वर्णः । परा श्वेतानि पातय । असितं ते निलयनम् । आस्थानमसितं तव ॥ २। ४।
४। १॥
३५ असिक्नियस्योषधे । निरितो नाशया पृषत् । अस्थिजस्य किलासस्य । तनूजस्य
च यत्त्वचि । कृत्यया कृतस्य ब्रह्मणा । लक्ष्म श्वेतमनीनशम् । सरूपा नाम ते माता
। सरूपो नाम ते पिता । सरूपाऽस्योषधे सा । सरूपमिदं कृधि ॥ २। ४। ४। २॥
३६ शुनꣳ हुवेम मघवानमिन्द्रम् । अस्मिन्भरे नृतमं वाजसातौ । शृण्वन्तमुग्रमूतये
समत्सु । घ्नन्तं वृत्राणि संजितं धनानाम् । धूनुथ द्यां पर्वतान्दाशुषे वसु । नि वो वना
जिहते यामनो भिया । कोपयथ पृथिवीं पृश्निमातरः । युधे यदुग्राः पृषतीरयुग्ध्वम् ।
प्रवेपयन्ति पर्वतान् । विविञ्चन्ति वनस्पतीन् ॥ २। ४। ४। ३॥
३७ प्रोऽवारत मरुतो दुर्मदा इव । देवासः सर्वया विशा । पुरुत्रा हि सदृङ्ङसि ।
विशो विश्वा अनु प्रभु । समत्सु त्वा हवामहे । समत्स्वग्निमवसे । वाजयन्तो हवामहे
। वाजेषु चित्रराधसम् । संगच्छध्वꣳ संवदध्वम् । सं वो मनाꣳसि जानताम् ॥ २।
४। ४। ४॥
३८ देवा भागं यथा पूर्वे । संजानाना उपासत । समानो मन्त्रः समितिः समानी ।
समानं मनः सह चित्तमेषाम् । समानं केतो अभि सꣳरभध्वम् । संज्ञानेन वो हविषा
यजामः । समानी व आकूतिः । समाना हृदयानि वः । समानमस्तु वो मनः । यथा
वः सुसहासति ॥
२। ४। ४। ५॥
३९ संज्ञानं नः स्वैः । संज्ञानमरणैः । संज्ञानमश्विना युवम् । इहास्मासु नियच्छतम्

। संज्ञानं मे बृहस्पतिः । संज्ञानꣳ सविता करत् । संज्ञानमश्विना युवम् । इह मह्यं नियच्छतम् । उप च्छायामिव घृणेः । अगन्म शर्म ते वयम् ॥ २। ४। ४। ६॥
४० अग्ने हिरण्यसंदृशः । अदब्धेभिः सवितः पायुभिष्ट्वम् । शिवेभिरद्य परिपाहि नो गयम् । हिरण्यजिह्वः सुविताय नव्यसे । रक्षा माकिर्नो अघशꣳस ईशत । मदे मदे हि नो ददुः । यूथा गवामृजुक्रतुः । संगृभाय पुरूशता । उभया हस्त्या वसु । शिशीहि राय आभर ॥
२। ४। ४। ७॥
४१ शिप्रिन्वाजानां पते । शचीवस्तव दꣳसना । आ तू न इन्द्र भाजय । गोष्वश्वेषु शुभ्रुषु । सहस्रेषु तुवीमघ । यद्देवा देव हेडनम् । देवासश्चकृमा वयम् । आदित्यास्तस्मान्मा यूयम् । ऋतस्यर्तेन मुञ्चत । ऋतस्यर्तेनादित्याः ॥ २। ४। ४। ८॥
४२ यजत्रा मुञ्चतेह मा । यज्ञैर्वो यज्ञवाहसः । आशिक्षन्तो न शेकिम । मेदस्वता यजमानाः । स्रुचाऽऽज्येन जुह्वतः । अकामा वो विश्वे देवाः । शिक्षन्तो नोपशेकिम । यदि दिवा यदि नक्तम् । एन एनस्योऽकरत् । भूतं मा तस्माद्भव्यं च ॥ २। ४। ४। ९॥
४३ द्रुपदादिव मुञ्चतु । द्रुपदादिवेन्मुमुचानः । स्विन्नः स्नात्वी मलादिव । पूतं पवित्रेणेवाज्यम् । विश्वे मुञ्चन्तु मैनसः । उद्वयं तमसस्परि । पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यम् । अगन्म ज्योतिरुत्तमम् ॥ २। ४। ४। १०॥ तव कृधि वनस्पतीञ्जानतामसति वयं भरादित्याश्च नव च ॥ ४॥
४४ वृषा सो अꣳशुः पवते हविष्मान्त्सोमः । इन्द्रस्य भाग ऋतयुः शतायुः । समा वृषाणं वृषभं कृणोतु । प्रियं विशाꣳ सर्ववीरꣳ सुवीरम् । कस्य वृषा सुते सचा । नियुत्वान्वृषभो रणत् । वृत्रहा सोमपीतये । यस्ते शृङ्ग वृषो नपात् । प्रणपात्कुण्डपाय्यः । न्यस्मिन्दध्र आ मनः ॥ २। ४। ५। १॥
४५ तꣳ सध्रीचीरूतयो वृष्णियानि । पौꣳस्यानि नियुतः सश्चुरिन्द्रम् । समुद्रं न सिन्धव उक्थशुष्माः । उरुव्यचसं गिर आविशन्ति । इन्द्राय गिरो अनिशितसर्गाः । अपः प्रेरयन्त्सगरस्य बुध्नात् । यो अक्षेणेव चक्रिया शचीभिः । विष्वक्तस्तम्भ पृथिवीमुत द्याम् । अक्षोदयच्छवसा क्षाम बुध्नम् । वार्णवातस्तविषीभिरिन्द्रः ॥ २। ४। ५। २॥
४६ दृढान्यौघ्नादुशमान ओजः । अवाभिनत्ककुभः पर्वतानाम् । आ नो अग्ने सुकेतुना । रयिं विश्वायुपोषसम् । मार्डीकं धेहि जीवसे । त्वꣳ सोम महे भगम् । त्वं यून

ऋतायते । दक्षं दधासि जीवसे । रथं युञ्जते मरुतः शुभे सुगम् । सूरो न मित्रावरुणा
गविष्टिषु ॥ २। ४। ५। ३॥
४७ रजाꣳसि चित्रा विचरन्ति तन्यवः । दिवः सम्राजा पयसा न उक्षतम् । वाचꣳ
सु मित्रावरुणाविरावतीम् । पर्जन्यश्चित्रां वदति त्विषीमतीम् । अभ्रा वसत मरुतः सु
मायया । द्यां वर्षयतमरुणामरेपसम् । अयुक्त सप्त शुन्ध्युवः । सूरो रथस्य नप्त्रियः ।
ताभिर्याति स्वयुक्तिभिः । वहिष्ठेभिर्विहरन्, यासि तन्तुम् ॥ २। ४। ५। ४॥
४८ अवव्ययन्नसितं देव वस्वः । दविध्वतो रश्मयः सूर्यस्य । चर्मेवावाधुस्तमो अप्स्वन्तः
। पर्जन्याय प्रगायत । दिवस्पुत्राय मीढुषे । स नो यवसमिच्छतु । अच्छा वद
तवसं गीर्भिराभिः । स्तुहि पर्जन्यं नमसा विवास । कनिक्रदद्वृषभो जीरदानुः । रेतो
दधात्वोषधीषु गर्भम् ॥ २। ४। ५। ५॥
४९ यो गर्भमोषधीनाम् । गवां कृणोत्यर्वताम् । पर्जन्यः पुरुषीणाम् । तस्मा इदास्ये
हविः । जुहोता मधुमत्तमम् । इडां नः संयतं करत् । तिस्रो यदग्ने शरदस्त्वामित् ।
शुचिं घृतेन शुचयः सपर्यन् । नामानि चिद्दधिरे यज्ञियानि । असूदयन्त तनुवः सुजाताः
॥ २। ४। ५। ६॥
५० इन्द्रश्च नः शुनासीरौ । इमं यज्ञं मिमिक्षतम् । गर्भं धत्त२ꣳ स्वस्तये । ययोरिदं विश्वं
भुवनमाविवेश । ययोरानन्दो निहितो महश्च । शुनासीरावृतुभिः संविदानौ । इन्द्रवन्तौ
हविरिदं जुषेथाम् । आ घा ये अग्निमिन्धते । स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा
सखा । अग्न इन्द्रश्च मेदिना । हथो वृत्राण्यप्रति । युवꣳ हि वृत्रहन्तमा । याभ्याꣳ
सुवरजयन्नग्र एव । यावातस्थतुर्भुवनस्य मध्ये । प्रचर्षणी वृषणा वज्रबाहू । अग्नी इन्द्रा
वृत्रहणा हुवे वाम् ॥ २। ४। ५। ७॥ मन इन्द्रो गविष्टिषु तन्तुं गर्भꣳ सुजाताः सखा
सप्त च ॥ ५॥
५१ उत नः प्रिया प्रियासु । सप्तस्वसा सुजुष्टा । सरस्वती स्तोम्याऽभूत् । इमा
जुह्वाना युष्मदा नमोभिः । प्रति स्तोमꣳ सरस्वति जुषस्व । तव शर्मन्प्रियतमे दधानाः
। उपस्थेयाम शरणं न वृक्षम् । त्रीणि पदा विचक्रमे । विष्णुर्गोपा अदाभ्यः । ततो
धर्माणि धारयन् ॥ २। ४। ६। १॥
५२ तदस्य प्रियमभि पाथो अश्याम् । नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स
हि बन्धुरित्था । विष्णोः पदे परमे मध्व उथ्सः । ऋत्वा दा अस्थु श्रेष्ठः । अद्य त्वा
वन्वन्थ्सुरेक्णाः । मर्त आनाश सुवृक्तिम् । इमा ब्रह्म ब्रह्मवाह । प्रिया त आ बर्हिः

सीद । वीहि सूर पुरोडाशम् ॥ २। ४। ६। २॥

५३ उप नः सूनवो गिरः । शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः । अद्या नो देव सवितः । प्रजावथ्सावीः सौभगम् । परा दुष्ष्वप्नियꣳ सुव । विश्वानि देव सवितः । दुरितानि परासुव । यद्भद्रं तन्म आसुव । शुचिमर्कैर्बृहस्पतिम् ॥ २। ४। ६। ३॥

५४ अध्वरेषु नमस्यत । अनाम्योज आचके । याऽधारयन्त देवा सुदक्षा दक्षपितारा । असुर्याय प्रमहसा । स इत्क्षेति सुधित ओकसि स्वे । तस्मा इडा पिन्वते विश्वदानी । तस्मै विशः स्वयमेवानमन्ति । यस्मिन्ब्रह्मा राजनि पूर्व एति । सच्युतिमिन्द्र सच्युतिम् । सच्युतिं जघनच्युतिम् ॥
२। ४। ६। ४॥

५५ कनात्काभां न आभर । प्रयप्स्यन्निव सक्थ्यौ । वि न इन्द्र मृधो जहि । कनीखुनदिव सापयन् । अभि नः सुष्टुतिं नय । प्रजापतिः स्त्रियां यशः । मुष्कयोरदधाथ्सपम् । कामस्य तृप्तिमानन्दम् । तस्याग्ने भाजयेह मा । मोदः प्रमोद आनन्दः ॥ २। ४। ६। ५॥

५६ मुष्कयोर्निहितः सपः । सृत्वेव कामस्य तृप्याणि । दक्षिणानां प्रतिग्रहे । मनसश्चित्तमाकूतिम् । वाचः सत्यमशीमहि । पशूनाꣳ रूपमन्नस्य । यशः श्रीः श्रयतां मयि । यथाऽहमस्या अतृप२ꣳ स्त्रियै पुमान् । यथा स्त्री तृप्यति पुꣳसि प्रिये प्रिया । एवं भगस्य तृप्याणि ॥ २। ४। ६। ६॥

५७ यज्ञस्य काम्यः प्रियः । ददामीत्यग्निर्वदति । तथेति वायुराह तत् । हन्तेति सत्यं चन्द्रमाः । आदित्यः सत्यमोमिति । आपस्तथ्सत्यमाभरन् । यशो यज्ञस्य दक्षिणाम् । असौ मे कामः समृध्यताम् । न हि स्पशमविदन्नन्यमस्मात् । वैश्वानरात्पुर एतारमग्नेः ॥ २। ४। ६। ७॥

५८ अथेममन्थन्नमृतममूराः । वैश्वानरं क्षेत्रजित्याय देवाः । येषामिमे पूर्वे अर्मास आसन् । अयूपाः सद्म विभृता पुरूणि । वैश्वानर त्वया ते नुत्ताः । पृथिवीमन्यामभितस्थुर्जनासः । पृथिवीं मातरं महीम् । अन्तरिक्षमुप ब्रुवे । बृहतीमूतये दिवम् । विश्वं बिभर्ति पृथिवी ॥ २। ४। ६। ८॥

५९ अन्तरिक्षं विपप्रथे । दुहे द्यौर्बृहती पयः । न ता नशन्ति न दभाति तस्करः । नैना अमित्रो व्यथिरादधर्षति । देवाग्श्च याभिर्यजते ददाति च । ज्योगित्ताभिः सचते गोपतिः सह । न ता अर्वा रेणुककाटो अश्नुते । न सग्ग्स्कृतत्रमुपयन्ति ता अभि ।

उरुगायमभयं तस्य ता अनु । गावो मर्त्यस्य विचरन्ति यज्वनः ॥ २। ४। ६। ९॥
६० रात्री व्यख्यदायती । पुरुत्रा देव्यक्षभिः । विश्वा अधि श्रियोऽधित । उप ते गा इवाकरम् । वृणीष्व दुहितर्दिवः । रात्री स्तोमं न जिग्युषी । देवीं वाचमजनयन्त देवाः । तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना । धेनुर्वागस्मानुप सुष्टुतैतु ॥ २। ४। ६। १०॥
६१ यद्वाग्वदन्त्यविचेतनानि । राष्ट्री देवानां निषसाद मन्द्रा । चतस्र ऊर्जं दुदुहे पयाꣳसि । क्व स्विदस्याः परमं जगाम । गौरी मिमाय सलिलानि तक्षती । एकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी । सहस्राक्षरा परमे व्योमन् । तस्याꣳ समुद्रा अधि विक्षरन्ति । तेन जीवन्ति प्रदिशश्चतस्रः ॥ २। ४। ६। ११॥
६२ ततः, क्षरत्यक्षरम् । तद्विश्वमुप जीवति । इन्द्रा सूरा जनयन्विश्वकर्मा । मरुत्वाꣳ अस्तु गणवान्थ्सजातवान् । अस्य स्नुषा श्वशुरस्य प्रशिष्टिम् । सपत्ना वाचं मनसा उपासताम् । इन्द्रः सूरो अतरद्रजाꣳसि । स्नुषा सपत्नाः श्वशुरोऽयमस्तु । अयꣳ शत्रूञ्जयतु जर्हृषाणः । अयं वाजं जयतु वाजसातौ । अग्निः, क्षत्रभृदनिभृष्टमोजः । सहस्रियो दीप्यतामप्रयुच्छन् । विभ्राजमानः समिधान उग्रः । आऽन्तरिक्षमरुहदगन्द्याम् ॥ २। ४। ६। १२॥
धारयन्पुरोडाशं बृहस्पतिं जघनच्युतिमानन्दो भगस्य तृप्याण्यग्नेः पृथिवी यज्वन एतु प्रदिशश्चतस्रो वाजसातौ चत्वारि च ॥ ६॥
६३ वृषाऽस्यꣳशुर्वृषभाय गृह्यसे । वृषाऽयमुग्रो नृचक्षसे । दिव्यः कर्मण्यो हितो बृहन्नाम । वृषभस्य या ककुत् । विषूवान्, विष्णो भवतु । अयं यो मामको वृषा । अथो इन्द्र इव देवेभ्यः । विब्रवीतु जनेभ्यः । आयुष्मन्तं वर्चस्वन्तम् । अथो अधिपतिं विशाम् ॥ २। ४। ७। १॥
६४ अस्याः पृथिव्या अध्यक्षम् । इममिन्द्र वृषभं कृणु । यः सुशृङ्गः सुवृषभः । कल्याणो द्रोण आहितः । कार्षीवल प्रगाणेन । वृषभेण यजामहे । वृषभेण यजमानाः । अक्रूरेणेव सर्पिषा । मृधश्च सर्वा इन्द्रेण । पृतनाश्च जयामसि ॥ २। ४। ७। २॥
६५ यस्यायमृषभो हविः । इन्द्राय परिणीयते । जयाति शत्रुमायन्तम् । अथो हन्ति पृतन्यतः । नृणामह प्रणीरसत् । अग्र उद्भिन्दतामसत् । इन्द्र शुष्मं तनुवा मेरयस्व । नीचा विश्वा अभितिष्ठाभिमातीः । निश्शृणीह्याबाधं यो नो अस्ति । उरुं नो लोकं कृणुहि जीरदानो ॥ २। ४। ७। ३॥

६६ प्रेह्यभि प्रेहि प्रभरा सहस्व । मा विवेनो विशृणुष्वा जनेषु । उदीडितो वृषभ तिष्ठ शुष्मैः । इन्द्र शत्रून्पुरो अस्माकं युध्य । अग्ने जेता त्वं जय । शत्रून्थ्सहस ओजसा । वि शत्रून् विमृधो नुद । एतं ते स्तोमं तुविजात विप्रः । रथं न धीरः स्वपा अतक्षम् । यदीदग्ने प्रति त्वं देव हर्याः ॥ २। ४। ७। ४॥
६७ सुवर्वतीरप एना जयेम । यो घृतेनाभिमानितः । इन्द्र जैत्राय जज्ञिषे । स नः संकासु पारय । पृतनासाह्येषु च । इन्द्रो जिगाय पृथिवीम् । अन्तरिक्षꣳ सुवर्महत् । वृत्रहा पुरुचेतनः । इन्द्रो जिगाय सहसा सहाꣳसि । इन्द्रो जिगाय पृतनानि विश्वा ॥ २। ४। ७। ५॥
६८ इन्द्रो जातो वि पुरो रुरोज । स नः परस्पा वरिवः कृणातु । अयं कृलुरगृभीतः । विश्वजिदुद्भिदित्सोमः । ऋषिर्विप्रः काव्येन । वायुरग्रेगा यज्ञप्रीः । साकं गन्मनसा यज्ञम् । शिवो नियुद्भिः शिवाभिः । वायो शुक्रो अयामि ते । मध्वो अग्रं दिविष्टिषु ॥ २। ४। ७। ६॥
६९ आयाहि सोमपीतये । स्वारुहो देव नियुत्वता । इममिन्द्र वर्धय क्षत्रियाणाम् । अयं विशां विश्पतिरस्तु राजा । अस्मा इन्द्र महिवर्चाꣳसि धेहि । अवर्चसं कृणुहि शत्रुमस्य । इममाभज ग्रामे अश्वेषु गोषु । निरमुं भज योऽमित्रो अस्य । वर्ष्मन् क्षत्रस्य ककुभि श्रयस्व । ततो न उग्रो विभजा वसूनि ॥ २। ४। ७। ७॥
७० अस्मे द्यावापृथिवी भूरि वामम् । संदुहाथां घर्मदुघेव धेनुः । अयꣳ राजा प्रिय इन्द्रस्य भूयात् । प्रियो गवामोषधीनामुतापाम् । युनज्मि त उत्तरावन्तमिन्द्रम् । येन जयासि न पराजयासै । स त्वाऽकरेकवृषभꣳ स्वानाम् । अथो राजन्नुत्तमं मानवानाम् । उत्तरस्त्वमधरे ते सपत्नाः । एकवृषा इन्द्रसखा जिगीवान् ॥ २। ४। ७। ८॥
७१ विश्वा आशाः पृतनाः सं जयं जयन् । अभितिष्ठ शत्रूयतः सहस्व । तुभ्यं भरन्ति क्षितयो यविष्ठ । बलिमग्ने अन्ति त ओत दूरात् । आ भन्दिष्ठस्य सुमतिं चिकिद्धि । बृहत्ते अग्ने महि शर्म भद्रम् । यो देह्यो अनमयद्वधस्नैः । यो अर्यपत्नीरुषसश्चकार । स निरुध्या नहुषो यह्वो अग्निः । विशश्चक्रे बलिहृतः सहोभिः ॥ २। ४। ७। ९॥
७२ प्र सद्यो अग्ने अत्येष्यन्यान् । आविर्यस्मै चारुतरो बभूथ । ईडेन्यो वपुष्यो विभावा । प्रियो विशामतिथिर्मानुषीणाम् । ब्रह्म ज्येष्ठा वीर्या संभृतानि । ब्रह्माग्रे ज्येष्ठं दिवमाततान । ऋतस्य ब्रह्म प्रथमोत जज्ञे । तेनार्हति ब्रह्मणा स्पर्धितुं कः । ब्रह्म स्रुचो घृतवतीः । ब्रह्मणा स्वरवो मिताः ॥ २। ४। ७। १०॥

७३ ब्रह्म यज्ञस्य तन्तवः । ऋत्विजो ये हविष्कृतः । शृङ्गाणीवेच्छृङ्गिणाꣳ संददृश्रिरे
। चषालवन्तः स्वरवः पृथिव्याम् । ते देवासः स्वरवस्तस्थिवाꣳसः । नमः सखिभ्यः
सन्नान्माऽवगात । अभिभूरग्निरतरद्रजाꣳसि । स्पृधो विहत्य पृतना अभिश्रीः । जुषाणो
म आहुतिं मा महिष्ट । हत्वा सपत्नान् वरिवस्करं नः । ईशानं त्वा भुवनानामभिश्रियम्
। स्तौम्यग्न उरु कृतꣳ सुवीरम् । हविर्जुषाणः सपत्नाꣳ अभिभूरसि । जहि शत्रूꣳ रप
मृधो नुदस्व ॥ २। ४। ७। ११॥ विशां जयामसि जीरदानो हर्या विश्वा दिविष्टिषु
वसूनि जिगीवान्थ्सहोभिर्मिता नश्चत्वारि च ॥ ७॥
७४ स प्रत्नवन्नवीयसा । अग्ने द्युम्नेन संयता । बृहत्तनन्थ भानुना । नवं नु स्तोममग्नये
। दिवः श्येनाय जीजनम् । वसोः कुविद्वनाति नः । स्वारुहा यस्य श्रियो दृशे ।
रयिर्वीरवतो यथा । अग्ने यज्ञस्य चेततः । अदाभ्यः पुर एता ॥ २। ४। ८। १॥
७५ अग्निर्विशां मानुषीणाम् । तूर्णी रथः सदानवः । नवꣳ सोमाय वाजिने । आज्यं
पयसोऽजनि । जुष्टꣳ शुचितमं वसु । नवꣳसोम जुषस्व नः । पीयूषस्येह तृण्णुहि ।
यस्ते भाग ऋता वयम् । नवस्य सोम ते वयम् । आ सुमतिं वृणीमहे ॥ २। ४। ८।
२॥
७६ स नो रास्व सहस्रिणः । नवꣳहविर्जुषस्व नः । ऋतुभिः सोम भूतमम् । तदङ्ग
प्रतिहर्य नः । राजन्थ्सोम स्वस्तये । नवग्ग् स्तोमं नवꣳहविः । इन्द्राग्निभ्यां निवेदय
। तज्जुषेताꣳ सचेतसा । शुचिं नु स्तोमं नवजातमद्य । इन्द्राग्नी वृत्रहणा जुषेथाम् ॥
२। ४। ८। ३॥
७७ उभा हि वाꣳसुहवा जोहवीमि । ता वाजꣳसद्य उशते धेष्ठा । अग्निरिन्द्रो नवस्य नः
। अस्य हव्यस्य तृप्यताम् । इह देवौ सहस्रिणौ । यज्ञं न आ हि गच्छताम् । वसुमन्तꣳ
सुवर्विदम् । अस्य हव्यस्य तृप्यताम् । अग्निरिन्द्रो नवस्य नः । विश्वान्देवाग्स्तर्पयत ॥
२। ४। ८। ४॥
७८ हविषोऽस्य नवस्य नः । सुवर्विदो हि जज्ञिरे । एदं बर्हिः सुष्टरीमा नवेन । अयं
यज्ञो यजमानस्य भागः । अयं बभूव भुवनस्य गर्भः । विश्वे देवा इदमद्यागमिष्ठाः ।
इमे नु द्यावापृथिवी समीची । तन्वाने यज्ञं पुरुपेशसं धिया । आऽस्मै पृणीतां भुवनानि
विश्वा । प्रजां पुष्टिममृतं नवेन ॥ २। ४। ८। ५॥
७९ इमे धेनू अमृतं ये दुहाते । पयस्वत्युत्तरामेतु पुष्टिः । इमं यज्ञं जुषमाणे नवेन
। समीची द्यावापृथिवी घृताची । यविष्ठो हव्यवाहनः । चित्रभानुर्घृतासुतिः । नवजातो

विरोचसे । अग्ने तत्ते महित्वनम् । त्वमग्ने देवताभ्यः । भागे देव न मीयसे ॥ २। ४। ८। ६॥
८० स एना विद्वान्, यक्ष्यसि । नवग्ग् स्तोमं जुषस्व नः । अग्निः प्रथमः प्राश्नातु । स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः । कृणोतु विश्वचर्षणिः । भद्रान्नः श्रेयः समनैष्ट देवाः । त्वयाऽवसेन समशीमहि त्वा । स नो मयोभूः पितो आविशस्व । शं तोकाय तनुवे स्योनः । एतमु त्यं मधुना संयुतं यवम् । सरस्वत्या अधिमनावचर्कृषुः । इन्द्र आसीथ्सीरपतिः शतक्रतुः । कीनाशा आसन्मरुतः सुदानवः ॥
२। ४। ८। ७॥ पुरएता वृणीमहे जुषेथां तर्पयतामृतं नवेन मीयसे स्योनश्चत्वारि च ॥ ८॥
जुष्टश्चक्षुषो जुष्टी नरो नक्तं जाता वृषास उत नो वृषाऽस्य ँ शुः स प्रत्नवदष्टौ ॥ ८॥
जुष्टो मन्युर्भगो जुष्टी नरो हरिवर्पसं गिरः शिप्रिन्वाजानामुत नो यद्वाग्वदन्ती विश्वा आशा अशीतिः ॥ ८०॥
जुष्टः सुदानवः ॥

## द्वितीयाष्टके पञ्चमः प्रपाठकः ५

१ प्राणो रक्षति विश्वमेजत् । इर्य्यो भूत्वा बहुधा बहूनि । स इथ्सर्वं व्यानशे । यो देवो देवेषु विभूरन्तः । आवृदूदात् क्षेत्रियध्वगद्वृषा । तमित्प्राणं मनसोप शिक्षत । अग्रं देवानामिदमत्तु नो हविः । मनसश्चित्तेदम् । भूतं भव्यं च गुप्यते । तद्धि देवेष्वग्रियम् ॥ २। ५। १। १॥
२ आ न एतु पुरश्चरम् । सह देवैरिम ँ हवम् । मनः श्रेयसि श्रेयसि । कर्मन्, यज्ञपतिं दधत् । जुषतां मे वागिद ँ हविः । विराड्देवी पुरोहिता । हव्यवाडनपायिनी । यया रूपाणि बहुधा वदन्ति । पेशा ँसि देवाः परमे जनित्रे । सा नो विराडनपस्फुरन्ती ॥ २। ५। १। २॥
३ वाग्देवी जुषतामिद ँ हविः । चक्षुर्देवानां ज्योतिरमृते न्यक्तम् । अस्य विज्ञानाय बहुधा निधीयते । तस्य सुम्नमशीमहि । मा नो हासीद्विचक्षणम् । आयुरिन्नः प्रतीर्यताम् । अनन्धाश्चक्षुषा वयम् । जीवा ज्योतिरशीमहि । सुवर्ज्योतिरुतामृतम् । श्रोत्रेण भद्रमुत शृण्वन्ति सत्यम् । श्रोत्रेण वाचं बहुधोद्यमानाम् । श्रोत्रेण मोदश्च महश्च श्रूयते । श्रोत्रेण सर्वा दिश आ शृणोमि । येन प्राच्या उत दक्षिणा । प्रतीच्यै दिशः शृण्वन्त्युत्तरात् । तदिच्छ्रोत्रं बहुधोद्यमानम् । अरान्न नेमिः परि सर्वं बभूव ॥ २। ५। १। ३॥

अग्नियमनपस्फुरन्ती सत्यꣳ सप्त च ॥ १॥
४ उदेहि वाजिन्यो अस्यप्स्वन्तः । इदꣳ राष्ट्रमाविश सूनृतावत् । यो रोहितो विश्वमिदं जजान । स नो राष्ट्रेषु सुधितां दधातु । रोहꣳरोहꣳ रोहित आरुरोह । प्रजाभिर्वृद्धिं जनुषामुपस्थम् । ताभिः सꣳरब्धो अविदथ्षडुर्वीः । गातुं प्रपश्यन्निह राष्ट्रमाहाः । आहार्षीद्राष्ट्रमिह रोहितः । मृधो व्यास्थदभयं नो अस्तु ॥ २। ५। २। १॥
५ अस्मभ्यं द्यावापृथिवी शक्करीभिः । राष्ट्रं दुहाथामिह रेवतीभिः । विममर्श रोहितो विश्वरूपः । समाचक्राणः प्ररुहो रुहश्च । दिवं गत्वाय महता महिम्ना । वि नो राष्ट्रमुनत्तु पयसा स्वेन । यास्ते विशस्तपसा संबभूवुः । गायत्रं वथ्समनु तास्त आगुः । तास्त्वा विशन्तु महसा स्वेन । सं माता पुत्रो अभ्येतु रोहितः ॥ २। ५। २। २॥
६ यूयमुग्रा मरुतः पृश्निमातरः । इन्द्रेण सयुजा प्रमृणीथ शत्रून् । आ वो रोहितो अशृणोदभिद्यवः । त्रिसप्तासो मरुतः स्वादुसंमुदः । रोहितो द्यावापृथिवी जजान । तस्मिग्ग्स्तन्तुं परमेष्ठी ततान । तस्मिञ्छिश्रिये अज एकपात् । अदृꣳहद्द्यावापृथिवी बलेन । रोहितो द्यावापृथिवी अदृꣳहत् । तेन सुवः स्तभितं तेन नाकः ॥ २। ५। २। ३॥
७ सो अन्तरिक्षे रजसो विमानः । तेन देवाः सुवरन्वविन्दन् । सुशेवं त्वा भानवो दीदिवाꣳसम् । समग्रासो जुह्वो जातवेदः । उक्षन्ति त्वा वाजिनमाघृतेन । सꣳसमग्ने युवसे भोजनानि । अग्ने शर्ध महते सौभगाय । तव द्युम्नान्युत्तमानि सन्तु । सं जास्पत्यꣳ सुयममाकृणुष्व । शत्रूयतामभितिष्ठा महाꣳसि ॥ २। ५। २। ४॥
अस्त्वेतु रोहितो नाको महाꣳसि ॥ २॥
८ पुनर्न इन्द्रो मघवा ददातु । धनानि शक्रो धन्यः सुराधाः । अर्वाचीनं कृणुतां याचितो मनः । श्रुष्टी नो अस्य हविषो जुषाणः । यानि नो जिनन्धनानि । जहर्थ शूर मन्युना । इन्द्रानुविन्द नस्तानि । अनेन हविषा पुनः । इन्द्र आशाभ्यः परि । सर्वाभ्योऽभयं करत् ॥
२। ५। ३। १॥
९ जेता शत्रून् विचर्षणिः । आकूत्यै त्वा कामाय त्वा समृधे त्वा । पुरो दधे अमृतत्वाय जीवसे । आकूतिमस्यावसे । काममस्य समृद्ध्यै । इन्द्रस्य युञ्जते धियः । आकूतिं देवीं मनसः पुरो दधे । यज्ञस्य माता सुहवा मे अस्तु । यदिच्छामि मनसा सकामः । विदेयमेनद्धृदये निविष्टम् ॥ २। ५। ३। २॥

१० सेदग्निरग्नीꣳ रत्येत्यन्यान् । यत्र वाजी तनयो वीडुपाणिः । सहस्रपाथा अक्षरा
समेति । आशानां त्वाऽऽशापालेभ्यः । चतुर्भ्यो अमृतेभ्यः । इदं भूतस्याध्यक्षेभ्यः ।
विधेम हविषा वयम् । विश्वा आशा मधुना सꣳसृजामि । अनमीवा आप ओषधयो
भवन्तु । अयं यजमानो मृधो व्यस्यताम् ।
११ अगृभीताः पशवः सन्तु सर्वे । अग्निः सोमो वरुणो मित्र इन्द्रः । बृहस्पतिः सविता
यः सहस्री । पूषा नो गोभिरवसा सरस्वती । त्वष्टा रूपाणि समनक्तु यज्ञैः । त्वष्टा
रूपाणि दधती सरस्वती । पूषा भगꣳसविता नो ददातु । बृहस्पतिर्ददिन्द्रः सहस्रम्
। मित्रो दाता वरुणः सोमो अग्निः ॥ २। ५। ३। ३॥ करन्निविष्टमस्यतां नव च ॥ ३॥
१२ आ नो भर भगमिन्द्र द्युमन्तम् । नि ते देष्णस्य धीमहि प्ररेके । उर्व इव पप्रथे
कामो अस्मे । तमापृणा वसुपते वसूनाम् । इमं कामं मन्दया गोभिरश्वैः । चन्द्रवता
राधसा पप्रथश्च । सुवर्यवो मतिभिस्तुभ्यं विप्राः । इन्द्राय वाहः कुशिकासो अक्रन् ।
इन्द्रस्य नु वीर्याणि प्रवोचम् । यानि चकार प्रथमानि वज्री ॥ २। ५। ४। १॥
१३ अहन्नहिमन्वपस्ततर्द । प्र वक्षणा अभिनत्पर्वतानाम् । अहन्नहिं पर्वते शिश्रियाणम्
। त्वष्टाऽस्मै वज्रग्ग् स्वर्यं ततक्ष । वाश्रा इव धेनवः स्यन्दमानाः । अञ्जः समुद्रमव
जग्मुरापः । वृषायमाणोऽवृणीत सोमम् । त्रिकद्रुकेष्वपिबथ्सुतस्य । आ सायकं
मघवाऽऽदत्त वज्रम् । अहन्नेनं प्रथमजा महीनाम् ॥ २। ५। ४। २॥
१४ यदिन्द्राहन्प्रथमजा महीनाम् । आन्मायिनाममिनाः प्रोत मायाः । आथ्सूर्यं
जनयन्द्यामुषासम् । तादीक्ना शत्रून्न किलाविविथ्से । अहन्वृत्रं वृत्रतरं व्यꣳसम् । इन्द्रो
वज्रेण महता वधेन । स्कन्धाꣳसीव कुलिशेना विवृक्णा । अहिः शयत उपपृक्पृथिव्याम्
। अयोध्येव दुर्मद आ हि जुह्वे । महावीरं तु विबाधमृजीषम् ॥ २। ५। ४। ३॥
१५ नातारीरस्य समृतिं वधानाम् । सꣳ रुजानाः पिपिष इन्द्रशत्रुः । विश्वो विहाया
अरतिः । वसुर्दधे हस्ते दक्षिणे । तरणिर्न शिश्रथत् । श्रवस्यया न शिश्रथत् । विश्वस्मा
इदिषुध्यसे । देवत्रा हव्यमूहिषे । विश्वस्मा इथ्सुकृते वारमृण्वति । अग्निर्द्वारा व्यृण्वति
॥ २। ५। ४। ४॥
१६ उदुज्जिहानो अभि काममीरयन् । प्रपृञ्चन्विश्वा भुवनानि पूर्वथा । आ केतुना सुषमिद्धो
यजिष्ठः । कामं नो अग्ने अभिहर्य दिग्भ्यः । जुषाणो हव्यममृतेषु दूढ्यः । आ नो रयिं
बहुलां गोमतीमिषम् । निधेहि यक्षदमृतेषु भूषन् । अश्विना यज्ञमागतम् । दाशुषः
पुरुदꣳससा । पूषा रक्षतु नो रयिम् ॥ २। ५। ४। ५॥

१७ इमं यज्ञमश्विना वर्धयन्ता । इमौ रयिं यजमानाय धत्तम् । इमौ पशून्रक्षतां विश्वतो नः । पूषा नः पातु सदमप्रयुच्छन् । प्र ते महे सरस्वति । सुभगे वाजिनीवति । सत्यवाचे भरे मतिम् । इदं ते हव्यं घृतवथ्सरस्वति । सत्यवाचे प्रभरेमा हवीꣳषि । इमानि ते दुरिता सौभगानि । तेभिर्वयꣳ सुभगासः स्याम ॥ २। ५। ४। ६॥
वज्रहीनामृजीषं व्यृण्वति रक्षतु नो रयिꣳ सौभगान्येकं च ॥ ४॥
१८ यज्ञो रायो यज्ञ ईशे वसूनाम् । यज्ञः सस्यानामुत सुक्षितीनाम् । यज्ञ इष्टः पूर्वचित्तिं दधातु । यज्ञो ब्रह्मण्वाꣳ अप्येतु देवान् । अयं यज्ञो वर्धतां गोभिरश्वैः । इयं वेदिः स्वपत्या सुवीरा । इदं बर्हिरति बर्हीग्ष्यन्या । इमं यज्ञं विश्वे अवन्तु देवाः । भग एव भगवाꣳ अस्तु देवाः । तेन वयं भगवन्तः स्याम ॥ २। ५। ५। १॥
१९ तं त्वा भग सर्व इज्ञोहवीमि । स नो भग पुर एता भवेह । भग प्रणेतर्भग सत्यराधः । भगेमां धियमुदवददन्नः । भग प्रणो जनय गोभिरश्वैः । भग प्र नृभिर्नृवन्तः स्याम । शश्वतीः समा उपयन्ति लोकाः । शश्वतीः समा उपयन्त्यापः । इष्टं पूर्तꣳ शश्वतीनाꣳ समानाꣳ शाश्वतेन । हविषेष्ट्वाऽनन्तं लोकं परमारुरोह ॥ २। ५। ५। २॥
२० इयमेव सा या प्रथमा व्यौच्छत् । सा रूपाणि कुरुते पञ्च देवी । द्वे स्वसारौ वयतस्तन्त्रमेतत् । सनातनं विततꣳ षण्मयूखम् । अवान्याग्स्तन्तूꣳन्किरतो धत्तो अन्यान् । नावपृज्याते न गमाते अन्तम् । आ वो यन्तूदवाहासो अद्य । वृष्टिं ये विश्वे मरुतो जुनन्ति । अयं यो अग्निर्मरुतः समिद्धः । एतं जुषध्वं कवयो युवानः ॥ २। ५। ५। ३॥
२१ धारावरा मरुतो धृष्णुवोजसः । मृगा न भीमास्तविषेभिरूर्मिभिः । अग्नयो न शुशुचाना ऋजीषिणः । भ्रुमिं धमन्त उप गा अवृण्वत । विचक्रमे त्रिर्देवः । आवेधसं नीलपृष्ठं बृहन्तम् । बृहस्पतिꣳ सदने सादयध्वम् । सादद्योनिं दम आदीदिवाꣳसम् । हिरण्यवर्णमरुषꣳ सपेम । स हि शुचिः शतपत्रः स शुन्ध्यूः ॥ २। ५। ५। ४॥
२२ हिरण्यवाशीरिषिरः सुवर्षाः । बृहस्पतिः स स्वावेश ऋष्वाः । पूरू सखिभ्य आ सुतिं करिष्ठः । पूषग्ग्स्तव व्रते वयम् । न रिष्येम कदाचन । स्तोतारस्त इह स्मसि । यास्ते पूषन्नावो अन्तः समुद्रे । हिरण्ययीरन्तरिक्षे चरन्ति । याभिर्यासि दूत्याꣳ सूर्यस्य । कामेन कृतः श्रव इच्छमानः ॥ २। ५। ५। ५॥
२३ अरण्यान्यरण्यान्यसौ । या प्रेव नश्यसि । कथा ग्रामं न पृच्छसि । न त्वा भीरिव विन्दती३। वृषारवाय वदते । यदुपावति चिच्चिकः । आघाटीभिरिव धावयन् ।

अरण्यानिर्महीयते । उत गाव इवादन् । उतो वेश्मेव दृश्यते ॥ २। ५। ५। ६॥
२४ उतो अरण्यानिः सायम् । शकटीरिव सर्जति । गामङ्गैष आह्वयति । दार्वङ्गैष उपावधीत् । वसन्नरण्यान्याꣳ सायम् । अक्रुक्षदिति मन्यते । न वा अरण्यानिर्हन्ति । अन्यश्चेन्नाभिगच्छति । स्वादोः फलस्य जग्ध्वा । यत्र कामं निपद्यते । आञ्जनगन्धीꣳ सुरभीम् । बह्वन्नाम कृषीवलाम् । प्राहं मृगाणां मातरम् । अरण्यानीमशꣳसिषम् ॥ २। ५। ५। ७॥ स्याम रुरोह युवानः शुन्ध्यूरिच्छमानो दृश्यते निपद्यते चत्वारि च ॥ ५॥
२५ वार्त्रहत्याय शवसे । पृतनासाह्याय च । इन्द्र त्वाऽऽवर्तयामसि । सुब्रह्माणं वीरवन्तं बृहन्तम् । उरुं गभीरं पृथुबुध्नमिन्द्र । श्रुतर्षिमुग्रमभिमातिषाहम् । अस्मभ्यं चित्रं वृषणꣳ रयिं दाः । क्षेत्रियै त्वा निर्ऋत्यै त्वा । द्रुहो मुञ्चामि वरुणस्य पाशात् । अनागसं ब्रह्मणे त्वा करोमि ॥ २। ५। ६। १॥
२६ शिवे ते द्यावापृथिवी उभे इमे । शं ते अग्निः सहाद्भिरस्तु । शं द्यावापृथिवी सहौषधीभिः । शमन्तरिक्षꣳ सह वातेन ते । शं ते चतस्रः प्रदिशो भवन्तु । या दैवीश्चतस्रः प्रदिशः । वातपत्नीरभि सूर्यो विचष्टे । तासां त्वा जरस आदधामि । प्र यक्ष्म एतु निर्ऋतिं पराचैः । अमोचि यक्ष्माद्दुरितादवर्त्यै ॥ २। ५। ६। २॥
२७ द्रुहः पाशां निर्ऋत्यै चोदमोचि । अहा अवर्तिमविदथ्स्योनम् । अप्यभूद्भद्रे सुकृतस्य लोके । सूर्यमृतं तमसो ग्राह्या यत् । देवा अमुञ्चन्नसृजन्व्येनसः । एवमहमिमं क्षेत्रियाज्जामिशꣳसात् । द्रुहो मुञ्चामि वरुणस्य पाशात् । बृहस्पते युवमिन्द्रश्च वस्वः । दिव्यस्येशाथे उत पार्थिवस्य । धत्तꣳ रयिꣳ स्तुवते कीरयेचित् ॥ २। ५। ६। ३॥
२८ यूयं पात स्वस्तिभिः सदा नः । देवायुधमिन्द्रमा जोहुवानाः । विश्वावृधमभि ये रक्षमाणाः । येन हता दीर्घमध्वानमायन् । अनन्तमर्थमनिवर्थ्स्यमानाः । यत्ते सुजाते हिमवथ्सु भेषजम् । मयोभूः शंतमा यद्धृदोऽसि । ततो नो देहि सीबले । अदो गिरिभ्यो अधि यत्प्रधावसि । सꣳशोभमाना कन्येव शुभ्रे ॥ २। ५। ६। ४॥
२९ तां त्वा मुद्गला हविषा वर्धयन्ति । सा नः सीबले रयिमाभाजयेह । पूर्वं देवा अपरेणानुपश्यञ्जन्मभिः । जन्मान्यवरैः पराणि । वेदानि देवा अयमस्मीति माम् । अहꣳ हित्वा शरीरं जरसः परस्तात् । प्राणापानौ चक्षुः श्रोत्रम् । वाचं मनसि संभृताम् । हित्वा शरीरं जरसः परस्तात् । आ भूतिं भूतिं वयमश्नवामहै । इमा एव ता उषसो याः प्रथमा व्यौच्छन् । ता देव्यः कुर्वते पञ्च रूपा । शश्वतीर्नावपृज्यन्ति । न गमन्त्यन्तम् ॥ २। ५। ६। ५॥ करोम्यवर्त्यै चिच्छुभ्रेऽश्नवामहै चत्वारि च ॥ ६॥

३० वसू॑नां त्वाऽधी॑तेन । रुद्राणा॑मूर्म्या । आ॒दि॒त्याना॒ं तेज॑सा । विश्वे॑षां दे॒वाना॒ं क्रतु॑ना । म॒रुता॑मेम्ना॒ जु॒होमि॒ स्वाहा᳚ । अ॒भिभू॑ति॒रहमाग॑मम् । इन्द्र॑सखा स्वा॒यु॒धः । आस्वा॑शा॒सु दु॒ष्षहः॑ । इ॒दं वर्चो॑ अ॒ग्निना॑ द॒त्तमाग᳚ात् । यशो॑ भर्गः॑ सह॒ ओजो॑ बलं॑ च ॥ २। ५। ७। १॥

३१ दी॒र्घा॒यु॒त्वाय॑ श॒तशा॑रदाय । प्र॒ति॒गृ॒भ्णा॒मि॒ म॒ह॒ते वी॒र्या॑य । आयु॑रसि वि॒श्वायु॑रसि । स॒र्वायु॑रसि॒ सर्व॒मायु॑रसि । सर्वं॑ म॒ आयु॑र्भूयात् । सर्व॒मायु॑र्गेषम् । भूर्भुवः॒ सुवः॑ । अ॒ग्निर्धर्मे॑णान्ना॒दः । मृ॒त्युर्धर्मे॑णान्न॑पतिः । ब्रह्म॑ क्ष॒त्र२ँ स्वाहा᳚ ॥ २। ५। ७। २॥

३२ प्र॒जाप॑तिः प्रणे॒ता । बृह॒स्पतिः॑ पु॒र ए॒ता । य॒मः पन्थाः᳚ । च॒न्द्रमाः॑ पुनर॒सुः स्वाहा᳚ । अ॒ग्निर॑न्ना॒दोऽन्न॑पतिः । अ॒न्ना॒द्यम॑स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा᳚ । सोमो॒ राजा॒ राज॑पतिः । रा॒ज्यम॑स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा᳚ । वरु॑णः स॒म्राट्थ्स॒म्राड्ड्व॑तिः । सा॒म्रा᳚ज्यम॑स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा᳚ ॥ २। ५। ७। ३॥

३३ मि॒त्रः, क्ष॒त्रं क्ष॒त्रप॑तिः । क्ष॒त्रम॑स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा᳚ । इन्द्रो॒ बलं॒ बल॑पतिः । बल॑म॒स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा᳚ । बृह॒स्पति॒र्ब्रह्म॒ ब्रह्म॑पतिः । ब्रह्मा॒स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा᳚ । स॒वि॒ता रा॒ष्ट्रँ रा॒ष्ट्रप॑तिः । रा॒ष्ट्रम॑स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा᳚ । पू॒षा वि॒शां वि॒ड्व॑तिः । वि॒शम॑स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा᳚ । सर॑स्वती॒ पुष्टिः॒ पुष्टि॑पत्नी । पुष्टि॑म॒स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा᳚ । त्वष्टा॑ प॒शू॒नां मि॒थु॒ना॒नाँ रू॒प॒कृ॒द्रू॒पप॑तिः । रू॒पेणा॒स्मि॒न्, य॒ज्ञे यज॑मानाय प॒शून्द॑दातु॒ स्वाहा᳚ ॥ २। ५। ७। ४॥ च॒ स्वाहा॒ सा॒म्रा᳚ज्यम॑स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा॒ वि॒शम॑स्मि॒न्, य॒ज्ञे यज॑मानाय ददातु॒ स्वाहा॒ च॒त्वारि॑ च ॥ ७॥ अ॒ग्निः सोमो॒ वरु॑णो मि॒त्र इन्द्रो॒ बृह॒स्पतिः॑ सवि॒ता पू॒षा सर॑स्वती॒ त्वष्टा॒ दश॑ ॥

३४ स ईं᳚ पाहि॒ य ऋ॑जी॒षी त॒रु॒त्रः । यः शि॒प्रवा॑न्वृष॒भो यो म॑ती॒नाम् । यो गो᳚त्र॒भिद्व॑ज्र॒भृद्यो ह॑रि॒ष्ठाः । स इ॑न्द्र चि॒त्राँ अ॒भि॒तृ॑न्धि॒ वाजा॑न् । आ ते॒ शुष्मो॑ वृष॒भ ए॑तु प॒श्चात् । ओत्त॒राद॑धरा॒गा पु॒रस्ता᳚त् । आ वि॒श्वतो॑ अ॒भि सम॑त्व॒र्वाङ् । इन्द्र॑ द्यु॒म्नँ सुव॑र्वद्धेह्य॒स्मे । प्रोष्व॑स्मै पु॒रो र॒थम् । इन्द्रा॑य शू॒षम॑र्चत ॥ २। ५। ८। १॥

३५ अ॒भी के॑चि॒दु लो॑क॒कृत् । स॒ङ्गे स॒मथ्सु॑ वृत्र॒हा । अ॒स्माकं॑ बोधि चोदि॒ता । नभ॑न्तामन्य॒केषा᳚म् । ज्या॒का अधि॒ धन्व॑सु । इन्द्रं॑ व॒यँ शु॑ना॒सीर᳚म् । अ॒स्मिन्, य॒ज्ञे ह॑वामहे । आ वाजै॒रुप॑ नो गमत् । इन्द्रा॑य॒ शु॒ना॒सीरा॑य । स्रु॒चा जु॑हुत नो ह॒विः ॥ २। ५। ८। २॥

३६ जु॒षतां॒ प्रति॒ मेधि॑रः । प्र ह॒व्यानि॑ घृ॒तव॑न्त्यस्मै । हर्य॑श्वाय भरता स॒जोषाः᳚ ।

इन्द्रर्तुभिर्ब्रह्मणा वावृधानः । शुनासीरी हविरिदं जुषस्व । वयः सुपर्णा उपसेदुरिन्द्रम् । प्रियमेधा ऋषयो नाधमानाः । अप ध्वान्तमूर्णुहि पूर्धि चक्षुः । मुमुग्ध्यस्मान्निधयेव बद्धान् । बृहदिन्द्राय गायत ॥ २। ५। ८। ३॥

३७ मरुतो वृत्रहन्तमम् । येन ज्योतिरजनयन्नृतावृधः । देवं देवाय जागृवि । का मिहैकाः क इमे पतङ्गाः । मान्थालाः कुलि परि मा पतन्ति । अनावृतैनान्प्रधमन्तु देवाः । सौपर्णं चक्षुस्तनुवा विदेय । एवावन्दस्व वरुणं बृहन्तम् । नमस्या धीरममृतस्य गोपाम् । स नः शर्म त्रिवरूथं विय॑ꣳसत् ॥ २। ५। ८। ४॥

३८ यूयं पात स्वस्तिभिः सदा नः । नाके सुपर्णमुप यत्पतन्तम् । हृदा वेनन्तो अभ्यचक्षत त्वा । हिरण्यपक्षं वरुणस्य दूतम् । यमस्य योनौ शकुनं भुरण्युम् । शं नो देवीरभिष्टये । आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः । ईशाना वार्याणाम् । क्षयन्तीश्चर्षणीनाम् ॥ २। ५। ८। ५॥

३९ अपो याचामि भेषजम् । अप्सु मे सोमो अब्रवीत् । अन्तर्विश्वानि भेषजा । अग्निं च विश्वशंभुवम् । आपश्च विश्वभेषजीः । यदप्सु ते सरस्वति । गोष्वश्वेषु यन्मधु । तेन मे वाजिनीवति । मुखमङ्धि सरस्वति । या सरस्वती वैशम्भल्या ॥ २। ५। ८। ६॥

४० तस्यां मे रास्व । तस्यास्ते भक्षीय । तस्यास्ते भूयिष्ठभाजो भूयास्म । अहं त्वदस्मि मदसि त्वमेतत् । ममासि योनिस्तव योनिरस्मि । ममैव सन्वह हव्यान्यग्ने । पुत्रः पित्रे लोककृज्जातवेदः । इहैव सन्तत्र सन्तं त्वाऽग्ने । प्राणेन वाचा मनसा बिभर्मि । तिरो मा सन्तमायुर्मा प्रहासीत् ॥
२। ५। ८। ७॥

४१ ज्योतिषा त्वा वैश्वानरेणोपतिष्ठे । अयं ते योनिर्ऋत्वियः । यतो जातो अरोचथाः । तं जानन्नग्न आरोह । अथा नो वर्धया रयिम् । या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्माऽऽत्मानम् । अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि । यज्ञो भूत्वा यज्ञमासीद स्वां योनिम् । जातवेदो भुव आजायमानः सक्षय एहि । उपावरोह जातवेदः पुनस्त्वम् ॥ २। ५। ८। ८॥

४२ देवेभ्यो हव्यं वह नः प्रजानन् । आयुः प्रजाꣳ रयिमस्मासु धेहि । अजस्रो दीदिहि नो दुरोणे । तमिन्द्रं जोहवीमि मघवानमुग्रम् । सत्रादधानमप्रतिष्कुतꣳ शवाꣳसि । मꣳहिष्ठो गीर्भिरा च यज्ञियोऽववर्तत् । राये नो विश्वा सुपथा कृणोतु वज्री । त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत् । सोममपिबद्विष्णुना सुतं यथावशत् । स ईं ममाद

महि कर्म कर्तवे महामुरुम् ॥ २। ५। ८। ९॥
४३ सैनꣳसश्चद्देवं देवः सत्यमिन्दुꣳसत्य इन्द्रः । विदद्यती सरमा रुग्णमद्रेः । महि पाथः पूर्व्यꣳ सध्रियक्कः । अग्रं नयथ्सुपद्यक्षराणाम् । अच्छा रवं प्रथमा जानती गात् । विदद्गव्यꣳसरमा दृढमूर्वम् । येना नुकं मानुषी भोजते विट् । आ ये विश्वा स्वपत्यानि चक्रुः । कृण्वानासो अमृतत्वाय गातुम् । त्वं नृभिर्नृपते देवहूतौ ॥ २। ५। ८। १०॥
४४ भूरीणि वृत्वा हर्यश्व हꣳसि । त्वं निदस्युं चुमुरिम् । धुनिं चास्वापयो दभीतये सुहन्तु । एवा पाहि प्रत्नथा मन्दतु त्वा । श्रुधि ब्रह्म वावृधस्वोत गीर्भिः । आविः सूर्यं कृणुहि पीपिहीषः । जहि शत्रूꣳरभि गा इन्द्र तृन्धि । अग्ने बाधस्व वि मृधो नुदस्व । अपामीवा अप रक्षाꣳसि सेध । अस्माथ्समुद्राद्बृहतो दिवो नः ॥ २। ५। ८। ११॥
४५ अपां भूमानमुप नः सृजेह । यज्ञ प्रतितिष्ठ सुमतौ सुशेवा आ त्वा । वसूनि पुरुधा विशन्तु । दीर्घमायुर्यजमानाय कृण्वन् । अधामृतेन जरितारमङ्धि । इन्द्रः शुनावद्वितनोति सीरम् । संवथ्सरस्य प्रतिमाणमेतत् । अर्कस्य ज्योतिस्तदिदास ज्येष्ठम् । संवथ्सरꣳ शुनवथ्सीरमेतत् । इन्द्रस्य राधः प्रयतं पुरु त्मना । तदर्करूपं विमिमानमेति । द्वादशारे प्रतितिष्ठतीद्वृषा । अश्वायन्तो गव्यन्तो वाजयन्तः । हवामहे त्वोपगन्त वा उ । आभूषन्तस्त्वा सुमतौ नवायाम् । वयमिन्द्र त्वा शुनꣳ हुवेम ॥ २। ५। ८। १२॥
अर्चत हविर्गायत यꣳसच्चर्षणीनां वैशम्भल्या हासीत्त्वमुरुं देवहूतौ नस्त्मना षट्च ॥ ८॥
प्राण उदेहि पुनरा नो भर यज्ञो रायो वार्त्रहत्याय वसूनाꣳ स ईं पाह्यष्टौ ॥ ८॥
प्राणो रक्षत्यगृभीता धारावरा मरुतो दीर्घायुत्वाय ज्योतिषा त्वा पञ्चचत्वारिꣳशत् ॥ ४५॥
प्राणः शुनꣳ हुवेम ॥

## द्वितीयाष्टके षष्ठः प्रपाठकः ६

१ स्वाद्वीं त्वा स्वादुना । तीव्रां तीव्रेण । अमृताममृतेन । मधुमतीं मधुमता । सृजामि सꣳसोमेन । सोमोऽस्यश्विभ्यां पच्यस्व । सरस्वत्यै पच्यस्व । इन्द्राय सुत्राम्णे पच्यस्व । परीतो षिञ्चता सुतम् । सोमो य उत्तमꣳ हविः ॥ २। ६। १। १॥
२ दधन्वा यो नर्यो अप्स्वन्तरा । सुषाव सोममद्रिभिः । पुनातु ते परिस्रुतम् । सोमꣳ सूर्यस्य दुहिता । वारेण शश्वता तना । वायुः पूतः पवित्रेण । प्राङ्क्सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा । वायुः पूतः पवित्रेण । प्रत्यङ्क्सोमो अतिद्रुतः ॥ २। ६। १। २॥

३ इन्द्रस्य युज्यः सखा । ब्रह्म क्षत्रं पवते तेज इन्द्रियम् । सुरया सोमः सुत आसुतो मदाय । शुक्रेण देव देवताः पिपृग्धि । रसेनान्नं यजमानाय धेहि । कुविदङ्ग यवमन्तो यवं चित् । यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुत भोजनानि । ये बर्हिषो नमोवृक्तिं न जग्मुः । उपयामगृहीतोऽस्यश्विभ्यां त्वा जुष्टं गृह्णामि ॥ २। ६। १। ३॥

४ सरस्वत्या इन्द्राय सुत्राम्णे । एष ते योनिस्तेजसे त्वा । वीर्याय त्वा बलाय त्वा । तेजोऽसि तेजो मयि धेहि । वीर्यमसि वीर्यं मयि धेहि । बलमसि बलं मयि धेहि । नाना हि वां देवहितꣳ सदः कृतम् । मा सꣳसृक्षाथां परमे व्योमन् । सुरा त्वमसि शुष्मिणी सोम एषः । मा मा हिꣳसीः स्वां योनिमाविशन् ॥ २। ६। १। ४॥

५ उपयामगृहीतोऽस्याश्विनं तेजः । सारस्वतं वीर्यम् । ऐन्द्रं बलम् । एष ते योनिर्मोदाय त्वा । आनन्दाय त्वा महसे त्वा । ओजोऽस्योजो मयि धेहि । मन्युरसि मन्युं मयि धेहि । महोऽसि महो मयि धेहि । सहोऽसि सहो मयि धेहि । या व्याघ्रं विषूचिका । उभौ वृकं च रक्षति । श्येनं पतत्रिणꣳसिꣳहम् । सेमं पात्वꣳहसः । संपृचः स्थ सं मा भद्रेण पृङ्क्त । विपृचः स्थ वि मा पाप्मना पृङ्क्त ॥ २। ६। १। ५॥ हविः प्रत्यङ्ख्सोमो अतिद्रुतो गृह्णाम्याविशन्विषूचिका पञ्च च ॥ १॥

६ सोमो राजाऽमृतꣳसुतः । ऋजीषेणाजहान्मृत्युम् । ऋतेन सत्यमिन्द्रियम् । विपानꣳशुक्रमन्धसः । इन्द्रस्येन्द्रियम् । इदं पयोऽमृतं मधु । सोममद्भ्यो व्यपिबत् । छन्दसा हꣳसः शुचिषत् । ऋतेन सत्यमिन्द्रियम् । अद्भ्यः, क्षीरं व्यपिबत् ॥ २। ६। २। १॥

७ कुङ्ङाङ्गिरसो धिया । ऋतेन सत्यमिन्द्रियम् । अन्नात्परिस्रुतो रसम् । ब्रह्मणा व्यपिबत्क्षत्रम् । ऋतेन सत्यमिन्द्रियम् । रेतो मूत्रं विजहाति । योनिं प्रविशदिन्द्रियम् । गर्भो जरायुणाऽऽवृतः । उल्बं जहाति जन्मना । ऋतेन सत्यमिन्द्रियम् ॥ २। ६। २। २॥

८ वेदेन रूपे व्यकरोत् । सतासती प्रजापतिः । ऋतेन सत्यमिन्द्रियम् । सोमेन सोमौ व्यपिबत् । सुतासुतौ प्रजापतिः । ऋतेन सत्यमिन्द्रियम् । दृष्ट्वा रूपे व्याकरोत् । सत्यानृते प्रजापतिः । अश्रद्धामनृतेऽदधात् । श्रद्धाꣳ सत्ये प्रजापतिः । ऋतेन सत्यमिन्द्रियम् । दृष्ट्वा परिस्रुतो रसम् । शुक्रेण शुक्रं व्यपिबत् । पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियम् । विपानꣳशुक्रमन्धसः । इन्द्रस्येन्द्रियम् । इदं पयोऽमृतं मधु ॥
२। ६। २। ३॥ अद्भ्यः, क्षीरं व्यपिबज्जन्मनर्तेन सत्यमिन्द्रिय२ꣳ श्रद्धाꣳ सत्ये

प्रजापतिरष्टौ च ॥ २॥ सोमो राजा विपानꣳ सोममद्भ्योऽन्नाद्रेतो मूत्रं वेदेन सतासती
सोमेन सुतासुतौ दृष्ट्वा रूपे दृष्ट्वा परिस्रुता रसं विपानं दश ॥
९ सुरावन्तं बर्हिषदꣳसुवीरम् । यज्ञꣳ हिन्वन्ति महिषा नमोभिः । दधानाः सोमं दिवि
देवतासु । मदेमेन्द्रं यजमानाः स्वर्काः । यस्ते रसः संभृत ओषधीषु । सोमस्य शुष्मः
सुरया सुतस्य । तेन जिन्व यजमानं मदेन । सरस्वतीमश्विनाविन्द्रमग्निम् । यमश्विना
नमुचेरासुरादधि । सरस्वत्यसनोदिन्द्रियाय ॥ २। ६। ३। १॥
१० इमं तꣳ शुक्रं मधुमन्तमिन्दुम् । सोमꣳ राजानमिह भक्षयामि । यदत्र रिप्तꣳ
रसिनः सुतस्य । यदिन्द्रो अपिबच्छचीभिः । अहं तदस्य मनसा शिवेन । सोमꣳ
राजानमिह भक्षयामि । पितृभ्यः स्वधाविभ्यः स्वधा नमः । पितामहेभ्यः स्वधाविभ्यः
स्वधा नमः । प्रपितामहेभ्यः स्वधाविभ्यः स्वधा नमः । अक्षन्पितरः ॥ २। ६। ३। २॥
११ अमीमदन्त पितरः । अतीतृपन्त पितरः । अमीमृजन्त पितरः । पितरः शुन्धध्वम्
। पुनन्तु मा पितरः सोम्यासः । पुनन्तु मा पितामहाः । पुनन्तु प्रपितामहाः । पवित्रेण
शतायुषा । पुनन्तु मा पितामहाः । पुनन्तु प्रपितामहाः ॥ २। ६। ३। ३॥
१२ पवित्रेण शतायुषा । विश्वमायुर्व्यश्नवै । अग्न आयूꣳषि पवसेऽग्ने पवस्व । पवमानः
सुवर्जनः पुनन्तु मा देवजनाः । जातवेदः पवित्रवद्यत्ते पवित्रमर्चिषि । उभाभ्यां देव
सवितर्वैश्वदेवी पुनती । ये समानाः समनसः । पितरो यमराज्ये । तेषां लोकः स्वधा
नमः । यज्ञो देवेषु कल्पताम् ॥ २। ६। ३। ४॥
१३ ये सजाताः समनसः । जीवा जीवेषु मामकाः । तेषाग् श्रीर्मयि कल्पताम् ।
अस्मिं ल्लोके शतꣳ समाः । द्वे स्रुती अशृणवं पितॄणाम् । अहं देवानामुत मर्त्यानाम्
। याभ्यामिदं विश्वमेजथ्समेति । यदन्तरा पितरं मातरं च । इदꣳ हविः प्रजननं मे
अस्तु । दशवीरꣳ सर्वगण२ꣳ स्वस्तये । आत्मसनि प्रजासनि । पशुसन्यभयसनि
लोकसनि । अग्निः प्रजां बहुलां मे करोतु । अन्नं पयो रेतो अस्मासु धत्त ।
रायस्पोषमिषमूर्जमस्मासु दीधरथ्स्वाहा ॥ २। ६। ३। ५॥ इन्द्रियाय पितरः शतायुषा
पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः कल्पताग् स्वस्तये पञ्च च ॥ ३॥
१४ सीसेन तन्त्रं मनसा मनीषिणः । ऊर्णासूत्रेण कवयो वयन्ति । अश्विना यज्ञꣳ सविता
सरस्वती । इन्द्रस्य रूपं वरुणो भिषज्यन् । तदस्य रूपममृतꣳ शचीभिः । तिस्रो
दधुर्देवताः सꣳरराणाः । लोमानि शष्पैर्बहुधा न तोक्मभिः । त्वगस्य माꣳसमभवन्न

लाजाः । तदश्विना भिषजा रुद्रवर्तनी । सरस्वती वयति पेशो अन्तरः ॥ २। ६। ४। १॥
१५ अस्थि मज्ञानं मासरैः । कारोतरेण दधतो गवां त्वचि । सरस्वती मनसा पेशलं वसु । नासत्याभ्यां वयति दर्शतं वपुः । रसं परिस्रुता न रोहितम् । नग्नहुर्धीरस्तसरं न वेम । पयसा शुक्रममृतं जनित्रम् । सुरया मूत्राज्जनयन्ति रेतः । अपामतिं दुर्मतिं बाधमानाः । ऊवध्यं वातँ सबुवं तदारात् ॥ २। ६। ४। २॥
१६ इन्द्रः सुत्रामा हृदयेन सत्यम् । पुरोडाशेन सविता जजान । यकृत्क्लोमानं वरुणो भिषज्यन् । मतस्ने वायव्यैर्न मिनाति पित्तम् । आन्त्राणि स्थाली मधु पिन्वमाना । गुदा पात्राणि सुदुघा न धेनुः । श्येनस्य पत्रं न प्लीहा शचीभिः । आसन्दी नाभिरुदरं न माता । कुम्भो वनिष्ठुर्जनिता शचीभिः । यस्मिन्नग्रे योन्यां गर्भो अन्तः ॥
२। ६। ४। ३॥
१७ प्लाशीर्व्यक्तः शतधार उत्सः । दुहे न कुम्भीग् स्वधां पितृभ्यः । मुखँ सदस्य शिर इत्सदेन । जिह्वा पवित्रमश्विना सँ सरस्वती । चप्पं न पायुर्भिषगस्य वालः । वस्तिर्न शेपो हरसा तरस्वी । अश्विभ्यां चक्षुरमृतं ग्रहाभ्याम् । छागेन तेजो हविषा शृतेन । पक्ष्माणि गोधूमैः क्वलैरुतानि । पेशो न शुक्लमसितं वसाते ॥ २। ६। ४। ४॥
१८ अविर्न मेषो नसि वीर्याय । प्राणस्य पन्था अमृतो ग्रहाभ्याम् । सरस्वत्युपवाकैर्व्यानम् । नस्यानि बर्हिर्बदरैर्जजान । इन्द्रस्य रूपमृषभो बलाय । कर्णाभ्याग् श्रोत्रममृतं ग्रहाभ्याम् । यवा न बर्हिर्भ्रुवि केसराणि । कर्कन्धु जज्ञे मधु सारघं मुखात् । आत्मन्नुपस्थे न वृकस्य लोम । मुखे श्मश्रूणि न व्याघ्रलोमम् ॥
२। ६। ४। ५॥
१९ केशा न शीर्षन्, यशसे श्रियै शिखा । सिँहस्य लोम त्विषिरिन्द्रियाणि । अङ्गान्यात्मन्भिषजा तदश्विना । आत्मानमङ्गैः समधात्सरस्वती । इन्द्रस्य रूपँ शतमानमायुः । चन्द्रेण ज्योतिरमृतं दधाना । सरस्वती योन्यां गर्भमन्तः । अश्विभ्यां पत्नी सुकृतं बिभर्ति । अपाँ रसेन वरुणो न साम्ना । इन्द्रग्ग् श्रियै जनयन्नप्सु राजा । तेजः पशूनाँ हविरिन्द्रियावत् । परिस्रुता पयसा सारघं मधु । अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याम् । अमृतः सोम इन्दुः ॥ २। ६। ४। ६॥ अन्तर आरादन्तर्वसाते व्याघ्रलोमँ राजा चत्वारि च ॥ ४॥
२० मित्रोऽसि वरुणोऽसि । समहं विश्वैर्देवैः । क्षत्रस्य नाभिरसि । क्षत्रस्य योनिरसि

। स्योना मा सीद । सुषदा मा सीद । मा त्वा हिँसीत् । मा मा हिँसीत् ।
निषसाद धृतव्रतो वरुणः । पस्त्यास्वा ॥ २। ६। ५। १॥
२१ साम्राज्याय सुक्रतुः । देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो
हस्ताभ्याम् । अश्विनोर्भैषज्येन । तेजसे ब्रह्मवर्चसायाभिषिञ्चामि । देवस्य त्वा सवितुः
प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्याम् । सरस्वत्यै भैषज्येन ॥ २। ६। ५। २॥
२२ वीर्यायान्नाद्यायाभिषिञ्चामि । देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो
हस्ताभ्याम् । इन्द्रस्येन्द्रियेण । श्रियै यशसे बलायाभिषिञ्चामि । कोऽसि कतमोऽसि ।
कस्मै त्वा काय त्वा । सुश्लोका ४ सुमङ्गला ४ सत्यराजा ३ न् । शिरो मे श्रीः ॥
२। ६। ५। ३॥
२३ यशो मुखम् । त्विषिः केशाश्च श्मश्रूणि । राजा मे प्राणोऽमृतम् । सम्राड्चक्षुः ।
विराड्ढ्रोत्रम् । जिह्वा मे भद्रम् । वाङ्महः । मनो मन्युः । स्वराड्भामः । मोदाः प्रमोदा
अङ्गुलीरङ्गानि ॥ २। ६। ५। ४॥
२४ चित्तं मे सहः । बाहू मे बलमिन्द्रियम् । हस्तौ मे कर्म वीर्यम् । आत्मा क्षत्रमुरो
मम । पृष्टीर्मे राष्ट्रमुदरमँसौ । ग्रीवाश्च श्रोण्यौ । ऊरू अरत्नी जानुनी । विशो
मेऽङ्गानि सर्वतः । नाभिर्मे चित्तं विज्ञानम् । पायुर्मेऽपचितिर्भसत् ॥ २। ६। ५। ५॥
२५ आनन्दनन्दावाण्डौ मे । भगः सौभाग्यं पसः । जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि । विशि
राजा प्रतिष्ठितः । प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे । प्रत्यश्वेषु प्रतितिष्ठामि गोषु । प्रत्यङ्गेषु
प्रतितिष्ठाम्यात्मन् । प्रतिप्राणेषु प्रतितिष्ठामि पुष्टे । प्रति द्यावापृथिव्योः । प्रतितिष्ठामि
यज्ञे ॥ २। ६। ५। ६॥
२६ त्रया देवा एकादश । त्रयस्त्रिँशाः सुराधसः । बृहस्पतिपुरोहिताः । देवस्य सवितुः
सवे । देवा देवैरवन्तु मा । प्रथमा द्वितीयैः । द्वितीयास्तृतीयैः । तृतीयाः सत्येन ।
सत्यं यज्ञेन । यज्ञो यजुर्भिः ॥ २। ६। ५। ७॥
२७ यजूँषि सामभिः । सामान्यृग्भिः । ऋचो याज्याभिः । याज्या वषट्कारैः । वषट्कारा
आहुतिभिः । आहुतयो मे कामान्थ्समर्धयन्तु । भूः स्वाहा । लोमानि प्रयतिर्मम । त्वङ्म
आनतिरागतिः । माँसं म उपनतिः । वस्वस्थि । मज्जा म आनतिः ॥ २। ६। ५।
८॥ पस्त्यास्वा सरस्वत्यै भैषज्येन श्रीरङ्गानि भसद्यज्ञे यज्ञो यजुर्भिरुपनतिर्द्वे च ॥ ५॥
२८ यद्देवा देवहेडनम् । देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसः । विश्वान्मुञ्चत्वँहसः
। यदि दिवा यदि नक्तम् । एनाँसि चकृमा वयम् । वायुर्मा तस्मादेनसः ।

विश्वान्मुञ्चत्व꣡ꣳहसः । यदि जाग्रद्यदि स्वप्ने । एना꣡ꣳसि चकृमा वयम् ॥ २। ६। ६। १॥
२९ सूर्यो मा तस्मादेनसः । विश्वान्मुञ्चत्व꣡ꣳहसः । यद्ग्रामे यदरण्ये । यथ्सभायां यदिन्द्रिये । यच्छूद्रे यदर्ये । एनश्चकृमा वयम् । यदेकस्याधि धर्मणि । तस्यावयजनमसि । यदापो अघ्निया वरुणेति शपामहे । ततो वरुण नो मुञ्च ॥ २। ६। ६। २॥
३० अवभृथ निचङ्कुण निचेरुरसि निचङ्कुण । अव देवैर्देवकृतमेनोऽयाट् । अव मर्त्यैर्मर्त्यकृतम् । उरोरा नो देव रिषस्पाहि । सुमित्रा न आप ओषधयः सन्तु । दुर्मित्रास्तस्मै भुयासुः । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः । द्रुपदादिवेन्मुमुचानः । स्विन्नः स्नात्वी मलादिव ॥ २। ६। ६। ३॥
३१ पूतं पवित्रेणेवाज्यम् । आपः शुन्धन्तु मैनसः । उद्वयं तमसस्परि । पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यम् । अगन्म ज्योतिरुत्तमम् । प्रतियुतो वरुणस्य पाशः । प्रत्यस्तो वरुणस्य पाशः । एधोऽस्येधिषीमहि । समिदसि ॥ २। ६। ६। ४॥
३२ तेजोऽसि तेजो मयि धेहि । अपो अन्वचारिषम् । रसेन समसृक्ष्महि । पयस्वा꣡ꣳ अग्न आगमम् । तं मा स꣡ꣳसृज वर्चसा । प्रजया च धनेन च । समाववर्ति पृथिवी । समुषाः । समु सूर्यः । समु विश्वमिदं जगत् । वैश्वानर ज्योतिर्भूयासम् । विभुं कामं व्यश्नवै । भूः स्वाहा ॥ २। ६। ६। ५॥ स्वप्न एना꣡ꣳसि चकृमा वयं मुञ्च मलादिव समिदसि जगत्रीणि च ॥ ६॥
३३ होता यक्षथ्समिधेन्द्रमिडस्पदे । नाभा पृथिव्या अधि । दिवो वर्ष्मन्थ्समिध्यते । ओजिष्ठश्चर्षणीसहान् । वेत्वाज्यस्य होतर्यज । होता यक्षत्तनूनपातम् । ऊतिभिर्जेतारमपराजितम् । इन्द्रं देव꣡ꣳ सुवर्विदम् । पथिभिर्मधुमत्तमैः । नराश꣡ꣳसेन तेजसा ॥ २। ६। ७। १॥
३४ वेत्वाज्यस्य होतर्यज । होता यक्षदिडाभिरिन्द्रमीडितम् । आजुह्वानममर्त्यम् । देवो देवैः सवीर्यः । वज्रहस्तः पुरंदरः । वेत्वाज्यस्य होतर्यज । होता यक्षद्बर्हिषीन्द्रं निषद्वरम् । वृषभं नर्यापसम् । वसुभी रुद्रैरादित्यैः । सयुग्भिर्बर्हिरासदत् ॥ २। ६। ७। २॥
३५ वेत्वाज्यस्य होतर्यज । होता यक्षदोजो न वीर्यम् । सहो द्वार इन्द्रमवर्धयन् । सुप्रायणा विश्रयन्तामृतावृधः । द्वार इन्द्राय मीढुषे । वियन्त्वाज्यस्य होतर्यज । होता यक्षदुषे इन्द्रस्य धेनू । सुदुघे मातरौ मही । सवातरौ न तेजसी । वथ्समिन्द्रमवर्धताम्

॥
२। ६। ७। ३॥
३६ वीतामाज्यस्य होतर्यज । होता यक्षद्दैव्या होतारा । भिषजा सखाया । हविषेन्द्रं भिषज्यतः । कवी देवौ प्रचेतसौ । इन्द्राय धत्त इन्द्रियम् । वीतामाज्यस्य होतर्यज । होता यक्षत्तिस्रो देवीः । त्रयस्त्रिधातवोऽपसः । इडा सरस्वती भारती ॥ २। ६। ७। ४॥
३७ महीन्द्रपत्नीर्हविष्मतीः । वियन्त्वाज्यस्य होतर्यज । होता यक्षत्त्वष्टारमिन्द्रं देवम् । भिषजꣳसुयजं घृतश्रियम् । पुरुरूपꣳसुरेतसं मघोनिम् । इन्द्राय त्वष्टा दधदिन्द्रियाणि । वेत्वाज्यस्य होतर्यज । होता यक्षद्वनस्पतिम् । शमितारꣳ शतक्रतुम् । धियो जोष्टारमिन्द्रियम् ॥ २। ६। ७। ५॥
३८ मध्वा समञ्जन्पथिभिः सुगेभिः । स्वदाति हव्यं मधुना घृतेन । वेत्वाज्यस्य होतर्यज । होता यक्षदिन्द्रग्ग् स्वाहाऽऽज्यस्य । स्वाहा मेदसः । स्वाहा स्तोकानाम् । स्वाहा स्वाहाकृतीनाम् । स्वाहा हव्यसूक्तीनाम् । स्वाहा देवाꣳ आज्यपान् । स्वाहेन्द्रꣳ होत्राज्जुषाणाः । इन्द्र आज्यस्य वियन्तु । होतर्यज ॥ २। ६। ७। ६॥ तेजसाऽऽसददवर्धतां भारतीन्द्रियं जुषाणा द्वे च ॥ ७॥ समिधेन्द्रं तनूनपातमिडाभिर्बर्हिष्योज उषे दैव्या तिस्रस्त्वष्टारं वनस्पतिमिन्द्रम् । समिधेन्द्रं चतुर्वेत्वेको वियन्तु द्विर्वीतामेको वियन्तु द्विर्वेत्वेको वियन्तु होतर्यज ॥
३९ समिद्ध इन्द्र उषसामनीके । पुरोरुचा पूर्वकृद्वावृधानः । त्रिभिर्देवैस्त्रिꣳशता वज्रबाहुः । जघान वृत्रं वि दुरो ववार । नराशꣳसः प्रति शूरो मिमानः । तनूनपात्प्रति यज्ञस्य धाम । गोभिर्वपावान्मधुना समञ्जन् । हिरण्यैश्चन्द्री यजति प्रचेताः । ईडितो देवैर्हरिवाꣳ अभिष्टिः । आजुह्वानो हविषा शर्धमानः ॥ २। ६। ८। १॥
४० पुरंदरो मघवान् वज्रबाहुः । आयातु यज्ञमुप नो जुषाणः । जुषाणो बर्हिर्हरिवान्न इन्द्रः । प्राचीनꣳसीदत्प्रदिशा पृथिव्याः । उरुव्यचाः प्रथमानꣳ स्योनम् । आदित्यैरक्तं वसुभिः सजोषाः । इन्द्रं दुरः कवष्यो धावमानाः । वृषाणं यन्तु जनयः सुपत्नीः । द्वारो देवीरभितो विश्रयन्ताम् । सुवीरा वीरं प्रथमाना महोभिः ॥ २। ६। ८। २॥
४१ उषासा नक्ता बृहती बृहन्तम् । पयस्वती सुदुघे शूरमिन्द्रम् । पेशस्वती तन्तुना संव्ययन्ती । देवानां देवं यजतः सुरुक्मे । दैव्या मिमाना मनसा पुरुत्रा । होताराविन्द्रं प्रथमा सुवाचा । मूर्धन्, यज्ञस्य मधुना दधाना । प्राचीनं ज्योतिर्हविषा वृधातः । तिस्रो

देवीर्हविषा वर्धमानाः । इन्द्रं जुषाणा वृषणं न पत्नीः ॥ २। ६। ८। ३॥
४२ अच्छिन्नं तन्तुं पयसा सरस्वती । इडा देवी भारती विश्वतूर्तिः । त्वष्टा दधदिन्द्राय शुष्मम् । अपाकोऽचिष्टुर्यशसे पुरूणि । वृषा यजन्वृषणं भूरिरेताः । मूर्धन्, यज्ञस्य समनक्तु देवान् । वनस्पतिरवसृष्टो न पाशैः । त्मन्या समञ्जञ्छमिता न देवः । इन्द्रस्य हव्यैर्जठरं पृणानः । स्वदाति हव्यं मधुना घृतेन । स्तोकानामिन्दुं प्रति शूर इन्द्रः । वृषायमाणो वृषभस्तुराषाट् । घृतप्रुषा मधुना हव्यमुन्दन् । मूर्धन्, यज्ञस्य जुषताग् स्वाहा ॥ २। ६। ८। ४॥ शर्धमानो महोभिः पत्नीर्घृतेन चत्वारि च ॥ ८॥
४३ आचर्षणि प्रा विवेष यन्मा । तꣳ सध्रीचीः । सत्यमित्तन्न त्वावाꣳ अन्यो अस्ति । इन्द्र देवो न मर्त्यो ज्यायान् । अहन्नहिं परिशयानमर्णः । अवासृजोऽपो अच्छा समुद्रम् । प्रससाहिषे पुरुहूत शत्रून् । ज्येष्ठस्ते शुष्म इह रातिरस्तु । इन्द्राभर दक्षिणेना वसूनि । पतिः सिन्धूनामसि रेवतीनाम् । स शेवृधमधिधा द्युम्नमस्मे । महि क्षत्रं जनाषाडिन्द्र तव्यम् । रक्षा च नो मघोनः पाहि सूरीन् । राये च नः स्वपत्या इषे धाः ॥ २। ६। ९। १॥ रेवतीनां चत्वारि च ॥ ९॥
४४ देवं बर्हिरिन्द्रꣳ सुदेवं देवैः । वीरवथ्स्तीर्णं वेद्यामवर्धयत् । वस्तोर्वृतं प्राक्तोर्भृतम् । राया बर्हिष्मतोऽत्यगात् । वसुवने वसुधेयस्य वेतु यज । देवीर्द्वार इन्द्रꣳ संघाते । विड्वीर्यामन्नवर्धयन् । आ वथ्सेन तरुणेन कुमारेण च मीविता अपार्वाणम् । रेणुककाटं नुदन्ताम् । वसुवने वसुधेयस्य वियन्तु यज ॥ २। ६। १०। १॥
४५ देवी उषासा नक्ता । इन्द्रं यज्ञे प्रयत्यह्वेताम् । दैवीर्विशः प्रायासिष्टाम् । सुप्रीते सुधिते अभूताम् । वसुवने वसुधेयस्य वीतां यज । देवी जोष्ट्री वसुधिती । देवमिन्द्रमवर्धताम् । अयाव्यन्याऽघा द्वेषाꣳसि । आऽन्याऽवाक्षीद्वसु वार्याणि । यजमानाय शिक्षिते ॥ २। ६। १०। २॥
४६ वसुवने वसुधेयस्य वीतां यज । देवी ऊर्जाहुती दुघे सुदुघे । पयसेन्द्रमवर्धताम् । इषमूर्जमन्याऽवाक्षीत् । सग्धिꣳ सपीतिमन्या । नवेन पूर्वं दयमाने । पुराणेन नवम् । अधातामूर्जमूर्जाहुती वसु वार्याणि । यजमानाय शिक्षिते । वसुवने वसुधेयस्य वीतां यज ॥ २। ६। १०। ३॥
४७ देवा दैव्या होतारा । देवमिन्द्रमवर्धताम् । हताघशꣳसावाभार्ष्टां वसु वार्याणि । यजमानाय शिक्षितौ । वसुवने वसुधेयस्य वीतां यज । देवीस्तिस्रस्तिस्रो देवीः । पतिमिन्द्रमवर्धयन् । अस्पृक्षद्भारती दिवम् । रुद्रैर्यज्ञꣳ सरस्वती । इडा वसुमती गृहान्

॥ २। ६। १०। ४॥
४८ वसुवने वसुधेयस्य वियन्तु यज । देव इन्द्रो नराशꣳसः । त्रिवरूथस्त्रिवन्धुरः । देवमिन्द्रमवर्धयत् । शतेन शितिपृष्ठानामाहितः । सहस्रेण प्रवर्तते । मित्रावरुणेदस्य होत्रमर्हतः । बृहस्पतिः स्तोत्रम् । अश्विनाऽऽध्वर्यवम् । वसुवने वसुधेयस्य वेतु यज
॥ २। ६। १०। ५॥
४९ देव इन्द्रो वनस्पतिः । हिरण्यपर्णो मधुशाखः सुपिप्पलः । देवमिन्द्रमवर्धयत् । दिवमग्रेणाप्रात् । आऽन्तरिक्षं पृथिवीमदृꣳहीत् । वसुवने वसुधेयस्य वेतु यज । देवं बर्हिर्वारितीनाम् । देवमिन्द्रमवर्धयत् । स्वासस्थमिन्द्रेणासन्नम् । अन्या बर्हीग्ष्यभ्यभूत् । वसुवने वसुधेयस्य वेतु यज । देवो अग्निः स्विष्टकृत् । देवमिन्द्रमवर्धयत् । स्विष्टं कुर्वन्त्स्विष्टकृत् । स्विष्टमद्य करोतु नः । वसुवने वसुधेयस्य वेतु यज ॥ २। ६। १०। ६॥ वियन्तु यज शिक्षिते शिक्षिते वसुवने वसुधेयस्य वीतां यज गृहान्, वेतु यजाभूत्षड्ढ ॥ १०॥ देवं बर्हिर्देवीर्द्वारो देवी उषासा नक्ता देवी जोष्ट्री देवी ऊर्जाहुती देवा दैव्या होतारा शिक्षितौ देवीस्तिस्रस्तिस्रो देवीर्देव इन्द्रो नराशꣳसो देव इन्द्रो वनस्पतिर्देवं बर्हिर्वारितीनां देवो अग्निः स्विष्टकृद्देवम् ॥ वेतु वियन्तु चतुर्वीतामेको वियन्तु चतुर्वेतु । अवर्धयदवर्धयन्त्रिरवर्धतामेकोऽवर्धय २ꣳश्चतुरवर्धयत् । वस्तोरा वथ्सेन दैवीरयावीषꣳहतास्पृक्षच्छुतेन दिवमिन्द्रग्ग् स्वासस्थ२ꣳ स्विष्टम् । स्विष्टꣳ शिक्षिते शिक्षिते शिक्षितौ ॥
५० होता यक्षथ्समिधाऽग्निमिडस्पदे । अश्विनेन्द्रꣳ सरस्वतीम् । अजो धूम्रो न गोधूमैः क्वलैर्भेषजम् । मधु शष्पैर्न तेज इन्द्रियम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज । होता यक्षत्तनूनपाथ्सरस्वती । अविर्मेषो न भेषजम् । पथा मधुमताऽऽभरन् । अश्विनेन्द्राय वीर्यम् ॥ २। ६। ११। १॥
५१ बदरैरुपवाकाभिर्भेषजं तोक्मभिः । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज । होता यक्षन्नराशꣳसं न नग्नहुम् । पतिꣳसुरायै भेषजम् । मेषः सरस्वती भिषक् । रथो न चन्द्र्यश्विनोर्वपा इन्द्रस्य वीर्यम् । बदरैरुपवाकाभिर्भेषजं तोक्मभिः । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज ॥ २। ६। ११। २॥
५२ होता यक्षदिडेडित आजुह्वानः सरस्वतीम् । इन्द्रं बलेन वर्धयन्न् । ऋषभेण गवेन्द्रियम् । अश्विनेन्द्राय वीर्यम् । यवैः कर्कन्धुभिः । मधु लाजैर्न मासरम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज । होता यक्षद्बर्हिः सुष्टरीमोर्णम्रदाः

। भिषङ्नासत्या ॥ २। ६। ११। ३॥

५३ भिषजाऽश्विनाऽश्वा शिशुमती । भिषग्धेनुः सरस्वती । भिषग्दुह इन्द्राय भेषजम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज । होता यक्षद्दुरो दिशः । कवष्यो न व्यचस्वतीः । अश्विभ्यां न दुरो दिशः । इन्द्रो न रोदसी दुघे । दुहे कामान्थ्सरस्वती ॥ २। ६। ११। ४॥

५४ अश्विनेन्द्राय भेषजम् । शुक्रं न ज्योतिरिन्द्रियम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज । होता यक्षथ्सुपेशसोषे नक्तं दिवा । अश्विना संजानाने । समञ्जाते सरस्वत्या । त्विषिमिन्द्रे न भेषजम् । श्येनो न रजसा हृदा । पयः सोमः परिस्रुता घृतं मधु ॥ २। ६। ११। ५॥

५५ वियन्त्वाज्यस्य होतर्यज । होता यक्षद्दैव्या होतारा भिषजाऽश्विना । इन्द्रं न जागृवी दिवा नक्तं न भेषजैः । शूषꣳ सरस्वती भिषक् । सीसेन दुह इन्द्रियम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज । होता यक्षत्तिस्रो देवीर्न भेषजम् । त्रयस्त्रिधातवोऽपसः । रूपमिन्द्रे हिरण्ययम् ॥

५६ अश्विनेडा न भारती । वाचा सरस्वती । मह इन्द्राय दधुरिन्द्रियम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज । होता यक्षत्त्वष्टारमिन्द्रमश्विना । भिषजं न सरस्वतीम् । ओजो न जूतिरिन्द्रियम् । वृको न रभसो भिषक् । यशः सुरया भेषजम् ॥ २। ६। ११। ७॥

५७ श्रिया न मासरम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज । होता यक्षद्वनस्पतिम् । शमितारꣳ शतक्रतुम् । भीमं न मन्युꣳ राजानं व्याघ्रं नमसाऽश्विना भामम् । सरस्वती भिषक् । इन्द्राय दुह इन्द्रियम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज ॥ २। ६। ११। ८॥

५८ होता यक्षदग्नि२ꣳ स्वाहाऽऽज्यस्य स्तोकानाम् । स्वाहा मेदसां पृथक् । स्वाहा छागमश्विभ्याम् । स्वाहा मेषꣳ सरस्वत्यै । स्वाहर्षभमिन्द्राय सिꣳहाय सहसेन्द्रियम् । स्वाहाऽग्निं न भेषजम् । स्वाहा सोममिन्द्रियम् । स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारं वरुणं भिषजां पतिम् । स्वाहा वनस्पतिं प्रियं पाथो न भेषजम् । स्वहा देवाꣳ आज्यपान् ॥ २। ६। ११। ९॥

५९ स्वाहाऽग्निꣳ होत्राज्जुषाणो अग्निर्भेषजम् । पयः सोमः परिस्रुता घृतं मधु । वियन्त्वाज्यस्य होतर्यज । होता यक्षदश्विना सरस्वतीमिन्द्रꣳ सुत्रामाणम् । इमे सोमाः

सुरामाणः । छागैर्न मेषैर्ऋषभैः सुताः । शष्पैर्न तोक्मभिः । लाजैर्महस्वन्तः । मदा मासरेण परिष्कृताः । शुक्राः पयस्वन्तोऽमृताः । प्रस्थिता वो मधुश्चुतः । तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा । जुषन्ताꣳसौम्यं मधु । पिबन्तु मदन्तु वियन्तु सोमम् । होतर्यज ॥ २। ६। ११। १०॥ वीर्यं वियन्त्वाज्यस्य होतर्यज नासत्या सरस्वती मधु हिरण्ययं भेषजं वियन्त्वाज्यस्य होतर्यजाज्यपानमृता पञ्च च ॥ ११॥ समिधाऽग्निꣳ षट् । तनूनपाथ्सप्त । नराशꣳसमृषिः । इडेडितो यवैरष्टौ । बरहिः सप्त । दुरोऽश्विना शुक्रं नव । सुपेशस ऋषिः । दैव्या होतारा सीसेन रसः । तिस्रस्त्वष्टारमष्टावष्टौ । वनस्पतिमृषि । अग्निं त्रयोदश । अश्विना द्वादश त्रयोदश । समिधाऽग्निं बदरैर्बदरैर्यवैरश्विना त्विषिमश्विना न भेषजꣳ रूपमश्विना भीमं भामम् ॥

६० समिद्धो अग्निरश्विना । तप्तो घर्मो विराट्थ्सुतः । दुहे धेनुः सरस्वती । सोमꣳ शुक्रमिहेन्द्रियम् । तनूपा भिषजा सुते । अश्विनोभा सरस्वती । मध्वा रजाꣳसीन्द्रियम् । इन्द्राय पथिभिर्वहान् । इन्द्रायेन्दुꣳ सरस्वती । नराशꣳसेन नग्नहुः ॥ २। ६। १२। १॥

६१ अधातामश्विना मधु । भेषजं भिषजा सुते । आजुह्वाना सरस्वती । इन्द्रायेन्द्रियाणि वीर्यम् । इडाभिरश्विनाविषम् । समूर्जꣳ सꣳ रयिं दधुः । अश्विना नमुचेः सुतम् । सोमꣳशुक्रं परिस्रुता । सरस्वती तमाभरत् । बरहिषेन्द्राय पातवे ॥ २। ६। १२। २॥

६२ कवष्यो न व्यचस्वतीः । अश्विभ्यां न दुरो दिशः । इन्द्रो न रोदसी दुघे । दुहे कामान्थ्सरस्वती । उषासा नक्तमश्विना । दिवेन्द्रꣳसायमिन्द्रियैः । संजानाने सुपेशसा । समञ्जाते सरस्वत्या । पातं नो अश्विना दिवा । पाहि नक्तꣳसरस्वति ॥ २। ६। १२। ३॥

६३ दैव्या होतारा भिषजा । पातमिन्द्रꣳ सचा सुते । तिस्रस्त्रेधा सरस्वती । अश्विना भारतीडा । तीव्रं परिस्रुता सोमम् । इन्द्राय सुषवुर्मदम् । अश्विना भेषजं मधु । भेषजं नः सरस्वती । इन्द्रे त्वष्टा यशः श्रियम् । रूपꣳ रूपमधुः सुते । ऋतुथेन्द्रो वनस्पतिः । शशमानः परिस्रुता । कीलालमश्विभ्यां मधु । दुहे धेनुः सरस्वती । गोभिर्न सोममश्विना । मासरेण परिष्कृता । समधाताꣳ सरस्वत्या । स्वाहेन्द्रे सुतं मधु ॥ २। ६। १२। ४॥ नग्नहुः पातवे सरस्वत्यधुः सुतेऽष्टौ च ॥ १२॥

६४ अश्विना हविरिन्द्रियम् । नमुचेर्धिया सरस्वती । आ शुक्रमासुराद्वसु । मघमिन्द्राय जभ्रिरे । यमश्विना सरस्वती । हविषेन्द्रमवर्धयन् । स बिभेद वलं मघम् । नमुचावासुरे

सचा । तमिन्द्रं पशवः सचा । अश्विनोभा सरस्वती ॥ २। ६। १३। १॥
६५ दधाना अभ्यनूषत । हविषा यज्ञमिन्द्रियम् । य इन्द्र इन्द्रियं दधुः । सविता वरुणो
भगः । स सुत्रामा हविष्पतिः । यजमानाय सश्चत । सविता वरुणो दधत् । यजमानाय
दाशुषे । आदत्त नमुचेर्वसु । सुत्रामा बलमिन्द्रियम् ॥ २। ६। १३। २॥
६६ वरुणः, क्षत्रमिन्द्रियम् । भगेन सविता श्रियम् । सुत्रामा यशसा बलम् । दधाना
यज्ञमाशत । अश्विना गोभिरिन्द्रियम् । अश्वेभिर्वीर्यं बलम् । हविषेन्द्रꣳ सरस्वती ।
यजमानमवर्धयन् । ता नासत्या सुपेशसा । हिरण्यवर्तनी नरा । सरस्वती हविष्मती
। इन्द्र कर्मसु नोऽवत । ता भिषजा सुकर्मणा । सा सुदुघा सरस्वती । स वृत्रहा
शतक्रतुः । इन्द्राय दधुरिन्द्रियम् ॥ २। ६। १३। ३॥ उभा सरस्वती बलमिन्द्रियं नरा
षद्व ॥ १३॥
६७ देवं बर्हिः सरस्वती । सुदेवमिन्द्रे अश्विना । तेजो न चक्षुरक्ष्योः । बर्हिषा
दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज । देवीर्द्वारो अश्विना । भिषजेन्द्रे
सरस्वती । प्राणं न वीर्यं नसि । द्वारो दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज
॥ २। ६। १४। १॥
६८ देवी उषासावश्विना । भिषजेन्द्रे सरस्वती । बलं न वाचमास्ये । उषाभ्यां
दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज । देवी जोष्ट्री अश्विना । सुत्रामेन्द्रे
सरस्वती । श्रोत्रं न कर्णयोर्यशः । जोष्ट्रीभ्यां दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु
यज ॥ २। ६। १४। २॥
६९ देवी ऊर्जाहुती दुघे सुदुघे । पयसेन्द्रꣳ सरस्वत्यश्विना भिषजाऽवत । शुक्रं न
ज्योतिः स्तनयोराहुती धत्त इन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज । देवा देवानां
भिषजा । होताराविन्द्रमश्विना । वषट्कारैः सरस्वती । त्विषिं न हृदये मतिम् । होतृभ्यां
दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज ॥ २। ६। १४। ३॥
७० देवीस्तिस्रस्तिस्रो देवीः । सरस्वत्यश्विना भारतीडा । शूषं न मध्ये नाभ्याम् ।
इन्द्राय दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज । देव इन्द्रो नराशꣳसः ।
त्रिवरूथः सरस्वत्याऽश्विभ्यामीयते रथः । रेतो न रूपममृतं जनित्रम् । इन्द्राय त्वष्टा
दधदिन्द्रियाणि । वसुवने वसुधेयस्य वियन्तु यज ॥ २। ६। १४। ४॥
७१ देव इन्द्रो वनस्पतिः । हिरण्यपर्णो अश्विभ्याम् । सरस्वत्याः सुपिप्पलः । इन्द्राय
पच्यते मधु । ओजो न जूतिमृषभो न भामम् । वनस्पतिर्नो दधदिन्द्रियाणि । वसुवने

वसुधेयस्य वियन्तु यज । देवं बर्हिर्वारितीनाम् । अध्वरे स्तीर्णमश्विभ्याम् । ऊर्णम्रदाः सरस्वत्याः ॥
२। ६। १४। ५॥
७२ स्योनमिन्द्र ते सदः । ईशायै मन्युँ राजानं बर्हिषा दधुरिन्द्रियम् । वसुवने वसुधेयस्य वियन्तु यज । देवो अग्निः स्विष्टकृत् । देवान्, यक्षद्यथायथम् । होताराविन्द्रमश्विना । वाचा वाचँ सरस्वतीम् । अग्निँ सोमग्ग् स्विष्टकृत् । स्विष्ट इन्द्रः सुत्रामा सविता वरुणो भिषक् । इष्टो देवो वनस्पतिः । स्विष्टा देवा आज्यपाः । इष्टो अग्निरग्निना । होता होत्रे स्विष्टकृत् । यशो न दधदिन्द्रियम् । ऊर्जमपचिति२ँ स्वधाम् । वसुवने वसुधेयस्य वियन्तु यज ॥ २। ६। १४। ६॥ द्वारो दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज जोष्ट्रीभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज होतृभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यजेन्द्रियाणि वसुवने वसुधेयस्य वियन्तु यज सरस्वत्या वनस्पतिः षट्च ॥ १४॥ देवं बर्हिर्देवीर्द्वारो देवी उषासावश्विना देवी जोष्ट्री देवी ऊर्जाहुती देवा देवानां भिषजा वषट्कारैर्देवीस्तिस्रस्तिस्रो देवीर्देव इन्द्रो नराशँसो देव इन्द्रो वनस्पतिर्देवं बर्हिर्वारितीनां देवो अग्निः स्विष्टकृद्देवान् ॥ समिधाऽग्निं देवं बर्हिः सरस्वत्यश्विना सर्वं वियन्तु । द्वारस्तिस्रः सर्वं वियन्तु । अज इन्द्रमोजोऽग्निंपरः सरस्वतीम् । नक्तंपूर्वः सरस्वति । अन्यत्र सरस्वती । भिषक्पूर्वं दुह इन्द्रियम् । अन्यत्र दधुरिन्द्रियम् । सौत्रामण्याँ सुतासुती । अज्ञन्त्ययं यजमानः ॥
७३ अग्निमद्य होतारमवृणीत । अयँ सुतासुती यजमानः । पचन्पक्तीः । पचन्पुरोडाशान् । गृह्णन्ग्रहान् । बध्नन्नश्विभ्यां छागँ सरस्वत्या इन्द्राय । बध्नन्थ्सरस्वत्यै मेषमिन्द्रायाश्विभ्याम् । बध्नन्निन्द्रायर्षभमश्विभ्याँ सरस्वत्यै । सूपस्था अद्य देवो वनस्पतिरभवत् । अश्विभ्यां छागेन सरस्वत्या इन्द्राय ॥ २। ६। १५। १॥
७४ सरस्वत्यै मेषेणेन्द्रायाश्विभ्याम् । इन्द्रायर्षभेणाश्विभ्याँ सरस्वत्यै । अक्षग्ग्स्तान्मेदस्तः प्रति पचताऽग्रभीषुः । अवीवृधन्त ग्रहैः । अपातामश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा । सोमान्थ्सुराम्णः । उपो उक्थामदाः श्रौद्विमदा अदन् । अवीवृधन्ताङ्गूषैः । त्वामद्यर्ष आर्षेयर्षीणां नपादवृणीत । अयँ सुतासुती यजमानः । बहुभ्य आसंगतेभ्यः । एष मे देवेषु वसुवार्या यक्ष्यत इति । ता या देवा देवदानान्यदुः । तान्यस्मा आ च शास्स्व । आ च गुरस्व । इषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः । सूक्तवाकाय सूक्ता ब्रूहि ॥ २। ६। १५। २॥ इन्द्राय यजमानः सप्त च ॥

१५॥
७५ उशन्तस्त्वा हवामह आ नो अग्ने सुकेतुना । त्वꣳ सोम महे भगं त्वꣳ सोम प्रचिकितो मनीषा । त्वया हि नः पितरः सोम पूर्वे त्वꣳ सोम पितृभिः संविदानः । बर्हिषदः पितर आऽहं पितॄन् । उपहूताः पितरोऽग्निष्वात्ताः पितरः । अग्निष्वात्तानृतुमतो हवामहे । नराशꣳसे सोमपीथं य आशुः । ते नो अर्वन्तः सुहवा भवन्तु । शं नो भवन्तु द्विपदे शं चतुष्पदे । ये अग्निष्वात्ता येऽनग्निष्वात्ताः ॥ २। ६। १६। १॥
७६ अꣳहोमुचः पितरः सोम्यासः । परेऽवरेऽमृतासो भवन्तः । अधिब्रुवन्तु ते अवन्त्वस्मान् । वान्यायै दुग्धे जुषमाणाः करम्भम् । उदीराणा अवरे परे च । अग्निष्वात्ता ऋतुभिः संविदानाः । इन्द्रवन्तो हविरिदं जुषन्ताम् । यदग्ने कव्यवाहन त्वमग्न ईडितो जातवेदः । मातली कव्यैः । ये तातृपुर्देवत्रा जेहमानाः । होत्रावृधः स्तोमतष्टासो अर्कैः । आऽग्ने याहि सुविदत्रेभिरर्वाङ् । सत्यैः कव्यैः पितृभिर्घर्मसद्भिः । हव्यवाहमजरं पुरुप्रियम् । अग्निं घृतेन हविषा सपर्यन् । उपासदं कव्यवाहं पितृणाम् । स नः प्रजां वीरवतीꣳ समृण्वतु ॥
२। ६। १६। २॥ अनग्निष्वात्ता जेहमानाः सप्त च ॥ १६॥
७७ होता यक्षदिडस्पदे । समिधानं महद्यशः । सुषमिद्धं वरेण्यम् । अग्निमिन्द्रं वयोधसम् । गायत्रीं छन्द इन्द्रियम् । त्र्यविं गां वयो दधत् । वेत्वाज्यस्य होतर्यज । होता यक्षच्छुचिव्रतम् । तनूनपातमुद्भिदम् । यं गर्भमदितिर्दधे ॥ २। ६। १७। १॥
७८ शुचिमिन्द्रं वयोधसम् । उष्णिहं छन्द इन्द्रियम् । दित्यवाहं गां वयो दधत् । वेत्वाज्यस्य होतर्यज । होता यक्षदीडेन्यम् । ईडितं वृत्रहन्तमम् । इडाभिरीड्यꣳ सहः । सोममिन्द्रं वयोधसम् । अनुष्टुभं छन्द इन्द्रियम् । त्रिवत्सं गां वयो दधत् ॥
७९ वेत्वाज्यस्य होतर्यज । होता यक्षथ्सुबर्हिषदम् । पूषण्वन्तममर्त्यम् । सीदन्तं बरहिषि प्रिये । अमृतेन्द्रं वयोधसम् । बृहतीं छन्द इन्द्रियम् । पञ्चाविं गां वयो दधत् । वेत्वाज्यस्य होतर्यज । होता यक्षद्व्यचस्वतीः । सुप्रायणा ऋतावृधः ॥ २। ६। १७। ३॥
८० द्वारो देवीर्हिरण्ययीः । ब्रह्माण इन्द्रं वयोधसम् । पङ्क्तिं छन्द इहेन्द्रियम् । तुर्यवाहं गां वयो दधत् । वेत्वाज्यस्य होतर्यज । होता यक्षथ्सुपेशसे । सुशिल्पे बृहती उभे । नक्तोषासा न दर्शते । विश्वमिन्द्रं वयोधसम् । त्रिष्टुभं छन्द इन्द्रियम् ॥ २। ६। १७। ४॥

८१ पष्ठवाहं गां वयो दधत् । वेत्वाज्यस्य होतर्यज । होता यक्षत्प्रचेतसा । देवानामुत्तमं यशः । होतारा दैव्या कवी । सयुजेन्द्रं वयोधसम् । जगतीं छन्द इहेन्द्रियम् । अनड्वाहं गां वयो दधत् । वेत्वाज्यस्य होतर्यज । होता यक्षत्पेशस्वतीः ॥ २। ६। १७। ५॥

८२ तिस्रो देवीर्हिरण्ययीः । भारतीर्बृहतीर्महीः । पतिमिन्द्रं वयोधसम् । विराजं छन्द इहेन्द्रियम् । धेनुं गां न वयो दधत् । वेत्वाज्यस्य होतर्यज । होता यक्षथ्सुरेतसम् । त्वष्टारं पुष्टिवर्धनम् । रूपाणि बिभ्रतं पृथक् । पुष्टिमिन्द्रं वयोधसम् ॥ २। ६। १७। ६॥

८३ द्विपदं छन्द इहेन्द्रियम् । उक्षाणं गां न वयो दधत् । वेत्वाज्यस्य होतर्यज । होता यक्षच्छतक्रतुम् । हिरण्यपर्णमुक्थिनम् । रशनां बिभ्रतं वशिम् । भगमिन्द्रं वयोधसम् । ककुभं छन्द इहेन्द्रियम् । वशां वेहतं गां न वयो दधत् । वेत्वाज्यस्य होतर्यज । होता यक्षथ्स्वाहाकृतीः । अग्निं गृहपतिं पृथक् । वरुणं भेषजं कविम् । क्षत्रमिन्द्रं वयोधसम् । अतिच्छन्दसं छन्द इन्द्रियम् । बृहदृषभं गां वयो दधत् । वेत्वाज्यस्य होतर्यज ॥ २। ६। १७। ७॥ दधे दधदृतावृध इन्द्रियं पेशस्वतीर्वयोधसं वेत्वाज्यस्य होतर्यज सप्त च ॥ १७॥ इडस्पदेऽग्निं गायत्रीं त्र्यविम् । शुचिव्रतꣳ शुचिमुष्णिहं दित्यवाहम् । ईडेऽन्यꣳ सोममनुष्टुभं त्रिवथ्सम् । सुबर्हिषदममृतेन्द्रं बृहतीं पञ्चाविम् । व्यचस्वतीः सुप्रायणा द्वारो ब्रह्माणः पङ्क्तिमिह तुर्यवाहम् । सुपेशसे विश्वमिन्द्रं त्रिष्टुभं पष्ठवाहम् । प्रचेतसा सयुजेन्द्रं जगतीमिहानड्वाहम् । पेशस्वतीस्तिस्रो भारतीः पतिं विराजमिह धेनुं न । सुरेतसं त्वष्टारं पुष्टिं द्विपदमिहोक्षाणं न । शतक्रतुं भगमिन्द्रं ककुभमिह वशां वेहतं गां न । स्वाहाकृतीः, क्षत्रमतिच्छन्दसं बृहदृषभं गां वयः । इन्द्रियमृषिवसुनवदशेहेन्द्रियमष्ट नव दश गां न वयो दधथ्सर्ववेतु ॥

८४ समिद्धो अग्निः समिधा । सुषमिद्धो वरेण्यः । गायत्री छन्द इन्द्रियम् । त्र्यविर्गौर्वयो दधुः । तनूनपाच्छुचिव्रतः । तनूनपाच्च सरस्वती । उष्णिक्छन्द इन्द्रियम् । दित्यवाड्गौर्वयो दधुः । इडाभिरग्निरीड्यः । सोमो देवो अमर्त्यः ॥ २। ६। १८। १॥

८५ अनुष्टुप्छन्द इन्द्रियम् । त्रिवथ्सो गौर्वयो दधुः । सुबर्हिरग्निः पूषण्वान् । स्तीर्णबर्हिरमर्त्यः । बृहती छन्द इन्द्रियम् । पञ्चाविर्गौर्वयो दधुः । दुरो देवीर्दिशो महीः । ब्रह्मा देवो बृहस्पतिः । पङ्क्तिश्छन्द इहेन्द्रियम् । तुर्यवाड्गौर्वयो दधुः ॥ २। ६। १८। २॥

८६ उषे यह्वी सुपेशसा । विश्वे देवा अमर्त्याः । त्रिष्टुप्छन्द इन्द्रियम् । पष्ठवाड्गौर्वयो

दधुः । दैव्या होतारा भिषजा । इन्द्रेण सयुजा युजा । जगती छन्द इहेन्द्रियम् ।
अनड्वान्गौर्वयो दधुः । तिस्र इडा सरस्वती । भारती मरुतो विशः ॥ २। ६। १८। ३॥
८७ विराट् छन्द इहेन्द्रियम् । धेनुर्गौर्न वयो दधुः । त्वष्टा तुरीपो अद्भुतः । इन्द्राग्नी
पुष्टिवर्धना । द्विपाच्छन्द इहेन्द्रियम् । उक्षा गौर्न वयो दधुः । शमिता नो वनस्पतिः ।
सविता प्रसुवन्भगम् । ककुच्छन्द इहेन्द्रियम् । वशा वेहद्गौर्न वयो दधुः । स्वाहा यज्ञं
वरुणः । सुक्षत्रो भेषजं करत् । अतिच्छन्दाश्छन्द इन्द्रियम् । बृहदृषभो गौर्वयो दधुः
॥ २। ६। १८। ४॥ अमर्त्यस्तुर्यवाड्गौर्वयो दधुर्विशो वशा वेहद्गौर्न वयो दधुश्चत्वारि च
॥ १८॥
८८ वसन्तेनर्तुना देवाः । वसवस्त्रिवृता स्तुतम् । रथन्तरेण तेजसा । हविरिन्द्रे वयो
दधुः । ग्रीष्मेण देवा ऋतुना । रुद्राः पञ्चदशे स्तुतम् । बृहता यशसा बलम् । हविरिन्द्रे
वयो दधुः । वर्षाभिर्ऋतुनाऽऽदित्याः । स्तोमे सप्तदशे स्तुतम् ॥ २। ६। १९। १॥
८९ वैरूपेण विशौजसा । हविरिन्द्रे वयो दधुः । शारदेनर्तुना देवाः । एकविꣳश
ऋभवः स्तुतम् । वैराजेन श्रिया श्रियम् । हविरिन्द्रे वयो दधुः । हेमन्तेनर्तुना देवाः ।
मरुतस्त्रिणवे स्तुतम् । बलेन शक्वरीः सहः । हविरिन्द्रे वयो दधुः । शैशिरेणर्तुना देवाः
। त्रयस्त्रिꣳशेऽमृतग्ग् स्तुतम् । सत्येन रेवतीः, क्षत्रम् । हविरिन्द्रे वयो दधुः ॥ २। ६।
१९। २॥ स्तोमे सप्तदशे स्तुतꣳ सहो हविरिन्द्रे वयो दधुश्चत्वारि च ॥ १९॥ वसन्तेन
ग्रिष्मेण वर्षाभिः शारदेन हेमन्तेन शैशिरेण षट् ॥
९० देवं बर्हिरिन्द्रं वयोधसम् । देवं देवमवर्धयत् । गायत्रिया छन्दसेन्द्रियम् । तेज
इन्द्रे वयो दधत् । वसुवने वसुधेयस्य वेतु यज । देवीर्द्वारो देवमिन्द्रं वयोधसम् ।
देवीर्देवमवर्धयन् । उष्णिहा छन्दसेन्द्रियम् । प्राणमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य
वियन्तु यज ॥ २। ६। २०। १॥
९१ देवी देवं वयोधसम् । उषे इन्द्रमवर्धताम् । अनुष्टुभा छन्दसेन्द्रियम् । वाचमिन्द्रे
वयो दधत् । वसुवने वसुधेयस्य वीतां यज । देवी जोष्ट्री देवमिन्द्रं वयोधसम् । देवी
देवमवर्धताम् । बृहत्या छन्दसेन्द्रियम् । श्रोत्रमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य
वीतां यज ॥ २। ६। २०। २॥
९२ देवी ऊर्जाहुती देवमिन्द्रं वयोधसम् । देवी देवमवर्धताम् । पङ्क्त्या छन्दसेन्द्रियम् ।
शुक्रमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य वीतां यज । देवा दैव्या होतारा देवमिन्द्रं
वयोधसम् । देवा देवमवर्धताम् । त्रिष्टुभा छन्दसेन्द्रियम् । त्विषिमिन्द्रे वयो दधत् ।

वसुवने वसुधेयस्य वीतां यज ॥ २। ६। २०। ३॥
९३ देवीस्तिस्रस्तिस्रो देवीर्वयोधसम् । पतिमिन्द्रमवर्धयन् । जगत्या छन्दसेन्द्रियम् । बलमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य वियन्तु यज । देवो नराशꣳसो देवमिन्द्रं वयोधसम् । देवो देवमवर्धयत् । विराजा छन्दसेन्द्रियम् । रेत इन्द्रे वयो दधत् । वसुवने वसुधेयस्य वेतु यज ॥ २। ६। २०। ४॥
९४ देवो वनस्पतिर्देवमिन्द्रं वयोधसम् । देवो देवमवर्धयत् । द्विपदा छन्दसेन्द्रियम् । भगमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य वेतु यज । देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसम् । देवो देवमवर्धयत् । ककुभा छन्दसेन्द्रियम् । यश इन्द्रे वयो दधत् । वसुवने वसुधेयस्य वेतु यज । देवो अग्निः स्विष्टकृद्देवमिन्द्रं वयोधसम् । देवो देवमवर्धयत् । अतिच्छन्दसा छन्दसेन्द्रियम् । क्षत्रमिन्द्रे वयो दधत् । वसुवने वसुधेयस्य वेतु यज ॥ २। ६। २०। ५॥ वियन्तु यज वीतां यज वीतां यज वेतु यज वेतु यज पञ्च च ॥ २०॥
देवं बर्हिर्गायत्रिया तेजः । देवीर्द्वार उष्णिहा प्राणम् । देवी देवमुषे अनुष्टुभा वाचम् । देवी जोष्ट्री बृहत्या श्रोत्रम् । देवी ऊर्जाहुती पङ्क्त्या शुक्रम् । देवा दैव्या होतारा त्रिष्टुभा त्विषिम् । देवीस्तिस्रस्तिस्रो देवीः पतिं जगत्या बलम् । देवो नराशꣳसो विराजा रेतः । देवो वनस्पतिर्द्विपदा भगम् । देवं बर्हिर्वारितीनां ककुभा यशः । देवो अग्निः स्विष्टकृदतिच्छन्दसा क्षत्रम् । वेतु वियन्तु चतुर्वीतामेको वियन्तु चतुर्वेत्ववर्धयदवर्धय२ꣳश्चतुरवर्धतामेकोऽवर्धय२ꣳ श्चतुरवर्धयत् ॥
स्वाद्वीं त्वा सोमः सुरावन्तꣳ सीसेन मित्रोऽसि यद्देवा होता यक्षथ्समिधेन्द्रꣳ समिद्ध इन्द्र आचर्षणिप्रा देवं बर्हिर्होता यक्षथ्समिधाऽग्निꣳ समिद्धो अग्निरश्विनाऽश्विना हविरिन्द्रियं देवं बर्हिः सरस्वत्यग्निमद्योशन्तो होता यक्षदिडस्पदे समिद्धो अग्निः समिधा वसन्तेन देवं बर्हिरिन्द्रं वयोधसं विꣳशतिः ॥ २०॥
स्वाद्वीं त्वाऽमी मदन्त पितरः साम्राज्याय पूतं पवित्रेणेवाज्यमुषासानक्ता बदरैरधातामश्विना देव इन्द्रो वनस्पतिः पष्ठवाहं गां देवी देवं वयोधसं चतुर्नवतिः ॥ ९४॥
स्वाद्वीन्त्वा वेतु यज ॥

# द्वितीयाष्टके सप्तमः प्रपाठकः ७

१ त्रिवृथ्स्तोमो भवति । ब्रह्मवर्चसं वै त्रिवृत् । ब्रह्मवर्चसमेवावरुन्धे । अग्निष्टोमः सोमो भवति । ब्रह्मवर्चसं वा अग्निष्टोमः । ब्रह्मवर्चसमेवावरुन्धे । रथंतरँ साम भवति । ब्रह्मवर्चसं वै रथंतरम् । ब्रह्मवर्चसमेवावरुन्धे । परिस्रजी होता भवति ॥ २। ७। १। १॥
२ अरुणो मिर्मिरस्त्रिशुक्रः । एतद्वै ब्रह्मवर्चसस्य रूपम् । रूपेणैव ब्रह्मवर्चसमवरुन्धे । बृहस्पतिरकामयत देवानां पुरोधां गच्छेयमिति । स एतं बृहस्पतिसवमपश्यत् । तमाहरत् । तेनायजत । ततो वै स देवानां पुरोधामगच्छत् । यः पुरोधाकामः स्यात् । स बृहस्पतिसवेन यजेत ॥ २। ७। १। २॥
३ पुरोधामेव गच्छति । तस्य प्रातःसवने सन्नेषु नाराशँसेषु । एकादश दक्षिणा नीयन्ते । एकादश माध्यंदिने सवने सन्नेषु नाराशँसेषु । एकादश तृतीयसवने सन्नेषु नाराशँसेषु । त्रयस्त्रिँशथ्संपद्यन्ते । त्रयस्त्रिँशद्वै देवताः । देवता एवावरुन्धे । अश्वश्चतुस्त्रिँशः । प्राजापत्यो वा अश्वः ॥ २। ७। १। ३॥
४ प्रजापतिश्चतुस्त्रिँशो देवतानाम् । यावतीरेव देवताः । ता एवावरुन्धे । कृष्णाजिनेऽभिषिञ्चति । ब्रह्मणो वा एतद्रूपम् । यत्कृष्णाजिनम् । ब्रह्मवर्चसेनैवैनँ समर्धयति । आज्येनाभिषिञ्चति । तेजो वा आज्यम् । तेज एवास्मिन्दधाति ॥ २। ७। १। ४॥
होता भवति यजत वा अश्वो दधाति ॥ १॥
५ यदाग्नेयो भवति । अग्निमुखा ह्यृद्धिः । अथ यत्पौष्णः । पुष्टिर्वै पूषा । पुष्टिर्वैश्यस्य । पुष्टिमेवावरुन्धे । प्रसवाय सावित्रः । अथ यत्त्वाष्ट्रः । त्वष्टा हि रूपाणि विकरोति । निर्वरुणत्वाय वारुणः ॥
२। ७। २। १॥
६ अथो य एव कश्च सन्थ्सूयते । स हि वारुणः । अथ यद्वैश्वदेवः । वैश्वदेवो हि वैश्यः । अथ यन्मारुतः । मारुतो हि वैश्यः । सप्तैतानि हवीँषि भवन्ति । सप्त गणा वै मरुतः । पृश्निः पष्ठौही मारुत्यालभ्यते । विड्वै मरुतः । विश एवैतन्मध्यतोऽभिषिच्यते । तस्माद्वा एष विशः प्रियः । विशो हि मध्यतोऽभिषिच्यते । ऋषभचर्मेऽध्यभिषिञ्चति । स हि प्रजनयिता । दध्नाऽभिषिञ्चति । ऊर्ग्वा अन्नाद्यं दधि । ऊर्जैवैनमन्नाद्येन समर्धयति ॥ २। ७। २। २॥ वारुणो विड्वै मरुतोऽष्टौ च ॥ २॥

७ यदाग्नेयो भवति । आग्नेयो वै ब्राह्मणः । अथ यथ्सौम्यः । सौम्यो हि ब्राह्मणः । प्रसवायैव सावित्रः । अथ यद्बार्हस्पत्यः । एतद्वै ब्राह्मणस्य वाक्पतीयम् । अथ यदग्नीषोमीयः । आग्नेयो वै ब्राह्मणः । तौ यदा संगच्छेते ॥ २। ७। ३। १॥
८ अथ वीर्यावत्तरो भवति । अथ यथ्सारस्वतः । एतद्धि प्रत्यक्षं ब्राह्मणस्य वाक्पतीयम् । निर्वरुणत्वायैव वारुणः । अथो य एव कश्च सन्थ्सूयते । स हि वारुणः । अथ यद्यावापृथिव्यः । इन्द्रो वृत्राय वज्रमुदयच्छत् । तं द्यावापृथिवी नान्वमन्येताम् । तमेतेनैव भागधेयेनान्वमन्येताम् ॥ २। ७। ३। २॥
९ वज्रस्य वा एषोऽनुमानाय । अनुमतवज्रः सूयाता इति । अष्टावेतानि हवी ँ षि भवन्ति । अष्टाक्षरा गायत्री । गायत्री ब्रह्मवर्चसम् । गायत्रियैव ब्रह्मवर्चसमवरुन्धे । हिरण्येन घृतमुत्पुनाति । तेजस एव रुचे । कृष्णाजिनेऽभिषिञ्चति । ब्रह्मणो वा एतदृख्सामयो रूपम् । यत्कृष्णाजिनम् । ब्रह्मन्नेवैनमृख्सामयोरध्यभिषिञ्चति । घृतेनाभिषिञ्चति । तथा वीर्यावत्तरो भवति ॥ २। ७। ३। ३॥ संगच्छेते भागधेयेनान्वमन्येता ँ रूपं चत्वारि च ॥ ३॥
१० न वै सोमेन सोमस्य सवोऽस्ति । हतो ह्येषः । अभिषुतो ह्येषः । न हि हतः सूयते । सौमी ँ सूतवशामालभते । सोमो वै रेतोधाः । रेत एव तद्दधाति । सौम्यर्चाऽभिषिञ्चति । रेतोधा ह्येषा । रेतः सोमः । रेत एवास्मिन्दधाति । यत्किंच राजसूयमृते सोमम् । तथ्सर्वं भवति । अषाढं युथ्सु पृतनासु पप्रिम् । सुवर्षामप्स्वां वृजनस्य गोपाम् । भरेषुजा ँ सुक्षिति ँ सुश्रवसम् । जयन्तं त्वामनु मदेम सोम ॥ २। ७। ४। १॥ रेतः सोमः सप्त च ॥ ४॥
११ यो वै सोमेन सूयते । स देवसवः । यः पशुना सूयते । स देवसवः । य इष्ट्या सूयते । स मनुष्यसवः । एतं वै पृथये देवाः प्रायच्छन् । ततो वै सोऽप्यारण्यानां पशूनामसूयत । यावतीः कियतीश्च प्रजा वाचं वदन्ति । तासा ँ सर्वासा ँ सूयते ॥
१२ य एतेन यजते । य उ चैनमेवं वेद । नाराशग्ग्स्यर्चाऽभिषिञ्चति । मनुष्या वै नराश ँ सः । निह्नुत्य वावै तत् । अथाभिषिञ्चति । यत्किंच राजसूयमनुत्तर वेदीकम् । तथ्सर्वं भवति । ये मे पञ्चाशतं ददुः । अश्वाना ँ सधस्तुतिः । द्युमदग्ने महि श्रवः । बृहत्कृधि मघोनाम् । नृवदमृत नृणाम् ॥ २। ७। ५। २॥ सूयते सधस्तुतिस्त्रीणि च ॥ ५॥
१३ एष गोसवः । षड्वि ँ श उक्थ्यो बृहथ्सामा । पवमाने कण्वरथन्तरं भवति । यो

वै वाजपेयः । स सम्राट्थ्सवः । यो राजसूयः । स वरुणसवः । प्रजापतिः स्वाराज्यं परमेष्ठी । स्वाराज्यं गौरेव । गौरिव भवति ॥ २। ७। ६। १॥
१४ य एतेन यजते । य उ चैनमेवं वेद । उभे बृहद्रथंतरे भवतः । तद्धि स्वाराज्यम् । अयुतं दक्षिणाः । तद्धि स्वाराज्यम् । प्रतिधुषाऽभिषिञ्चति । तद्धि स्वाराज्यम् । अनुद्धते वेद्यै दक्षिणत आहवनीयस्य बृहतस्तोत्रं प्रत्यभिषिञ्चति । इयं वाव रथंतरम् ।
१५ असौ बृहत् । अनयोरेवैनमनन्तर्हितमभिषिञ्चति । पशुस्तोमो वा एषः । तेन गोसवः । षड्वि ꣳशः सर्वः । रेवज्ञातः सहसा वृद्धः । क्षत्राणां क्षत्रभृत्तमो वयोधाः । महान्महित्वे तस्तभानः । क्षत्रे राष्ट्रे च जागृहि । प्रजापतेस्त्वा परमेष्ठिनः स्वाराज्येनाभिषिञ्चामीत्याह । स्वाराज्यमेवैनं गमयति ॥ २। ७। ६। ३॥
इव भवति रथंतरमाहैकं च ॥ ६॥
१६ सि ꣳहे व्याघ्र उत या पृदाकौ । त्विषिरग्नौ ब्राह्मणे सूर्ये या । इन्द्रं या देवी सुभगा जजान । सा न आगन्वर्चसा संविदाना । या राजन्ये दुन्दुभावायतायाम् । अश्वस्य क्रन्द्ये पुरुषस्य मायौ । इन्द्रं या देवी सुभगा जजान । सा न आगन्वर्चसा संविदाना । या हस्तिनि द्वीपिनि या हिरण्ये । त्विषिरश्वेषु पुरुषेषु गोषु ॥ २। ७। ७। १॥
१७ इन्द्रं या देवी सुभगा जजान । सा न आगन्वर्चसा संविदाना । रथे अक्षेषु वृषभस्य वाजे । वाते पर्जन्ये वरुणस्य शुष्मे । इन्द्रं या देवी सुभगा जजान । सा न आगन्वर्चसा संविदाना । राडसि विराडसि । सम्राडसि स्वराडसि । इन्द्राय त्वा तेजस्वते तेजस्वन्त२ꣳ श्रीणामि । इन्द्राय त्वौजस्वत ओजस्वन्त२ꣳ श्रीणामि ॥ २। ७। ७। २॥
१८ इन्द्राय त्वा पयस्वते पयस्वन्त२ꣳ श्रीणामि । इन्द्राय त्वाऽऽयुष्मत आयुष्मन्त२ꣳ श्रीणामि । तेजोऽसि । तत्ते प्रयच्छामि । तेजस्वदस्तु मे मुखम् । तेजस्वच्छिरो अस्तु मे । तेजस्वान्, विश्वतः प्रत्यङ् । तेजसा संपिपृग्धि मा । ओजोऽसि । तत्ते प्रयच्छामि ॥ २। ७। ७। ३॥
१९ ओजस्वदस्तु मे मुखम् । ओजस्वच्छिरो अस्तु मे । ओजस्वान्, विश्वतः प्रत्यङ् । ओजसा संपिपृग्धि मा । पयोऽसि । तत्ते प्रयच्छामि । पयस्वदस्तु मे मुखम् । पयस्वच्छिरो अस्तु मे । पयस्वान्, विश्वतः प्रत्यङ् । पयसा संपिपृग्धि मा ॥ २। ७। ७। ४॥
२० आयुरसि । तत्ते प्रयच्छामि । आयुष्मदस्तु मे मुखम् । आयुष्मच्छिरो अस्तु मे

। आयुष्मान्, विश्वतः प्रत्यङ् । आयुषा संपिपृग्धि मा । इममग्न आयुषे वर्चसे कृधि । प्रियꣳ रेतो वरुण सोम राजन् । मातेवास्मा अदिते शर्म यच्छ । विश्वे देवा जरदष्टिर्यथा सत् ॥ २। ७। ७। ५॥

२१ आयुरसि विश्वायुरसि । सर्वायुरसि सर्वमायुरसि । यतो वातो मनोजवाः । यतः, क्षरन्ति सिन्धवः । तासां त्वा सर्वासाꣳ रुचा । अभिषिञ्चामि वर्चसा । समुद्र इवासि गह्मना । सोम इवास्यदाभ्यः । अग्निरिव विश्वतः प्रत्यङ् । सूर्य इव ज्योतिषा विभूः ॥ २। ७। ७। ६॥

२२ अपां यो द्रवणे रसः । तमहमस्मा आमुष्यायणाय । तेजसे ब्रह्मवर्चसाय गृह्णामि । अपां य ऊर्मौ रसः । तमहमस्मा आमुष्यायणाय । ओजसे वीर्याय गृह्णामि । अपां यो मध्यतो रसः । तमहमस्मा आमुष्यायणाय । पुष्ट्यै प्रजननाय गृह्णामि । अपां यो यज्ञियो रसः । तमहमस्मा आमुष्यायणाय । आयुषे दीर्घायुत्वाय गृह्णामि ॥ २। ७। ७। ७॥

गोष्वोजस्वन्त२ꣳ श्रीणाम्योजोऽसि तत्ते प्रयच्छामि पयसा संपिपृग्धि मा सद्विभूर्यज्ञियो रसो द्वे च ॥ ७॥

२३ अभिप्रेहि वीरयस्व । उग्रश्चेत्ता सपत्नहा । आतिष्ठ मित्रवर्धनः । तुभ्यं देवा अधिब्रवन् । अङ्कौ न्यङ्कावभित आतिष्ठ वृत्रहन्रथम् । आतिष्ठन्तं परि विश्वे अभूषन् । श्रियं वसानश्चरति स्वरोचाः । महत्तदस्यासुरस्य नाम । आ विश्वरूपो अमृतानि तस्थौ । अनु त्वेन्द्रो मदत्वनु बृहस्पतिः ॥ २। ७। ८। १॥

२४ अनु सोमो अन्वग्निरावीत् । अनु त्वा विश्वे देवा अवन्तु । अनु सप्त राजानो य उताभिषिक्ताः । अनु त्वा मित्रावरुणाविहावतम् । अनुद्यावापृथिवी विश्वशंभू । सूर्यो अहोभिरनु त्वाऽवतु । चन्द्रमा नक्षत्रैरनु त्वाऽवतु । द्यौश्च त्वा पृथिवी च प्रचेतसा । शुक्रो बृहद्दक्षिणा त्वा पिपर्तु । अनु स्वधा चिकिताꣳ सोमो अग्निः । आऽयं पृणक्तु रजसी उपस्थम् ॥ २। ७। ८। २॥ बृहस्पतिः सोमो अग्निरेकं च ॥ ८॥

२५ प्रजापतिः प्रजा असृजत । ता अस्माथ्सृष्टाः पराचीरायन् । स एतं प्रजापतिरोदनमपश्यत् । सोऽन्नं भूतोऽतिष्ठत् । ता अन्यत्रान्नाद्यमवित्त्वा । प्रजापतिं प्रजा उपावर्तन्त । अन्नमेवैनं भूतं पश्यन्तीः प्रजा उपावर्तन्ते । य एतेन यजते । य उ चैनमेवं वेद । सर्वाण्यन्नानि भवन्ति ॥ २। ७। ९। १॥

२६ सर्वे पुरुषाः । सर्वाण्येवान्नान्यवरुन्धे । सर्वान्पुरुषान् । राडसि विराडसीत्याह ।

स्वाराज्यमेवैनं गमयति । यद्धिरण्यं ददाति । तेजस्तेनावरुन्धे । यत्तिसृधन्वम् । वीर्यं तेन । यदष्ट्राम् ॥ २। ७। ९। २॥

२७ पुष्टिं तेन । यत्कमण्डलुम् । आयुष्टेन । यद्धिरण्यमाबध्नाति । ज्योतिर्वै हिरण्यम् । ज्योतिरेवास्मिन्दधाति । अथो तेजो वै हिरण्यम् । तेज एवात्मन्धत्ते । यदोदनं प्राश्नाति । एतदेव सर्वमवरुध्य ॥ २। ७। ९। ३॥

२८ तदस्मिन्नेकधाऽधात् । रोहिण्यां कार्यः । यद्ब्राह्मण एव रोहिणी । तस्मादेव । अथो वर्ष्मैवैनग्ँ समानानां करोति । उद्यता सूर्येण कार्यः । उद्यन्तं वा एतग्ँ सर्वाः प्रजाः प्रतिनन्दन्ति । दिदृक्षेण्यो दर्शनीयो भवति । य एवं वेद । ब्रह्मवादिनो वदन्ति ॥ २। ७। ९। ४॥

२९ अवेत्योऽवभृथा ३ ना ३ इति । यद्दर्भपुंजीलैः पवयति । तथ्स्विदेवावैति । तन्नावैति । त्रिभिः पवयति । त्रय इमे लोकाः । एभिरेवैनं लोकैः पवयति । अथो अपां वा एतत्तेजो वर्चः । यद्दर्भाः । यद्दर्भपुंजीलैः पवयति । अपामेवैनं तेजसा वर्चसाऽभिषिञ्चति ॥ २। ७। ९। ५॥ भवन्त्यष्ट्रामवरुध्य वदन्ति दर्भा यद्दर्भपुंजीलैः पवयत्येकं च ॥ ९॥

३० प्रजापतिरकामयत बहोर्भूयान्थ्स्यामिति । स एतं पञ्चशारदीयमपश्यत् । तमाहरत् । तेनायजत । ततो वै स बहोर्भूयानभवत् । यः कामयेत बहोर्भूयान्थ्स्यामिति । स पञ्च शारदीयेन यजेत । बहोरेव भूयान्भवति । मरुथ्स्तोमो वा एषः । मरुतो हि देवानां भूयिष्ठाः ॥ २। ७। १०। १॥

३१ बहुर्भवति । य एतेन यजते । य उ चैनमेवं वेद । पञ्चशारदीयो भवति । पञ्च वा ऋतवः संवथ्सरः । ऋतुष्वेव संवथ्सरे प्रतितिष्ठति । अथो पञ्चाक्षरा पङ्क्तिः । पाङ्क्तो यज्ञः । यज्ञमेवावरुन्धे । सप्तदशग्ँ स्तोमा नातियन्ति । सप्तदशः प्रजापतिः । प्रजापतेराप्त्यै ॥ २। ७। १०। २॥ भूयिष्ठा यन्ति द्वे च ॥ १०॥

३२ अगस्त्यो मरुद्भ्य उक्ष्णः प्रौक्षत् । तानिन्द्र आदत्त । त एनं वज्रमुद्यत्याभ्यायन्त । तानगस्त्यश्चैवेन्द्रश्च कयाशुभीयेनाशमयताम् । ताञ्छान्तानुपाह्वयत । यत्कयाशुभीयं भवति शान्त्यै । तस्मादेत ऐन्द्रा मारुता उक्षाणः सवनीया भवन्ति । त्रयः प्रथमेऽहन्नालभ्यन्ते । एवं द्वितीये । एवं तृतीये ॥ २। ७। ११। १॥

३३ एवं चतुर्थे । पञ्चोत्तमेऽहन्नालभ्यन्ते । वर्षिष्ठमिव ह्येतदहः । वर्षिष्ठः समानानां भवति । य एतेन यजते । य उ चैनमेवं वेद । स्वाराज्यं वा एष यज्ञः । एतेन वा एकयावा कान्दमः स्वाराज्यमगच्छत् । स्वाराज्यं गच्छति । य एतेन यजते ॥ २। ७। ११। २॥

३४ य उ चैनमेवं वेद । मारुतो वा एष स्तोमः । एतेन वै मरुतो देवानां भूयिष्ठा अभवन् । भूयिष्ठः समानानां भवति । य एतेन यजते । य उ चैनमेवं वेद । पञ्चशारदीयो वा एष यज्ञः । आ पञ्चमात्पुरुषादन्नमत्ति । य एतेन यजते । य उ चैनमेवं वेद । सप्तदश२ँ स्तोमा नातियन्ति । सप्तदशः प्रजापतिः । प्रजापतेरेव नैति ॥ २। ७। ११। ३॥ तृतीये गच्छति य एतेन यजतेऽत्ति य एतेन यजते य उ चैनमेवं वेद त्रीणि च ॥ ११॥

अगस्त्यः स्वाराज्यं मारुतः पञ्चशारदीयो वा एष यज्ञः सप्तदशः प्रजापतेरेव नैति ॥

३५ अस्याजरासो दमा मरित्राः । अर्चद्धूमासो अग्नयः पावकाः । श्विचीचयः श्वात्रासो भुरण्यवः । वनर्षदो वायवो न सोमाः । यजा नो मित्रावरुणा । यजा देवा२ँ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् । अश्विना पिबत२ँ सुतम् । दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा ॥ २। ७। १२। १॥

३६ द्वे विरूपे चरतः स्वर्थे । अन्याऽन्या वथ्समुपधापयेते । हरिरन्यस्यां भवति स्वधावान् । शुक्रो अन्यस्यां ददृशे सुवर्चाः । पूर्वापरं चरतो माययैतौ । शिशू क्रीडन्तौ परियातो अध्वरम् । विश्वान्यन्यो भुवनाऽभिचष्टे । ऋतूनन्यो विदधज्जायते पुनः । त्रीणि शता त्रीषहस्राण्यग्निम् । त्रि२ँ शच्च देवा नव चासपर्यन् ॥ २। ७। १२। २॥

३७ औक्षन्घृतैरास्तृणन्बर्हिरस्मै । आदिद्धोतारं न्यषादयन्त । अग्निनाऽग्निः समिध्यते । कविर्गृहपतिर्युवा । हव्यवाड्जुह्वास्यः । अग्निर्देवानां जठरम् । पूतदक्षः कविक्रतुः । देवो देवेभिरागमत् । अग्निश्रियो मरुतो विश्वकृष्टयः । आ त्वेषमुग्रमव ईमहे वयम् ॥ २। ७। १२। ३॥

३८ ते स्वानिनो रुद्रिया वर्षनिर्णिजः । सि२ँहा न हेषक्रतवः सुदानवः । यदुत्तमे मरुतो मध्यमे वा । यद्वाऽवमे सुभगासो दिविष्ठ । ततो नो रुद्रा उत वाऽन्वस्य । अग्ने वित्ताद्धविषो यद्यजामः । ईडे अग्नि२ँ स्ववसं नमोभिः । इह प्रसत्तो विचयत्कृतं नः । रथैरिव प्रभरे वाजयद्भिः । प्रदक्षिणिन्मरुताग् स्तोममृध्याम् ॥ २। ७। १२। ४॥

३९ श्रुधि श्रुत्कर्ण वह्निभिः । देवैरग्ने सयावभिः । आसीदन्तु बर्हिषि । मित्रो वरुणो अर्यमा । प्रातर्यावाणो अध्वरम् । विश्वेषामदितिर्यज्ञियानाम् । विश्वेषामतिथिर्मानुषाणाम् । अग्निर्देवानामव आवृणानः । सुमृडीको भवतु विश्ववेदाः । त्वे अग्ने सुमतिं भिक्षमाणाः ॥ २। ७। १२। ५॥

४० दिवि श्रवो दधिरे यज्ञियासः । नक्ता च चक्रुरुषसा विरूपे । कृष्णं च वर्णमरुणं च संधुः । त्वामग्न आदित्यास आस्यम् । त्वां जिह्वाꣳ शुचयश्चक्रिरे कवे । त्वाꣳ रातिषाचो अध्वरेषु सश्चिरे । त्वे देवा हविरदन्त्याहुतम् । नि त्वा यज्ञस्य साधनम् । अग्ने होतारमृत्विजम् । वनुष्वद्देव धीमहि प्रचेतसम् । जीरं दूतममर्त्यम् ॥ २। ७। १२। ६॥ यज्ञवाहसा सपर्यन्वयमृध्यां भिक्षमाणाः प्रचेतसमेकं च ॥ १२॥

४१ तिष्ठा हरी रथ आ युज्यमाना याहि । वायुर्न नियुतो नो अच्छ । पिबास्यन्धो अभिसृष्टो अस्मे । इन्द्र स्वाहा ररिमा ते मदाय । कस्य वृषा सुते सचा । नियुत्वान्वृषभो रणत् । वृत्रहा सोमपीतये । इन्द्रं वयं महाधने । इन्द्रमर्भे हवामहे । युजं वृत्रेषु वज्रिणम् ॥ २। ७। १३। १॥

४२ द्वितायो वृत्रहन्तमः । विद इन्द्रः शतक्रतुः । उप नो हरिभिः सुतम् । स सूर आ जनयञ्ज्योतिरिन्द्रम् । अया धिया तरणिरद्रिबर्हाः । ऋतेन शुष्मीनवमानो अर्कैः । व्युस्रिधो अस्रो अद्रिर्बिभेद । उत त्यदाश्वश्वियम् । यदिन्द्र नाहुषीष्वा । अग्रे विक्षु प्रतीदयत् ॥ २। ७। १३। २॥

४३ भरेष्विन्द्रꣳ सुहवꣳ हवामहे । अꣳहोमुचꣳ सुकृतं दैव्यं जनम् । अग्निं मित्रं वरुणꣳ सातये भगम् । द्यावापृथिवी मरुतः स्वस्तये । महि क्षेत्रं पुरुश्चन्द्रं विविद्वान् । आदिथ्सखिभ्यश्च रथꣳ समैरत् । इन्द्रो नृभिरजनद्दीद्यानः साकम् । सूर्यमुषसं गातुमग्निम् । उरुं नो लोकमनुनेषि विद्वान् । सुवर्वज्ज्योतिरभय२ꣳ स्वस्ति ॥ २। ७। १३। ३॥

४४ ऋष्वा त इन्द्र स्थविरस्य बाहू । उपस्थेयाम शरणा बृहन्ता । आ नो विश्वाभिरूतिभिः सजोषाः । ब्रह्म जुषाणो हर्यश्व याहि । वरीवृजथ्स्थविरेभिः सुशिप्र । अस्मे दधद्वृषणꣳ शुष्ममिन्द्र । इन्द्राय गाव आशिरम् । दुदुह्रे वज्रिणे मधु । यथ्सीमुपह्वरेऽविदत् । तास्ते वज्रिन्धेनवो जोजयुर्नः ॥ २। ७। १३। ४॥

४५ गभस्तयो नियुतो विश्ववाराः । अहरहर्भूय इज्जोगुवानाः । पूर्णा इन्द्र क्षुमतो भोजनस्य । इमां ते धियं प्रभरे महो महीम् । अस्य स्तोत्रे धिषणा यत्त आनजे । तमुथ्सवे च प्रसवे च सासहिम् । इन्द्रं देवासः शवसा मदन्ननु ॥ २। ७। १३। ५॥ वज्रिणमयथ्स्वस्ति जोजयुर्नः सप्त च ॥ १३॥

४६ प्रजापतिः पशूनसृजत । तेऽस्माथ्सृष्टाः पराञ्च आयन् । तानग्निष्टोमेन नाप्नोत् । तानुक्थ्येन नाप्नोत् । तान्थ्षोडशिना नाप्नोत् । तान्रात्रिया नाप्नोत् । तान्थ्संधिना नाप्नोत्

। सोऽग्निमंब्रवीत् । इमान्मे ईप्सेति । तानग्निस्त्रिवृता स्तोमेन नाप्नोत् ॥ २। ७। १४। १॥
४७ स इन्द्रमब्रवीत् । इमान्मे ईप्सेति । तानिन्द्रः पञ्चदशेन स्तोमेन नाप्नोत् । स विश्वान्देवानब्रवीत् । इमान्मे ईप्सतेति । तान्, विश्वे देवाः सप्तदशेन स्तोमेन नाप्नुवन् । स विष्णुमब्रवीत् । इमान्मे ईप्सेति । तान्, विष्णुरेकविꣳशेन स्तोमेनाप्नोत् । वारवन्तीयेनावारयत ॥ २। ७। १४। २॥
४८ इदं विष्णुर्विचक्रम इति व्यक्रमत । यस्मात्पशवः प्र प्रेव भ्रꣳशेरन् । स एतेन यजेत । यदाप्नोत् । तदप्तोर्यामस्याप्तोर्यामत्वम् । एतेन वै देवा जैत्वानि जित्वा । यं काममकामयन्त तमाप्नुवन् । यं कामं कामयते । तमेतेनाप्नोति ॥ २। ७। १४। ३॥
स्तोमेन नाप्नोदवारयत नव च ॥ १४॥
४९ व्याघ्रोऽयमग्नौ चरति प्रविष्टः । ऋषीणां पुत्रो अभिशस्तिपा अयम् । नमस्कारेण नमसा ते जुहोमि । मा देवानां मिथुया कर्म भागम् । सावीर्हि देव प्रसवाय पित्रे । वर्ष्माणमस्मै वरिमाणमस्मै । अथास्मभ्यꣳ सवितः सर्वताता । दिवे दिव आसुवा भूरिपश्वः । भूतो भूतेषु चरति प्रविष्टः । स भूतानामधिपतिर्बभूव ॥ २। ७। १५। १॥
५० तस्य मृत्यौ चरति राजसूयम् । स राजा राज्यमनुमन्यतामिदम् । येभिः शिल्पैः पप्रथानामदृꣳहत् । येभिर्द्यामभ्यपिꣳशत्प्रजापतिः । येभिर्वाचं विश्वरूपाꣳ समव्ययत् । तेनेममग्न इह वर्चसा समङ्घि । येभिरादित्यस्तपति प्रकेतुभिः । येभिः सूर्यो ददृशे चित्रभानुः । येभिर्वाचं पुष्कलेभिरव्ययत् । तेनेममग्न इह वर्चसा समङ्घि ॥ २। ७। १५। २॥
५१ आऽयं भातु शवसा पञ्च कृष्टीः । इन्द्र इव ज्येष्ठो भवतु प्रजावान् । अस्मा अस्तु पुष्कलं चित्रभानु । आऽयं पृणक्तु रजसी उपस्थम् । यत्ते शिल्पं कश्यप रोचनावत् । इन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्थ्सूर्या अर्पिताः सप्त साकम् । तस्मिन्राजानमधिविश्रयेमम् । द्यौरसि पृथिव्यसि । व्याघ्रो वैयाघ्रेऽधि ॥ २। ७। १५। ३॥
५२ विश्रयस्व दिशो महीः । विशस्त्वा सर्वा वाञ्छन्तु । मा त्वद्राष्ट्रमधिभ्रशत् । या दिव्या आपः पयसा संबभूवुः । या अन्तरिक्ष उत पार्थिवीर्याः । तासां त्वा सर्वासाꣳ रुचा । अभिषिञ्चामि वर्चसा । अभि त्वा वर्चसा सिचं दिव्येन । पयसा सह । यथाऽऽसा राष्ट्रवर्धनः ॥ २। ७। १५। ४॥

५३ तथा त्वा सविता करत् । इन्द्रं विश्वा अवीवृधन् । समुद्रव्यचसं गिरः । रथीतमꣳ रथीनाम् । वाजानाꣳ सत्पतिं पतिम् । वसवस्त्वा पुरस्तादभिषिञ्चन्तु गायत्रेण छन्दसा । रुद्रास्त्वा दक्षिणतोऽभिषिञ्चन्तु त्रैष्टुभेन छन्दसा । आदित्यास्त्वा पश्चादभिषिञ्चन्तु जागतेन छन्दसा । विश्वे त्वा देवा उत्तरतोऽभिषिञ्चन्त्वानुष्टुभेन छन्दसा । बृहस्पतिस्त्वोपरिष्टादभिषिञ्चतु पाङ्क्तेन छन्दसा ॥ २। ७। १५। ५॥

५४ अरुणं त्वा वृकमुग्रं खजंकरम् । रोचमानं मरुतामग्रे अर्चिषः । सूर्यवन्तं मघवानं विषासहिम् । इन्द्रमुक्थ्येषु नामहूतमꣳ हुवेम । प्र बाहवा सिसृतं जीवसे नः । आ नो गव्यूतिमुक्षतं घृतेन । आ नो जने श्रवयतं युवाना । श्रुतं मे मित्रावरुणा हवेमा । इन्द्रस्य ते वीर्यकृतः । बाहू उपावहरामि ॥ २। ७। १५। ६॥ बभूवाव्ययत्तेनेममग्न इह वर्चसा समंग्धि वैयाघ्रेऽधि राष्ट्रवर्धनः पाङ्क्तेन छन्दसोपावहरामि ॥ १५॥

५५ अभि प्रेहि वीरयस्व । उग्रश्चेत्ता सपत्नहा । आतिष्ठ वृत्रहन्तमः । तुभ्यं देवा अधिब्रवन् । अङ्कौ न्यङ्कावभितो रथं यौ । ध्वान्तं वाताग्रमनुसंचरन्तौ । दूरे हेतिरिन्द्रियावान्पतत्री । ते नोऽग्नयः पप्रयः पारयन्तु । नमस्त ऋषे गद । अव्यथायै त्वा स्वधायै त्वा ॥ २। ७। १६। १॥

५६ मा न इन्द्राभितस्त्वदृष्वारिष्टासः । एवा ब्रह्मन्तवेदस्तु । तिष्ठा रथे अधि यद्वज्रहस्तः । आ रश्मीन्देव युवसे स्वश्वः । आतिष्ठ वृत्रहन्नातिष्ठन्तं परि । अनु त्वेन्द्रो मदत्वनु त्वा मित्रावरुणौ । द्यौश्च त्वा पृथिवी च प्रचेतसा । शुक्रो बृहद्दक्षिणा त्वा पिपर्तु । अनु स्वधा चिकिताꣳ सोमो अग्निः । अनु त्वाऽवतु सविता सवेन ॥ २। ७। १६। २॥

५७ इन्द्रं विश्वा अवीवृधन् । समुद्रव्यचसं गिरः । रथीतमꣳ रथीनाम् । वाजानाꣳ सत्पतिं पतिम् । परि मा सेन्या घोषाः । ज्यानां वृञ्जन्तु गृध्नवः । मेथिष्ठाः पिन्वमाना इह । मां गोपतिमभिसंविशन्तु । तन्मेऽनुमतिरनुमन्यताम् । तन्माता पृथिवी तत्पिता द्यौः ॥ २। ७। १६। ३॥

५८ तद्ग्रावाणः सोमसुतो मयोभुवः । तदश्विना शृणुतꣳ सौभगा युवम् । अवते हेड उदुत्तमम् । एना व्याघ्रं परिषस्वजानाः । सिꣳहꣳ हिन्वन्ति महते सौभगाय । समुद्रं न सुहवं तस्थिवाꣳसम् । मर्मृज्यन्ते द्वीपिनमप्स्वन्तः । उदसावेतु सूर्यः । उदिदं मामकं वचः । उदिहि देव सूर्य । सह वग्नुना मम । अहं वाचो विवाचनम् । मयि वागस्तु धर्णसिः । यन्तु नदयो वर्षन्तु पर्जन्याः । सुपिप्पला ओषधयो भवन्तु । अन्नवतामोदनवतामामिक्षवताम् । एषाꣳ राजा भूयासम् ॥ २। ७। १६। ४॥ स्वधायै

त्वा सवेन द्यौः सूर्य सप्त च ॥ १६॥
५९ ये केशिनः प्रथमाः सत्रमासत । येभिराभृतं यदिदं विरोचते । तेभ्यो जुहोमि बहुधा घृतेन । रायस्पोषेणेमं वर्चसा सꣳसृजाथ । नर्ते ब्रह्मणस्तपसो विमोकः । द्विनाम्नी दीक्षा वशिनी ह्युग्रा । प्र केशाः सुवते काण्डिनो भवन्ति । तेषां ब्रह्मेदीशे वपनस्य नान्यः । आरोह प्रोष्ठं विषहस्व शत्रून् । अवास्राग्दीक्षा वशिनी ह्युग्रा ॥ २। ७। १७। १॥
६० देहि दक्षिणां प्रतिरस्वायुः । अथा मुच्यस्व वरुणस्य पाशात् । येनावपथ्सविता क्षुरेण । सोमस्य राज्ञो वरुणस्य विद्वान् । तेन ब्रह्माणो वपतेदमस्योर्जेमम् । रय्या वर्चसा सꣳसृजाथ । मा ते केशाननु गाद्वर्च एतत् । तथा धाता करोतु ते । तुभ्यमिन्द्रो बृहस्पतिः । सविता वर्च आदधात् ॥ २। ७। १७। २॥
६१ तेभ्यो निधानं बहुधा व्यैच्छन् । अन्तरा द्यावापृथिवी अपः सुवः । दर्भस्तम्बे वीर्यकृते निधाय । पौꣳस्येनेमं वर्चसा सꣳसृजाथ । बलं ते बाहुवोः सविता दधातु । सोमस्त्वाऽनक्तु पयसा घृतेन । स्त्रीषु रूपमश्विनैतन्निधत्तम् । पौꣳस्येनेमं वर्चसा सꣳसृजाथ । यथ्सीमन्तं कङ्कतस्ते लिलेख । यद्वा क्षुरः परिववर्ज वपꣳस्ते । स्त्रीषु रूपमश्विनैतन्निधत्तम् । पौꣳस्येनेमꣳ सꣳसृजाथो वीर्येण ॥ २। ७। १७। ३॥
अवास्राग्दीक्षा वशिनी ह्युग्राऽऽदधाद्ववर्ज वपꣳस्ते द्वे च ॥ १७॥ ये केशिनो नर्ते मा ते बलं यथ्सीमन्तं पञ्च ॥ /हेळिकोटिल्ल /
६२ इन्द्रं वै स्वा विशो मरुतो नापाचायन् । सोऽनपचाय्यमान एतं विघनमपश्यत् । तमाहरत् । तेनायजत । तेनैवासां तꣳ सꣳस्तम्भं व्यहन् । यद्व्यहन् । तद्विघनस्य विघनत्वम् । वि पाप्मानं भ्रातृव्यꣳ हते । य एतेन यजते । य उ चैनमेवं वेद ॥ २। ७। १८। १॥
६३ यꣳ राजानं विशो नापचायेयुः । यो वा ब्राह्मणस्तमसा पाप्मना प्रावृतः स्यात् । स एतेन यजेत । विघनेनैवैनद्विहत्य । विशामाधिपत्यं गच्छति । तस्य द्वे द्वादशे स्तोत्रे भवतः । द्वे चतुर्विꣳशे । औद्भिद्यमेव तत् । एतद्वै क्षत्रस्यौद्भिद्यम् । यदस्मै स्वा विशो बलिꣳ हरन्ति ॥ २। ७। १८। २॥
६४ हरन्त्यस्मै विशो बलिम् । ऐनमप्रतिख्यातं गच्छति । य एवं वेद । प्रबाहुग्वा अग्रे क्षत्राण्यातेपुः । तेषामिन्द्रः, क्षत्राण्यादत्त । न वा इमानि क्षत्राण्यभूवन्निति । तन्नक्षत्राणां नक्षत्रत्वम् । आ श्रेयसो भ्रातृव्यस्य तेज इन्द्रियं धत्ते । य एतेन यजते । य उ चैनमेवं

वेद ॥ २। ७। १८। ३॥
६५ तद्यथा ह वै संचक्रिणौ कप्लकावुपावहितौ स्याताम् । एवमेतौ युग्मन्तौ स्तोमौ । अयुक्षु स्तोमेषु क्रियेते । पाप्मनोऽपहत्यै । अप पाप्मानं भ्रातृव्यꣳ हते । य एतेन यजते । य उ चैनमेवं वेद । तद्यथा ह वै सूतग्रामण्यः । एवं छन्दाꣳसि । तेष्वसावादित्यो बृहतीरभ्यूढः ॥ २। ७। १८। ४॥
६६ सतोबृहतीषु स्तुवते सतो बृहन् । प्रजया पशुभिरसानीत्येव । व्यतिषक्ताभिः स्तुवते । व्यतिषक्तं वै क्षत्रं विशा । विशैवैनं क्षत्रेण व्यतिषजति । व्यतिषक्ताभिः स्तुवते । व्यतिषक्तो वै ग्रामणीः सजातैः । सजातैरेवैनं व्यतिषजति । व्यतिषक्ताभिः स्तुवते । व्यतिषक्तो वै पुरुषः पाप्मभिः । व्यतिषक्ताभिरेवास्य पाप्मनो नुदते ॥
२। ७। १८। ५॥ वेद हरन्त्येनमेवं वेदाभ्यूढः पाप्मभिरेकं च ॥ १८॥
त्रिवृद्यदाग्नेयोऽग्निमुखा ह्यृद्धिर्यदाग्नेय आग्नेयो न वै सोमेन यो वै सोमेनैष गोसवः सिꣳहेऽभि प्रेहि मित्रवर्धनः प्रजापतिस्ता ओदनं प्रजापतिरकामयत बहोर्भूयानगस्त्योऽस्या जरासास्तिष्ठा हरी प्रजापतिः पशून्व्याघ्रोऽयमभिप्रेहि वृत्रहन्तमो ये केशिन इन्द्रं वा अष्टादश ॥ १८॥
त्रिवृद्यो वै सोमेनायुरसि बहुर्भवति तिष्ठा हरीरथ आऽयं भातु तेभ्यो निधानꣳ षट्थ्षष्टिः ॥ ६६॥
त्रिवृत्पाप्मनोनुदते ॥

## द्वितीयाष्टके अष्टमः प्रपाठकः ८

१ पीवोन्नाꣳ रयिवृधः सुमेधाः । श्वेतः सिषक्ति नियुतामभिश्रीः । ते वायवे समनसो वितस्थुः । विश्वेन्नरः स्वपत्यानि चक्रुः । रायेऽनु यं जज्ञतू रोदसी उभे । राये देवी धिषणा धाति देवम् । अधा वायुं नियुतः सश्चत स्वाः । उत श्वेतं वसुधितिं निरेके । आ वायो प्रयाभिः । प्र वायुमच्छा बृहती मनीषा ॥ २। ८। १। १॥
२ बृहद्रयिं विश्ववाराꣳ रथप्राम् । द्युतद्यामा नियुतः पत्यमानः । कविः कविमियक्षसि प्रयज्यो । आ नो नियुद्भिः शतिनीभिरध्वरम् । सहस्रिणीभिरुप याहि यज्ञम् । वायो अस्मिन् हविषि मादयस्व । यूयं पात स्वस्तिभिः सदा नः । प्रजापते न त्वदेतान्यन्यः । विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु ॥ २। ८। १। २॥
३ वयꣳꣳ स्याम पतयो रयीणाम् । रयीणां पतिं यजतं बृहन्तम् । अस्मिन्भरे नृतमं वाजसातौ । प्रजापतिं प्रथमजामृतस्य । यजाम देवमधि नो ब्रवीतु । प्रजापते त्वं

निधिपाः पुराणः । देवानां पिता जनिता प्रजानाम् । पतिर्विश्वस्य जगतः परस्पाः ।
हविर्नो देव विहवे जुषस्व । तवेमे लोकाः प्रदिशो दिशश्च ॥ २। ८। १। ३॥
४ परावतो निवत उद्वतश्च । प्रजापते विश्वसृज्जीवधन्य इदं नो देव । प्रतिहर्य हव्यम्
। प्रजापतिं प्रथमं यज्ञियानाम् । देवानामग्रे यजतं यजध्वम् । स नो ददातु द्रविणꣳ
सुवीर्यम् । रायस्पोषं विष्यतु नाभिमस्मे । यो राय ईशे शतदाय उक्थ्यः । यः पशूनाꣳ
रक्षिता विष्ठितानाम् । प्रजापतिः प्रथमजा ऋतस्य ॥ २। ८। १। ४॥
५ सहस्रधामा जुषताꣳ हविर्नः । सोमापूषणेमौ देवौ । सोमापूषणा रजसो विमानम्
। सप्तचक्रꣳ रथमविश्वमिन्वम् । विषूवृतं मनसा युज्यमानम् । तं जिन्वथो वृषणा
पञ्चरश्मिम् । दिव्यन्यः सदनं चक्र उच्चा । पृथिव्यामन्यो अध्यन्तरिक्षे । तावस्मभ्यं
पुरुवारं पुरुक्षुम् । रायस्पोषं विष्यतां नाभिमस्मे ॥ २। ८। १। ५॥
६ धियं पूषा जिन्वतु विश्वमिन्वः । रयिꣳ सोमो रयिपतिर्दधातु । अवतु देव्यदितिरनर्वा
। बृहद्वदेम विदथे सुवीराः । विश्वान्यन्यो भुवना जजान । विश्वमन्यो अभिचक्षाण एति
। सोमापूषणाववतं धियं मे । युवभ्यां विश्वाः पृतना जयेम । उदुत्तमं वरुणास्तभ्नाद्द्याम्
। यत्किंचेदं कितवासः । अव ते हेडस्तत्त्वा यामि । आदित्यानामवसा न दक्षिणा ।
धारयन्त आदित्यासस्तिस्रो भूमीर्धारयन् । यज्ञो देवानाꣳ शुचिरपः ॥ २। ८। १। ६॥
मनीषाऽस्तु चर्तस्यास्मे कितवासश्चत्वारि च ॥ १॥
७ ते शुक्रासः शुचयो रश्मिवन्तः । सीदन्नादित्या अधि बर्हिषि प्रिये । कामेन देवाः
सरथं दिवो नः । आयान्तु यज्ञमुप नो जुषाणाः । ते सूनवो अदितेः पीवसामिषम् । घृतं
पिन्वत्प्रतिहर्यन्नृतेजाः । प्र यज्ञिया यजमानाय येमुरे । आदित्याः कामं पितुमन्तमस्मे
। आ नः पुत्रा अदितेर्यान्तु यज्ञम् । आदित्यासः पथिभिर्देवयानैः ॥ २। ८। २। १॥
८ अस्मे कामं दाशुषे सन्नमन्तः । पुरोडाशं घृतवन्तं जुषन्ताम् । स्कभायत निर्ऋतिꣳ
सेधतामतिम् । प्र रश्मिभिर्यतमाना अमृध्राः । आदित्याः काम प्रयतां वषट्कृतिम् । जुषध्वं
नो हव्यदातिं यजत्राः । आदित्यान्काममवसे हुवेम । ये भूतानि जनयन्तो विचिख्युः ।
सीदन्तु पुत्रा अदितेरुपस्थम् । स्तीर्णं बर्हिर्हविरद्याय देवाः ॥ २। ८। २। २॥
९ स्तीर्णं बर्हिः सीदता यज्ञे अस्मिन् । ध्राजाः सेधन्तो अमतिं दुरेवाम् । अस्मभ्यं पुत्रा
अदितेः प्रयꣳसत । आदित्याः कामं हविषो जुषाणाः । अग्ने नय सुपथा राये अस्मान्
। विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनः । भूयिष्ठां ते नमउक्तिं विधेम

। प्र वः शुक्राय भानवे भरध्वम् । हव्यं मतिं चाग्नये सुपूतम् ॥ २। ८। २। ३॥
१० यो दैव्यानि मानुषा जनूꣳषि । अन्तर्विश्वानि विद्मना जिगाति । अच्छा गिरो
मतयो देवयन्तीः । अग्निं यन्ति द्रविणं भिक्षमाणाः । सुसंदृशꣳ सुप्रतीकग्ग् स्वञ्चम् ।
हव्यवाहमरतिं मानुषाणाम् । अग्ने त्वमस्मद्युयोध्यमीवाः । अनग्नित्रा अभ्यमन्त कृष्टीः ।
पुनरस्मभ्यꣳ सुविताय देव । क्षां विश्वेभिरजरेभिर्यजत्र ॥ २। ८। २। ४॥
११ अग्ने त्वं पारया नव्यो अस्मान् । स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला
न उर्वी । भवा तोकाय तनयाय शं योः । प्र कारवो मनना वच्यमानाः । देवद्रीचीं
नयथ देवयन्तः । दक्षिणावाड्वाजिनी प्राच्येति । हविर्भरन्त्यग्नये घृताची । इन्द्रं नरो
युजे रथम् । जगृभ्णा ते दक्षिणमिन्द्र हस्तम् ॥ २। ८। २। ५॥
१२ वसूयवो वसुपते वसूनाम् । विद्मा हि त्वा गोपतिꣳ शूर गोनाम् । अस्मभ्यं
चित्रं वृषणꣳ रयिं दाः । तवेदं विश्वमभितः पशव्यम् । यत्पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इन्द्र । भक्षीमहि ते प्रयतस्य वस्वः । समिन्द्र णो मनसा नेषि
गोभिः । सꣳ सूरिभिर्मघवन्थ्सꣳ स्वस्त्या । सं ब्रह्मणा देवकृतं यदस्ति ॥ २। ८।
२। ६॥
१३ सं देवानाꣳसुमत्या यज्ञियानाम् । आराच्छत्रुमपबाधस्व दूरम् । उग्रो यः शम्बः पुरुहूत
तेन । अस्मे धेहि यवमद्गोमदिन्द्र । कृधी धियं जरित्रे वाजरत्नाम् । आवेधसꣳ स हि
शुचिः । बृहस्पतिः प्रथमं जायमानः । महो ज्योतिषः परमे व्योमन् । सप्तास्यस्तुविजातो
रवेण । वि सप्तरश्मिरधमत्तमाꣳसि ॥ २। ८। २। ७॥
१४ बृहस्पतिः समजयद्वसूनि । महो व्रजान्गोमतो देव एषः । अपः सिषासन्थ्सुवर
प्रतीत्तः । बृहस्पतिर्हन्त्यमित्रमर्कैः । बृहस्पते पर्येवा पित्रे । आ नो दिवः पावीरवी ।
इमा जुह्वाना यस्ते स्तनः । सरस्वत्यभि नो नेषि । इयꣳ शुष्मेभिर्बिसखा इवारुजत्
। सानु गिरीणां तविषेभिरूर्मिभिः । पारावदघ्नीमवसे सुवृक्तिभिः । सरस्वतीमाविवासेम
धीतिभिः ॥ २। ८। २। ८॥ देवयानैर्देवाः सुपूतं यजत्र हस्तमस्ति तमाग् स्यूर्मिभिर्द्वे च
॥ २॥
१५ सोमो धेनुꣳ सोमो अर्वन्तमाशुम् । सोमो वीरं कर्मण्यं ददातु । सादन्यं विदथ्यꣳ
सभेयम् । पितुःश्रवणं यो ददाशदस्मै । अषाढं युत्सु त्वꣳ सोम क्रतुभिः । या ते
धामानि हविषा यजन्ति । त्वमिमा ओषधीः सोम विश्वाः । त्वमपो अजनयस्त्वं गाः
। त्वमाततन्थोर्वन्तरिक्षम् । त्वं ज्योतिषा वितमो ववर्थ ॥ २। ८। ३। १॥

१६ या ते धामानि दिवि या पृथिव्याम् । या पर्वतेष्वोषधीष्वप्सु । तेभिर्नो विश्वैः सुमना अहेडन् । राजन्थ्सोम प्रति हव्या गृभाय । विष्णोर्नु कं तदस्य प्रियम् । प्र तद्विष्णुः । परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्ञुवन्ति । उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वम् । परमस्य विथ्से ॥ २। ८। ३। २॥
१७ विचक्रमे त्रिर्देवः । आ ते महो यो जात एव । अभि गोत्राणि । आभिः स्पृधो मिथतीररिषण्यन् । अमित्रस्य व्यथया मन्युमिन्द्र । आभिर्विश्वा अभियुजो विषूचीः । आर्याय विशोऽवतारीर्दासीः । अयँ श्रृण्वे अध जयन्नुत घ्नन् । अयमुत प्रकृणुते युधा गाः । यदा सत्यं कृणुते मन्युमिन्द्रः ॥ २। ८। ३। ३॥
१८ विश्वं दृढं भयत एजदस्मात् । अनु स्वधामक्षरन्नापो अस्य । अवर्धत मध्य आ नाव्यानाम् । सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन । हन्मनाऽहन्नभिद्यून् । मरुत्वन्तं वृषभं वावृधानम् । अकवारिं दिव्यँ शासमिन्द्रम् । विश्वासाहमवसे नूतनाय । उग्रँ सहोदामिह तँ हुवेम । जनिष्ठा उग्रः सहसे तुराय ॥ २। ८। ३। ४॥
१९ मन्द्र ओजिष्ठो बहुलाभिमानः । अवर्धन्निन्द्रं मरुतश्चिदत्र । माता यद्वीरं दधनद्धनिष्ठा । क्व स्या वो मरुतः स्वधाऽऽसीत् । यन्मामेकँ समधत्ताहिहत्ये । अहँ ह्युग्रस्तविषस्तुविष्मान् । विश्वस्य शत्रोरनमं वधस्नैः । वृत्रस्य त्वा श्वसथादीषमाणाः । विश्वे देवा अजहुर्ये सखायः । मरुद्भिरिन्द्र सख्यं ते अस्तु ॥ २। ८। ३। ५॥
२० अथेमा विश्वाः पृतना जयासि । वधीं वृत्रं मरुत इन्द्रियेण । स्वेन भामेन तविषो बभूवान् । अहमेता मनवे विश्वश्चन्द्राः । सुगा अपश्चकर वज्रबाहुः । स यो वृषा वृष्णियेभिः समोकाः । महो दिवः पृथिव्याश्च सम्राट् । सतीनसत्त्वा हव्यो भरेषु । मरुत्वान्नो भवत्विन्द्र ऊती । इन्द्रो वृत्रमतरद्वृत्रतूर्ये ॥ २। ८। ३। ६॥
२१ अनाधृष्यो मघवा शूर इन्द्रः । अन्वेनं विशो अमदन्त पूर्वीः । अयँ राजा जगतश्चर्षणीनाम् । स एव वीरः स उ वीर्यावान् । स एकराजो जगतः परस्पाः । यदा वृत्रमतरच्छूर इन्द्रः । अथाभवद्दमिताऽभिक्रतूनाम् । इन्द्रो यज्ञं वर्धयन्विश्ववेदाः । पुरोडाशस्य जुषताँ हविर्नः । वृत्रं तीर्त्वा दानवं वज्रबाहुः ॥
२। ८। ३। ७॥
२२ दिशोऽदँहदृँहिता दँहणेन । इमं यज्ञं वर्धयन्विश्ववेदाः । पुरोडाशं प्रतिगृभ्णात्विन्द्रः । यदा वृत्रमतरच्छूर इन्द्रः । अथैकराजो अभवज्जनानाम् । इन्द्रो देवाञ्छम्बरहत्य आवत् । इन्द्रो देवानामभवत्पुरोगाः । इन्द्रो यज्ञे हविषा वावृधानः

। वृत्रतूर्णो अभयꣳ शर्म यꣳसत् । यः सप्त सिन्धूꣳरदधात्पृथिव्याम् । यः सप्त लोकानकृणोद्दिशश्च । इन्द्रो हविष्मान्थ्सगणो मरुद्भिः । वृत्रतूर्णो यज्ञमिहोपयासत् ॥ २। ८। ३। ८॥ ववर्थ विथ्स इन्द्रस्तु रायास्तु वृत्रतूर्ये वज्रबाहुः पृथिव्यां त्रीणि च ॥ ३॥

२३ इन्द्रस्तरस्वानभिमाति होग्रः । हिरण्यवाशीरिषिरः सुवर्षाः । तस्य वयꣳ सुमतौ यज्ञियस्य । अपि भद्रे सौमनसे स्याम । हिरण्यवर्णो अभयं कृणोतु । अभिमातिहेन्द्रः पृतनासु जिष्णुः । स नः शर्म त्रिवरूथं वियꣳसत् । यूयं पात स्वस्तिभिः सदा नः । इन्द्रग्ग् स्तुहि वज्रिणग्ग् स्तोमपृष्ठम् । पुरोडाशस्य जुषताꣳ हविर्नः ॥ २। ८। ४। १॥

२४ हत्वाऽभिमातीः पृतनाः सहस्वान् । अथाभयं कृणुहि विश्वतो नः । स्तुहि शूरं वज्रिणमप्रतीत्तम् । अभिमातिहनं पुरुहूतमिन्द्रम् । य एक इच्छतपतिर्जनेषु । तस्मा इन्द्राय हविराजुहोत । इन्द्रो देवानामधिपाः पुरोहितः । दिशां पतिरभवद्वाजिनीवान् । अभिमातिहा तविषस्तुविष्मान् । अस्मभ्यं चित्रं वृषणꣳ रयिं दात् ॥ २। ८। ४। २॥

२५ य इमे द्यावापृथिवी महित्वा । बलेनादृꣳहदभिमातिहेन्द्रः । स नो हविः प्रतिगृभ्णातु रातये । देवानां देवो निधिपा नो अव्यात् । अनवस्ते रथं वृष्णे यत्ते । इन्द्रस्य नु वीर्याण्यहन्नहिम् । इन्द्रो यातोऽवसितस्य राजा । शमस्य च शृङ्गिणो वज्रबाहुः । सेदु राजा क्षेति चर्षणीनाम् । अरान्न नेमिः परिता बभूव ॥ २। ८। ४। ३॥

२६ अभि सिध्मो अजिगादस्य शत्रून् । वि तिग्मेन वृषभेणा पुरोऽभेत् । सं वज्रेणासृजद्वृत्रमिन्द्रः । प्र स्वां मतिमतिरच्छाशदानः । विष्णुं देवं वरुणमूतये भगम् । मेदसा देवा वपया यजध्वम् । ता नो यज्ञमागतं विश्वधेना । प्रजावदस्मे द्रविणेह धत्तम् । मेदसा देवा वपया यजध्वम् । विष्णुं च देवं वरुणं च रातिम् ॥ २। ८। ४। ४॥

२७ ता नो अमीवा अपबाधमानौ । इमं यज्ञं जुषमाणावुपेतम् । विष्णूवरुणा युवमध्वराय नः । विशे जनाय महि शर्म यच्छतम् । दीर्घप्रयज्यू हविषा वृधाना । ज्योतिषाऽरातीर्दहतं तमाꣳसि । ययोरोजसा स्कभिता रजाꣳसि । वीर्येभिर्वीरतमा शविष्ठा । याऽपत्येते अप्रतीत्ता सहोभिः । विष्णू अगन्वरुणा पूर्वहूतौ ॥ २। ८। ४। ५॥

२८ विष्णूवरुणावभिशस्तिपा वाम् । देवा यजन्त हविषा घृतेन । अपामीवाꣳ सेधतꣳ रक्षसश्च । अथा धत्तं यजमानाय शं योः । अꣳहोमुचा वृषभा सुप्रतूर्ती । देवानां देवतमा शचिष्ठा । विष्णूवरुणा प्रतिहर्यतं नः । इदं नरा प्रयतमूतये हविः । मही नु

द्यावापृथिवी इह ज्येष्ठे । रुचा भवताꣳ शुचयद्भिरर्कैः ॥ २। ८। ४। ६॥

२९ यथ्सीं वरिष्ठे बृहती विमिन्वन् । नृवद्ध्योऽक्षा पप्रथानेभिरेवैः । प्र पूर्वजे पितरा नव्यसीभिः । गीर्भिः कृणुध्वꣳ सदने ऋतस्य । आ नो द्यावापृथिवी दैव्येन । जनेन यातं महि वां वरूथम् । स इथ्स्वपा भुवनेष्वास । य इमे द्यावापृथिवी जजान । उर्वी गभीरे रजसी सुमेके । अवꣳशे धीरः शच्या समैरत् ॥ २। ८। ४। ७॥

३० भूरिं द्वे अचरन्ती चरन्तम् । पद्वन्तं गर्भमपदी दधाते । नित्यं न सूनुं पित्रोरुपस्थे । तं पिपृतꣳ रोदसी सत्यवाचम् । इदं द्यावापृथिवी सत्यमस्तु । पितर्मातर्यदिहोपब्रुवे वाम् । भूतं देवानामवमे अवोभिः । विद्यामेषं वृजनं जीरदानुम् । उर्वी पृथ्वी बहुले दूरे अन्ते । उपब्रुवे नमसा यज्ञे अस्मिन् । दधाते ये सुभगे सुप्रतूर्ती । द्यावा रक्षतं पृथिवी नो अभ्वात् । या जाता ओषधयोऽतिविश्वाः परिष्ठाः । या ओषधयः सोमराज्ञीरश्वावतीꣳ सोमवतीम् । ओषधीरिति मातरोऽन्या वो अन्यामवतु ॥ २। ८। ४। ८॥ हविर्नो दाद्बभूव रातिं पूर्वहूतावर्कैरैरदस्मिन्पञ्च च ॥ ४॥

३१ शुचिं नु स्तोममग्ग् श्नथद्वृत्रम् । उभा वामिन्द्राग्नी प्रचर्षणिभ्यः । आवृत्रहणा गीर्भिर्विप्रः । ब्रह्मणस्पते त्वमस्य यन्ता । सूक्तस्य बोधि तनयं च जिन्व । विश्वं तद्भद्रं यदवन्ति देवाः । बृहद्वदेम विदथे सुवीराः । स ईꣳ सत्येभिः सखिभिः शुचद्भिः । गोधायसं वि धनसैरतर्दत् । ब्रह्मणस्पतिर्वृषभिर्वराहैः ॥ २। ८। ५। १॥

३२ घर्मस्वेदेभिर्द्रविणं व्यानट् । ब्रह्मणस्पतेरभवद्यथा वशम् । सत्यो मन्युर्महि कर्मा करिष्यतः । यो गा उदाजथ्स दिवे वि चाभजत् । महीव रीतिः शवसा सरत्पृथक् । इन्धानो अग्निं वनवद्वनुष्यतः । कृतब्रह्मा शूशुवद्रातहव्य इत् । जातेन जातमति सृत्प्रसृꣳसते । यं यं युजं कृणुते ब्रह्मणस्पतिः । ब्रह्मणस्पते सुयमस्य विश्वहा ॥ २। ८। ५। २॥

३३ रायः स्याम रथ्यो विवस्वतः । वीरेषु वीराꣳ उपपृङ्धि नस्त्वम् । यदीशानो ब्रह्मणा वेषि मे हवम् । स इज्जनेन स विशा स जन्मना । स पुत्रैर्वाजं भरते धना नृभिः । देवानां यः पितरमाविवासति । श्रद्धामना हविषा ब्रह्मणस्पतिम् । यास्ते पूषन्ना वो अन्तः । शुक्रं ते अन्यत्पूषेमा आशाः । प्रपथे पथामजनिष्ट पूषा ॥ २। ८। ५। ३॥

३४ प्रपथे दिवः प्रपथे पृथिव्याः । उभे अभि प्रियतमे सधस्थे । आ च परा च चरति प्रजानन् । पूषा सुबन्धुर्दिव आपृथिव्याः । इडस्पतिर्मघवा दस्मवर्चाः । तं देवासो अददुः सूर्यायै । कामेन कृतं तवसग्ग् स्वञ्चम् । अजाश्वः पशुपा वाजबस्त्यः । धियंजिन्वो

विश्वे भुवने अर्पितः । अष्ट्रां पूषा शिथिरामुद्वरीवृजत् ॥ २। ८। ५। ४॥

३५ संचक्षाणो भुवना देव ईयते । शुची वो हव्या मरुतः शुचीनाम् । शुचिꣳहिनोम्यध्वरꣳ शुचिभ्यः । ऋतेन सत्यमृतसाप आयन् । शुचिजन्मानः शुचयः पावकाः । प्र चित्रमर्कं गृणते तुराय । मारुताय स्वतवसे भरध्वम् । ये सहाꣳसि सहसा सहन्ते । रेजते अग्ने पृथिवी मखेभ्यः । अꣳसेष्वा मरुतः खादयो वः ॥ २। ८। ५। ५॥

३६ वक्षस्सु रुक्मा उपशिश्रियाणाः । वि विद्युतो न वृष्टिभी रुचानाः । अनु स्वधामायुधैर्यच्छमानाः । या वः शर्म शशमानाय सन्ति । त्रिधातूनि दाशुषे यच्छताधि । अस्मभ्यं तानि मरुतो वियन्त । रयिं नो धत्त वृषणः सुवीरम् । इमे तुरं मरुतो रामयन्ति । इमे सहः सहस आनमन्ति । इमे शꣳसं वनुष्यतो निपान्ति ॥ २। ८। ५। ६॥

३७ गुरुद्वेषो अररुषे दधन्ति । अरा इवेदचरमा अहेव । प्र प्रजायन्ते अकवा महोभिः । पृश्नेः पुत्रा उपमासो रभिष्ठाः । स्वया मत्या मरुतः संमिमिक्षुः । अनु ते दायि मह इन्द्रियाय । सत्रा ते विश्वमनु वृत्रहत्ये । अनु क्षत्रमनु सहो यजत्र । इन्द्र देवेभिरनु ते नृषह्ये । य इन्द्र शुष्मो मघवन्ते अस्ति ॥ २। ८। ५। ७॥

३८ शिक्षा सखिभ्यः पुरुहूत नृभ्यः । त्वꣳ हि दृढा मघवन्विचेताः । अपावृधि परिवृतिं न राधः । इन्द्रो राजा जगतश्चर्षणीनाम् । अधिक्षमि विषुरूपं यदस्ति । ततो ददातु दाशुषे वसूनि । चोदद्राध उपस्तुतश्चिदर्वाक् । तमु ष्टुहि यो अभिभूत्योजाः । वन्वन्नवातः पुरुहूत इन्द्रः । अषाढमुग्रꣳ सहमानमाभिः ।

३९ गीर्भिर्वर्ध वृषभं चर्षणीनाम् । स्थूरस्य रायो बृहतो य ईशे । तमु ष्टवाम विदथेष्विन्द्रम् । यो वायुना जयति गोमतीषु । प्र धृष्णुया नयति वस्यो अच्छ । आ ते शुष्मो वृषभ एतु पश्चात् । ओत्तरादधरागा पुरस्तात् । आ विश्वतो अभि समेत्वर्वाङ् । इन्द्र द्युम्नꣳ सुवर्वद्धेह्यस्मे ॥ २। ८। ५। ८॥ वराहैर्विश्वहाऽजनिष्ट पूषोद्वरीवृजत्खादयो वः पान्त्यस्त्याभिर्नव च ॥ ५॥

४० आ देवो यातु सविता सुरत्नः । अन्तरिक्षप्रा वहमानो अश्वैः । हस्ते दधानो नर्या पुरूणि । निवेशयञ्च प्रसुवञ्च भूम । अभीवृतं कृशनैर्विश्वरूपम् । हिरण्यशम्यं यजतो बृहन्तम् । आस्थाद्रथꣳ सविता चित्रभानुः । कृष्णा रजाꣳसि तविषीं दधानः । सघा नो देवः सविता सवाय । आसाविषद्वसुपतिर्वसूनि ॥ २। ८। ६। १॥

४१ विश्रयमाणो अमतिमुरूचीम् । मर्तभोजनमध रासते न । वि जनाञ्छ्यावाः शितिपादो

अख्यन् । रथꣳ हिरण्यप्र उगं वहन्तः । शश्वद्विशः सवितुर्दैव्यस्य । उपस्थे विश्वा भुवनानि तस्थुः । वि सुपर्णो अन्तरिक्षाण्यख्यत् । गभीरवेपा असुरः सुनीथः । क्वेदानीꣳ सूर्यः कश्चिकेत । कतमां द्याꣳ रश्मिरस्याततान ॥ २। ८। ६। २॥

४२ भगं धियं वाजयन्तः पुरन्धिम् । नराशꣳसो ग्नास्पतिर्नो अव्यात् । आऽये वामस्य संगथे रयीणाम् । प्रिया देवस्य सवितुः स्याम । आ नो विश्वे अस्क्रा गमन्तु देवाः । मित्रो अर्यमा वरुणः सजोषाः । भुवन् यथा नो विश्वे वृधासः । करन्थ्सुषाहा विथुरं न शवः । शं नो देवा विश्वदेवा भवन्तु । शꣳ सरस्वती सह धीभिरस्तु ॥ २। ८। ६। ३॥

४३ शमभिषाचः शमु रातिषाचः । शं नो दिव्याः पार्थिवाः शं नो अप्याः । ये सवितुः सत्यसवस्य विश्वे । मित्रस्य व्रते वरुणस्य देवाः । ते सौभगं वीरवद्गोमदप्नः । दधातन द्रविणं चित्रमस्मे । अग्ने याहि दूत्यं वारिषेण्यः । देवाꣳ अच्छा ब्रह्मकृता गणेन । सरस्वतीं मरुतो अश्विनाऽपः । यक्षि देवान्रत्नधेयाय विश्वान् ॥ २। ८। ६। ४॥

४४ द्यौः पितः पृथिवि मातरध्रुक् । अग्ने भ्रातर्वसवो मृडता नः । विश्व आदित्या अदिते सजोषाः । अस्मभ्यꣳ शर्म बहुलं वियन्त । विश्वे देवाः शृणुतेमꣳ हवं मे । ये अन्तरिक्षे य उप द्यवि ष्ठ । ये अग्निजिह्वा उत वा यजत्राः । आसद्यास्मिन्बर्हिषि मादयध्वम् । आ वां मित्रावरुणा हव्यजुष्टिम् । नमसा देवाववसाऽऽववृत्याम् ॥ २। ८। ६। ५॥

४५ अस्माकं ब्रह्म पृतनासु सह्या अस्माकम् । वृष्टिर्दिव्या सुपारा । युवं वस्त्राणि पीवसा वसाथे । युवोरच्छिद्रा मन्तवो ह सर्गाः । अवातिरतमनृतानि विश्वा । ऋतेन मित्रावरुणा सचेथे । तथ्सु वां मित्रावरुणा महित्वम् । ईर्मा तस्थुषीरहभिर्दुदुह्रे । विश्वाः पिन्वथ स्वसरस्य धेनाः । अनु वामेकः पविरावर्वर्ति ॥ २। ८। ६। ६॥

४६ यद्बꣳहिष्ठं नातिविदे सुदानू । अच्छिद्रꣳ शर्म भुवनस्य गोपा । ततो नो मित्रावरुणाववीष्टम् । सिषासन्तो जीगिवाꣳसः स्याम । आ नो मित्रावरुणा हव्यदातिम् । घृतैर्गव्यूतिमुक्षतमिडाभिः । प्रतिवामत्र वरमा जनाय । पृणीतमुद्नो दिव्यस्य चारोः । प्र बाहवा सिसृतं जीवसे नः । आ नो गव्यूतिमुक्षतं घृतेन ॥ २। ८। ६। ७॥

४७ आ नो जने श्रवयतं युवाना । श्रुतं मे मित्रावरुणा हवेमा । इमा रुद्राय स्थिरधन्वने गिरः । क्षिप्रेषवे देवाय स्वधाम्ने । अषाढाय सहमानाय मीढुषे । तिग्मायुधाय भरता शृणोतन । त्वा दत्तेभी रुद्र शंतमेभिः । शतꣳ हिमा अशीय भेषजेभिः । व्यस्मद्द्वेषो

वितरं व्यꣳहः । व्यमीवाग्श्चातयस्वा विषूचीः ॥ २। ८। ६। ८॥
४८ अर्हन्बिभर्षि मा नस्तोके । आ ते पितर्मरुताꣳ सुम्नमेतु । मा नः सूर्यस्य संदृशो
युयोथाः । अभि नो वीरो अर्वति क्षमेत । प्रजायेमहि रुद्र प्रजाभिः । एवा बभ्रो वृषभ
चेकितान । यथा देव न हृणीषे न हꣳसि । हावनश्रूर्नो रुद्रेह बोधि । बृहद्वदेम विदथे
सुवीराः । परि णो रुद्रस्य हेतिः स्तुहि श्रुतम् । मीढुष्टमार्हन्बिभर्षि । त्वमग्ने रुद्र आ
वो राजानम् ॥ २। ८। ६। ९॥ वसूनि ततानास्तु विश्वान् ववृत्यां ववर्ति घृतेन विषूचीः
श्रुतं द्वे च ॥ ६॥
४९ सूर्यो देवीमुषसꣳ रोचमाना मर्यः । न योषामभ्येति पश्चात् । यत्रा नरो देवयन्तो
युगानि । वितन्वते प्रति भद्राय भद्रम् । भद्रा अश्वा हरितः सूर्यस्य । चित्रा एदग्वा
अनुमाद्यासः । नमस्यन्तो दिव आ पृष्ठमस्थुः । परि द्यावापृथिवी यन्ति सद्यः । तथ्सूर्यस्य
देवत्वं तन्महित्वम् । मध्या कर्तोर्विततꣳ संजभार ॥ २। ८। ७। १॥
५० यदेदयुक्त हरितः सधस्थात् । आद्रात्री वासस्तनुते सिमस्मै । तन्मित्रस्य
वरुणस्याभिचक्षे । सूर्यो रूपं कृणुते द्योरुपस्थे । अनन्तमन्यद्रुशदस्य पाजः ।
कृष्णमन्यद्धरितः संभरन्ति । अद्या देवा उदिता सूर्यस्य । निरꣳहसः पिपृतान्निरवद्यात्
। तन्नो मित्रो वरुणो मामहन्ताम् । अदितिः सिन्धुः पृथिवी उत द्यौः ॥ २। ८। ७। २॥
५१ दिवो रुक्म उरुचक्षा उदेति । दूरेअर्थस्तरणिर्भ्राजमानः । नूनं जनाः सूर्येण प्रसूताः
। आयन्नर्थानि कृणवन्नपाꣳसि । शं नो भव चक्षसा शं नो अह्ना । शं भानुना शꣳ
हिमाशं घृणेन । यथा शमस्मै शमसद्दुरोणे । तथ्सूर्य द्रविणं धेहि चित्रम् । चित्रं
देवानामुदगादनीकम् । चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ २। ८। ७। ३॥
५२ आप्रा द्यावापृथिवी अन्तरिक्षम् । सूर्य आत्मा जगतस्तस्थुषश्च । त्वष्टा
दधत्तन्नस्तुरीपम् । त्वष्टा वीरं पिशङ्गरूपः । दशेमं त्वष्टुर्जनयन्त गर्भम् । अतन्द्रासो
युवतयो बिभर्त्रम् । तिग्मानीकग्ग् स्वयशसंजनेषु । विरोचमानं परिषीं नयन्ति ।
आविष्ट्यो वर्धते चारुरासु । जिह्मानामूर्ध्वः स्वयशा उपस्थे ॥ २। ८। ७। ४॥
५३ उभे त्वष्टुर्बिभ्यतुर्जायमानात् । प्रतीची सिꣳहं प्रतिजोषयेते । मित्रो जनान् प्रसमित्र
। अयं मित्रो नमस्यः सुशेवः । राजा सुक्षत्रो अजनिष्ट वेधाः । तस्य वयꣳ सुमतौ
यज्ञियस्य । अपि भद्रे सौमनसे स्याम । अनमीवास इडया मदन्तः । मितज्ञवो
वरिमन्ना पृथिव्याः । आदित्यस्य व्रतमुपक्ष्यन्तः ॥ २। ८। ७। ५॥

५४ वयं मित्रस्य सुमतौ स्याम । मित्रं न ईꣳ शिम्या गोषु गव्यवत् । स्वाधियो विदथे अप्स्वजीजनन् । अरेजयताꣳ रोदसी पाजसा गिरा । प्रति प्रियं यजतं जनुषामवः । महाꣳ आदित्यो नमसोपसद्यः । यातयज्जनो गृणते सुशेवः । तस्मा एतत्पन्यतमाय जुष्टम् । अग्नौ मित्राय हविराजुहोत । आ वाꣳ रथो रोदसी बद्बधानः ॥ २। ८। ७। ६॥

५५ हिरण्ययो वृषभिर्यात्वश्वैः । घृतवर्तनिः पविभी रुचानः । इषां वोढा नृपतिर्वाजिनीवान् । स पप्रथानो अभि पञ्चभूम । त्रिवन्धुरो मनसाऽऽयातु युक्तः । विशो येन गच्छथो देवयन्तीः । कुत्राचिद्यामममश्विना दधाना । स्वश्वा यशसाऽऽयातमर्वाक् । दस्रा निधिं मधुमन्तं पिबाथः । वि वाꣳ रथो वध्वा यादमानः ॥ २। ८। ७। ७॥

५६ अन्तान्दिवो बाधते वर्तनिभ्याम् । युवोः श्रियं परि योषा वृणीत । सूरो दुहिता परितक्मियायाम् । यद्देवयन्तमवथः शचीभिः । परिघ्रꣳ सवां मनावां वयोगाम् । यो ह स्य वाꣳरथिरा वस्त उस्राः । रथो युजानः परियाति वर्तिः । तेन नः शं योरुषसो व्युष्टौ । न्यश्विना वहतं यज्ञे अस्मिन् । युवं भुज्युमवविद्धꣳ समुद्रे ॥ २। ८। ७। ८॥

५७ उदूहथुरर्णसो अस्रिधानैः । पतत्रिभिरश्रमैरव्यथिभिः । दꣳसनाभिरश्विना पारयन्ता । अग्नीषोमा यो अद्य वाम् । इदं वचः सपर्यति । तस्मै धत्तꣳ सुवीर्यम् । गवां पोषग्ग् स्वश्वियम् । यो अग्नीषोमा हविषा सपर्यात् । देवद्रीचा मनसा यो घृतेन । तस्य व्रतꣳ रक्षतं पातमꣳहसः ॥ २। ८। ७। ९॥

५८ विशे जनाय महि शर्म यच्छतम् । अग्नीषोमा य आहुतिम् । यो वां दाशाद्धविष्कृतिम् । स प्रजया सुवीर्यम् । विश्वमायुर्व्यश्नवत् । अग्नीषोमा चेति तद्वीर्यं वाम् । यदमुष्णीतमवसं पणिं गोः । अवातिरतं प्रथयस्य शेषः । अविन्दतं ज्योतिरेकं बहुभ्यः । अग्नीषोमाविमꣳ सुमेऽग्नीषोमा हविषः प्रस्थितस्य ॥ २। ८। ७। १०॥ जभार द्यौरग्नेरुपस्थ उपक्ष्यन्तो बद्बधानो यादमानः समुद्रेऽꣳहसः प्रस्थितस्य ॥ ७॥

५९ अहमस्मि प्रथमजा ऋतस्य । पूर्वं देवेभ्यो अमृतस्य नाभिः । यो मा ददाति स इदेव माऽऽवाः । अहमन्नमन्नमदन्तमद्मि । पूर्वमग्नेरपि दहत्यन्नम् । यत्तौ हाऽऽसाते अहमुत्तरेषु । व्यात्तमस्य पशवः सुजम्भम् । पश्यन्ति धीराः प्रचरन्ति पाकाः । जहाम्यन्यं न जहाम्यन्यम् । अहमन्नं वशमिच्चरामि ॥ २। ८। ८। १॥

६० समानमर्थं पर्येमि भुञ्जत् । को मामन्नं मनुष्यो दयेत । पराके अन्नं निहितं लोक एतत् । विश्वैर्देवैः पितृभिर्गुप्तमन्नम् । यदद्यते लुप्यते यत्परोप्यते । शततमी सा तनूर्मे

बभूव । महान्तौ चरू सकृद्दुग्धेन पप्रौ । दिवं च पृश्नि पृथिवीं च साकम् । तथ्संपिबन्तो न मिनन्ति वेधसः । नैतद्भूयो भवति नो कनीयः ॥ २। ८। ८। २॥
६१ अन्नं प्राणमन्नमपानमाहुः । अन्नं मृत्युं तमु जीवातुमाहुः । अन्नं ब्रह्माणो जरसं वदन्ति । अन्नमाहुः प्रजननं प्रजानाम् । मोघमन्नं विन्दते अप्रचेताः । सत्यं ब्रवीमि वध इथ्स तस्य । नार्यमणं पुष्यति नो सखायम् । केवलाघो भवति केवलादी । अहं मेघः स्तनयन्वर्षन्नस्मि । मामदन्त्यहमद्म्यन्यान् ॥ २। ८। ८। ३॥
६२ अहꣳ सदमृतो भवामि । मदादित्या अधि सर्वे तपन्ति । देवीं वाचमजनयन्त यद्वाग्वदन्ती । अनन्तामन्तादधिनिर्मितां महीम् । यस्यां देवा अदधुर्भोजनानि । एकाक्षरां द्विपदाꣳ षट्पदां च । वाचं देवा उपजीवन्ति विश्वे । वाचं देवा उपजीवन्ति विश्वे । वाचं गन्धर्वाः पशवो मनुष्याः । वाचीमा विश्वा भुवनान्यर्पिता ॥ २। ८। ८। ४॥
६३ सा नो हवं जुषतामिन्द्रपत्नी । वागक्षरं प्रथमजा ऋतस्य । वेदानां माताऽमृतस्य नाभिः । सा नो जुषाणोपयज्ञमागात् । अवन्ती देवी सुहवा मे अस्तु । यामृषयो मन्त्रकृतो मनीषिणः । अन्वैच्छन्देवास्तपसा श्रमेण । तां देवीं वाचꣳहविषा यजामहे । सा नो दधातु सुकृतस्य लोके । चत्वारि वाक्परिमिता पदानि ॥ २। ८। ८। ५॥
६४ तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति । तुरीयं वाचो मनुष्या वदन्ति । श्रद्धयाऽग्निः समिध्यते । श्रद्धया विन्दते हविः । श्रद्धां भगस्य मूर्धनि । वचसाऽऽवेदयामसि । प्रियꣳ श्रद्धे ददतः । प्रियꣳ श्रद्धे दिदासतः । प्रियं भोजेषु यज्वसु ॥ २। ८। ८। ६॥
६५ इदं म उदितं कृधि । यथा देवा असुरेषु । श्रद्धामुग्रेषु चक्रिरे । एवं भोजेषु यज्वसु । अस्माकमुदितं कृधि । श्रद्धां देवा यजमानाः । वायुगोपा उपासते । श्रद्धाꣳ हृदय्ययाऽऽकूत्या । श्रद्धया हूयते हविः । श्रद्धां प्रातर्हवामहे ॥ २। ८। ८। ७॥
६६ श्रद्धां मध्यंदिनं परि । श्रद्धाꣳ सूर्यस्य निम्रुचि । श्रद्धे श्रद्धापयेह मा । श्रद्धा देवानधिवस्ते । श्रद्धा विश्वमिदं जगत् । श्रद्धां कामस्य मातरम् । हविषा वर्धयामसि । ब्रह्म जज्ञानं प्रथमं पुरस्तात् । वि सीमतः सुरुचो वेन आवः । स बुध्निया उपमा अस्य विष्ठाः ॥ २। ८। ८। ८॥
६७ सतश्च योनिमसतश्च विवः । पिता विराजामृषभो रयीणाम् । अन्तरिक्षं विश्वरूप आविवेश । तमर्कैरभ्यर्चन्ति वथ्सम् । ब्रह्म सन्तं ब्रह्मणा वर्धयन्तः । ब्रह्म देवानजनयत् ।

ब्रह्म विश्वमिदं जगत् । ब्रह्मणः, क्षत्रं निर्मितम् । ब्रह्म ब्राह्मण आत्मना । अन्तरस्मिन्निमे लोकाः ॥ २। ८। ८। ९॥

६८ अन्तर्विश्वमिदं जगत् । ब्रह्मैव भूतानां ज्येष्ठम् । तेन कोऽर्हति स्पर्धितुम् । ब्रह्मन्देवास्त्रयस्त्रिꣳशत् । ब्रह्मन्निन्द्रप्रजापती । ब्रह्मन् ह विश्वा भूतानि । नावीवान्तः समाहिता । चतस्र आशाः प्रचरन्त्वग्नयः । इमं नो यज्ञं नयतु प्रजानन् । घृतं पिन्वन्नजरꣳ सुवीरम् ॥

२। ८। ८। १०॥

६९ ब्रह्म समिद्धवत्याहुतीनाम् । आ गावो अग्मन्नुत भद्रमक्रन् । सीदन्तु गोष्ठे रणयन्त्वस्मे । प्रजावतीः पुरुरूपा इह स्युः । इन्द्राय पूर्वीरुषसो दुहानाः । इन्द्रो यज्वने पृणते च शिक्षति । उपेद्ददाति न स्वं मुषायति । भूयो भूयो रयिमिदस्य वर्धयन् । अभिन्ने खिल्ले निदधाति देवयुम् । न तानशन्ति न ता अर्वा ॥ २। ८। ८। ११॥

७० गावो भगो गाव इन्द्रो मे अच्छात् । गावः सोमस्य प्रथमस्य भक्षः । इमा या गावः स जनास इन्द्रः । इच्छामीद्धृदा मनसा चिदिन्द्रम् । यूयं गावो मेदयथा कृशं चित् । अश्लीलं चित्कृणुथा सुप्रतीकम् । भद्रं गृहं कृणुथ भद्रवाचः । बृहद्वो वय उच्यते सभासु । प्रजावतीः सूयवसꣳ रिशन्तीः । शुद्धा अपः सुप्रपाणे पिबन्तीः । मा वः स्तेन ईशत माऽघशꣳसः । परि वो हेती रुद्रस्य वृञ्ज्यात् । उपेदमुप पर्चनम् । आसु गोषूपपृच्यताम् । उपर्षभस्य रेतसि । उपेन्द्र तव वीर्ये ॥ २। ८। ८। १२॥ चरामि कनीयोऽन्यानर्पिता पदानि यज्वसु हवामहे विष्ठा लोकाः सुवीरमर्वा पिबन्तीष्षट् च ॥ ८॥

७१ ता सूर्याचन्द्रमसा विश्वभृत्तमा महत् । तेजो वसुमद्राजतो दिवि । सामात्माना चरतः सामचारिणा । ययोर्व्रतं न ममे जातु देवयोः । उभावन्तौ परियात अर्म्या । दिवो न रश्मीग्स्तनुतो व्यर्णवे । उभा भुवन्ती भुवना कविक्रतू । सूर्या न चन्द्रा चरतो हतामती । पती द्युमद्विश्वविदा उभा दिवः । सूर्या उभा चन्द्रमसा विचक्षणा ॥ २। ८। ९। १॥

७२ विश्ववारा वरिवोभा वरेण्या । ता नोऽवतं मतिमन्ता महिव्रता । विश्ववपरी प्रतरणा तरन्ता । सुवर्विदा दृशये भूरिरश्मी । सूर्या हि चन्द्रा वसु त्वेष दर्शता । मनस्विनोभाऽनुचरतो नु सं दिवम् । अस्य श्रवो नद्यः सप्त बिभ्रति । द्यावा क्षामा पृथिवी दर्शतं वपुः । अस्मे सूर्याचन्द्रमसाऽभिचक्षे । श्रद्धे कमिन्द्र चरतो विचर्तुरम् ॥

२। ८। ९। २॥
७३ पूर्वापरं चरतो माययैतौ । शिशू क्रीडन्तौ परियातो अध्वरम् । विश्वान्यन्यो भुवनाऽभिचष्टे । ऋतूनन्यो विदधज्जायते पुनः । हिरण्यवर्णाः शुचयः पावका यासा ँ राजा । यासां देवाः शिवेन मा चक्षुषा पश्यत । आपो भद्रा आदित्पश्यामि । नासदासीन्नो सदासीत्तदानीम् । नासीद्रजो नो व्योमापरो यत् । किमावरीवः कुह कस्य शर्मन् ॥ २। ८। ९। ३॥
७४ अम्भः किमासीद्गहनं गभीरम् । न मृत्युरमृतं तर्हि न । रात्रिया अह्न आसीत्प्रकेतः । आनीदवात२ँ स्वधया तदेकम् । तस्माद्धान्यं न परः किंच नास । तम आसीत्तमसा गूढमग्रे प्रकेतम् । सलिल ँ सर्वमा इदम् । तुच्छेनाभ्वपिहितं यदासीत् । तमसस्तन्महिना जायतैकम् । कामस्तदग्रे समवर्तताधि ॥ २। ८। ९। ४॥
७५ मनसो रेतः प्रथमं यदासीत् । सतो बन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषा । तिरश्चीनो विततो रश्मिरेषाम् । अधः स्विदासी ३ दुपरि स्विदासी ३ त् । रेतोधा आसन्महिमान आसन् । स्वधा अवस्तात्प्रयतिः परस्तात् । को अद्धा वेद क इह प्रवोचत् । कुत आजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनाय ॥ २। ८। ९। ५॥
७६ अथा को वेद यत आ बभूव । इयं विसृष्टिर्यत आबभूव । यदि वा दधे यदि वा न । यो अस्याध्यक्षः परमे व्योमन् । सो अङ्ग वेद यदि वा न वेद । कि२ँस्विद्वनं क उ स वृक्ष आसीत् । यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तत् । यदध्यतिष्ठद्भुवनानि धारयन् । ब्रह्म वनं ब्रह्म स वृक्ष आसीत् ॥ २। ८। ९। ६॥
७७ यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा विब्रवीमि वः । ब्रह्माध्यतिष्ठद्भुवनानि धारयन् । प्रातरग्निं प्रातरिन्द्र ँ हवामहे । प्रातर्मित्रावरुणा प्रातरश्विना । प्रातर्भगं पूषणं ब्रह्मणस्पतिम् । प्रातः सोममुत रुद्र ँ हुवेम । प्रातर्जितं भगमुग्र ँ हुवेम । वयं पुत्रमदितेर्यो विधर्ता । आध्रश्चिद्यं मन्यमानस्तुरश्चित् ॥
२। ८। ९। ७॥
७८ राजाचिद्यं भगं भक्षीत्याह । भग प्रणेतर्भग सत्यराधः । भगेमां धियमुदवा ददन्नः । भग प्र णो जनय गोभिरश्वैः । भग प्र नृभिर्नृवन्तः स्याम । उतेदानीं भगवन्तः स्याम । उत प्रपित्व उत मध्ये अह्नाम् । उतोदिता मघवन्त्सूर्यस्य । वयं देवाना ँ सुमतौ स्याम । भग एव भगवा ँ अस्तु देवाः ॥ २। ८। ९। ८॥

७९ तेन वयं भगवन्तः स्याम । तं त्वा भग सर्व इज्ञोहवीमि । स नो भग पुर एता भवेह । समध्वरायोषसो नमन्त । दधिक्रावेव शुचये पदाय । अर्वाचीनं वसुविदं भगं नः । रथमिवाश्वा वाजिन आवहन्तु । अश्वावतीर्गोमतीर्न उषासः । वीरवतीः सदमुच्छन्तु भद्राः । घृतं दुहाना विश्वतः प्रपीनाः । यूयं पात स्वस्तिभिः सदा नः ॥
२। ८। ९। ९॥
विचक्षणा विचर्तुरꣳ शर्मन्नधिविसर्जनाय ब्रह्म वनं ब्रह्म स वृक्ष आसीत्तुरश्विद्देवाः प्रपीना एकं च ॥ ९॥
पीवोऽन्नान्ते शुक्रासः सोमो धेनुमिन्द्रस्तरस्वाञ्छुचिमा देवो यातु सूर्यो देवीमहमस्मि ता सूर्याचन्द्रमसा नव ॥ ९॥
पीवोऽन्नानग्ने त्वं पारयानाधृष्यः शुचिं नु स्तोमं विश्रयमाणो दिवो रुक्मोऽन्नं प्राणमन्नं ता सूर्याचन्द्रमसा नवसप्ततिः ॥ ७९॥
पीवोऽन्नान्, यूयं पातस्वस्तिभिः सदानः ॥
इति द्वितीयं अष्टकं संपूर्णम् ॥
॥ तैत्तिरीय-ब्राह्मणम् ॥

# तैत्तिरीय-संहिता

## ॥ तृतीयं अष्टकम् ॥

॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

## तृतीयाष्टके प्रथमः प्रपाठकः १

### नक्षत्रेष्टि

१ अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासं जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः । यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिकाभिरभि संवसानः । अग्निर्नो देवः सुविते दधातु । प्रजापते रोहिणी वेतु पत्नी । विश्वरूपा बृहती चित्रभानुः ॥ ३। १। १। १॥

२ सा नो यज्ञस्य सुविते दधातु । यथा जीवेम शरदः सवीराः । रोहिणी देव्युदगात्पुरस्तात् । विश्वा रूपाणि प्रतिमोदमाना । प्रजापतिꣳ हविषा वर्धयन्ती । प्रिया देवानामुपयातु यज्ञम् । सोमो राजा मृगशीर्षेण आगन् । शिवं नक्षत्रं प्रियमस्य धाम । आप्यायमानो बहुधा जनेषु । रेतः प्रजां यजमाने दधातु ॥ ३। १। १। २॥

३ यत्ते नक्षत्रं मृगशीर्षमस्ति । प्रियꣳ राजन्प्रियतमं प्रियाणाम् । तस्मै ते सोम हविषा विधेम । शं न एधि द्विपदे शं चतुष्पदे । आर्द्रया रुद्रः प्रथमान एति । श्रेष्ठो देवानां पतिरघ्नियानाम् । नक्षत्रमस्य हविषा विधेम । मा नः प्रजाꣳ रीरिषन्मोत वीरान् । हेती रुद्रस्य परि णो वृणक्तु । आर्द्रा नक्षत्रं जुषताꣳ हविर्नः ॥
३। १। १। ३॥

४ प्रमुञ्चमानौ दुरितानि विश्वा । अपाघशꣳसं नुदतामरातिम् । पुनर्नो देव्यदितिः स्पृणोतु । पुनर्वसू नः पुनरेतां यज्ञम् । पुनर्नो देवा अभियन्तु सर्वे । पुनः पुनर्वो हविषा यजामः । एवा न देव्यदितिरनर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा । पुनर्वसू हविषा वर्धयन्ती । प्रियं देवानामप्येतु पाथः ॥ ३। १। १। ४॥

५ बृहस्पतिः प्रथमं जायमानः । तिष्यं नक्षत्रमभि संबभूव । श्रेष्ठो देवानां पृतनासु

जिष्णुः । दिशो नु सर्वा अभयं नो अस्तु । तिष्यः पुरस्तादुत मध्यतो नः । बृहस्पतिर्नः
परिपातु पश्चात् । बाधेतां द्वेषो अभयं कृणुताम् । सुवीर्यस्य पतयः स्याम । इदꣳ
सर्पेभ्यो हविरस्तु जुष्टम् । आश्रेषा येषामनुयन्ति चेतः ॥ ३। १। १। ५॥
६ ये अन्तरिक्षं पृथिवीं क्षियन्ति । ते नः सर्पासो हवमागमिष्ठाः । ये रोचने सूर्यस्यापि
सर्पाः । ये दिवं देवीमनु संचरन्ति । येषामाश्रेषा अनुयन्ति कामम् । तेभ्यः सर्पेभ्यो
मधुमज्जुहोमि । उपहूताः पितरो ये मघासु । मनोजवसः सुकृतः सुकृत्याः । ते नो
नक्षत्रे हवमागमिष्ठाः । स्वधाभिर्यज्ञं प्रयतं जुषन्ताम् ॥ ३। १। १। ६॥
७ ये अग्निदग्धा येऽनग्निदग्धाः । येऽमुं लोकं पितरः, क्षियन्ति । याग्श्च विद्म याꣳ उ
च न प्रविद्म । मघासु यज्ञꣳ सुकृतं जुषन्ताम् । गवां पतिः फल्गुनीनामसि त्वम्
। तदर्यमन्वरुण मित्र चारु । तं त्वा वयꣳ सनितारꣳ सनीनाम् । जीवा जीवन्तमुप
संविशेम । येनेमा विश्वा भुवनानि संजिता । यस्य देवा अनु संयन्ति चेतः ॥
८ अर्यमा राजाऽजरस्तुविष्मान् । फल्गुनीनामृषभो रोरवीति । श्रेष्ठो देवानां भगवो
भगासि । तत्त्वा विदुः फल्गुनीस्तस्य वित्तात् । अस्मभ्यं क्षत्रमजरꣳ सुवीर्यम् ।
गोमदश्ववदुप संनुदेह । भगो ह दाता भग इत्प्रदाता । भगो देवीः फल्गुनीराविवेश ।
भगस्येत्तं प्रसवं गमेम । यत्र देवैः सधमादं मदेम ॥ ३। १। १। ८॥
९ आयातु देवः सवितोपयातु । हिरण्ययेन सुवृता रथेन । वहन् हस्तꣳ सुभगं
विद्मनापसम् । प्रयच्छन्तं पपुरिं पुण्यमच्छ । हस्तः प्रयच्छत्वमृतं वसीयः । दक्षिणेन
प्रतिगृभ्णीम एनत् । दातारमद्य सविता विदेय । यो नो हस्ताय प्रसुवाति यज्ञम् ।
त्वष्टा नक्षत्रमभ्येति चित्राम् । सुभꣳ ससं युवतिꣳ रोचमानाम् ॥ ३। १। १। ९॥
१० निवेशयन्नमृतान्मर्त्याग्श्च । रूपाणि पिꣳशन्भुवनानि विश्वा । तन्नस्त्वष्टा तदु चित्रा
विचष्टाम् । तन्नक्षत्रं भूरिदा अस्तु मह्यम् । तन्नः प्रजां वीरवतीꣳ सनोतु । गोभिर्नो
अश्वैः समनक्तु यज्ञम् । वायुर्नक्षत्रमभ्येति निष्ट्याम् । तिग्मशृङ्गो वृषभो रोरुवाणः ।
समीरयन्भुवना मातरिश्वा । अप द्वेषाꣳसि नुदतामरातीः ॥ ३। १। १। १०॥
११ तन्नो वायुस्तदु निष्ट्या शृणोतु । तन्नक्षत्रं भूरिदा अस्तु मह्यम् । तन्नो देवासो
अनुजानन्तु कामम् । यथा तरेम दुरितानि विश्वा । दूरमस्मच्छत्रवो यन्तु भीताः ।
तदिन्द्राग्नी कृणुतां तद्विशाखे । तन्नो देवा अनुमदन्तु यज्ञम् । पश्चात्पुरस्तादभयं नो
अस्तु । नक्षत्राणामधिपत्नी विशाखे । श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ ॥

३। १। १। ११॥
१२ विषूचः शत्रूनप बाधमानौ । अप क्षुधं नुदतामरातिम् । पूर्णा पश्चादुत पूर्णा पुरस्तात् । उन्मध्यतः पौर्णमासी जिगाय । तस्यां देवा अधि संवसन्तः । उत्तमे नाक इह मादयन्ताम् । पृथ्वी सुवर्चा युवतिः सजोषाः । पौर्णमास्युदगाच्छोभमाना । आप्याययन्ती दुरितानि विश्वा । उरुं दुहां यजमानाय यज्ञम् ॥ ३। १। १। १२॥ चित्रभानुर्यजमाने दधातु हविर्नः पाथश्चेतो जुषन्तां चेतो मदेम रोचमानामरातीर्गोपौ यज्ञम् ॥ १॥
१३ ऋध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान्, हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः । चित्रं नक्षत्रमुदगात्पुरस्तात् । अनूराधास इति यद्वदन्ति । तन्मित्र एति पथिभिर्देवयानैः । हिरण्ययैर्विततैरन्तरिक्षे । इन्द्रो ज्येष्ठामनु नक्षत्रमेति । यस्मिन्वृत्रं वृत्रतूर्ये ततार ॥ ३। १। २। १॥
१४ तस्मिन्वयममृतं दुहानाः । क्षुधं तरेम दुरितिं दुरिष्टिम् । पुरन्दराय वृषभाय धृष्णवे । अषाढाय सहमानाय मीढुषे । इन्द्राय ज्येष्ठा मधुमद्दुहाना । उरुं कृणोतु यजमानाय लोकम् । मूलं प्रजां वीरवतीं विदेय । पराच्येतु निर्ऋतिः पराचा । गोभिर्नक्षत्रं पशुभिः समक्तम् । अहर्भूयाद्यजमानाय मह्यम् ॥ ३। १। २। २॥
१५ अहर्नो अद्य सुविते दधातु । मूलं नक्षत्रमिति यद्वदन्ति । पराचीं वाचा निर्ऋतिं नुदामि । शिवं प्रजायै शिवमस्तु मह्यम् । या दिव्या आपः पयसा संबभूवुः । या अन्तरिक्ष उत पार्थिवीर्याः । यासामषाढा अनुयन्ति कामम् । ता न आपः श२ँ स्योना भवन्तु । याश्च कूप्या याश्च नाद्याः समुद्रियाः । याश्च वैशन्तीरुत प्रासचीर्याः ॥ ३। १। २। ३॥
१६ यासामषाढा मधु भक्षयन्ति । ता न आपः श२ँ स्योना भवन्तु । तन्नो विश्वे उप शृण्वन्तु देवाः । तदषाढा अभि संयन्तु यज्ञम् । तन्नक्षत्रं प्रथतां पशुभ्यः । कृषिर्वृष्टिर्यजमानाय कल्पताम् । शुभ्राः कन्या युवतयः सुपेशसः । कर्मकृतः सुकृतो वीर्यावतीः । विश्वान्देवान् हविषा वर्धयन्तीः । अषाढाः काममुपयान्तु यज्ञम् ॥ ३। १। २। ४॥
१७ यस्मिन्ब्रह्माभ्यजयथ्सर्वमेतत् । अमुं च लोकमिदमू च सर्वम् । तन्नो नक्षत्रमभिजिद्विजित्य । श्रियं दधात्वहृणीयमानम् । उभौ लोकौ ब्रह्मणा संजितेमौ । तन्नो नक्षत्रमभिजिद्विचष्टाम् । तस्मिन्वयं पृतनाः संजयेम । तं नो देवासो अनुजानन्तु कामम् । शृण्वन्ति श्रोणाममृतस्य गोपाम् । पुण्यामस्या उपशृणोमि वाचम् ॥ ३। १।

२। ५॥
१८ म॒हीं दे॒वीं विष्णु॑पत्नीमजू॒र्याम् । प्र॒तीची॑मेनाꣳ ह॒विषा॑ यजामः । त्रे॒धा विष्णु॑रुरुगा॒यो
विच॑क्रमे । म॒हीं दिवं॑ पृथि॒वीम॒न्तरि॑क्षम् । तच्छ्रो॒णैति॒ श्रव॑ इ॒च्छमा॑ना । पु॒ण्यग्ग्॒ श्लोकं॒
यज॑मानाय कृण्व॒ती । अ॒ष्टौ दे॒वा वस॑वः सो॒म्यासः॑ । चत॑स्रो दे॒वीर॒जराः॒ श्रवि॑ष्ठाः । ते
य॒ज्ञं पा᳚न्तु॒ रज॑सः प॒रस्ता᳚त् । सं॒व॒थ्स॒रीण॑म॒मृत॒ग्ग्॒ स्व॒स्ति ॥
३। १। २। ६॥
१९ य॒ज्ञं नः॑ पान्तु॒ वस॑वः पु॒रस्ता᳚त् । द॒क्षि॒ण॒तो॑ऽभिय॑न्तु॒ श्रवि॑ष्ठाः । पु॒ण्यं नक्ष॑त्रम॒भि
सं॒वि॑शाम । मा नो॒ अरा॑तिर॒घशꣳ॒सा ग॑न् । क्ष॒त्रस्य॒ राजा॒ वरु॑णोऽधिरा॒जः । नक्ष॑त्राणाꣳ
श॒तभि॑षग्वसि॑ष्ठः । तौ दे॒वेभ्यः॑ कृणुतो दी॒र्घमायुः॑ । श॒तꣳ स॒हस्रा॑ भेष॒जानि॑ ध॒त्तः ।
य॒ज्ञं नो॒ राजा॒ वरु॑ण॒ उप॑यातु । तं नो॒ विश्वे॑ अ॒भि संय॑न्तु दे॒वाः ॥ ३। १। २। ७॥
२० तन्नो॒ नक्ष॑त्रꣳ श॒तभि॑षग्जुषा॒णम् । दी॒र्घमायुः॒ प्रति॑रद्भेष॒जानि॑ । अ॒ज
ए॒कपा॑दु॒दगा᳚त्पु॒रस्ता᳚त् । विश्वा॑ भू॒तानि॑ प्रति॒मोद॑मानः । तस्य॑ दे॒वाः प्र॒स॒वं य॑न्ति॒ सर्वे᳚ ।
प्रो॒ष्ठ॒प॒दासो॑ अ॒मृत॑स्य गो॒पाः । वि॒भ्राज॑मानः समिधा॒न उ॒ग्रः । आऽन्तरि॑क्षमरुह॒दग॒न्द्याम्
। तꣳ सूर्यं॑ दे॒वम॒जमेक॑पादम् । प्रो॒ष्ठ॒प॒दासो॑ अ॒नु॑यन्ति॒ सर्वे᳚ ॥ ३। १। २। ८॥
२१ अहि॑र्बु॒ध्नियः॒ प्रथ॑मान एति । श्रेष्ठो॑ दे॒वाना॑मु॒त मानु॑षाणाम् । तं ब्रा᳚ह्म॒णाः सो॑म॒पाः
सो॒म्यासः॑ । प्रो॒ष्ठ॒प॒दासो॑ अ॒भिर॑क्षन्ति॒ सर्वे᳚ । च॒त्वार॒ एक॑म॒भिकर्म॑ दे॒वाः । प्रो॒ष्ठ॒प॒दास॒
इति॒ यान्, वद॑न्ति । ते बु॒ध्नियं॑ परि॒षद्य॑ग्ग्॒ स्तु॒वन्तः॑ । अहि॒ꣳ॒ रक्ष॑न्ति॒ नम॑सोप॒सद्य॑ ।
पू॒षा रे॒वत्यन्वे॑ति॒ पन्था᳚म् । पु॒ष्टि॒प॑ती पशु॒पा वाज॑बस्त्यौ ॥ ३। १। २। ९॥
२२ इ॒मानि॑ ह॒व्या प्रय॑ता जु॒षा॒णा । सु॒गैर्नो॒ यानै॒रुप॑यातां य॒ज्ञम् । क्षु॒द्रान्प॒शून्र॑क्षतु रे॒वती॑
नः । गावो॑ नो॒ अश्वा॒ꣳ॒ अन्वे॑तु पू॒षा । अन्न॒ꣳ॒ रक्ष॑न्तौ ब॒हुधा॒ विरू॑पम् । वाजꣳ॑
स॒नु॒तां यज॑मानाय य॒ज्ञम् । त॒द॒श्विना॑वश्वयु॒जोप॑याताम् । शुभं॒ गमि॑ष्ठौ सु॒यमे॑भि॒रश्वैः᳚ ।
स्वं नक्ष॑त्रꣳ ह॒विषा॒ यज॑न्तौ । मध्वा॒ संपृ॑क्तौ॒ यजु॑षा॒ सम॑क्तौ ॥
३। १। २। १०॥
२३ यौ दे॒वाना᳚ं भि॒षजौ॑ हव्यवा॒हौ । विश्व॑स्य दू॒ताव॒मृत॑स्य गो॒पौ । तौ नक्ष॑त्रं
जु॒जु॒षा॒णोप॑याताम् । नमो॒ऽश्विभ्या᳚ं कृणुमोऽश्व॒युग्भ्या᳚म् । अप॑ पा॒प्मानं॒ भर॑णीर्भरन्तु
। तद्य॒मो राजा॒ भग॑वा॒न् विच॑ष्टाम् । लो॒कस्य॒ राजा॑ म॒ह॒तो म॒हान् हि । सु॒गं नः॒
पन्था॒मभ॑यं कृणोतु । यस्मि॒न्नक्ष॑त्रे य॒म एति॒ राजा᳚ । यस्मि॑न्नेनम॒भ्यषि॑ञ्चन्त दे॒वाः ।
तद॑स्य चि॒त्रꣳ ह॒विषा॑ यजाम । अप॑ पा॒प्मानं॒ भर॑णीर्भरन्तु । नि॒वेश॑नी य॒त्ते दे॒वा अद॑धुः

॥ ३। १। २। ११॥ ततार मह्यं प्रासचीर्या यान्तु यज्ञं वाचग्ग् स्वस्ति देवा अनु यन्ति
सर्वे वाजबस्त्यौ समक्तौ देवास्त्रीणि च ॥ २॥
२४ नवो नवो भवति जायमानो यमादित्या अꣳशुमाप्याययन्ति । ये विरूपे समनसा
संव्ययन्ती । समानं तन्तुं परि तातनाते । विभू प्रभू अनुभू विश्वतो हुवे । ते नो नक्षत्रे
हवमागमेतम् । वयं देवी ब्रह्मणा संविदानाः । सुरत्नासो देववीतिं दधानाः । अहोरात्रे
हविषा वर्धयन्तः । अति पाप्मानमतिमुक्त्या गमेम । प्रत्युवदृश्यायती ॥ ३। १। ३। १॥
२५ व्युच्छन्ती दुहिता दिवः । अपो मही वृणुते चक्षुषा । तमो ज्योतिष्कृणोति सूनरी
। उदुस्रियाः सचते सूर्यः । सचा उद्यन्नक्षत्रमर्चिमत् । तवेदुषो व्युषि सूर्यस्य च । सं
भक्तेन गमेमहि । तन्नो नक्षत्रमर्चिमत् । भानुमत्तेज उच्चरत् । उप यज्ञमिहागमत् ॥ ३।
१। ३। २॥
२६ प्र नक्षत्राय देवाय । इन्द्रायेन्दुꣳ हवामहे । स नः सविता सुवथ्सनिम् । पुष्टिदां
वीरवत्तमम् । उदु त्यं चित्रम् । अदितिर्न उरुष्यतु महीमूषु मातरम् । इदं विष्णुः प्र
तद्विष्णुः । अग्निर्मूर्धा भुवः । अनु नोऽद्यानुमतिरन्विदनुमते त्वम् । हव्यवाहग्ग् स्विष्टम्
॥ ३। १। ३। ३॥ आयत्यगमथ्स्विष्टम् ॥ ३॥
२७ अग्निर्वा अकामयत । अन्नादो देवानाग्ग् स्यामिति । स एतमग्नये कृत्तिकाभ्यः
पुरोडाशमष्टाकपालं निरवपत् । ततो वै सोऽन्नादो देवानामभवत् । अग्निर्वै देवानामन्नादः
। यथा ह वा अग्निर्देवानामन्नादः । एवꣳ ह वा एष मनुष्याणां भवति । य एतेन हविषा
यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा ।
अम्बायै स्वाहा दुलायै स्वाहा । नितत्न्यै स्वाहाऽभ्रयन्त्यै स्वाहा । मेघयन्त्यै स्वाहा
वर्षयन्त्यै स्वाहा । चुपुणीकायै स्वाहेति ॥
३। १। ४। १॥
२८ प्रजापतिः प्रजा असृजत । ता अस्माथ्सृष्टाः पराचीरायन्न् । तासाꣳ
रोहिणीमभ्यध्यायत् । सोऽकामयत । उप मा वर्तेत । समेनया गच्छेयेति । स
एतं प्रजापतये रोहिण्यै चरुं निरवपत् । ततो वै सा तमुपावर्तत । समेनयाऽगच्छत ।
उप ह वा एनं प्रियमावर्तते । सं प्रियेण गच्छते । य एतेन हविषा यजते । य उ
चैनदेवं वेद । सोऽत्र जुहोति । प्रजापतये स्वाहा रोहिण्यै स्वाहा । रोचमानायै स्वाहा
प्रजाभ्यः स्वाहेति ॥ ३। १। ४। २॥
२९ सोमो वा अकामयत । ओषधीनाꣳ राज्यमभिजयेयमिति । स एतꣳ सोमाय

मृगशीर्षाय श्यामाकं चरुं पयसि निरवपत् । ततो वै स ओषधीनाꣳ राज्यमभ्यजयत् । समानानाꣳ ह वै राज्यमभिजयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । सोमाय स्वाहा मृगशीर्षाय स्वाहा । इन्वकाभ्यः स्वाहौषधीभ्यः स्वाहा । राज्याय स्वाहाऽभिजित्यै स्वाहेति ॥ ३। १। ४। १॥

३० रुद्रो वा अकामयत । पशुमान्थ्स्यामिति । स एतꣳ रुद्रायार्द्रायै प्रैय्यङ्गवं चरुं पयसि निरवपत् । ततो वै स पशुमानभवत् । पशुमान् ह वै भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । रुद्राय स्वाहाऽऽर्द्रायै स्वाहा । पिन्वमानायै स्वाहा पशुभ्यः स्वाहेति ॥ ३। १। ४। ४॥

३१ ऋक्षा वा इयमलोमकाऽऽसीत् । साऽकामयत । ओषधीभिर्वनस्पतिभिः प्रजायेयेति । सैतमदित्यै पुनर्वसुभ्यां चरुं निरवपत् । ततो वा इयमोषधीभिर्वनस्पतिभिः प्राजायत । प्रजायते ह वै प्रजया पशुभिः । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अदित्यै स्वाहा पुनर्वसुभ्याम् । स्वाहाऽऽभूत्यै स्वाहा प्रजात्यै स्वाहेति ॥ ३। १। ४। ५॥

३२ बृहस्पतिर्वा अकामयत । ब्रह्मवर्चसी स्यामिति । स एतं बृहस्पतये तिष्याय नैवारं चरुं पयसि निरवपत् । ततो वै स ब्रह्मवर्चस्यभवत् । ब्रह्मवर्चसी ह वै भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । बृहस्पतये स्वाहा तिष्याय स्वहा । ब्रह्मवर्चसाय स्वाहेति ॥ ३। १। ४। ६॥

३३ देवासुराः संयत्ता आसन्न् । ते देवाः सर्पेभ्य आश्रेषाभ्य आज्ये करम्भं निरवपन्न् । तानेताभिरेव देवताभिरुपानयन् । एताभिर्ह वै देवताभिर्द्विषन्तं भ्रातृव्यमुपनयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । सर्पेभ्यः स्वाहाऽऽश्रेषाभ्यः स्वाहा । दन्दशूकेभ्यः स्वाहेति ॥ ३। १। ४। ७॥

३४ पितरो वा अकामयन्त । पितृलोक ऋध्नुयामेति । त एतं पितृभ्यो मघाभ्यः पुरोडाशꣳ षट्कपालं निरवपन्न् । ततो वै ते पितृलोक आर्ध्नुवन् । पितृलोके ह वा ऋध्नोति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । पितृभ्यः स्वाहा मघाभ्यः । स्वाहाऽनघाभ्यः स्वाहाऽगदाभ्यः । स्वाहाऽरुन्धतीभ्यः स्वाहेति ॥ ३। १। ४। ८॥

३५ अर्यमा वा अकामयत । पशुमान्थ्स्यामिति । स एतमर्यम्णे फल्गुनीभ्यां चरुं निरवपत् । ततो वै स पशुमानभवत् । पशुमान् ह वै भवति । य एतेन हविषा यजते

। य उ चैनदेवं वेद । सोऽत्र जुहोति । अर्यम्णे स्वाहा फल्गुनीभ्याग् स्वाहा । पशुभ्यः स्वाहेति ॥ ३। १। ४। ९॥
३६ भगो वा अकामयत । भगी श्रेष्ठी देवानाग् स्यामिति । स एतं भगाय फल्गुनीभ्यां चरुं निरवपत् । ततो वै स भगी श्रेष्ठी देवानामभवत् । भगी ह वै श्रेष्ठी समानानां भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । भगाय स्वाहा फल्गुनीभ्याग् स्वाहा । श्रैष्ठ्याय स्वाहेति ॥ ३। १। ४। १०॥
३७ सविता वा अकामयत । श्रन्मे देवा दधीरन्न् । सविता स्यामिति । स एतꣳ सवित्रे हस्ताय पुरोडाशं द्वादशकपालं निरवपदाशूनां व्रीहीणाम् । ततो वै तस्मै श्रद्देवा अदधत । सविताऽभवत् । श्रद्ध वा अस्मै मनुष्या दधते । सविता समानानां भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । सवित्रे स्वाहा हस्ताय । स्वाहा ददते स्वाहा पृणते । स्वाहा प्रयच्छते स्वाहा प्रतिगृभ्णते स्वाहेति ॥ ३। १। ४। ११॥
३८ त्वष्टा वा अकामयत । चित्रं प्रजां विन्देयेति । स एतं त्वष्ट्रे चित्रायै पुरोडाशमष्टाकपालं निरवपत् । ततो वै स चित्रं प्रजामविन्दत । चित्रꣳ ह वै प्रजां विन्दते । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । त्वष्ट्रे स्वाहा चित्रायै स्वाहा । चैत्राय स्वाहा प्रजायै स्वाहेति ॥ ३। १। ४। १२॥
३९ वायुर्वा अकामयत । कामचारमेषु लोकेष्वभिजयेयमिति । स एतद्वायवे निष्ट्यायै गृष्ट्यै दुग्धं पयो निरवपत् । ततो वै स कामचारमेषु लोकेष्वभ्यजयत् । कामचारꣳ ह वा एषु लोकेष्वभिजयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । वायवे स्वाहा निष्ट्यायै स्वाहा । कामचाराय स्वाहाऽभिजित्यै स्वाहेति ॥ ३। १। ४। १३॥
४० इन्द्राग्नी वा अकामयेताम् । श्रैष्ठ्यं देवानामभिजयेवेति । तावेतमिन्द्राग्निभ्यां विशाखाभ्यां पुरोडाशमेकादशकपालं निरवपताम् । ततो वै तौ श्रैष्ठ्यं देवानामभ्यजयताम् । श्रैष्ठ्यꣳ ह वै समानानामभिजयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । इन्द्राग्निभ्याग् स्वाहा विशाखाभ्याग् स्वाहा । श्रैष्ठ्याय स्वाहाऽभिजित्यै स्वाहेति ॥ ३। १। ४। १४॥
४१ अथैतत्पौर्णमास्या आज्यं निर्वपति । कामो वै पौर्णमासी । काम आज्यम् । कामेनैव कामꣳ समर्धयति । क्षिप्रमेनꣳ स काम उपनमति । येन कामेन यजते ।

सोऽत्र जुहोति । पौर्णमास्यै स्वाहा कामाय स्वाहाऽगत्यै स्वाहेति ॥ ३। १। ४। १५॥
४२ मित्रो वा अकामयत । मित्रधेयमेषु लोकेष्वभिजयेयमिति । स एतं मित्रायानूराधेभ्यश्चरुं निरवपत् । ततो वै स मित्रधेयमेषु लोकेष्वभ्यजयत् । मित्रधेयꣳ ह वा एषु लोकेष्वभिजयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । मित्राय स्वाहाऽनूराधेभ्यः स्वाहा । मित्रधेयाय स्वाहाऽभिजित्यै स्वाहेति ॥
३। १। ५। १॥
४३ इन्द्रो वा अकामयत । ज्यैष्ठ्यं देवानामभिजयेयमिति । स एतमिन्द्राय ज्येष्ठायै पुरोडाशमेकादशकपालं निरवपन् महाव्रीहीणाम् । ततो वै स ज्यैष्ठ्यं देवानामभ्यजयत् । ज्यैष्ठ्यꣳ ह वै समानानामभिजयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । इन्द्राय स्वाहा ज्येष्ठायै स्वाहा । ज्यैष्ठ्याय स्वाहाऽभिजित्यै स्वाहेति ॥ ३। १। ५। २॥
४४ प्रजापतिर्वा अकामयत । मूलं प्रजां विन्देयेति । स एतं प्रजापतये मूलाय चरुं निरवपत् । ततो वै स मूलं प्रजामविन्दत । मूलꣳह वै प्रजां विन्दते । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । प्रजापतये स्वाहा मूलाय स्वाहा । प्रजायै स्वाहेति ॥
३। १। ५। ३॥
४५ आपो वा अकामयन्त । समुद्रं काममभिजयेमेति । ता एतमद्भ्योऽषाढाभ्यश्चरुं निरवपन्न् । ततो वै ताः समुद्रं काममभ्यजयन्न् । समुद्रꣳ ह वै काममभिजयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अद्भ्यः स्वाहाऽषाढाभ्यः स्वाहा । समुद्राय स्वाहा कामाय स्वाहा । अभिजित्यै स्वाहेति ॥ ३। १। ५। ४॥
४६ विश्वे वै देवा अकामयन्त । अनपजय्यं जयेमेति । त एतं विश्वेभ्यो देवेभ्योऽषाढाभ्यश्चरुं निरवपन्न् । ततो वै तेऽनपजय्यमजयन् । अनपजय्यꣳ ह वै जयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । विश्वेभ्यो देवेभ्यः स्वाहाऽषाढाभ्यः स्वाहा । अनपजय्याय स्वाहा जित्यै स्वाहेति ॥ ३। १। ५। ५॥
४७ ब्रह्म वा अकामयत । ब्रह्मलोकमभि जयेयमिति । तदेतं ब्रह्मणेऽभिजिते चरुं निरवपत् । ततो वै तद्ब्रह्मलोकमभ्यजयत् । ब्रह्मलोकꣳ ह वा अभिजयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । ब्रह्मणे स्वाहाऽभिजिते स्वाहा

। ब्रह्मलोकाय स्वाहाऽभिजित्यै स्वाहेति ॥ ३। १। ५। ६॥
४८ विष्णुर्वा अकामयत । पुण्यग्ग् श्लोकꣳ शृण्वीय । न मा पापी कीर्तिरागच्छेदिति । स एतं विष्णवे श्रोणायै पुरोडाशं त्रिकपालं निरवपत् । ततो वै स पुण्यग्ग् श्लोकमशृणुत । नैनं पापी कीर्तिरागच्छत् । पुण्यꣳह वै श्लोकꣳ शृणुते । नैनं पापी कीर्तिरागच्छति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । विष्णवे स्वाहा श्रोणायै स्वाहा । श्लोकाय स्वाहा श्रुताय स्वाहेति ॥ ३। १। ५। ७॥
४९ वसवो वा अकामयन्त । अग्रं देवतानां परीयामेति । त एतं वसुभ्यः श्रविष्ठाभ्यः पुरोडाशमष्टाकपालं निरवपन्न् । ततो वै तेऽग्रं देवतानां पर्यायन्न् । अग्रꣳह वै समानानां पर्येति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । वसुभ्यः स्वाहा श्रविष्ठाभ्यः स्वाहा । अग्राय स्वाहा परीत्यै स्वाहेति ॥ ३। १। ५। ८॥
५० इन्द्रो वा अकामयत । दृढोऽशिथिलः स्यामिति । स एतं वरुणाय शतभिषजे भेषजेभ्यः पुरोडाशं दशकपालं निरवपत्कृष्णानां व्रीहीणाम् । ततो वै स दृढोऽशिथिलोऽभवत् । दृढो ह वा अशिथिलो भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । वरुणाय स्वाहा शतभिषजे स्वाहा । भेषजेभ्यः स्वाहेति ॥ ३। १। ५। ९॥
५१ अजो वा एकपादकामयत । तेजस्वी ब्रह्मवर्चसी स्यामिति । स एतमजायैकपदे प्रोष्ठपदेभ्यश्चरुं निरवपत् । ततो वै स तेजस्वी ब्रह्मवर्चस्यभवत् । तेजस्वी ह वै ब्रह्मवर्चसी भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अजायैकपदे स्वाहा प्रोष्ठपदेभ्यः स्वाहा । तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहेति ॥ ३। १। ५। १०॥
५२ अहिर्वै बुध्नियोऽकामयत । इमां प्रतिष्ठां विन्देयेति । स एतमहये बुध्नियाय प्रोष्ठपदेभ्यः पुरोडाशं भूमिकपालं निरवपत् । ततो वै स इमां प्रतिष्ठामविन्दत । इमाꣳ ह वै प्रतिष्ठां विन्दते । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्यः स्वाहा । प्रतिष्ठायै स्वाहेति ॥ ३। १। ५। ११॥
५३ पूषा वा अकामयत । पशुमान्थ्स्यामिति । स एतं पूष्णे रेवत्यै चरुं निरवपत् । ततो वै स पशुमानभवत् । पशुमान् ह वै भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । पूष्णे स्वाहा रेवत्यै स्वाहा । पशुभ्यः स्वाहेति ॥ ३। १। ५। १२॥
५४ अश्विनौ वा अकामयेताम् । श्रोत्रस्विनावबधिरौ स्यावेति । तावेतमश्विभ्यामश्वयुग्भ्यां

पुरोडाशं द्विकपालं निरवपताम् । ततो वै तौ श्रोत्रस्विनावबधिरावभवताम् । श्रोत्रस्वी ह वा अबधिरो भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अश्विभ्याग् स्वाहाऽश्वयुग्भ्याग् स्वाहा । श्रोत्राय स्वाहा श्रुत्यै स्वाहेति ॥ ३। १। ५। १३॥

५५ यमो वा अकामयत । पितृणाꣳ राज्यमभिजयेयमिति । स एतं यमायापभरणीभ्यश्चरुं निरवपत् । ततो वै स पितृणाꣳ राज्यमभ्यजयत् । समानानाꣳ ह वै राज्यमभिजयति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । यमाय स्वाहाऽपभरणीभ्यः स्वाहा । राज्याय स्वाहाऽभिजित्यै स्वाहेति ॥ ३। १। ५। १४॥

५६ अथैतदमावास्याया आज्यं निर्वपति । कामो वा अमावास्या । काम आज्यम् । कामेनैव कामꣳ समर्धयति । क्षिप्रमेनꣳ स काम उपनमति । येन कामेन यजते । सोऽत्र जुहोति । अमावास्यायै स्वाहा कामाय स्वाहाऽगत्यै स्वाहेति ॥ ३। १। ५। १५॥

५७ चन्द्रमा वा अकामयत । अहोरात्रानर्धमासान् मासानृतून्थ्संवथ्सरमाप्त्वा । चन्द्रमसः सायुज्यꣳ सलोकतामाप्नुयामिति । स एतं चन्द्रमसे प्रतीदृश्यायै पुरोडाशं पञ्चदशकपालं निरवपत् । ततो वै सोऽहोरात्रानर्ध मासान्मासानृतून्थ्संवथ्सरमाप्त्वा । चन्द्रमसः सायुज्यꣳ सलोकतामाप्नोत् । अहोरात्रान् ह वा अर्ध मासान्मासानृतून्थ्संवथ्सरमाप्त्वा । चन्द्रमसः सायुज्यꣳ सलोकतामाप्नोति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । चन्द्रमसे स्वाहा प्रतीदृश्यायै स्वाहा । अहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा । मासेभ्यः स्वाहार्तुभ्यः स्वाहा । संवथ्सराय स्वाहेति ॥ ३। १। ६। १॥

५८ अहोरात्रे वा अकामयेताम् । अत्यहोरात्रे मुच्येवहि । न नावहोरात्रे आप्नुयातामिति । ते एतमहोरात्राभ्यां चरुं निरवपताम् । द्वयानां व्रीहीणाम् । शुक्लानां च कृष्णानां च । सवात्योर्दुग्धे । श्वेतायै च कृष्णायै च । ततो वै ते अत्यहोरात्रे अमुच्येते । नैने अहोरात्रे आप्नुताम् । अति ह वा अहोरात्रे मुच्यते । नैनमहोरात्रे आप्नुतः । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अह्ने स्वाहा रात्रियै स्वाहा । अतिमुक्त्यै स्वाहेति ॥ ३। १। ६। २॥

५९ उषा वा अकामयत । प्रियाऽऽदित्यस्य सुभगा स्यामिति । सैतमुषसे चरुं निरवपत् । ततो वै सा प्रियाऽऽदित्यस्य सुभगाऽभवत् । प्रियो ह वै समानानाꣳ सुभगो भवति

। य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । उषसे स्वाहा व्युष्ट्यै स्वाहा । व्यूषुष्यै स्वाहा व्युच्छन्त्यै स्वाहा । व्युष्टायै स्वाहेति ॥ ३। १। ६। ३॥

६० अथैतस्मै नक्षत्राय चरुं निर्वपति । यथा त्वं देवानामसि । एवमहं मनुष्याणां भूयासमिति । यथा ह वा एतद्देवानाम् । एवꣳ ह वा एष मनुष्याणां भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । नक्षत्राय स्वाहोदेष्यते स्वाहा । उद्यते स्वाहोदिताय स्वाहा । हरसे स्वाहा भरसे स्वाहा । भ्राजसे स्वाहा तेजसे स्वाहा । तपसे स्वाहा ब्रह्मवर्चसाय स्वाहेति ॥ ३। १। ६। ४॥

६१ सूऱ्यो वा अकामयत । नक्षत्राणां प्रतिष्ठा स्यामिति । स एतꣳ सूर्याय नक्षत्रेभ्यश्चरुं निरवपत् । ततो वै स नक्षत्राणां प्रतिष्ठाऽभवत् । प्रतिष्ठा ह वै समानानां भवति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । सूर्याय स्वाहा नक्षत्रेभ्यः स्वाहा । प्रतिष्ठायै स्वाहेति ॥ ३। १। ६। ५॥

६२ अथैतमदित्यै चरुं निर्वपति । इयं वा अदितिः । अस्यामेव प्रतितिष्ठति । सोऽत्र जुहोति । अदित्यै स्वाहा प्रतिष्ठायै स्वाहेति ॥ ३। १। ६। ६॥

६३ अथैतं विष्णवे चरुं निर्वपति । यज्ञो वै विष्णुः । यज्ञ एवान्ततः प्रतितिष्ठति । सोऽत्र जुहोति । विष्णवे स्वाहा यज्ञाय स्वाहा । प्रतिष्ठायै स्वाहेति ॥ ३। १। ६। ७॥

अग्निः पंचदश प्रजापतिः षोडश सोम एकादश रुद्रो दशर्क्षैकादश बृहस्पतिर्दश देवासुरा नव पितर एकादशार्यमा भगो दशदश सविता चतुर्दश त्वष्टा वायुरिंद्राग्नी दश दशाथैतत्पौर्णमास्या अष्टौ पंचदश ॥ मित्र इन्द्रः प्रजापतिर्दशदशाप एकादश विश्वे ब्रह्म दशदश विष्णुस्त्रयोदश वसव इन्द्रोऽजोऽहिर्वै बुध्नियः पूषाऽश्विनौ यमो दशदशाथैतदमावास्याया अष्टौ पञ्चदश । चन्द्रमाः पञ्चदशाहोरात्रे सप्तदशोषा एकादशाथैतस्मै नक्षत्राय त्रयोदश सूऱ्यो दशाथैतमदित्यै पञ्चाथैतं विष्णवे षट्थ्सप्त । सविताऽऽशूनां व्रीहिणामिन्द्रो महाव्रीहीणामिन्द्रः कृष्णानां व्रीहीणामहोरात्रे द्वयानां व्रीहीणाम् । पितरः षट्कपालꣳ सविता द्वादशकपालमिंद्राग्नी एकादशकपालमिंद्र एकादशकपालमिन्द्रो दशकपालं विष्णुस्त्रि कपालमहिर्भूमि कपालमश्विनौ द्विकपालं चन्द्रमाः पञ्चदश कपालमग्निस्त्वष्टा वसवोऽष्टाकपालमन्यत्र चरुम् । रुद्रोऽर्यमा पूषा पशुमान्थ्स्याꣳ सोमो रुद्रो बृहस्पतिः पयसि वायुः पयः सोमो वायुरिंद्राग्नी मित्र इन्द्र आपो ब्रह्म यमोऽभिजित्यै त्वष्टा प्रजापतिः प्रजायै पौर्णमास्या अमावास्याया आगत्यै

विश्वे जित्या अश्विनौ श्रुत्यै ॥ ब्रह्मतदेतं विष्णुः स एतं वायुः स एतदापस्ताः ॥ पितरो विश्वे वसवोऽकामयन्तमेति त एतं निरवपन् । आपो कामयंतमेति ता एतन्निरवपन् । इंद्राग्नी अश्विनावकामयेतां वेति तावेतन्निरवपताम् । अहोरात्रे वा अकामयेतामिति ते एतं निरवपताम् । अन्यत्राकामयतमिति स एतं निरवपत् । इन्द्राग्नी श्रेष्ठमिन्द्रो ज्यैष्ठमिन्द्रो दृढः । अहिः सूर्योऽदित्यै विष्णवे प्रतिष्ठायै । सोमो यमः समानानाम् । अग्निर्नोरीरिषन्नन्यत्र रीरिषः । हविषा विदुषो य उ चैनदेवं वेद यजते चिनुते य उ चैनमेवं वेद ॥

अग्निर्न ऋध्यास्म नवो नवोऽग्निर्मित्रश्चंद्रमाः षट् ॥

अग्निर्नस्तन्नो वायुरहिर्बुध्निय ऋक्षा वा इयमथैतत्पौर्णमास्या अजो वा एकपाथ्सूर्यस्त्रिषष्टिः ॥

अग्निर्नः पातु प्रतिष्ठायै स्वाहेति ॥

## तृतीयाष्टके द्वितीयः प्रपाठकः २

१ तृतीयस्यामितो दिवि सोम आसीत् । तं गायत्र्याऽहरत् । तस्य पर्णमच्छिद्यत । तत्पर्णोऽभवत् । तत्पर्णस्य पर्णत्वम् । ब्रह्म वै पर्णः । यत्पर्णशाखया वथ्सानपाकरोति । ब्रह्मणैवैनानपाकरोति । गायत्रो वै पर्णः । गायत्राः पशवः ॥ ३। २। १। १॥

२ तस्मात्त्रीणि त्रीणि पर्णस्य पलाशानि । त्रिपदा गायत्री । यत्पर्णशाखया गाः प्रार्पयति । स्वयैवैना देवतया प्रार्पयति । यं कामयेतापशुः स्यादिति । अपर्णां तस्मै शुष्काग्रामाहरेत् । अपशुरेव भवति । यं कामयेत पशुमान्थ्स्यादिति । बहुपर्णां तस्मै बहुशाखामाहरेत् । पशुमन्तमेवैनं करोति ॥ ३। २। १। २॥

३ यत्प्राचीमाहरेत् । देवलोकमभिजयेत् । यदुदीचीं मनुष्यलोकम् । प्राचीमुदीचीमाहरति । उभयोर्लोकयोरभिजित्यै । इषे त्वोर्जे त्वेत्याह । इषमेवोर्जं यजमाने दधाति । वायवः स्थेत्याह । वायुर्वा अन्तरिक्षस्याध्यक्षाः । अन्तरिक्षदेवत्याः खलु वै पशवः ॥ ३। २। १। ३॥

४ वायव एवैनान्परिददाति । प्र वा एनानेतदाकरोति । यदाह । वायवः स्थेत्युपायवः स्थेत्याह । यजमानायैव पशूनुपह्वयते । देवो वः सविता प्रार्पयत्वित्याह प्रसूत्यै । श्रेष्ठतमाय कर्मण इत्याह । यज्ञो हि श्रेष्ठतमं कर्म । तस्मादेवमाह । आप्यायध्वमघ्निया देवभागमित्याह ॥ ३। २। १। ४॥

५ वथ्सेभ्यश्च वा एताः पुरा मनुष्येभ्यश्चाप्यायन्त । देवेभ्य एवैना इन्द्रायाप्याययति ।

ऊर्जस्वतीः पयस्वतीरित्याह । ऊर्जꣳ हि पयः संभरन्ति । प्रजावतीरनमीवा अयक्ष्मा इत्याह प्रजात्यै । मा वः स्तेन ईशत माऽघशꣳस इत्याह गुप्त्यै । रुद्रस्य हेतिः परि वो वृणक्त्वित्याह । रुद्रादेवैनास्त्रायते । ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरित्याह । ध्रुवा एवास्मिन्बह्वीः करोति ॥ ३। २। १। ५॥

६ यजमानस्य पशून्पाहीत्याह । पशूनां गोपीथाय । तस्माथ्सायं पशव उपसमावर्तन्ते । अनधः सादयति । गर्भाणां धृत्या अप्रपादाय । तस्माद्गर्भाः प्रजानामप्रपादुकाः । उपरीव निदधाति । उपरीव हि सुवर्गो लोकः । सुवर्गस्य लोकस्य समष्ट्यै ॥ ३। २। १। ६॥

पशवः करोति पशवो देवभागमित्याह करोति नव च ॥ १॥

७ देवस्य त्वा सवितुः प्रसव इत्यश्वपर्शुमादत्ते प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । यो वा ओषधीः पर्वशो वेद । नैनाः स हिनस्ति । प्रजापतिर्वा ओषधीः पर्वशो वेद । स एना न हिनस्ति । अश्वपर्श्वा बर्हिरच्छैति । प्राजापत्यो वा अश्वः सयोनित्वाय ॥ ३। २। २। १॥

८ ओषधीनामहिꣳसायै । यज्ञस्य घोषदसीत्याह । यजमान एव रयिं दधाति । प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इत्याह । रक्षसामपहत्यै । प्रेयमगाद्धिषणा बर्हिरच्छेत्याह । विद्या वै धिषणा । विद्ययैवैनदच्छैति । मनुना कृता स्वधया वितष्टेत्याह । मानवी हि पर्शुः स्वधा कृता ॥ ३। २। २। २॥

९ त आवहन्ति कवयः पुरस्तादित्याह । शुश्रुवाꣳसो वै कवयः । यज्ञः पुरस्तात् । मुखत एव यज्ञमारभते । अथो यदेतदुक्त्वा यतः कुतश्चाहरति । तत्प्राच्या एव दिशो भवति । देवेभ्यो जुष्टमिह बर्हिरासद इत्याह । बर्हिषः समृद्ध्यै । कर्मणोऽनपराधाय । देवानां परिषूतमसीत्याह ॥ ३। २। २। ३॥

१० यद्वा इदं किंच । तद्देवानां परिषूतम् । अथो यथा वस्यसे प्रतिप्रोच्याहेदं करिष्यामीति । एवमेव तदध्वर्युर्देवेभ्यः प्रतिप्रोच्य बर्हिर्दाति । आत्मनोऽहिꣳसायै । यावतः स्तम्बान्परिदिशेत् । यत्तेषामुच्छिꣳष्यात् । अति तद्यज्ञस्य रेचयेत् । एकꣳ स्तम्बं परिदिशेत् । तꣳ सर्वं दायात् ॥ ३। २। २। ४॥

११ यज्ञस्यानतिरेकाय । वर्षवृद्धमसीत्याह । वर्षवृद्धा वा ओषधयः । देव बर्हिरित्याह । देवेभ्य एवैनत्करोति । मा त्वाऽन्वङ्मा तिर्यगित्याहाहिꣳसायै । पर्व ते राध्यासमित्याहर्द्ध्यै । आच्छेत्ता ते मारिषमित्याह । नास्यात्मनो मीयते । य एवं वेद ॥ ३। २। २। ५॥

१२ देव बर्हिः शतवल्शं विरोहेत्याह । प्रजा वै बर्हिः । प्रजानां प्रजननाय । सहस्रवल्शा वि वयꣳ रुहेमेत्याह । आशिषमेवैतामाशास्ते । पृथिव्याः संपृचः पाहीत्याह प्रतिष्ठित्यै । अयुङ्गाऽयुङ्गान्मुष्टीन्लुनोति । मिथुनत्वाय प्रजात्यै । सुसंभृता त्वा संभरामीत्याह । ब्रह्मणैवैनथ्संभरति ॥ ३। २। २। ६॥

१३ अदित्यै रास्नाऽसीत्याह । इयं वा अदितिः । अस्या एवैनद्रास्नां करोति । इन्द्राण्यै संनहनमित्याह । इन्द्राणी वा अग्रे देवतानाꣳ समनह्यत । साऽऽर्ध्नोत् । ऋद्ध्यै सन्नह्यति । प्रजा वै बर्हिः । प्रजानामपरावापाय । तस्माथ्स्नावसंतताः प्रजा जायन्ते ॥ ३। २। २। ७॥

१४ पूषा ते ग्रन्थिं ग्रथ्नात्वित्याह । पुष्टिमेव यजमाने दधाति । स ते माऽऽस्थादित्याहाहिꣳसायै । पश्चात्प्राञ्चमुप गूहति । पश्चाद्वै प्राचीनꣳ रेतो धीयते । पश्चादेवास्मै प्राचीनꣳ रेतो दधाति । इन्द्रस्य त्वा बाहुभ्यामुद्यच्छ इत्याह । इन्द्रियमेव यजमाने दधाति । बृहस्पतेर्मूर्ध्ना हरामीत्याह । ब्रह्म वै देवानां बृहस्पतिः ॥ ३। २। २। ८॥

१५ ब्रह्मणैवैनद्धरति । उर्वन्तरिक्षमन्विहीत्याह गत्यै । देवंगममसीत्याह । देवानेवैनद्गमयति । अनधः सादयति । गर्भाणां धृत्या अप्रपादाय । तस्माद्गर्भाः प्रजानामप्रपादुकाः । उपरीव निदधाति । उपरीव हि सुवर्गो लोकः । सुवर्गस्य लोकस्य समष्ट्यै ॥ ३। २। २। ९॥ सयोनित्वाय स्वधाकृताऽसीत्याह दायाद्वेद भरति जायन्ते बृहस्पतिः समष्ट्यै ॥ २॥

१६ पूर्वेद्युरिध्माबर्हिः करोति । यज्ञमेवारभ्य गृहीत्वोपवसति । प्रजापतिर्यज्ञमसृजत । तस्योखे अस्रꣳसेताम् । यज्ञो वै प्रजापतिः । यथ्सांन्नाय्योखे भवतः । यज्ञस्यैव तदुखे उपदधात्यप्रस्रꣳसाय । शुन्धध्वं दैव्याय कर्मणे देवयज्याया इत्याह । देवयज्याया एवैनानि शुन्धति । मातरिश्वनो घर्मोऽसीत्याह ॥ ३। २। ३। १॥

१७ अन्तरिक्षं वै मातरिश्वनो घर्मः । एषां लोकानां विधृत्यै । द्यौरसि पृथिव्यसीत्याह । दिवश्च ह्येषा पृथिव्याश्च संभृता । यदुखा । तस्मादेवमाह । विश्वधाया असि परमेण धाम्नेत्याह । वृष्टिर्वै विश्वधायाः । वृष्टिमेवावरुन्धे । दृꣳहस्व मा ह्वारित्याह धृत्यै ॥ ३। २। ३। २॥

१८ वसूनां पवित्रमसीत्याह । प्राणा वै वसवः । तेषां वा एतद्भागधेयम् । यत्पवित्रम् । तेभ्य एवैनत्करोति । शतधारꣳ सहस्रधारमित्याह । प्राणेष्वेवायुर्दधाति सर्वत्वाय ।

त्रिवृत्पलाश शाखायां दर्भमयं भवति । त्रिवृद्वै प्राणः । त्रिवृतमेव प्राणं मध्यतो यजमाने दधाति ॥ ३। २। ३। ३॥
१९ सौम्यः पर्णः सयोनित्वाय । साक्षात्पवित्रं दर्भाः । प्राख्सायमधिनिदधाति । तत्प्राणापानयो रूपम् । तिर्यक्प्रातः । तद्दर्शस्य रूपम् । दारुश्य२ꣳ ह्येतदहः । अन्नं वै चन्द्रमाः । अन्नं प्राणाः । उभयमेवोपैत्यजामित्वाय ॥ ३। २। ३। ४॥
२० तस्मादयꣳ सर्वतः पवते । हुतः स्तोको हुतो द्रप्स इत्याह प्रतिष्ठित्यै । हविषोऽस्कन्दाय । न हि हुत२ꣳ स्वाहाकृतग्ग् स्कन्दति । दिवि नाको नामाग्निः । तस्य विप्रुषो भागधेयम् । अग्नये बृहते नाकायेत्याह । नाकमेवाग्निं भागधेयेन समर्धयति । स्वाहा द्यावापृथिवीभ्यामित्याह । द्यावापृथिव्योरेवैनत् प्रतिष्ठापयति ॥ ३। २। ३। ५॥
२१ पवित्रवत्यानयति । अपां चैवौषधीनां च रसꣳ सꣳसृजति । अथो ओषधीष्वेव पशून्प्रतिष्ठापयति । अन्वारभ्य वाचं यच्छति । यज्ञस्य धृत्यै । धारयन्नास्ते । धारयन्त इव हि दुहन्ति । कामधुक्ष इत्याहा तृतीयस्यै । त्रय इमे लोकाः । इमानेव लोकान्, यजमानो दुहे ॥ ३। २। ३। ६॥
२२ अमूमिति नाम गृह्णाति । भद्रमेवासां कर्माविष्करोति । सा विश्वायुः सा विश्वव्यचाः सा विश्वकर्मेत्याह । इयं वै विश्वायुः । अन्तरिक्षं विश्वव्यचाः । असौ विश्वकर्मा । इमानेवैताभिर्लोकान्, यथापूर्वं दुहे । अथो यथा प्रदात्रे पुण्यमाशास्ते । एवमेवैना एतदुपस्तौति । तस्मात्प्रादादित्युन्नीय वन्दमाना उपस्तुवन्तः पशून्दुहन्ति ॥ ३। २। ३। ७॥
२३ बहु दुग्धीन्द्राय देवेभ्यो हविरिति वाचं विसृजते । यथादेवतमेव प्रसौति । दैव्यस्य च मानुषस्य च व्यावृत्त्यै । त्रिराह । त्रिषत्या हि देवाः । अवाचं यमोऽनन्वारभ्योत्तराः । अपरिमितमेवावरुन्धे । न दारुपात्रेण दुह्यात् । अग्निवद्वै दारुपात्रम् । यद्दारुपात्रेण दुह्यात् ॥ ३। २। ३। ८॥
२४ यातयाम्ना हविषा यजेत । अथो खल्वाहुः । पुरोडाशमुखानि वै हवीꣳषि । नेत इतः पुरोडाशꣳहविषो यामोऽस्तीति । काममेव दारुपात्रेण दुह्यात् । शूद्र एव न दुह्यात् । असतो वा एष संभूतः । यच्छूद्रः । अहविरेव तदित्याहुः । यच्छूद्रो दोग्धीति ॥ ३। २। ३। ९॥
२५ अग्निहोत्रमेव न दुह्याच्छूद्रः । तद्धि नोत्पुनन्ति । यदा खलु वै पवित्रमत्येति । अथ तद्धविरिति । संपृच्यध्वमृतावरीरित्याह । अपां चैवौषधीनां च रसꣳ सꣳसृजति

। तस्मादपां चौषधीनां च रसमुपजीवामः । मन्द्रा धनस्य सातय इत्याह । पुष्टिमेव यजमाने दधाति । सोमेन त्वाऽऽतनच्मीन्द्राय दधीत्याह ॥ ३। २। ३। १०॥
२६ सोममेवैनत्करोति । यो वै सोमं भक्षयित्वा । संवथ्सरꣳ सोमं न पिबति । पुनर्भक्ष्योऽस्य सोमपीथो भवति । सोमः खलु वै सान्नाय्यम् । य एवं विद्वान्थ्सांनाय्यं पिबति । अपुनर्भक्ष्योऽस्य सोमपीथो भवति । न मृन्मयेनापिदध्यात् । यन्मृन्मयेनापिदध्यात् । पितृदेवत्यग्ग् स्यात् ॥ ३। २। ३। ११॥
२७ अयस्पात्रेण वा दारुपात्रेण वाऽपिदधाति । तद्धि सदेवम् । उदन्वद्भवति । आपो वै रक्षोघ्नीः । रक्षसामपहत्यै । अदस्तमसि विष्णवे त्वेत्याह । यज्ञो वै विष्णुः । यज्ञायैवैनददस्तं करोति । विष्णो हव्यꣳ रक्षस्वेत्याह गुप्त्यै । अनधः सादयति । गर्भाणां धृत्या अप्रपादाय । तस्माद्गर्भाः प्रजानामप्रपादुकाः । उपरीव निदधाति । उपरीव हि सुवर्गो लोकः । सुवर्गस्य लोकस्य समष्ट्यै ॥ ३। २। ३। १२॥ असीत्याह धृत्यै यजमाने दधात्यजामित्वाय स्थापयति दुहे दुहन्ति दुह्याद्दोग्धीति दधीत्याह स्याथ्सादयति पञ्च च ॥ ३॥
२८ कर्मणे वां देवेभ्यः शकेयमित्याह शक्त्यै । यज्ञस्य वै संततिमनु प्रजाः पशवो यजमानस्य संतायन्ते । यज्ञस्य विच्छित्तिमनु प्रजाः पशवो यजमानस्य विच्छिद्यन्ते । यज्ञस्य संततिरसि यज्ञस्य त्वा संतत्यै स्तृणामि संतत्यै त्वा यज्ञस्येत्याहवनीयाथ्संतनोति । यजमानस्य प्रजायै पशूनाꣳ संतत्यै । अपः प्रणयति । श्रद्धा वा आपः । श्रद्धामेवारभ्य प्रणीय प्रचरति । अपः प्रणयति । यज्ञो वा आपः ॥ ३। २। ४। १॥
२९ यज्ञमेवारभ्य प्रणीय प्रचरति । अपः प्रणयति । वज्रो वा आपः । वज्रमेव भ्रातृव्येभ्यः प्रहृत्य प्रणीय प्रचरति । अपः प्रणयति । आपो वै रक्षोघ्नीः । रक्षसामपहत्यै । अपः प्रणयति । आपो वै देवानां प्रियं धाम । देवानामेव प्रियं धाम प्रणीय प्रचरति ॥ ३। २। ४। २॥
३० अपः प्रणयति । आपो वै सर्वा देवताः । देवता एवारभ्य प्रणीय प्रचरति । वेषाय त्वेत्याह । वेषाय ह्येनदादत्ते । प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इत्याह । रक्षसामपहत्यै । धूरसीत्याह । एष वै धुर्योऽग्निः । तं यदनुपस्पृश्यातीयात् ॥ ३। २। ४। ३॥
३१ अध्वर्युं च यजमानं च प्रदहेत् । उपस्पृश्यात्येति । अध्वर्योश्च यजमानस्य चाप्रदाहाय । धूर्वतं योऽस्मान्धूर्वति तं धूर्वयं वयं धूर्वाम इत्याह । द्वौ वाव पुरुषौ । यं चैव धूर्वति । यश्चैनं धूर्वति । तावुभौ शुचाऽर्पयति । त्वं देवानामसि सस्नितमं

पप्रितमं जुष्टतमं वह्नितमं देवहूतममित्याह । यथा यजुरेवैतत् ॥ ३। २। ४। ४॥

३२ अह्रुतमसि हविर्धानमित्याहानार्त्यै । दृꣳहस्व मा ह्वारित्याह धृत्यै । मित्रस्य त्वा चक्षुषा प्रेक्ष इत्याह मित्रत्वाय । मा भेर्मा संविक्था मा त्वा हिꣳसिषमित्याहाहिꣳसायै । यद्वै किंच वातो नाभिवाति । तथ्सर्वं वरुणदेवत्यम् । उरुवातायेत्याह । अवारुणमेवैनत्करोति । देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह ॥ ३। २। ४। ५॥

३३ अश्विनौ हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । अग्नये जुष्टं निर्वपामीत्याह । अग्नय एवैनां जुष्टं निर्वपति । त्रिर्यजुषा । त्रय इमे लोकाः । एषां लोकानामाप्त्यै । तूष्णीं चतुर्थम् । अपरिमितमेवावरुन्धे । स एवमेवानु पूर्वꣳ हवीꣳषि निर्वपति ॥

३। २। ४। ६॥

३४ इदं देवानामिदमु नः सहेत्याह व्यावृत्त्यै । स्फात्यै त्वा नारात्या इत्याह गुप्त्यै । तमसीव वा एषोऽन्तश्चरति । यः परीणहि । सुवरभि विख्येषं वैश्वानरं ज्योतिरित्याह । सुवरेवाभि विपश्यति वैश्वानरं ज्योतिः । द्यावापृथिवी हविषि गृहीत उदवेपेताम् । दृꣳहन्तां दुर्या द्यावापृथिव्योरित्याह । गृहाणां द्यावापृथिव्योर्धृत्यै । उर्वन्तरिक्षमन्विहीत्याह गत्यै । अदित्यास्त्वोपस्थे सादयामीत्याह । इयं वा अदितिः । अस्या एवैनदुपस्थे सादयति । अग्ने हव्यꣳ रक्षस्वेत्याह गुप्त्यै ॥ ३। २। ४। ७॥

यज्ञो वा आपो धाम प्रणीय प्रचरत्यतीयादेतद्बाहुभ्यामित्याह हवीꣳषि निर्वपति गत्यै चत्वारि च ॥ ४॥

३५ इन्द्रो वृत्रमहन्न् । सोऽपः । अभ्यम्रियत । तासां यन्मेध्यं यज्ञियꣳ सदेवमासीत् । तदपोदक्रामत् । ते दर्भा अभवन्न् । यद्दर्भैरप उत्पुनाति । या एव मेध्या यज्ञियाः सदेवा आपः । ताभिरेवैना उत्पुनाति । द्वाभ्यामुत्पुनाति ॥ ३। २। ५। १॥

३६ द्विपाद्यजमानः प्रतिष्ठित्यै । देवो वः सवितोत्पुनात्वित्याह । सवितृप्रसूत एवैना उत्पुनाति । अच्छिद्रेण पवित्रेणेत्याह । असौ वा आदित्योऽच्छिद्रं पवित्रम् । तेनैवैना उत्पुनाति । वसोः सूर्यस्य रश्मिभिरित्याह । प्राणा वा आपः । प्राणा वसवः । प्राणा रश्मयः ॥ ३। २। ५। २॥

३७ प्राणैरेव प्राणान्थ्संपृणक्ति । सावित्रियर्चा । सवितृप्रसूतं मे कर्मासदिति । सवितृप्रसूतमेवास्य कर्म भवति । पच्छो गायत्रिया त्रिष्षमृद्धत्वाय । आपो देवीरग्रेपुवो

अग्रे गुव इत्याह । रूपमेवासामेतन्महिमानं व्याचष्टे । अग्र इमं यज्ञं नयताग्रे यज्ञपतिमित्याह । अग्र एव यज्ञं नयन्ति । अग्रे यज्ञपतिम् ॥ ३। २। ५। ३॥
३८ युष्मानिन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्य इत्याह । वृत्रꣳ ह हनिष्यन्निन्द्र आपो वव्रे । आपो हेन्द्रं वव्रिरे । संज्ञामेवासामेतथ्सामानं व्याचष्टे । प्रोक्षिताः स्थेत्याह । तेनापः प्रोक्षिताः । अग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्यामित्याह । यथादेवतमेवैनान्प्रोक्षति । त्रिः प्रोक्षति । त्र्यावृद्धि यज्ञः ॥
३। २। ५। ४॥
३९ अथो रक्षसामपहत्यै । शुन्धध्वं दैव्याय कर्मणे देवयज्याया इत्याह । देवयज्याया एवैनानि शुन्धति । त्रिः प्रोक्षति । त्र्यावृद्धि यज्ञः । अथो मेध्यत्वाय । अवधूतꣳ रक्षोऽवधूता अरातय इत्याह । रक्षसामपहत्यै । अदित्यास्त्वगसीत्याह । इयं वा अदितिः ॥ ३। २। ५। ५॥
४० अस्या एवैनत्त्वचं करोति । प्रति त्वा पृथिवी वेत्त्वित्याह प्रतिष्ठित्यै । पुरस्तात्प्रतीचीन ग्रीवमुत्तरलोमोप स्तृणाति मेध्यत्वाय । तस्मात्पुरस्तात्प्रत्यञ्चः पशवो मेधमुपतिष्ठन्ते । तस्मात्प्रजा मृगं ग्राहुकाः । यज्ञो देवेभ्यो निलायत । कृष्णो रूपं कृत्वा । यत्कृष्णाजिने हविरध्यवहन्ति । यज्ञादेव तद्यज्ञं प्रयुङ्क्ते । हविषोऽस्कन्दाय ॥ ३। २। ५। ६॥
४१ अधिषवणमसि वानस्पत्यमित्याह । अधिषवणमेवैनत्करोति । प्रति त्वाऽदित्यास्त्वग्वेत्त्वित्याह सयत्वाय । अग्नेस्तनूरसीत्याह । अग्नेर्वा एषा तनूः । यदोषधयः । वाचो विसर्जनमित्याह । यदा हि प्रजा ओषधीनामश्नन्ति । अथ वाचं विसृजन्ते । देववीतये त्वा गृह्णामीत्याह ॥ ३। २। ५। ७॥
४२ देवताभिरेवैनथ्समर्धयति । अद्रिरसि वानस्पत्य इत्याह । ग्रावाणमेवैनत्करोति । स इदं देवेभ्यो हव्यꣳ सुशमि शमिष्वेत्याह शान्त्यै । हविष्कृदेहीत्याह । य एव देवानाꣳ हविष्कृतः । तान्ह्वयति । त्रिर्ह्वयति । त्रिषत्या हि देवाः । इषमा वदोर्जमा वदेत्याह ॥
३। २। ५। ८॥
४३ इषमेवोर्जं यजमाने दधाति । द्युमद्वदत वयꣳ संघातं जेष्मेत्याह भ्रातृव्याभिभूत्यै । मनोः श्रद्धादेवस्य यजमानस्यासुरघ्नी वाक् । यज्ञायुधेषु प्रविष्टाऽऽसीत् । तेऽसुरा यावन्तो यज्ञायुधानामुद्वदतामुपाश्रृण्वन्न् । ते पराभवन्न् । तस्माथ्स्वानां मध्येऽवसाय यजेत । यावन्तोऽस्य भ्रातृव्या यज्ञायुधानामुद्वदतामुपश्रृण्वन्ति । ते पराभवन्ति । उच्चैः समाहन्तवा आह विजित्यै ॥ ३। २। ५। ९॥

४४ वृङ्क्त एषामिन्द्रियं वीर्यम् । श्रेष्ठ एषां भवति । वर्षवृद्धमसि प्रति त्वा
वर्षवृद्धं वेत्त्वित्याह । वर्षवृद्धा वा ओषधयः । वर्षवृद्धा इषीकाः समृद्ध्यै । यज्ञꣳ
रक्षाग्स्यनुप्राविशन्न् । तान्यस्रा पशुभ्यो निरवादयन्त । तुषैरोषधीभ्यः । परापूतꣳ रक्षः
परापूता अरातय इत्याह । रक्षसामपहत्यै ॥ ३। २। ५। १०॥
४५ रक्षसां भागोऽसीत्याह । तुषैरेव रक्षाꣳसि निरवदयते । अप उपस्पृशति मेध्यत्वाय
। वायुर्वो विविनक्त्वित्याह । पवित्रं वै वायुः । पुनात्येवैनान् । अन्तरिक्षादिव वा एते
प्रस्कन्दन्ति । ये शूर्पात् । देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्वित्याह प्रतिष्ठित्यै ।
हविषोऽस्कन्दाय । त्रिष्फली कर्तवा आह । त्र्यावृद्धि यज्ञः । अथो मेध्यत्वाय ॥ ३। २।
५। ११॥ द्वाभ्यामुत्पुनाति रश्मयो नयन्त्यग्रे यज्ञपतिं यज्ञोऽदितिरस्कन्दाय गृह्णामीत्याह
वदेत्याह विजित्या अपहत्या अस्कन्दाय त्रीणि च ॥ ५॥
४६ अवधूतꣳ रक्षोऽवधूता अरातय इत्याह । रक्षसामपहत्यै । अदित्यास्त्वगसीत्याह
। इयं वा अदितिः । अस्या एवैनत्त्वचं करोति । प्रति त्वा पृथिवी वेत्त्वित्याह प्रतिष्ठित्यै
। पुरस्तात्प्रतीचीन ग्रीवमुत्तर लोमोपस्तृणाति मेध्यत्वाय । तस्मात्पुरस्तात्प्रत्यञ्चः पशवो
मेधमुपतिष्ठन्ते । तस्मात्प्रजा मृगं ग्राहुकाः । यज्ञो देवेभ्यो निलायत ॥ ३। २। ६। १॥
४७ कृष्णो रूपं कृत्वा । यत्कृष्णाजिने हविरधि पिनष्टि । यज्ञादेव तद्यज्ञं
प्रयुङ्क्ते । हविषोऽस्कन्दाय । द्यावापृथिवी सहास्ताम् । ते शम्यामात्रमेकमहर्व्यैताꣳ
शम्यामात्रमेकमहः । दिवः स्कम्भनिरसि प्रति त्वाऽदित्यास्त्वग्वेत्त्वित्याह ।
द्यावापृथिव्योर्वीत्यै । धिषणाऽसि पर्वत्या प्रति त्वा दिवः स्कम्भ निर्वेत्त्वित्याह ।
द्यावापृथिव्योर्विधृत्यै ॥ ३। २। ६। २॥
४८ धिषणाऽसि पार्वतेयी प्रति त्वा पर्वतिर्वेत्त्वित्याह । द्यावापृथिव्योर्धृत्यै । देवस्य त्वा
सवितुः प्रसव इत्याह प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू
आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । अधिवपामीत्याह । यथादेवतमेवैनानधिवपति
। धान्यमसि धिनुहि देवानित्याह । एतस्य यजुषो वीर्येण ॥ ३। २। ६। ३॥
४९ यावदेका देवता कामयते यावदेका । तावदाहुतिः प्रथते । न हि तदस्ति ।
यत्तावदेव स्यात् । यावज्जुहोति । प्राणाय त्वाऽपानायत्वेत्याह । प्राणानेव यजमाने
दधाति । दीर्घामनु प्रसितिमायुषे धामित्याह । आयुरेवास्मिन्दधाति । अन्तरिक्षादिव वा
एतानि प्रस्कन्दन्ति । यानि दृषदः । देवो वः सविता हिरण्यपाणिः प्रतिगृह्णात्वित्याह

प्रतिष्ठित्यै । हविषोऽस्कन्दाय । असंवपन्ती पिꣳषाणूनि कुरुतादित्याह मेध्यत्वाय ॥ ३। २। ६। ४॥ निलायत विधृत्यै वीर्येण स्कन्दन्ति चत्वारि च ॥ ६॥

५० धृष्टिरसि ब्रह्म यच्छेत्याह धृत्यै । अपाग्नेऽग्नि मा मादं जहि निष्क्रव्यादꣳ सेधा देवयजं वहेत्याह । य एवामात्क्रव्यात् । तमपहत्य । मेध्येऽग्नौ कपालमुपदधाति । निर्दग्धꣳ रक्षो निर्दग्धा अरातय इत्याह । रक्षाग्स्येव निर्दहति । अग्निवत्युपदधाति । अस्मिन्नेव लोके ज्योतिर्धत्ते । अङ्गारमधि वर्तयति ॥ ३। २। ७। १॥

५१ अन्तरिक्ष एव ज्योतिर्धत्ते । आदित्यमेवामुष्मिं ल्लोके ज्योतिर्धत्ते । ज्योतिष्मन्तोऽस्मा इमे लोका भवन्ति । य एवं वेद । ध्रुवमसि पृथिवीं दृꣳहेत्याह । पृथिवीमेवैतेन दृꣳहति । धर्त्रमस्यन्तरिक्षं दृꣳहेत्याह । अन्तरिक्षमेवैतेन दृꣳहति । धरुणमसि दिवं दृꣳहेत्याह । दिवमेवैतेन दृꣳहति ॥ ३। २। ७। २॥

५२ धर्माऽसि दिशो दृꣳहेत्याह । दिश एवैतेन दृꣳहति । इमानेवैतैर्लोकान्दृꣳहति । दृꣳहन्तेऽस्मा इमे लोकाः प्रजया पशुभिः । य एवं वेद । त्रीण्यग्रे कपालान्युपदधाति । त्रय इमे लोकाः । एषां लोकानामाप्त्यै । एकमग्रे कपालमुपदधाति । एकं वा अग्रे कपालं पुरुषस्य संभवति ॥ ३। २। ७। ३॥

५३ अथ द्वे । अथ त्रीणि । अथ चत्वारि । अथाष्टौ । तस्मादष्टाकपालं पुरुषस्य शिरः । यदेवं कपालान्युपदधाति । यज्ञो वै प्रजापतिः । यज्ञमेव प्रजापतिꣳ स२ꣳस्करोति । आत्मानमेव तथ्स२ꣳस्करोति । तꣳ स२ꣳस्कृतमात्मानम् ॥ ३। २। ७। ४॥

५४ अमुष्मिं ल्लोकेऽनु परैति । यदष्टावुपदधाति । गायत्रिया तथ्संमितम् । यन्नव । त्रिवृता तत् । यद्दश । विराजा तत् । यदेकादश । त्रिष्टुभा तत् । यद्द्वादश ॥ ३। २। ७। ५॥

५५ जगत्या तत् । छन्दःसंमितानि स उपदधत्कपालानि । इमान् लोकाननुपूर्वं दिशो विधृत्यै दृꣳहति । अथायुः प्राणान्प्रजां पशून्, यजमाने दधाति । सजातानस्मा अभितो बहुलान्करोति । चितः स्थेत्याह । यथा यजुरेवैतत् । भृगूणामंगिरसां तपसा तप्यध्वमित्याह । देवतानामेवैनानि तपसा तपति । तानि ततः स२ꣳस्थिते । यानि घर्मे कपालान्युपचिन्वन्ति वेधस इति चतुष्पदयर्चा विमुञ्चति । चतुष्पादः पशवः । पशुष्वेवोपरिष्टात्प्रतितिष्ठति ॥ ३। २। ७। ६॥ वर्तयति दिवमेवैतेन दृꣳहति सम्भवति तꣳ स२ꣳस्कृतमात्मानं द्वादश स२ꣳस्थिते त्रीणि च ॥ ७॥

५६ देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । अश्विनौ

हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । सं वपामीत्याह । यथादेवतमेवैनानि संवपति । समापो अद्भिरग्मत समोषधयो रसेनेत्याह । आपो वा ओषधीर्जिन्वन्ति । ओषधयोऽपो जिन्वन्ति । अन्या वा एतासामन्या जिन्वन्ति ॥ ३। २। ८। १॥

५७ तस्मादेवमाह । सꣳ रेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिः सृज्यध्वमित्याह । आपो वै रेवतीः । पशवो जगतीः । ओषधयो मधुमतीः । आप ओषधीः पशून् । तानेवास्मा एकधा सꣳसृज्य । मधुमतः करोति । अद्भ्यः परि प्रजाताः स्थ समद्भिः पृच्यध्वमिति पर्याप्लावयति । यथा सुवृष्ट इमामनु विसृत्य ॥ ३। २। ८। २॥

५८ आप ओषधीर्महयन्ति । तादृगेव तत् । जनयत्यै त्वा संयौमीत्याह । प्रजा एवैतेन दाधार । अग्नये त्वाऽग्नीषोमाभ्यामित्याह व्यावृत्त्यै । मखस्य शिरोऽसीत्याह । यज्ञो वै मखः । तस्यैतच्छिरः । यत्पुरोडाशः । तस्मादेवमाह ॥ ३। २। ८। ३॥

५९ घर्मोसि विश्वायुरित्याह । विश्वमेवायुर्यजमाने दधाति । उरु प्रथस्वोरु ते यज्ञपतिः प्रथतामित्याह । यजमानमेव प्रजया पशुभिः प्रथयति । त्वचं गृह्णीष्वेत्याह । सर्वमेवैनꣳ सतनुं करोति । अथाप आनीय परिमार्ष्टि । माꣳस एव तत्त्वचं दधाति । तस्मात्त्वचा माꣳसं छन्नम् । घर्मो वा एषोऽशान्तः ॥ ३। २। ८। ४॥

६० अर्धमासेऽर्धमासे प्रवृज्यते । यत्पुरोडाशः । स ईश्वरो यजमानꣳ शुचाऽप्रदहः । पर्यग्नि करोति । पशुमेवैनमकः । शान्त्या अप्रदाहाय । त्रिः पर्यग्नि करोति । त्र्यावृद्धि यज्ञः । अथो रक्षसामपहत्यै । अन्तरितꣳ रक्षोऽन्तरिता अरातय इत्याह ॥ ३। २। ८। ५॥

६१ रक्षसामन्तर्हित्यै । पुरोडाशं वा अधिश्रितꣳ रक्षाग्स्यजिघाꣳसन्न् । दिवि नाको नामाग्नी रक्षोहा । स एवास्माद्रक्षाग्स्यपाहन्न् । देवस्त्वा सविता श्रपयत्वित्याह । सवितृप्रसूत एवैनग्ग् श्रपयति । वर्षिष्ठे अधिनाक इत्याह । रक्षसामपहत्यै । अग्निस्ते तनुवं माऽति धागित्याहानतिदाहाय । अग्ने हव्यꣳ रक्षस्वेत्याह गुप्त्यै ॥ ३। २। ८। ६॥

६२ अविदहन्त श्रपयतेति वाचं विसृजते । यज्ञमेव हवीग्ष्यभिव्याहृत्य प्रतनुते । पुरोरुचमविदाहाय शृत्यै करोति । मस्तिष्को वै पुरोडाशः । तं यन्नाभिवासयेत् । आविर्मस्तिष्कः स्यात् । अभिवासयति । तस्माद्गुहा मस्तिष्कः । भस्मनाऽभिवासयति । तस्मान्माꣳसेनास्थि छन्नम् ॥ ३। २। ८। ७॥

६३ वेदेनाभि वासयति । तस्मात्केशैः शिरश्छन्नम् । अखलतिभावुको भवति । य एवं वेद । पशोर्वै प्रतिमा पुरोडाशः । स नायजुष्कमभिवास्यः । वृथेव स्यात् । ईश्वरा यजमानस्य पशवः प्रमेतोः । सं ब्रह्मणा पृच्यस्वेत्याह । प्राणा वै ब्रह्म ॥ ३। २। ८। ८॥
६४ प्राणाः पशवः । प्राणैरेव पशून्थ्सं पृणक्ति । न प्रमायुका भवन्ति । यजमानो वै पुरोडाशः । प्रजा पशवः पुरीषम् । यदेवमभि वासयति । यजमानमेव प्रजया पशुभिः समर्धयति । देवा वै हविर्भृत्वाऽब्रुवन्न् । कस्मिन्निदं म्रक्ष्यामह इति । सोऽग्निरब्रवीत् ॥ ३। २। ८। ९॥
६५ मयि तनूः संनिधध्वम् । अहं वस्तं जनयिष्यामि । यस्मिन् म्रक्ष्यध्व इति । ते देवा अग्नौ तनूः संन्यदधत । तस्मादाहुः । अग्निः सर्वा देवता इति । सोऽङ्गारेणापः । अभ्यपातयत् । तत एकतोऽजायत । स द्वितीयमभ्यपातयत् ॥ ३। २। ८। १०॥
६६ ततो द्वितोऽजायत । स तृतीयमभ्यपातयत् । ततस्त्रितोऽजायत । यदद्भ्योऽजायन्त । तदाप्यानामाप्यत्वम् । यदात्मभ्योऽजायन्त । तदात्म्यानामात्म्यत्वम् । ते देवा आप्येष्वमृजत । आप्या अमृजत सूर्याभ्युदिते । सूर्याभ्युदितः सूर्याभिनिम्रुक्ते ॥ ३। २। ८। ११॥
६७ सूर्याभिनिम्रुक्तः कुनखिनि । कुनखी श्यावदति । श्यावदन्नग्रदिधिषौ । अग्रदिधिषुः परिवित्ते । परिवित्तो वीरहणि । वीरहा ब्रह्महणि । तद्ब्रह्महणं नात्यच्यवत । अन्तर्वेदि निनयत्यवरुध्यै । उल्मुकेनाभि गृह्णाति शृतत्वाय । शृतकामा इव हि देवाः ॥ ३। २। ८। १२॥ अन्या जिन्वन्त्यनुविसृत्यैवमाहाशान्त आह गुप्त्यै छन्नं ब्रह्माब्रवीद् द्वितीयमभ्यपातयत् सूर्याभिनिम्रुक्ते देवाः ॥ ८॥
६८ देवस्य त्वा सवितुः प्रसव इति स्फ्यमादत्ते प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । आदद इन्द्रस्य बाहुरसि दक्षिण इत्याह । इन्द्रियमेव यजमाने दधाति । सहस्रभृष्टिः शततेजा इत्याह । रूपमेवास्यैतन्महिमानं व्याचष्टे । वायुरसि तिग्मतेजा इत्याह । तेजो वै वायुः ॥ ३। २। ९। १॥
६९ तेज एवास्मिन्दधाति । विषाद्वै नामासुर आसीत् । सोऽबिभेत् । यज्ञेन मा देवा अभिभविष्यन्तीति । स पृथिवीमभ्यवमीत् । साऽमेध्याऽभवत् । अथो यदिन्द्रो वृत्रमहन्न् । तस्य लोहितं पृथिवीमनु व्यधावत् । साऽमेध्याऽभवत् । पृथिवि देव यजनीत्याह ॥ ३। २। ९। २॥

७० मेध्यामेवैनां देवयजनीं करोति । ओषध्यास्ते मूलं मा हिꣳसिषमित्याह । ओषधीनामहिꣳसायै । व्रजं गच्छ गोस्थानमित्याह । छन्दाꣳसि वै व्रजो गोस्थानः । छन्दाग्स्येवास्मै व्रजं गोस्थानं करोति । वर्षतु ते द्यौरित्याह । वृष्टिर्वै द्यौः । वृष्टिमेवावरुन्धे । बधान देव सवितः परमस्यां परावतीत्याह ॥
३। २। ९। ३॥

७१ द्वौ वाव पुरुषौ । यं चैव द्वेष्टि । यश्चैनं द्वेष्टि । तावुभौ बध्नाति परमस्यां परावति शतेन पाशैः । योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगित्याहानिर्मुक्त्यै । अररुर्वै नामासुर आसीत् । स पृथिव्यामुपम्लुप्तोऽशयत् । तं देवा अपहतोऽररुः पृथिव्या इति पृथिव्या अपाघ्नन् । भ्रातृव्यो वा अररुः । अपहतोऽररुः पृथिव्या इति यदाह ॥ ३। २। ९। ४॥

७२ भ्रातृव्यमेव पृथिव्या अपहन्ति । तेऽमन्यन्त । दिवं वा अयमितः पतिष्यतीति । तमररुस्ते दिवं मा स्कानिति दिवः पर्यबाधन्त । भ्रातृव्यो वा अररुः । अररुस्ते दिवं मा स्कानिति यदाह । भ्रातृव्यमेव दिवः परिबाधते । स्तम्बयजुर् हरति । पृथिव्या एव भ्रातृव्यमपहन्ति । द्वितीयꣳ हरति ॥ ३। २। ९। ५॥

७३ अन्तरिक्षादेवैनमपहन्ति । तृतीयꣳ हरति । दिव एवैनमपहन्ति । तूष्णीं चतुर्थꣳ हरति । अपरिमितादेवैनमपहन्ति । असुराणां वा इयमग्र आसीत् । यावदासीनः परापश्यति । तावद्देवानाम् । ते देवा अब्रुवन् । अस्त्वेव नो स्यामपीति ॥ ३। २। ९। ६॥

७४ कयन्नो दास्यथेति । यावथ्स्वयं परिगृह्णीथेति । ते वसवस्त्वेति दक्षिणतः पर्यगृह्णन् । रुद्रास्त्वेति पश्चात् । आदित्यास्त्वेत्युत्तरतः । तेऽग्निना प्राञ्चोऽजयन् । वसुभिर्दक्षिणा । रुद्रैः प्रत्यञ्चः । आदित्यैरुदञ्चः । यस्यैवं विदुषो वेदिं परिगृह्णन्ति ॥ ३। २। ९। ७॥

७५ भवत्यात्मना । पराऽस्य भ्रातृव्यो भवति । देवस्य सवितुः सव इत्याह प्रसूत्यै । कर्म कृण्वन्ति वेधस इत्याह । इषितꣳ हि कर्म क्रियते । पृथिव्यै मेध्यं चामेध्यं च व्युदक्रामताम् । प्राचीनमुदीचीनं मेध्यम् । प्रतीचीनं दक्षिणाऽमेध्यम् । प्राचीमुदीचीं प्रवणां करोति । मेध्यामेवैनां देवयजनीं करोति ॥ ३। २। ९। ८॥

७६ प्राञ्चौ वेद्यꣳसावुन्नयति । आहवनीयस्य परिगृहीत्यै । प्रतिची श्रोणी । गार्हपत्यस्य परिगृहीत्यै । अथो मिथुनत्वाय । उद्धन्ति । यदेवास्या अमेध्यम् । तदपहन्ति । उद्धन्ति । तस्मादोषधयः पराभवन्ति ॥ ३। २। ९। ९॥

७७ मूलं छिनत्ति । भ्रातृव्यस्यैव मूलं छिनत्ति । मूलं वा अतितिष्ठद्रक्षाग्स्यनूत्पिपते । यद्बस्तेन छिन्द्यात् । कुनखिनीः प्रजाः स्युः । स्फ्येन छिनत्ति । वज्रो वै स्फ्यः । वज्रेणैव यज्ञाद्रक्षाग्स्यपहन्ति । पितृदेवत्याऽतिखाता । इयतीं खनति ॥ ३। २। ९। १०॥
७८ प्रजापतिना यज्ञमुखेन संमिताम् । वेदिर्देवेभ्यो निलायत । तां चतुरङ्गुलेऽन्वविन्दन् । तस्माच्चतुरङ्गुलं खेया । चतुरङ्गुलं खनति । चतुरङ्गुले ह्योषधयः प्रतितिष्ठन्ति । आप्रतिष्ठायै खनति । यजमानमेव प्रतिष्ठां गमयति । दक्षिणतो वर्षीयसीं करोति । देवयजनस्यैव रूपमकः ॥ ३। २। ९। ११॥
७९ पुरीषवतीं करोति । प्रजा वै पशवः पुरीषम् । प्रजयैवैनं पशुभिः पुरीषवन्तं करोति । उत्तरं परिग्राहं परिगृह्णाति । एतावती वै पृथिवी । यावती वेदिः । तस्या एतावत एव भ्रातृव्यं निर्भज्य । आत्मन उत्तरं परिग्राहं परिगृह्णाति । ऋतमस्यृत सदनमस्यृत श्रीरसीत्याह । यथायजुरेवैतत् ॥ ३। २। ९। १२॥
८० क्रूरमिव वा एतत्करोति । यद्वेदिं करोति । धा असि स्वधा असीति योयुप्यते शान्त्यै । उर्वी चासि वस्वी चासीत्याह । उर्वीमेवैनां वस्वीं करोति । पुरा क्रूरस्य विसृपो विरफ्शिन्नित्याह मेध्यत्वाय । उदादाय पृथिवीं जीरदानुर्यामैरयश्चन्द्रमसि स्वधाभिरित्याह । यदेवास्या अमेध्यम् । तदपहत्य । मेध्यां देवयजनीं कृत्वा ॥ ३। २। ९। १३॥
८१ यददश्चन्द्रमसि मेध्यम् । तदस्यामेरयति । तां धीरासो अनुदृश्य यजन्त इत्याहानुख्यात्यै । प्रोक्षणीरासादय । इध्माबर्हिरुपसादय । स्रुवं च स्रुचश्च संमृड्ढि । पत्नीँ संनह्य । आज्येनोदेहीत्याहानुपूर्वतायै । प्रोक्षणीरासादयति । आपो वै रक्षोघ्नीः ॥
३। २। ९। १४॥
८२ रक्षसामपहत्यै । स्फ्यस्य वर्त्मन्थ्सादयति । यज्ञस्य संतत्यै । उवाच हासितो दैवलः । एतावतीर्वा अमुष्मिं ल्लोक आप आसन्न् । यावतीः प्रोक्षणीरिति । तस्माद्बह्वीरासाद्याः । स्फ्यमुदस्यन्न् । यं द्विष्यात्तं ध्यायेत् । शुचैवैनमर्पयति ॥ ३। २। ९। १५॥ वै वायुराह परावतीत्याहाह द्वितीयँ हरतीति परिगृह्णन्ति देवयजनीं करोति भवन्ति खनत्यकरेतत्कृत्वा रक्षोघ्नीरर्पयति ॥ ९॥
८३ वज्रो वै स्फ्यः । यदन्वञ्चं धारयेत् । वज्रेऽध्वर्युः, क्षण्वीत । पुरस्तात्तिर्यञ्चं धारयति । वज्रो वै स्फ्यः । वज्रेणैव यज्ञस्य दक्षिणतो रक्षाग्स्यपहन्ति । अग्निभ्यां प्राचश्च प्रतीचश्च ।

स्फ्येनोदीचश्चाधराचश्च । स्फ्येन वा एष वज्रेणास्यै पाप्मानं भ्रातृव्यमपहत्य । उत्करेऽधि प्रवृश्चति ॥ ३। २। १०। १॥
८४ यथोपधाय वृश्चन्त्येवम् । हस्ताववनेनिक्ते । आत्मानमेव पवयते । स्फ्यं प्रक्षालयति मेध्यत्वाय । अथो पाप्मन एव भ्रातृव्यस्य न्यङ्गं छिनत्ति । इध्माबर्हिरुपसादयति युक्त्यै । यज्ञस्य मिथुनत्वाय । अथो पुरोरुचमेवैतां दधाति । उत्तरस्य कर्मणोऽनुख्यात्यै । न पुरस्तात्प्रत्यगुपसादयेत् ॥ ३। २। १०। २॥
८५ यत्पुरस्तात्प्रत्यगुपसादयेत् । अन्यत्राऽऽहुतिपथादिध्मं प्रतिपादयेत् । प्रजा वै बर्हिः । अपराध्नुयाद्बर्हिषा प्रजानां प्रजननम् । पश्चात्प्रागुपसादयति । आहुतिपथेनेध्मं प्रतिपादयति । संप्रत्येव बर्हिषा प्रजानां प्रजननमुपैति । दक्षिणमिध्मम् । उत्तरं बर्हिः । आत्मा वा इध्मः । प्रजा बर्हिः । प्रजा ह्यात्मन उत्तरतरा तीर्थे । ततो मेधमुपनीय । यथादेवतमेवैनत्प्रतिष्ठापयति । प्रतितिष्ठति प्रजया पशुभिर्यजमानः ॥ ३। २। १०। ३॥
वृश्चति सादयेदिध्मः पञ्च च ॥ १०॥
तृतीयस्यां देवस्याश्वपर्शुं यो वै पूर्वेद्युः कर्मणे वामिन्द्रो वृत्रमहन्थ्सोऽपोवधूतं धृष्टिर्देवस्येत्याह संवपामि देवस्य स्फ्यमाददे वज्रो वै स्फ्यो दश ॥ १०॥
तृतीयस्यां यज्ञस्यानतिरेकाय पवित्रवत्यध्वर्युं चाधिषवणमस्यन्तरिक्ष एव रक्षसामन्तर्हित्यै द्वौ वाव पुरुषौ यददश्चन्द्रमसि मेध्यं पञ्चाशीतिः ॥ ८५॥
तृतीयस्यां यजमानः ॥

## तृतीयाष्टके तृतीयः प्रपाठकः ३

१ प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातय इत्याह । रक्षसामपहत्यै । अग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामीत्याह मेध्यत्वाय । स्रुचः संमार्ष्टि । स्रुवमग्रे । पुमाꣳसमेवाभ्यः सꣳश्यति मिथुनत्वाय । अथ जुहूम् । अथोपभृतम् । अथ ध्रुवाम् । असौ वै जुहूः ॥ ३। ३। १। १॥
२ अन्तरिक्षमुपभृत् । पृथिवी ध्रुवा । इमे वै लोकाः स्रुचः । वृष्टिः संमार्जनानि । वृष्टिर्वा इमान् लोकाननुपूर्वं कल्पयति । ते ततः क्लृप्ताः समेधन्ते । समेधन्तेऽस्मा इमे लोकाः प्रजया पशुभिः । य एवं वेद । यदि कामयेत वर्षुकः पर्जन्यः स्यादिति । अग्रतः संमृज्यात् ॥ ३। ३। १। २॥
३ वृष्टिमेव नियच्छति । अवाचीनाग्रा हि वृष्टिः । यदि कामयेतावर्षुकः स्यादिति । मूलतः संमृज्यात् । वृष्टिमेवोद्यच्छति । तदु वा आहुः । अग्रत एवोपरिष्टाथ्संमृज्यात् ।

मूलतोऽधस्तात् । तदनुपूर्वं कल्पते । वर्षुको भवतीति ॥ ३। ३। १। ३॥
४ प्राचीमभ्याकारम् । अग्नेरन्तरतः । एवमिव ह्यन्नमद्यते । अथो अग्राद्वा ओषधीनामूर्जं प्रजा उपजीवन्ति । ऊर्ज एवान्नाद्यस्यावरुध्यै । अधस्तात्प्रतीचीम् । दण्डमुत्तमतः । मूलेन मूलं प्रतिष्ठित्यै । तस्मादरत्नौ प्राञ्च्युपरिष्टाल्लोमानि । प्रत्यञ्च्यधस्तात् ॥ ३। ३। १। ४॥
५ स्रुग्घ्येषा । प्राणो वै स्रुवः । जुहूर्दक्षिणो हस्तः । उपभृत्सव्यः । आत्मा ध्रुवा । अन्नꣳ संमार्जनानि । मुखतो वै प्राणोऽपानो भूत्वा । आत्मानमन्नं प्रविश्य । बाह्यतस्तनुवꣳ शुभयति । तस्माथ्स्रुवमेवाग्रे संमार्ष्टि । मुखतो हि प्राणोऽपानो भूत्वा । आत्मानमन्नमाविशति । तौ प्राणापानौ । अव्यर्धुकः प्राणापानाभ्यां भवति । य एवं वेद ॥ ३। ३। १। ५॥ जुहूर्मृज्याद्ध्रुवतीति प्रत्यञ्च्यधस्तान्मार्ष्टि पञ्च च ॥ १॥
६ दिवः शिल्पमवततम् । पृथिव्याः ककुभि श्रितम् । तेन वयꣳ सहस्रवल्शेन । सपत्नं नाशयामसि स्वाहेति स्रुख्संमार्जनान्यग्नौ प्रहरति । आपो वै दर्भाः । रूपमेवैषामेतन्महिमानं व्याचष्टे । अनुष्टुभर्चा । आनुष्टुभः प्रजापतिः । प्राजापत्यो वेदः । वेदस्याग्रग्ग् स्रुख्संमार्जनानि ॥ ३। ३। २। १॥
७ स्वेनैवैनानि छन्दसा । स्वया देवतया समर्धयति । अथो ऋग्वाव योषा । दर्भो वृषा । तन्मिथुनम् । मिथुनमेवास्य तद्यज्ञे करोति प्रजननाय । प्रजायते प्रजया पशुभिर्यजमानः । तान्येके वृथैवापास्यन्ति । तत्तथा न कार्यम् । आरब्धस्य यज्ञियस्य कर्मणः सः विदोहः ॥ ३। ३। २। २॥
८ यद्येनानि पशवोऽभितिष्ठेयुः । न तत्पशुभ्यः कम् । अद्भिर्मार्जयित्वोत्करे न्यस्येत् । यद्वै यज्ञियस्य कर्मणोऽन्यत्राहुतीभ्यः संतिष्ठते । उत्करो वाव तस्य प्रतिष्ठा । एताꣳ हि तस्मै प्रतिष्ठां देवाः समभरन् । यदद्भिर्मार्जयति । तेन शान्तम् । यदुत्करे न्यस्यति । प्रतिष्ठामेवैनानि तद्गमयति ॥ ३। ३। २। ३॥
९ प्रतितिष्ठति प्रजया पशुभिर्यजमानः । अथो स्तम्बस्य वा एतद्रूपम् । यथ्स्रुख्संमार्जनानि । स्तम्बशो वा ओषधयः । तासां जरत्कक्षे पशवो न रमन्ते । अप्रियो ह्येषां जरत्कक्षः । यावदप्रियो ह वै जरत्कक्षः पशूनाम् । तावदप्रियः पशूनां भवति । यस्यैतान्यन्यत्राग्नेर्दधति । नवदाव्यासु वा ओषधीषु पशवो रमन्ते ॥ ३। ३। २। ४॥
१० नवदावो ह्येषां प्रियः । यावत्प्रियो ह वै नवदावः पशूनाम् । तावत्प्रियः पशूनां भवति

। यस्यैतान्यग्नौ प्रहरन्ति । तस्मादेतान्यग्नावेव प्रहरेत् । यतरस्मिन्थ्संमृज्यात् । पशूनां धृत्यै । यो भूतानामधिपतिः । रुद्रस्तन्तिचरो वृषा । पशूनस्माकं मा हिꣳसीः । एतदस्तु हुतं तव स्वाहेत्यग्निसंमार्जनान्यग्नौ प्रहरति । एषा वा एतेषां योनिः । एषा प्रतिष्ठा । स्वामेवैनानि योनिम् । स्वां प्रतिष्ठां गमयति । प्रतितिष्ठति प्रजया पशुभिर्यजमानः ॥ ३। ३। २। ५॥ वेदस्याग्रग्ग् स्रुख्संमार्जनानि विदोहो गमयति पशवो रमन्ते हिꣳसीष्षड्व ॥ २॥

११ अयज्ञो वा एषः । योऽपत्नीकः । न प्रजाः प्रजायेरन् । पत्न्यन्वास्ते । यज्ञमेवाकः । प्रजानां प्रजननाय । यत्तिष्ठन्ती संनह्येत । प्रियं ज्ञातिꣳ रुन्ध्यात् । आसीना संनह्यते । आसीना ह्येषा वीर्यं करोति ॥ ३। ३। ३। १॥

१२ यत्पश्चात्प्राच्यन्वासीत । अनया समदं दधीत । देवानां पत्निया समदं दधीत । देशाद्दक्षिणत उदीच्यन्वास्ते । आत्मनो गोपीथाय । आशासाना सौमनसमित्याह । मेध्यामेवैनां केवलीं कृत्वा । आशिषा समर्धयति । अग्नेरनुव्रता भूत्वा संनह्ये सुकृताय कमित्याह । एतद्वै पत्नियै व्रतोपनयनम् ॥ ३। ३। ३। २॥

१३ तेनैवैनां व्रतमुपनयति । तस्मादाहुः । यश्चैवं वेद यश्च न । योक्त्रमेव युते । यमन्वास्ते । तस्यामुष्मिं ल्लोके भवतीति योक्त्रेण । यद्योक्त्रम् । स योगः । यदास्ते । स क्षेमः ॥ ३। ३। ३। ३॥

१४ योगक्षेमस्य क्लृप्त्यै । युक्तं क्रियाता आशीःकामे युज्याता इति । आशिषः समृद्ध्यै । ग्रन्थिं ग्रथ्नाति । आशिष एवास्यां परिगृह्णाति । पुमान् वै ग्रन्थिः । स्त्री पत्नी । तन्मिथुनम् । मिथुनमेवास्य तद्यज्ञे करोति प्रजननाय । प्रजायते प्रजया पशुभिर्यजमानः ॥ ३। ३। ३। ४॥

१५ अथो अर्धो वा एष आत्मनः । यत्पत्नी । यज्ञस्य धृत्या अशिथिलं भावाय । सुप्रजसस्त्वा वयꣳ सुपत्नीरुपसेदिमेत्याह । यज्ञमेव तन्मिथुनी करोति । ऊनेऽतिरिक्तं धीयाता इति प्रजात्यै । महीनां पयोऽस्योषधीनाꣳ रस इत्याह । रूपमेवास्यैतन्महिमानं व्याचष्टे । तस्य तेऽक्षीयमाणस्य निर्वपामि देवयज्याया इत्याह । आशिषमेवैतामाशास्ते ॥ ३। ३। ३। ५॥ करोति व्रतोपनयनं क्षेमो यजमानः शास्ते ॥ ३॥

१६ घृतं च वै मधु च प्रजापतिरासीत् । यतो मध्वासीत् । ततः प्रजा असृजत । तस्मान्मधुषि प्रजननमिवास्ति । तस्मान्मधुषा न प्रचरन्ति । यातयाम हि । आज्येन प्रचरन्ति । यज्ञो वा आज्यम् । यज्ञेनैव यज्ञं प्रचरन्त्ययातयामत्वाय । पत्न्यवेक्षते ॥ ३।

३। ४। १॥
१७ मिथुनत्वाय प्रजात्यै । यद्वै पत्नी यज्ञस्य करोति । मिथुनं तत् । अथो पत्निया एवैष यज्ञस्यान्वारम्भोऽनवच्छित्त्यै । अमेध्यं वा एतत्करोति । यत्पत्न्यवेक्षते । गार्हपत्येऽधिश्रयति मेध्यत्वाय । आहवनीयमभ्युद्द्रवति । यज्ञस्य सन्तत्यै । तेजोऽसि तेजोऽनु प्रेहीत्याह ॥ ३। ३। ४। २॥
१८ तेजो वा अग्निः । तेज आज्यम् । तेजसैव तेजः समर्धयति । अग्निस्ते तेजो मा विनैदित्याहाहि ँसायै । स्फ्यस्य वर्त्मन्थ्सादयति । यज्ञस्य सन्तत्यै । अग्नेर्जिह्वाऽसि सुभूर्देवानामित्याह । यथायजुरेवैतत् । धाम्ने धाम्ने देवेभ्यो यजुषे यजुषे भवेत्याह । आशिषमेवैतामाशास्ते ॥ ३। ३। ४। ३॥
१९ तद्वा अतः पवित्राभ्यामेवोत्पुनाति । यजमानो वा आज्यम् । प्राणापानौ पवित्रे । यजमान एव प्राणापानौ दधाति । पुनराहारम् । एवमिव हि प्राणापानौ संचरतः । शुक्रमसि ज्योतिरसि तेजोऽसीत्याह । रूपमेवास्यैतन्महिमानं व्याचष्टे । त्रिर्यजुषा । त्रय इमे लोकाः ॥
३। ३। ४। ४॥
२० एषां लोकानामाप्त्यै । त्रिः । त्र्यावृद्धि यज्ञः । अथो मेध्यत्वाय । अथाज्यवतीभ्यामपः । रूपमेवासामेतद्वर्णं दधाति । अपि वा उताहुः । यथा ह वै योषा सुवर्ण ँ हिरण्यं पेशलं बिभ्रती रूपाण्यास्ते । एवमेता एतर्हीति । आपो वै सर्वा देवताः ॥ ३। ३। ४। ५॥
२१ एषा हि विश्वेषां देवानां तनूः । यदाज्यम् । तत्रोभयोर्मीमा ँसा । जामिः स्यात् । यद्यजुषाऽऽज्यं यजुषाऽप उत्पुनीयात् । छन्दसाऽप उत्पुनात्यजामित्वाय । अथो मिथुनत्वाय । सावित्रियर्चा । सवितृप्रसूतं मे कर्मासदिति । सवितृप्रसूतमेवास्य कर्म भवति । पच्छो गायत्रिया त्रिःषमृद्धत्वाय । अद्भिरेवौषधीः संनयति । ओषधीभिः पशून् । पशुभिर्यजमानम् । शुक्रं त्वा शुक्रायां ज्योतिस्त्वा ज्योतिष्यर्चिस्त्वाऽर्चिषीत्याह सर्वत्वाय । पर्याप्त्या अनन्तरायाय ॥ ३। ३। ४। ६॥ ईक्षत आह शास्ते लोका देवता भवति षट्च ॥ ४॥
२२ देवासुराः संयत्ता आसन् । स एतमिन्द्र आज्यस्यावकाशमपश्यत् । तेनावैक्षत । ततो देवा अभवन् । पराऽसुराः । य एवं विद्वानाज्यमवेक्षते । भवत्यात्मना । पराऽस्य भ्रातृव्यो भवति । ब्रह्मवादिनो वदन्ति । यदाज्येनान्यानि हवीग्ष्यभि घारयति ॥ ३। ३।

५। १॥
२३ अथ केनाज्यमिति । सत्येनेति ब्रूयात् । चक्षुर्वै सत्यम् । सत्येनैवैनदभि घारयति । ईश्वरो वा एषोऽन्धो भवितोः । यश्चक्षुषाऽऽज्यमवेक्षते । निमील्यावेक्षेत । दाधारात्मन्नक्षुः । अभ्याज्यं घारयति । आज्यं गृह्णाति ॥ ३। ३। ५। २॥
२४ छन्दाꣳसि वा आज्यम् । छन्दाग्ग्स्येव प्रीणाति । चतुर्जुह्वां गृह्णाति । चतुष्पादः पशवः । पशूनेवावरुन्धे । अष्टावुपभृति । अष्टाक्षरा गायत्री । गायत्रः प्राणः । प्राणमेव पशुषु दधाति । चतुर्ध्रुवायाम् ॥ ३। ३। ५। ३॥
२५ चतुष्पादः पशवः । पशुष्वेवोपरिष्टात्प्रतितिष्ठति । यजमानदेवत्या वै जुहूः । भ्रातृव्यदेवत्योपभृत् । चतुर्जुह्वां गृह्णन्भूयो गृह्णीयात् । अष्टावुपभृति गृह्णन्कनीयः । यजमानायैव भ्रातृव्यमुपस्तिं करोति । गौर्वै स्रुचः । चतुर्जुह्वां गृह्णाति । तस्माच्चतुष्पदी ॥ ३। ३। ५। ४॥
२६ अष्टावुपभृति । तस्मादष्टाशफा । चतुर्ध्रुवायाम् । तस्माच्चतुस्स्तना । गामेव तथ्स२ꣳस्करोति । साऽस्मै स२ꣳस्कृतेषमूर्जं दुहे । यज्जुह्वां गृह्णाति । प्रयाजेभ्यस्तत् । यदुपभृति । प्रयाजानूयाजेभ्यस्तत् । सर्वस्मै वा एतद्यज्ञाय गृह्यते । यद्ध्रुवायामाज्यम् ॥ ३। ३। ५। ५॥ अभिघारयति गृह्णाति ध्रुवायां चतुष्पदी प्रयाजानूयाजेभ्यस्तद्वे च ॥ ५॥
२७ आपो देवीरग्रेपुवो अग्रे गुव इत्याह । रूपमेवासामेतन्महिमानं व्याचष्टे । अग्र इमं यज्ञं नयताग्रे यज्ञपतिमित्याह । अग्र एव यज्ञं नयन्ति । अग्रे यज्ञपतिम् । युष्मानिन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्य इत्याह । वृत्रꣳ ह हनिष्यन्निन्द्र आपो वव्रे । आपो हेन्द्रं वव्रिरे । संज्ञामेवासामेतथ्सामानं व्याचष्टे । प्रोक्षिताः स्थेत्याह ॥ ३। ३। ६। १॥
२८ तेनापः प्रोक्षिताः । अग्निर्देवेभ्यो निलायत । कृष्णो रूपं कृत्वा । स वनस्पतीन्प्राविशत् । कृष्णोऽस्याखरेष्ठोऽग्नये त्वा स्वाहेत्याह । अग्नय एवैनं जुष्टं करोति । अथो अग्नेरेव मेधमवरुन्धे । वेदिरसि बर्हिषे त्वा स्वाहेत्याह । प्रजा वै बर्हिः । पृथिवी वेदिः ॥ ३। ३। ६। २॥
२९ प्रजा एव पृथिव्यां प्रतिष्ठापयति । बर्हिरसि स्रुग्भ्यस्त्वा स्वाहेत्याह । प्रजा वै बर्हिः । यजमानः स्रुचः । यजमानमेव प्रजासु प्रतिष्ठापयति । दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेति बर्हिरासाद्य प्रोक्षति । एभ्य एवैनं लोकेभ्यः प्रोक्षति । अथ ततः

सह स्रुचा पुरस्तात्प्रत्यञ्चं ग्रन्थिं प्रत्युक्षति । प्रजा वै बर्हिः । यथा सूत्यै काल आपः पुरस्ताद्यन्ति ॥ ३। ३। ६। ३॥
३० तादृगेव तत् । स्वधा पितृभ्य इत्याह । स्वधाकारो हि पितृणाम् । ऊर्ग्भव बर्हिषद्भ्य इति दक्षिणायै श्रोणेरोत्तरस्यै निनयति संतत्यै । मासा वै पितरो बर्हिषदः । मासानेव प्रीणाति । मासा वा ओषधीर्वर्धयन्ति । मासाः पचन्ति समृद्ध्यै । अनतिस्कन्दन् ह पर्जन्यो वर्षति । यत्रैतदेवं क्रियते ॥ ३। ३। ६। ४॥
३१ ऊर्जा पृथिवीं गच्छतेत्याह । पृथिव्यामेवोर्जं दधाति । तस्मात्पृथिव्या ऊर्जा भुञ्जते । ग्रन्थिं विस्र२ँसयति । प्रजनयत्येव तत् । ऊर्ध्वं प्राञ्चमुद्गूढं प्रत्यञ्चमायच्छति । तस्मात्प्राचीन२ँ रेतो धीयते । प्रतीचीः प्रजा जायन्ते । विष्णोः स्तूपोऽसीत्याह । यज्ञो वै विष्णुः ॥ ३। ३। ६। ५॥
३२ यज्ञस्य धृत्यै । पुरस्तात्प्रस्तरं गृह्णाति । मुख्यमेवैनं करोति । इयन्तं गृह्णाति । प्रजापतिना यज्ञमुखेन संमितम् । इयन्तं गृह्णाति । यज्ञपरुषा संमितम् । इयन्तं गृह्णाति । एतावद्वै पुरुषे वीर्यम् । वीर्यसंमितम् ॥ ३। ३। ६। ६॥
३३ अपरिमितं गृह्णाति । अपरिमितस्यावरुद्ध्यै । तस्मिन्पवित्रे अपिसृजति । यजमानो वै प्रस्तरः । प्राणापानौ पवित्रे । यजमान एव प्राणापानौ दधाति । ऊर्णाम्रदसं त्वा स्तृणामीत्याह । यथायजुरेवैतत् । स्वासस्थं देवेभ्य इत्याह । देवेभ्य एवैनथ्स्वासस्थं करोति ॥ ३। ३। ६। ७॥
३४ बर्हिः स्तृणाति । प्रजा वै बर्हिः । पृथिवी वेदिः । प्रजा एव पृथिव्यां प्रतिष्ठापयति । अनतिदृश्नर२ँ स्तृणाति । प्रजयैवैनं पशुभिरनतिदृश्नं करोति । धारयन्प्रस्तरं परिधीन्परिदधाति । यजमानो वै प्रस्तरः । यजमान एव तथ्स्वयं परिधीन्परिदधाति । गन्धर्वोऽसि विश्वावसुरित्याह ॥ ३। ३। ६। ८॥
३५ विश्वमेवायुर्यजमाने दधाति । इन्द्रस्य बाहुरसि दक्षिण इत्याह । इन्द्रियमेव यजमाने दधाति । मित्रावरुणौ त्वोत्तरतः परिधत्तामित्याह । प्राणापानौ मित्रावरुणौ । प्राणापानावेवास्मिन्दधाति । सूर्यस्त्वा पुरस्तात् पात्वित्याह । रक्षसामपहत्यै । कस्याश्चिदभिशस्त्या इत्याह । अपरिमितादेवैनं पाति ॥ ३। ३। ६। ९॥
३६ वीतिहोत्रं त्वा कव इत्याह । अग्निमेव होत्रेण समर्धयति । द्युमन्त२ँ समिधीमहीत्याह समिद्ध्यै । अग्ने बृहन्तमध्वर इत्याह वृद्ध्यै । विशो यन्त्रे स्थ इत्याह ।

विशां यत्यै । उदीचीनाग्रे निदधाति प्रतिष्ठित्यै । वसूनाꣳ रुद्राणामादित्यानाꣳ सदसि सीदेत्याह । देवतानामेव सदने प्रस्तरꣳ सादयति । जुहूरसि घृताची नाम्नेत्याह ॥ ३। ३। ६। १०॥
३७ असौ वै जुहूः । अन्तरिक्षमुपभृत् । पृथिवी ध्रुवा । तासामेतदेव प्रियं नाम । यद्घृताचीति । यद्घृताचीत्याह । प्रियेणैवैना नाम्ना सादयति । एता असदन्थ्सुकृतस्य लोक इत्याह । सत्यं वै सुकृतस्य लोकः । सत्य एवैनाः सुकृतस्य लोके सादयति । ता विष्णो पाहीत्याह । यज्ञो वै विष्णुः । यज्ञस्य धृत्यै । पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियमित्याह । यज्ञाय यजमानायात्मने । तेभ्य एवाशिषमाशास्तेऽनार्त्यै ॥ ३। ३। ६। ११॥ स्थेत्याह पृथिवी वेदिर्यन्ति क्रियते विष्णुर्वीर्यसंमितं करोत्याह पाति नाम्नेत्याह लोके सादयति षट्च ॥ ६॥
३८ अग्निना वै होत्रा । देवा असुरानभ्यभवन् । अग्नये समिध्यमानायानुब्रूहीत्याह भ्रातृव्याभिभूत्यै । एकविꣳशतिमिध्मदारूणि भवन्ति । एकविꣳशो वै पुरुषः । पुरुषस्याप्त्यै । पञ्चदशेध्मदारूण्यभ्यादधाति । पञ्चदश वा अर्धमासस्य रात्रयः । अर्धमासशः संवथ्सर आप्यते । त्रीन्परिधीन्परिदधाति ॥ ३। ३। ७। १॥
३९ ऊर्ध्वे समिधावादधाति । अनूयाजेभ्यः समिधमतिशिनष्टि । षट्थ्संपद्यन्ते । षड्वा ऋतवः । ऋतूनेव प्रीणाति । वेदेनोपवाजयति । प्राजापत्यो वै वेदः । प्राजापत्यः प्राणः । यजमान आहवनीयः । यजमान एव प्राणं दधाति ॥ ३। ३। ७। २॥
४० त्रिरुपवाजयति । त्रयो वै प्राणाः । प्राणानेवास्मिन्दधाति । वेदेनोपयत्य स्रुवेण प्राजापत्यमाघारमाघारयति । यज्ञो वै प्रजापतिः । यज्ञमेव प्रजापतिं मुखत आरभते । अथो प्रजापतिः सर्वा देवताः । सर्वा एव देवताः प्रीणाति । अग्निमग्नीत्रिस्त्रिः संमृड्ढीत्याह । त्र्यावृद्धि यज्ञः ॥ ३। ३। ७। ३॥
४१ अथो रक्षसामपहत्यै । परिधीन्थ्संमार्ष्टि । पुनात्येवैनान् । त्रिस्त्रिः संमार्ष्टि । त्र्यावृद्धि यज्ञः । अथो मेध्यत्वाय । अथो एते वै देवाश्वाः । देवाश्वानेव तथ्संमार्ष्टि । सुवर्गस्य लोकस्य समष्ट्यै । आसीनोऽन्यमाघारमाघारयति ॥ ३। ३। ७। ४॥
४२ तिष्ठन्नन्यम् । यथाऽनो वा रथं वा युञ्ज्यात् । एवमेव तदध्वर्युर्यज्ञं युनक्ति । सुवर्गस्य लोकस्याभ्यूढ्यै । वहन्त्येनं ग्राम्याः पशवः । य एवं वेद । भुवनमसि विप्रथस्वेत्याह । यज्ञो वै भुवनम् । यज्ञ एव यजमानं प्रजया पशुभिः प्रथयति । अग्ने यष्टरिदं नम इत्याह ॥ ३। ३। ७। ५॥

४३ अग्निर्वै देवानां यष्टा । य एव देवानां यष्टा । तस्मा एव नमस्करोति । जुह्वेह्यग्निस्त्वा ह्वयति देवयज्याया उपभृदेहि देवस्त्वा सविता ह्वयति देवयज्याया इत्याह । आग्नेयी वै जुहूः । सावित्र्युपभृत् । ताभ्यामेवैने प्रसूत आदत्ते । अग्नाविष्णू मा वामवक्रमिषमित्याह । अग्निः पुरस्तात् । विष्णुर्यज्ञः पश्चात् ॥ ३। ३। ७। ६॥

४४ ताभ्यामेव प्रतिप्रोच्यात्याक्रामति । विजिहाथां मा मा संताप्तमित्याहाहिꣳसायै । लोकं मे लोककृतौ कृणुतमित्याह । आशिषमेवैतामाशास्ते । विष्णोः स्थानमसीत्याह । यज्ञो वै विष्णुः । एतत्खलु वै देवानामपराजितमायतनम् । यद्यज्ञः । देवानामेवापराजित आयतने तिष्ठति । इत इन्द्रो अकृणोद्वीर्याणीत्याह ॥ ३। ३। ७। ७॥

४५ इन्द्रियमेव यजमाने दधाति । समारभ्योर्ध्वो अध्वरो दिविस्पृशमित्याह वृद्ध्यै । आघारमाघार्यमाणमनु समारभ्य । एतस्मिन्काले देवाः सुवर्गं लोकमायन् । साक्षादेव यजमानः सुवर्गं लोकमेति । अथो समृद्धेनैव यज्ञेन यजमानः सुवर्गं लोकमेति । अह्रुतो यज्ञो यज्ञपतेरित्याहानार्त्यै । इन्द्रावान्थ्स्वाहेत्याह । इन्द्रियमेव यजमाने दधाति । बृहद्भा इत्याह ॥ ३। ३। ७। ८॥

४६ सुवर्गो वै लोको बृहद्भाः । सुवर्गस्य लोकस्य समष्ट्यै । यजमानदेवत्या वै जुहूः । भ्रातृव्यदेवत्योपभृत् । प्राण आघारः । यथ्सग्ग्स्पर्शयेत् । भ्रातृव्येऽस्य प्राणं दध्यात् । असग्ग्स्पर्शयन्नत्याक्रामति । यजमान एव प्राणं दधाति । पाहि माऽग्ने दुश्चरितादामा सुचरिते भजेत्याह ॥ ३। ३। ७। ९॥

४७ अग्निर्वाव पवित्रम् । वृजिनमनृतं दुश्चरितम् । ऋजुकर्मꣳ सत्यꣳ सुचरितम् । अग्निरेवैनं वृजिनादनृताद्दुश्चरितात्पाति । ऋजुकर्मे सत्ये सुचरिते भजति । तस्मादेवमाशास्ते । आत्मनो गोपीथाय । शिरो वा एतद्यज्ञस्य । यदाघारः । आत्मा ध्रुवा ॥ ३। ३। ७। १०॥

४८ आघारमाघार्य ध्रुवाꣳ समनक्ति । आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति । द्विः समनक्ति । द्वौ हि प्राणापानौ । तदाहुः । त्रिरेव समञ्ज्यात् । त्रिधातु हि शिर इति । शिर इवैतद्यज्ञस्य । अथो त्रयो वै प्राणाः । प्राणानेवास्मिन्दधाति । मखस्य शिरोऽसि सं ज्योतिषा ज्योतिरङ्क्तामित्याह । ज्योतिरेवास्मा उपरिष्टाद्दधाति । सुवर्गस्य लोकस्यानुख्यात्यै ॥

३। ३। ७। ११॥ परिदधाति प्राणं दधाति हि यज्ञो घारयति नम इत्याह पश्चाद्वीर्याणीत्याह

भा इत्याह भजेत्याह ध्रुवैवास्मिन्दधाति त्रीणि च ॥ ७॥
४९ धिष्णिया वा एते न्युप्यन्ते । यद्ब्रह्मा । यद्धोता । यदध्वर्युः । यदग्नीत् । यद्यजमानः । तान्, यदन्तरेयात् । यजमानस्य प्राणान्थ्संकर्षेत् । प्रमायुकः स्यात् । पुरोडाशमपगृह्य संचरत्यध्वर्युः ॥ ३। ३। ८। १॥
५० यजमानायैव तल्लोकꣳ शिꣳषति । नास्य प्राणान्थ्संकर्षति । न प्रमायुको भवति । पुरस्तात् प्रत्यङ्ङासीनः । इडाया इडामादधाति । हस्त्याꣳ होत्रे । पशवो वा इडा । पशवः पुरुषः । पशुष्वेव पशून् प्रतिष्ठापयति । इडायै वा एषा प्रजातिः ॥ ३। ३। ८। २॥
५१ तां प्रजातिं यजमानोऽनु प्रजायते । द्विरङ्गुलावनक्ति पर्वणोः । द्विपाद्यजमानः प्रतिष्ठित्यै । सकृदुपस्तृणाति । द्विरादधाति । सकृदभिघारयति । चतुः संपद्यते । चत्वारि वै पशोः प्रतिष्ठानानि । यावानेव पशुः । तमुपह्वयते ॥ ३। ३। ८। ३॥
५२ मुखमिव प्रत्युपह्वयेत । संमुखानेव पशूनुपह्वयते । पशवो वा इडा । तस्माथ्साऽन्वारभ्या । अध्वर्युणा च यजमानेन च । उपहूतः पशुमानसानीत्याह । उप ह्येनौ ह्वयते होता । इडायै देवतानामुपहवे । उपहूतः पशुमान्भवति । य एवं वेद ॥ ३। ३। ८। ४॥
५३ यां वै हस्त्यामिडामादधाति । वाचः सा भागधेयम् । यामुपह्वयते । प्राणानाꣳ सा । वाचं चैव प्राणाग्श्चावरुन्धे । अथ वा एतर्ह्युपहूतायामिडायाम् । पुरोडाशस्यैव बर्हिषदो मीमाꣳसा । यजमानं देवा अब्रुवन् । हविर्नो निर्वपेति । नाहमभागो निर्वप्स्यामीत्यब्रवीत् ॥ ३। ३। ८। ५॥
५४ न मयाऽभागयाऽनु वक्ष्यथेति वागब्रवीत् । नाहमभागा पुरोऽनुवाक्या भविष्यामीति पुरोऽनुवाक्या । नाहमभागा याज्या भविष्यामीति याज्या । न मया भागेन वषट्करिष्यथेति वषट्कारः । यद्यजमानभागं निधाय पुरोडाशं बर्हिषदं करोति । तानेव तद्भागिनः करोति । चतुर्धा करोति । चतस्रो दिशः । दिक्ष्वेव प्रतितिष्ठति । बर्हिषदं करोति ॥ ३। ३। ८। ६॥
५५ यजमानो वै पुरोडाशः । प्रजा बर्हिः । यजमानमेव प्रजासु प्रतिष्ठापयति । तस्मादस्थ्नाऽन्याः प्रजाः प्रतितिष्ठन्ति । माꣳसेनान्याः । अथो खल्वाहुः । दक्षिणा वा एता हविर्यज्ञस्यान्तर्वेद्यवरुध्यन्ते । यत्पुरोडाशं बर्हिषदं करोतीति । चतुर्धा करोति । चत्वारो ह्येते हविर्यज्ञस्यर्त्विजः ॥ ३। ३। ८। ७॥

५६ ब्रह्मा होताऽध्वर्युरग्नीत् । तमभिमृशेत् । इदं ब्रह्मणः । इदꣳ होतुः । इदमध्वर्योः ।
इदमग्नीध इति । यथैवादः सौम्येऽध्वरे । आदेशमृत्विग्भ्यो दक्षिणा नीयन्ते । तादृगेव
तत् । अग्नीधे प्रथमाया दधाति ॥ ३। ३। ८। ८॥
५७ अग्निमुखा ह्यृद्धिः । अग्निमुखामेवर्द्धिं यजमान ऋध्नोति । सकृदुपस्तीर्य द्विरादधत्
। उपस्तीर्य द्विरभिघारयति । षद्व् संपद्यन्ते । षड्वा ऋतवः । ऋतूनेव प्रीणाति । वेदेन
ब्रह्मणे ब्रह्मभागं परिहरति । प्राजापत्यो वै वेदः । प्राजापत्यो ब्रह्मा ॥ ३। ३। ८। ९॥
५८ सविता यज्ञस्य प्रसूत्यै । अथ काममन्येन । ततो होत्रे । मध्यं वा एतद्यज्ञस्य ।
यद्धोता । मध्यत एव यज्ञं प्रीणाति । अथाध्वर्यवे । प्रतिष्ठा वा एषा यज्ञस्य । यदध्वर्युः
। तस्माद्धविर्यज्ञस्यैतामेवावृतमनु ॥ ३। ३। ८। १०॥
५९ अन्या दक्षिणा नीयन्ते । यज्ञस्य प्रतिष्ठित्यै । अग्निमग्नीथ्सकृथ्सकृथ्संमृड्ढीत्याह
। पराङिव ह्येतर्हि यज्ञः । इषिता दैव्याहोतार इत्याह । इषितꣳ हि कर्म क्रियते
। भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहीत्याह । आशिषमेवैतामाशास्ते
। स्वगा दैव्याहोतृभ्य इत्याह । यज्ञमेव तथ्स्वगा करोति । स्वस्तिर्मानुषेभ्य इत्याह
। आशिषमेवैतामाशास्ते । शंयोर्ब्रूहीत्याह । शंयुमेव बार्हस्पत्यं भागधेयेन समर्धयति
॥ ३। ३। ८। ११॥ चरत्यध्वर्युः प्रजातिर्ह्वयते वेदाब्रवीद्बर्हिषदं करोत्यृत्विजो दधाति
ब्रह्माऽनुकरोति चत्वारि च ॥ ८॥
६० अथ स्रुचावनुष्टुग्भ्यां वाजवतीभ्यां व्यूहति । प्रतिष्ठा वा अनुष्टुक् । अन्नं वाजः
प्रतिष्ठित्यै । अन्नाद्यस्यावरुध्यै । प्राचीं जुहूमूहति । जातानेव भ्रातृव्यान्प्रणुदते ।
प्रतीचीमुपभृतम् । जनिष्यमाणानेव प्रतिनुदते । स विषूच एवापोह्य सपत्नान् यजमानः
। अस्मिं ल्लोके प्रतितिष्ठति ॥ ३। ३। ९। १॥
६१ द्वाभ्याम् । द्विप्रतिष्ठो हि । वसुभ्यस्त्वा रुद्रेभ्यस्त्वाऽऽदित्येभ्यस्त्वेत्याह ।
यथायजुरेवैतत् । स्रुक्षु प्रस्तरमनक्ति । इमे वै लोकाः स्रुचः । यजमानः प्रस्तरः ।
यजमानमेव तेजसाऽनक्ति । त्रेधाऽनक्ति । त्रय इमे लोकाः ॥ ३। ३। ९। २॥
६२ एभ्य एवैनं लोकेभ्योऽनक्ति । अभिपूर्वमनक्ति । अभिपूर्वमेव यजमानं तेजसाऽनक्ति
। अक्तꣳ रिहाणा इत्याह । तेजो वा आज्यम् । यजमानः प्रस्तरः । यजमानमेव
तेजसाऽनक्ति । वियन्तु वय इत्याह । वय एवैनं कृत्वा । सुवर्गं लोकं गमयति ॥
६३ प्रजां योनिं मा निर्मृक्षमित्याह । प्रजायै गोपीथाय । आप्यायन्तामाप ओषधय

इत्याह । आप एवौषधीराप्याययति मरुतां पृषतयः स्थेत्याह । मरुतो वै वृष्ट्या ईशते । वृष्टिमेवावरुन्धे । दिवं गच्छ ततो नो वृष्टिमेरयेत्याह । वृष्टिर्वै द्यौः । वृष्टिमेवावरुन्धे ॥
३। ३। ९। ४॥
६४ यावद्वा अध्वर्युः प्रस्तरं प्रहरति । तावदस्यायुर्मीयते । आयुष्पा अग्नेऽस्यायुर्मे पाहीत्याह । आयुरेवाऽऽत्मन्धत्ते । यावद्वा अध्वर्युः प्रस्तरं प्रहरति । तावदस्य चक्षुर्मीयते । चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहीत्याह । चक्षुरेवात्मन्धत्ते । ध्रुवाऽसीत्याह प्रतिष्ठित्यै । यं परिधिं पर्यधत्था इत्याह ॥ ३। ३। ९। ५॥
६५ यथायजुरेवैतत् । अग्ने देवपणिभिर्वीयमाण इत्याह । अग्नय एवैनं जुष्टं करोति । तं तं एतमनुजोषं भरामीत्याह । सजातानेवास्मा अनुकान्करोति । नेदेष त्वदपचेतया ता इत्याहानुख्यात्यै । यज्ञस्य पाथ उपसमितमित्याह । भूमानमेवोपैति । परिधीन्प्रहरति । यज्ञस्य समिष्ट्यै ॥ ३। ३। ९। ६॥
६६ स्रुचौ संप्रस्रावयति । यदेव तत्र क्रूरम् । तत्तेन शमयति । जुह्वामुपभृतम् । यजमानदेवत्या वै जुहूः । भ्रातृव्यदेवत्योपभृत् । यजमानायैव भ्रातृव्यमुपस्तिं करोति । सग्ग्स्रावभागाः स्थेत्याह । वसवो वै रुद्रा आदित्याः सग्ग्स्रावभागाः । तेषां तद्भागधेयम् ॥ ३। ३। ९। ७॥
६७ तानेव तेन प्रीणाति । वैश्वदेव्यर्चा । एते हि विश्वे देवाः । त्रिष्टुग्भवति । इन्द्रियं वै त्रिष्टुक् । इन्द्रियमेव यजमाने दधाति । अग्नेर्वामपन्नगृहस्य सदसि सादयामीत्याह । इयं वा अग्निरपन्नगृहः । अस्या एवैने सदने सादयति । सुम्नाय सुम्निनी सुम्ने मा धत्तमित्याह ॥
३। ३। ९। ८॥
६८ प्रजा वै पशवः सुम्नम् । प्रजामेव पशूनात्मन्धत्ते । धुरि धुर्यौ पातमित्याह । जायापत्योर्गोपीथाय । अग्नेऽदब्धायोऽशीततनो इत्याह । यथायजुरेवैतत् । पाहि माऽद्य दिवः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादित्याह । आशिषमेवैतामाशास्ते । अविषं नः पितुं कृणु सुषदा योनिग्ग् स्वाहेतीध्म संवृश्चनान्यन्वाहार्यपचनेऽभ्याधाय फलीकरणहोमं जुहोति । अतिरिक्तानि वा इध्मसंवृश्चनानि ॥ ३। ३। ९। ९॥
६९ अतिरिक्ताः फलीकरणाः । अतिरिक्तमाज्योच्छेषणम् । अतिरिक्त एवातिरिक्तं दधाति

। अथो अतिरिक्तेनैवातिरिक्तमाप्त्वाऽवरुन्धे । वेदिर्देवेभ्यो निलायत । तां वेदेनान्वविन्दन्
। वेदेन वेदिं विविदुः पृथिवीम् । सा पप्रथे पृथिवी पार्थिवानि । गर्भं बिभर्ति भुवनेष्वन्तः
। ततो यज्ञो जायते विश्वदानिरिति पुरस्ताथ्स्तम्बयजुषो वेदेन वेदिꣳ संमार्ष्ट्यनुवित्त्यै
॥ ३। ३। ९। १०॥
७० अथो यद्वेदश्च वेदिश्च भवतः । मिथुनत्वाय प्रजात्यै । प्रजापतेर्वा एतानि
श्मश्रूणि । यद्वेदः । पत्निया उपस्थ आस्यति । मिथुनमेव करोति । विन्दते प्रजाम्
। वेदꣳ होताऽऽहवनीयाथ्स्तृणन्नेति । यज्ञमेव तथ्संतनोत्योत्तरस्मादर्धमासात् । तꣳ
संततमुत्तरेऽर्धमास आलभते ॥ ३। ३। ९। ११॥
७१ तं काले काल आगते यजते । ब्रह्मवादिनो वदन्ति । स त्वा अध्वर्युः स्यात् । यो
यतो यज्ञं प्रयुङ्क्ते । तदेनं प्रतिष्ठापयतीति । वाताद्वा अध्वर्युर्यज्ञं प्रयुङ्क्ते । देवा गातुविदो
गातुं वित्त्वा गातुमितेत्याह । यत एव यज्ञं प्रयुङ्क्ते । तदेनं प्रतिष्ठापयति । प्रतितिष्ठति
प्रजया पशुभिर्यजमानः ॥ ३। ३। ९। १२॥
तिष्ठतीमे लोका गमयति द्यौर्वृष्टिमेवावरुन्धे पर्यधत्था इत्याह समिष्ट्यै भागधेयं
धत्तमित्याह वा इध्मसंवृश्चनान्यनुवित्त्यै लभते यजमानः ॥ ९॥
७२ यो वा अयथादेवतं यज्ञमुपचरति । आ देवताभ्यो वृश्च्यते । पापीयान्भवति ।
योऽयथादेवतम् । न देवताभ्य आवृश्च्यते । वसीयान्भवति । वारुणो वै पाशः । इमं
विष्यामि वरुणस्य पाशमित्याह । वरुणपाशादेवैनां मुञ्चति । सवितृप्रसूतो यथादेवतम्
॥ ३। ३। १०। १॥
७३ न देवताभ्य आवृश्च्यते । वसीयान्भवति । धातुश्च योनौ सुकृतस्य लोक इत्याह
। अग्निर्वै धाता । पुण्यं कर्म सुकृतस्य लोकः । अग्निरेवैनां धाता । पुण्ये कर्मणि
सुकृतस्य लोके दधाति । स्योनं मे सह पत्या करोमीत्याह । आत्मनश्च यजमानस्य
चानार्त्यै संत्वाय । समायुषा सं प्रजयेत्याह ॥ ३। ३। १०। २॥
७४ आशिषमेवैतामाशास्ते पूर्णपात्रे । अन्ततोऽनुष्टुभा । चतुष्पद्वा एतच्छन्दः प्रतिष्ठितं
पत्नियै पूर्णपात्रे भवति । अस्मिं ल्लोके प्रतितिष्ठानीति । अस्मिन्नेव लोके प्रतितिष्ठति ।
अथो वाग्वा अनुष्टुक् । वाङ्मिथुनम् । आपो रेतः प्रजननम् । एतस्माद्वै मिथुनाद्विद्योतमानः
स्तनयन्वर्षति । रेतः सिञ्चन् ॥ ३। ३। १०। ३॥
७५ प्रजाः प्रजनयन् । यद्वै यज्ञस्य ब्रह्मणा युज्यते । ब्रह्मणा वै तस्य विमोकः ।
अद्भिः शान्तिः । विमुक्तं वा एतर्हि योक्त्रं ब्रह्मणा । आदायैनत्पत्नी सहाप उपगृह्णीते

शान्त्यै । अञ्जलौ पूर्णपात्रमानयति । रेत एवास्यां प्रजां दधाति । प्रजया हि मनुष्यः पूर्णः । मुखं विमृष्टे । अवभृथस्यैव रूपं कृत्वोत्तिष्ठति ॥
३। ३। १०। ४॥ सवितृप्रसूतो यथादेवतं प्रजयेत्याह सिञ्चन्मृष्ट एकं च ॥ १०॥
७६ परिवेषो वा एष वनस्पतीनाम् । यदुपवेषः । य एवं वेद । विन्दते परिवेष्टारम् । तमुत्करे । यं देवा मनुष्येषु । उपवेषमधारयन् । ये अस्मदप चेतसः । तानस्मभ्यमिहाकुरु । उपवेषोपविड्ढि नः ॥ ३। ३। ११। १॥
७७ प्रजां पुष्टिमथो धनम् । द्विपदो नश्चतुष्पदः । ध्रुवाननपगान्कुर्विति पुरस्तात्प्रत्यञ्चमुपगूहति । तस्मात्पुरस्तात्प्रत्यञ्चः शूद्रा अवस्यन्ति । स्थविमत उपगूहति । अप्रतिवादिन एवैनान्कुरुते । धृष्टिर्वा उपवेषः । शुचर्तो वज्रो ब्रह्मणा सꣳशितः । योपवेषे शुक् । साऽमुमृच्छतु यं द्विष्म इति ॥ ३। ३। ११। २॥
७८ अथास्मै नामगृह्य प्रहरति । निरमुं नुद ओकसः । सपत्नो यः पृतन्यति । निर्बाध्येन हविषा । इन्द्र एणं पराशरीत् । इहि तिस्रः परावतः । इहि पञ्चजनाँ अति । इहि तिस्रोऽति रोचनायावत् । सूर्यो असद्दिवि । परमां त्वा परावतम् ॥ ३। ३। ११। ३॥
७९ इन्द्रो नयतु वृत्रहा । यतो न पुनरायसि । शश्वतीभ्यः समाभ्य इति । त्रिवृद्वा एष वज्रो ब्रह्मणा सꣳशितः । शुचैवैनं विद्धा । एभ्यो लोकेभ्यो निर्णुद्य । वज्रेण ब्रह्मणा स्तृणुते । हतोऽसाववधिष्मामुमित्याह स्तृत्यै । यं द्विष्यात्तं ध्यायेत् । शुचैवैनमर्पयति ॥ ३। ३। ११। ४॥
नोद्विष्म इति परावतमर्पयति ॥ ११॥
प्रत्युष्टं दिवः शिल्पमयज्ञो घृतं च देवासुराः स एतमिन्द्र आपो देवीरग्निना धिष्णिया अथ स्रुचौ यो वा अयथादेवतं परिवेषो वा एकादश ॥ ११॥
प्रत्युष्टमयज्ञ एषा हि विश्वेषां देवानामूर्जा पृथिवीमथो रक्षसां तां प्रजातिं द्वाभ्यां तं कालेकाले नवसप्ततिः ॥ ७९॥
प्रत्युष्टꣳ शुचैवैनमर्पयति ॥

## तृतीयाष्टके चतुर्थः प्रपाठकः ४

१ ब्रह्मणे ब्राह्मणमालभते । क्षत्राय राजन्यम् । मरुद्भ्यो वैश्यम् । तपसे शूद्रम् । तमसे तस्करम् । नारकाय वीरहणम् । पाप्मने क्लीबम् । आक्रयायायोगूम् । कामाय पुꣳश्चलूम् । अतिक्रुष्टाय मागधम् ॥ ३। ४। १। १॥ ॥ १॥

२ गीताय सूतम् । नृत्ताय शैलूषम् । धर्माय सभाचरम् । नर्माय रेभम् । नरिष्ठायै भीमलम् । हसाय कारिम् । आनन्दाय स्त्रीषखम् । प्रमुदे कुमारीपुत्रम् । मेधायै रथकारम् । धैर्याय तक्षाणम् ॥ ३। ४। २। १॥ ॥ २॥

३ श्रमाय कौलालम् । मायायै कार्मारम् । रूपाय मणिकारम् । शुभे वपम् । शरव्याया इषुकारम् । हेत्यै धन्वकारम् । कर्मणे ज्याकारम् । दिष्टाय रज्जुसर्गम् । मृत्यवे मृगयुम् । अन्तकाय श्वनितम् ॥ ३। ४। ३। १॥ ॥ ३॥

४ सन्धये जारम् । गेहायोपपतिम् । निर्ऋत्यै परिवित्तम् । आर्त्यै परिविविदानम् । अराध्यै दिधिषूपतिम् । पवित्राय भिषजम् । प्रज्ञानाय नक्षत्रदर्शम् । निष्कृत्यै पेशस्कारीम् । बलायोपदाम् । वर्णायानूरुधम् ॥ ३। ४। ४। १॥ ॥ ४॥

५ नदीभ्यः पौञ्जिष्टम् । ऋक्षीकाभ्यो नैषादम् । पुरुषव्याघ्राय दुर्मदम् । प्रयुद्भ्य उन्मत्तम् । गन्धर्वाप्सराभ्यो व्रात्यम् । सर्पदेवजनेभ्योऽप्रतिपदम् । अवेभ्यः कितवम् । इर्यताया अकितवम् । पिशाचेभ्यो बिदलकारम् । यातुधानेभ्यः कण्टककारम् ॥ ३। ४। ५। ५॥ ॥ ५॥

६ उथ्सादेभ्यः कुब्जम् । प्रमुदे वामनम् । द्वार्भ्यः स्रामम् । स्वप्नायान्धम् । अधर्माय बधिरम् । संज्ञानाय स्मरकारीम् । प्रकामोद्यायोपसदम् । आशिक्षायै प्रश्निनम् । उपशिक्षाया अभिप्रश्निनम् । मर्यादायै प्रश्नविवाकम् ॥ ३। ४। ६। ६॥ ॥ ६॥

७ ऋत्यै स्तेनहृदयम् । वैरहत्याय पिशुनम् । विविक्त्यै क्षत्तारम् । औपद्रष्टाय संग्रहीतारम् । बलायानुचरम् । भूम्ने परिष्कन्दम् । प्रियाय प्रियवादिनम् । अरिष्ट्या अश्वसादम् । मेधाय वासः पल्पूलीम् । प्रकामाय रजयित्रीम् ॥ ३। ४। ७। १॥ ॥ ७॥

८ भायै दार्वाहारम् । प्रभाया आग्नेन्धम् । नाकस्य पृष्ठायाभिषेक्तारम् । ब्रध्नस्य विष्टपाय पात्रनिर्णेगम् । देवलोकाय पेशितारम् । मनुष्यलोकाय प्रकरितारम् । सर्वेभ्यो लोकेभ्य उपसेक्तारम् । अवर्त्यै वधायोपमन्थितारम् । सुवर्गाय लोकाय भागदुघम् । वर्षिष्ठाय नाकाय परिवेष्टारम् ॥ ३। ४। ८। १॥ ॥ ८॥

९ अर्मेभ्यो हस्तिपम् । जवायाश्वपम् । पुष्ट्यै गोपालम् । तेजसेऽजपालम् । वीर्यायाविपालम् । इरायै कीनाशम् । कीलालाय सुराकारम् । भद्राय गृहपम् । श्रेयसे वित्तधम् । अध्यक्षायानुक्षत्तारम् ॥ ३। ४। ९। १॥ ॥ ९॥

१० मन्यवेऽयस्तापम् । क्रोधाय निसरम् । शोकायाभिसरम् । उत्कूलविकूलाभ्यां त्रिस्थिनम् । योगाय योक्तारम् । क्षेमाय विमोक्तारम् । वपुषे मानस्कृतम् ।

शीलायाञ्जनीकारम् । निर्ऋत्यै कोशकारीम् । यमायासूम् ॥ ३। ४। १०। १॥ ॥ १०॥

११ यम्यै यमसूम् । अथर्वभ्योऽवतोकाम् । संवथ्सराय पर्यारिणीम् । परिवथ्सरायाविजाताम् । इदावथ्सरायापस्कद्वरीम् । इद्वथ्सरायातीत्वरीम् । वथ्सराय विजर्जराम् । संवथ्सराय पलिक्नीम् । वनाय वनपम् । अन्यतोऽरण्याय दावपम् ॥ ३। ४। ११। १॥ ॥ ११॥

१२ सरोभ्यो धैवरम् । वेशन्ताभ्यो दाशम् । उपस्थावरीभ्यो बैन्दम् । नड्वलाभ्यः शौष्कलम् । पार्याय कैवर्तम् । अवार्याय मार्गारम् । तीर्थेभ्य आन्दम् । विषमेभ्यो मैनालम् । स्वनेभ्यः पर्णकम् । गुहाभ्यः किरातम् । सानुभ्यो जम्भकम् । पर्वतेभ्यः किंपूरुषम् ॥ ३। ४। १२। १॥ ॥ १२॥

१३ प्रतिश्रुत्काया ऋतुलम् । घोषाय भषम् । अन्ताय बहुवादिनम् । अनन्ताय मूकम् । महसे वीणावादम् । क्रोशाय तूणवध्मम् । आक्रन्दाय दुन्दुभ्याघातम् । अवरस्पराय शङ्खध्मम् । ऋभुभ्योऽजिनसन्धायम् । साध्येभ्यश्चर्मम्णम् ॥ ३। ४। १३। १॥ ॥ १३॥

१४ बीभथ्सायै पौल्कसम् । भूत्यै जागरणम् । अभूत्यै स्वपनम् । तुलायै वाणिजम् । वर्णाय हिरण्यकारम् । विश्वेभ्यो देवेभ्यः सिध्मलम् । पश्चाद्दोषाय ग्लावम् । ऋत्यै जनवादिनम् । व्यृद्ध्या अपगल्भम् । सꣳशराय प्रच्छिदम् ॥ ३। ४। १४। १॥ ॥ १४॥

१५ हसाय पुꣳश्चलूमालभते । वीणावादं गणकं गीताय । यादसे शाबुल्याम् । नर्माय भद्रवतीम् । तूष्णवध्मं ग्रामण्यं पाणिसंघातं नृत्ताय । मोदायानुक्रोशकम् । आनन्दाय तलवम् ॥ ३। ४। १५। १॥ ॥ १५॥

१६ अक्षराजाय कितवम् । कृताय सभाविनम् । त्रेताया आदिनवदर्शम् । द्वापराय बहिःसदम् । कलये सभास्थाणुम् । दुष्कृताय चरकाचार्यम् । अध्वने ब्रह्मचारिणम् । पिशाचेभ्यः सैलगम् । पिपासायै गोव्यच्छम् । निर्ऋत्यै गोघातम् । क्षुधे गोविकर्तम् । क्षुत्तृष्णाभ्यां तम् । यो गां विकृन्तन्तं माꣳसं भिक्षमाण उपतिष्ठते ॥ ३। ४। १६। १॥ ॥ १६॥

१७ भूम्यै पीठसर्पिणमालभते । अग्नयेऽꣳसलम् । वायवे चाण्डालम् । अन्तरिक्षाय वꣳशनर्तिनम् । दिवे खलतिम् । सूर्याय हर्यक्षम् । चन्द्रमसे मिर्मिरम् । नक्षत्रेभ्यः किलासम् । अह्ने शुक्लं पिङ्गलम् । रात्रियै कृष्णं पिङ्गाक्षम् ॥ ३। ४। १७। १॥ ॥ १७॥

१८ वाचे पुरुषमालभते । प्राणमपानं व्यानमुदानꣳ समानं तान्, वायवे । सूर्याय चक्षुरालभते । मनश्चन्द्रमसे । दिग्भ्यः श्रोत्रम् । प्रजापतये पुरुषम् ॥ ३। ४। १८। १॥

॥ १८॥
१९ अथैतानरूपेभ्य आलभते । अतिह्रस्वमतिदीर्घम् । अतिकृशमत्यꣳसलम् । अतिशुक्लमतिकृष्णम् । अतिश्लक्ष्णमतिलोमशम् । अतिकिरिटमतिदन्तुरम् । अतिमिर्मिरमतिमेमिषम् । आशायै जामिम् । प्रतीक्षायै कुमारीम् ॥ ३। ४। १९। १॥ ॥ १९॥
ब्रह्मणे गीताय श्रमाय सन्धये नदीभ्य उथ्सादेभ्य ऋत्यैभाया अर्मेभ्यो मन्यवे यम्यै दशदश सरोभ्यो द्वादश प्रतिश्रुत्कायै बीभथ्सायै दशदश हसाय सप्ताख्वं राजाय त्रयोदश भूम्यै दश वाचे षडथ नवैकान्न विꣳशतिः ॥ १९॥
ब्रह्मणे यम्यै नवदश ॥ १९॥
ब्रह्मणे कुमारीम् ॥

## तृतीयाष्टके पञ्चमः प्रपाठकः ५

१ सत्यं प्रपद्ये । ऋतं प्रपद्ये । अमृतं प्रपद्ये । प्रजापतेः प्रियां तनुवमनार्तां प्रपद्ये । इदमहं पञ्चदशेन वज्रेण । द्विषन्तं भ्रातृव्यमवक्रामामि । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः । भूर्भुवः सुवः । हिम् ॥ ३। ५। १। १॥ सत्यं दश ॥ १॥
२ प्र वो वाजा अभिद्यवः । हविष्मन्तो घृताच्या । देवाञ्जिगाति सुम्नयुः । अग्न आयाहि वीतये । गृणानो हव्यदातये । निहोता सथ्सि बर्हिषि । तं त्वा समिद्भिरङ्गिरः । घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य । स नः पृथु श्रवाय्यम् ॥ ३। ५। २। १॥
३ अच्छा देव विवाससि । बृहदग्ने सुवीर्यम् । ईडेन्यो नमस्यस्तिरः । तमाꣳसि दर्शतः । समग्निरिध्यते वृषा । वृषो अग्निः समिध्यते । अश्वो न देववाहनः । तꣳ हविष्मन्त ईडते । वृषणं त्वा वयं वृषन् । वृषाणः समिधीमहि ॥ ३। ५। २। २॥
४ अग्ने दीद्यतं बृहत् । अग्निं दूतं वृणीमहे । होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् । समिध्यमानो अध्वरे । अग्निः पावक ईड्यः । शोचिष्केशस्तमीमहे । समिद्धो अग्न आहुत । देवान्, यक्षि स्वध्वर । त्वꣳ हि हव्यवाडसि । आजुहोत दुवस्यत । अग्निं प्रयत्यध्वरे । वृणीध्वꣳ हव्यवाहनम् । त्वं वरुण उत मित्रो अग्ने । त्वां वर्धन्ति मतिभिर्वसिष्ठाः । त्वे वसु सुषणनानि सन्तु । यूयं पात स्वस्तिभिः सदा नः ॥ ३। ५। २। ३॥ श्रवाय्यमिधीमह्यसि सप्त च ॥ २॥
५ अग्ने महाꣳ असि ब्राह्मण भारत । असावसौ । देवेद्धो मन्विद्धः । ऋषिष्टुतो विप्रानुमदितः । कविशस्तो ब्रह्मसꣳशितो घृताहवनः । प्रणीर्यज्ञानाम् । रथीरध्वराणाम्

। अतूर्तो होता । तूर्णिर्हव्यवाट् । आस्पात्रं जुहूर्देवानाम् ॥ ३। ५। ३। १॥
६ चमसो देवपानः । अराꣳ इवाग्ने नेमिर्देवाग्स्त्वं परिभूरसि । आवह देवान्, यजमानाय । अग्निमग्न आवह । सोममावह । अग्निमावह । प्रजापतिमावह । अग्नीषोमावावह । इन्द्राग्नी आवह । इन्द्रमावह । महेन्द्रमावह । देवाꣳ आज्यपाꣳ आवह । अग्निꣳ होत्रायावह । स्वं महिमानमावह । आ चाग्ने देवान्, वह । सुयजा च यज जातवेदः ॥ ३। ५। ३। २॥ देवानामिन्द्रमावह षट्च ॥ ३॥
७ अग्निर्होता वेत्वग्निः । होत्रं वेत्तु प्रावित्रम् । स्मो वयम् । साधु ते यजमान देवता । घृतवतीमध्वर्यो स्रुचमास्यस्व । देवायुवं विश्ववाराम् । ईडामहै देवाꣳ ईडेऽन्यान् । नमस्याम नमस्यान् । यजाम यज्ञियान् ॥ ३। ५। ४। १॥ अग्निर्होता नव ॥ ४॥
८ समिधो अग्न आज्यस्य वियन्तु । तनूनपादग्न आज्यस्य वेतु । इडो अग्न आज्यस्य वियन्तु । बर्हिरग्न आज्यस्य वेतु । स्वाहाऽग्निम् । स्वाहा सोमम् । स्वाहाऽग्निम् । स्वाहा प्रजापतिम् । स्वाहाग्नीषोमौ । स्वाहेन्द्राग्नी । स्वाहेन्द्रम् । स्वाहा महेन्द्रम् । स्वाहा देवाꣳ आज्यपान् । स्वाहाऽग्निꣳ होत्राज्जुषाणाः । अग्न आज्यस्य वियन्तु ॥ ३। ५। ५। १॥ इन्द्राग्नी पञ्च च ॥ ५॥
९ अग्निर्वृत्राणि जङ्घनत् । द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः । जुषाणो अग्निराज्यस्य वेतु । त्वꣳ सोमासि सत्पतिः । त्वꣳ राजोत वृत्रहा । त्वं भद्रो असिक्रतुः । जुषाणः सोम आज्यस्य हविषो वेतु । अग्निः प्रत्नेन जन्मना । शुम्भानस्तनुवग्ग् स्वाम् । कविर्विप्रेण वावृधे । जुषाणो अग्निराज्यस्य वेतु । सोम गीर्भिष्ट्वा वयम् । वर्धयामो वचोविदः । सुमृडीको न आविश । जुषाणः सोम आज्यस्य हविषो वेतु ॥ ३। ५। ६। १॥ स्वाꣳ षट्च ॥ ६॥
१० अग्निर्मूर्धा दिवः ककुत् । पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति । भुवो यज्ञस्य रजसश्च नेता । यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्धानं दधिषे सुवर्षाम् । जिह्वामग्ने चकृषे हव्यवाहम् । प्रजापते न त्वदेतान्यन्यः । विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु ॥ ३। ५। ७। १॥
११ वय२ꣳ स्याम पतयो रयीणाम् । स वेद पुत्रः पितरꣳ स मातरम् । स सूनुर्भुवथ्स भुवत्पुनर्मघः । स द्यामौर्णोदन्तरिक्षꣳ स सुवः । स विश्वा भुवो अभवथ्स आभवत् । अग्नीषोमा सवेदसा । सहूती वनतं गिरः । सं देवत्रा बभूवथुः । युवमेतानि दिवि

रोचनानि । अग्निश्च सोम सक्रतू अधत्तम् ॥ ३। ५। ७। २॥
१२ युवꣳ सिन्धूꣳ रभिशस्तेरवद्यात् । अग्नीषोमावमुञ्चतं गृभीतान् । इन्द्राग्नी रोचना दिवः । परि वाजेषु भूषथः । तद्वाञ्चेति प्रवीर्यम् । श्नथद्वृत्रमुत सनोति वाजम् । इन्द्रायो अग्नी सहुरी सपर्यात् । इरज्यन्ता वसव्यस्य भूरेः । सहस्तमा सहसा वाजयन्ता । एन्द्र सानसिꣳ रयिम् ॥ ३। ५। ७। ३॥
१३ सजित्वानꣳ सदासहम् । वर्षिष्ठमूतये भर । प्रससाहिषे पुरुहूत शत्रून् । ज्येष्ठस्ते शुष्म इह रातिरस्तु । इन्द्राभर दक्षिणेना वसूनि । पतिः सिन्धूनामसि रेवतीनाम् । महाꣳ इन्द्रो य ओजसा । पर्जन्यो वृष्टिमाꣳ इव । स्तोमैर्वथ्सस्य वावृधे । महाꣳ इन्द्रो नृवदाचर्षणिप्राः ॥ ३। ५। ७। ४॥
१४ उत द्विबर्हा अमिनः सहोभिः । अस्मद्रियग्वावृधे वीर्याय । उरुः पृथुः सुकृतः कर्तृभिर्भूत् । पिप्रीहि देवाꣳ उशतो यविष्ठ । विद्वाꣳ ऋतूꣳ ऋतुपते यजेह । ये दैव्या ऋत्विजस्तेभिरग्ने । त्वꣳ होतॄणामस्या यजिष्ठः । अग्निꣳ स्विष्टकृतम् । अयाडग्निरग्नेः प्रिया धामानि । अयाट्थ्सोमस्य प्रिया धामानि ॥ ३। ५। ७। ५॥
१५ अयाडग्नेः प्रिया धामानि । अयाद्प्रजापतेः प्रिया धामानि । अयाडग्नीषोमयोः प्रिया धामानि । अयाडिन्द्राग्नियोः प्रिया धामानि । अयाडिन्द्रस्य प्रिया धामानि । अयाण्महेन्द्रस्य प्रिया धामानि । अयाड्देवानामाज्यपानां प्रिया धामानि । यक्षदग्नेर्होतुः प्रिया धामानि । यक्षथ्स्वं महिमानम् । आयजतामेज्या इषः । कृणोतु सो अध्वरा जातवेदाः । जुषताꣳ हविः । अग्ने यदद्य विशो अध्वरस्य होतः । पावक शोचे वेष्ट्वꣳ हि यज्वा । ऋता यजासि महिना वियद्भूः । हव्या वह यविष्ठया ते अद्य ॥ ३। ५। ७। ६॥ अस्त्वधत्तꣳ रयिं चर्षणिप्राः सोमस्य प्रिया धामानीषष्ट्व ॥ ७॥
१६ उपहूतꣳ रथन्तरꣳ सह पृथिव्या । उप मा रथन्तरꣳ सह पृथिव्या ह्वयताम् । उपहूतं वामदेव्यꣳ सहान्तरिक्षेण । उप मा वामदेव्यꣳ सहान्तरिक्षेण ह्वयताम् । उपहूतं बृहथ्सह दिवा । उप मा बृहथ्सह दिवा ह्वयताम् । उपहूताः सप्त होत्राः । उप मा सप्तहोत्रा ह्वयन्ताम् । उपहूता धेनुः सहर्षभा । उप मा धेनुः सहर्षभा ह्वयताम् ॥
३। ५। ८। १॥
१७ उपहूतो भक्षः सखा । उप मा भक्षः सखा ह्वयताम् । उपहूता ४ हो । इडोपहूता । उपहूतेडा । उपो अस्माꣳ इडा ह्वयताम् । इडोपहूता । उपहूतेडा । मानवी घृतपदी मैत्रावरुणी । ब्रह्मदेवकृतमुपहूतम् ॥ ३। ५। ८। २॥

१८ दैव्या अध्वर्यव उपहूताः । उपहूता मनुष्याः । य इमं यज्ञमवान् । ये यज्ञपतिं वर्धान् । उपहूते द्यावापृथिवी । पूर्वजे ऋतावरी । देवी देवपुत्रे । उपहूतोऽयं यजमानः । उत्तरस्यां देवयज्यायामुपहूतः । भूयसि हविष्करण उपहूतः । दिव्ये धामन्नुपहूतः । इदं मे देवा हविर्जुषन्तामिति तस्मिन्नुपहूतः । विश्वमस्य प्रियमुपहूतम् । विश्वस्य प्रियस्योपहूतस्योपहूतः ॥ ३। ५। ८। ३॥ सहर्षभा ह्वयतामुपहूतꣳ हविष्करण उपहूतश्चत्वारि च ॥ ८॥

१९ देवं बर्हिः । वसुवने वसुधेयस्य वेतु । देवो नराशꣳसः । वसुवने वसुधेयस्य वेतु । देवो अग्निः स्विष्टकृत् । सुद्रविणा मन्द्रः कविः । सत्यमन्माऽऽयजी होता । होतुर्होतुरायजीयान् । अग्ने यान्देवानयाट् । याꣳ अपिप्रेः । ये ते होत्रे अमत्सत । ताꣳ ससनुषीꣳ होत्रां देवंगमाम् । दिवि देवेषु यज्ञमेरयेमम् । स्विष्टकृच्चाग्ने होताऽभूः । वसुवने वसुधेयस्य नमोवाके वीहि ॥ ३। ५। ९। १॥ अपिप्रे पञ्च च ॥ ९॥

२० इदं द्यावापृथिवी भद्रमभूत् । आर्ध्म सूक्तवाकम् । उत नमोवाकम् । ऋध्यास्म सूक्तोच्यमग्ने । त्वꣳ सूक्तवागसि । उपश्रितो दिवः पृथिव्योः । ओमन्वती तेऽस्मिन्, यज्ञे यजमान द्यावापृथिवी स्ताम् । शङ्गये जीरदानू । अत्रस्नू अप्रवेदे । उरुगव्यूती अभयं कृतौ ॥
३। ५। १०। १॥

२१ वृष्टिद्यावारीत्यापा । शम्भुवौ मयोभुवौ । ऊर्जस्वती च पयस्वती च । सूपचरणा च स्वधिचरणा च । तयोराविदि । अग्निरिदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत । सोम इदꣳ हविरजुषत । अवीवृधत महोज्यायोऽकृत । अग्निरिदꣳ हविरजुषत ॥
३। ५। १०। २॥

२२ अवीवृधत महोज्यायोऽकृत । प्रजापतिरिदꣳ हविरजुषत । अवीवृधत महोज्यायोऽकृत । अग्नीषोमाविदꣳ हविरजुषेताम् । अवीवृधेतां महोज्यायोऽक्राताम् । इन्द्राग्नी इदꣳ हविरजुषेताम् । अवीवृधेतां महो ज्यायोऽक्राताम् । इन्द्र इदꣳ हविरजुषत । अवीवृधत महो ज्यायोऽकृत । महेन्द्र इदꣳ हविरजुषत ॥ ३। ५। १०। ३॥

२३ अवीवृधत महो ज्यायोऽकृत । देवा आज्यपा आज्यमजुषन्त । अवीवृधन्त महोज्यायोऽक्रत । अग्निर्होत्रेणेदꣳ हविरजुषत । अवीवृधत महोज्यायोऽकृत । अस्यामृधद्धोत्रायां देवंगमायाम् । आशास्तेऽयं यजमानोऽसौ । आयुराशास्ते ।

सुप्रजास्त्वमाशास्ते । सजातवनस्यामाशास्ते ॥ ३। ५। १०। ४॥
२४ उत्तरां देवयज्यामाशास्ते । भूयो हविष्करणमाशास्ते । दिव्यं धामाशास्ते । विश्वं प्रियमाशास्ते । यदनेन हविषाऽऽशास्ते । तदश्यात्तदृध्यात् । तदस्मै देवा रासन्ताम् । तदग्निर्देवो देवेभ्यो वनते । वयमग्नेर्मानुषाः । इष्टं च वीतं च । उभे च नो द्यावापृथिवी अꣳहसः स्पाताम् । इह गतिर्वामस्येदं च । नमो देवेभ्यः ॥ ३। ५। १०। ५॥
अभयंकृतावकृताग्निरिदꣳ हविरजुषत महेन्द्र इदꣳ हविरजुषत सजातवनस्यामाशास्ते वीतं च त्रीणि च ॥ १०॥
२५ तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥ ३। ५। ११। १॥ तच्छंयोरष्टौ ॥ ११॥
२६ आप्यायस्व सं ते । इह त्वष्टारमग्रियं तन्नस्तुरीपम् । देवानां पत्नीरुशतीरवन्तु नः । प्रावन्तु नस्तुजये वाजसातये । याः पार्थिवासो या अपामपि व्रते । ता नो देवीः सुहवाः शर्म यच्छत । उतग्ना वियन्तु देवपत्नीः । इन्द्राण्यग्नाय्यश्विनी राट् । आ रोदसी वरुणानी शृणोतु । वियन्तु देवीर्य ऋतुर्जनीनाम् ॥
अग्निर्होता गृहपतिः स राजा । विश्वा वेद जनिमा जातवेदाः । देवानामुत यो मर्त्यानाम् । यजिष्ठः स प्रयजतामृता वा । वयमु त्वा गृहपते जनानाम् । अग्ने अकर्म समिधा बृहन्तम् । अस्थूरिणो गार्हपत्यानि सन्तु । तिग्मेन नस्तेजसा सꣳशिशाधि ॥ ३। ५। १२। १॥
जनीनामष्टौ च ॥ १२॥
२७ उपहूतꣳ रथन्तरꣳ सह पृथिव्या । उप मा रथन्तरꣳ सह पृथिव्या ह्वयताम् । उपहूतं वामदेव्यꣳ सहान्तरिक्षेण । उप मा वामदेव्यꣳ सहान्तरिक्षेण ह्वयताम् । उपहूतं बृहथ्सह दिवा । उप मा बृहथ्सह दिवा ह्वयताम् । उपहूताः सप्तहोत्राः । उप मा सप्तहोत्रा ह्वयन्ताम् । उपहूता धेनुः सहर्षभा । उप मा धेनुः सहर्षभा ह्वयताम् ॥ ३। ५। १३। १॥
२८ उपहूतो भक्षः सखा । उप मा भक्षः सखा ह्वयताम् । उपहूता ४ हो । इडोपहूता । उपहूतेडा । उपो अस्माꣳ इडा ह्वयताम् । इडोपहूता । उपहूतेडा । मानवी घृतपदी मैत्रावरुणी । ब्रह्म देवकृतमुपहूतम् ॥ ३। ५। १३। २॥
२९ दैव्या अध्वर्यव उपहूताः । उपहूता मनुष्याः । य इमं यज्ञमवान् । ये यज्ञपत्नीं

वर्धान् । उपहूते द्यावापृथिवी । पूर्वजे ऋतावरी । देवी देवपुत्रे । उपहूतेयं यजमाना । इन्द्राणीवाविधवा । अदितिरिव सुपुत्रा । उत्तरस्यां देवयज्यायामुपहूता । भूयसि हविष्करण उपहूता । दिव्ये धामन्नुपहूता । इदं मे देवा हविर्जुषन्तामिति तस्मिन्नुपहूता । विश्वमस्याः प्रियमुपहूतम् । विश्वस्य प्रियस्योप हूतस्योपहूता ॥ ३। ५। १३। ३॥
सहर्षभा ह्वयतामुपहूतꣳ सुपुत्रा षट्च ॥ १३॥
सत्यं प्रवोऽग्ने महानग्निर्होता समिधोऽग्निर्वृत्राण्यग्निर्मूर्धोप हूतं देवं बर्हिरिदं द्यावापृथिवी तच्छंयोरा प्यायस्वोपहूतं त्रयोदश ॥ १३॥
सत्यं वय२ꣳ स्याम वृष्टिद्यावा नववि२ꣳशतिः ॥ २९॥
सत्यमुपहूता ॥

## तृतीयाष्टके षष्ठः प्रपाठकः ६

१ अञ्जन्ति त्वामध्वरे देवयन्तः । वनस्पते मधुना दैव्येन । यदूर्ध्वस्तिष्ठाद्द्रविणेह धत्तात् । यद्वा क्षयो मातुरस्या उपस्थे । उच्छ्रयस्व वनस्पते । वर्ष्मन्पृथिव्या अधि । सुमिती मीयमानः । वर्चोधा यज्ञवाहसे । समिद्धस्य श्रयमाणः पुरस्तात् । ब्रह्म वन्वानो अजरꣳ सुवीरम् ॥ ३। ६। १। १॥
२ आरे अस्मदमतिं बाधमानः । उच्छ्रयस्व महते सौभगाय । ऊर्ध्व ऊषुण ऊतये । तिष्ठा देवो न सविता । ऊर्ध्वो वाजस्य सनिता यदञ्जिभिः । वाघद्भिर्विह्वयामहे । ऊर्ध्वो नः पाह्यꣳहसो नि केतुना । विश्वꣳ समत्रिणं दह । कृधी न ऊर्ध्वाञ्च रथाय जीवसे । विदा देवेषु नो दुवः ॥ ३। ६। १। २॥
३ जातो जायते सुदिनत्वे अह्नाम् । स मर्य आ विदथे वर्धमानः । पुनन्ति धीरा अपसो मनीषा । देवया विप्र उदियर्ति वाचम् । युवा सुवासाः परिवीत आगात् । स उ श्रेयान्भवति जायमानः । तं धीरासः कवय उन्नयन्ति । स्वाधियो मनसा देवयन्तः । पृथुपाजा अमर्त्यः । घृतनिर्णिख्स्वाहुतः ॥ ३। ६। १। ३॥
४ अग्निर्यज्ञस्य हव्यवाट् । तꣳ सबाधो यतस्रुचः । इत्था धिया यज्ञवन्तः । आचक्रुरग्निमूतये । त्वं वरुण उत मित्रो अग्ने । त्वां वर्धन्ति मतिभिर्वसिष्ठाः । त्वे वसु सुषणनानि सन्तु । यूयं पात स्वस्तिभिः सदा नः ॥ ३। ६। १। ४॥ सुवीरं दुवः स्वाहुतोऽष्टौ च ॥ १॥
५ होता यक्षदग्निꣳ समिधा सुषमिधा समिद्धं नाभा पृथिव्याः संगथे वामस्य ।

वर्ष्मन्दिव इडस्पदे वेत्वाज्यस्य होतर्यज । होता यक्षत्तनूनपातमदितेर्गर्भं भुवनस्य गोपाम् । मध्वाऽद्य देवो देवेभ्यो देवयानान्पथो अनक्तु वेत्वाज्यस्य होतर्यज । होता यक्षन्नराशꣳसं नृशस्त्रं नृग्ः प्रणेत्रम् । गोभिर्वपावान्थ्स्याद्वीरैः शक्तीवात्रथैः प्रथमयावा हिरण्यैश्चन्द्री वेत्वाज्यस्य होतर्यज । होता यक्षदग्निमिड ईडितो देवो देवाꣳ आवक्षद्दूतो हव्यवाडमूरः । उपेमं यज्ञमुपेमां देवो देवहूतिमवतु वेत्वाज्यस्य होतर्यज । होता यक्षद्बर्हिः सुष्टरीमोर्णं म्रदा अस्मिन्, यज्ञे वि च प्र च प्रथताग् स्वासस्थं देवेभ्यः । एमेनदद्य वसवो रुद्रा आदित्याः सदन्तु प्रियमिन्द्रस्यास्तु वेत्वाज्यस्य होतर्यज ॥ ३। ६। २। १॥

६ होता यक्षद्दुर ऋष्वाः कवष्योऽकोष धावनीरुदाताभिर्जिहतां वि पक्षोभिः श्रयन्ताम् । सुप्रायणा अस्मिन्, यज्ञे विश्रयन्तामृतावृधो वियन्त्वाज्यस्य होतर्यज । होता यक्षदुषासानक्ता बृहती सुपेशसा नृग्ः पतिभ्यो योनिं कृण्वाने । सग्ग्स्मयमाने इन्द्रेण देवैरेदं बर्हिः सीदतां वीतामाज्यस्य होतर्यज । होता यक्षद्दैव्या होतारा मन्द्रा पोतारा कवी प्रचेतसा । स्विष्टमद्यान्यः करदिषा स्वभिगूर्तमन्य ऊर्जा सतवसेमं यज्ञं दिवि देवेषु धत्तां वीतामाज्यस्य होतर्यज । होता यक्षत्तिस्रो देवीरपसामपस्तमा अच्छिद्रमद्येदमपस्तन्वताम् । देवेभ्यो देवीर्देवमपो वियन्त्वाज्यस्य होतर्यज । होता यक्षत्त्वष्टारमचिष्टुमपाकꣳ रेतोधां विश्रवसं यशोधाम् । पुरुरूपमकामकर्शनꣳ सुपोषः पोषैः स्याथ्सुवीरो वीरैर्वेत्वाज्यस्य होतर्यज । होता यक्षद्वनस्पतिमुपावस्रक्षद्धियो जोष्टारꣳ शशमन्नरः । स्वदाथ्स्वधितिर्ऋतुथाऽद्य देवो देवेभ्यो हव्याऽवाड्वेत्वाज्यस्य होतर्यज । होता यक्षदग्निꣳ स्वाहाऽऽज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाग् स्वाहा स्वाहाकृतीनाग् स्वाहा हव्यसूक्तीनाम् । स्वाहा देवाꣳ आज्यपान्थ्स्वाहाऽग्निꣳ होत्राज्जुषाणा अग्न अज्यस्य वियन्तु होतर्यज ॥ ३। ६। २। २॥ प्रियमिन्द्रस्यास्तु वेत्वाज्यस्य होतर्यज सुवीरो वीरैर्वेत्वाज्यस्य होतर्यज चत्वारि च ॥ २॥ अग्निं तनूनपातं नराशꣳसमग्निमिड ईडितो बर्हिर्दुर उषासानक्ता दैव्या तिस्रस्त्वष्टारं वनस्पतिमग्निम् । पञ्च वेत्वेको वियन्तु द्विर्वीतामेको वियन्तु द्विर्वेत्वेको वियन्तु होतर्यज ॥

७ समिद्धो अद्य मनुषो दुरोणे । देवो देवान्, यजसि जातवेदः । आ च वह मित्रमहश्चिकित्वान् । त्वं दूतः कविरसि प्रचेताः । तनूनपात्पथ ऋतस्य यानान् । मध्वा समञ्जन्थ्स्वधया सुजिह्व । मन्मानि धीभिरुत यज्ञमृन्धन् । देवत्रा च कृणुह्यध्वरं नः । नराशꣳसस्य महिमानमेषाम् । उपस्तोषाम यजतस्य यज्ञैः ॥ ३। ६। ३। १॥

८ ते सुक्रतवः शुचयो धियंधाः । स्वदन्तु देवा उभयानि हव्या । आजुह्वान ईड्यो वन्द्यश्च । आयाह्यग्ने वसुभिः सजोषाः । त्वं देवानामसि यह्व होता । स एनान् यक्षीषितो यजीयान् । प्राचीनं बर्हिः प्रदिशा पृथिव्याः । वस्तोरस्या वृज्यते अग्रे अह्नाम् । व्युप्रथते वितरं वरीयः । देवेभ्यो अदितये स्योनम् ॥ ३। ६। ३। २॥

९ व्यचस्वतीरुर्विया विश्रयन्ताम् । पतिभ्यो न जनयः शुम्भमानाः । देवीर्द्वारो बृहतीर्विश्वमिन्वाः । देवेभ्यो भवथ सुप्रायणाः । आ सुष्वयन्ती यजते उपाके । उषासा नक्ता सदतां नि योनौ । दिव्ये योषणे बृहती सुरुक्मे । अधि श्रियꣳ शुक्रपिशं दधाने । दैव्या होतारा प्रथमा सुवाचा । मिमाना यज्ञं मनुषो यजध्यै ॥ ३। ६। ३। ३॥

१० प्रचोदयन्ता विदथेषु कारू । प्राचीनं ज्योतिः प्रदिशा दिशन्ता । आ नो यज्ञं भारती तूयमेतु । इडा मनुष्वदिह चेतयन्ती । तिस्रो देवीर्बर्हिरेद२ꣳ स्योनम् । सरस्वतीः स्वपसः सदन्तु । य इमे द्यावापृथिवी जनित्री । रूपैरपिꣳशद्भुवनानि विश्वा । तमद्य होतरिषितो यजीयान् । देवं त्वष्टारमिह यक्षि विद्वान् ॥ ३। ६। ३। ४॥

११ उपावसृजत्त्मन्या समञ्जन् । देवानां पाथ ऋतुथा हवीꣳषि । वनस्पतिः शमिता देवो अग्निः । स्वदन्तु हव्यं मधुना घृतेन । सद्योजातो व्यमिमीत यज्ञम् । अग्निर्देवानामभवत्पुरोगाः । अस्य होतुः प्रदिश्यृतस्य वाचि । स्वाहाकृतꣳ हविरदन्तु देवाः ॥ ३। ६। ३। ५॥

यज्ञैः स्योनं यजध्यै विद्वानष्टौ च ॥ ३॥

१२ अग्निर्होता नो अध्वरे । वाजी सन्परिणीयते । देवो देवेषु यज्ञियः । परि त्रिविष्ट्यध्वरम् । यात्यग्नी रथीरिव । आ देवेषु प्रयो दधत् । परि वाजपतिः कविः । अग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ ३। ६। ४। १॥ अग्निर्होता नो नव ॥ ४॥

१३ अजैदग्निः । असनद्वाजं नि । देवो देवेभ्यो हव्याऽवाट् । प्राञ्जोभिर् हिन्वानः । धेनाभिः कल्पमानः । यज्ञस्यायुः प्रतिरन् । उपप्रेष्य होतः । हव्या देवेभ्यः ॥ ३। ६। ५। १॥ अजैदष्टौ ॥ ५॥

१४ दैव्याः शमितार उत मनुष्या आरभध्वम् । उपनयत मेध्या दुरः । आशासाना मेधपतिभ्यां मेधम् । प्रास्मा अग्निं भरत । स्तृणीत बर्हिः । अन्वेनं माता मन्यताम् । अनु पिता । अनु भ्राता सगर्भ्यः । अनु सखा सयूथ्यः । उदीचीनाꣳ अस्य पदो निधत्तात् ॥ ३। ६। ६। १॥

१५ सूर्यं चक्षुर्गमयतात् । वातं प्राणमन्ववसृजतात् । दिशः श्रोत्रम् । अन्तरिक्षमसुम् ।

पृथिवीꣳ शरीरम् । एकधाऽस्य त्वचमाच्छ्यतात् । पुरा नाभ्या अपिशसो वपामुत्खिदतात्
। अन्तरेवोष्माणं वारयतात् । श्येनमस्य वक्षः कृणुतात् । प्रशसा बाहू ॥ ३। ६। ६।
२॥
१६ शला दोषणी । कश्यपेवाꣳसा । अच्छिद्रे श्रोणी । कवषोरू स्रेकपर्णाऽष्ठीवन्ता
। षड्विꣳशतिरस्य वङ्क्रयः । ता अनुष्ठोच्यावयतात् । गात्रं गात्रमस्यानूनं कृणुतात् ।
ऊवध्यगूहं पार्थिवं खनतात् । अस्ना रक्षः सꣳसृजतात् । वनिष्ठुमस्य मा राविष्ट ॥ ३।
६। ६। ३॥
१७ उरूकं मन्यमानाः । नेद्वस्तोके तनये । रविता रवच्छमितारः । अध्रिगो शमीध्वम्
। सुशमि शमीध्वम् । शमीध्वमध्रिगो । अध्रिगुश्चापापश्च । उभौ देवानाꣳशमितारौ ।
ताविमं पशुꣳ श्रपयतां प्रविद्वाꣳसौ । यथा यथाऽस्य श्रपणं तथा तथा ॥ ३। ६।
६। ४॥
धत्ताद्बाहू मा राविष्ट तथातथा ॥ ६॥
१८ जुषस्व सप्रथस्तमम् । वचो देवप्सरस्तमम् । हव्या जुह्वान आसनि । इमं नो
यज्ञममृतेषु धेहि । इमा हव्या जातवेदो जुषस्व । स्तोकानामग्ने मेदसो घृतस्य ।
होतः प्राशान प्रथमो निषद्य । घृतवन्तः पावक ते । स्तोकाः श्चोतन्ति मेदसः । स्वधर्मं
देववीतये ॥ ३। ६। ७। १॥
१९ श्रेष्ठं नो धेहि वार्यम् । तुभ्यग्ग् स्तोका घृतश्चुतः । अग्ने विप्राय सन्त्य । ऋषिः
श्रेष्ठः समिध्यसे । यज्ञस्य प्राविता भव । तुभ्यग्ग् श्चोतन्त्यध्रिगो शचीवः । स्तोकासो
अग्ने मेदसो घृतस्य । कविशस्तो बृहता भानुनाऽऽगाः । हव्या जुषस्व मेधिर । ओजिष्ठं
ते मध्यतो मेद उद्भृतम् । प्र ते वयं ददामहे । श्चोतन्ति ते वसो स्तोका अधित्वचि ।
प्रति तान्देवशो विहि ॥ ३। ६। ७। २॥ देववीतय उद्भृतं त्रीणि च ॥ ७॥
२० आ वृत्रहणा वृत्रहभिः शुष्मैः । इन्द्र यातं नमोभिरग्ने अर्वाक् । युवꣳ
राधोभिरकवेभिरिन्द्र । अग्ने अस्मे भवतमुत्तमेभिः । होता यक्षदिन्द्राग्नी । छागस्य
वपाया मेदसः । जुषेताꣳहविः । होतर्यज । वि ह्यख्यन्मनसा वस्य इच्छन् । इन्द्राग्नी
ज्ञास उत वा सजातान् ॥ ३। ६। ८। १॥
२१ नान्या युवत्प्रमतिरस्ति मह्यम् । स वां धियं वाजयन्तीमतक्षम् । होता यक्षदिन्द्राग्नी
। पुरोडाशस्य जुषेताꣳहविः । होतर्यज । त्वामीडते अजिरं दूत्याय । हविष्मन्तः
सदमिन्मानुषासः । यस्य देवैरासदो बर्हिरग्ने । अहान्यस्मै सुदिना भवन्तु । होता

यक्षदग्निम् । पुरोडाशस्य जुषताꣳहविः । होतर्यज ॥ ३। ६। ८। २॥ सजातानग्निं द्वे
च ॥ ८॥
२२ गीर्भिर्विप्रः प्रमतिमिच्छमानः । ईट्टे रयिं यशसं पूर्वभाजम् । इन्द्राग्नी वृत्रहणा
सुवज्रा । प्र णो नव्येभिस्तिरतं देष्णैः । मा च्छेद्म रश्मीꣳरिति नाधमानाः । पितृणाꣳ
शक्तीरनु यच्छमानाः । इन्द्राग्निभ्यां कं वृषणो मदन्ति । ता ह्यद्री धिषणाया उपस्थे
। अग्निꣳ सुदीतिꣳ सुदृशं गृणन्तः । नमस्यामस्त्वेड्यं जातवेदः । त्वां दूतमरतिꣳ
हव्यवाहम् । देवा अकृण्वन्नमृतस्य नाभिम् ॥
३। ६। ९। १॥ जातवेदो द्वे च ॥ ९॥
२३ त्वꣳ ह्यग्ने प्रथमो मनोता । अस्या धियो अभवो दस्म होता । त्वꣳ सीं
वृषन्नकृणोर्दुष्टरीतु । सहो विश्वस्मै सहसे सहध्यै । अधा होता न्यसीदो यजीयान् ।
इडस्पद इषयन्नीड्यः सन् । तं त्वा नरः प्रथमं देवयन्तः । महो राये चितयन्तो अनुग्मन्
। वृतेव यन्तं बहुभिर्वसव्यैः । त्वे रयिं जागृवाꣳसो अनुग्मन् ॥ ३। ६। १०। १॥
२४ रुशन्तमग्निं दर्शतं बृहन्तम् । वपावन्तं विश्वहा दीदिवाꣳसम् । पदं देवस्य नमसा
वियन्तः । श्रवस्यवः श्रव आपन्नमृक्तम् । नामानि चिद्दधिरे यज्ञियानि । भद्रायां ते
रणयन्त संदृष्टौ । त्वां वर्धन्ति क्षितयः पृथिव्याम् । त्वꣳ राय उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः । पिता माता सदमिन्मानुषाणाम् ॥ ३। ६। १०। २॥
२५ स पर्येण्यः स प्रियो विक्ष्वग्निः । होता मन्द्रो निषसादा यजीयान् । तं त्वा वयं
दम आ दीदिवाꣳसम् । उपज्ञु बाधो नमसा सदेम । तं त्वा वयꣳ सुधियो नव्यमग्ने
। सुम्नायव ईमहे देवयन्तः । त्वं विशो अनयो दीद्यानः । दिवो अग्ने बृहता रोचनेन ।
विशां कविं विश्पतिꣳ शश्वतीनाम् । नितोशनं वृषभं चर्षणीनाम् ॥ ३। ६। १०। ३॥
२६ प्रेतीषणिमिषयन्तं पावकम् । राजन्तमग्निं यजतꣳ रयीणाम् । सो अग्न ईजे शशमे
च मर्तः । यस्त आनट् समिधा हव्यदातिम् । य आहुतिं परिवेदा नमोभिः । विश्वेत्स
वामा दधते त्वोतः । अस्मा उ ते महि महे विधेम । नमोभिरग्ने समिधोत हव्यैः । वेदी
सूनो सहसो गीर्भिरुक्थैः । आ ते भद्रायाꣳसुमतौ यतेम ॥ ३। ६। १०। ४॥
२७ आ यस्ततन्थ रोदसी वि भासा । श्रवोभिश्च श्रवस्यस्तरुत्रः । बृहद्भिर्वाजैः
स्थविरेभिरस्मे । रेवद्भिरग्ने वितरं विभाहि । नृवद्वसो सदमिद्धे ह्यस्मे । भूरि तोकाय
तनयाय पश्वः । पूर्वीरिषो बृहतीरारे अघाः । अस्मे भद्रा सौश्रवसानि सन्तु । पुरूण्यग्ने

पुरुधा त्वाया । वसूनि राजन्वसुताते अश्याम् । पुरूणि हि त्वे पुरुवार सन्ति । अग्ने वसु विधते राजनि त्वे ॥ ३। ६। १०। ५॥
जागृवाꣳसो अनुग्मन्मानुषाणां चर्षणीनां यतेमाश्यां द्वे च ॥ १०॥
२८ आभरतꣳ शिक्षतं वज्रबाहू । अस्माꣳ इन्द्राग्नी अवतꣳ शचीभिः । इमे नु ते रश्मयः सूर्यस्य । येभिः सपित्वं पितरो न आयन् । होता यक्षदिन्द्राग्नी । छागस्य हविष आत्तामद्य । मध्यतो मेद उद्भृतम् । पुरा द्वेषोभ्यः । पुरा पौरुषेय्या गृभः । घस्तान्नूनम् ॥ ३। ६। ११। १॥
२९ घासे अज्राणां यवसप्रथमानाम् । सुमत्क्षराणाꣳ शतरुद्रियाणाम् । अग्निष्वात्तानां पीवोपवसनानाम् । पार्श्वतः श्रोणितः शितामत उथ्सादतः । अङ्गादङ्गादवत्तानाम् । करत एवेन्द्राग्नी । जुषेताꣳहविः । होतर्यज । देवेभ्यो वनस्पते हवीꣳषि । हिरण्यपर्ण प्रदिवस्ते अर्थम् ॥ ३। ६। ११। २॥
३० प्रदक्षिणिद्रशनया नियूय । ऋतस्य वक्षि पथिभी रजिष्ठैः । होता यक्षद्वनस्पतिमभि हि । पिष्टतमया रभिष्ठया रशनयाऽऽधित । यत्रेन्द्राग्नियोश्छागस्य हविषः प्रिया धामानि । यत्र वनस्पतेः प्रिया पाथाꣳसि । यत्र देवानामाज्यपानां प्रिया धामानि । यत्राग्नेर्होतुः प्रिया धामानि । तत्रैतं प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षत् । रभीयाꣳसमिव कृत्वी ॥ ३। ६। ११। ३॥
३१ करदेवं देवो वनस्पतिः । जुषताꣳहविः । होतर्यज । पिप्रीहि देवाꣳ उशतो यविष्ठ । विद्वाꣳ ऋतूꣳरृतुपते यजेह । ये दैव्या ऋत्विजस्तेभिरग्ने । त्वꣳ होतॄणामस्यायजिष्ठः । होता यक्षदग्निꣳ स्विष्टकृतम् । अयाडग्निरिन्द्राग्नियोश्छागस्य हविषः प्रिया धामानि । अयाड्वनस्पतेः प्रिया पाथाꣳसि । अयाड्देवानामाज्यपानां प्रिया धामानि । यक्षदग्नेर् होतुः प्रिया धामानि । यक्षथ्स्वं महिमानम् । आयजतामेज्या इषः । कृणोतु सो अध्वरा जातवेदाः । जुषताꣳहविः । होतर्यज ॥ ३। ६। ११। ४॥ नूनमर्थं कृत्वी पाथाꣳसि सप्त च ॥ ११॥
३२ उपोह यद्विदथं वाजिनो गूः । गीर्भिर्विप्राः प्रमतिमिच्छमानाः । अर्वन्तो न काष्ठां नक्षमाणाः । इन्द्राग्नी जोहुवतो नरस्ते । वनस्पते रशनयाऽभिधाय । पिष्टतमया वयुनानि विद्वान् । वह देवत्रा दिधिषो हवीꣳषि । प्र च दातारममृतेषु वोचः । अग्निꣳ स्विष्टकृतम् । अयाडग्निरिन्द्राग्नियोश्छागस्य हविषः प्रिया धामानि ॥ ३। ६। १२। १॥
३३ अयाड्वनस्पतेः प्रिया पाथाꣳसि । अयाड्देवानामाज्यपानां प्रिया धामानि । यक्षदग्नेर्

होतुः प्रिया धामानि । यक्षथ्स्वं महिमानम् । आयजतामेज्या इषः । कृणोतु सो अध्वरा जातवेदाः । जुषताꣳहविः । अग्ने यदद्य विशो अध्वरस्य होतः । पावक शोचे वेष्ट्वꣳ हि यज्वा । ऋता यजासि महिना वि यद्भूः । हव्या वह यविष्ठ या ते अद्य ॥
३। ६। १२। २॥ धामानि भूरेकं च ॥ १२॥
३४ देवं बर्हिः सुदेवं देवैः स्याथ्सुवीरं वीरैर्वस्तोर्वृज्येताक्तोः प्रभ्रियेतात्यन्यान्राया बर्हिष्मतो मदेम वसुवने वसुधेयस्य वेतु यज । देवीर्द्वारः संघाते विड्वीर्यामञ्छिथिरा ध्रुवा देवहूतौ वथ्स ईमेनास्तरुण आमिमीयात्कुमारो वा नवजातो मैना अर्वा रेणुककाटः पृणग्वसुवने वसुधेयस्य वियन्तु यज । देवी उषासा नक्ताऽद्यास्मिन्, यज्ञे प्रयत्यह्वेतामपि नूनं दैवीर्विशः प्रायासिष्टाꣳ सुप्रीते सुधिते वसुवने वसुधेयस्य वीतां यज । देवी जोष्ट्री वसुधिती ययोरन्याऽघा द्वेषाꣳसि यूयवदाऽन्या वक्षद्वसु वार्याणि यजमानाय वसुवने वसुधेयस्य वीतां यज । देवी ऊर्जाहुती इषमूर्जमन्या वक्षथ्सग्धिꣳ सपीतिमन्या नवेन पूर्वं दयमानाः स्याम पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यज । देवा दैव्याहोतारा नेष्टारा पोतारा हताघशꣳसावाभरद्वसू वसुवने वसुधेयस्य वीतां यज । देवीस्तिस्रस्तिस्रो देवीरिडा सरस्वती भारती द्यां भारत्यादित्यैरस्पृक्षथ् सरस्वतीमꣳ रुद्रैर्यज्ञमावीदिहैवेडया वसुमत्या सधमादं मदेम वसुवने वसुधेयस्य वियन्तु यज । देवो नराशꣳसस्त्रि शीर्षा षडक्षः शतमिदेनꣳ शितिपृष्ठा आदधति सहस्रमीं प्रवहन्ति मित्रावरुणेदस्य होत्रमर्हतो बृहस्पतिः स्तोत्रमश्विनाऽऽध्वर्यवं वसुवने वसुधेयस्य वेतु यज । देवो वनस्पतिर्वर्षप्रावा घृतनिर्णिग्द्यामग्रेणास्पृक्षदाऽन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृꣳहीद्वसुवने वसुधेयस्य वेतु यज । देवं बर्हिर्वारितीनां निधे धासि प्रच्युतीनामप्रच्युतं निकामधरणं पुरुस्पार्हं यशस्वदेना बर्हिषाऽन्या बर्हीग्ष्यभिष्याम वसुवने वसुधेयस्य वेतु यज । देवो अग्निः स्विष्टकृथ्सुद्रविणा मन्द्रः कविः सत्यमन्माऽऽयजी होता होतुर् होतुरायजीयानग्ने यान्देवानयाड्याꣳ अपिप्रेर्ये ते होत्रे अमथ्सत ताꣳ ससनुषीꣳ होत्रां देवंगमां दिवि देवेषु यज्ञमेरयेम२ꣳ स्विष्टकृच्चाग्ने होताऽभूर्वसुवने वसुधेयस्य नमोवाके वीहि यज ॥
३। ६। १३। १॥ यजैकं च ॥ १३॥
३५ देवं बर्हिः । वसुवने वसुधेयस्य वेतु । देवीर्द्वारः । वसुवने वसुधेयस्य वियन्तु । देवी उषासानक्ता । वसुवने वसुधेयस्य वीताम् । देवी जोष्ट्री । वसुवने वसुधेयस्य

वीताम् । देवी ऊर्जाहुती । वसुवने वसुधेयस्य वीताम् ॥ ३। ६। १४। १॥
३६ देवा दैव्या होतारा । वसुवने वसुधेयस्य वीताम् । देवीस्तिस्रस्तिस्रो देवीः । वसुवने वसुधेयस्य वियन्तु । देवो नराशꣳसः । वसुवने वसुधेयस्य वेतु । देवो वनस्पतिः । वसुवने वसुधेयस्य वेतु । देवं बर्हिर्वारितीनाम् । वसुवने वसुधेयस्य वेतु ॥ ३। ६। १४। २॥
३७ देवो अग्निः स्विष्टकृत् । सुद्रविणा मन्द्रः कविः । सत्यमन्माऽऽयजी होता । होतुर् होतुरायजीयान् । अग्नेयान्देवानयाट् । याꣳ अपिप्रेः । ये ते होत्रे अमथ्सत । ताꣳ ससनुषीꣳ होत्रां देवंगमाम् । दिवि देवेषु यज्ञमेरयेमम् । स्विष्टकृच्चाग्ने होताऽभूः । वसुवने वसुधेयस्य नमोवाके वीहि ॥ ३। ६। १४। ३॥ वीतां वेत्वभूरेकं च ॥ १४॥
३८ अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं बध्नन्निन्द्राग्निभ्यां छागꣳ सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राग्निभ्यां छागेनाघस्तां तं मेदस्तः प्रति पचताऽग्रभीष्टामवीवृधेतां पुरोडाशेन त्वामद्यर्ष आर्षेयर्षीणां नपादवृणीतायं यजमानो बहुभ्य आ संगतेभ्य एष मे देवेषु वसु वार्यायक्ष्यत इति ता या देवा देवदानान्यदुस्तान्यस्मा आ च शास्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥ ३। ६। १५। १॥ अग्निमद्यैकम् ॥ १५॥
अञ्जन्ति होता यक्षथ्समिद्धो अद्याग्निरजैद्दैव्या जुषस्वावृत्रहणा गीर्भिस्त्व२ꣳ ह्याभरतमुपोह यद्देवं बर्हिः सुदेवं देवं बर्हिरग्निमद्य पञ्चदश ॥ १५॥
अञ्जन्त्युपावसृजन्नान्या युवत्कर देवमष्टात्रिꣳशत् ॥ ३८॥
अञ्जन्ति सूक्ताब्रूहि ॥

## तृतीयाष्टके सप्तमः प्रपाठकः ७

## अच्छिद्रम्

१ सर्वान् वा एषोऽग्नौ कामान्प्रवेशयति । योऽग्नीनन्वाधाय व्रतमुपैति । स यदनिष्ट्वा प्रयायात् । अकामप्रीता एनं कामा नानुप्रयायुः । अतेजा अवीर्यः स्यात् । स जुहुयात् । तुभ्यं ता अङ्गिरस्तम । विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिर इति । कामानेवास्मिन्दधाति ॥
३। ७। १। १॥
२ कामप्रीता एनं कामा अनु प्रयान्ति । तेजस्वी वीर्यावान्भवति । संततिर्वा एषा यज्ञस्य

। योऽग्नीनन्वाधाय व्रतमुपैति । स यदुद्वायति । विच्छित्तिरेवास्य सा । तं प्राञ्चमुद्धृत्य । मनसोपतिष्ठेत । मनो वै प्रजापतिः । प्राजापत्यो यज्ञः ॥ ३। ७। १। २॥
३ मनसैव यज्ञꣳ संतनोति । भूरित्याह । भूतो वै प्रजापतिः । भूतिमेवोपैति । वि वा एष इन्द्रियेण वीर्येणर्ध्यते । यस्याहिताग्नेरग्निरपक्षायति । यावच्छम्यया प्रविध्येत् । यदि तावदपक्षायेत् । तꣳ संभरेत् । इदं त एकं पर उत एकम् ॥
३। ७। १। ३॥
४ तृतीयेन ज्योतिषा संविशस्व । संवेशनस्तनुवै चारुरेधि । प्रिये देवानां परमे जनित्र इति । ब्रह्मणैवेनꣳ संभरति । सैव ततः प्रायश्चित्तिः । यदि परस्तरामपक्षायेत् । अनु प्रयायावस्येत् । सो एव ततः प्रायश्चित्तिः । ओषधीर्वा एतस्य पशून्पयः प्रविशति । यस्य हविषे वथ्सा अपाकृता धयन्ति ॥ ३। ७। १। ४॥
५ तान्, यद्दुह्यात् । यातयाम्ना हविषा यजेत । यन्न दुह्यात् । यज्ञपरुरन्तरियात् । वायव्यां यवागूं निर्वपेत् । वायुर्वै पयसः प्रदापयिता । स एवास्मै पयः प्रदापयति । पयो वा ओषधयः । पयः पयः । पयसैवास्मै पयोऽवरुन्धे ॥ ३। ७। १। ५॥
६ अथोत्तरस्मै हविषे वथ्सानपाकुर्यात् । सैव ततः प्रायश्चित्तिः । अन्यतरान्, वा एष देवान्भागधेयेन व्यर्धयति । ये यजमानस्य सायं गृहमागच्छन्ति । यस्य सायं दुग्धꣳ हविरार्तिमार्छति । इन्द्राय व्रीहीन्निरुप्योपवसेत् । पयो वा ओषधयः । पय एवारभ्य गृहीत्वोपवसति । यत्प्रातः स्यात् । तच्छृतं कुर्यात् ॥ ३। ७। १। ६॥
७ अथैतर ऐन्द्रः पुरोडाशः स्यात् । इन्द्रिये एवास्मै समीची दधाति । पयो वा ओषधयः । पयः पयः । पयसैवास्मै पयोऽवरुन्धे । अथोत्तरस्मै हविषे वथ्सानपाकुर्यात् । सैव ततः प्रायश्चित्तिः । उभयान्, वा एष देवान्भागधेयेन व्यर्धयति । ये यजमानस्य सायं च प्रातश्च गृहमागच्छन्ति । यस्योभयꣳ हविरार्तिमार्छति ॥ ३। ७। १। ७॥
८ ऐन्द्रं पञ्चशरावमोदनं निर्वपेत् । अग्निं देवतानां प्रथमं यजेत् । अग्निमुखा एव देवताः प्रीणाति । अग्निं वा अन्वन्या देवताः । इन्द्रमन्वन्याः । ता एवोभयीः प्रीणाति । पयो वा ओषधयः । पयः पयः । पयसैवास्मै पयोऽवरुन्धे । अथोत्तरस्मै हविषे वथ्सानपाकुर्यात् ॥ ३। ७। १। ८॥
९ सैव ततः प्रायश्चित्तिः । अर्धो वा एतस्य यज्ञस्य मीयते । यस्य व्रत्येऽहन्पत्न्यनालम्भुका भवति । तामपरुध्य यजेत । सर्वेणैव यज्ञेन यजते । तामिष्ट्वोपह्वयेत । अमूहमस्मि । सा त्वम् । द्यौरहम् । पृथिवी त्वम् । सामाहम् । ऋत्त्वम् । तावेहि संभवाव ।

सह रेतो दधावहै । पुꣳसे पुत्राय वेत्तवै । रायस्पोषाय सुप्रजास्त्वाय सुवीर्यायेति । अर्ध एवैनामुपह्वयते । सैव ततः प्रायश्चित्तिः ॥ ३। ७। १। ९॥ दधाति यज्ञ उत एकं धयन्ति रुन्धे कुर्यादार्छत्यपाकुर्यात्पृथिवी त्वमष्टौ च ॥ १॥ सर्वान् वि वै यदि परस्तरामोषधीरन्यतरानुभयानर्धो वै ॥

१० यद्विष्यण्णेन जुहुयात् । अप्रजा अपशुर्यजमानः स्यात् । यदनायतने निनयेत् । अनायतनः स्यात् । प्राजापत्ययर्चा वल्मीकवपायामवनयेत् । प्राजापत्यो वै वल्मीकः । यज्ञः प्रजापतिः । प्रजापतावेव यज्ञं प्रतिष्ठापयति । भूरित्याह । भूतो वै प्रजापतिः ॥ ३। ७। २। १॥

११ भूतिमेवोपैति । तत्कृत्वा । अन्यां दुग्ध्वा पुनर्होतव्यम् । सैव ततः प्रायश्चित्तिः । यत्कीटावपन्नेन जुहुयात् । अप्रजा अपशुर्यजमानः स्यात् । यदनायतने निनयेत् । अनायतनः स्यात् । मध्यमेन पर्णेन द्यावापृथिव्ययर्चाऽन्तःपरिधि निनयेत् । द्यावापृथिव्योरेवैनत्प्रतिष्ठापयति ॥ ३। ७। २। २॥

१२ तत्कृत्वा । अन्यां दुग्ध्वा पुनर्होतव्यम् । सैव ततः प्रायश्चित्तिः । यदव वृष्टेन जुहुयात् । अपरूपमस्यात्मञ्जायेत । किलासो वा स्यादर्शसो वा । यत्प्रत्येयात् । यज्ञं विच्छिन्द्यात् । स जुहुयात् । मित्रो जनान्कल्पयति प्रजानन् ॥ ३। ७। २। ३॥

१३ मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाऽभिचष्टे । सत्याय हव्यं घृतवज्जुहोतेति । मित्रेणैवैनत्कल्पयति । तत्कृत्वा । अन्यां दुग्ध्वा पुनर्होतव्यम् । सैव ततः प्रायश्चित्तिः । यत्पूर्वस्यामाहुत्याꣳ हुतायामुत्तराऽऽहुतिः स्कन्देत् । द्विपाद्भिः पशुभिर्यजमानो व्यृध्येत । यदुत्तरयाऽभिजुहुयात् ॥ ३। ७। २। ४॥

१४ चतुष्पाद्भिः पशुभिर्यजमानो व्यृध्येत । यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामयेति वानस्पत्ययर्चा समिधमाधाय । तूष्णीमेव पुनर्जुहुयात् । वनस्पतिनैव यज्ञस्यार्तां चानार्तां चाहुती विदाधार । तत्कृत्वा । अन्यां दुग्ध्वा पुनर्होतव्यम् । सैव ततः प्रायश्चित्तिः । यत्पुरा प्रयाजेभ्यः प्राङङ्गारः स्कन्देत् । अध्वर्यवे च यजमानाय चाकग्ग् स्यात् ॥ ३। ७। २। ५॥

१५ यद्दक्षिणा । ब्रह्मणे च यजमानाय चाकग्ग् स्यात् । यत्प्रत्यक् । होत्रे च पत्नियै च यजमानाय चाकग्ग् स्यात् । यदुदङ्ङ् । अग्नीधे च पशुभ्यश्च यजमानाय चाकग्ग् स्यात् । यदभिजुहुयात् । रुद्रोऽस्य पशून् घातुकः स्यात् । यन्नाभिजुहुयात् । अशान्तः प्रह्रियेत ॥ ३। ७। २। ६॥

१६ स्रुवस्य बुध्नेनाभिनिदध्यात् । मा तमो मा यज्ञस्तमन्मा यजमानस्तमत् । नमस्ते
अस्त्वायते । नमो रुद्र परायते । नमो यत्र निषीदसि । अमुं मा हिꣳसीरमुं मा
हिꣳसीरिति येन स्कन्देत् । तं प्रहरेत् । सहस्रशृङ्गो वृषभो जातवेदाः । स्तोमपृष्ठो
घृतवान्थ्सुप्रतीकः । मा नो हासीन्मेत्थितो नेत्त्वा जहाम । गोपोषं नो वीरपोषं च
यच्छेति । ब्रह्मणैवैनं प्रहरति । सैव ततः प्रायश्चित्तिः ॥ ३। ७। २। ७॥
वै प्रजापतिः स्थापयति प्रजानन्नभि जुहुयाथ्स्याद्ध्रियेत जहाम त्रीणि च ॥ २॥
यद्विषण्णेन प्राजापत्यया यत्कीटा मध्यमेन यदववृष्टेन यत्पूर्वस्यां यत्पुरा प्रयाजेभ्यः
प्राङङ्गारो यद्दक्षिणा यत्प्रत्यग्यदुदङ्ङ्श ॥
१७ वि वा एष इन्द्रियेण वीर्येणर्ध्यते । यस्याहिताग्नेरग्निर्मथ्यमानो न जायते । यत्रान्यं
पश्येत् । तत आहृत्य होतव्यम् । अग्नावेवास्याग्नि होत्रꣳ हुतं भवति । यद्यन्यं न
विन्देत् । अजायाꣳ होतव्यम् । आग्नेयी वा एषा । यदजा । अग्नावेवास्याग्निहोत्रꣳ हुतं
भवति ॥ ३। ७। ३। १॥
१८ अजस्य तु नाश्नीयात् । यदजस्याश्नीयात् । यामेवाग्नावाहुतिं जुहुयात् । तामद्यात्
। तस्मादजस्य नाश्यम् । यद्यजां न विन्देत् । ब्राह्मणस्य दक्षिणे हस्ते होतव्यम् । एष
वा अग्निर्वैश्वानरः । यद्ब्राह्मणः । अग्नावेवास्याग्निहोत्रꣳ हुतं भवति ॥ ३। ७। ३। २॥
१९ ब्राह्मणं तु वसत्यै नापरुन्ध्यात् । यद्ब्राह्मणं वसत्या अपरुन्ध्यात् । यस्मिन्नेवाग्नावाहुतिं
जुहुयात् । तं भागधेयेन व्यर्धयेत् । तस्माद्ब्राह्मणो वसत्यै नापरुध्यः । यदि ब्राह्मणं न
विन्देत् । दर्भस्तम्बे होतव्यम् । अग्निवान्, वै दर्भस्तम्बः । अग्नावेवास्याग्निहोत्रꣳ हुतं
भवति । दर्भाग्स्तु नाध्यासीत ॥
२० यद्दर्भानध्यासीत । यामेवाग्नावाहुतिं जुहुयात् । तामध्यासीत । तस्माद्दर्भा
नाध्यासितव्याः । यदि दर्भान्न विन्देत् । अप्सु होतव्यम् । आपो वै सर्वा देवताः
। देवतास्वेवास्याग्निहोत्रꣳ हुतं भवति । आपस्तु न परिचक्षीत । यदापः परिचक्षीत ॥
३। ७। ३। ४॥
२१ यामेवाप्स्वाहुतिं जुहुयात् । तां परिचक्षीत । तस्मादापो न परिचक्ष्याः । मेध्या च
वा एतस्यामेध्या च तनुवौ सꣳसृज्येते । यस्याहिताग्नेरन्यैरग्निभिरग्नयः सꣳसृज्यन्ते
। अग्नये विविचये पुरोडाशमष्टाकपालं निर्वपेत् । मेध्यां चैवास्यामेध्यां च तनुवौ
व्यावर्तयति । अग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत् । अग्निमेव व्रतपतिग्ग् स्वेन
भागधेयेनोपधावति । स एवैनं व्रतमालम्भयति ॥ ३। ७। ३। ५॥

२२ गर्भंग्ग् स्रवन्तमगदमकः । अग्निरिन्द्रस्त्वष्टा बृहस्पतिः । पृथिव्यामवचुश्चोतैतत् । नाभिप्राप्नोति निर्ऋतिं पराचैः । रेतो वा एतद्वाजिनमाहिताग्नेः । यदग्निहोत्रम् । तद्यथ्स्रवेत् । रेतोऽस्य वाजिन२ꣳ स्रवेत् । गर्भंग्ग् स्रवन्तमगदमकरित्याह । रेत एवास्मिन्वाजिनं दधाति ॥ ३। ७। ३। ६॥

२३ अग्निरित्याह । अग्निर्वै रेतोधाः । रेत एव तद्दधाति । इन्द्र इत्याह । इन्द्रियमेवास्मिन्दधाति । त्वष्टेत्याह । त्वष्टा वै पशूनां मिथुनाना२ꣳ रूपकृत् । रूपमेव पशुषु दधाति । बृहस्पतिरित्याह । ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणैवास्मै प्रजाः प्रजनयति । पृथिव्यामवचुश्चोतैतदित्याह । अस्यामेवैनत्प्रतिष्ठापयति । नाभि प्राप्नोति निर्ऋतिं पराचैरित्याह । रक्षसामपहत्यै ॥ ३। ७। ३। ७॥ अजाऽग्नावेवास्याग्निहोत्र२ꣳ हुतं भवति भवत्यासीत परिचक्षीत लम्भयति दधाति देवानां बृहस्पतिः पञ्च च ॥ ३॥

वि वै यद्यन्यमजाया ब्राह्मणस्य दर्भस्तम्बेऽप्सु होतव्यम् ॥

२४ याः पुरस्तात्प्रस्रवन्ति । उपरिष्टाथ्सर्वतश्च याः । ताभी रश्मि पवित्राभिः । श्रद्धां यज्ञमारभे । देवा गातुविदः । गातुं यज्ञाय विन्दत । मनसस्पतिना देवेन । वाताद्यज्ञः प्रयुज्यताम् । तृतीयस्यै दिवः । गायत्रिया सोम आभृतः ॥

२५ सोमपीथाय संनयितुम् । वकलमन्तरमाददे । आपो देवीः शुद्धाः स्थ । इमा पात्राणि शुन्धत । उपातङ्क्याय देवानाम् । पर्णवल्कमुत शुन्धत । पयो गृहेषु पयो अघ्नियासु । पयो वथ्सेषु पय इन्द्राय हविषे ध्रियस्व । गायत्री पर्णवल्केन । पयः सोमं करोत्विमम् ॥ ३। ७। ४। २॥

२६ अग्निं गृह्णामि सुरथं यो मयोभूः । य उद्यन्तमारोहति सूर्यमह्ने । आदित्यं ज्योतिषां ज्योतिरुत्तमम् । श्वो यज्ञाय रमतां देवताभ्यः । वसून्रुद्रानादित्यान् । इन्द्रेण सह देवताः । ताः पूर्वः परिगृह्णामि । स्व आयतने मनीषया । इमामूर्जं पञ्चदशीं ये प्रविष्टाः । तान्देवान्परिगृह्णामि पूर्वः ॥ ३। ७। ४। ३॥

२७ अग्निर्हव्यवाडिह तानावहतु । पौर्णमास२ꣳ हविरिदमेषां मयि । आमावास्य२ꣳ हविरिदमेषां मयि । अन्तराऽग्नी पशवः । देवस२ꣳसदमागमन् । तान्पूर्वः परिगृह्णामि । स्व आयतने मनीषया । इह प्रजा विश्वरूपा रमन्ताम् । अग्निं गृहपतिमभिसंवसानाः । ताः पूर्वः परिगृह्णामि ॥ ३। ७। ४। ४॥

२८ स्व आयतने मनीषया । इह पशवो विश्वरूपा रमन्ताम् । अग्निं गृहपतिमभि संवसानाः । तान्पूर्वः परिगृह्णामि । स्व आयतने मनीषया । अयं पितृणामग्निः ।

अवाड्ढव्या पितृभ्य आ । तं पूर्वः परिगृह्णामि । अविषं नः पितुं करत् । अजस्रं त्वाꣳ सभापालाः ॥ ३। ७। ४। ५॥
२९ विजयभागꣳ समिन्धताम् । अग्ने दीदाय मे सभ्य । विजित्यै शरदः शतम् । अन्नमावसथीयम् । अभिहराणि शरदः शतम् । आवसथे श्रियं मन्त्रम् । अहिर्बुध्नियो नियच्छतु । इदमहमग्निं ज्येष्ठेभ्यः । वसुभ्यो यज्ञं प्रब्रवीमि । इदमहमिन्द्रज्येष्ठेभ्यः ॥ ३। ७। ४। ६॥
३० रुद्रेभ्यो यज्ञं प्रब्रवीमि । इदमहं वरुणज्येष्ठेभ्यः । आदित्येभ्यो यज्ञं प्रब्रवीमि । पयस्वतीरोषधयः । पयस्वद्वीरुधां पयः । अपां पयसो यत्पयः । तेन मामिन्द्र सꣳसृज । अग्ने व्रतपते व्रतं चरिष्यामि । तच्छकेयं तन्मे राध्यताम् । वायो व्रतपत आदित्य व्रतपते ॥
३। ७। ४। ७॥
३१ व्रतानां व्रतपते व्रतं चरिष्यामि । तच्छकेयं तन्मे राध्यताम् । इमां प्राचीमुदीचीम् । इषमूर्जमभि सꣳस्कृताम् । बहुपर्णामशुष्काग्राम् । हरामि पशुपामहम् । यत्कृष्णो रूपं कृत्वा । प्राविशस्त्वं वनस्पतीन् । ततस्त्वामेकविꣳशतिधा । संभरामि सुसंभृता ॥ ३। ७। ४। ८॥
३२ त्रीन्परिधीꣳस्तिस्रः समिधः । यज्ञायुरनुसंचरान् । उपवेषं मेक्षणं धृष्टिम् । संभरामि सुसंभृता । या जाता ओषधयः । देवेभ्यस्त्रियुगं पुरा । तासां पर्व राध्यासम् । परिस्तरमाहरन् । अपां मेध्यं यज्ञियम् । सदेवꣳ शिवमस्तु मे ॥ ३। ७। ४। ९॥
३३ आच्छेत्ता वो मा रिषम् । जीवानि शरदः शतम् । अपरिमितानां परिमिताः । संनह्ये सुकृताय कम् । एनो मा निगां कतमच्चनाहम् । पुनरुत्थाय बहुला भवन्तु । सकृदाच्छिन्नं बर्हिरूर्णामृदु । स्योनं पितृभ्यस्त्वा भराम्यहम् । अस्मिन्त्सीदन्तु मे पितरः सोम्याः । पितामहाः प्रपितामहाश्चानुगैः सह ॥ ३। ७। ४। १०॥
३४ त्रिवृत्पलाशे दर्भः । इयान्प्रादेशसंमितः । यज्ञे पवित्रं पोतृतमम् । पयो हव्यं करोतु मे । इमौ प्राणापानौ । यज्ञस्याङ्गानि सर्वशः । आप्याययन्तौ संचरताम् । पवित्रे हव्यशोधने । पवित्रे स्थो वैष्णवी । वायुर्वो मनसा पुनातु ॥ ३। ७। ४। ११॥
३५ अयं प्राणश्चापानश्च । यजमानमपिगच्छताम् । यज्ञे ह्यभूतां पोतारौ । पवित्रे हव्यशोधने । त्वया वेदिं विविदुः पृथिवीम् । त्वया यज्ञो जायते विश्वदानिः । अच्छिद्रं यज्ञमन्वेषि विद्वान् । त्वया होता संतनोत्यर्धमासान् । त्रयस्त्रिꣳशोऽसि तन्तूनाम् ।

पवित्रेण सहागहि ॥ ३। ७। ४। १२॥
३६ शिवेयꣳ रज्जुरभिधानी । अघ्नियामुपसेवताम् । अप्रस्रꣳसाय यज्ञस्य । उखे उपदधाम्यहम् । पशुभिः संनीतं बिभृताम् । इन्द्राय शृतं दधि । उपवेषोऽसि यज्ञाय । त्वां परिवेषमधारयन् । इन्द्राय हविः कृण्वन्तः । शिवः शग्मो भवासि नः ॥ ३। ७। ४। १३॥
३७ अमृन्मयं देवपात्रम् । यज्ञस्यायुषि प्रयुज्यताम् । तिरःपवित्रमति नीताः । आपो धारय माऽतिगुः । देवेन सवित्रोत्पूताः । वसोः सूर्यस्य रश्मिभिः । गां दोह पवित्रे रज्जुम् । सर्वा पात्राणि शुन्धत । एता आचरन्ति मधुमद्दुहानाः । प्रजावतीर्यशसो विश्वरूपाः ॥ ३। ७। ४। १४॥
३८ बह्वीर्भवन्तीरुपजायमानाः । इह व इन्द्रो रमयतु गावः । पूषा स्थ । अयक्ष्मा वः प्रजया सꣳसृजामि । रायस्पोषेण बहुला भवन्तीः । ऊर्जं पयः पिन्वमाना घृतं च । जीवो जीवन्तीरुप वः सदेयम् । द्यौश्चेमं यज्ञं पृथिवी च संदुहाताम् । धाता सोमेन सह वातेन वायुः । यजमानाय द्रविणं दधातु ॥ ३। ७। ४। १५॥
३९ उथ्सं दुहन्ति कलशं चतुर्बिलम् । इडां देवीं मधुमतीꣳ सुवर्विदम् । तदिन्द्राग्नी जिन्वतꣳ सूनृतावत् । तद्यजमानममृतत्वे दधातु । कामधुक्षः प्र णो ब्रूहि । इन्द्राय हविरिन्द्रियम् । अमूं यस्यां देवानाम् । मनुष्याणां पयो हितम् । बहु दुग्धीन्द्राय देवेभ्यः । हव्यमाप्यायतां पुनः ॥ ३। ७। ४। १६॥
४० वथ्सेभ्यो मनुष्येभ्यः । पुनर्दोहाय कल्पताम् । यज्ञस्य संततिरसि । यज्ञस्य त्वा संततिमनु संतनोमि । अदस्तमसि विष्णवे त्वा । यज्ञायापि दधाम्यहम् । अद्भिररिक्तेन पात्रेण । याः पूताः परिशेरते । अयं पयः सोमं कृत्वा । स्वां योनिमपिगच्छतु ॥ ३। ७। ४। १७॥
४१ पर्णवल्कः पवित्रम् । सौम्यः सोमाद्धि निर्मितः । इमौ पर्णं च दर्भं च । देवानाꣳ हव्यशोधनौ । प्रातर्वेषाय गोपाय । विष्णो हव्यꣳ हि रक्षसि । उभावग्नी उपस्तृणते । देवता उपवसन्तु मे । अहं ग्राम्यानुपवसामि । मह्यं गोपतये पशून् ॥ ३। ७। ४। १८॥ आभृत इमं गृह्णामि पूर्वस्ताः पूर्वः परिगृह्णामि सभापाला इन्द्रज्येष्ठेभ्य आदित्य व्रतपते सुसंभृता मे सह पुनातु गहि नो विश्वरूपा दधातु पुनर्गच्छतु पशून् ॥ ४॥ याः पुरस्तादिमामूर्जमिह प्रजा इह पशवोऽयं पितृणामग्निः ॥
४२ देवा देवेषु पराक्रमध्वम् । प्रथमा द्वितीयेषु । द्वितीयास्तृतीयेषु । त्रिरेकादशा इह

माऽवत । इदꣳ शकेयं यदिदं करोमि । आत्मा करोत्वात्मने । इदं करिष्ये भेषजम् । इदं मे विश्वभेषजा । अश्विना प्रावतं युवम् । इदमहꣳ सेनाया अभीत्वर्यै ॥ ३। ७। ५। १॥

४३ मुखमपोहामि । सूर्य ज्योतिर्विभाहि । महत इन्द्रियाय । आप्यायतां घृतयोनिः । अग्निर्हव्याऽनुमन्यताम् । खमङ्क्ष्व त्वचमङ्क्ष्व । सुरूपं त्वा वसुविदम् । पशूनां तेजसा । अग्नये जुष्टमभिघारयामि । स्योनं ते सदनं करोमि ॥ ३। ७। ५। २॥

४४ घृतस्य धारया सुशेवं कल्पयामि । तस्मिन्थ्सीदामृते प्रतितिष्ठ । व्रीहीणां मेध सुमनस्यमानः । आर्द्रः प्रथस्नुर्भुवनस्य गोपाः । शृत उथ्स्नाति जनिता मतीनाम् । यस्त आत्मा पशुषु प्रविष्टः । देवानां विष्ठामनु यो वितस्थे । आत्मन्वान्थ्सोम घृतवान् हि भूत्वा । देवान्गच्छ सुवर्विन्द यजमानाय मह्यम् । इरा भूतिः पृथिव्यै रसो मोत्क्रमीत् ॥ ३। ७। ५। ३॥

४५ देवाः पितरः पितरो देवाः । योऽहमस्मि स सन्, यजे । यस्यास्मि न तमन्तरेमि । स्वं म इष्ट२ꣳ स्वं दत्तम् । स्वं पूर्त२ꣳ स्व२ꣳ श्रान्तम् । स्वꣳ हुतम् । तस्य मेऽग्निरुपद्रष्टा । वायुरुपश्रोता । आदित्योऽनुख्याता । द्यौः पिता ॥ ३। ७। ५। ४॥

४६ पृथिवी माता । प्रजापतिर्बन्धुः । य एवास्मि स सन्, यजे । मा भेर्मा संविक्था मा त्वा हिꣳसिषम् । मा ते तेजोऽपक्रमीत् । भरतमुद्धरेमनुषिञ्च । अवदानानि ते प्रत्यवदास्यामि । नमस्ते अस्तु मा मा हिꣳसीः । यदवदानानि तेऽवद्यन् । विलोमाकार्षमात्मनः ॥ ३। ७। ५। ५॥

४७ आज्येन प्रत्यनज्म्येनत् । तत्त आप्यायतां पुनः । अज्यायो यवमात्रात् । आव्याधात्कृत्यतामिदम् । मा रूरुपाम यज्ञस्य । शुद्ध२ꣳ स्विष्टमिदꣳ हविः । मनुना दृष्टां घृतपदीम् । मित्रावरुणसमीरिताम् । दक्षिणार्धादसंभिन्दन् । अवद्याम्येकतोमुखाम् ॥ ३। ७। ५। ६॥

४८ इडे भागं जुषस्व नः । जिन्व गा जिन्वार्वतः । तस्यास्ते भक्षिवाणः स्याम । सर्वात्मानः सर्वगणाः । ब्रध्न पिन्वस्व । ददतो मे मा क्षायि । कुर्वतो मे मोपदसत् । दिशां क्लृप्तिरसि । दिशो मे कल्पन्ताम् । कल्पन्तां मे दिशः ॥ ३। ७। ५। ७॥

४९ दैवीश्च मानुषीश्च । अहोरात्रे मे कल्पेताम् । अर्धमासा मे कल्पन्ताम् । मासा मे कल्पन्ताम् । ऋतवो मे कल्पन्ताम् । संवथ्सरो मे कल्पताम् । क्लृप्तिरसि कल्पतां मे । आशानां त्वाऽऽशापालेभ्यः । चतुर्भ्यो अमृतेभ्यः । इदं भूतस्याध्यक्षेभ्यः ॥ ३। ७। ५। ८॥

५० विधेम हविषा वयम् । भजतां भागी भागम् । माऽभागोऽभक्त । निरभागं भजामः । अपस्पिन्व । ओषधीर्जिन्व । द्विपात्पाहि । चतुष्पादव । दिवो वृष्टिमेरय । ब्राह्मणानामिदꣳ हविः ॥ ३। ७। ५। ९॥
५१ सोम्यानाꣳ सोमपीथिनाम् । निर्भक्तो ब्राह्मणः । नेहाब्राह्मणस्यास्ति । समङ्क्तां बर्हिर्हविषा घृतेन । समादित्यैर्वसुभिः सं मरुद्भिः । समिन्द्रेण विश्वेभिर्देवेभिरङ्क्ताम् । दिव्यं नभो गच्छतु यत्स्वाहा । इन्द्राणीवाविधवा भूयासम् । अदितिरिव सुपुत्रा । अस्थूरि त्वा गार्हपत्य ॥
३। ७। ५। १०॥
५२ उपनिषदे सुप्रजास्त्वाय । सं पत्नी पत्या सुकृतेन गच्छताम् । यज्ञस्य युक्तौ धुर्यावभूताम् । संजानानौ विजहतामरातीः । दिवि ज्योतिरजरमारभेताम् । दश ते तनुवो यज्ञ यज्ञियाः । ताः प्रीणातु यजमानो घृतेन । नारिष्ठयोः प्रशिषमीडमानः । देवानां दैव्येऽपि यजमानोऽमृतोऽभूत् । यं वां देवा अकल्पयन् ॥ ३। ७। ५। ११॥
५३ ऊर्जो भागꣳ शतक्रतू । एतद्वां तेन प्रीणानि । तेन तृप्यतमꣳहहौ । अहं देवानाꣳ सुकृतामस्मि लोके । ममेदमिष्टं न मिथुर्भवाति । अहं नारिष्ठावनुयजामि विद्वान् । यदाभ्यामिन्द्रो अदधाद्भागधेयम् । अदारसृद्भवत देव सोम । अस्मिन्, यज्ञे मरुतो मृडता नः । मा नो विददभि भामो अशस्तिः ॥ ३। ७। ५। १२॥
५४ मा नो विदद्वृजना द्वेष्या या । ऋषभं वाजिनं वयम् । पूर्णमासं यजामहे । स नो दोहताꣳ सुवीर्यम् । रायस्पोषꣳसहस्रिणम् । प्राणाय सुराधसे । पूर्णमासाय स्वाहा । अमावास्या सुभगा सुशेवा । धेनुरिव भूय आप्यायमाना । सा नो दोहताꣳ सुवीर्यम् । रायस्पोषꣳसहस्रिणम् । अपानाय सुराधसे । अमावास्यायै स्वाहा । अभिस्तृणीहि परिधेहि वेदिम् । जामिं मा हिꣳसीरमुया शयाना । होतृषदना हरिताः सुवर्णाः । निष्का इमे यजमानस्य ब्रध्ने ॥ ३। ७। ५। १३॥ अभीत्वर्यै करोमि क्रमीत्पिताऽऽत्मन एकतोमुखां मे दिशोऽध्यक्षेभ्यो हविर्गार्हपत्याकल्पयन्नशस्तिः सा नो दोहताꣳ सुवीर्यꣳ सप्त च ॥ ५॥
५५ परिस्तृणीत परिधत्ताग्निम् । परिहितोऽग्निर्यजमानं भुनक्तु । अपाꣳ रस ओषधीनाꣳ सुवर्णः । निष्का इमे यजमानस्य सन्तु कामदुघाः । अमुत्रामुष्मिं ल्लोके । भूपते भुवनपते । महतो भूतस्य पते । ब्रह्माणं त्वा वृणीमहे । अहं भूपतिरहं भुवनपतिः । अहं महतो भूतस्य पतिः ॥ ३। ७। ६। १॥

५६ देवेन सवित्रा प्रसूत आर्त्विज्यं करिष्यामि । देवसवितरेतं त्वा वृणते । बृहस्पतिं
दैव्यं ब्रह्माणम् । तदहं मनसे प्रब्रवीमि । मनो गायत्रियै । गायत्री त्रिष्टुभे । त्रिष्टुब्जगत्यै
। जगत्यनुष्टुभे । अनुष्टुक् पङ्क्त्यै । पङ्क्तिः प्रजापतये ॥ ३। ७। ६। २॥
५७ प्रजापतिर्विश्वेभ्यो देवेभ्यः । विश्वे देवा बृहस्पतये । बृहस्पतिर्ब्रह्मणे । ब्रह्म भूर्भुवः
सुवः । बृहस्पतिर्देवानां ब्रह्मा । अहं मनुष्याणाम् । बृहस्पते यज्ञं गोपाय । इदं तस्मै
हर्म्यं करोमि । यो वो देवाश्चरति ब्रह्मचर्यम् । मेधावी दिक्षु मनसा तपस्वी ॥ ३। ७।
६। ३॥
५८ अन्तर्दूतश्चरति मानुषीषु । चतुःशिखण्डा युवतिः सुपेशाः । घृतप्रतीका भुवनस्य
मध्ये । मर्मृज्यमाना महते सौभगाय । मह्यं धुक्ष्व यजमानाय कामान् । भूमिर्भूत्वा
महिमानं पुपोष । ततो देवी वर्धयते पयाꣳसि । यज्ञिया यज्ञं वि च यन्ति शं च ।
ओषधीराप इह शक्वरीश्च । यो मा हृदा मनसा यश्च वाचा ॥ ३। ७। ६। ४॥
५९ यो ब्रह्मणा कर्मणा द्वेष्टि देवाः । यः श्रुतेन हृदयेनेष्णता च । तस्येन्द्र वज्रेण
शिरश्छिनद्मि । ऊर्णामृदु प्रथमान२ꣳ स्योनम् । देवेभ्यो जुष्टꣳ सदनाय बर्हिः ।
सुवर्गे लोके यजमानꣳ हि धेहि । मां नाकस्य पृष्ठे परमे व्योमन् । चतुः शिखण्डा
युवतिः सुपेशाः । घृतप्रतीका वयुनानि वस्ते । सा स्तीर्यमाणा महते सौभगाय ॥ ३।
७। ६। ५॥
६० सा मे धुक्ष्व यजमानाय कामान् । शिवा च मे शग्मा चैधि । स्योना च मे सुषदा
चैधि । ऊर्जस्वती च मे पयस्वती चैधि । इषमूर्जं मे पिन्वस्व । ब्रह्मतेजो मे पिन्वस्व
। क्षत्रमोजो मे पिन्वस्व । विशं पुष्टिं मे पिन्वस्व । आयुरन्नाद्यं मे पिन्वस्व । प्रजां
पशून्मे पिन्वस्व ॥ ३। ७। ६। ६॥
६१ अस्मिन्, यज्ञ उप भूय इन्नु मे । अविक्षोभाय परिधीन्दधामि । धर्ता धरुणो धरीयान्
। अग्निर्द्वेषाꣳसि निरितो नुदातै । विच्छिनद्मि विधृतीभ्याꣳ सपत्नान् । जातान् भ्रातृव्यान्
ये च जनिष्यमाणाः । विशो यन्त्राभ्यां विधमाम्येनान् । अह२ꣳ स्वानामुत्तमोऽसानि
देवाः । विशो यन्त्रे नुदमाने अरातिम् । विश्वं पाप्मानममतिं दुर्मरायुम् ॥ ३। ७। ६।
७॥
६२ सीदन्ती देवी सुकृतस्य लोके । धृती स्थो विधृती स्वधृती । प्राणान्मयि धारयतम्
। प्रजां मयि धारयतम् । पशून्मयि धारयतम् । अयं प्रस्तर उभयस्य धर्ता । धर्ता
प्रयाजानामुतानूयाजानाम् । स दाधार समिधो विश्वरूपाः । तस्मिन्थ्स्रुचो अध्यासादयामि

। आरोह पथो जुहु देवयानान् ॥ ३। ७। ६। ८॥

६३ यत्रर्षयः प्रथमजा ये पुराणाः । हिरण्यपक्षाऽजिरा सम्भृताङ्गा । वहासि मा सुकृतां यत्र लोकाः । अवाहं बाध उपभृता सपत्नान् । जातान्भ्रातृव्यान् ये च जनिष्यमाणाः । दोहै यज्ञꣳ सुदुघामिव धेनुम् । अहमुत्तरो भूयासम् । अधरे मथ्सपत्नाः । यो मा वाचा मनसा दुर्मरायुः । हृदाऽरातीयादभिदासदग्ने ॥ ३। ७। ६। ९॥

६४ इदमस्य चित्तमधरं ध्रुवायाः । अहमुत्तरो भूयासम् । अधरे मथ्सपत्नाः । ऋषभोऽसि शाक्वरः । घृताचीनाꣳ सूनुः । प्रियेण नाम्ना प्रिये सदसि सीद । स्योनो मे सीद सुषदः पृथिव्याम् । प्रथयि प्रजया पशुभिः सुवर्गे लोके । दिवि सीद पृथिव्यामन्तरिक्षे । अहमुत्तरो भूयासम् ॥ ३। ७। ६। १०॥

६५ अधरे मथ्सपत्नाः । इयꣳ स्थाली घृतस्य पूर्णा । अच्छिन्नपयाः शतधार उथ्सः । मारुतेन शर्मणा दैव्येन । यज्ञोऽसि सर्वतः श्रितः । सर्वतो मां भूतं भविष्यच्छ्रयताम् । शतं मे सन्त्वाशिषः । सहस्रं मे सन्तु सूनृताः । इरावतीः पशुमतीः । प्रजापतिरसि सर्वतः श्रितः ॥ ३। ७। ६। ११॥

६६ सर्वतो मां भूतं भविष्यच्छ्रयताम् । शतं मे सन्त्वाशिषः । सहस्रं मे सन्तु सूनृताः । इरावतीः पशुमतीः । इदमिन्द्रियममृतं वीर्यम् । अनेनेन्द्राय पशवोऽचिकिथ्सन् । तेन देवा अवतोप माम् । इहेषमूर्जं यशः सह ओजः सनेयम् । शृतं मयि श्रयताम् । यत्पृथिवीमचरत्तत्प्रविष्टम् ॥ ३। ७। ६। १२॥

६७ येनासिञ्चद्बलमिन्द्रे प्रजापतिः । इदं तच्छुक्रं मधु वाजिनीवत् । येनोपरिष्टादधिनोन्महेन्द्रम् । दधि मां धिनोतु । अयं वेदः पृथिवीमन्वविन्दत् । गुहा सतीं गहने गह्वरेषु । स विन्दतु यजमानाय लोकम् । अच्छिद्रं यज्ञं भूरिकर्मा करोतु । अयं यज्ञः समसदद्धविष्मान् । ऋचा साम्ना यजुषा देवताभिः ॥ ३। ७। ६। १३॥

६८ तेन लोकान्थ्सूर्यवतो जयेम । इन्द्रस्य सख्यममृतत्वमश्याम् । यो नः कनीय इह कामयातै । अस्मिन्, यज्ञे यजमानाय मह्यम् । अप तमिन्द्राग्नी भुवनान्नुदेताम् । अहं प्रजां वीरवतीं विदेय । अग्ने वाजजित् । वाजं त्वा सरिष्यन्तम् । वाजं जेष्यन्तम् । वाजिनं वाजजितम् ॥ ३। ७। ६। १४॥

६९ वाजजित्यायै संमार्ज्मि । अग्निमन्नादमन्नाद्याय । उपहूतो द्यौः पिता । उप मां द्यौः पिता ह्वयताम् । अग्निराग्नीध्रात् । आयुषे वर्चसे । जीवात्वै पुण्याय । उपहूता पृथिवी

माता । उप मां माता पृथिवी ह्वयताम् । अग्निराग्नीध्रात् ॥ ३। ७। ६। १५॥
७० आयुषे वर्चसे । जीवात्वै पुण्याय । मनो ज्योतिर्जुषतामाज्यम् । विच्छिन्नं यज्ञꣳ समिमं दधातु । बृहस्पतिस्तनुतामिमं नः । विश्वे देवा इह मादयन्ताम् । यं ते अग्न आवृश्चामि । अहं वा क्षिपितश्चरन् । प्रजां च तस्य मूलं च । नीचैर्देवा निवृश्चत ॥ ३। ७। ६। १६॥
७१ अग्ने यो नोऽभिदासति । समानो यश्च निष्ट्यः । इध्मस्येव प्रक्षायतः । मा तस्योच्छेषि किंचन । यो मां द्वेष्टि जातवेदः । यं चाहं द्वेष्मि यश्च माम् । सर्वाग्स्तानग्ने संदह । याग्श्चाहं द्वेष्मि ये च माम् । अग्ने वाजजित् । वाजं त्वा ससृवाꣳसम् ॥ ३। ७। ६। १७॥
७२ वाजं जिगिवाꣳसम् । वाजिनं वाजजितम् । वाजजित्यायै संमार्ज्मि । अग्निमन्नादमन्नाद्याय । वेदिर्बर्हिः शृतꣳ हविः । इध्मः परिधयः स्रुचः । आज्यं यज्ञ ऋचो यजुः । याज्याश्च वषट्काराः । सं मे संनतयो नमन्ताम् । इध्मसंनहने हुते ॥ ३। ७। ६। १८॥
७३ दिवः खीलोऽवततः । पृथिव्या अध्युत्थितः । तेना सहस्रकाण्डेन । द्विषन्तꣳ शोचयामसि । द्विषन्मे बहु शोचतु । ओषधे मो अहꣳ शुचम् । यज्ञ नमस्ते यज्ञ । नमो नमश्च ते यज्ञ । शिवेन मे संतिष्ठस्व । स्योनेन मे संतिष्ठस्व ॥ ३। ७। ६। १९॥
७४ सुभूतेन मे संतिष्ठस्व । ब्रह्मवर्चसेन मे संतिष्ठस्व । यज्ञस्यर्द्धिमनु संतिष्ठस्व । उप ते यज्ञ नमः । उप ते नमः । उप ते नमः । त्रिष्फली क्रियमाणानाम् । यो न्यङ्गो अवशिष्यते । रक्षसां भागधेयम् । आपस्तत्प्रवहतादितः ॥ ३। ७। ६। २०॥
७५ उलूखले मुसले यच्च शूर्पे । आशिश्लेष दृषदि यत्कपाले । अवप्रुषो विप्रुषः संयजामि । विश्वे देवा हविरिदं जुषन्ताम् । यज्ञे या विप्रुषः सन्ति बह्वीः । अग्नौ ताः सर्वाः स्विष्टाः सुहुता जुहोमि । उद्यन्नद्य मित्रमहः । सपत्नान्मे अनीनशः । दिवैनान्, विद्युता जहि । निम्रोचन्नधरान्कृधि ॥ ३। ७। ६। २१॥
७६ उद्यन्नद्य वि नो भज । पिता पुत्रेभ्यो यथा । दीर्घायुत्वस्य हेशिषे । तस्य नो देहि सूर्य । उद्यन्नद्य मित्रमहः । आरोहन्नुत्तरां दिवम् । हृद्रोगं मम सूर्य । हरिमाणं च नाशय । शुकेषु मे हरिमाणम् । रोपणाकासु दध्मसि ॥ ३। ७। ६। २२॥
७७ अथो हारिद्रवेषु मे । हरिमाणं निदध्मसि । उदगादयमादित्यः । विश्वेन सहसा सह । द्विषन्तं मम रन्धयन् । मो अहं द्विषतो रधम् । यो नः शपादशपतः । यश्च नः

शपतः शपात् । उषाश्च तस्मै निम्रुक्च । सर्वं पापꣳ समूहताम् ॥ ३। ७। ६। २३॥
७८ यो नः सपत्नो यो रणः । मर्तोऽभिदासति देवाः । इध्मस्येव प्रक्षायतः । मा तस्योच्छेषि किञ्चन । अवसृष्टः परापत । शरो ब्रह्मसꣳशितः । गच्छामित्रान्प्रविश । मैषां कंचनोच्छिषः ॥ ३। ७। ६। २४॥ पतिः प्रजापतये तपस्वी वाचा सौभगाय पशून्मे पिन्वस्व दुर्मरायुं देवयानानग्नेऽन्तरिक्षेऽहमुत्तरो भूयासं प्रजापतिरसि सर्वतः श्रितः प्रविष्टं देवताभिर्वाजजितं पृथिवी ह्वयतामग्निराग्नीध्राद्वृश्चत ससृवाꣳ सꣳहुते स्योनेन मे संतिष्ठस्वेतः कृधि दध्मस्यूहतामष्टौ च ॥ ६॥
७९ सक्षेदं पश्य । विधर्तरिदं पश्य । नाकेदं पश्य । रमतिः पनिष्ठा । ऋतं वर्षिष्ठम् । अमृता यान्याहुः । सूर्यो वरिष्ठो अक्षभिर्विभाति । अनु द्यावापृथिवी देवपुत्रे । दीक्षाऽसि तपसो योनिः । तपोऽसि ब्रह्मणो योनिः ॥ ३। ७। ७। १॥
८० ब्रह्मासि क्षत्रस्य योनिः । क्षत्रमस्यृतस्य योनिः । ऋतमसि भूरारभे । श्रद्धां मनसा । दीक्षां तपसा । विश्वस्य भुवनस्याधिपत्नीम् । सर्वे कामा यजमानस्य सन्तु । वातं प्राणं मनसाऽन्वारभामहे । प्रजापतिं यो भुवनस्य गोपाः । स नो मृत्योस्त्रायतां पात्वꣳहसः ॥
३। ७। ७। २॥
८१ ज्योग्जीवा जरामशीमहि । इन्द्र शाक्वर गायत्रीं प्रपद्ये । तां ते युनज्मि । इन्द्र शाक्वर त्रिष्टुभं प्रपद्ये । तां ते युनज्मि । इन्द्र शाक्वर जगतीं प्रपद्ये । तां ते युनज्मि । इन्द्र शाक्वरानुष्टुभं प्रपद्ये । तां ते युनज्मि । इन्द्र शाक्वर पङ्क्तिं प्रपद्ये ॥ ३। ७। ७। ३॥
८२ तां ते युनज्मि । आऽहं दीक्षामरुहमृतस्य पत्नीम् । गायत्रेण छन्दसा ब्रह्मणा च । ऋतꣳ सत्येऽधायि । सत्यमृतेऽधायि । ऋतं च मे सत्यं चाभूताम् । ज्योतिरभूवꣳ सुवरगमम् । सुवर्गं लोकं नाकस्य पृष्ठम् । ब्रध्नस्य विष्टपमगमम् । पृथिवी दीक्षा ॥ ३। ७। ७। ४॥
८३ तयाऽग्निर्दीक्षया दीक्षितः । ययाऽग्निर्दीक्षया दीक्षितः । तया त्वा दीक्षया दीक्षयामि । अन्तरिक्षं दीक्षा । तया वायुर्दीक्षया दीक्षितः । यया वायुर्दीक्षया दीक्षितः । तया त्वा दीक्षया दीक्षयामि । द्यौर्दीक्षा । तयाऽऽदित्यो दीक्षया दीक्षितः । ययाऽऽदित्यो दीक्षया दीक्षितः ॥ ३। ७। ७। ५॥
८४ तया त्वा दीक्षया दीक्षयामि । दिशो दीक्षा । तया चन्द्रमा दीक्षया दीक्षितः । यया

चन्द्रमा दीक्षया दीक्षितः । तया त्वा दीक्षया दीक्षयामि । आपो दीक्षा । तया वरुणो
राजा दीक्षया दीक्षितः । यया वरुणो राजा दीक्षया दीक्षितः । तया त्वा दीक्षया
दीक्षयामि । ओषधयो दीक्षा ॥ ३। ७। ७। ६॥
८५ तया सोमो राजा दीक्षया दीक्षितः । यया सोमो राजा दीक्षया दीक्षितः । तया
त्वा दीक्षया दीक्षयामि । वाग्दीक्षा । तया प्राणो दीक्षया दीक्षितः । यया प्राणो दीक्षया
दीक्षितः । तया त्वा दीक्षया दीक्षयामि । पृथिवी त्वा दीक्षमाणमनु दीक्षताम् । अन्तरिक्षं
त्वा दीक्षमाणमनु दीक्षताम् । द्यौस्त्वा दीक्षमाणमनु दीक्षताम् ॥ ३। ७। ७। ७॥
८६ दिशस्त्वा दीक्षमाणमनु दीक्षन्ताम् । आपस्त्वा दीक्षमाणमनु दीक्षन्ताम् ।
ओषधयस्त्वा दीक्षमाणमनु दीक्षन्ताम् । वाक्त्वा दीक्षमाणमनु दीक्षताम् । ऋचस्त्वा
दीक्षमाणमनु दीक्षन्ताम् । सामानि त्वा दीक्षमाणमनु दीक्षन्ताम् । यजूꣳषि त्वा
दीक्षमाणमनु दीक्षन्ताम् । अहश्च रात्रिश्च । कृषिश्च वृष्टिश्च । त्विषिश्चापचितिश्च ॥
३। ७। ७। ८॥
८७ आपश्चौषधयश्च । ऊर्क्च सूनृता च । तास्त्वा दीक्षमाणमनु दीक्षन्ताम् । स्वे दक्षे
दक्षपितेह सीद । देवानाꣳ सुम्नो महते रणाय । स्वासस्थस्तनुवा संविशस्व । पितेवैधि
सूनव आसुशेवः । शिवो मा शिवमाविश । सत्यं म आत्मा । श्रद्धा मे क्षितिः ॥ ३।
७। ७। ९॥
८८ तपो मे प्रतिष्ठा । सवितृप्रसूता मा दिशो दीक्षयन्तु । सत्यमस्मि । अहं त्वदस्मि
मदसि त्वमेतत् । ममासि योनिस्तव योनिरस्मि । ममैव सन्वह हव्यान्यग्ने । पुत्रः पित्रे
लोककृज्जातवेदः । आजुह्वानः सुप्रतीकः पुरस्तात् । अग्ने स्वां योनिमासीद साध्या ।
अस्मिन्थ्सधस्थे अध्युत्तरस्मिन् ॥ ३। ७। ७। १०॥
८९ विश्वे देवा यजमानश्च सीदत । एकमिषे विष्णुस्त्वाऽन्वेतु । द्वे ऊर्जे विष्णुस्त्वाऽन्वेतु
। त्रीणि व्रताय विष्णुस्त्वाऽन्वेतु । चत्वारि मायो भवाय विष्णुस्त्वाऽन्वेतु । पञ्च
पशुभ्यो विष्णुस्त्वाऽन्वेतु । षड्रायस्पोषाय विष्णुस्त्वाऽन्वेतु । सप्त सप्तभ्यो होत्राभ्यो
विष्णुस्त्वाऽन्वेतु । सखायः सप्तपदा अभूम । सख्यं ते गमेयम् ॥ ३। ७। ७। ११॥
९० सख्यात्ते मा योषम् । सख्यान्मे मा योष्ठाः । साऽसि सुब्रह्मण्ये । तस्यास्ते पृथिवी
पादः । साऽसि सुब्रह्मण्ये । तस्यास्तेऽन्तरिक्षं पादः । साऽसि सुब्रह्मण्ये । तस्यास्ते
द्यौः पादः । साऽसि सुब्रह्मण्ये । तस्यास्ते दिशः पादः ॥ ३। ७। ७। १२॥
९१ परोरजास्ते पञ्चमः पादः । सा न इषमूर्जं धुक्ष्व । तेज इन्द्रियम् । ब्रह्मवर्चसमन्नाद्यम्

। विमिमे त्वा पयस्वतीम् । देवानां धेनुꣳ सुदुघामनपस्फुरन्तीम् । इन्द्रः सोमं पिबतु । क्षेमो अस्तु नः । इमां नराः कृणुत वेदिमेत्य । वसुमतीꣳ रुद्रवतीमादित्यवतीम् ॥ ३। ७। ७। १३॥

९२ वर्ष्मन्दिवः । नाभा पृथिव्याः । यथाऽयं यजमानो न रिष्येत् । देवस्य सवितुः सवे । चतुःशिखण्डा युवतिः सुपेशाः । घृतप्रतीका भुवनस्य मध्ये । तस्याꣳसुपर्णावधि यौ निविष्टौ । तयोर्देवानामधि भागधेयम् । अप जन्यं भयं नुद । अप चक्राणि वर्तय । गृहꣳ सोमस्य गच्छतम् । न वा उवेतन्म्रियसे न रिष्यसि । देवाꣳ इदेषि पथिभिः सुगेभिः । यत्र यन्ति सुकृतो नापि दुष्कृतः । तत्र त्वा देवः सविता दधातु ॥ ३। ७। ७। १४॥ ब्रह्मणो योनिरꣳहसः पङ्क्तिं प्रपद्ये दीक्षा ययाऽऽदित्यो दीक्षया दीक्षितस्तया त्वा दीक्षया दीक्षयाम्योषधयो दीक्षा द्यौस्त्वा दीक्षमाणमनु दीक्षतामप चितिश्चाक्षितिरुत्तरस्मिन्नगमेयं दिशः पाद आदित्यवतीं वर्तय पञ्च च ॥ ७॥

९३ यदस्य पारे रजसः । शुक्रं ज्योतिरजायत । तन्नः पर्षदति द्विषः । अग्ने वैश्वानर स्वाहा । यस्माद्भीषाऽवाशिष्ठाः । ततो नो अभयं कृधि । प्रजाभ्यः सर्वाभ्यो मृड । नमो रुद्राय मीढुषे । यस्माद्भीषा न्यषदः । ततो नो अभयं कृधि ॥ ३। ७। ८। १॥

९४ प्रजाभ्यः सर्वाभ्यो मृड । नमो रुद्राय मीढुषे । उदुस्र तिष्ठ प्रतितिष्ठ मा रिषः । मेमं यज्ञं यजमानं च रीरिषः । सुवर्गे लोके यजमानꣳ हि धेहि । शं न एधि द्विपदे शं चतुष्पदे । यस्माद्भीषाऽवेपिष्ठाः पलायिष्ठाः समज्ञास्थाः । ततो नो अभयं कृधि । प्रजाभ्यः सर्वाभ्यो मृड । नमो रुद्राय मीढुषे ॥ ३। ७। ८। २॥

९५ य इदमकः । तस्मै नमः । तस्मै स्वाहा । न वा उ वेतन्म्रियसे । आशानां त्वा विश्वा आशाः । यज्ञस्य हि स्थ ऋत्वियौ । इन्द्राग्नी चेतनस्य च । हुताहुतस्य तृप्यतम् । अहुतस्य हुतस्य च । हुतस्य चाहुतस्य च । अहुतस्य हुतस्य च । इन्द्राग्नी अस्य सोमस्य । वीतं पिबतं जुषेथाम् । मा यजमानं तमो विदत् । मर्त्विजो मो इमाः प्रजाः । मा यः सोममिमं पिबात् । सꣳसृष्टमुभयं कृतम् ॥ ३। ७। ८। ३॥ कृधि मीढुषेऽहुतस्य च सप्त च ॥ ८॥

९६ अनागसस्त्वा वयम् । इंद्रेण प्रेषिता उप । वायुष्टे अस्त्वꣳशभूः । मित्रस्ते अस्त्वꣳशभूः । वरुणस्ते अस्त्वꣳशभूः । अपां क्षया ऋतस्य गर्भाः । भुवनस्य गोपाः श्येना अतिथयः । पर्वतानां ककुभः प्रयुतो नपातारः । वग्नुनेन्द्रग्ग् ह्वयत । घोषेणामीवाग्श्चातयत ॥ ३। ७। ९। १॥

९७ युक्ताः स्थ वहत । देवा ग्रावाण इन्दुरिन्द्र इत्यवादिषुः । एन्द्रमचुच्यवुः परमस्याः परावतः । आऽस्माथ्सधस्थात् । ओरोरन्तरिक्षात् । आ सुभूतमसुषवुः । ब्रह्मवर्चसं म आसुषवुः । समरे रक्षाग्ंस्यवधिषुः । अपहतं ब्रह्मज्यस्य । वाक्च त्वा मनश्च श्रिणीताम् ॥
३। ७। ९। २॥
९८ प्राणश्च त्वाऽपानश्च श्रीणीताम् । चक्षुश्च त्वा श्रोत्रं च श्रीणीताम् । दक्षश्च त्वा बलं च श्रीणीताम् । ओजश्च त्वा सहश्च श्रीणीताम् । आयुश्च त्वा जरा च श्रीणीताम् । आत्मा च त्वा तनूश्च श्रीणीताम् । शृतोऽसि शृतं कृतः । शृताय त्वा शृतेभ्यस्त्वा । यमिन्द्रमाहुर्वरुणं यमाहुः । यं मित्रमाहुर्यमु सत्यमाहुः ॥ ३। ७। ९। ३॥
९९ यो देवानां देवतमस्तपोजाः । तस्मै त्वा तेभ्यस्त्वा । मयि त्यदिन्द्रियं महत् । मयि दक्षो मयि क्रतुः । मयि धायि सुवीर्यम् । त्रिशुग्घर्मो विभातु मे । आकूत्या मनसा सह । विराजा ज्योतिषा सह । यज्ञेन पयसा सह । तस्य दोहमशीमहि ॥ ३। ७। ९। ४॥
१०० तस्य सुम्नमशीमहि । तस्य भक्षमशीमहि । वाग्जुषाणा सोमस्य तृप्यतु । मित्रो जनान्प्रसमित्र । यस्मान्न जातः परो अन्यो अस्ति । य आविवेश भुवनानि विश्वा । प्रजापतिः प्रजया संविदानः । त्रीणि ज्योतीꣳषि सचते स षोडशी । एष ब्रह्मा य ऋत्वियः । इन्द्रो नाम श्रुतो गणे ॥ ३। ७। ९। ५॥
१०१ प्र ते महे विदथे शꣳसिषꣳ हरी । य ऋत्वियः प्र ते वन्वे । वनुषो हर्यतं मदम् । इन्द्रो नाम घृतं न यः । हरिभिश्चारु सेचते । श्रुतो गण आ त्वा विशन्तु । हरिवर्पसं गिरः । इन्द्राधिपतेऽधिपतिस्त्वं देवानामसि । अधिपतिं माम् । आयुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु ॥
३। ७। ९। ६॥
१०२ इन्द्रश्च सम्राड्वरुणश्च राजा । तौ ते भक्षं चक्रतुरग्र एतम् । तयोरनु भक्षं भक्षयामि । वाग्जुषाणा सोमस्य तृप्यतु । प्रजापतिर्विश्वकर्मा । तस्य मनो देवं यज्ञेन राध्यासम् । अर्थे गा अस्य जहितः । अवसानपतेऽवसानं मे विन्द । नमो रुद्राय वास्तोष्पतये । आयने विद्रवणे ॥ ३। ७। ९। ७॥
१०३ उद्याने यत्परायणे । आवर्तने विवर्तने । यो गोपायति तꣳ हुवे । यान्यपामित्यान्यप्रतीत्तान्यस्मि । यमस्य बलिना चरामि । इहैव सन्तः प्रति तद्यातयामः

। जीवा जीवेभ्यो निहराम एनत् । अनृणा अस्मिन्ननृणाः परस्मिन् । तृतीये लोके अनृणाः स्याम । ये देवयाना उत पितृयाणाः ॥ ३। ७। ९। ८॥
१०४ सर्वान्पथो अनृणा आक्षीयेम । इदमूनुः श्रेयोऽवसानमागन्म । शिवे नो द्यावापृथिवी उभे इमे । गोमद्धनवदश्ववदूर्जस्वत् । सुवीरा वीरैरनु संचरेम । अर्कः पवित्रꣳ रजसो विमानः । पुनाति देवानां भुवनानि विश्वा । द्यावापृथिवी पयसा संविदाने । घृतं दुहाते अमृतं प्रपीने । पवित्रमर्को रजसो विमानः । पुनाति देवानां भुवनानि विश्वा । सुवर्ज्योतिर्यशो महत् । अशीमहि गाधमुत प्रतिष्ठाम् ॥ ३। ७। ९। ९॥ चातयत श्रीणीताꣳ सत्यमाहुरशीमहि गणे कुरु विद्रवणे पितृयाणा अर्को रजसो विमानस्त्रीणि च ॥ ९॥
१०५ उदस्तांप्सीथ्सविता मित्रो अर्यमा । सर्वानमित्रानवधीद्युगेन । बृहन्तं मामकरद्वीरवन्तम् । रथन्तरे श्रयस्व स्वाहा पृथिव्याम् । वामदेव्ये श्रयस्व स्वाहाऽन्तरिक्षे । बृहति श्रयस्व स्वाहा दिवि । बृहता त्वोपस्तभ्नोमि । आ त्वा ददे यशसे वीर्याय च । अस्मास्वघ्निया यूयं दधाथेन्द्रियं पयः । यस्ते द्रप्सो यस्त उदर्षः ॥ ३। ७। १०। १॥
१०६ दैव्यः केतुर्विश्वं भुवनमाविवेश । स नः पाह्यरिष्ट्यै स्वाहा । अनु मा सर्वो यज्ञोऽयमेतु । विश्वे देवा मरुतः सामार्कः । आप्रियश्छन्दाꣳसि निविदो यजूꣳषि । अस्यै पृथिव्यै यद्यज्ञियम् । प्रजापतेर्वर्तनिमनुवर्तस्व । अनु वीरैरनुराध्याम गोभिः । अन्वश्वैरनु सर्वैरु पुष्टैः । अनु प्रजयाऽन्विन्द्रियेण ॥ ३। ७। १०। २॥
१०७ देवा नो यज्ञमृजुधा नयन्तु । प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे । प्रत्यश्वेषु प्रतितिष्ठामि गोषु । प्रति प्रजायां प्रतितिष्ठामि भव्ये । विश्वमन्याऽभिवावृधे । तदन्यस्यामधिश्रितम् । दिवे च विश्वकर्मणे । पृथिव्यै चाकरं नमः । अस्कान्द्यौः पृथिवीम् । अस्कानृषभो युवा गाः ॥ ३। ७। १०। ३॥
१०८ स्कन्नेमा विश्वा भुवना । स्कन्नो यज्ञः प्रजनयतु । अस्कानजनि प्राजनि । आस्कन्नाज्जायते वृषा । स्कन्नात्प्रजनिषीमहि । ये देवा येषामिदं भागधेयं बभूव । येषां प्रयाजा उतानूयाजाः । इन्द्रज्येष्ठेभ्यो वरुणराजभ्यः । अग्निहोतृभ्यो देवेभ्यः स्वाहा । उत त्या नो दिवा मतिः ॥
३। ७। १०। ४॥
१०९ अदितिरूत्याऽऽगमत् । सा शन्ताची मयस्करत् । अप स्रिधः । उत त्या दैव्या

भिषजा । शं नस्करतो अश्विना । यूयातामस्मद्रपः । अप स्रिधः । शमग्निरग्निभिस्करत् । शं नस्तपतु सूर्यः । शं वातो वात्वरपाः ॥ ३। ७। १०। ५॥

११० अप स्रिधः । तदित्पदं न विचिकेत विद्वान् । यन्मृतः पुनरप्येति जीवान् । त्रिवृद्यद्भुवनस्य रथवृत् । जीवो गर्भो न मृतः स जीवात् । प्रत्यस्मै पिपीषते । विश्वानि विदुषे भर । अरंगमाय जग्मवे । अपश्चाद्दघ्वने नरे । इन्दुरिन्द्रमवागात् । इन्दोरिन्द्रोऽपात् । तस्य त इन्दविन्द्रपीतस्य मधुमतः । उपहूतस्योपहूतो भक्षयामि ॥ ३। ७। १०। ६॥

उदर्‌ष इन्द्रियेण गा मतिररपा अंगात्रीणि च ॥ १०॥

१११ ब्रह्म प्रतिष्ठा मनसो ब्रह्म वाचः । ब्रह्म यज्ञानाꣳ हविषामाज्यस्य । अतिरिक्तं कर्मणो यच्च हीनम् । यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन् । स्वाहाकृताऽऽहुतिरेतु देवान् । आश्रावितमत्याश्रावितम् । वषट्कृतमत्यनूक्तं च यज्ञे । अतिरिक्तं कर्मणो यच्च हीनम् । यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन् । स्वाहाकृताऽऽहुतिरेतु देवान् ॥ ३। ७। ११। १॥

११२ यद्वो देवा अतिपादयानि । वाचा चित्प्रयतं देव हेडनम् । अरायो अस्माꣳ अभिदुच्छुनायते । अन्यत्रास्मन् मरुतस्तन्निधेतन । ततं म आपस्तदु तायते पुनः । स्वादिष्ठा धीतिरुचथाय शस्यते । अयꣳ समुद्र उत विश्वभेषजः । स्वाहाकृतस्य समुतृण्णुतर्भुवः । उद्वयं तमसस्परि । उदु त्यं चित्रम् ॥ ३। ७। ११। २॥

११३ इमं मे वरुण तत्त्वा यामि । त्वं नो अग्ने स त्वं नो अग्ने । त्वमग्ने अयासि प्रजापते । इमं जीवेभ्यः परिधिं दधामि । मैषां नु गादपरो अर्धमेतम् । शतं जीवन्तु शरदः पुरूचीः । तिरो मृत्युं दधतां पर्वतेन । इष्टेभ्यः स्वाहा वषडनिष्टेभ्यः स्वाहा । भेषजं दुरिष्ट्यै स्वाहा निष्कृत्यै स्वाहा । दौरार्द्ध्यै स्वाहा दैवीभ्यस्तनूभ्यः स्वाहा ॥ ३। ७। ११। ३॥

११४ ऋद्ध्यै स्वाहा समृद्ध्यै स्वाहा । यत इन्द्र भयामहे । ततो नो अभयं कृधि । मघवञ्छग्धि तव तन्न ऊतये । वि द्विषो वि मृधो जहि । स्वस्तिदा विशस्पतिः । वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नः । स्वस्तिदा अभयंकरः । आभिर्गीर्भिर्यदतो न ऊनम् ॥ ३। ७। ११। ४॥

११५ आप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि । भूयिष्ठभाजो अध ते स्याम । अनाज्ञातं यदाज्ञातम् । यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय । त्वꣳ हि वेत्थ यथातथम् । पुरुषसंमितो यज्ञः । यज्ञः पुरुषसंमितः । अग्ने तदस्य

कल्पय । त्वꣳ हि वेत्थ यथातथम् । यत्पाकत्रा मनसा दीनदक्षा न । यज्ञस्य मन्वते मर्तासः । अग्निष्टद्धोता क्रतुविद्विजानन् । यजिष्ठो देवाꣳ ऋतुशो यजाति ॥ ३। ७। ११। ५॥ देवाग्निश्चित्रं तनूभ्यः स्वाहोनं पुरुषसंमितोऽग्ने तदस्य कल्पय पञ्च च ॥ ११॥
११६ यद्देवा देवहेडनम् । देवासश्चकृमा वयम् । आदित्यास्तस्मान्मा मुञ्चत । ऋतस्यर्तेन मामुत । देवा जीवनकाम्या यत् । वाचाऽनृतमूदिम । अग्निर्मा तस्मादेनसः । गार्हपत्यः प्रमुञ्चतु । दुरिता यानि चकृम । करोतु मामनेनसम् ॥ ३। ७। १२। १॥
११७ ऋतेन द्यावापृथिवी । ऋतेन त्वꣳ सरस्वति । ऋतान्मा मुञ्चताꣳहसः । यदन्यकृतमारिम । सजातशꣳसादुत वा जामिशꣳसात् । ज्यायसः शꣳसादुत वा कनीयसः । अनाज्ञातं देवकृतं यदेनः । तस्मात्त्वमस्माज्जातवेदो मुमुग्धि । यद्वाचा यन्मनसा । बाहुभ्यामूरुभ्यामष्ठीवद्भ्याम् ॥ ३। ७। १२। २॥
११८ शिश्नैर्यदनृतं चकृमा वयम् । अग्निर्मा तस्मादेनसः । यद्धस्ताभ्यां चकर किल्बिषाणि । अक्षाणां वग्नुमुप जिघ्नमानः । दूरेपश्या च राष्ट्रभृच्च । तान्यप्सरसावनु दत्ता मृणानि । अदीव्यन्नृणं यदहं चकार । यद्वाऽदास्यन्थ्संजगारा जनेभ्यः । अग्निर्मा तस्मादेनसः । यन्मयि माता गर्भे सति ॥ ३। ७। १२। ३॥
११९ एनश्चकार यत्पिता । अग्निर्मा तस्मादेनसः । यदा पिपेष मातरं पितरम् । पुत्रः प्रमुदितो धयन् । अहिꣳसितौ पितरौ मया तत् । तदग्ने अनृणो भवामि । यदन्तरिक्षं पृथिवीमुत द्याम् । यन्मातरं पितरं वा जिहिꣳसिम । अग्निर्मा तस्मादेनसः । यदाशसा निशसा यत्पराशसा ॥ ३। ७। १२। ४॥
१२० यदेनश्चकृमा नूतनं यत्पुराणम् । अग्निर्मा तस्मादेनसः । अतिक्रामामि दुरितं यदेनः । जहामि रिप्रं परमे सधस्थे । यत्र यन्ति सुकृतो नापि दुष्कृतः । तमारोहामि सुकृतां नु लोकम् । त्रिते देवा अमृजतैतदेनः । त्रित एतन्मनुष्येषु मामृजे । ततो मा यदि किंचिदानशे । अग्निर्मा तस्मादेनसः ॥ ३। ७। १२। ५॥
१२१ गार्हपत्यः प्रमुञ्चतु । दुरिता यानि चकृम । करोतु मामनेनसम् । दिवि जाता अप्सु जाताः । या जाता ओषधीभ्यः । अथो या अग्निजा आपः । ता नः शुन्धन्तु शुन्धनीः । यदापो नक्तं दुरितं चराम । यद्वा दिवा नूतनं यत्पुराणम् । हिरण्यवर्णास्तत उत्पुनीत नः । इमं मे वरुण तत्त्वा यामि । त्वं नो अग्ने स त्वं नो अग्ने । त्वमग्ने अयाऽसि ॥ ३। ७। १२। ६॥ अनेनसमष्ठीवद्भ्याꣳसति पराशसाऽऽनशेऽग्निर्मा तस्मादेनसः पुनीत

नस्त्रीणि च ॥ १२॥ यद्देवा देवा ऋतेन सजातशꣳसाद्यद्वाचा यद्धस्ताभ्यामदीव्यं यन्मयि
माता यदापिपेष यदन्तरिक्षं यदाशसाऽतिक्रामामि त्रिते देवा दिवि जाता अप्सु जाता
यदाप इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयाऽसि ॥
१२२ यत्ते ग्राव्णा चिच्छिदुः सोम राजन् । प्रियाण्यङ्गानि स्वधिता परूꣳषि ।
तथ्संधथ्स्वाज्येनोत वर्धयस्व । अनागसो अधमिथ्संक्षयेम । यत्ते ग्रावा बाहुच्युतो
अचुच्यवुः । नरो यत्ते दुदुहुर्दक्षिणेन । तत्त आप्यायतां तत्ते । निष्ट्यायतां देव सोम ।
यत्ते त्वचं बिभिदुर्यच्च योनिम् । यदास्थानात्प्रच्युतो वेनसि त्मना ॥ ३। ७। १३। १॥
१२३ त्वया तथ्सोम गुप्तमस्तु नः । सा नः संधाऽसत्परमे व्योमन् । अहाच्छरीरं पयसा
समेत्य । अन्योऽन्यो भवति वर्णो अस्य । तस्मिन्वयमुपहूतास्तव स्मः । आ नो भज
सदसि विश्वरूपे । नृचक्षाः सोम उत शुश्रुगस्तु । मा नो विहासीद्गिर आवृणानः ।
अनागास्तनुवो वावृधानः । आ नो रूपं वहतु जायमानः ॥ ३। ७। १३। २॥
१२४ उपक्षरन्ति जुह्वो घृतेन । प्रियाण्यङ्गानि तव वर्धयन्तीः । तस्मै ते सोम नम
इद्वषड्व । उप मा राजन्थ्सुकृते ह्वयस्व । संप्राणापानाभ्याꣳ समु चक्षुषा त्वम् । सꣳ
श्रोत्रेण गच्छस्व सोम राजन् । यत्त आस्थितꣳ शमु तत्ते अस्तु । जानीतान्नः संगमने
पथीनाम् । एतं जानीतात्परमे व्योमन् । वृकाः सधस्था विद रूपमस्य ॥
३। ७। १३। ३॥
१२५ यदा गच्छात्पथिभिर्देवयानैः । इष्टापूर्ते कृणुतादाविरस्मै । अरिष्टो राजन्नगदः
परेहि । नमस्ते अस्तु चक्षसे रघूयते । नाकमारोह सह यजमानेन । सूर्यं गच्छतात्परमे
व्योमन् । अभूद्देवः सविता वन्द्यो नु नः । इदानीमह्न उपवाच्यो नृभिः । वि यो रत्ना
भजति मानवेभ्यः । श्रेष्ठं नो अत्र द्रविणं यथा दधत् । उप नो मित्रावरुणाविहावतम्
। अन्वादीध्याथामिह नः सखाया । आदित्यानां प्रसितिर्हेतिः । उग्रा शतापाष्ठा घविषा
परि णो वृणक्तु । आप्यायस्व सं ते ॥ ३। ७। १३। ४॥
त्मना जायमानोऽस्य दधत्पश्च च ॥ १३॥
१२६ यद्दिदीक्षे मनसा यच्च वाचा । यद्वा प्राणैश्चक्षुषा यच्च श्रोत्रेण । यद्रेतसा
मिथुनेनाप्यात्मना । अद्भ्यो लोका दधिरे तेज इन्द्रियम् । शुक्रा दीक्षायै तपसो विमोचनीः
। आपो विमोक्त्रीर्मयि तेज इन्द्रियम् । यदृचा साम्ना यजुषा । पशूनां चर्मन् हविषा
दिदीक्षे । यच्छन्दोभिरोषधीभिर्वनस्पतौ । अद्भ्यो लोका दधिरे तेज इन्द्रियम् ॥ ३। ७।
१४। १॥